TRIVANDRUM SANSKRIT SERIES

No. LXXIX.

THE

ARTHASÂSTRA

OF

KAUTALYA

with the commentary Srîmûla of

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÁSTRÍ,

HONORARY MEMBER OF THE ROYAL ASIATIC SOCIETY OF GREAT BRITAIN AND IRELAND,

Curator of the Department for the Publication of Sanskrit Manuscripts, Trivandrum.

EDITED BY THE COMMENTATOR.

Part I — 1 & 2 Adhikaranas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1924.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ७९.

कौटलीयम्

अर्थशास्त्रं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण

लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

विरचितया श्रीमूलाख्यया व्याख्यया

समुपेतं

तेनैव संशोधितम् ।

प्रथमः सम्पुटः—प्रथमद्वितीयाधिकरणे ।

तच्च

अनन्तशयने

महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन

राजकीयमुद्रणयन्त्रालये तदध्यक्षेण

मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९९, क्रैस्ताब्दाः १९२४.

To My August Sovereign,

COLONEL HIS HIGHNESS,

Sri Mula Rama Varma,

G. C. S. I., G. C. I. E.,

KULASEKHARA KIRITAPATI,

Whose Auspicious Rule

Has surpassed

In Beneficence, Wisdom and Prosperity,

The record

Of even the Narendra of Kautalya,

I Dedicate,

By Gracious Permission,

This edition of the renowned Arthasastra

Of the illustrious Sage,

Whose pre-eminence in every Sastra

Was only equalled

By his transcendent Skill

As Administrator, Reformer and Statesman,

Along with my Bhashya

SriMulam

INTRODUCTION.

1. Necessity for an improved edition of the Arthasāstra of Kautalya.

It gives me great pleasure to announce that the Trivandrum Sanskrit Series has now been enriched by the addition of the important work, the Arthasāstra of Kauṭalya. An edition of this work based on a single manuscript was first brought out in the year 1909 by **Mr.** Shāma Sāstrī B. A., PH. D., in the Mysore Government Sanskrit Series. When I read through it with an amount of concentration which the rareness and the merit of the work would demand, I found it abounded with errors, such as, the word of a previous sentence joined to a subsequent sentence and vice versa. The work has apparently a simple style and a choice vocabulary, but the nature of the subjects dealt with is such that even a talented pandit cannot hope to easily understand it. What then will be the condition if it contains errors too? It then struck me that a fresh edition, based on sufficient manuscript materials, was indispensable.

2. Acquisition of new manuscripts.

Accordingly, I made a search for new manuscripts and lighted upon two palm-leaf manuscripts of the work among a large number of other important works, in the library of Swāmiar Maṭham at Thiruppārpu near Kottayam in North Travancore. They are complete and written in Malayalam characters and almost free from errors. One of them, marked क in this edition, appears to be three or four centuries old and many of its leaves are either extremely decayed or missing. The other marked ख is a recent manuscript and is about a century old. The Madras Government Oriental manuscripts Library also contains two manuscripts, one being an almost correct copy of a palm-leaf manuscript in Malayalam characters belonging to the Raja of Edappalli in the Travancore State, while the other in Telugu characters, transcribed from an incorrect Telugu manuscript beginning from the 7th prakarana in the Kaṇṭakasodhana Adhikarana. These two are marked ग and घ respectively and variants have been taken from them. A fifth manuscript copy also was found to exist in the Government Mss. Library Cochin, but this was even more worn-out than the manuscript क. It bears striking resemblances to the latter in respect of size,

characters and hand-writing. But in view of its exceedingly decayed condition, I have not made use of it.

3. Necessity for adding a commentary to the text.

When I set about revising the text with the help of these materials, I heard that Mr. Shāma Sāstrī had rendered his edition into English. I obtained a copy of it in order to see whether it would be of any use to my edition. But it seemed to me that many passages were not correctly translated. For example:

"मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छाया-नालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः ॥"

(1-अधि. 7-अध्या.)

After giving general instruction in regard to some of the duties of Kings, Kauṭalya mentions in the above passage the supreme duty of making Āchāryas and ministers a barrier, as it were, of the Kings. The meaning of the passage is, that a King should appoint, as a barrier, either Achāryas or Ministers who would boldly and effectively check him whenever he shows inclination to stray away from the path of righteousness. Here, Kauṭalya gives expression to a noble conception of Government, the summum bonum of the subjects, namely, a King, though he has control over all his subjects, should appoint certain persons who would keep him under control. Mr. Shāma Sāstrī has taken the passage in quite a different sense. He renders it thus: "those teachers and ministers who keep him from falling a prey to dangers, and who, by striking the hours of the day as determined by measuring shadows warn him of his careless proceedings even in secret shall invariably be respected." I do not see how this meaning was made out. If the word मर्यादा is taken as meaning 'respect' in Sanskrit as it does colloquially in Tamil, Telugu and Canarese, those who study the Arthasāstra will not grasp the real meaning and perceive the noble conception of Āchārya Kauṭalya. Now, it appeared to me that the purification of the text alone will not suffice, that the meaning has also to be preserved from misinterpretations and, to attain this object, a commentary should also be added to the text.

4. Fragments of ancient commentaries secured.

After a persistent search, I obtained manuscripts of two commentaries from the Madras Government Oriental library. One of them was a fragmentary copy of a learned Sanskrit commentary, called Pratipadapanchikā by Bhaṭṭasvāmin,

containing the portion from the 8th to the last chapter of the second adhikaraṇa only. The other contained a portion of a commentary known as Nayachandrikā by Mādhavayajvan from the 7th Adhyāya in the 7th adhikaraṇa up to a portion of the 4th adhyāya in the 12th adhikaraṇa. Their source appears to be a palm-leaf manuscript belonging to the Kerala country. But they were so full of errors and gaps that it seemed a hopeless task to make anything out of them without the help of better manuscripts. In these circumstances and as there appeared to be no chance of discovering other manuscripts, I did not think it advisable to send the fragments to the press. But I worked at them strenuously and understood the text-portions handled therein. Besides, a palm-leaf manuscript of an ancient Malayalam version of the Arthasāstra on the line of Bhaṭṭasvāmin's commentary was found to exist in the Palace Library. It runs up to the end of the 7th adhikaraṇa and appears to be about two or three centuries old. An exactly similar copy was also found in the Madras Government Oriental Manuscript Library and I had occasion to make use of it. But the copies of the Malayalam version were defective, containing omissions of many passages, of even five or six chapters consecutively in one place; yet they were of considerable help to me in determining the correct readings and in understanding the text. These were all the materials I had the good fortune to collect.

The work teems with several topics, which, owing to their technical character, can be grasped only with the help of traditional instructions or commentaries. In the absence of these materials, our ignorance in regard to many topics would be perpetual.

5. Preparation of a new commentary.

When the meaning of the text was somewhat grasped after spending many laborious days over the materials, the desire arose in me to place it before the public. Since no ancient commentary in its publishable shape is available, I thought of writing one of my own and wrote it on the method of the ancient commentaries. I have given my commentary the significant name of "Srīmūlam"—literally, the source of prosperity—after the name of His Highness the Mahā Rāja of Travancore Srī Mūlam Tirunāl, whose enlightened patronage has ever been the pole-star in my literary enterprises. The text along with the commentary is now being printed.

6. Distinguishing features of the new edition.

In the present edition, the text has undergone a scrutinising search in the light of the new materials and consequently, it can be said to have assumed quite a new shape. Variant readings in good numbers and of considerable importance, that are not seen in the Mysore edition, have been inserted while spurious ones are all eliminated and other errors rectified. Such of the variants that have special import to convey are dealt with in the commentary. Improvements of this nature will be obvious from a perusal of the text and the commentary.

7. The book divided into three parts.

The text together with the commentary has grown bulky and it is therefore proposed to issue it in three parts. The first is now issued; the second and the third will follow in due time.

There are 15 adhikaraṇas in this work and the first part contains the first two adhikaraṇas. The next six adhikaraṇas will go to form the second part and the rest the third. The first adhikaraṇa known as वैनयिकाधिकरण consists of 21 chapters and the second अध्यक्षप्रचाराधिकरण is made up of 36 chapters. The contents of these two adhikaraṇas are given in the list attached to this part.

8. Kauṭalya and his other names

The author of this work is the venerable āchārya, known by the three names, Kauṭalya, Chāṇakya and Vishṇugupta. He was called Kauṭalya having been born in Kuṭala Gotra and Chāṇakya after his native land Chaṇaka. The name Vishṇugupta "protected by Vishṇu"—was given him by his father during the nāmakarana ceremony. Kautilya (इकारमध्य) is certainly a misnomer. For, neither the term Kauṭilya nor its root Kuṭila is explained in Nighaṇṭus as Gotrarishi and crooked. On the other hand, the word Kuṭala is mentioned by Kesavasvāmin in his Nānārthārṇavasamkshepa as meaning both Gotrarishi and an ornament—

"अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नप् पुनः ।
विद्यादाभरणेऽथ त्रिः कुटिलं कुञ्चिते भवेत् ।
तगरे स्त्री तगरपादिकायां स्त्रियामिति ॥"

From this it is clear that Kauṭalya is the correct name having for its root Kuṭala. It is further corroborated by the fact that all the manuscripts of the text and the commentaries noticed before, read throughout as Kauṭalya and not

Kauṭilya. But the mistake was observed and corrected by me only after the first 40 pages were printed.

9. Date of Kautalya. History has it that Āchārya Kautalya, having been slighted by the Nandas, overthrew them and placed Chandragupta Maurya on the throne of the Magadha empire. The Archaeological researches of India have shown that Chandragupta reigned from 321—298 B. C. and Kāmandaka and other later writers on Indian polity refer to Kautalya and his Arthasastra as authority for their works.

It may be said that Visvarūpāchārya alias Suresvarāchārya, a disciple of the great Sankarāchārya, does not mention Kautalya and his Arthasāstra when dealing with topics relating to Arthasāstra in his commentary, Bālakrīdā, on the Yājnavalkyasmriti (T. S. S. No. 74). But, from this, it must not be hazarded that either Kautalya was not earlier than Visvarūpa or unknown to the latter. For, though Visvarūpa knew the Arthasāstra of Kautalya, there are grounds to justify his omission to make mention of it, as will be seen from the following quotation from my introduction to the Bālakrīdā:—

"It is, however, a special feature of the Bālakrīdā evidencing to its high antiquity as well as its author's regard for ancient works, that among the multitude of works and authors that it cites as authority, there is none that is generally assigned to the Christian era, but all of them, being Vedic works and Smritis of the Vedic type and their authors, belong to the centuries that preceded Christ. Then again, when context required quotations from an authority on the Arthasāstra, our author does not resort to Kautalya but to Brihaspati* and Visālāksha, the predecessors of Kautalya, as is seen from the following:—

* A manuscript of the work called Bārhaspatyasūtra exists in our possession and also in the Government Oriental Mss. Library Madras; and it has recently been published in Devanagari characters, in Lahore I doubt whether that work is the Arthasāstra of Brihaspati quoted by Kautalya. For, no subject of importance pertaining to Arthasāstra is dealt with in it; its merit as a literary composition is of a poor order and the present quotations from Brihaspati are not also found in it. Besides, while Kautalya says that, according to the school of Brihaspati, the Vidyas are two viz., Vārta and Dandanīti, "वार्ता दण्डनीतिश्चेति बार्हस्पत्याः" (Vainayikadhikārika, Adhyaya 2) the statement "दण्डनीतिरेका विद्या' found in the published Bārhaspatyasūtra is a point not in favour of its authenticity. But probably it is a work of trifling interest having a few maxims gathered mainly from the Arthasāstra of Brihaspati; just like the small work which, with some moral sayings of the Arthasāstra of Kautalya, goes by the name of Chāṇakyaniti or Chāṇakyasutra and is published as a work of Chāṇakya.

"यदाह बृहस्पतिः—'स्वधर्मविदनुरक्तः शुचिरनुद्धत उद्युक्तो देशकालविनीतिनिगमेतिहासकुशलोऽव्यसनी मृदुरर्थशास्त्रकृतयोग्यो हस्त्यश्वपुरुषाचाराहोरात्रयामनिर्गमाविनिश्चितमतिश्च स्वपरबलबलाबलज्ञो बलाधिकृतः सेनापतिः स्यात्। कुलाढ्य उद्युक्तो मृदुरुदात्तः समरचित्तः शूरोऽनुरक्तोऽभेद्यः पत्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात्। वनकुलकालजातिसात्म्यगुणवयःशीलायुरादानगमनकल्पनावान् व्यपगतभयो विजयोर्जितमना हस्त्यध्यक्षः स्यात्। क्षेत्रजातिसात्म्यगुणलक्षणवाहनाख्यज्ञोऽत्यर्थसमर्थः शुचिरनुद्धतोऽनुरूपोऽश्वाध्यक्षः स्यात्। सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात्। उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलोऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिरहार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात्। अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणसन्दिग्धविवेककृदुपरिकः स्यात्। इति।" (Yajnavalkya Adhyāya I, Sloka 307).

तथाच बृहस्पतिः—'ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्यामुपास्य देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धावञ्चकगृहीतायुधायातयामविश्वासोत्पन्नासन्नपरिवृतः' इति" (Yājnavalkya Adhyāya I, Sloka 323).

"एवञ्च विशालाक्षः—

वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक्॥"

(Yājnavalkya Adhyāya I, Sloka 328).

This, I think, is quite as it should be. For it is the proper practice of a commentator that he should supply deficiencies in the statements of an author, advisedly left out to be learnt from other sources, by having recourse to those writers who are known either as ancient or as contemporary authority to the author himself, but not to those that are posterior to the author. Visvarūpāchārya must have taken the Arthasāstra of Brihaspati and Visālāksha to be Ārsha works known to Yājnavalkya and therefore quoted from them to supplement Yājnavalkya's statements, but not from Kauṭalya who was posterior to Yājnavalkya. And as for the fact that Kauṭalya was later than Yājnavalkya there need be no shadow of doubt. When dealing with Pratilomajaputras i. e. sons begotten by men of lower through women of higher castes, Kauṭalya defines Sūta as a son begotten by a Kshatriya through a Brāhmaṇa woman and Māgadha as a son begotten by a Vaisya through a Kshatriya woman, and hastens to restrict the application of

* Brihaspati mentions his name in his work as does Kauṭalya.

his definition in the case of Sūta of Puranic celebrity, and Māgadha the Panegyrist, both sprung up from the holy sacrificial ground of the king Prithu, by way of saying 'पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः'. (Kauṭalya Adhyāya-64). This means that Sūta otherwise known as Romaharshaṇa who narrated the Puranas to Saunaka and Māgadha who is mentioned along with Sūta in the Puranas, are distinct from Sūta and Māgadha born in the inverse order of castes; and that both of them excel the Brāhmaṇas and Kshatriyas in purity of birth. This is quite in keeping with the Puranas which state,

'हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः ।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते ! ॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥'

(Vishṇu Purāṇa, Amsa I Chap. 13).

'ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित् ।'

(Agni Purāṇa Chap. I).

'त्वया सूत ! महाबुद्धे ! भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥'

(Kāurma Purāṇa Chap. I).

That is Sūta of Puranic celebrity, the pupil of Vyāsa, not being born of the womb of a mother, was far above the Sūta of the Pratilomaja class and he was a Brāhmaṇa and an incarnation of God. Hence it is possible to infer that Kautalya otherwise known as Chāṇakya knew well of Sūta, the Puranas as well as their wide celebrity. It is certain, therefore, that centuries must have intervened between Sūta and Kauṭalya before the latter could have believed in the works of Sūta as Puranas of archaic celebrity. When it is said that Sūta flourished centuries before Kauṭalya, it naturally follows that Yājnavalkya (or a pupil of his), the author of the smriti, who studied his Yājurveda under Vaisampāyana, a contemporary of Sūta, also lived long before Kauṭalya.

And accordingly we see that Kauṭalya reveals his high regard for and acquaintance with the Yājnavalkyasmriti by

adopting it *ad verbum*, *ad sensum* as well as by explaining and supplementing it when the latter treats of Sāhasadandas in the second Adhyāya. The following are quoted here as instances. Here is a sloka from the Yājnavalkyasmriti:—

'करपाददतो भङ्गे छेदने कर्णनासयोः ।
मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥'

and a sentence of similar nature from Kauṭalya is this:—

मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः । पाणिपाददन्तभङ्गे कर्णनासाछेदने व्रणविदारणे चान्यत्र दुष्टव्रणेभ्यः ।'

(DharmasthIya Adhyāya 19).

Here are other slokas from the Yājnavalkyasmriti:—

'स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः ।
अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन् ॥
शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः ।
अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥
वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकृत् ।
साधारणस्यापलापी दासीगर्भविनाशकृत् ॥
पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः ।
एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥'

The following are the parallel sentences from Kauṭalya:—

'विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डाः) ।

शाक्यजीवकादीन् देवपितृकार्येषु भोजयतः शत्यो दण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च, पूर्वः साहसदण्डः ।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः स्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः, कान्तारे मध्यमः ।'

(DharmasthIya Adhyāya 20).

Compare one more instance from the Smriti:—

'अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥'

with Kauṭalya's,

पुरुषमबन्धनीयं बध्नतो बन्धयतो बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डः ।'

(DharmasthIya Adhyāya 20).

It can be clearly seen from the above quotations of Kauṭalya that the words in black alone are his own and that the rest are the same as those found in the Smriti. The word स्वच्छन्द in the line स्वच्छन्दविधवागामी is an adverb and means "of one's own accord but not with the consent of Vidhavā", while च्छन्दवासिनीम् in Kauṭalya means छन्देन वसन्तीम् that is, remaining taciturn without feeling lustful. When Kauṭalya says शपथवाक्यानुयोगमनिसृष्टं कुर्वतः, we should not take it to be anything other than his comments on अयुक्तं शपथं कुर्वन् of the Smriti. शपथवाक्यानुयोग means the demand of judges for statements on oath from witnesses and others. It is निसृष्ट i. e., permissible for Judges, they being authorised in it for the conduct of judicial investigations. What is निसृष्ट for one is also युक्त i. e., a right for the same, as it comes within the sphere of one's duties or as it is worthy of being done by the same. While for others it is अनिसृष्ट and अयुक्त as it does not come within the sphere of their duties or as it is not worthy of being done by them. It follows from this that the words निसृष्ट, युक्त, स्वाधिकारविषय and अनुष्ठानार्ह are of the same meaning as also the words अनिसृष्ट, अयुक्त, स्वाधिकाराविषय, and अनुष्ठानानर्ह are, contrarily. And in the opinion of Kauṭalya this unauthorised demand for statements on oath is what is meant by the word शपथ of the Smriti. But the Mitākshara gives quite a different interpretation of the passage without consulting Kauṭalya on the point.

Similarly, we should explain the sentences अयोग्यो योग्य-कर्मकृत् and युक्तकर्मणि चायुक्तस्य to be of the same meaning. योग or नियोग means a privilege and one having योग is युक्त and one deserving of योग is योग्य. Thus the difference between योग्य and युक्त is but nominal and both really mean the same thing."

Again, Yājnavalkya omits to mention the punishment for throwing filth such as urine, dung etc upon others, but his commentator, Visvarūpa, tells us that the word निष्ठ्यूत in 'अमेध्यपार्ष्णिनिष्ठ्यतस्पर्शने द्विगुणः स्मृतः' (याज्ञवल्क्य. अध्या. २. श्लो० २१८.) is indicative of and includes also the urine, dung etc. And, what the word निष्ठ्यूत indicates, Kauṭalya expresses explicitly in 'तैरेवामेध्यैः पादष्ठीविकायां च षट्पणः। छर्दिमूत्रपुरीषादिभिर्द्वादशपणः।' Thus, it is evident that Kauṭalya was indebted to the Smritis and his position in respect of the Smritis was that of a commentator. It, therefore, follows that the contention, namely Yājnavalkya is posterior to Kauṭalya, is untenable.

10. Other works of Kautalya.

It is clear, from a perusal of the Arthasāstra, that Kautalya was a master in the varied fields of knowledge, and that he was the possessor of an intuitive vision. Hence, it is not improbable that he should have tried his hand on other Sastras too. We know that the commentator, Bhattasvāmin, has referred to a work called Dhātu-Kautalya in the Ākarakarmāntapravartana and Varāhamihira quotes him in the Brihatsamhitā thus:—

'अभ्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम् ।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेन् कदाचिदनृषिर्मनसापि पारम् ॥'

(Part I. p. 68).

Besides, the author of the commentary, Jayamangala, on the Vātsyāyanā Kāmasūtra, commenting on म्लेच्छितविकल्प refers to a work of Kautalīya—

"तद् यथा कौटलीयं—
दादेः क्षान्तस्य कादेश्च स्वरयोरुभयोरपि ।
बिन्दूष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम् ॥"

11. Archaic usages.

There are some archaic usages in the work such as पश्चाह: उभयतोरात्रम् and these are reserved for consideration in the last part of the work.

12. Predecessors of Kautalya.

Kautalya often refers to his predecessors in the field whose names are as follow:—

(1) Mānavas (the followers of Manu).
(2) Bārhaspatyas (the followers of Brihaspati).
(3) Ousanasas (the followers of Sukra).
(4) Bhāradvāja (Dronāchārya).
(5) Visālāksha.
(6) Parāsara (प्रसिद्धः).
(7) Pisuna (Nārada).
(8) Kaunapadanta (Bhīshma).
(9) Vātavyādhi (Uddhava).
(10) Bāhudantīputra (Indra).

Among these ten founders of the school of Arthasāstra, nothing particular is known about Visālāksha, but passages from his Arthasāstra, cited by Visvarūpa, have already been given.

13. Arthasāstra, a glorious work.

The Arthasāstra describes a method of Government by which a king should rule for the welfare of his millions of subjects, just as a learned householder, treading the path of virtue, alert in the performance of his duties, ever cautious and dexterous in preventing the treachery of his enemies, works so ably for the well-being of his own family. There is no legitimate taxation of the subjects, no fair distribution of wealth, which is not touched upon in this work. Kautalya advocates a system of watching the conduct of the subjects as well as of officers of grades and of meting out punishment to them when found guilty, which will tend to prevent quarrels between subjects, oppressions by officers and courtiers and seditious propaganda. The institution of espionage is mentioned as the life-blood of Government, a means to ascertain the purity or impurity in the conduct of all subjects. To be brief, protection of one's own Kingdom first and when that is ensured, enterprise for the acquisition of enemies' territories—this is the sum-total of the duties of a king and the best methods of achieving it are discussed fully in the work. In all respects, the Arthasāstra of Kauṭalya surpasses all other similar sastraic works and we are led to infer that the Government of the ancient kings in India, based on the principles of Kauṭalya, existed for the ultimate benefit of the governed and excited universal admiration.

The publication of an adequate English rendering of the Arthasāstra, which would be in accord with the correct interpretations proposed in the commentary now presented to the world, and which would illustrate the text by abundance of historical notes, will prove a very real boon to the cause of the study of Indian polity. I have hopes that the task will be undertaken and accomplished in the not distant future, by a scholarly friend, who has given many years to the study of the Arthasāstra.

Trivandrum,
4-6-1923.

T. GAṆAPATI SĀSTRI.

उपोद्घातः ।

दिष्ट्या वर्धते अनन्तशयनसंस्कृतग्रन्थावलिरियम् अर्थशास्त्रस्य कौटलीयस्य सम्यक्संशोधनादिप्रत्यग्रसमुचितप्रतिकर्मसम्पद्योगसुखोपयोज्यतां नीतस्य चिरादात्मनि ग्रथनमासादयन्ती ।

१. अर्थशास्त्रस्य संशोधनावश्यकता ।

अर्थशास्त्रं नामेदं हस्तलिखितैकादर्शाश्रयं श्रीमति शामशास्त्रिणि शोधके मैसूरराजकीयग्रन्थमालायां १९०९ तमे क्रैस्ताब्दे प्रथमं प्रकाशितमासीत् । अपूर्वं ग्रन्थरत्नमित्यास्थोद्रेकप्रगुणितावधानचेतसा तस्मिन् मया सपदि परिशीलिते बह्व्यः पाठाशुद्धय उपलब्धाः, पूर्ववाक्ययोज्यस्य पदस्योत्तरवाक्येन सह योजनमुत्तरवाक्ययोज्यस्य पूर्ववाक्येन सह योजनमित्येवंजातीयं च बहुशो दृष्टम् । ललितोचितपदवाक्यरचनरुचिरोऽप्ययं शास्त्रग्रन्थः प्रमेयमाहात्म्यात् पण्डितेनाप्यभियोगवता दुरवबोधार्थः; सोऽपि चेदशुद्धपाठः का वार्तेति चिन्तयतो मे तदैवाङ्कुरितः कश्चिदभिप्रायः अर्थशास्त्रस्यानेकादर्शसंवादनेन मूलं सम्यक् शोधयित्वा मुद्रयेयं, कथमन्यथा ग्रन्थस्याविकृतं स्वरूपं कृतरक्षं स्यादिति ।

२. नवादर्शार्जनम् ।

तत आदर्शान् प्रयत्नतो विचिन्वता एतद्राज्यान्तर्गततिरुपार्पुप्रदेशवर्तिनो यतीन्द्रमठस्य ग्रन्थालयाज्जराजर्जरमहार्घनानाग्रन्थावतंसिताद् द्वौ अर्थशास्त्रस्य कौटलीयस्य समग्रौ तालपत्रादर्शौ केरलीयलिपी शुद्धप्रायौ मया समासादितौ । तयोरेकः जीर्णत्रुटितबहुपत्रः त्रिचतुरशतवर्षवृद्धप्रेक्षणीयः क-संज्ञः, अन्य उपशतवर्षदेशीयो दृढपत्रः ख.संज्ञः । मद्रासराजकीयहस्तलिपिग्रन्थसंग्रहे च द्वावादर्शौ दृष्टौ, ययोरेक एतद्राज्यान्तर्गतेटप्पळ्ळिराजभवनसम्बन्धिकेरलीयलिपितालपत्रग्रन्थात् प्रतिरूपितः समग्रः शुद्धप्रायः, अपर आन्ध्रलिपिग्रन्थादशुद्धप्रायात् कुतश्चित् प्रतिरूपित आन्ध्रलिपिः कण्टकशोधनाधिकरणीयसप्तमप्रकरणोपक्रमः । आभ्यां ग. घ. संज्ञाभ्यां पाठभेदाः सर्वे पृथगुच्चित्य संगृहीताः । पञ्चमोऽपि कश्चिदादर्शः कोच्चिराजकीयग्रन्थशालायां दृष्टः । किन्तु सोऽस्म-

दीयस्य क-संज्ञादर्शस्य ज्येष्ठो लिप्याकृतिपरिमाणैः समान एकहस्तलिपिकरः प्रतिपत्रत्रुटितभूयिष्ठांशः स्पर्शासह उपयोगाक्षम इत्युपेक्षणीयः संवृत्तः ।

इमामादर्शसम्पदमवष्टभ्यारब्धे कौटलीयस्य मया संशोधने कापि वार्ता समाकर्णिता — कौटलीयस्य नाम मैसूरराजकीयग्रन्थमालायां प्रकाशितस्वरूपस्य शोधकः कमप्याङ्गलभाषानुवादमपि प्रणीय प्रकाशितवानिति । समानीतश्चासौ आङ्गलभाषानुवादः, सोऽस्मद्यत्नस्य किञ्चिदुपकरिष्यतीत्याशया । किन्तु तस्योपोद्धातेऽनुवादकेन स्वयमेवोक्तं — नायं मूलस्यानुरूपोऽनुवाद इति । पुस्तके च बहवो मूलांशाः कृतसन्देहाङ्का एव दृष्टाः । अकृतसन्देहाङ्केष्वपि तेषु बहवोऽसम्यक्प्रकाशितार्था उपलब्धाः । तत्रैकमुदाहरणार्थं दर्शयामः —

१. व्याख्यानयोजनावश्यकता ।

अस्ति हि प्रथमाधिकरणस्य सप्तमाध्यायशेषे वाक्यं — "मर्यादां स्थापयेदाचार्यानमात्यान् वा य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः" इति । राजर्षिवृत्तस्य कांश्चित् प्रकारान् प्रथममभिधाय सर्वोत्कृष्टः प्रकारोऽनेन वाक्येनोपदिश्यते आचार्यामात्यमर्यादीकरणं नाम । उत्पथप्रसक्तमात्मानमनिवारिताः सन्तो ये वारयेयुः, तथाविधानाचार्यानमात्यांश्चात्मनो मर्यादामिव मर्यादाम् अलङ्घनस्थानं स्थापयेत् आत्मनो नियामकान् कल्पयेदिति तदर्थः । अर्थविशेषमीदृशमुपदिशता चाचार्येण राजा सर्वनियामकं सन्तमात्मानमपि नियन्तुं कांश्चिदवश्यमधिकारयेदित्येवंरूपः सर्वजनैकान्तहितः परमोदारः स्वाभिप्राय आविष्कृतो भवति । स एष वाक्यस्यार्थ आङ्गलभाषानुवादकेन नोपात्तः किन्त्वन्यथैवार्थः प्रतिपन्नः । स एवं ह्याह — 'आचार्यानमात्यान् वा पूजयेदि'ति । अयमर्थः केन पदेन कया वृत्त्या समर्पित इति न वयं विद्मः । यदि मर्यादाशब्दस्य कर्णाटद्रमिलान्ध्रादिभाषाव्यवहारगतबहुमानार्थत्वप्रसिद्धिविस्रम्भात् संस्कृतेऽपि बहुमानार्थत्वमुच्येत, हन्त तद्र्नुवादप्रमाणका व्युत्पित्सवः पदार्थमग्राहिताः स्युः, अभिप्रायमहिमानं च यथोक्तमाचार्यस्यानुवादभक्ता अग्राहिताः स्युः । अन्यदप्येवञ्जातीयमनुवादे बहु द्रष्टुं शक्यम् । तेनेयं मे बुद्धिरुत्पन्ना — कौटलीयस्य मूलशोधनमात्रेण न किञ्चित् कृतं स्यात्, अर्थोऽपि तस्या निदर्शितगुणाङ्गलभाषानुवादादिसुलभाभ्योऽन्यथाप्रतिपत्तिभ्यो रक्षणीय इति, अर्थाद् अर्थशास्त्रं व्याख्यानोपेतं कृत्वा प्रकाशयेयमिति ।

अथ कृते व्याख्याविचये प्रतिपदपञ्जिका नाम श्रीभट्टस्वामिप्रणीता प्रौढस्वभावा काचिद् व्याख्या द्वितीयाधिकरणाष्टमाध्यायादिस्तदधिकरणसमाप्त्यन्ता मद्रास्राजकीयग्रन्थशालातो लब्धा, अन्या च श्रीमाधवयज्वप्रणीता

४. प्राचीनव्याख्यांशलाभः।

नयचन्द्रिकाख्या सप्तमाधिकरणीयसप्तमाध्यायादिर्द्वादशाधिकरणचतुर्थाध्यायैकदेशावसाना । उभे अप्येते केरलदेशलब्धजीर्णतालपत्रमातृकातः प्रतिरूपिते । अशुद्धयश्च तयोस्तथाविधाः, यथा मातृकान्तराण्यनुपजीव्य शोधयितुं न शक्याः, बहुलाश्च ताः । ग्रन्थपङ्क्तयश्च तयोर्बहुत्र परिलुप्ताः। अस्यामवस्थायां मातृकान्तरोपलम्भे च सम्भावनापदवीदवीयसि तयोः शिरःपादहृदयविकलयोर्व्याख्याखण्डयोर्मुद्रणं समीचीनं न भवेदिति नादृतम् । किन्तु मया तयोस्तीव्रमभियुञ्जानेन तत्तन्मूलार्थी अवगन्तुं पारिताः। किञ्च, प्राचीनकेरलभाषात्मकः कश्चित् तालपत्रग्रन्थो द्वित्रशतवर्षवृद्धः कौटलीयार्थशास्त्रार्थप्रतिपादनपरो भट्टस्वाम्यनुयायी अत्रत्यराजकीयग्रन्थशालायां सप्तमाधिकरणावधिरुपलब्धः । यस्य सर्वात्मना सधर्मा मद्रास्राजकीयग्रन्थशालायामप्यादर्शोऽस्ति । यद्यप्ययमशुद्धोऽन्तरान्तरा गलितबहुवाक्यः पञ्चषाध्यायविकलश्च, तथापि तन्मूलार्थपरिज्ञानं प्रति मूलपाठनिश्चयं प्रति च स मे महान् सहायोऽभवत् । सेयमियती प्रमेयज्ञानसामग्री भाग्यवशात् समवहिता सम्पन्ना। अर्था नाम साम्प्रदायिकोपदेशैकसमधिगम्याः शास्त्रेऽस्मिन् बहुतराः । न चेदियती यथोक्ता सामग्री लब्धाभविष्यत्, तेष्वस्माकमान्ध्यं कतिपयेषु शाश्वतिकमेवाभविष्यत् ।

तदेवम् उपलब्धेषु मूलकोशेषु व्याख्यांशेषु च चिराभियोगात् कथञ्चिदवगतोऽर्थशास्त्रस्य मूलार्थः । ततस्तस्मिन् व्युत्पित्सून् प्रति प्रकाशयितव्ये तं पुरातनव्याख्या-

५. नवव्याख्यानरचना।

व्याख्यानामलाभादात्मगुम्फितैरेवोपलब्धप्राग्व्याख्यानच्छायानुजीविभिर्वाक्यैर्यथाप्रमाणं प्रकाशयेयमित्यभिसन्धिमान् अभूवम् । व्यरचयं च महता यत्नेन यथाभिसन्धि व्याख्यानम् ।

मदीयस्य व्याख्यानप्रणयनसमुद्यमस्यारम्भे सफलत्वसम्पत्तौ च मद्रक्षकस्य महामहिम्नो वञ्चिमण्डलकिरीटपतेः श्रीमूलरामवर्ममहाराजस्य कृपैवैका श्रीपद्मनाभकृपानुकारिणी कारणमभवदिति कृत्वा व्याख्यानस्यास्य तन्नामधेय-

पात्तिविशेषज्ञ इङ्गिताकारकुशलः प्रतिहारः स्यात् । वनकुलकालजातिसात्म्य-गुणवयःशीलायुरादानगमनकल्पनावान् व्यपगतभयो विजयोर्जितमना हस्त्य-ध्यक्षः स्यात् । क्षेत्रजातिसात्म्यगुणलक्षणवाहनास्त्रज्ञोऽत्यर्थसमर्थः शुचिरनु-द्धतोऽनुरूपोऽश्वाध्यक्षः स्यात् । सन्धिभेदसन्धानस्थानज्ञोऽनुरक्तः शुचिर्दक्षः स्मृतिमान् देशकालज्ञो दर्शनीयो नीतिगतिज्ञः प्राज्ञो वाग्मी दूतः स्यात् । उभयत उत्तमवंशप्रभवः शुद्धो मनुबृहस्पत्युशनःशास्त्रविद् दण्डनीत्यादिकुशलो-ऽशठोऽजिह्मः सम्मानासम्मानाविकृतो विगतभीः कार्याकार्यविनिश्चितमतिर-हार्यः सर्वोपधाशुद्धो गूढमन्त्रो मन्त्री स्यात् । अविकार्योऽविकलेन्द्रियः प्रतापवान् सुभगः सुमुखोऽकृपणोऽप्रमादी दक्षो दाक्षिण्यचारित्ररक्षणार्थमधिकरणसन्दिग्ध-विवेककृदुपरिकः स्याद्' इति ।'' (आचाराध्याये ३०७ तमश्लोकव्याख्यायाम्)

''तथाच बृहस्पतिः—'ब्रह्मशङ्खस्तुतिपुण्याहशब्दैर्विबुध्योत्थाय सन्ध्या-मुपास्य देवपितृब्राह्मणान् मनसा वा नमस्कृत्य धर्मार्थकामभयोपधाशुद्धावञ्च-कगृहीतायुधायातयामविश्वासोत्पन्नासन्नपरिवृतः' इति'' । (आचाराध्याये ३२३ तमश्लोकव्याख्यायाम्)

''एवञ्च विशालाक्षः —

'वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः ।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक् ॥'

(आचाराध्याये ३२८ तमश्लोकव्याख्यायाम्)

इति च । युक्तं चैतत्—ग्रन्थे हि ग्रन्थान्तरसुग्रहत्वधियानुक्तमाकाङ्क्ष्य-माणमर्थं ग्रन्थकारप्रज्ञाततमाद् वयःप्रकृष्टात्, समानवयसो वा ग्रन्थान्तरा-दुद्धृत्य व्याख्याता दर्शयितुमर्हति न तु तदर्वाचीनादिति सामुदाचारिको न्यायः । **विश्वरूपाचार्यश्च** बार्हस्पत्यं वैशालाक्षं चार्थशास्त्रं भगवता याज्ञ-वल्क्येन प्रज्ञातमार्षं ग्रन्थममन्यत; अतस्तदीयेनार्थेनार्थाकाङ्क्षां पूरितवान् । **कौटलीयं** तु तदर्वाक्कालभवं याज्ञवल्क्येनाप्रज्ञातमिति बुद्ध्या नोदाहृतवान् ।

न च **कौटल्यस्य** याज्ञवल्क्यादर्वाचीनत्वे कश्चित् सन्देहोऽस्ति । तथाहि—कौटल्यस्तावद् अर्थशास्त्रस्य चतुःषष्टितमाध्याये प्रतिलोमजपुत्रप्रस्तावे 'वैश्यात् क्षत्रियायां जातो मागधः, क्षत्रियाद् ब्राह्मण्यां जातः सूत' इत्युक्त्वा पृथुयज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तुतिवि-धायिनः प्रतिलोमजत्वशङ्काप्राप्तिं मनसि कुर्वंस्तां परिहरति—पौराणिकस्त्वन्यः

सूतो मागधश्च ब्रह्मक्षत्राद्विशेषतः' इति । अस्यार्थः — पुराणप्रवक्ता **रोमहर्षणा**परनामा यः **सूतः**, सः अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः । ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्टः मागधः क्षत्रियाद् विशिष्ट इति । तथ्यं चैतत् — यतः,

"हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः ।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे ।
सूतः सूत्यां समुत्पन्नः सौत्येऽहनि महामते ! ।
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः ॥"

इति विष्णुपुराणप्रथमांशत्रयोदशाध्याये,

"ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति ।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः ॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित् ।"

इत्यग्निपुराणप्रथमाध्याये,

"त्वया सूत ! महाबुद्धे ! भगवान् ब्रह्मवित्तमः ।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः ॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति ।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः ॥"

इति कौर्मपुराणप्रथमाध्याये च **व्यास**शिष्यपौराणिक**सूत**स्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते; तथा तस्य द्विजत्वं च विष्ण्वंशसम्भूतत्वं च वर्ण्यते । तेन **कौटल्यश्चाणक्य**शब्दितः पुराणानि तत्प्रवक्तृसूतोत्पत्तिकथां, पुराणतत्प्रवक्त्रोः प्रामाण्यप्रसिद्धिं च जानातीत्यवसातुं शक्यम् । तथाभूतश्चासौ सूतादतिदूरविप्रकृष्टार्वाक्कालजन्मैव भवितुं युक्तः, अन्यथा सूतप्रोक्तेषु ग्रन्थेषु पुरातनत्वार्षत्वनिश्चयनिबन्धनः पुराणत्वसम्प्रत्यय एव नाभविष्यत् । एवञ्च यथा **सूतश्चाणक्या**दतिप्राचीनः, तथा सूतसतीर्थ्यस्वयजुर्वेदाचार्य**वैशम्पायन**शिष्यतया सूतसमकालिको भवितुमर्हन् प्रकृतस्मृतिप्रवक्ता **याज्ञवल्क्ययोगीश्वरो** (याज्ञवल्क्यशिष्य एव वा) चाणक्यादतिपुरातन इति किमु वक्तव्यम् । अत एव **कौटल्यः** कतिपयसाहसदण्डविधानपराणां केषाञ्चिद्

याज्ञवल्क्यस्मृतिद्वितीयाध्यायगतानां छायामर्थतः शब्दतो व्याख्यानतोऽधिकार्थपूरणतश्च स्ववाक्यैरनुविदधान आत्मनो **याज्ञवल्क्यस्मृतावस्यां** भक्तिबहुमानपूतं परिचयमाविष्करोति । तेषु कानिचिदधस्तादुदाहरामः । तत्रैष एकः स्मृतिश्लोकः —

> "करपाददन्तभङ्गे छेदने कर्णनासयोः ।
> मध्यो दण्डो व्रणोद्भेदे मृतकल्पहते तथा ॥"
>
> (याज्ञ० अ० २. श्लो० २२४)

इति । इदं तत्प्रतिच्छन्दप्रायं **कौटलीयवाक्यम्** —

"मृतकल्पमशोणितं घ्नतो **हस्तपादपाराञ्चिकं वा** कुर्वतः पूर्वः साहसदण्डः । पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे **चान्यत्र दुष्टव्रणेभ्यः**" । (कौट० धर्मस्थी० अध्या० १९) इति । एतेऽपरे स्मृतिश्लोकाः —

> "स्वच्छन्दविधवागामी विक्रुष्टेऽनभिधावकः ।
> अकारणे च विक्रोष्टा चण्डालश्चोत्तमान् स्पृशन् ॥ २४० ॥
> शूद्रप्रव्रजितानां च दैवे पित्र्ये च भोजकः ।
> अयुक्तं शपथं कुर्वन्नयोग्यो योग्यकर्मकृत् ॥ २४१ ॥
> वृषक्षुद्रपशूनां च पुंस्त्वस्य प्रतिघातकः ।
> साधारणस्यापलापी दासीगर्भविनाशकृत् ॥ २४२ ॥
> पितापुत्रस्वसृभ्रातृदम्पत्याचार्यशिष्यकाः ।
> एषामपतितान्योन्यत्यागी च शतदण्डभाक् ॥ २४३ ॥"
>
> (याज्ञ० अध्या० २)

इति । इमान्येतदनुविधायीनि कौटलीयवाक्यानि —

"विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यान् **स्पृशतः**, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः शत्याः (दण्डाः) ।

जीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः ।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्मणि चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च पूर्वः साहसदण्डः ।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः **स्वार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः कान्तारे मध्यमः** ।" (कौटली० धर्मस्थी० अध्या० २०)

इति । एष स्मृतिश्लोकोऽन्यः —

"अबन्ध्यं यश्च बध्नाति बद्धं यश्च प्रमुञ्चति ।
अप्राप्तव्यवहारं च स दाप्यो दममुत्तमम् ॥"

(याज्ञ० अध्या० २. श्लो० २४९)

इति । इदं चैतदनुगामि कौटलीयवाक्यं —

"पुरुषमबन्धनीयं बध्नतो बन्धयतो बद्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डाः" (कौटली० धर्मस्थी० अध्या० २०)

सर्वेष्वेषु कौटलीयवाक्येषु स्थूलाक्षरपदार्थाः परमधिकाः, अन्ये तु याज्ञवल्क्यस्मृत्युक्ता एवेति स्पष्टम् । तत्र हि 'स्वच्छन्दविधवागामी' इति स्मृतिवाक्ये स्वच्छन्दमिति क्रियाविशेषणम् । स्वेच्छया, न तु विधवेच्छयापीत्यर्थः । कौटलीये छन्दवासिनीमिति छन्देन वसन्तीं तूष्णीं स्थितामकामयमानामिति यावत् ।

"अयुक्तं शपथं कुर्वन्" इत्येतदेव व्याचष्टे कौटल्यः "शपथवाक्यानुयोगमनिसृष्टं कुर्वत" इति, न पुनरन्यदेतदिति शङ्कनीयम् । तद्यथा— आधिकरणिकाः साक्ष्याद्यनुयोगं व्यवहारनिर्णयार्थं शपथवाचनपूर्वं यमनुतिष्ठन्ति, सोऽयं शपथवाक्यानुयोगः । स आधिकरणिकानां निसृष्टो 'भवत्स्वयमायत्त' इति व्यवहारनिर्णयस्य तेभ्यो राज्ञार्पितत्वात् । निसृष्टश्च तेषां युक्तो भवति स्वाधिकारविषय इति कृत्वा, अनुष्ठानोचित इति कृत्वा वा । अन्येषां तु सोऽनिसृष्टोऽयुक्तः, अधिकाराविषयत्वादनुष्ठानानर्हत्वाद्वा । एवञ्च निसृष्टः, युक्तः, स्वाधिकारविषयः अनुष्ठानार्ह इत्येकार्थगोचरा भवन्ति । अनिसृष्टः, अयुक्तः, स्वाधिकाराविषयः, अनुष्ठानानर्ह इति च वैपरीत्येन तथा । स एषोऽयुक्तः शपथवाक्यानुयोगः स्मृतौ शपथशब्देन विवक्षित इति कौटल्याभिप्रायः । मिताक्षरायां तु व्याख्यान्तरं सम्भवमात्रेण वर्णितं द्रष्टव्यम् ।

तथा 'अयोग्यो योग्यकर्मकृत्', 'युक्तकर्माणि चायुक्तस्य' इत्यपि वाक्ये एकार्थे एव । योगो हि नियोगोऽधिकारः, तद्वति युक्तशब्दो वर्तते, तदर्हे च योग्यशब्द इति युक्तयोग्यशब्दाभ्यामाश्रयत्वार्हत्वलक्षणरूपभेदेऽपि वस्तुतो योगाश्रयस्यैव प्रतिपादनात् ।''' इति । किञ्च याज्ञवल्क्यस्मृतौ मूत्रपुरीषादिस्पर्शने दण्डो नोक्तः । तथापि तस्य सिद्धिस्तदाधिक्यसिद्धिश्च समर्थिता

"अमेध्यपार्ष्णिनिष्ठ्यूतस्पर्शने द्विगुणः स्मृतः"

(याज्ञ० अध्या० २. श्लो० २१८)

इति निष्ठ्यूतग्रहणस्य मूत्राद्युपलक्षकत्वं वदता व्याख्यात्रा। स एव स्मृतिवचनसूचितो मूत्रपुरीषादिदण्डः कौटल्येन 'तैरेवामेध्यैः पादष्ठीविकाभ्यां च द्विगुणः छर्दिमूत्रपुरीषादिभिर्द्वादशपणः' इति स्वशब्देनोक्त इति असंशयं स्मृत्युपजीवी तद्व्याख्यातृसधर्मा कौटल्यः। एतेन याज्ञवल्क्यस्मृतेः कौटलीयोपजीवित्ववादो दूरनिरस्तो द्रष्टव्यः।

१०. कौटल्यस्य कृतयः। यथायं कौटल्यः कौटलीयान्नानाप्रकारप्रमेयनिधानात् सर्वतन्त्रवेदी आर्षचक्षुष्मान् विज्ञायते, तथा मन्ये तन्त्रान्तरेष्वपि तस्य कृतिभिरवश्यं वर्तितव्यम्। तथाच **भट्टस्वामी** स्वव्याख्यायाम् अध्यक्षप्रचाराधिकरणस्य द्वादशाध्याये 'शुल्बधातुशास्त्ररसे'त्यादिपदं व्याकुर्वन् **धातुकौटलीयं** नाम ग्रन्थं नाम्नोपादत्ते। वराहमिहिरः 'उक्तं चाचार्यविष्णुगुप्तेने'ति वदन् बृहत्संहितायां ज्योतिस्तन्त्रविषयं श्लोकमुदाहरति —

"अप्यर्णवस्य पुरुषः प्रतरन् कदाचि-
दासादयेदनिलवेगवशेन पारम्।
न त्वस्य कालपुरुषाख्यमहार्णवस्य
गच्छेत् कदाचिदनृषिर्मनसापि पारम्॥"

(Part I. pp. 68)

इति। कामसूत्रजयमङ्गला च म्लेच्छितविकल्पविवरणप्रसङ्गे कौटलीयमन्यत् स्मरति —

"तद् यथा कौटलीयं —
दादेः क्षान्तस्य कादेश्च स्वरयोरुभयोरपि।
बिन्दूष्मणोर्विपर्यासाद् दुर्बोधमिति संज्ञितम्॥" इति।

पश्चाहः उभयतोरात्रमित्यादयः परिमिता आर्षप्रयोगाः कौटलीये वर्तन्ते।

११. आर्षप्रयोगाः। तान् पश्चिमे सम्पुटे निर्देक्ष्यामः।

१२. पूर्वाचार्यस्मरणम्। आचार्यकौटल्येन स्मृताः पूर्वाचार्यास्तावदेते—

१. मानवाः = मनुशिष्याः, अर्थान्मनुः।

२. बार्हस्पत्याः = बृहस्पतिशिष्याः, अर्थाद् बृहस्पतिः

३. औशनसाः = शुक्रशिष्याः, अर्थात् शुक्रः ।

४. भारद्वाजः = द्रोणाचार्यः ।

५. विशालाक्षः ।

६. पराशरः = (प्रसिद्धः) ।

७. पिशुनः = नारदः ।

८. कौणपदन्तः = भीष्मः ।

९. वातव्याधिः = उद्धवः ।

१०. बाहुदन्तीपुत्रः = इन्द्रः ।

एतेषु दशसु अर्थशास्त्रप्रवर्तकेषु विशालाक्षः परं विशेषतो न विदितः । किन्तु तस्य वचनं विश्वरूपाचार्यप्रमाणितं पूर्वमुपदर्शितम् ।

१३. ग्रन्थमहिमा ।

धर्मप्रधानः कर्मकुशलोऽप्रमादी परप्रयुक्तकपटप्रतिविधानक्षमः विद्वानेकः कुटुम्बी स्वकीयमेकं कुटुम्बमिव, योगतः क्षेमतस्तदुभयसाधनगवेषणतश्च राजा स्वराष्ट्रगतानि कुटुम्बानां लक्षाणि चिन्तयितुं यथा प्रगल्भेत, तथा शासनसरणयः सामान्यतो विशेषतश्चात्रोपदिष्टाः । प्रजाभ्यो धनसमुत्थापनस्य द्वारं नाम न तत् किञ्चिदवशिष्यते, यदत्र न प्रदर्शितम् । उत्थापितस्य धनस्य न्याय्यं विनियोगस्थानमप्यत्रानुपदिष्टं न किञ्चिदस्ति । प्रजानां परस्परस्माद् युक्तोपयुक्ताध्यक्षामात्येभ्यः, राजवल्लभादिभ्यश्च पीडा यथा नोत्पद्येत, यथा च ते राजकार्यहानिकरं न कदापि चेष्टेरन् , तथा तच्चरितपरीक्षणमार्गा दृष्टदोषदण्डप्रणयनरीतयश्च प्रस्थापिताः । गूढपुरुषप्रणिधानं नाम सर्वसाध्वसाधुवृत्तसाक्षात्कारसाधनं नानाप्रकारं मन्त्रवद् राज्यतन्त्रस्य जीवितस्थाने परिकल्पितम् । किं बहुना, स्वराज्यपरिरक्षणं, सिद्धे तस्मिन् परराज्यपराक्रमणमितीदं राज्ञः कार्यसर्वस्वं यथा सम्यङ् निष्पन्नं स्यात् , तथा तदनुष्ठानविधयो लोकोत्तराः स्थूलमध्यसूक्ष्माः शास्त्रेऽस्मिन् न्यक्षेण प्रतिपादिताः । सर्वथा सजातीयसर्वशास्त्रग्रन्थातिशाय्यत्यद्भुतप्रस्थानमिदं कौटलीयम् । एतदनुसारिणी पूर्वेषां राज्यतन्त्रसरणिरेकान्तलोकहिता श्लाघायाः परां कोटिमधिरूढाभवदिति चास्माद् ग्रन्थाद् वयमनुमिमीमहे ॥

अनन्तशयनम्
४-६-१९२३

त. गणपतिशास्त्री.

विषयानुक्रमणी

विनयाधिकारिकं प्रथममधिकरणम् ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कौटिलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिरचितव्याख्योपेतम् ।

विनयाधिकारिकं—प्रथममधिकरणम् ।

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः

विघ्नेशं देवतां वाचं प्रणिपत्य गुरूनपि ।
व्याख्यानमर्थशास्त्रस्य कौटिलीयस्य कुर्महे ॥

अथ निखिलविद्याविचक्षणः स्वबुद्धिसामर्थ्यापहृतनन्दराज्यसिंहासनारोपणानुगृहीतचन्द्रगुप्तः **कौटिल्य**चाणक्यादिपर्यायपदवाच्यस्तत्रभवान् **विष्णुगुप्ता**चार्यस्त्रिवर्गसम्पत्तिहेतुभूतार्थार्जनोपायोपदेशप्रधानमर्थशास्त्रमारिप्सुः पूर्वाचार्यप्रणामलक्षणं मङ्गलमाचरति —

ॐ नमः शुक्रबृहस्पतिभ्याम् ।

इति । ओमिति माङ्गलिकः शब्दः । नम इति प्रणामः । अस्त्वित्यध्याहारः । शुक्रबृहस्पतिभ्यां शुक्रोऽसुरगुरुः बृहस्पतिर्देवगुरुः ताभ्याम् । 'नमस्स्वस्ती'-(२. ३. १६)त्यादिना चतुर्थी । तौ ह्यर्थशास्त्रप्रवर्तकेष्वाचार्येषु कूटस्थाविति तत्प्रणामोऽत्यन्तमुचितः । तत्र शुक्रप्रणीतमौशनसं नाम, यत्सङ्ग्रहात्मा शुक्रनीतिः । बृहस्पतिप्रणीतं तु बार्हस्पत्याख्यमिति द्रष्टव्यम् । अत एव शास्त्रकर्तृत्वादाचार्यत्वविवक्षया तयोर्देवतात्वाविवक्षणाद् 'देवताद्वन्द्वे च' (६. ३.२६) इत्यानङिह द्वन्द्वे न कृतः ।

स्वग्रन्थस्य निर्मूलत्वादिशङ्कानिराकरणपूर्वं प्रकरणाधिकरणसमुद्देशं प्रतिज्ञातुं भूमिकां रचयति — **पृथिव्या** इत्यादिना । पृथिव्या भूमेः, लाभे अप्राप्तायाः प्राप्तौ, पालने लब्धायाः परिरक्षणे च विषये । अर्थशास्त्राणि अर्थो नाम•

G. P. T. 126. 1000. 25-3 1098. 6

प्रस्थापितानि प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम् ।

तस्यायं प्रकरणाधिकरणसमुद्देशः —

१. विद्यासमुद्देशः । २. वृद्धसंयोगः । ३. इन्द्रियजयः ।

वृत्तिः वर्तनं स्थितिः, सैव हि मनुष्याणां मुख्योऽर्थः । तया च मनुष्यसम्बन्धिन्या तदाधारभूता भूमिरुपलक्ष्यते । एवञ्च मनुष्यवती भूमिरित्यर्थः । तस्याः लाभपालनोपायोपदेशकानि शास्त्राणि अर्थशास्त्राणि । यावन्ति, पूर्वाचार्यैः शुक्रबृहस्पतिविशालाक्षादिभिः, प्रस्थापितानि प्रवर्तितानि, तानि, प्रायश इति बाहुल्योक्त्या क्वचित् क्वचिदात्मीयदर्शनानां प्रतिपादनं दर्शयति । संहृत्य सङ्गृह्य, एकमिदमर्थशास्त्रं कृतम् एकं नानाशास्त्रविप्रकीर्णसमस्तविषयैकनिधानम्, इदं बुद्धिस्थम् अर्थशास्त्रं, कृतं मया प्रणीतम् । एतेन, मदीयस्यास्यैकस्य ग्रन्थस्य परिशीलनात् कृत्स्नपूर्वाचार्यदर्शनविज्ञानं सुखलभ्यमिति सूचयन् स्वशास्त्रस्य समूलत्वं पूर्वाचार्यग्रन्थैरगतार्थत्वं च द्योतयति ।

तदिदमर्थशास्त्रं साशीतिशतसङ्ख्यैः प्रकरणैः तत्परिच्छिन्नैश्च पञ्चदशसङ्ख्यैरधिकरणैर्विभज्य प्रस्थापितम् । तेषु यथास्थानं वितत्य विशेषतो व्युत्पादयिष्यमाणेषु प्रथमं विषयतः समाख्यातः क्रमत इयत्तया च किमपि सामान्यज्ञानं विशेषजिज्ञासानिमित्तं शिष्याणां जनयितुं तत्समुद्देशं प्रतिजानीते — **तस्यायमिति** । तस्य अर्थशास्त्रस्य, अयम् आरब्धाध्यायगोचरः प्रदर्श्यमानप्रकारः, प्रकरणाधिकरणसमुद्देशः प्रकरणानामधिकरणानां च सर्वेषां समुद्देशः संक्षेपेण निर्देशः संक्षिप्तस्वरूपक्रमेयत्ताख्यानमित्यर्थः, क्रियत इति शेषः । प्रक्रियन्ते प्रकर्षेण व्युत्पाद्यन्ते एष्वर्था इति प्रकरणानि । अधिक्रियन्ते विषयीक्रियन्ते एषु प्रकरणानीत्यधिकरणानि ।

तत्र विनयाधिकारिकस्य प्रथमाधिकरणस्य प्रथमं प्रकरणं समुद्दिशति — **विद्यासमुद्देश इति** । विद्यानाम् आन्वीक्षिकी त्रयी वार्ता दण्डनीतिरित्येतासां चतसृणां समुद्देशः विद्यासमुद्देशः । तदाख्यं प्रकरणमित्यार्थम् । विद्यासमुद्देश इत्येतच्च सूत्रमिति व्यवहर्तव्यं, विस्तारार्हबहुलार्थगर्भत्वात् । सूत्रमेव चेदं तत्प्रकरणे 'आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्चेति विद्याः' इत्युपक्रम्य 'स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु' इत्यन्तैस्त्रिभिरध्यायैर्महता प्रयत्नेन प्रपञ्च्यत इति सूत्रस्य तथाविधं व्याख्यानं भाष्यं भवितुमर्हति ।

---

१. 'हृत्यैक' ग. पाठः.

४. अमात्योत्पत्तिः। ५. मन्त्रिपुरोहितोत्पत्तिः। ६. उपधाभिः शौचाशौचज्ञानममात्यानाम्। ७. गूढपुरुषोत्पत्तिः। ८. गूढपुरुषप्रणिधिः। ९. स्वविषये कृत्याकृत्यपक्षरक्षणम्। १०. परविषये

एवं 'प्रकरणाधिकरणसमुद्देश'इत्युक्तचरमुत्तराण्यपि 'वृद्धसंयोग' इत्यादीनि सूत्राणि भवन्ति, तत्तत्प्रकरणगतानि प्रपञ्चनवाक्यानि च भाष्याणि। एवमधिकरणेषु सर्वेषु। एवञ्च 'स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च' इति ग्रन्थान्तोक्तिरुपपन्ना भवतीति वेदितव्यम्।

तत्र विनयविहीनो लोकशास्त्रव्यवहारेष्वशिक्षितो राजा राज्यरक्षणानर्हत्वाद् वैनयिकीषु विद्यास्ववश्यं विनेतव्य इत्यतो **विद्यासमुद्देश** इत्येतत् प्रकरणमादौ सूत्रितम्॥ १॥

विद्याश्च वृद्धसंयोगाभावे लब्धुं न शक्या इति **वृद्धसंयोग** इति सूत्रम्॥ २॥

वृद्धसंयोगश्च इन्द्रियजयमन्तरेण न लभ्य इति **इन्द्रियजय** इति सूत्रम्॥ ३॥

वृद्धैर्विद्यासु शिक्षितो जितेन्द्रियोऽपि सहायाभावे कार्यं साधयितुं न क्षम इति तदनन्तरम् **अमात्योत्पत्ति**रिति सूत्रम्॥ ४॥

अमात्याश्च केचिद् बुद्धिसाचिव्याय नित्यनैमित्तिककर्मसाचिव्याय चापेक्षिताः, शान्तिकपौष्टिककर्मानुष्ठानाय चान्ये। तदर्थं मन्त्रिपुरोहिताः कर्तव्या इति **मन्त्रिपुरोहितोत्पत्ति**रिति सूत्रम्॥ ५॥

तैश्च सर्वप्रकारविशुद्धैर्भाव्यमिति **उपधाभिः शौचाशौचज्ञानममात्यानाम्** इति सूत्रम्॥ ६॥

उपधाशुद्धिर्गूढपुरुषानन्तरेण ज्ञातुमशक्येति ततो **गूढपुरुषोत्पत्तिः** इति सूत्रम्॥ ७॥

तेषां च स्वामिनियोगमन्तरेणाव्यापाराद् **गूढपुरुषप्रणिधिः** इति सूत्रम्। गूढपुरुषाणां प्रणिधिः प्रणिधानं तत्तत्कार्येषु स्वामिना नियोजनमिति तदर्थः॥ ८॥

तैश्च नियुक्तैः स्वराज्यगतान् क्रुद्धलुब्धादीन् विज्ञाय तद्दोषप्रतिविधानं, परराष्ट्रगतान् विज्ञाय तेषां भेदनेन स्वपक्षे प्रवेशनं चावश्यकमिति **स्व-**

कृत्याकृत्यपक्षोपग्रहः । ११. मन्त्राधिकारः । १२. दूतप्रणिधिः । १३. राजपुत्ररक्षणम् । १४. अवरुद्धवृत्तम् । १५. अवरुद्धे च वृत्तिः । १६. राजप्रणिधिः । १७. निशान्तप्रणिधिः । १८. आत्मरक्षितकम् । इति विनयाधिकारिकं प्रथमाधिकरणम् ॥

विषये कृत्याकृत्यपक्षरक्षणम् इति परविषये **कृत्याकृत्यपक्षोपग्रहः** इति च सूत्रे । स्वदेशे कृत्याः शत्रुभेद्याः क्रुद्धादयः अकृत्याः अभेद्याः सुहृदः, कृत्याकृत्यानां पक्षाणां सङ्घानां शत्रूपजापाद् रक्षणमिति प्रथमसूत्रस्यार्थः । परराष्ट्रे ये कृत्याकृत्याः पक्षाः तेषामुपजापादिना स्वपक्षे संग्रहणमिति द्वितीयसूत्रस्यार्थः ॥ ९, १० ॥

स्वराष्ट्ररक्षणं परराष्ट्रहरणमित्येतावद् राज्ञः कर्मसर्वस्वम् । तस्य मन्त्रायत्तत्वाद् **मन्त्राधिकारः** इति सूत्रम् । कर्मणामारम्भोपायादिसम्प्रधारणं मन्त्रः, तस्याधिकारो मन्त्राधिकार इति ॥ ११ ॥

परराष्ट्रकरणीयानां स्वकर्मणां स्वयं कर्तुमशक्यतया दूतसापेक्षत्वाद् **दूतप्रणिधिः** इति सूत्रम् ॥ १२ ॥

यथा राजपुत्राः स्वपितरि न द्रोहमाचरेयुः, तथा ते प्रयत्नेन परोपजापादिभ्यो रक्षणीया इति **राजपुत्ररक्षणम्** इति सूत्रम् ॥ १३ ॥

पित्रा कचिदवरुध्य तथा रक्ष्यमाणः कुमारः पितरि कथं व्यवहरेत्, पिता च तस्मिन् कथमित्येतद् वक्तुं सूत्रे **अवरुद्धवृत्तम्** इति **अवरुद्धे च वृत्तिः** इति च ॥ १४, १५ ॥

इत्थमात्मानं रक्षतो राज्ञो नियतकालां व्यापारपरिपाटीं वक्तुं सूत्रं **राजप्रणिधिः** इति । राज्ञः प्रणिधिः प्रणिधानं व्यापारपरिचिन्तनमित्यर्थः ॥ १६ ॥

निशान्तप्रणिधिः इति सूत्रम् । निशान्तं राजभवनं, तस्य प्रणिधिः प्रणिधानं देशसन्निवेशादिचिन्तनम् ॥ १७ ॥

आत्मरक्षितकम् इति सूत्रम् । रक्षितमिति भावे क्तः, स्वार्थे च कः । राज्ञ आत्मरक्षणौपयिकं प्रकरणेऽस्मिन्नुपदिश्यत इत्यर्थः ॥ १८ ॥

इति विनयाधिकारिकमित्यादि । विनयः विद्यादिशिक्षणं तस्याधिकारः प्रस्तावो विनयाधिकारः, सोऽस्मिन्नस्तीति विनयाधिकारिकं नाम प्रथममधिकरणं समुद्दिष्टमित्यर्थः ॥

१. जनपदविनिवेशः । २. भूमिच्छिद्रविधानम् । ३. दुर्ग-विधानम् । ४. दुर्गविनिवेशः । ५. सन्निधातृनिचयकर्म । ६. स-

---

इत्थं प्रथमाधिकरणसूत्रिताष्टादशप्रकरणोपदिष्टवर्त्मना समासादितविनयसम्पत्को राजा तन्त्रावापयोरधिकारी भवति । **तन्त्रं** नाम स्वराज्यक्षेमसाधनानुकूलः पञ्चस्वाद्येष्वधिकरणेषु पञ्चनवत्या सूत्रैः प्रतिपाद्यमानोऽर्थः । **आवापः** शत्रुराष्ट्रहरणानुकूलः षष्ठादिषु त्रयोदशान्तेषु अष्टस्वधिकरणेषु सूत्राणामेकाशीत्या प्रतिपाद्यमानोऽर्थः, अर्थं ह्येनं विज्ञाय प्रवर्तमानो विजिगीषुः परराष्ट्रं स्ववशे करोतीति । तत्र येऽर्थाः **द्वितीये**ऽधिकरणे अध्यक्षप्रचाराख्ये अष्टात्रिंशता सूत्रैः प्रतिपाद्यन्ते, ये **तृतीये** धर्मस्थीये एकोनविंशत्या सूत्रैः, ये **चतुर्थे** दुर्गराष्ट्रसम्बन्धिकण्टकशोधनाख्ये त्रयोदशभिः सूत्रैः, ये च **पञ्चमे** राजराज्यकण्टकशोधनपरे योगवृत्तनाम्नि सप्तभिः सूत्रैः, तेष्वेव सर्वेष्वधीनं राज्यकुटुम्बभरणकर्मेति तमेतं चतुरधिकरण्यर्थं तन्त्रमाहुः, तन्त्रिधातोः कुटुम्बधारणार्थत्वात् । द्विसूत्रं प्रकरणद्वयात्मकं मण्डलयोनिसंज्ञमधिकरणं **षष्ठम्**, एकोनत्रिंशत्सूत्रयुक्तं षाड्गुण्यं **सप्तमम्**, अष्टसूत्रीरूपं व्यसनाधिकारिक**मष्टमं**, द्वादशसूत्रमभियास्यत्कर्माख्यं **नवमं**, त्रयोदशसूत्रं साङ्ग्रामिकं **दशमं**, द्विसूत्रं सङ्घवृत्त**मेकादशं**, नवसूत्रमाबलीयसं **द्वादशं**, षट्सूत्रं दुर्गलम्भोपायाख्यं **त्रयोदशमि**त्येकाशीतिसूत्रामष्टाधिकरणीं शत्रुराज्यहरणोपायोपदेशिनीमावापं व्यवहरन्ति ।

त्रिसूत्रमौपनिषदं नाम **चतुर्दशम**धिकरणं तन्त्रावापयोरत्यन्तमनुगुणम् ।

एकसूत्रात्मकं तन्त्रयुक्तिसंज्ञं **पञ्चदशम**धिकरणं कौटिल्यशास्त्रादृतास्तन्त्रयुक्तीर्द्वात्रिंशतं व्युत्पादयतीति स्थितिः ।

तत्र स्वराज्यं रक्षतो राजधान्याद्यपेक्षणादध्यक्षप्रचाराधिकरणे **जनपदविनिवेश** इति प्रथमं **प्रकरणं** सूत्रितम् ॥ १ ॥

स्वराज्यगतानां कृषिनिवासानर्हाणां गिरिवनश्वभ्रप्रायाणां भूभागानामुपयोगप्रकारोपदेशार्थं सूत्रं **भूमिच्छिद्रविधानम्** इति । भूमिच्छिद्राणां कृष्याद्यनर्हभूभागानां विधानम् उपयोगप्रकार इत्यर्थः । 'भूमिच्छिद्रं कृष्ययोग्ये'ति यादवः ॥ २ ॥

देशस्य शत्रुभिरनाक्रमणीयत्वसम्पत्तये दुर्गापेक्षणाद् **दुर्गविधानम्** इति सूत्रं, **दुर्गविनिवेश** इति च ॥ ३ , ४ ॥

माहर्तृसमुदयप्रस्थापनम् । ७. अक्षपटले गाणनिक्याधिकारः । ८. समुदयस्य युक्तापहृतस्य प्रत्यानयनम् । ९. उपयुक्तपरीक्षा १०. शासनाधिकारः । ११. कोशप्रवेश्यरत्नपरीक्षा । १२. आकरकर्मान्तप्रवर्तनम् । १३. अक्षशालायां सुवर्णाध्यक्षः । १४. विशि-

---

सन्निधातृनिचयकर्म इति सूत्रम् । सन्निधाता नाम धनादिकं सञ्चित्य निधाता । तस्य निचयकर्म धनादिरक्षणव्यापार उच्यत इति सूत्रार्थः ॥ ५ ॥

समाहर्तृसमुदयप्रस्थापनम् इति सूत्रम् । सर्वायस्थानेभ्यो राजार्थानां सम्यक् समन्ताद्वा आहर्ता समाहर्ता विषयबल्यध्यक्षः । समुदयो धनोत्थानं तस्य प्रस्थापनं मार्गपरिकल्पनं समुदयप्रस्थापनं समाहर्तुः समुदयप्रस्थापनं समाहर्तृसमुदयप्रस्थापनम् । समाहर्ता कया कया विधया समुदयं प्रस्थापयेदित्येतदस्मिन् प्रकरणे उपदिश्यत इत्यर्थः ॥ ६ ॥

अक्षपटले गाणनिक्याधिकारः इति सूत्रम् । अक्षा गणनयोग्यानि रूप्यकादीनि तेषां पटलं स्थानम् अक्षपटलं तस्मिन्, गणनायां नियुक्तो गाणनिकः तस्य कर्म गाणनिक्यं तस्य प्रस्तावो गाणनिक्याधिकारः ॥ ७ ॥

समुदयस्य युक्तापहृतस्य प्रत्यानयनम् इति सूत्रम् । उत्पन्नस्यार्थस्य नियुक्तैः पुरुषैरपहृतस्य पुनःप्रापणमित्यर्थः ॥ ८ ॥

उपयुक्तपरीक्षा इति सूत्रम् । युक्तानाम् उपरि नियुक्ताः प्रत्ययितपुरुषा उपयुक्ताः तेषां परीक्षा दोषगवेषणेति सूत्रार्थः ॥ ९ ॥

शासनाधिकारः इति सूत्रम् । तालपत्रादिषु लिख्यमानोऽर्थः शासनं तस्याधिकारो विधिरुच्यत इत्यर्थः ॥ १० ॥

कोशप्रवेश्यरत्नपरीक्षा इति सूत्रम् । कोशो भाण्डागारं तस्मिन् प्रवेशयितुं योग्यानां मणिमुक्तादीनां परीक्षणमत्रोपदिश्यत इत्यर्थः ॥ ११ ॥

आकरकर्मान्तप्रवर्तनम् इति सूत्रम् । सुवर्णरजतरत्नाद्युत्पत्तिस्थानमाकरः, तस्य कर्मान्तः तत्क्रियानिश्चयः, तस्य प्रवर्तनं व्यापारणमित्यर्थः ॥

अक्षशालायां सुवर्णाध्यक्षः इति सूत्रम् । अक्षशाला अक्षः गण्यं धनं सुवर्णरूप्यादि तस्य शाला तद्घटनशाला तस्यां सुवर्णाध्यक्षः सुवर्णादिघटनगणनाद्यधिकृतः लक्षणया तद्व्यापार इत्यर्थः ॥ १३ ॥

खायां सौवर्णिकप्रचारः । १५. कोष्ठागाराध्यक्षः । १६. पण्याध्यक्षः । १७. कुप्याध्यक्षः । १८. आयुधागाराध्यक्षः । १९. तुलमानपौतवम् । २०. देशकालमानम् । २१. शुल्काध्यक्षः । २२. सूत्राध्यक्षः । २३. सीताध्यक्षः । २४. सुराध्यक्षः ।

विशिखायां सौवर्णिकप्रचारः इति सूत्रम् । विशिखायाम् आपणवीथ्यां, सौवर्णिकप्रचारः सुवर्णनियुक्तस्य व्यापारः ॥ १४ ॥

कोष्ठागाराध्यक्षः इति सूत्रम् । कोष्ठमुदरं लक्षणया तत्पोषणार्थं व्रीहिगोधूमादिकमाहारद्रव्यं तस्य अगारं सङ्ग्रहस्थानं तस्याध्यक्षः, अर्थात् तद्व्यापारः ॥ १५ ॥

पण्याध्यक्षः इति सूत्रम् । विक्रेयद्रव्याध्यक्ष इत्यर्थः ॥ १६ ॥

कुप्याध्यक्षः इति सूत्रम् । कुप्यं सारदारुवेणुवल्लिवल्कादि तस्मिन् नियुक्तः कुप्याध्यक्षः ॥ १७ ॥

आयुधागाराध्यक्षः इति सूत्रम् । स्पष्टार्थम् ॥ १८ ॥

तुलामानपौतवम् इति सूत्रम् । तुला उन्मानसाधनं मानं कुडुबादि ताभ्यां पौतवं परिच्छेदनं तुलामानपौतवं, लक्षणया तत्संशोधनमित्यर्थः । तच्च वाणिजकाः कूटतुलामानव्यवहारिणो मा भूवन्नित्येतदर्थम् ॥ १९ ॥

देशकालमानम् इति सूत्रम् । देशो योजनगव्यूतिक्रोशादिः कालस्त्रुटिलवादिः तयोर्मानं परिच्छेद इति सूत्रार्थः ॥ २० ॥

शुल्काध्यक्षः इति सूत्रम् । शुल्कं पञ्चदशभागादिकं शुल्कव्यवहारे वक्ष्यमाणं राज्ञो देयं तस्याध्यक्षः, तद्व्यापार इत्यर्थः ॥ २१ ॥

सूत्राध्यक्षः इति सूत्रम् । सूत्रं कार्पासादिजस्तन्तुः तस्य अध्यक्षः तद्वानादिकारयिता ॥ २२ ॥

सीताध्यक्षः इति सूत्रम् । सीता कृषिः तस्या अध्यक्षः कृषितन्त्र-वृक्षायुर्वेदौ विज्ञाय प्रवर्तकः ॥ २३ ॥

सुराध्यक्षः इति सूत्रम् । सुरा मधुमैरेयादि तस्या अध्यक्षः सन्धानविक्रयाद्यधिकृतः सुराध्यक्षः ॥ २४ ॥

२५. मूनाध्यक्षः । २६. गणिकाध्यक्षः । २७. नावध्यक्षः । २८. गोध्यक्षः । २९. अश्वाध्यक्षः । ३०. हस्त्यध्यक्षः । ३१. रथाध्यक्षः । ३२. पत्त्यध्यक्षः । ३३. सेनापतिप्रचारः । ३४. मुद्राध्यक्षः । ३५. विवीताध्यक्षः । ३६. समाहर्तृप्रचारः ।

मूनाध्यक्षः इति सूत्रम् । सूना भक्ष्यप्राणिवधस्थानं तस्या अध्यक्षः वध्यावध्यनियमनाद्यधिकृतः ॥ २५ ॥

गणिकाध्यक्षः इति सूत्रम् । धनमेव गणयन्तीति गणिका वेश्याः तासामध्यक्षः गणिकाध्यक्षः ॥ २६ ॥

नावध्यक्षः इति सूत्रम् । नावां यानपात्राणाम् अध्यक्षः आदेयराजभागग्रहणाधिकर्ता ॥ २७ ॥

गोध्यक्षः इति सूत्रम् । गवाम् उपलक्षणेन गोमहिषाजादीनां तदाजीवानां गोपालादीनां च अध्यक्षः नियामक इत्यर्थः ॥ २८ ॥

अश्वाध्यक्षः इति सूत्रम् । अश्वानां लक्षणकुलादिकं विज्ञाय तद्रक्षणादिकर्मानुष्ठाता अश्वाध्यक्षः ॥ २९ ॥

हस्त्यध्यक्षः इति सूत्रम् । अश्वाध्यक्षवद् हस्त्यध्यक्षो व्याख्येयः ॥३०॥

रथाध्यक्षः इति सूत्रम् । रथानां देवरथादीनां घटनाद्यधिकर्ता रथाध्यक्षः ॥ ३१ ॥

पत्त्यध्यक्षः इति सूत्रम् । पत्तयः पदातयः ये पादचारेण युध्यन्ते, तेष्वधिकृतः पत्त्यध्यक्षः ॥ ३२ ॥

सेनापतिप्रचारः इति सूत्रम् । सेनापतिः चतुरङ्गबलनेता तस्य प्रचार सेनाविषयो व्यापारः प्रतिपाद्यत इत्यर्थः ॥ ३३ ॥

मुद्राध्यक्षः इति सूत्रम् । मुद्रा नाम राजचिह्नं राजनामधेयप्रतिमादि लक्षणं यच्छासनपत्रादौ दीयते, तस्या अध्यक्षः प्रवर्तयिता ॥ ३४ ॥

विवीताध्यक्षः इति सूत्रम् । विवीतं तृणजलवान् अकृष्यः प्रदेश पश्वर्थः तस्याध्यक्षः तद्व्यापार इत्यर्थः ॥ ३५ ॥

समाहर्तृप्रचारः इति सूत्रम् । समाहर्ता आयस्थानेभ्यो राजार्थसंग्राहः जनपदाध्यक्षः तस्य प्रचारो व्यापारः जनपदचिन्तनमित्यर्थः ॥ ३६ ॥

३७. गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः । ३८. नागरिकप्रणिधिः । इत्यध्यक्षप्रचारो द्वितीयमधिकरणम् ॥

१. व्यवहारस्थापना । २. विवादपदनिबन्धः । ३. विवाहसंयुक्तम् । ४. दायविभागः । ५. वास्तुकम् । ६. समयस्यानपाकर्म ।

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः इति सूत्रम् । गृहस्थ-वणिक्-तपस्विवेषाः प्रणिधयः गूढपुरुषाः । अर्थात् तेषां जनपदेषु नियोजनम् । तच्च समाहर्तृकार्योपयोगिने जनपदवृत्तान्तज्ञानाय ॥ ३७ ॥

नागरिकप्रणिधिः इति सूत्रम् । नगरे नियुक्तो नागरिकः, तस्य प्रणिधिः प्रणिधानं व्यापारचिन्तनमित्यर्थः ॥ ३८ ॥

इतीत्यादि । अध्यक्षप्रचारोऽध्यक्षाणां व्यापारः ॥

अथ धर्मस्थीयं तृतीयमधिकरणम् । धर्मस्था नाम धर्मशास्त्रज्ञाः धर्मशास्त्रानुसारेण व्यवहारनिर्णयकर्मण्यधिकृताः । तेषामिदं धर्मस्थीयं तन्निर्णयव्यवहारपदप्रतिपादकमित्यर्थः । तत्र प्रथमं सूत्रं — **व्यवहारस्थापना** इति । कीदृशो व्यवहारः सिध्यति कीदृशो न सिध्यतीति व्यवस्थापनमिति सूत्रार्थः ॥ १ ॥

विवादपदनिबन्धः इति सूत्रम् । विवादपदस्य निबन्धः पूर्वोत्तरपक्षात्मना पत्र आरोपणं, तत्पूर्वकं चिन्तनमित्यर्थः ॥ २ ॥

विवाहसंयुक्तम् इति सूत्रम् । विवाहा अष्टविधाः ब्राह्मादयः, तत्सम्बद्धो व्यवहार इत्यर्थः । एतच्च प्रकरणं त्रिभिरध्यायैर्वितन्यते ॥ ३ ॥

दायविभागः इति सूत्रम् । दायः पितृपितृव्यादिधनं तस्य विभागः । अयमपि त्रिभिरध्यायैर्वितन्यते ॥ ४ ॥

वास्तुकम् इति सूत्रम् । वस्तु गृहारामक्षेत्रादि तत्सम्बद्धं वास्तुकम् । इदमध्यायत्रयेण वितन्यते । तत्र तृतीयाध्याये उत्तरमपि प्रकरणं प्रवेशितम् ॥ ५ ॥

समयस्यानपाकर्म इति सूत्रम् । इदमहं करिष्यामीत्यभ्युपगमात्मा सङ्केतः, इदमनेन कर्तव्यमिति बहुभिः सम्भूय कृतो वा सङ्केतः समयः ।

७. ऋणादानम् । ८. औपनिधिकम् । ९. दासकर्मकरकल्पः । १०. सम्भूयसमुत्थानम् । ११. विक्रीतक्रीतानुशयः । १२. दत्तस्यानपाकर्म । १३. अस्वामिविक्रयः । १४. स्वस्वामिसम्बन्धः । १५. साहसम् । १६. वाक्पारुष्यम् । १७. दण्डपारुष्यम् । १८. द्यूतसमाह्वयम् ।

तस्य अनपाकर्म त्यागाभावः इति सूत्रार्थः । इदं प्रकरणं वास्तुकप्रकरणीयविवीतक्षेत्रपथहिंसाव्युत्पादनाध्याये व्युत्पादितम् ॥ ६ ॥

ऋणादानम् इति सूत्रम् । ऋणग्रहणनिर्यातनसम्बद्धो व्यवहार इत्यर्थः ॥ ७ ॥

औपनिधिकम् इति सूत्रम् । उपनिधिर्निक्षेपः, तत्सम्बद्धमनुष्ठानमौपनिधिकम् ॥ ८ ॥

दासकर्मकरकल्पः इति सूत्रम् । अत्यन्तपारार्थ्यमासाद्य शुश्रूषका दासाः, भृत्यर्थं शुश्रूषकाः कर्मकराः तेषां कल्पः तत्सम्बन्धी विधिः ॥ ९ ॥

सम्भूयसमुत्थानम् इति सूत्रम् । वाणिजकैरन्यैर्वा समुदेत्यारभ्यमाणं कार्यं सम्भूयसमुत्थानम् ॥ १० ॥

विक्रीतक्रीतानुशयः इति सूत्रम् । विक्रीतं मूल्यमादाय दत्तं पण्यं क्रीतं मूल्यं दत्त्वा गृहीतं, तयोर्विषये अनुशयः विक्रयविषयः क्रयविषयश्च पश्चात्ताप इत्यर्थः ॥ ११ ॥

दत्तस्यानपाकर्म इति सूत्रम् । दत्तस्य धर्माद्यर्थे वाचा दत्तस्य अनपाकर्म अप्रदानम् । एतच्च विषयविशेषे पुनर्हरणस्याप्युपलक्षणम् ॥ १२ ॥

अस्वामिविक्रयः इति सूत्रम् । अस्वामी परद्रव्यव्यवहर्ता तेन कृतो विक्रयः अस्वामिविक्रयः ॥ १३ ॥

स्वस्वामिसम्बन्धः इति सूत्रम् । स्पष्टार्थम् ॥ १४ ॥

साहसम् इति सूत्रम् । सहसा कृतं कर्म साहसं प्रसभकर्म ॥ १५ ॥

वाक्पारुष्यम् इति सूत्रम् । वाचा कुत्सनभर्त्सनादिकमित्यर्थः ॥ १६ ॥

दण्डपारुष्यमिति सूत्रम् । दण्डेन करणेन पारुष्यं परुषकर्म द्रोहो दण्डपारुष्यम् ॥ १७ ॥

१९. प्रकीर्णकानि । इति धर्मस्थीयं तृतीयमधिकरणम् ॥

१. कारुकरक्षणम् । २. वैदेहकरक्षणम् । ३. उपनिपातप्रतीकारः । ४. गूढाजीविनां रक्षा । ५. सिद्धव्यञ्जनैर्माणवप्रकाशनम् । ६. शङ्कारूपकर्माभिग्रहः । ७. आशुमृतकपरीक्षा । ८. वाक्यकर्मा-

द्यूतसमाह्वयम् इति सूत्रम् । द्यूतम् अक्षक्रीडा समाह्वयः अजकुक्कुटादिप्राणिदेवनं तयोः समाहारः द्यूतसमाह्वयं, तत्सम्बद्धो व्यवहारः प्रकरणेऽस्मिन्नभिधीयत इत्यर्थः ॥ १८ ॥

प्रकीर्णकानि इति सूत्रम् । उक्तविवादपदानन्तर्गतानि याचितकाद्यदानादिनिमित्तानि विवादपदानि प्रकीर्णकानि, तान्यत्राभिधीयन्ते इत्यर्थः ॥ १९ ॥

इति धर्मस्थीयमित्यादि । एवमेकोनविंशतिप्रकरणं धर्मस्थीयमधिकरणं तृतीयं समुद्दिष्टमित्यर्थः ॥

अथ कण्टकशोधनाख्यं चतुर्थमधिकरणम् । तत्रेदं प्रथमं सूत्रं—**कारुकरक्षणम्** इति । कारुकाः तक्षायस्कारस्वर्णकारादयः तेभ्यः कूटकर्मकारिभ्यो देशस्य रक्षणमिहाभिधीयत इत्यर्थः ॥ १ ॥

वैदेहकरक्षणम् इति सूत्रम् । वाणिजकेभ्यः पौतवापचारिभ्यो रक्षणमित्यर्थः ॥ २ ॥

उपनिपातप्रतीकारः इति सूत्रम् । उपनिपाताः दैविकानि महाभयानि तेषां प्रतीकारः ॥ ३ ॥

गूढाजीविनां रक्षा इति सूत्रम् । ये गूढं लञ्चग्रहणेन स्वामिनं प्रजाश्च वञ्चयन्त आजीवन्ति ते गूढाजीविनः तेषां रक्षा तेभ्यो देशस्य रक्षणमित्यर्थः ॥ ४ ॥

सिद्धव्यञ्जनैर्माणवप्रकाशनम् इति सूत्रम् । सिद्धव्यञ्जनाः मुण्डजटिलतापसवेषा धूर्ताः तैः करणैः माणवप्रकाशनं माणवस्य प्रलोभनविद्यायाः प्रकाशनम् । तच्च चोरादिग्रहणार्थम् ॥ ५ ॥

शङ्कारूपकर्माभिग्रहः इति सूत्रम् । आत्मनः परान् प्रति परेषामा-

नुयोगः । ९. सर्वाधिकरणरक्षणम् । १०. एकाङ्गवधनिष्क्रयः । ११. शुद्धश्चित्रश्च दण्डकल्पः । १२. कन्याप्रकर्म । १३. अतिचारदण्डः । इति कण्टकशोधनं चतुर्थमधिकरणम् ॥

त्मानं प्रति च शङ्का द्विरूपा, रूपं सलोप्त्रदर्शनं, कर्म सन्धिच्छेदादि, एतैः अभिग्रहः चोराणां ग्रहणमिति सूत्रार्थः ॥ ६ ॥

आशुमृतकपरीक्षा इति सूत्रम् । आशु मृतकस्य परीक्षा किमयं स्वयं मृतः उत परेण मारित इति परीक्षणम् ॥ ७ ॥

वाक्यकर्मानुयोगः इति सूत्रम् । वाक्यानुयोगः कर्मानुयोगश्चेति सूत्रार्थः । तत्र वाक्यानुयोगः उपपत्तियुक्तैः सामवादैश्चोरपृच्छा, कर्मानुयोगः कशाप्रहारादिना चोरविचारणा ॥ ८ ॥

सर्वाधिकरणरक्षणम् इति सूत्रम् । अधिकरणशब्देन लक्षणया अध्यक्षप्रचाराधिकरणोक्ता अध्यक्षास्तन्नियम्याः पुरुषाश्च गृह्यन्ते । तेभ्यः सर्वेभ्यः प्रजानां धनस्य च रक्षणमिति सूत्रार्थः ॥ ९ ॥

एकाङ्गवधनिष्क्रयः इति सूत्रम् । एकाङ्गं हस्तः पादः कर्ण इत्येवञ्जातीयं तस्य वधश्छेदनम् एकाङ्गवधः तदुक्तो निष्क्रयः वधस्थानीयो धनदण्डश्च पुष्पञ्चाशत्पणादिः ॥ १० ॥

शुद्धश्चित्रश्च दण्डकल्पः इति सूत्रम् । शुद्धः चित्र इति द्विविधो दण्डविधिः । तत्र शुद्धः अक्लेशमारणं, चित्रः क्लेशमारणम् ॥ ११ ॥

कन्याप्रकर्म इति सूत्रम् । कन्याया अपुष्पितायाः स्त्रियाः प्रकर्म दूषणम् । तत्सम्बद्धो दण्डविधिरत्रोच्यत इत्यर्थः ॥ १२ ॥

अतिचारदण्डः इति सूत्रम् । अतिचारः अभक्ष्यभक्षणम् अगम्यागमनम् इत्येवमादिः तन्निमित्तो दण्ड उच्यत इत्यर्थः ॥ १३ ॥

इति कण्टकशोधनमित्यादि । एवं त्रयोदशप्रकरणं दुर्गराष्ट्रकण्टकशोधनप्रतिपादकं चतुर्थमधिकरणं समुद्दिष्टमित्यर्थः ॥

१. दाण्डकर्मिकम् । २. कोशाभिसंहरणम् । ३. भृत्यभरणीयम् । ४. अनुजीविवृत्तम् । ५. सामयाचारिकम् । ६. राज्यप्रतिसन्धानम् । ७. एकैश्वर्यम् । इति योगवृत्तं पञ्चममधिकरणम् ॥

अथ योगवृत्तं नाम पञ्चममधिकरणम् । योगो विस्रब्धघाती तद्वृत्तं तच्चोपांशुदण्डादिकम् । राजराज्यकण्टकविषय उपांशुदण्डादिप्रयोगोऽस्मिन्नधिकरणेऽभिधास्यते । तत्रेदं प्रथमं सूत्रं— **दाण्डकर्मिकम्** इति । दण्ड उपांशुवधः तस्य कर्म प्रयोगः दण्डकर्म तत्सम्बद्धमिहोच्यत इत्यर्थः ॥ १ ॥

कोशाभिसंहरणम् इति सूत्रम् । कोशस्य सुवर्णादेः अभिसंहरणं पूर्वत आधिक्येन सङ्ग्रहणमर्थकृच्छ्रप्राप्ताविव्यर्थः ॥ २ ॥

भृत्यभरणीयम् इति सूत्रम् । भृत्याः बुद्धौ शास्त्रे कर्मणि च साहाय्यदायिनः तेषां भरणं पोषणं तत्सम्बद्धं भृत्यभरणीयम् ॥ ३ ॥

अनुजीविवृत्तम् इति सूत्रम् । अनुजीविनो मन्त्रिप्रभृतयः तैः स्वामिनि कथं वर्तितव्यमित्येतदत्रोपदिश्यत इत्यर्थः ॥ ४ ॥

सामयाचारिकम् इति सूत्रम् । समयः व्यवस्था आचारः अनुष्ठानं समयाचारमधिकृत्य प्रवृत्तं सामयाचारिकम् ॥ ५ ॥

राज्यप्रतिसन्धानम् इति सूत्रम् । राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रानभिषिच्य यत् परिचिन्तनममात्यैः क्रियते तदिहोच्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकस्मिन्नध्याये समावेशितम् ॥ ६ ॥

एकैश्वर्यम् इति सूत्रम् । एकस्यैव राजपुत्रस्यैकातपत्रमैश्वर्यं कर्तव्यम् इत्येतदुच्यत इत्यर्थः । एकग्रहणं बहूनामैश्वर्यकरणे अराजकत्वप्रसङ्ग इति द्योतनार्थम् ॥ ७ ॥

इति योगवृत्तमित्यादि । एवं सप्तप्रकरणं योगवृत्ताख्यं पञ्चममधिकरणं समुद्दिष्टमित्यर्थः ॥

१. प्रकृतिसम्पदः । २. शमव्यायामिकम् । इति मण्डलयोनिः षष्ठमधिकरणम् ॥

१. षाड्गुण्यसमुद्देशः । २. क्षयस्थानवृद्धिनिश्चयः । ३. संश्रयवृत्तिः । ४. समहीनज्यायसां गुणाभिनिवेशः । ५. हीनसन्धयः ।

अथावापो यावत् त्रयोदशमधिकरणम् । तत्र षष्ठं मण्डलयोनिर्नाम । विजिगीष्वरिमध्यमोदासीनाख्यचतुरवयवं मण्डलं, योनिः उत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः । मण्डलं च तद् योनिश्च मण्डलयोनिः मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः । तत्र प्रथमं सूत्रं—**प्रकृतिसम्पद** इति । प्रकृतयः स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानि तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः ॥ १ ॥

शमव्यायामिकम् इति सूत्रम् । कर्मफलोपभोगानां क्षेमसाधनं शमः, व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः ॥ २ ॥

इति मण्डलयोनिरित्यादि । एवं द्विप्रकरणं मण्डलयोन्यधिकरणं षष्ठं समुद्दिष्टमित्यर्थः ॥

अथ षाड्गुण्याधिकरणे प्रथमं सूत्रं—**षाड्गुण्यसमुद्देश** इति । सन्ध्यादीनां षड्गुणानां संक्षिप्य प्रतिपादनमिति सूत्रार्थः ॥ १ ॥

तत् किमर्थमित्यपेक्षायां **क्षयस्थानवृद्धिनिश्चय** इति सूत्रम् । क्षयो ह्रासः, स्थानं तादवस्थ्यं, वृद्धिः उपचयः, तेषां निश्चयः स्वरूपावधारणम् । तदिहोच्यत इत्यर्थः । प्रकरणमिदं पूर्वं चैकस्मिन्नध्याये समावेशितम् ॥ २ ॥

क्षीणकार्यं वक्तुं सूत्रं—**संश्रयवृत्तिः** इति । प्रबलमाश्रित्य वर्तनमिति सूत्रार्थः ॥ ३ ॥

समहीनज्यायसां गुणाभिनिवेशः इति सूत्रम् । समः शत्रुणा सदृशशक्तिः, हीनः निकृष्टः, ज्यायान् उत्कृष्टः । आसु तिसृष्ववस्थासु गुणस्थापनात्रोच्यत इत्यर्थः ॥ ४ ॥

हीनसन्धय इति सूत्रम् । हीनेन कोशदण्डभूमीः प्रदाय करणीयाः सन्धय इह वर्ण्यन्त इत्यर्थः ॥ ५ ॥

---

१. 'थानि' क. पाठः.

६. विगृह्यासनम् । ७. सन्धायासनम् । ८. विगृह्ययानम् । ९. सन्धाययानम् । १०. सम्भूयप्रयाणम् । ११. यातव्यामित्रयोरभिग्रहचिन्ता । १२. क्षयलोभविरागहेतवः प्रकृतीनाम् । १३. सामवायिकविपरिमर्शः । १४. संहितप्रयाणिकम् । १५. परिपणिता·

विगृह्यासनम् इति सूत्रम् । शत्रुणा सह विगृह्य शत्रोर्धान्यादिप्राप्तिप्रतिघातं कृत्वा स्वविषये स्थितिरिति सूत्रार्थः ॥ ६ ॥

सन्धायासनम् इति सूत्रम् । अभियानाशक्तौ परेण सन्धिं कृत्वावस्थानमित्यर्थः ॥ ७ ॥

विगृह्ययानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह विग्रहं कृत्वा परं प्रति अभियानमित्यर्थः ॥ ८ ॥

सन्धाययानम् इति सूत्रम् । पार्ष्णिग्राहादिभिः सह सन्धिं कृत्वा शत्रुमुद्दिश्य यानमित्यर्थः ॥ ९ ॥

सम्भूयप्रयाणम् इति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमित्यर्थः ॥ १० ॥

यातव्यामित्रयोरभिग्रहचिन्ता इति सूत्रम् । अरिसम्पद्युक्तो व्यसनी च यातव्यः, अमित्रो नित्यापकारी शत्रुः, अभिग्रहो यानम् । यातव्यामित्रयोः कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमिहोच्यत इत्यर्थः ॥ ११ ॥

क्षयलोभविरागहेतवः प्रकृतीनाम् इति सूत्रम् । क्षयः गजवाजिपुरुषधनादीनामपचयः, लोभः अतितृष्णा, विरागः प्रद्वेषः, तदुत्पत्तिहेतवोऽमात्यादीनामिहाभिधीयन्त इत्यर्थः ॥ १२ ॥

सामवायिकविपरिमर्शः इति सूत्रम् । समवायेन चरन्ति सामवायिकाः विजिगीष्वनुयायिनो राजानः तेषां विपरिमर्शः गुरुलघुभावचिन्तनमित्यर्थः ॥ १३ ॥

संहितप्रयाणिकम् इति सूत्रम् । संहितयोः अन्योन्यकृतसन्धिकयोः शत्रुविजिगीष्वोः प्रयाणं भिन्नदिक्कं यानं, तदिह प्रतिपाद्यत इत्यर्थः ॥ १४ ॥

परिपणितापसृताश्च सन्धयः । १६. द्वैधीभाविकाः सन्धिविक्रमाः । १७. यातव्यवृत्तिः । १८. अनुग्राह्यमित्रविशेषाः । १९. मित्रहिरण्यभूमिकर्मसन्धयः । २०. पार्ष्णिग्राहचिन्ता । २१. हीनशक्तिपूरणम् । २२. बलवता विगृह्योपरोधहेतवः । २३. दण्डोपनत-

---

परिपणितापरिपणितापसृताश्च सन्धयः इति सूत्रम् । देशकालकार्यव्यवस्थया कृतः सन्धिः परिपणितसन्धिः, तद्विपरीतोऽपरिपणितसन्धिः, कुतोऽपि निमित्तात् स्वपक्षादपसृतेन पुनः सन्धिः अपसृतसन्धिः, त इमे सन्धय इह व्युत्पाद्यन्त इत्यर्थः ॥ १९ ॥

द्वैधीभाविकाः सन्धिविक्रमाः इति सूत्रम् । सन्धिविग्रहोपादानं द्वैधीभावः तत्सम्बद्धाः सन्धिविक्रमाः कथ्यन्त इत्यर्थः ॥ १६ ॥

यातव्यवृत्तिः इति सूत्रम् । यातव्यो विजिगीषुः तस्य सामवायिकेषु वृत्तिः यातव्ये सामवायिकानां वृत्तिश्चोच्यत इत्यर्थः ॥ १७ ॥

अनुग्राह्यमित्रविशेषाः इति सूत्रम् । भूम्येकान्तरा राजानो मित्राणि । तत्र कानि मित्राणि साहाय्यदानेनानुग्राह्याणि कानि नेति विचारोऽत्र क्रियत इत्यर्थः ॥ १८ ॥

मित्रहिरण्यभूमिकर्मसन्धयः इति सूत्रम् । मित्रेण हिरण्येन भूम्या कर्मणा च ये सन्धयः पणबन्धाः त इहाभिधीयन्त इत्यर्थः । इदं प्रकरणं चतुरध्यायीरूपम् ॥ १९ ॥

पार्ष्णिग्राहचिन्ता इति सूत्रम् । पार्ष्णिग्राहावस्थापन्नस्य विजिगीषो चिन्ता अनुष्ठानविचार इत्यर्थः ॥ २० ॥

हीनशक्तिपूरणम् इति सूत्रम् । अपचितानां प्रभुमन्त्रोत्साहशक्तीन वर्धनमिहोच्यत इत्यर्थः ॥ २१ ॥

बलवता विगृह्योपरोधहेतव इति सूत्रम् । प्रबलेन शत्रुणा सह वि गृह्य दुर्गप्रवेशस्य कारणान्यभिधीयन्त इत्यर्थः ॥ २२ ॥

दण्डोपनतवृत्तम् इति सूत्रम् । दण्डेन बलेन उपनतः अधःकृ तदवस्थापन्नस्य विजिगीषोर्बलवन्तं प्रत्यनुष्ठानमुच्यत इत्यर्थः ॥ २३ ॥

वृत्तम् । २४. दण्डोपनायिवृत्तम् । २५. सन्धिकर्म । २६. सन्धिमोक्षः । २७. मध्यमचरितम् । २८. उदासीनचरितम् । २९. मण्डलचरितम् । इति षाड्गुण्यं सप्तममधिकरणम् ॥

१. प्रकृतिव्यसनवर्गः । २. राजराज्ययोर्व्यसनचिन्ता ।

दण्डोपनायिवृत्तम् इति सूत्रम् । दण्डेन बलेन शत्रुमात्मनः समीपमुपनयति उपनमयतीति दण्डोपनायो तदवस्थस्य विजिगीषोर्वृत्तमुच्यत इत्यर्थः ॥ २४ ॥

सन्धिकर्म इति सूत्रम् । सन्धेः शपथादिना दृढीकरणमुच्यत इत्यर्थः ॥ २५ ॥

सन्धिमोक्षः इति सूत्रम् । सन्धिनिमित्तं प्रहीकृतः सन्धिरित्युपचर्यते तस्य मोक्षो मोचनमुच्यत इत्यर्थः ॥ २६ ॥

मध्यमचरितम् इति सूत्रम् । मध्यमेषु विजिगीषोर्वृत्तिरुच्यत इत्यर्थः । एतदादिप्रकरणत्रयमेकास्मिन्नध्याये सन्निवेशितम् ॥ २७ ॥

उदासीनचरितम् इति सूत्रम् । उदासीनं प्रति विजिगीषोरनुष्ठानमभिधीयत इति सूत्रार्थः ॥ २८ ॥

मण्डलचरितम् इति सूत्रम् । मण्डलम् अरिमित्रलक्षणम् । तत् प्रति विजिगीषोरनुष्ठानमुच्यत इति सूत्रार्थः ॥ २९ ॥

इति षाड्गुण्यं सप्तममधिकरणमिति । एवमेकोनत्रिंशत्प्रकरणं षाड्गुण्याधिकरणं सप्तमं समुद्दिष्टमित्यर्थः ॥

अथ व्यसनाधिकारिकेऽधिकरणे प्रथमं सूत्रं — **प्रकृतिव्यसनवर्गः** इति । प्रकृतयः स्वाम्यमात्यादयः, व्यसनानि गुणप्रातिलोम्यादीनि, तेषां वर्गः समूहोऽभिधीयत इत्यर्थः ॥ १ ॥

राजराज्ययोर्व्यसनचिन्ता इति सूत्रम् । राजा स्वामी, राज्यम् अमात्यादिप्रकृतिपञ्चकं द्रव्यप्रकृतिपञ्चकं च, तयोर्व्यसनचिन्ता व्यसनगुरुलघुभावसम्प्रधारणमुच्यत इत्यर्थः ॥ २ ॥

३. पुरुषव्यसनवर्गः । ४. पीडनवर्गः । ५. स्तम्भनवर्गः । ६. कोशसङ्गवर्गः । ७. बलव्यसनवर्गः । ८. मित्रव्यसनवर्गः । इति व्यसनाधिकारिकमष्टममधिकरणम् ॥

१. शक्तिदेशकालबलाबलज्ञानम् । २. यात्राकालाः ।

पुरुषव्यसनवर्गः इति सूत्रम् । पुरुषस्य व्यसनानि व्यसनप्रभवा दोषाः तेषां वर्गोऽभिधीयत इत्यर्थः ॥ ३ ॥

पीडनवर्गः इति सूत्रम् । अग्न्युदकादिनिमित्ताः शक्त्यपचयाः पीडनानि, तेषां वर्गः संख्यास्वरूपगौरवलाघवतोऽभिधीयत इत्यर्थः । एतदादिप्रकरणत्रयमेकस्मिन्नध्याये समावेशितम् ॥ ४ ॥

स्तम्भनवर्गः इति सूत्रम् । स्तम्भनं प्रत्यूहोक्त्या राजकार्योपरोधः तद्धेतूनां वर्ग उच्यत इति सूत्रार्थः ॥ ५ ॥

कोशसङ्गवर्गः इति सूत्रम् । कोशस्य राजार्थस्य सङ्गः अप्रदानं कोशसङ्गः तद्धेतुवर्गः उच्यत इत्यर्थः ॥ ६ ॥

बलव्यसनवर्गः इति सूत्रम् । बलं चतुरङ्गं सैन्यं मौलभृतकादिभेदेन षड्विधं तस्य व्यसनवर्गः अमानितविमानितादित्रयस्त्रिंशत्प्रकारोऽभिधीयत इत्यर्थः ॥ ७ ॥

मित्रव्यसनवर्गः इति सूत्रम् । स्पष्टार्थम् । प्रकरणद्वयमिदमेकाध्यायगतम् ॥ ८ ॥

इति व्यसनाधिकारिकमित्यादि । एवमष्टप्रकरणं व्यसनाधिकारेण प्रवृत्तमष्टममधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ अभियास्यत्कर्माख्यं नवममधिकरणम् । अभियास्यतो विजिगीषोः अभियानात् प्राक् चिन्तनीयमर्थजातमस्मिन्नधिकरणे उपदेक्ष्यते । तत्र प्रथमं सूत्रं— **शक्तिदेशकालबलाबलज्ञानम्** इति । शक्तेर्देशस्य कालस्य च बलाबलज्ञानमुपदिश्यत इत्यर्थः । इदं प्रकरणमुत्तरं चैकाध्यायगते ॥ १ ॥

यात्राकालाः इति सूत्रम् । शत्रुं प्रति अभियानं यात्रा तद्योग्याः कालाः ऋतव उच्यन्त इत्यर्थः ॥ २ ॥

३. बलोपादानकालाः। ४. सन्नाहगुणाः। ५. प्रतिबलकर्म। ६. पश्चात्कोपचिन्ता। ७. बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः। ८. क्षयव्ययलाभविपरिमर्शः। ९. बाह्याभ्यन्तराश्चापदः। १०. दूष्यशत्रुसंयुक्ताः। ११. अर्थानर्थसंशययुक्ताः। १२. तासामुपायविकल्पजाः सिद्धयः। इत्यभियास्यत्कर्म नवममधिकरणम्॥

बलोपादानकालाः इति सूत्रम्। बलानि मौलभृतकादीनि षट् तेषाम् उपादानकालाः उद्योजनसमयाः। अमुकबलममुकसमये समुद्योजयितव्यमित्ययमर्थ इह चिन्त्यत इत्यर्थः॥ ३॥

सन्नाहगुणाः इति सूत्रम्। सन्नाहः शस्त्रावरणग्रहणं तस्य गुणाः श्रेष्ठत्वप्रकाराः कथ्यन्त इत्यर्थः॥ ४॥

प्रतिबलकर्म इति सूत्रम्। परबलाभिभवसमर्थं बलं प्रतिबलं, तस्य करणप्रकार उच्यत इत्यर्थः॥ ५॥

पश्चात्कोपचिन्ता इति सूत्रम्। पश्चात्कोपः पार्ष्णिग्राहादिकृतः कोपो दाहविलोपादिः, स इह चिन्त्यत इत्यर्थः। इदमुत्तरं च प्रकरणमेकाध्यायगते॥ ६॥

बाह्याभ्यन्तरप्रकृतिकोपप्रतीकारः इति सूत्रम्। बाह्यप्रकृतयो राष्ट्रमुख्यान्तपालादयः, आभ्यन्तरप्रकृतयो मन्त्रिपुरोहितादयः, तासां कोपो व्यलीकजनितश्चित्तविकारः, तस्य प्रतिविधानमुच्यत इति सूत्रार्थः॥ ७॥

क्षयव्ययलाभविपरिमर्शः इति सूत्रम्। क्षयो युग्यपुरुषापचयः, व्ययो हिरण्यधान्यापचयः, लाभो यानफलं भूम्यादिप्राप्तिः, तेषां विपरिमर्शः गौरवलाघवसम्प्रधारणमभिधीयत इत्यर्थः॥ ८॥

बाह्याभ्यन्तराश्चापदः इति सूत्रम्। बाह्यापदः बाह्यराष्ट्रमुख्यान्तपालाद्युत्पादिता विपदः, आभ्यन्तरापदः मन्त्रिपुरोहिताद्युत्थापिताः, तासां स्वरूपं प्रतिविधानं चोपदिश्यत इत्यर्थः॥ ९॥

दूष्यशत्रुसंयुक्ताः इति सूत्रम्। दूष्याः कृत्याः पौरजानपदास्तन्मुख्याश्च, शत्रवः सहजकृत्रिमादयः, तत्संयुक्तास्तदुत्पादिताः आपद इति विशेष्यमनुवर्तते। ता इहोच्यन्ते स्वरूपतः प्रतिविधानतश्चेत्यर्थः॥ १०॥

१. स्कन्धावारनिवेशः । २. स्कन्धावारप्रयाणम् । ३. बलव्यसनावस्कन्दकालरक्षणम् । ४. कूटयुद्धविकल्पाः । ५. स्वसैन्योत्साहनम् । ६. स्वबलान्यबलव्यायोगः । ७. युद्धभूमयः

अर्थानर्थसंशययुक्ताः । इति सूत्रम् अर्थो मित्रहिरण्यभूम्यादिः। अनर्थस्तन्नाशः शरीरनाशश्च, संशयः अर्थप्राणयोः सन्देहः, तैर्युक्ता आपद उच्यन्त इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ ११ ॥

तासामुपायविकल्पजाः सिद्धयः इति सूत्रम् । तासां पूर्वोक्तानामापदाम् उपायविकल्पजाः उपायाः प्रशमार्थाः सामादयः तेषां विकल्पः प्रयोगभेदः तज्जनिताः सिद्धयः प्रतीकारा उच्यन्त इत्यर्थः ॥ १२ ॥

इत्यभियास्यत्कर्मेत्यादि । एवं द्वादशप्रकरणमभियास्यत्कर्माख्यं नवममधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ दशमे साङ्ग्रामिकेऽधिकरणे प्रथमं सूत्रं — **स्कन्धावारनिवेशः** इति । सैन्यावासस्थानं स्कन्धावारः तस्य निवेशो निर्माणविधिरुच्यत इत्यर्थः ॥ १ ॥

स्कन्धावारप्रयाणम् इति सूत्रम् । स्कन्धावारस्य कटकस्य देशकालाद्यनुगुणसन्नाहपुरस्सरमभिषेणनमुच्यत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ २ ॥

बलव्यसनावस्कन्दकालरक्षणम् इति सूत्रम् । अमानितविमानितादीनि बलव्यसनानि अवस्कन्दकाला दीर्धकान्तारानुदकाद्यध्वगमनकालाः तेभ्यः सैन्यसंरक्षणमुच्यत इत्यर्थः ॥ ३ ॥

कूटयुद्धविकल्पाः इति सूत्रम् । कूटयुद्धं नाम कपटयुद्धं बलव्यसनावस्कन्दकालादिच्छिद्रमुपलभ्य शत्रुहिंसनं, तस्य विकल्पाः भेदाः कथ्यन्त इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥ ४ ॥

स्वसैन्योत्साहनम् इति सूत्रम् । आत्मयोधानां संग्रामगुणसंकीर्तनादिना युद्धोत्साहजननमुच्यत इत्यर्थः ॥ ५ ॥

८. पत्त्यश्वरथहस्तिकर्माणि । ९. पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः। १०. सारफल्गुबलविभागः । ११. पत्त्यश्वरथहस्तियुद्धानि । १२. दण्डभोगमण्डलासंहतव्यूहव्यूहनम् । १३. तस्य प्रतिव्यूहसंस्थापनम् । इति साङ्ग्रामिकं दशममधिकरणम् ॥

स्वबलान्यबलव्यायोगः इति सूत्रम् । स्वसैन्यस्य परसैन्यापेक्षया व्यायोगः विशिष्टमायोजनं व्यवस्थापनं दिक्सूर्यवाताद्यानुगुण्यं यथा स्यात् तथा व्यूहरचनामिति यावत् । तदिहोच्यत इत्यर्थः ॥ ६ ॥

युद्धभूमयः इति सूत्रम् । युद्धानुगुणाः समस्थिराभिकाशादिलक्षणाः भूमयः कथ्यन्त इत्यर्थः ॥ ७ ॥

पत्त्यश्वरथहस्तिकर्माणि इति सूत्रम् । पत्तिः पदातिः तदादीनां व्यापारा उच्यन्त इत्यर्थः ॥ ८ ॥

पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः इति सूत्रम् । पक्षौ पञ्चव्यूहात्मना स्थाप्यमानस्य बलस्य बहिः पुरस्तात्कोट्यौ, कक्षौ पश्चादन्तःपार्श्वे, उरस्यम् मध्यम्, एषां पञ्चानां व्यूहविशेषाणां बलपरिमाणानुगुण्येन व्यूहविभागोऽभिधीयत इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायगतम् ॥ ९ ॥

सारफल्गुबलविभागः इति सूत्रम् । सारबलं पितृपैतामहत्वादिदण्डसम्पद्युक्तं, तद्विपरीतं भीरुकं वा फल्गुबलं, तयोर्विभागो विभज्यावस्थापनं चिन्त्यत इति सूत्रार्थः ॥ १० ॥

पत्त्यश्वरथहस्तियुद्धानि इति सूत्रम् । स्पष्टार्थम् ॥ ११ ॥

दण्डभोगमण्डलासंहतव्यूहव्यूहनम् इति सूत्रम् । दण्डव्यूहो भोगव्यूहो मण्डलव्यूहः असंहतव्यूहः इत्येतेषां प्रकृतिव्यूहानां तद्विकृतिव्यूहानां च रचनमभिधीयत इत्यर्थः । इदमुत्तरं च प्रकरणमेकाध्यायगतम् ॥ १२ ॥

तस्य प्रतिव्यूहसंस्थापनम् इति सूत्रम् । तस्य दण्डादिव्यूहनस्य अर्थाद् दण्डादिव्यूहानां प्रतिव्यूहस्थापनमुच्यत इत्यर्थः ॥ १३ ॥

इति साङ्ग्रामिकं दशममधिकरणमिति । संग्राममधिकृत्य प्रवृत्तं सांग्रामिकं तदाख्यं दशममधिकरणम् इत्थं त्रयोदशप्रकरणकं समुद्दिष्टमित्यर्थः ॥

१. भेदोपादानानि । २. उपांशुदण्डः । इति सङ्घवृत्तमेकादशमधिकरणम् ॥

१. दूतकर्म । २. मन्त्रयुद्धम् । ३. सेनामुख्यवधः । ४. मण्डलप्रोत्साहनम् । ५. शस्त्राग्निरसप्रणिधयः । ६. विवधासारप्र-

अथैकादशे सङ्घवृत्तेऽधिकरणे प्रथमं सूत्रं — **भेदोपादानानि** इति । भेदः सङ्घविश्लेषोपायः तस्य उपादानानि प्रयोगा उच्यन्त इत्यर्थः ॥ १ ॥

उपांशुदण्डः इति सूत्रम् । तूष्णींदण्डः निगूढवध उच्यत इत्यर्थः ॥ २ ॥

इति **सङ्घवृत्तमेकादशमधिकरणमिति** । सङ्घः शस्त्रोपजीविनां सङ्घीभावैकबलानां राजाविधेयानां समूहः, तस्मिन् वृत्तं तद्विधेयीकरणानुकूले राज्ञो व्यापारः तत्प्रतिपादकम्, एवं द्विप्रकरणम् एकादशमधिकरणं समुद्दिष्टमित्यर्थः । एतच्चैकाध्यायम् ॥

अथ आबलीयसं नाम द्वादशमधिकरणम् । अबलीयान् दुर्बलतरः तस्येदमाबलीयसं प्रबले सन्धिमनिच्छति सति दुर्बलतरस्य कृत्यम् । तदिह प्रतिपाद्यम् । तत्र प्रथमं सूत्रं — **दूतकर्म** इति । दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिविधाः तेषां व्यापारोऽभिधीयत इत्यर्थः ॥ १ ॥

मन्त्रयुद्धम् इति सूत्रम् । मन्त्रः प्रज्ञोत्कर्षः तेन युद्धं मन्त्रयुद्धम् । तच्च शत्रुषड्वर्गवशगानेकभूमिपतिनाशोदाहरणादिना शत्रोर्मतिमुपजनय्य वञ्चनम् । तदिहोच्यत इति सूत्रार्थः ॥ २ ॥

सेनामुख्यवधः इति सूत्रम् । सेना चतुरङ्गबलं तत्र मुख्याः सेनापत्यादयः तेषां वधोपाय उच्यत इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ३ ॥

मण्डलप्रोत्साहनम् इति सूत्रम् । मण्डलं मित्रादिमण्डलं तस्य प्रोत्साहनम् आत्मरक्षार्थमुद्योजनं विजिगीषुणा कर्तव्यमुच्यत इत्यर्थः ॥ ४ ॥

शस्त्राग्निरसप्रणिधयः इति सूत्रम् । शस्त्राग्निरसानां गूढप्रयोगा उच्यन्त इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ५ ॥

सारवधः । ७. योगातिसन्धानम् । ८. दण्डातिसन्धानम् । ९. एक-विजयः । इत्याबलीयसं द्वादशमधिकरणम् ॥

१. उपजापः । २. योगवामनम् । ३. अपसर्पप्रणिधिः । ४. पर्युपासनकर्म । ५. अवमर्दः । ६. लब्धप्रशमनम् । इति दुर्गलम्भोपायस्त्रयोदशमधिकरणम् ॥

विवधासारप्रसारवधः इति सूत्रम् । विवधः पर्याहारः उपचारात् पर्याहारवाही स्वप्रजासकाशलभ्यायभारानेता, आसारः सुहृद्बलं, प्रसारो वनाद् यवसेन्धनाहर्ता, तेषां वध उच्यत इत्यर्थः ॥ ६ ॥

योगातिसन्धानम् इति सूत्रम् । योगः कपटोपायः देवतागृहप्रवेशाद्यवसरे शत्रोरुपरि शिलायन्त्रमोक्षणभित्तिपातनादिः तेनातिसन्धानमुच्यत इत्यर्थः । एतदादिप्रकरणत्रयमेकाध्यायान्तर्गतम् ॥ ७ ॥

दण्डातिसन्धानम् इति सूत्रम् । दण्डो वधपारिक्लेशार्थहरणादिः, तेन शत्रोरभिभवनमुच्यत इत्यर्थः ॥ ८ ॥

एकविजयः इति सूत्रम् । एकेन सहायनिरपेक्षेणैव विजिगीषुणा विजयः शत्रोरभिभव उच्यत इत्यर्थः ॥ ९ ॥

इत्याबलीयसमित्यादि । एवं नवप्रकरणमाबलीयसं द्वादशमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथ त्रयोदशं दुर्गलम्भोपायाख्यमधिकरणमारभ्यते । दुर्गस्य परकीयस्य प्राप्त्युपायोऽस्मिन्नधिकरण उपदिश्यते । तत्र प्रथमं सूत्रम् — **उपजाप** इति । उपजापो भेदः उच्यत इत्यर्थः ॥ १ ॥

योगवामनम् इति सूत्रम् । योगो मुण्डजटिलादिवेषान्यत्वग्रहणं तेनोपायेन वामनं शत्रोर्दुर्गान्निष्क्रामणमभिधीयत इत्यर्थः ॥ २ ॥

अपसर्पप्रणिधिः इति सूत्रम् । अपसर्पा गूढपुरुषाः तेषां प्रणिधानं शत्रुविषये निवासनमुच्यत इत्यर्थः ॥ ३ ॥

पर्युपासनकर्म इति सूत्रम् । परदुर्गं परित उपासनकर्म सैन्यनिवासनव्यापार उच्यत इत्यर्थः । इदमुत्तरं चैकाध्यायगतम् ॥ ४ ॥

अवमर्दः इति सूत्रम् । अवमर्दः परदुर्गमर्दनं तत् कदा केन प्रकारेण कर्तव्यमित्ययमर्थोऽभिधीयत इत्यर्थः ॥ ५ ॥

१. परघातप्रयोगः । २. प्रलम्भनम् । ३. स्वबलोपघातप्रतीकारः । इत्यौपनिषदं चतुर्दशमधिकरणम् ॥

१. तन्त्रयुक्तयः । इति तन्त्रयुक्तिः पञ्चदशमधिकरणम् ॥

लब्धप्रशमनम् इति सूत्रम् । विजिगीषुणा लब्धस्य शत्रुदुर्गादेः प्रशमनं लब्धप्रशमनम् । तच्च दुर्गादिवासिनाम् अपूर्वभूपतिविषयशङ्काद्यपोहनेन विजिगीषौ विस्रम्भजननम् । तदभिधीयत इति सूत्रार्थः ॥ ६ ॥

इति **दुर्गलम्भोपाय** इत्यादि । एवं षट्प्रकरणं दुर्गलम्भोपायाख्यं त्रयोदशमधिकरणं समुद्दिष्टमित्यर्थः ॥

अथौपनिषदं चतुर्दशमधिकरणम् । उपनिषत् शत्रुजयोपायरहस्यं तदधिकृत्य प्रवृत्तमौपनिषदम् । तत्र प्रथमं सूत्रं—**परघातप्रयोग** इति । शत्रुवधार्थ औषधप्रयोग उच्यत इत्यर्थः ॥ १ ॥

प्रलम्भनम् इति सूत्रम् । औषधमन्त्रप्रयोगद्वारेण क्षुत्प्रतीकारविरूपकरणादिना शत्रुवञ्चनमुच्यत इत्यर्थः । अद्भुतोत्पादनं भैषज्यमन्त्रप्रयोग इति द्विधा विभज्य प्रकरणमिदमध्यायद्वयेन वितन्यते । तत्र मार्जारोष्ट्रादिचक्षुस्साधितचूर्णादिकं भैषज्यं दृश्यादृश्यकरणादिसाधनं, 'बलिं वैरोचनमि'त्यादिर्मन्त्रः ॥ २ ॥

स्वबलोपघातप्रतीकारः इति सूत्रम् । स्वबलस्य स्वसैन्यस्य परप्रयुक्तविषाम्बुदूषणादिनिमित्तो य उपघातः तस्य प्रतीकारोऽभिधीयत इत्यर्थः ॥ ३ ॥

इत्यौपनिषदमित्यादि । एवं त्रिप्रकरणम् औपनिषदं चतुर्दशमधिकरणं समुद्दिष्टमित्यर्थः । औपनिषदिकमित्यपि पाठः । तदाणन्ताद्वुन् ॥

अथान्तिमं तन्त्रयुक्तिर्नाम पञ्चदशमधिकरणम् । तन्त्रं तन्त्रावापात्मकमिदमर्थशास्त्रं तस्य युक्तिः व्याख्यानोपायभूतो न्यायः स इह प्रतिपाद्यते । तत्रेदं सूत्रं—**तन्त्रयुक्तय** इति । तन्त्रोपयुक्ता युक्तयः अधिकरण विधानादयो द्वात्रिंशदस्मिन् प्रकरणेऽभिधीयन्त इति सूत्रार्थः ॥ १ ॥

इति तन्त्रयुक्तिरित्यादि । एवमेकप्रकरणकमिदं तन्त्रयुक्त्यधिकरणं समुद्दिष्टमित्यर्थः ॥

शास्त्रसमुद्देशः पञ्चदशाधिकरणानि सपञ्चाशदध्यायशतं साशीति प्रकरणशतं षट् श्लोकसहस्राणीति ।

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
प्रथमोऽध्यायः राजवृत्तिः ॥

अथ सर्वप्रकारेयत्ताख्यनेन कृत्स्नस्य शास्त्रस्य समुद्देशमाह — शास्त्रसमुद्देश इत्यादि । श्लोक इह द्वात्रिंशद् अक्षराणि, येषां समुदाय एको ग्रन्थ इति गण्यते । शेषं स्पष्टम् ।

व्युत्पित्सुमरोचनार्थं स्वशास्त्रस्य तन्मुख्यगुणपुष्कलतां श्लोकेनाह — सुखेत्यादिना । सुखं क्लेशासहं ग्रहणं बुद्धिर्येषां ते सुखग्रहणाः सुकुमारमतयः तैरपि विज्ञेयं विज्ञातुं शक्यम् । तदन्यविज्ञेयत्वं तु कैमुत्यसिद्धम् । तत्त्वार्थपदनिश्चितं तत्त्वम् अर्थस्य याथात्म्यं, अर्थः शब्दाभिधेयः, पदं वाचकशब्दः, तत्त्वतोऽर्थतः पदतश्च निश्चितम् । किं यथाप्रतिपादितमेवार्थस्य याथात्म्यम् उतान्यदपि स्यादिति सन्देहानुत्थापकं तत्त्वनिश्चितम्, अर्थपदयोरन्यूनानतिरिक्ततया सन्देहाजनकम् अर्थपदनिश्चितमिति बोद्धव्यम् । तत्त्वार्थपदानि निश्चितानि यस्मिन्निति बहुव्रीहिर्वा । तदा तु निश्चितशब्दस्य परनिपात आहिताग्न्यादित्वात् साध्यः ।

इतीत्याद्यध्यायसमाप्तिवाक्यम् । तत्र प्रान्ते राजवृत्तिरिति प्रतिपाद्यसूचनम्, एतदध्यायसंक्षिप्तस्य कृत्स्नशास्त्रार्थस्य राजसम्बन्धिव्यापारात्मकत्वात् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
प्रथमोऽध्यायः राजवृत्तिः ॥

१. प्रकरणं विद्यासमुद्देशः — आन्वीक्षिकीस्थापना ।

आन्वीक्षिकी त्रयी वार्त्ता दण्डनीतिश्चेति विद्याः ।

त्रयी वार्त्ता दण्डनीतिश्चेति मानवाः, त्रयीविशेषो ह्यान्वीक्षिकीति ।

वार्त्ता दण्डनीतिश्चेति बार्हस्पत्याः, संवरणमात्रं हि त्रयी लोकयात्राविद इति ।

अथ समुद्देशनिर्देशक्रमेण अधिकरणप्रकरणानि व्याख्येयानि । तत्र तावत् प्रथमाधिकरणस्यादिमं प्रकरणं द्वितीयादिभिस्त्रिभिरध्यायैः प्रपञ्च्यते । विद्यासमुद्देश इति हि प्रथमं सूत्रम् । कास्ता विद्या इत्याकाङ्क्षायामाह — **आन्वीक्षिकी**त्यादि । अर्थतत्त्वस्य हेतुभिः परीक्षणमन्वीक्षा सा प्रयोजनमस्या इति आन्वीक्षिकी हेतुविद्या । ऋग्यजुःसामानि त्रयी तेषाम् अभिचारकर्मज्ञानादिफलादथर्ववेदाद् भिन्नप्रस्थानतया पृथक्पङ्क्तिनिवेश्यानां सम्भूयैकक्रतुकार्यसाधकत्वात तत्समुदायस्य त्रयीति संज्ञा । कृषिः पाशुपाल्यं वणिज्या च वार्त्ता । दण्डनीतिस्तु राजनीतिः । इति एवं प्रसिद्धा इति शेषः ।

तत्र मनुशिष्याणां पक्षमाह — **त्रयी**त्यादि । आन्वीक्षिकी त्रयीविशेषो हि त्रय्यनुगामितया त्रय्यर्थविचाररूपतया च त्रय्याः प्रकार एव न विद्यान्तरमित्यर्थः । तत्र त्रय्यनुगामिनी आन्वीक्षिकी साङ्ख्ययोगतर्कशास्त्राणि, अन्या तु पूर्वोत्तरमीमांसे । आह च कामन्दकः —

"अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः ।
धर्मशास्त्रं पुराणं च त्रयीदं सर्वमुच्यते ॥"

इति ।

बृहस्पतिशिष्याणां मतमाह — **वार्त्ता दण्डे**त्यादि । त्रय्या विद्यान्तरत्वाभावे हेतुमाह — **संवरणमात्रं ही**ति । त्रयी, लोकयात्राविदः वार्तादण्डनीत्यनुष्ठानलक्षणलोकतन्त्रविदुषः, संवरणमात्रं हि नास्तिकोऽयमिति लोकनिन्दाद्वारसंवृतिसाधनमेव केवलम् । लोकतन्त्रसम्यङ्निर्वहणसमर्थमपि त्रय्यपरिग्राहिणं सन्तं नास्तिक इति लोको निन्देदिति त्रयीपरिग्रहस्य यथोक्तनिन्दाद्वारगोपनमात्रफलत्वेनाल्पप्रयोजनत्वान्न सा विद्यान्तरमित्यभिप्रायः । त्रयीनिरासेन तदन्तर्गताया आन्वीक्षिक्या अपि निरासः सिद्धः ।

दण्डनीतिरेका विद्येत्यौशनसाः, तस्यां हि सर्वविद्यारम्भाः प्रतिबद्धा इति ।

चतस्र एव विद्या इति कौटिल्यः । ताभिर्धर्मार्थौ यद् विद्यात्, तद् विद्यानां विद्यात्वम् ।

साङ्ख्यं योगो लोकायतं चेत्यान्वीक्षिकी । धर्माधर्मौ त्रय्याम् । अर्थानर्थौ वार्त्तायाम् । नयापनयौ दण्डनीत्याम् । बलाबले चैतासां हेतु-

---

मतान्तरमाह — **दण्डनीतिरेके**त्यादि । दण्डनीतिः, एका एकैव, विद्या प्राधान्येन विद्याव्यपदेशमर्हतीत्यर्थः । इति, औशनसाः शुक्रशिष्याः, कुतः, सर्वासां विद्यानामारम्भाः योगक्षेमाः, तस्यां हि प्रतिबद्धाः दण्डनीतावेव प्रतिष्ठिताः, इति कृत्वा । यद् वक्ष्यति — 'आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः' (अध्या० ४) इति ।

स्वमतमाह — **चतस्र** एवेत्यादि । विद्याः चतस्र एव, एवकारेण त्रित्वाद्विपक्षव्यवच्छेदः । आसां विद्यात्वविद्यान्तरत्वयोर्विद्यात्वमादौ निर्वचनभङ्ग्या स्थापयति — **ताभि**रित्यादि । विद्यात्वं नाम धर्मार्थवेदनकरणत्वम् । तच्चान्वीक्षिक्यादिषु चतसृषु अविशिष्टमित्यर्थः । विद्यान्तरत्वं तु परस्परविसदृशस्वरूपफलनिरूपणेन यथाक्रमं स्थापयिष्यते ।

तत्रान्वीक्षिक्याः स्वरूपमाह — **साङ्ख्य**मित्यादि । साङ्ख्यं प्रकृतिपुरुषविवेचकं शास्त्रं कपिलप्रोक्तं, योगः प्रत्याहारध्यानधारणादिप्रतिपादकं महेश्वरप्रोक्तं, लोकायतं न्यायशास्त्रं ब्रह्मगार्ग्योक्तम् । एतत्त्रितयात्मिकान्वीक्षिकी । धर्माधर्मौ त्रय्यामित्यादिना त्रय्यादीनां फलसूचनम् , तच्चान्वीक्षिकीफलस्य तद्विसदृशत्वव्युत्पादनार्थम् । धर्माधर्माविति, प्राधान्येन प्रतिपाद्याविति शेषः । तेन त्रय्यामर्थानर्थनयापनयानामानुषङ्गिकतया क्वचित् क्वचित् प्रतिपादनेऽप्यविरोधः । एवं वार्तादण्डनीत्योरपि ज्ञेयम् । तत्र धर्मोऽध्ययनयजनादिः, अधर्मः श्वमांसभक्षणादिः । अर्थः कालबीजवापादिजन्यं फलम्, अनर्थोऽकालबीजवापादिजन्यम् । नयो ज्यायसा सन्ध्यादिः येन योगक्षेमो निष्पाद्यते, अपनयस्तु ज्यायसा विग्रहादिः येन योगक्षेमो विहन्यते । एतासां त्रय्यादीनाम् । हेतुभिरन्वीक्षमाणा न्यायैः सम्प्रधारयन्ती । व्यसन इत्यादिनोपकारस्वरूपोक्तिः ।

भिरन्वीक्षमाणान्वीक्षिकी लोकस्योपकरोति, व्यसनेऽभ्युदये च बुद्धिमवस्थापयति, प्रज्ञावाक्यक्रियावैशारद्यं च करोति ।

प्रदीपः सर्वविद्यानामुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणां शश्वदान्वीक्षिकी मता ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना ॥

बुद्धिमवस्थापयति अविकृतां करोति, बुद्धिर्दुःखे यथा नोद्विजेत सुखे च न प्रहृष्येत् तथा तां नियच्छतीत्यर्थः । यदाहुः—'न प्रहृष्येत् सुखं प्राप्य नोद्विजेतासुखादपि' इति । प्रज्ञावाक्यक्रियावैशारद्यं विचारवचनकर्मसु पाटवम् ।

प्रदीप इति । आन्वीक्षिकी सर्वविद्यानां प्रदीपः परीक्षणसाधनत्वात् । सर्वकर्मणाम् उपायः आरम्भादिफलाधिगमपर्यन्तानुष्ठानवैचित्र्यप्रतिभोत्पादकत्वात् । सर्वधर्माणां शश्वद् आश्रयः वैदिकलौकिकानां सर्वेषां धर्माणामन्वीक्षायत्तार्थत्वात् सर्वदा आश्रयभूता । एवञ्च त्रय्यादिविसदृशस्वरूपफलत्वादान्वीक्षिक्या विद्यान्तरत्वं सिद्धमित्यभिप्रायः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
द्वितीयोऽध्यायः विद्यासमुद्देशे आन्वीक्षिकीस्थापना ॥

१. प्रक. विद्यासमुद्देशः—त्रयीस्थापना।

सामर्ग्यजुर्वेदास्त्रयस्त्रयी अथर्ववेदेतिहासवेदौ च वेदाः। शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि।

एष त्रयीधर्मश्चतुर्णां वर्णानामाश्रमाणां च स्वधर्मस्थापनादौपकारिकः।

स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणं च। वैश्यस्याध्ययनं यजनं दानं कृषिपाशुपाल्ये वणिज्या च। शूद्रस्य द्विजातिशुश्रूषा वार्त्ता कारुकुशीलवकर्म च।

गृहस्थस्य स्वकर्माजीवस्तुल्यैरसमानर्षिभिर्वैवाह्यमृतुगामित्वं देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च।

त्रयीस्थापनार्थं तत्स्वरूपमाह—**सामे**त्यादि। सामवेदः ऋग्वेदो यजुर्वेद इति त्रयस्त्रयीपदवाच्याः, अथर्ववेदः, इतिहासवेदो महाभारतादिश्च वेदपदार्थाः। शिक्षा वर्णोच्चारणोपदेशकं शास्त्रम्। कल्पः क्रत्वनुष्ठानोपदेशपरम् आश्वलायनादिप्रणीतं सूत्रम्। व्याकरणं शब्दानुशासनं पाणिनीयादि। निरुक्तं निर्वचनशास्त्रं यास्कप्रणीतम्। छन्दोविचितिः छन्दश्शास्त्रं पैङ्गलादि। ज्योतिषं सूर्यादिगत्यादिप्रतिपादकं शास्त्रम्।

त्रय्याः फलं वक्तुमाह—**एष** इति। एष त्रयीधर्मः त्रय्युपदिष्टो धर्मः, चतुर्णां ब्राह्मणादिवर्णानां ब्रह्मचर्याद्याश्रमाणां च औपकारिकः उपकारफलः। कस्मात्, स्वधर्मस्थापनात् स्वधर्मेषु स्थापनात् स्वधर्मानुपदिश्य तेषु नियन्त्रणाद्, अर्थाद् वर्णाश्रमाणाम्।

वर्णधर्मं विवृणोति—**स्वधर्म** इत्यादि। शस्त्राजीवः शस्त्रेण आजीवो वृत्तिः। भूतरक्षणं प्राणिपालनम्। कृषिपाशुपाल्ये कृषिः केदारेषु बीजवापपरिकर्मादिविधानम्, पाशुपाल्यं पशुपालनकर्म गवाश्वादीनां पोषणचिकित्सादि। वणिज्या क्रयविक्रयव्यवहारः। द्विजातिशुश्रूषा द्विजातयो ब्रह्मक्षत्रियवैश्याः तेषां परिचरणम्। वार्त्ता कृषिपाशुपाल्यवणिज्याः। कारुकुशीलवकर्म शिल्पिकर्म चारणकर्म च।

आश्रमधर्ममाह—**गृहस्थस्ये**त्यादि। गृहिणः स्वकर्माजीवः स्ववर्णोक्तकर्मणा वृत्तिः। तुल्यैः कुलादिना समानैः। असमानर्षिभिः भिन्नार्षगोत्रैः। वैवाह्यं

ब्रह्मचारिणः स्वाध्यायोऽग्निकार्याभिषेकौ भैक्षव्रतत्वमाचार्ये प्राणान्तिकी वृत्तिस्तदभावे गुरुपुत्रे सब्रह्मचारिणि वा।

वानप्रस्थस्य ब्रह्मचर्यं भूमौ शय्या जटाजिनधारणमग्निहोत्राभिषेकौ देवतापित्रतिथिपूजा वन्यश्चाहारः।

परिव्राजकस्य संयतेन्द्रियत्वमनारम्भो निष्किञ्चनत्वं सङ्गत्यागो भैक्षमनेकत्र अरण्यवासो बाह्याभ्यन्तरं च शौचम्।

सर्वेषामहिंसा सत्यं शौचमनसूयानृशंस्यं क्षमा च।

विवाहः, स्वार्थे ष्यञ्। ऋतुगामित्वं ऋतुः पुष्पस्नानादिनादूर्ध्वं द्वादशनिशाः तस्मिन् स्त्रीगमनशीलत्वम्। शेषभोजनं देवादिदत्तावशिष्टाशनम्।

ब्रह्मेत्यादि। ब्रह्मशब्दो वेदवाची तद्ग्रहणार्थे दण्डाजिनधारणादिलक्षणे व्रते वर्तते, तच्चरितुं शीलमस्येति ब्रह्मचारी तस्य ब्रह्मचारिणः। स्वाध्यायः स्ववेदाध्ययनम्। अग्निकार्याभिषेकौ अग्निशुश्रूषात्रिषवणस्नाने। भैक्षव्रतत्वं भैक्षं भिक्षावृत्तिः व्रतत्वं व्रतित्वं गोदानान्तं कर्म तदुभयम्। एवं तावदुपकुर्वाणस्य वेदब्रह्मचारिण आसमावर्तनादनुष्ठानम्। नैष्ठिकस्य विशेषमाह— **आचार्ये प्राणान्तिकी वृत्ति**रित्यादि। गुरुकुले आप्राणोत्क्रमणकालभाविनी स्थितिः। गुरुपुत्रे आचार्यपुत्रसमीपे। सब्रह्मचारिणि वा समानशाखाध्यायिनि वा वृद्धे। कार्येति शेषः।

वानप्रस्थस्येत्यादि। वानप्रस्थस्य वने प्रकर्षेण तिष्ठतीति वनप्रस्थः, वनप्रस्थ एव वानप्रस्थः स्वार्थेऽण्, तस्य। ब्रह्मचर्यम् ऊर्ध्वरेतस्त्वम्। भूमौ शय्या स्थण्डिले शयनम्। अग्निहोत्रं सायंप्रातरनुष्ठेयमग्निकार्यम्, अग्नये होत्रं हविराज्यादि यस्मिंस्तदिति व्युत्पत्तिः, तच्च अभिषेकस्त्रिकालस्नानं च अग्निहोत्राभिषेकौ। वन्य आहारः कन्दमूलफलादिः।

परिव्राजकस्येत्यादि। परिव्राजकस्य परित्यज्य सर्वं व्रजतीति परिव्राजकः संन्यासी तस्य। संयतेन्द्रियत्वं जितेन्द्रियता। अनारम्भः नैष्कर्म्यम्। निष्किञ्चनत्वं निस्स्वत्वम्। सङ्गत्यागः प्रव्रजितान्तरेणापि संसर्गपरिहारः अनेकत्र भैक्षं प्राणयात्रापर्याप्तस्यान्नस्य बहुषु गृहेषु भिक्षित्वा ग्रहणम्। बाह्याभ्यन्तरशौचं कायवाङ्मानसनैर्मल्यम्।

सर्ववर्णाश्रमसाधारणान् धर्मानाह — **सर्वेषामि**ति। अनसूया गुणपक्षपातः। आनृशंस्यम् अनिष्ठुरत्वम्।

स्वधर्मः स्वर्गायानन्त्याय च । तस्यातिक्रमे लोकः सङ्करादुच्छिद्येत ।

तस्मात् स्वधर्मं भूतानां राजा न व्यभिचारयेत् ।
स्वधर्मं संदधानो हि प्रेत्य चेह च नन्दति ॥
व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः ।
त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्यायः विद्यासमुद्देशे त्रयीस्थापना ॥

स्वधर्मः किमर्थमादर्तव्यस्तत्राह — **स्वधर्म** इति । स्वर्गाय परलोकसुखाय । आनन्त्याय च इहाविनाशाय मोक्षाय वा । अतिक्रमे उल्लङ्घने । सङ्करादुच्छिद्येत अनुष्ठातृव्यवस्थाविरहेण कर्मसङ्करात् वर्णसङ्कराच्च उत्सादं प्राप्नुयात् । अयमाशयः — वर्णाश्रमधर्मा हि यथोक्ता अविवादसिद्धलोकयोगक्षेमहेतुभावाः तदुपासकबीजक्षेत्रसंक्रान्ततदनुष्ठानवासनासनाथैः तत्तद्वर्णाश्रमिभिरेव स्वकुलधर्मत्वबुद्ध्या भक्तिश्रद्धापुरस्सरमनुष्ठीयमानाः सन्तः सौष्ठवविशेषं प्रतिपत्तुं लोकोपकारे च कमपि कमप्यतिशयमाधातुं क्षमन्ते । ते चेदव्यवस्थमन्यैः कथञ्चिदनुष्ठीयेरन् ध्रुवं तर्हि सौष्ठवाद्धीयेरन् , लोकोपकारे च नातिशयमादधीरन्, अनुष्ठानबाह्यतां च क्रमेणासादयेयुरिति धर्मव्याकुलीभावाल्लोकविनाशः स्यादिति।

अतः किं कर्तव्यं तत्राह — **तस्मादित्यादि** । भूतानां मनुष्याणाम् । न व्यभिचारयेत् व्यभिचरन्तं नानुमन्येत । स्वधर्मं सन्दधानः सम्यगनुष्ठापयन् । प्रेत्य परलोके, ल्यप्प्रतिरूपो निपातः ॥

वर्णाश्रमधर्मविधानद्वारेण त्रय्या महाफलत्वं वदन्नध्यायमुपसंहरति— **व्यवस्थितेत्यादि** । व्यवस्थिता वर्णाश्रमप्रतिबद्धा आर्यमर्यादा सदाचारनियमो यस्य स व्यवस्थितार्यमर्यादः । प्रसीदति मोदते । न सीदति न नश्यति ।

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
तृतीयोऽध्यायः विद्यासमुद्देशे त्रयीस्थापना ॥

१. प्रक. विद्यासमुद्देशः — वार्त्तादण्डनीतिस्थापना ।

कृषिपाशुपाल्ये वणिज्या च वार्त्ता धान्यपशुहिरण्यकुप्यविष्टिप्रदानादौपकारिकी । तया स्वपक्षं परपक्षं च वशीकरोति कोशदण्डाभ्याम् ।

आन्वीक्षिकीत्रयीवार्त्तानां योगक्षेमसाधनो दण्डः, तस्य नीतिर्दण्डनीतिः अलब्धलाभार्था, लब्धपरिरक्षणी, रक्षितविवर्धनी, वृद्धस्य तीर्थेषु प्रतिपादनी च । तस्यामायत्ता लोकयात्रा । तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात् ।

नह्येवंविधं वशोपनयनमस्ति भूतानां यथा दण्ड इत्याचार्याः ।

अथ वार्त्ताया विद्यात्वं स्थापयितुं स्वरूपादिकमाह — **कृषिपाशुपाल्ये** इत्यादि । कृषिः क्षेत्रबीजवापपरिकर्मादिप्रतिपादकं शास्त्रं पराशरप्रोक्तं, पाशुपाल्यं गवाश्वादिपालनप्रकारोपदेशकं शास्त्रं गौतमशालिहोत्रादिप्रणीतम् । वणिज्या क्रयविक्रयव्यवहारतन्त्रं विदेहराजप्रणीतम् । **धान्येत्यादि** । तत्र हिरण्यम् अकुप्यं सुवर्णादि । कुप्यं स्वर्णरजतातिरिक्तं ताम्रादि तैजसं सारदारुवेणुवल्लीवल्कादिकमतैजसं च ।।विष्टिः कर्मकरः । **तया कोशदण्डाभ्यां** वार्त्तया जनिताभ्यां कोशदण्डाभ्यां कोशो धननिचयः दण्डः सेना ताभ्यां । स्वपक्षं परपक्षं च वशीकरोति स्वायत्तीकरोति, अर्थाद् राजा ।

दण्डनीतेः स्वरूपादिकमाह— **आन्वीक्षिकीत्यादि** । **योगक्षेमौ साध**यतीति योगक्षेमसाधनः । दण्डो दमः सामादिषु प्रधानभूत उपायविशेषः । अथवा दण्डस्थत्वाद् राजा दण्डः । सति दण्डभये लोक आन्वीक्षिक्यादिषु सम्यक् प्रवर्तते, न त्वितरथेति दण्डस्यान्वीक्षिक्यादियोगक्षेमसाधनत्वं विज्ञेयम् । अत एवाहुः—

> "सर्वो दण्डजितो लोको दुर्लभो हि शुचिः क्वचित् ।
> दण्डस्य हि भयात् कृत्स्नं जगद् भोगाय कल्पते ॥"

इति । तस्य नीतिः नयनमनुष्ठानम् अर्थात् तदुपदेशशास्त्रम् । **अलब्धलाभार्थेत्यादि** दण्डनीतेः फलकथनम् । दण्डेन ह्यलब्धं लभ्यते, **लब्धं परिरक्ष्यते** परिरक्षितं वर्ध्यते, वर्धितं च तीर्थेषु पुण्यक्षेत्राध्वरादिषु विनियुज्यते । **तस्मादिति** । तस्मात् लोकवृत्तेर्दण्डनीत्यधीनत्वात् । **नित्यम् उद्यतदण्डः** सर्वदा दण्डप्रणयनोद्युक्तः स्याद्, अर्थाद् राजा ।

नहीत्यादि । एवंविधं यथा दण्डस्तथाविधम् । **वशोपनयनम्** अनायत्तयत्तीकरणसाधनम् । **नह्यस्ति** नास्त्येव ।

नेति कौटिल्यः । तीक्ष्णदण्डो हि भूतानामुद्वेजनीयः । मृदुदण्डः परिभूयते । यथार्हदण्डः पूज्यः । सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति । दुष्प्रणीतः कामक्रोधाभ्यामज्ञानाद् वानप्रस्थपरिव्राजकानपि कोपयति, किमङ्ग पुनर्गृहस्थान् । अप्रणीतो हि मात्स्यन्यायमुद्भावयति । बलीयानबलं हि ग्रसते दण्डधराभावे । तेन गुप्तः प्रभवतीति ।

चतुर्वर्णाश्रमो लोको राज्ञा दण्डेन पालितः ।
स्वधर्मकर्माभिरतो वर्तते स्वेषु वेश्मसु ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः
विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च ।
विद्यासमुद्देशः समाप्तः ॥

तमिमं दण्डसामान्यश्लाघावादमाचार्याणां प्रतिषेधति — **नेति** । तत्र कारणवचनं **तीक्ष्णे**त्यादिना । तीक्ष्णदण्डः उग्रदण्डः, भूतानाम् उद्वेजनीयः उद्वेगजनकः उद्विजन्तेऽस्मादित्यपादानेऽनीयर् । यथार्हदण्डः युक्तदण्डः देशकालापराधानुगुण्यप्रयुज्यमानदण्डः, पूज्यः लोकबहुमान्यः । सा पूज्यता युक्तस्य दण्डस्य लोकाभ्युदयहेतुत्वादित्यभिप्रायेणाह — **सुविज्ञाते**त्यादि । सुविज्ञातप्रणीतः सुष्ठु शास्त्रतोऽवगत्य प्रयुक्तः । अयथावत् प्रणीतस्याप्रणीतस्य वा दण्डस्य सर्वानर्थहेतुत्वमाह — **दुष्प्रणीत** इत्यादिना । कामक्रोधाभ्याम-ज्ञानाद् दुष्प्रणीतः कामात् क्रोधादज्ञानाच्चायथावत् प्रयुक्तः । किं पुनर्गृहस्थान्, संयतेन्द्रियानपि यः कोपयति सोऽसंयतेन्द्रियान् कोपयतीति किमु वक्तव्यम् । अङ्गेत्युपदेश्यसम्बोधनम् । **मात्स्यन्याया**मिति महान् हि मत्स्यः क्षुद्रं मत्स्यं ग्रसत इति बलवता दुर्बलस्य यत् पीडनं स मात्स्यन्याय इत्युच्यते । **बलीयानि**त्यादि । दण्डधराभावे दण्डप्रणेतुरभावे । तेन गुप्तः प्रभवति सुप्रणीतेन दण्डेन रक्षितः अर्थाद् दुर्बलः प्रभवति बलयुक्तो भवति ।

अध्यायान्ते श्लोकमाह — **चतुर्वर्णे**त्यादि । स्वधर्मकर्माभिरतः वर्णाश्रमधर्मकर्मानुष्ठानपरः । स्वेषु वेश्मसु वर्तते स्वास्थ्येन वसतीत्यर्थः । दण्डपालनाभावे हि स्वगृहेऽपि स्वास्थ्यवृत्तिर्दुर्लभेति ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे चतुर्थोऽध्यायः
विद्यासमुद्देशे वार्तास्थापना दण्डनीतिस्थापना च ।
विद्यासमुद्देशः समाप्तः ॥

२. प्रक. वृद्धसंयोगः।

तस्माद् दण्डमूलास्तिस्रो विद्याः। विनयमूलो दण्डः प्राणभृतां योगक्षेमावहः।

कृतकः स्वाभाविकश्च विनयः। क्रिया हि द्रव्यं विनयति नाद्रव्यम्। शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम्।

विद्यानां तु यथास्वमाचार्यप्रामाण्याद् विनयो नियमश्च।

वृद्धसंयोग इति सूत्रम्। वृद्धा आन्वीक्षिक्यादिविद्याकोविदाः तैः संयोगः शिष्याचार्यभावलक्षणः सम्बन्धोऽभिधीयत इति सूत्रार्थः।

तस्मादित्यादि। तस्मात् चतुर्वर्णाश्रमस्य लोकस्य राज्ञा सुविज्ञातप्रयुक्तदण्डमुखेन पाल्यमानस्यैव स्वधर्मकर्मानुष्ठानप्रवणतोत्पादात्, तिस्रो विद्याः आन्वीक्षिकीत्रयीवार्त्तालक्षणाः, दण्डमूलाः दण्डाधीनस्थितिकाः। दण्डश्च विनयलक्षणेन शास्त्रविज्ञानेन दत्तहस्तः प्राणिनां योगक्षेमसम्पत्तिहेतुरित्याह— **विनये**त्यादि

कृतक इत्यादि। तत्र विनयः, क्रियया अभियोगलक्षणया निर्वृत्तः कृतक इत्येकः। विनापि क्रियां वासनावशात् सिद्धः स्वाभाविक इत्यपरः। यथा हि संस्करणाभियोगः शाणघर्षणादिः द्रव्यं खन्यादिप्रभवं पाषाणादिविशेषं संस्करोति न पुनरद्रव्यं यंकमपि शिलादिखण्डं, तथा विद्याभियोगः स्वतस्सिद्धशुश्रूषादिबुद्धिगुणसम्पन्नमेव जनं संस्करोति, न तु तद्रहितम्। बुद्धिगुणाश्च तेऽष्टौ भवन्ति— शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाख्याः। तत्र शुश्रूषा श्रवणार्हेषु श्रोतुमिच्छा, तस्यां सत्यां श्रवणम् आसेवा, ग्रहणं श्रुतार्थज्ञानं, धारणं गृहीताविस्मरणं, विज्ञानं धारितेष्वर्थेषु साध्यसाधनादिस्वरूपविवेकज्ञानम्, ऊहः शब्दानुक्तस्य लिङ्गेनावगतिः, अपोहो युक्त्यपेतस्य हानं, तत्त्वाभिनिवेशो वस्तुयाथात्म्यज्ञानम्।

एवं विद्याधिकारिणं तदनधिकारिणं चोक्त्वा विद्याग्रहणकाले शिष्येण चरणीयमाह— **विद्यानां** त्विति। विद्यानाम् आचार्यप्रामाण्याद् यस्य विद्याया यो य आचार्य उपदेष्टा तस्य प्रामाण्यात् तदध्ययनकाले तं तं शिष्यं प्रति धर्मानुशासनप्रभविष्णुत्वात्, यथास्वं तत्तदाचार्यानुशासनानतिक्रमे

वृत्तचौलकर्मा लिपिं सङ्ख्यानं चोपयुञ्जीत । वृत्तोपनयनस्त्रयीमान्वीक्षिकीं च शिष्टेभ्यः, वार्त्तामध्यक्षेभ्यः, दण्डनीतिं वक्तृप्रयोक्तृभ्यः ।

ब्रह्मचर्यं च आ षोडशाद् वर्षात् । अतो गोदानं दारकर्म च । अस्य नित्यश्च विद्यावृद्धसंयोगो विनयवृद्ध्यर्थं, तन्मूलत्वाद् विनयस्य ।

पूर्वमहर्भागं हस्त्यश्वरथप्रहरणविद्यासु विनयं गच्छेत्, पश्चिममितिहासश्रवणे । पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रमर्थ-

---

विनयः शिक्षणम्, 'आहूतश्चाप्यधीयीत' इत्युक्तप्रकारं, समुदाचारो वा गुर्वागमनोपवेशादौ प्रत्युत्थानानुपवेशादिः, नियमश्च गुरुपरिचरणादिव्रतं च, अर्थाच्छिष्यस्य भवति ।

वृत्तेति । वृत्तचौलकर्मा कृतचौलः त्रिवर्षः पञ्चवर्षो वेत्यर्थः, लिपिम् अक्षरम्, संख्यानं गणितं च, उपयुञ्जीत नियमपूर्वमधीयीत । त्रयीमित्यादिनाप्येतत् सम्बध्यते । वृत्तोपनयनः लब्धगायत्र्युपदेशः, त्रयीम् आन्वीक्षिकीं च, शिष्टेभ्यः सम्यगधिगततद्विद्येभ्यः, उपयुञ्जीत । वार्त्ताम्, अध्यक्षेभ्यः सीताध्यक्षादिभ्यः, उपयुञ्जीत । दण्डनीतिं, वक्तृप्रयोक्तृभ्यः प्रवचनप्रयोगकुशलेभ्यः, उपयुञ्जीत ।

ब्रह्मचर्यमिति । आ षोडशाद् वर्षात् षोडशं वयोऽभिव्याप्य, ब्रह्मचर्यं, रक्ष्यमित्यार्थम् । अतः पश्चात्, गोदानं केशान्तकर्म, दारकर्म च विवाहश्च । अस्य कृतदारस्य, विद्यावृद्धसंयोगः विद्यावृद्धैः सह परिचयः, नित्यः दारकर्मोत्तरकालेऽप्यनुवर्त्यः । किमर्थं, विनयवृद्ध्यर्थं विनयस्य शास्त्रसंस्कारस्य वृद्धये । कस्मात्, विनयस्य तन्मूलत्वाद् विद्यावृद्धसंयोगप्रभवत्वात् ।

भूयः कलाभ्यासं राज्ञ उपदेष्टुमाह — **पूर्वमिति** । पूर्वम् अहर्भागम्, अत्यन्तसंयोगे द्वितीया । हस्त्यश्वरथप्रहरणविद्यासु हस्तिचर्यायामश्वचर्यायां रथचर्यायाम् आयुधविद्यायां च, विनयं शिक्षां, गच्छेत् । पश्चिमं तृतीयमहर्भागम्, इतिहासश्रवणे, विनयं गच्छेत् । इतिहासपदार्थविवरणं **पुराणमित्यादि** । पुराणं ब्राह्मादि । इतिवृत्तं श्रीरामायणमहाभारतादि । आख्यायिका दिव्यमानुषादिचरितम् । उदाहरणं न्यायोपन्यासशास्त्रं मीमांसादि,

शास्त्रं चेतीतिहासः । शेषमहोरात्रभागमपूर्वग्रहणं गृहीतपरिचयं च कुर्याद्, अगृहीतानामाभीक्ष्ण्यश्रवणं च ।

श्रुताद्धि प्रज्ञोपजायते प्रज्ञाया योगो योगादात्मवत्तेति विद्यासामर्थ्यम् ।

विद्याविनीतो राजा हि प्रजानां विनये रतः ।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः ॥

धर्मशास्त्रं मानवादि । अर्थशास्त्रम् औशनसबार्हस्पत्यादि । शेषं मध्यमम् अहर्भागम् अहोरात्रभागमिति मूलग्रन्थेषु पठ्यते । तदा शिष्टं मध्यममहर्भागं, रात्रौ कार्यान्तरनिद्रादिविनियुक्तावशिष्टतया लभ्यमानं रात्रिभागं चेति व्याख्येयम् । अपूर्वग्रहणं प्रतिनवप्रमेयश्रवणं, गृहीतपरिचयं गृहीतधारणार्थं चिन्तनं च कुर्यात् । अगृहीतानाम् आभीक्ष्ण्यश्रवणम् ईषद्गृहीतानां सम्यङ्मनःप्रवेशार्थं पुनःपुनःश्रवणं च ।

श्रुतादिति । श्रुतात् श्रवणात्, प्रज्ञा त्रैकालिकी बुद्धिः, उपजायते । प्रज्ञाया योगः शास्त्रोक्तानुष्ठानश्रद्धा, योगाद् आत्मवत्ता मनस्विता सत्त्ववत्ता उपजायते । इति विद्यासामर्थ्यम् इत्येतद् विद्याशक्तिजन्यं फलमित्यर्थः ।

विद्याविनीत इत्यादि । विनये शिक्षणे । अनन्यां नाथान्तरशून्याम् एकनाथामित्यर्थः । शेषं स्फुटम् ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चमोऽध्यायः वृद्धसंयोगः ॥

३. प्रक. इन्द्रियजयः — अरिषड्वर्गत्यागः ।

विद्याविनयहेतुरिन्द्रियजयः कामक्रोधलोभमानमदहर्षत्यागात् कार्यः । कर्णत्वगक्षिजिह्वाघ्राणेन्द्रियाणां शब्दस्पर्शरूपरसगन्धेष्वविप्रतिपत्तिरिन्द्रियजयः शास्त्रार्थानुष्ठानं वा । कृत्स्नं हि शास्त्रमिदमिन्द्रियजयः ।

तद्विरुद्धवृत्तिरवश्येन्द्रियश्चातुरन्तोऽपि राजा सद्यो विनश्यति— यथा दाण्डक्यो नाम भोजः कामाद् ब्राह्मणकन्यामभिमन्यमानः सबन्धुराष्ट्रो विननाश करालश्च वैदेहः, कोपाज्जनमेजयो ब्राह्मणेषु

इन्द्रियजय इति सूत्रम् । इन्द्रियाणि श्रोत्रादीनि तेषां जयः शब्दादिषु स्वस्वविषयेषु अविरुद्धा प्रवृत्तिः । सा शास्त्रसंस्कारमन्तरेण स्वत एव भवन्ती स्वाभाविक इन्द्रियजयः, शास्त्रानुष्ठाननिष्ठावशाद् भवन्ती कृतकः । स इहोच्यत इति सूत्रार्थः । इदं च सूत्रमध्यायद्वयेन भाष्यते । वृद्धसंयोगानन्तरं तद्धेतुरिन्द्रियजयः प्रसक्त इति प्रकरणसङ्गतिः ।

विद्येत्यादि । विद्याविनयहेतुः विद्यासंस्कारकारणम् । **कामेति** । परस्त्रीविषयोऽभिलाषः कामः, हिंसाप्रवर्तकश्चित्तविकारः क्रोधः, परद्रव्येच्छा लोभः, बालिश्यादात्मन्यनुपमत्वबुद्धिर्मानः धनविद्यादिप्रभवो गर्वो मदः, इष्टार्थप्राप्त्युपभोगजन्या प्रीतिर्हर्षः, षडेते शत्रव इत्युच्यन्ते । एषां त्यागाद् वर्जनात् । **अविप्रतिपत्तिः** स्वत एवाविरुद्धा प्रवृत्तिः । **शास्त्रार्थानुष्ठानं** शास्त्रार्थेषु उपादेयत्वेन शास्त्रतोऽवगतेषु शब्दस्पर्शादिषु अनुष्ठानं प्रवृत्तिनियमः । **कृत्स्नं** हि शास्त्रमिदमिन्द्रियजय इति अनुष्ठेयतया शास्त्रेण प्रतिपाद्यमानः सर्वोऽर्थ इन्द्रियजयस्य कारणमित्यर्थः, कारणे कार्योपचारः ।

तद्विरुद्धेत्यादि । तद्विरुद्धवृत्तिः शास्त्रविरुद्धानुष्ठानः । चातुरन्तोऽपि चतुरन्ता चतुस्समुद्रपर्यन्ता भूमिः तस्या ईश्वरोऽपि । तत्र कामादिषु एकैकेन विनष्टेषु द्वौ द्वौ निदर्शयति — **यथेत्यादिना** । भोजवंश्यो दाण्डक्यः कामाद् ब्राह्मणकन्यामपहृत्य तत्पित्रा शप्तः बन्धुराष्ट्रसहितो नष्टः, तथा विदेहाधिपः करालो ब्राह्मणीमभिलषन् ब्राह्मणेन शप्तो नष्टः । कोपाद् जनमेजयो नाम राजाश्वमेधे वर्तमाने ब्राह्मणैः सह कलहायितस्तच्छापान्नष्टः, तथा तालजङ्घो

विक्रान्तः तालजङ्घश्च भृगुषु, लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः सौवीरश्चाजबिन्दुः, मानाद् रावणः परदारानप्रयच्छन् दुर्योधनो राज्यादंशं च, मदाद् डम्भोद्भवो भूतावमानी हैहयश्चार्जुनः, हर्षाद् वातापिरगस्त्यमत्यासादयन् वृष्णिसङ्घश्च द्वैपायनमिति ।

एते चान्ये च बहवः शत्रुषड्वर्गमाश्रिताः ।
सबन्धुराष्ट्रा राजानो विनेशुरजितेन्द्रियाः ॥
शत्रुषड्वर्गमुत्सृज्य जामदग्न्यो जितेन्द्रियः ।
अम्बरीषश्च नाभागो बुभुजाते चिरं महीम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः ॥

भृगुषु विक्रम्य तच्छापान्नष्टः । लोभाद् ऐलः पुरूरवा नाम राजा चातुर्वर्ण्यमतिमात्रधनहरणेन पीडयंश्चातुर्वर्ण्यकोपान्नष्टः, तथा सौवीरपतिरजबिन्दुः । लोभादैलो नैमिशीयब्राह्मणयज्ञशालां प्रविश्य ततोऽपरिमितं धनं हर्तुमुद्युक्तो ब्राह्मणशापान्नष्ट इत्यैतिह्यं कैश्चिद् वर्ण्यते । मानाद् रावणः सीतां रामायाप्रयच्छन् नष्टः, तथा दुर्योधनो राज्यांशं पाण्डवेभ्योऽप्रयच्छन् नष्टः । मदाद् राजा डम्भोद्भवो नाम कृतसर्वप्रजावज्ञानो नरनारायणाभ्यां सह युद्धमासाद्य हतः, तथा हेहयाधिपः कार्तवीर्यो मदात् परशुरामपितरि प्रयुक्तापराधः परशुरामेण युद्धे हतः । हर्षाद् वातापिरसुरोऽगस्त्यं महर्षिं वञ्चयन् यादवसङ्घश्च व्यासमतिसन्धित्सुस्ताभ्यां शप्तौ विनेशतुः । इत्यैतिह्यानि ।

उक्ता राजान उपलक्षणम्, अन्येऽपि बहव आसन्नित्याह — **एत** इत्यादि ॥

अरिषड्वर्गस्यान्वयेऽनर्थं निदर्श्य व्यतिरेके निःश्रेयसप्राप्तिं निदर्शयति— **शत्रुषड्वर्गमित्यादि** । जामदग्न्यः परशुरामः । नाभागो नभागसूनुः ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
षष्ठोऽध्यायः इन्द्रियजये अरिषड्वर्गत्यागः ॥

३. प्रक. इन्द्रियजयः—राजर्षिवृत्तम् ।

तस्मादरिषड्वर्गत्यागेनेन्द्रियजयं कुर्वीत, वृद्धसंयोगेन प्रज्ञां, चारेण चक्षुः, उत्थानेन योगक्षेमसाधनं, कार्यानुशासनेन स्वधर्मस्थापनं, विनयं विद्योपदेशेन, लोकप्रियत्वमर्थसंयोगेन, हितेन वृत्तिम् ।

एवं वश्येन्द्रियः परस्त्रीद्रव्यहिंसाश्च वर्जयेत् स्वप्नं लौल्यमनृतमुद्धतवेषत्वमनर्थसंयोगं च, अधर्मसंयुक्तमनर्थसंयुक्तं च व्यवहारम् ।

धर्मार्थाविरोधेन कामं सेवेत न निस्सुखः स्यात् । समं वा त्रिवर्गमन्योन्यानुबन्धम् । एको ह्यत्यासेवितो धर्मार्थकामानामात्मानमितरौ च पीडयति ।

अर्थ एव प्रधान इति कौटिल्यः, अर्थमूलौ हि धर्मकामाविति ।

अस्मिन्नध्याये राजर्षिवृत्तमुच्यते । राजैव सन् य ऋषिः जितेन्द्रियः स राजर्षिः ।

तस्मादित्यादि । तस्माद् अरिषड्वर्गत्यागस्य श्रेयस्साधनत्वात् । वृद्धसंयोगेन प्रज्ञां कुर्वीत उत्पादयेत् विकासयेच्च । चारेण चक्षुः कुर्वीत गूढपुरुषं चक्षुस्थाने कुर्यात् स्वपरराष्ट्रवृत्तप्रत्यक्षीकरणार्थम् । उत्थानेन उद्योगेन, उत्थानमुद्योगः अनुष्ठानमिति पर्यायाः, योगक्षेमसाधनं योगक्षेमसम्पादनम् । कार्यानुशासनेन स्वधर्मस्थापनम् इदमीदृशमित्थं कर्तव्यमित्याज्ञापनेन स्वधर्मे लोकस्य नियन्त्रणम् । अर्थसंयोगेन लोकप्रियत्वम् अर्थस्य धनस्य स्वीकरणेन समुचितेषु पात्रेष्वर्पणेन च जनप्रियत्वं । हितेन वृत्तिं तदात्वायत्योर्यत् पथ्यं तेन लोकयात्राम् । कुर्वीतेति सर्वत्रानुषङ्गः ।

एवमित्यादि । परस्त्रीद्रव्यहिंसाः परस्त्रियं परद्रव्यं परहिंसां च । स्वप्नम् अयथोचितां निद्राम् । लौल्यं चापलम् अनृतं मिथ्यावादम् । उद्धतवेषत्वम् अविनीतवेषताम् । अनर्थसंयोगम् उक्तस्यार्थसंयोगस्य प्रत्यनीकम् ।

धर्मेत्यादि । धर्मार्थाविरोधेन धर्मार्थयोरबाधेन कामं तृतीयपुरुषार्थम् । वेति पक्षान्तरे, तच्च अन्योन्यानुबन्धं त्रिवर्गं समं सेवेतेति । परस्परसंसृष्टान् धर्मार्थकामांस्तुल्यमात्रया सेवेतेत्यर्थः । सममसेवने को दोषस्तत्राह — **धर्मार्थकामानां** मध्ये एकः अन्यतमः अत्यासेवितः अतिमात्रं व्यसनितया सेवितः सन् इतरौ **अर्थकामौ** धर्मकामौ धर्मार्थौ वा, पीडयति हि ।

धर्मादीनां समप्राधान्यमरोचयमान आह — **अर्थ एवेति** । एवका-

मर्यादां स्थापयेदाचार्यानमात्यान् वा, य एनमपायस्थानेभ्यो वारयेयुः, छायानालिकाप्रतोदेन वा रहसि प्रमाद्यन्तमभितुदेयुः।

सहायसाध्यं राजत्वं चक्रमेकं न वर्तते।
कुर्वीत सचिवांस्तस्मात् तेषां च शृणुयान्मतम् ॥

इति कौटिलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्।
इन्द्रियजयः समाप्तः ॥

रेण धर्मकामयोरप्राधान्यमुक्तम्। तत्र हेतुरुच्यते — **अर्थमूलौ** इत्यादिना। अर्थमूलौ अर्थसाध्यौ।

मूर्धाभिषिक्तं राजर्षिवृत्तमाह — **मर्यादामिति**। आचार्यान् गुरून्, अमात्यान् मन्त्रिणो वा, मर्यादां स्थापयेत्, सीमां परिकल्पयेत्, ताद्धर्म्यात् ताच्छब्द्यम्, सीमामिवालङ्घनस्थानमात्मनो विदध्यादित्यर्थः। ते कीदृशाः, ये एनं राजानम्, अपायस्थानेभ्यो वारयेयुः अनर्थकारणानुष्ठानेभ्यो * निवर्तयेयुः, रहसि प्रमाद्यन्तम् अन्तःपुरादावतिप्रसजन्तमेनं, छायानालिकाप्रतोदेन छाया त्रिपौरुष्यादिरूपं छायाप्रमाणमतीतघटिकावेदकं राजप्रणिधिप्रकरणे वक्ष्यमाणं नालिका घटिकाप्रमाणं तदुभयरूपेण प्रतोदेन कार्यान्तरकालातिपातसूचनद्वारा प्रसक्तेष्टकर्मप्रत्यूहजनकतया मनोव्यथाकारित्वात् प्रतोदतुल्येन पुनःपुनश्छायानालिकानिवेदनेनेत्यर्थः, अभितुदेयुर्वा परिव्यथयेयुश्च प्रमादभङ्गार्थम्।

किमर्थं यथोक्तसचिवस्थापनेनात्मा परतन्त्रतां नीयत इति चेत् तत्राह—**सहाये**त्यादि। सहायसाध्यं सहायनिर्वाह्यं न त्वेकाकिनात्मना निर्वाह्यम्। तत्र दृष्टान्तः — चक्रमेकं न वर्तत इति. शकटादौ युक्तम् एकं चक्रान्तरसहायरहितं चक्रं न परिभ्रमति। सचिवान् आचार्यानमात्यांश्च। शृणुयाच्च श्रुत्वानुतिष्ठेच्च ॥

इति कौटिलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तमोऽध्यायः इन्द्रियजये राजर्षिवृत्तम्।
इन्द्रियजयः समाप्तः ॥

* "नृपस्य ते हि सुहृदस्त एव गुरवो मताः।
य एनमुत्पथगतं वारयन्त्यनिवारिताः॥"— इति कामन्दकः।

४. प्रक. अमात्योत्पत्तिः ।

सहाध्यायिनोऽमात्यान् कुर्वीत दृष्टशौचसामर्थ्यत्वादिति भारद्वाजः, ते ह्यस्य विश्वास्या भवन्तीति ।

नेति विशालाक्षः । सहक्रीडितत्वात् परिभवन्त्येनम् । ये ह्यस्य गुह्यसधर्माणस्तानमात्यान् कुर्वीत समानशीलव्यसनत्वात्, ते ह्यस्य मर्मज्ञभयान्नापराध्यन्तीति ।

साधारण एष दोष इति पराशरः । तेषामपि मर्मज्ञभयात् कृताकृतान्यनुवर्तेत ।

अमात्योत्पत्तिरिति सूत्रम् । अमात्या नाम राज्ञः सहायाः तेषामुत्पत्तिः करणमिहोच्यत इत्यर्थः । विद्यावृद्धसंयोगेन्द्रियजययुक्तोऽपि राजा सहायमन्तरेण राज्यपालनं कर्तुमशक्त इति सहायापेक्षायां तदुत्पत्तिरुच्यत इति प्रकरणसङ्गतिः ।

के तावदमात्यपदमर्हन्तीत्यपेक्षायां भारद्वाजादयः सप्ताचार्याः सप्तधा वर्णयन्ति । तत्र भारद्वाजस्य पक्षमाह — **सहाध्यायिन** इत्यादि । दृष्टशौचसामर्थ्यत्वात् शौचं हृदयशुद्धिः तच्च सामर्थ्यं कार्यनैपुण्यं च दृष्टं सहाध्ययनकाले प्रत्यक्षितं येषां तेषां भावस्तत्त्वं तस्मात् । विश्वास्याः विश्वासयोग्याः ।

तं पक्षं विशालाक्षः प्रतिषेधति — **नेती**त्यादि । परिभवन्ति अवजानन्ति । के तर्ह्यमात्याः कार्यास्तत्राह — **ये ही**ति । गुह्यसधर्माणः गुह्यं शीलच्युतिः पारदारिकत्वादि तत्र समानाः । तथाविधानाममात्यीकरणे गुणमाह — **ते ही**ति । ते हि मर्मज्ञभयात् अस्मन्मर्मज्ञो राजेति भयात् । अस्य नापराध्यन्ति अपराधं न कुर्वन्ति, यत्नेन शीलसौष्ठवमासाद्य स्वकर्म सम्यगनुतिष्ठन्तीत्यर्थः ।

पराशरमतमाह — **साधारण** इति । एष दोषः दुश्शीलत्वं, साधारणः गुह्यसधर्मणां राज्ञश्च समानः । अस्तु को दोष इति चेदाह — **मर्मज्ञभयात्** अमात्या मन्मर्मज्ञा इति भयात्, तेषामपि अमात्यानामपि, **कृताकृतानि** असुष्ठुकृतानि कर्माणि अनुवर्तेत अनुसरेत्, अर्थाद् राजा ।

यावद्ध्यो गुह्यमाचष्टे जनेभ्यः पुरुषाधिपः ।
अवशः कर्मणा तेन वश्यो भवति तावताम् ॥

य एनमापत्सु प्राणाबाधयुक्तास्वनुगृह्णीयुस्तानमात्यान् कुर्वीत, दृष्टानुरागत्वादिति ।

नेति पिशुनः । भक्तिरेषा न बुद्धिगुणः । सङ्ख्यातार्थेषु कर्मसु नियुक्ता ये यथादिष्टमर्थं सविशेषं वा कुर्युस्तानमात्यान् कुर्वीत, दृष्टगुणत्वादिति ।

नेति कौणपदन्तः । अन्यैरमात्यगुणैरयुक्ता ह्येते । पितृपैतामहानमात्यान् कुर्वीत, दृष्टापदानत्वात् । ते ह्येनमपचरन्तमपि न त्यजन्ति, सगन्धत्वात् । अमानुषेष्वपि चैतद् दृश्यते—गावो ह्यसगन्धं गोगणमतिक्रम्य सगन्धेष्वेवावतिष्ठन्ते इति ।

अस्मिन्नर्थे श्लोकमाह — यावद्भ्य इत्यादि । गुह्यम् आचष्टे स्वं शीलभ्रंशं प्रकाशयति । अवशः अधीरः । एवञ्च गुह्यसधर्मणोऽमात्यान् न कुर्यादित्यभिप्रायः ।

कांस्तर्हि कुर्यादित्यत्राह — य एनमिति । अनुगृह्णीयुः उपकुर्युः ।

उक्तं पक्षं खण्डयति — नेतीति । पिशुनः नारदः । तत्र हेतुरुच्यते — भक्तिरेषा न बुद्धिगुणः, स्वशरीरनैरपेक्ष्येण राजरक्षणप्रवृत्तिर्नामायं सेवाधर्मः नतु बुद्धिगुणः बुद्धिगुणसम्पन्नश्चामात्यो भवितुमर्हतीत्याशयः । संख्यातेत्यादि । ये संख्यातार्थेषु परिगणितद्रव्योत्पत्तिषु, कर्मसु नियुक्ताः अर्थं यथादिष्टं सविशेषं वा कुर्युः द्रव्यं क्लृप्तसंख्यानूनं क्लृप्तसंख्याधिकसंख्यं वा भावयेयुः ।

नारदपक्षं कौणपदन्तो निराचष्टे—नेति कौणपेत्यादि । अन्यैर्गुणैः धनभावनातिरिक्तैर्विश्वास्यत्वानुरक्तत्वादिभिर्गुणैः । पितृपैतामहान् पितृपितामहक्रमागतान् । दृष्टापदानत्वात् दृष्टं साक्षादनुभूतम् अपदानं पूर्ववृत्तं येषां ते दृष्टापदानाः तेषां भावस्तत्त्वं तस्मात् । एतेन पूर्वपुरुषशीलप्रत्येयगुणत्वमुक्तम् गुणान्तरमाह — ते हीति । अपचरन्तमपि एनम् आत्मापकारिणमपि स्वामिनम् । सगन्धत्वात् सम्बन्धित्वात् परिचितत्वात्, सम्बन्धसामान्यवचन इह गन्धशब्दः । पशुदृष्टान्तमाह — अमानुषेष्विति । एतत् परिचयस्य परिचितात्यागकारणत्वम् । असगन्धम् अपरिचितम् ।

नेति वातव्याधिः, ते ह्यस्य सर्वमवगृह्य स्वामिवत् प्रचरन्तीति। तस्मान्नीतिविदो नवानमात्यान् कुर्वीत, नवास्तु यमस्थाने दण्डधरं मन्यमाना नापराध्यन्तीति।

नेति बाहुदन्तीपुत्रः। शास्त्रविददृष्टकर्मा कर्मसु विषादं गच्छेत्। अभिजनप्रज्ञाशौचशौर्यानुरागयुक्तानमात्यान् कुर्वीत, गुणप्राधान्यादिति।

सर्वमुपपन्नमिति कौटल्यः, कार्यसामर्थ्याद्धि पुरुषसामर्थ्यं कल्प्यते सामर्थ्यतश्च।

उक्तं पक्षं वातव्याधिर्नानुमन्यत इत्याह — **नेति वाते**त्यादि। वातव्याधिरुद्धवः श्रीकृष्णमन्त्री। ते कुलक्रमागता अमात्याः। अस्य सर्वमवगृह्य स्वामिनः समस्तं विभवमवष्टभ्य स्वामिवत् प्रचरन्ति स्वतन्त्रवृत्तयो भवेयुः। के तर्ह्यमात्याः कार्या इत्याह — **तस्मादि**त्यादि। नवान् पूर्वसम्बन्धरहितान्। दण्डधरं यमस्थाने मन्यमानाः राजानं यमवदुग्रदण्डं बुध्यमानाः।

इममपि पक्षं बाहुदन्तीपुत्रो न सहत इत्याह — **नेति बाह्विति**। कुत इत्यत्राह — **शास्त्रे**त्यादि। नीतिशास्त्रग्रन्थनिष्णातस्तदर्थानुष्ठानपरिचयविकलः अमात्यकर्मसु अवसादं प्राप्नुयात् अनिर्वाही स्यादित्यर्थः। कांस्तर्हि अमात्यान् कुर्वीतेत्यत्राह— **अभिजने**त्यादि। अभिजनो वंशशुद्धिः प्रज्ञा बुद्ध्यतिशयः शौचमुपधाशुद्धिः शौर्यम् उत्साहशक्तिः अनुरागः स्वामिभक्तिः एतैर्युक्ता ये पुरुषाः तान् अमात्यान् कुर्वीत। कुतः, गुणप्राधान्यात् गुणानामेव प्रधानत्वात्।

स्वमतमाह — **सर्वमिति**। सर्वम् उपपन्नं, शौचसामर्थ्यादयो गुणाः स्वामिपरिभवादिदोषाश्च पूर्वोक्ताः सहाध्यायिप्रभृतिषु न्याय्याः। कुतः, हि यस्मात् कारणात्, पुरुषसामर्थ्यं पुरुषस्य तत्तदधिकारपदयोग्यता, कार्यसामर्थ्यात् सामर्थ्यतश्च कार्याणां सहाध्ययनक्रीडादीनां शक्त्या सामर्थ्याच्च प्रज्ञाशास्त्रसंस्कारशौर्यादितारतम्ययोगित्वलक्षणात्, कल्प्यते व्यवस्थाप्यते इत्यर्थः। गुणदोषोभयोपपन्नत्वं वदता चार्थादिदमुक्तं भवति — सहाध्यायिप्रभृतयो न हेयाः विश्वास्यत्वादिगुणयोगात्, नापि मन्त्रिपदे कर्तव्याः परिभवादिदोषयोगात्, पारिशेष्यात् तु कर्मसचिवपदे कर्तव्याः तत्तद्गुणापेक्षेषु च कर्मसु देशकालानुरोधेन नियोक्तव्या इति।

विभज्यामात्यविभवं देशकालौ च कर्म च ।
अमात्याः सर्व एवैते कार्याः स्युर्नतु मन्त्रिणः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः ॥

एतदर्थकमध्यायप्रान्ते श्लोकमाह — **विभज्येत्यादि** । अमात्यविभवं विश्वास्यत्वाद्यमात्यगुणसम्पदम् । विभज्य यस्मिन् देशे यस्मिन् काले यस्य कर्मणः सुष्ठु निष्पत्तये यो गुणोऽपेक्ष्यते, तं तं यथायथं विविच्येत्यर्थः । सर्व एवैते तत्तद्गुणवन्तः सहाध्याय्यादयः सर्वेऽपि । अमात्याः कर्मसचिवाः कार्याः, मन्त्रिणस्तु न कार्याः मन्त्रिपदे तु न निवेश्याः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
अष्टमोऽध्यायः अमात्योत्पत्तिः ॥

५. प्रक. मन्त्रिपुरोहितोत्पत्तिः।

जानपदोऽभिजातः स्ववग्रहः कृतशिल्पश्चक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमानुत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसम्पत्। अतः पादार्धगुणहीनौ मध्यमावरौ।

तेषां जनपदमवग्रहं चाप्यतः परीक्षेत, समानविद्येभ्यः शिल्पं शास्त्रचक्षुष्मत्तां च; कर्मारम्भेषु प्रज्ञां धारयिष्णुतां दाक्ष्यं च; कथा-

---

मन्त्रिपुरोहितोत्पत्तिरिति सूत्रम्। मन्त्री प्रधानामात्यः यस्मिन्नायत्ताः कर्मसाचिवाः, पुरोहितः पुरोऽग्रे धीयते सर्वकार्येषु प्रमाणत्वेन निवेश्यत इति पुरोहितः, तयोरुत्पत्तिरिहाभिधीयत इत्यर्थः। **इत्यमात्यसम्पदि**ति। अमात्यस्य मन्त्रिणो गुणवैभवम् एवम्प्रकारम्। जानपदत्वादयस्तु गुणप्रकाराः। तत्र जानपदः विजिगीषुराष्ट्रभवः। अभिजातः विशुद्धान्वयः। स्ववग्रहः शोभनबन्धुरिति साम्प्रदायिकाः, सुखेनावग्रहीतुं प्रामादिकाकार्यप्रवृत्तेर्वारयितुं शक्यः। कृतशिल्पः कृतं शिक्षितं गजाश्वारोहणरथयुद्धायुधगान्धर्वविद्यादिकं येन स तथा। चक्षुष्मान् अर्थशास्त्रं चक्षुः तदभिज्ञः। प्राज्ञः सहजबुद्धिसम्पन्नः। धारयिष्णुः अविस्मरणशीलः। दक्षः क्षिप्रकारी। वाग्मी मधुरोपपन्नवक्ता। प्रगल्भः प्रौढः। प्रतिपत्तिमान् प्रतिकर्तुं प्रतिवक्तुं च समर्थः, इतिकर्तव्यतानिश्चयवान् वा। उत्साहप्रभावयुक्तः उत्साहयुक्तः पुरुषकारवान् प्रभावयुक्तः प्रभुशक्तिमान्। क्लेशसहः जितश्रमः। शुचिः चतुर्विधोपधाशुद्धः। मैत्रः सर्वत्र स्निग्धव्यवहर्ता। दृढभक्तिः अविचाल्यराजानुरागः। शीलबलारोग्यसत्त्वसंयुक्तः शीलं सद्वृत्तं बलं देहशक्तिः आरोग्यं निर्व्याधित्वं सत्त्वं धैर्यम् एतैर्युक्तः। स्तम्भचापल्यवर्जितः स्तम्भवर्जितः विगर्वः प्रणतिशीलो वा, चापल्यवर्जितः स्थिरप्रकृतिः। संप्रियः सौम्यदर्शनः। वैराणामकर्ता स्त्रीभूम्यादिनिमित्तानां वैराणामनुत्पादकः शमयिता च। एभिः पञ्चविंशतिगुणैः सम्पन्न उत्तमो मन्त्री। **अत** इति। अतः एभ्यो गुणेभ्यः, पादार्धगुणहीनौ मध्यमावरौ, चतुर्थांशगुणहीनो मध्यमः, अर्धगुणविहीनोऽधम इत्यर्थः।

जानपदत्वादिज्ञानोपायानाह — **तेषामित्यादि**। तेषां जानपदत्वादीनां मध्ये अथवा उत्तममध्यमाधमानां मन्त्रिणाम्। आप्यतः आप्तियोग्यात्

योगेषु वाग्मित्वं प्रागल्भ्यं प्रतिभानवत्त्वं च; आपद्युत्साहप्रभावौ क्लेशसहत्वं च; संव्यवहाराच्छौचं मैत्रतां दृढभक्तित्वं च; संवासिभ्यः शीलबलारोग्यसत्त्वयोगमस्तम्भमचापल्यं च; प्रत्यक्षतः संप्रियत्वमवैरित्वं च।

प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः। स्वयंदृष्टं प्रत्यक्षं परोपदिष्टं परोक्षं कर्मसु कृतेनाकृतावेक्षणमनुमेयम्। यौगपद्यात् तु कर्मणामनेकत्वादनेकस्थत्वाच्च देशकालात्ययो मा भूदिति परोक्षममात्यैः कारयेदित्यमात्यकर्म।

पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्यां

प्रत्येतव्याद् विश्वासयोग्यादित्यर्थः, 'आप्तिः प्रत्ययितत्वे स्याल्लाभसम्बन्धयोरपि' इति केशवः। आप्तश्च यथादृष्टार्थवादी। परीक्षेत परीक्ष्य जानीयात्। समानविद्येभ्यः तुल्यविद्याविद्भ्यः। कर्मारम्भेषु कार्यानुष्ठानेषु। कथायोगेषु कार्यकथनप्रसङ्गेषु। प्रतिभानवत्त्वं नवनवप्रज्ञोन्मेषशालित्वम्। संव्यवहारात् समाचरणात्। संवासिभ्यः सहवासिभ्यः। प्रत्यक्षतः स्वयमनुभवात्।

कस्मात् पुनर्जानपदत्वादिगुणज्ञाने प्रत्यक्षम् आप्तवाक्यमनुमानमिति त्रीणि प्रमाणानि आश्रयणीयानि, न पुनरेकमेवाश्रीयेतेत्याशङ्कायामाह — **प्रत्यक्षपरोक्षानुमेये**त्यादि। राजवृत्तिः दण्डनीतिप्रतिपाद्यो राजव्यवहारः। परोपदिष्टम् आप्तवाक्यावगतम्। कृतेन अकृतावेक्षणमनुमेयम् अनुष्ठितेन कर्मांशेन करिष्यमाणांशपरिणामोत्प्रेक्षणमनुमानायत्तमित्यर्थः। एवञ्च यतो राजवृत्तिस्त्रिप्रमाणावसेया ततस्त्रिप्रमाणप्रदर्शनमित्यभिप्रायः। किमर्थं महता प्रयासेन परीक्ष्यैवामात्याः कर्तव्या इति चेत् तत्राह — **यौगपद्यादि**त्यादि। अयं भावः— कर्माणि खलु नाम राजकीयानि बहूनि बहुप्रकाराणि बहुप्रदेशस्थानि सद्यः करणीयानि च भवन्ति। तानि सर्वाणि साक्षादेव राज्ञा स्वयमनुष्ठातुं न शक्यन्त इति यथादेशकालं तेषामनुष्ठानसिद्ध्यर्थममात्या एव तत्र राज्ञा नियोक्तव्याः। एषितव्याश्च ते गुणवन्त एव कर्मानुष्ठानसम्यक्त्वायेत्यावश्यकं तेषां महता प्रयासेन गुणपरीक्षणमिति। **इत्यमात्यकर्मे**ति, एष मन्त्र्युत्पत्तिप्रकार उक्त इत्यर्थः।

पुरोहितोत्पत्तिमाह — **पुरोहितमि**त्यादि। उदितोदितकुलशीलत्वादियुक्तं पुरोहितं कुर्वीत। उदितोदितकुलशीलम् उदितोदितम् उदितैः शास्त्रो-

च अभिविनीतमापदां दैवमानुषीणाम् अथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत । तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत ।

ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।
जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः ॥

कैर्विद्याभिजनादिभिः उदिताः समृद्धाः उदितोदिताः तेषां कुलं शीलं वृत्तं च यस्य तं तथाभूतम्, उदितोदितकुलजातम् उदितोदिताचारयुक्तं चेत्यर्थः। षडङ्गे वेदे, दैवे ज्योतिश्शास्त्रे पूर्वकर्मपरिपाकलक्षणदैवप्रतिपादके, निमित्ते शकुनशास्त्रे, दण्डनीत्यां च, अभिविनीतं शिक्षितम् । दैवमानुषीणां देवकृतानां मानुषकृतानां च, आपदाम्, अथर्वभिः अथर्वमन्त्रप्रयोगैः, उपायैश्च सामदानादिभिश्च, प्रतिकर्तारं परिहर्तारम् । तमिति । शिष्य आचार्यमिव, पुत्रः पितरमिव, भृत्यः स्वामिनमिव च, तम् अनुवर्तेत अनुसरेत् तत्परतन्त्रो भवेत् ।

एवञ्च करणे अलब्धलाभो भवतीत्यर्थकं श्लोकमाह—**ब्राह्मणेनेति** । ब्राह्मणेन यथोक्तगुणेन पुरोहितेन, एधितं वर्धितं, मन्त्रिमन्त्राभिमन्त्रितं मन्त्रिणो यथोक्तगुणस्य मन्त्रेण अर्थनिश्चयेन अभिमन्त्रितं संस्कृतम्। अभिरक्षितमित्यपि पाठः । अत एव शास्त्रानुगं शास्त्रोक्तानुष्ठानपरं, क्षत्रं क्षत्रियकुलं कर्तृ, अशस्त्रितं सत् अशस्त्रयुक्तं सत्, युद्धं विनैवेत्यर्थः । शास्त्रानुगतशस्त्रितमिति पाठे शास्त्रानुगमात्मकशस्त्रयुक्तं तदतिरिक्तशस्त्रानपेक्षमित्यर्थः । अत्यन्तम् एकान्ततः, अजितं जयति अलब्धं लभते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
नवमोऽध्यायः मन्त्रिपुरोहितोत्पत्तिः ॥

६. प्रक. उपधाभिः शौचाशौचज्ञानममात्यानाम्।

मन्त्रिपुरोहितसखः सामान्येष्वधिकरणेषु स्थापयित्वामात्यानुपधाभिः शौचयेत्।

पुरोहितमयाज्ययाजनाध्यापने नियुक्तममृष्यमाणं राजा अवक्षिपेत्। स सत्रिभिः शपथपूर्वमेकैकममात्यमुपजापयेत् — अधार्मिकोऽयं राजा, साधु धार्मिकमन्यमस्य तत्कुलीनमवरुद्धं कुल्यमेकप्रग्रहं सामन्तमाटविकमौपपादिकं वा प्रतिपादयामः। सर्वेषामेतद्रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति धर्मोपधा।

उपधाभिः शौचाशौचज्ञानममात्यानामिति सूत्रम्। उपधाभिः छलैः, अमात्यानां शौचाशौचज्ञानं शौचं स्वामिन्यदुष्टभावता अशौचं दुष्टभावता तयोर्ज्ञानम् अभिधीयत इति सूत्रार्थः। जानपदत्वादिगुणसम्पन्नोऽप्युपधाशुद्धिविरहेऽमात्यत्वं नार्हतीत्युपधाशुद्धिरुच्यत इति प्रकरणसङ्गतिः।

मन्त्रीत्यादि। मन्त्रिपुरोहितसखः मन्त्रिपुरोहितसमुपेतः। सामान्येषु अधिकरणेषु साधारणेषु अप्रधानेष्वधिकारपदेषु। उपधाभिः छलैर्वक्ष्यमाणैः। शौचयेत् शोधयेत्।

छलप्रयोगमाह—पुरोहितमिति। राजा अयाज्ययाजनाध्यापने याजयितुमनर्हस्य वृषलीपत्यादेर्याजनेऽध्यापने च नियुक्तं चोदितम्, अमृष्यमाणम् अधर्मनियोजनेन कुप्यन्तं, पुरोहितम् अवक्षिपेत् अवमन्येत स्वपदादवरोपयेद् वा। सः अवक्षिप्तः पुरोहितः, सत्रिभिः स्त्रीपुरुषलक्षणनिमित्तादिशास्त्राभिज्ञापदेशचारिणः सञ्चारविशेषाः सत्रिणः गूढपुरुषप्रणिधौ वक्ष्यमाणाः तैः प्रयोज्यकर्तृभिः, एकैकम्, अमात्यं, शपथपूर्वम् उपजापयेत् भेदयेत्। उपजापस्य शपथपूर्वत्वमनुद्भेदार्थम्। उपजापनप्रकारमाह—अधार्मिक इत्यादिना। अधार्मिकः अधर्मप्रवृत्तः। धार्मिकमिति तत्कुलीनादिषु सर्वत्र सम्बध्यते। तत्कुलीनं प्रकृतराजवंशभवम्। अवरुद्धम् अवरुध्य रक्ष्यमाणं तत्पुत्रादिकम्। कुल्यं राजभावार्हकुलोत्पन्नम्। एकप्रग्रहम् एकः तुल्यः सर्वैरविशेषं क्रियमाणः प्रग्रहः पूजा यस्य तं सर्वपूजितमित्यर्थः। सामन्तं विषयानन्तरं राजानम्। आटविकम् अटवीपतिम्। औपपादिकम् उपपादं प्रत्यन्तपर्वतसमीपे भवः तम्।

सेनापतिरसत्प्रग्रहेणावक्षिप्तः सत्रिभिरेकैकममात्यमुपजापयेल्लोभनीयेनार्थेन राजविनाशाय — सर्वेषामेतद् रोचते, कथं वा तवेति । प्रत्याख्याने शुचिरित्यर्थोपधा ।

परिव्राजिका लब्धविश्वासान्तःपुरे कृतसत्कारा महामात्रमेकैकमुपजपेत् — राजमहिषी त्वां कामयते कृतसमागमोपाया । महानर्थश्च भविष्यतीति । प्रत्याख्याने शुचिरिति कामोपधा ।

प्रवहणनिमित्तमेकोऽमात्यः सर्वानमात्यानावाहयेत् । तेनोद्वेगेन राजा तानवरुन्ध्यात् । कापटिकश्छात्रः पूर्वावरुद्धस्तेषामर्थमानावक्षिप्त-

---

अथवा औपपादिकमिति अस्माभिः सम्भूय सम्प्रधारणीयमित्यर्थः, उपपादं समर्थनमर्हतीति ठक् । अस्य प्रतिपादयामः अस्य स्थाने निवेशयामः । एतद् उपन्यस्तं मतम् । कथं वा तव, मतमिति गम्यम् । प्रत्याख्याने शुचिः इत्थमुपजापितोऽमात्यो 'नाहमीदृशं कुर्यामि'ति यदि निरस्येत् तर्हि शुद्ध इत्यर्थः । इति धर्मोपधा धर्मस्थापनवाचोयुक्त्या छलनम् । स एव धर्मप्रधानेषु शोधनप्रकारः ।

अर्थोपधामाह— सेनापतिरित्यादि । असत्प्रग्रहेण अवक्षिप्तः अपूज्यपूजनेन निमित्तेन परिभूतः, अपूज्यपूजने राज्ञा चोदितस्तदकुर्वन्नर्थमानाभ्यां हापित इत्यर्थः । लोभनीयेन उपजाप्यपुरुषकाम्येन । राजविनाशायेत्युपजापफलमुच्यते । तदनुकूल उपजापप्रकारस्तु—अपथप्रवृत्तोऽयं राजा, साधु सत्पथवर्तिनमन्यमस्य स्थाने तत्कुलीनमवरुद्धं वा प्रतिपादयाम इत्येवमादिरूपो गम्यः । सर्वेषामित्यादिकं तच्छेषवाक्यम् । लुब्धेष्वेष शोधनप्रकारः ।

स्त्रैणेषु प्रयोज्यां कामोपधामाह — परिव्राजिकेत्यादि । परिव्राजिका भिक्षुकी । कृतसत्कारा राजमहिषीभिः पूजिता । अर्थश्च धनादिकं च ।

भयोपधामाह — प्रवहणेत्यादि । प्रवहणनिमित्तं प्रवहणं नौविशेषः कर्णीरथश्च, तेन जलस्थलयात्राक्रीडोद्यानभोजनादिकं गोष्ठीकौतुकं लक्ष्यते, तदर्थमित्यर्थः । आवाहयेत् आनीय मेलयेत् । तेनोद्वेगेन तन्निमित्तेन उद्वेगेन अक्षमया । तान् अमात्यान् । अवरुन्ध्यात् अर्थमानापहारादिनापकुर्यात् । कापटिक इति । पूर्वावरुद्धः राज्ञा पूर्वमपकृतः, छात्रः कापटिकः अध्यापकाध्येतृवृत्तिः

मेकैकममात्यमुपजपेत् — असत्प्रवृत्तोऽयं राजा, साध्वेनं हत्वा अन्यं प्रतिपादयिष्यामः। सर्वेषामेतद् रोचते, कथं वा तवेति। प्रत्याख्याने शुचिरिति भयोपधा।

तत्र धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेद्, अर्थोपधाशुद्धान् समाहर्तृसन्निधातृनिचयकर्मसु, कामोपधाशुद्धान् बाह्याभ्यन्तरविहाररक्षासु, भयोपधाशुद्धानासन्नकार्येषु राज्ञः। सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात्। सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत्।

त्रिवर्गभयसंशुद्धानमात्यान् स्वेषु कर्मसु।
अधिकुर्याद् यथाशौचमित्याचार्या व्यवस्थिताः॥

कापटिकाख्यः गूढपुरुषविशेषः। तेषाम् अमात्यानां मध्ये, अर्थमानावक्षिप्तम् अर्थमानाभ्यां हापितम्, एकैकम् अमात्यम्, उपजपेत् राजसकाशाद् भेदयेत्। उपजापप्रकारकथनम् असत्प्रवृत्त इत्यादिना। असत्प्रवृत्तः अशोभनकर्मप्रवृत्तः। इयमुपधा भीरुविषया।

उपधाशुद्धानां यथायथं विनियोगस्थानान्याह—तत्रेत्यादि। तत्र उपधाचतुष्टयशोधितेषु मध्ये। धर्मस्थीयकण्टकशोधनेषु धर्मस्थानुबन्धिषु कर्मसु कण्टकशोधनेषु च वक्ष्यमाणेषु। स्थापयेत् नियुञ्जीत। समाहर्तृसन्निधातृनिचयकर्मसु समाहर्तृकर्मसु धनोत्थापनादिलक्षणेषु, सन्निधातृनिचयकर्मसु च धनरक्षणलक्षणेषु। बाह्याभ्यन्तरविहाररक्षासु बाह्याभ्यन्तरा ये विहाराः कामक्रीडाः अर्थाद् विहारसाधनभूता नृपस्त्रियः तद्रक्षणकर्मसु। तत्र बाह्या भोगिन्यः, आभ्यन्तर्यस्तु देव्य इति ज्ञेयम्। आसन्नकार्येषु शरीररक्षणादिकर्मसु। सर्वेति। सर्वोपधाशुद्धान् चतसृष्वप्युपधासु दृष्टशौचान्। सर्वत्रेति। सर्वासु उपधासु, अशुचीन्, खनिद्रव्यहस्तिवनकर्मान्तेषु खनिः सुवर्णरजताद्युत्पत्तिस्थानं द्रव्यवनं दारुयोग्यवृक्षप्रायं वनं हस्तिवनं गजोत्पत्तिवनम् एतत्सम्बन्धिषु कर्मान्तेषु व्यापारस्थानेषु, उपयोजयेत् अर्थात् कायायासकर्मणि।

तदिदमाचार्याणां मतमित्यर्थकं श्लोकमाह—त्रिवर्गेत्यादि। त्रिवर्गभयसंशुद्धान् त्रिवर्गभयैर्धर्मार्थकामभयोपधाभिर्दृष्टशौचान्। अधिकुर्यात् नियोजयेत्। यथाशौचं तत्तच्छुद्ध्यानुगुण्येन।

नत्वेव कुर्यादात्मानं देवीं वा लक्ष्मीश्वरः ।
शौचहेतोरमात्यानामेतत् कौटल्यदर्शनम् ॥
न दूषणमदुष्टस्य विषेणेवाम्भसश्चरेत् ।
कदाचिद्धि प्रदुष्टस्य नाधिगम्येत भेषजम् ॥
कृता च कलुषा बुद्धिरुपधाभिश्चतुर्विधा ।
नागत्वान्तं निवर्तेत स्थिता सत्त्ववतां धृतौ ॥
तस्माद् बाह्यमधिष्ठानं कृत्वा कार्ये चतुर्विधे ।
शौचाशौचममात्यानां राजा मार्गेत सत्रिभिः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे दशमोऽध्यायः
उपधाभिः शौचाशौचज्ञानममात्यानाम्

उक्तमाचार्यमतम् । स्वमतं तु नैवं, किन्तु अमात्यशुद्धिपरीक्षार्थे स्वात्मानं देवीं च विषयं नैव राजा कुर्यादित्येवंरूपमित्याह — **नत्वेवेत्यादि** ।

कुत आत्मानं देवीं च न लक्ष्यं कुर्यादित्यत्राह — **न दूषणमिति** । अदुष्टस्य स्वभावाद् दोषशून्यस्य अमात्यादेः प्रतीकारसमर्थस्यापि, दूषणम् उपधया वञ्चनम्, अम्भसः विषेण दूषणमिव अम्भसः स्वभावतो जीवनहेतो-र्जलस्य एकान्तमरणहेतुना विषेण दूषणमिव, न चरेत् न कुर्यात् । सति प्रतीकारसामर्थ्ये दूषणेन को दोष इत्यत्राह — **कदाचिदित्यादि** । अयमर्थः — अदुष्टोऽपि यद्युपधावशात् कदाचित् प्रकर्षेण दुष्टान्तःकरणो भवेत्, तदानीम् अशक्यप्रतीकारस्तत्सकाशादनर्थ आपतेदिति ।

उपधादूषिता च धीराणां बुद्धिर्यतमाना स्वाध्यवसितार्थसिद्धिमप्राप्य नैव विरमतीत्याह — **कृता चेत्यादि** ।

कथं तर्ह्यमात्याः शोधनीया इत्याकाङ्क्षायामाह — **तस्मादिति** । तस्मात् राजा, चतुर्विधे कार्ये उपधाप्रयोगे, बाह्यं बहिरङ्गं दूष्यम्, **अधिष्ठानं** लक्ष्यं **कृत्वा**, **अमात्यानां शौचाशौचं**, सत्रिभिः सत्रिद्वारेण, मार्गेत परीक्षेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे दशमोऽध्यायः
उपधाभिः शौचाशौचज्ञानममात्यानाम् ॥

७. प्रक. गूढपुरुषोत्पत्तिः।

उपधाभिः शुद्धामात्यवर्गो गूढपुरुषानुत्पादयेत् कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनान् सत्रितीक्ष्णरसदभिक्षुकीश्च।

परमर्मज्ञः प्रगल्भश्छात्रः कापटिकः। तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयात्—राजानं मां च प्रमाणं कृत्वा यस्य यदकुशलं पश्यसि तत् तदानीमेव प्रत्यादिशेति।

प्रव्रज्याप्रत्यवसितः[1] प्रज्ञाशौचयुक्त उदास्थितः। स वार्त्ताकर्मप्रदिष्टायां भूमौ प्रभूतहिरण्यान्तेवासी कर्म कारयेत्। कर्मफलाच्च सर्वप्रव्रजितानां ग्रासाच्छादनावसथान् प्रतिविदध्यात्। वृत्तिकामांश्चोपज-

---

गूढपुरुषोत्पत्तिरिति सूत्रम्। अमात्यशौचाशौचपरीक्षणं गूढपुरुषानन्तरेण न शक्यं कर्तुमिति तदुत्पत्तिरुच्यत इत्यर्थः। तत्रास्मिन्नध्याये संस्थोत्पत्तिः, उत्तरस्यादौ सञ्चारोत्पत्तिः।

उपधाभिरित्यादि। उपधाभिः शुद्धामात्यवर्गः धर्मोपधादिभिः छलोपायैः शोधितसचिववर्गः। उत्पादयेत्, राजा। के ते गूढपुरुषा इत्याकाङ्क्षायामाह — **कापटिकेत्यादि।** चकारात् कुब्जवामनकिरातमूकबधिरजडान्धनटनर्तकगायनवादनवाग्जीवनकुशीलवा अपि गृह्यन्ते।

परेति। परमर्मज्ञः परच्छिद्रवेदी, प्रगल्भः प्रौढः, छात्रः अध्यापकाध्येतृवृत्तिः निष्परिग्रहत्वाच्छरीरमात्रपरिच्छदो राजकार्यैकपरः। एवङ्गुणः कापटिकः कपटवृत्तित्वात् तदाख्ययोच्यते। अस्य विनियोगमाह — **तमित्यादि।** **अर्थमानाभ्यां** धनबहुमानाभ्याम्। यस्य यदकुशलं पश्यसि यस्य अमात्यादेः यद् अवद्यं चौर्यं परदाराभिमर्शनमित्येवञ्जातीयम् उपलभसे। **प्रत्यादिश** विज्ञापय।

प्रव्रज्येत्यादि। प्रव्रज्याप्रत्यवसितः चतुर्थाश्रमात् प्रतिनिवृत्तः सन्न्यासं प्राप्य ततश्च्युतः, बौद्धशैवव्रतादिच्युतानामपीदमुपलक्षणम्। **प्रज्ञाशौचयुक्तः** प्रज्ञया मत्या शौचेन सत्त्वेन च युक्तः, उदास्थितः तदाख्यः। **प्रभूतहिरण्यान्तेवासी** प्रभूताः प्रचुराः हिरण्यान्तेवासिनः धनानि शिष्याश्च यस्य स तथाभूतः। अनेन वार्त्ताकर्मापेक्षिता मूलधनसम्पत् कर्मकरसम्पच्चोक्ता। सः उदास्थितः, वार्त्ताकर्मप्रदिष्टायां कृषिवाणिज्यपाशुपाल्यकर्मार्थे उपकल्पितायां, भूमौ, कर्म वार्त्ताकर्म, कारयेद् अर्थादन्तेवासिभिः। कर्मफलाच्च सर्वप्रव्रजितानां सर्वेषां

---

१. 'त्यपसृतः' ग. पाठः.

पेत् — एतेनैव वेषेण राजार्थश्चरितव्यो भक्तवेतनकाले चोपस्थातव्यमिति । सर्वप्रव्रजिताश्च स्वं स्वं वर्गमुपजपेयुः ।

कर्षको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो गृहपतिकव्यञ्जनः । स कृषिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण ।

वाणिजको वृत्तिक्षीणः प्रज्ञाशौचयुक्तो वैदेहकव्यञ्जनः । स वाणिकर्मप्रदिष्टायां भूमाविति समानं पूर्वेण ।

मुण्डो जटिलो वा वृत्तिकामस्तापसव्यञ्जनः । स नगराभ्याशे प्रभूतमुण्डजटिलान्तेवासी शाकं यवसमुष्टिं वा मासद्विमासान्तरं प्रका-

---

स्वकर्मकरातिरिक्तानामपि सन्न्यास्यादीनाम् । सर्ववेषधारिणामित्यपि पाठः । तत्र वेषधारिणः सन्न्यासिशैवशाक्यदिगम्बरादय एव । ग्रासाच्छादनावसथान् अन्नवस्त्रवासस्थानानि, प्रतिविदध्यात् संविदधीत । ग्रासादिप्रतिविधानस्य सर्वविषयत्वं प्रसिद्ध्यर्थं, प्रसिद्धिश्च तदार्थिनवनवान्तेवास्युपस्थानार्थेति बोद्धव्यम् । वृत्तिकामान् स्वदीयमानग्रासादिना नित्यदेहयात्रां ये कामयन्ते तान्, उपजपेच्च उपजापेन वशीकुर्याच्च । **एतेनैवे**त्यादिरुपजापप्रकारः । अनेन परिगृहीतेनैव बौद्धभिक्षुपाशुपतादिवेषेण राजप्रयोजनं परराष्ट्रवृत्तगवेषणरूपं युष्माभिरनुष्ठेयं, गृहीतपरराष्ट्रवृत्तान्तैश्च धान्यतण्डुलादिभृतिग्रहणकाले सन्निधातव्यमित्यर्थः । **सर्वे**ति । स्वं स्वं वर्गम् उपजपेयुः बौद्धा बौद्धं पाशुपताः पाशुपतम् इत्येवं स्वस्वजातीयम् उपजपेयुः उपजप्य स्वसहायान् कुर्युः ।

कर्षक इति । वृत्तिक्षीणः कृषिवृत्त्या क्षयं प्राप्तः, प्रज्ञाशौचयुक्तः, कर्षकः कृषिशीलः, गृहपतिकव्यञ्जनः तन्नामा । तत्कृत्यमाह — **स कृषी**त्यादि । **भूमाविति समानं पूर्वेणे**ति, भूमावित्यादिकम् उदास्थितकृत्योक्तेन तुल्यम् । तच्च 'प्रभूतहिरण्यान्तेवासी कर्म कारयेत् । कर्मफलाच्च सर्वगृहपतिकव्यञ्जनानां ग्रासाच्छादनावसथानि'त्यादिकं यथोचितमूह्यम् ।

वैदेहकव्यञ्जनसंज्ञमाह — **वाणिजक** इत्यादि । वृत्तिक्षीणः धनविरहाद् वाणिज्यवृत्तिच्युतः । **भूमाविति समानं पूर्वेणे**ति । तच्च 'प्रभूतहिरण्यान्तेवासी'त्यादिकं 'स्वं स्वं वर्गमुपजपेयुरि'त्यन्तं प्रव्राजितशब्दस्थाने वैदेहकशब्दस्य यथास्थानयोजनेन बोद्धव्यम् ।

तापसव्यञ्जनाख्यमाह — **मुण्ड** इत्यादि । मुण्डः भिक्षुक्षपणकादिः ।

शमश्नीयात्, गूढमिष्टमाहारम्। वैदेहकान्तेवासिनश्चैनं समिद्धयोगैरर्चयेयुः। शिष्याश्चास्यावेदयेयुः — असौ सिद्धः सामेधिक इति। समेधाशास्तिभिश्चाभिगतानामङ्गविद्यया शिष्यसंज्ञाभिश्च कर्माण्यभिजनेऽवसितान्यादिशेदल्पलाभमग्निदाहं चोरभयं दूष्यवधं तुष्टिदानं विदेशप्रवृत्तिज्ञानम् इदमद्य श्वो वा भविष्यतीदं वा राजा करिष्यतीति।

जटिलः शैवपाशुपतादिः। शाकं हरितारूयं सस्यम्। '**मूलपत्रकरीराग्रफलकाण्डाधिरूढकम्। त्वक् पुष्पं कवकं चेति शाकं दशविधं स्मृतम्॥**' इत्युक्तरूपं, वृक्षमूलपत्रफलादिकं वा। यवसमुष्टिं मुष्टिमेयं तृणम्। मासद्विमासान्तरम् एकमासव्यवहितं मासद्वयव्यवहितं वा। इदमशनाक्रियाविशेषणम्। प्रकाशं सर्वजनप्रत्यक्षं यथा भवति तथा। ईदृशं प्रकाशाशनं निराहारख्यात्यर्थम्। **गूढम्** अन्याविदितम्। **वैदेहकेति**। वैदेहकान्तेवासिनश्च वणिग्वृत्तयः **शिष्याश्च**, एनं तापसव्यञ्जनं, समिद्धयोगैः समिद्धैः समृद्धैः योगैः इष्टार्थलाभैः, **अर्चयेयुः**, संभावयेयुः। अथवा समिद्धयोगैः तापसप्रसादात् समृद्धार्था वयमिति कपटयुक्तिभिः अर्चयेयुः धनदानादिना पूजयेयुरित्यर्थः। **शिष्या इति**। **अस्य** तापसस्य शिष्याश्च, असौ तापसः, सिद्धः योगी, अत एव **सामेधिकः** समेधा भाविनी सम्पत्तिः तदभिज्ञः, इति आवेदयेयुः प्रख्यापयेयुः। एवमारोपितमाहात्म्यस्तापसव्यञ्जनः किं कुर्यादित्याह — **समेधाशास्तिभिरिति**। समेधाशास्तिभिः अभिगतानां भाविसम्पद्विज्ञानाभिलाषैस्तां **प्रष्टुमागतानाम्**, अभिजने अवसितानि कर्माणि तत्कुलनिष्पन्नानि **वृत्तानि**, अङ्गविद्यया अङ्गानां शरीरावयवानां प्रश्नकालिकचेष्टाविशेषैः **शुभाशुभज्ञप्तिप्रतिपादकेन** ज्योतिषाङ्गशास्त्रेण, पुष्पशकस्त्वेत्यन्ये, सा त्वाकाशवाणी। **शिष्यसंज्ञाभिश्च** शिष्याणामक्षिभ्रूविलासादिसूचनैश्च, आदिशेत् **कथयेदित्यर्थः**। आदेष्टव्यान्तराण्याह—अल्पलाभं किञ्चिद्धनप्राप्तिम्, **आदिशेत्**, **प्रष्टुर्भ**व्यमत्व इत्यौचित्यलभ्यम्। अग्निदाहं चोरभयं च, आदिशेत्, **प्रश्नकृतो** राजापकारित्वे। दूष्यवधं ये दूष्याः कृत्याः प्रष्टारस्तेषां वधम्, आदिशेत्। तुष्टिदानं सन्तोषनिमित्तमर्थदानम्,[1] आदिशेत्, प्रश्नकृतो राजोपकारित्वे। विदेशप्रवृत्तिज्ञानं दूरदेशवृत्तान्तज्ञानम् आदिशेत्। इदमद्य श्वो वा भविष्यतीत्यादिशेत्। इदमद्य श्वो वा राजा करिष्यतीत्यादिशेत्। वाक्यान्त इतिशब्दः प्रकारार्थः। एवञ्जातीयमन्यच्चादिशेदित्यर्थः।

---

१. 'तुष्टदा' क. ख. पाठः.

तदस्य गूढाः सत्रिणश्च संवादयेयुः । सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां राजभाव्यमनुव्याहरेन्मन्त्रिसंयोगं च । मन्त्री चैषां वृत्तिकर्मभ्यां वियतेत । ये च कारणादभिक्रुद्धास्तानर्थमानाभ्यां शमयेत्, अकारणक्रुद्धान् तूष्णींदण्डेन राजद्विष्टकारिणश्च ।

पूजिताश्चार्थमानाभ्यां राज्ञा राजोपजीविनाम् ।
जानीयुः शौचमित्येताः पञ्च संस्थाः प्रकीर्तिताः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः ॥

आदिश्यतां काममीदृशं, कथं पुनरिदं संवादयितुं शक्यमित्यत आह — **तदस्येति**। अस्य तापसस्य, तद् आदेशनं, गूढाः सत्रिणः संवादयेयुश्च **यथार्थयेयुश्च**, लाभाग्निदाहादीनां प्रच्छन्नोत्पादनेनेत्यर्थसिद्धम्। **सत्त्वेति ।** सत्त्वप्रज्ञावाक्यशक्तिसम्पन्नानां धैर्यबुद्धिवाग्मित्वप्रभुशक्तियुक्तानां प्रष्टॄणां, राजभाव्यं राजसकाशाद् भाविनमर्थं धनादिलाभरूपं, मन्त्रिसंयोगं च मन्त्रिसमागमं च, अनुव्याहरेत् आदिशेत् । आदेशसंवादनार्थं मन्त्रिकर्तव्यमाह — **मन्त्रीति** । मन्त्री च अर्थाद् घटितसंयोगः, एषां वियतेत सत्त्वप्रज्ञादिसम्पन्नानामर्थे विशिष्य यत्नं कुर्यात् । कथं वियतेतेत्यत्राह — वृत्तिकर्मभ्यां वृत्तिः आजीवः कर्म व्यापारः ताभ्यां, सत्त्वप्रज्ञाद्यनुरूपवृत्तिकर्मपरिकल्पनेनेत्यर्थः । **ये चेति** । ये, कारणात् अपकाररूपात्, क्रुद्धाः क्रुद्धत्वेन कापटिकादिद्वारा विज्ञाताः, तान्, अर्थमानाभ्यां, शमयेत् शान्तक्रोधान् कुर्यात् । अकारणक्रुद्धान् राजद्विष्टकारिणश्च तूष्णींदण्डेन उपांशुवधेन शमयेत् ।

गूढपुरुषेषु मन्त्रिणः समुदाचार उक्तः । राज्ञस्तमाह — **पूजिताश्चेति** । राज्ञा, अर्थमानाभ्यां पूजिताः सन्तः अर्थाद् गूढपुरुषाः, राजोपजीविनाम् अमात्यादीनां, शौचं शुद्धिं जानीयुः । एतावता अध्यायार्थं तत्प्रान्ते सङ्क्षिप्ते — **इत्येताः पञ्च संस्थाः प्रकीर्तिता** इति । इत्थं कापटिकाद्येकैकप्रधानाः पञ्च संस्थाः सम्यक् तिष्ठन्ति राजप्रयोजनकारिण आस्विति संस्थाः गूढपुरुषकर्मस्थानानि प्रकीर्तिताः व्युत्पादिताः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकादशोऽध्यायः गूढपुरुषोत्पत्तौ संस्थोत्पत्तिः ॥

८. प्रक. गूढपुरुषप्रणिधिः ।

ये चास्य सम्बन्धिनोऽवश्यभर्तव्यास्ते लक्षणमङ्गविद्यां जम्भकविद्यां मायागतमाश्रमधर्मं निमित्तमन्तरचक्रमित्यधीयानाः सत्रिणः संसर्गविद्या वा ।

ये जनपदे शूरास्त्यक्तात्मानो हस्तिनं व्यालं वा द्रव्यहेतोः प्रतियोधयेयुस्ते तीक्ष्णाः ।

गूढपुरुषप्रणिधिरिति सूत्रम् । गूढपुरुषाणां प्रणिधिः प्रणिधानं कार्येषु नियोजनमिहोच्यत इत्यर्थः । तत्र पूर्वाध्यायोद्दिष्टेषु गूढपुरुषेषु कापटिकादीनां स्वरूपं वर्णितं, सत्रितीक्ष्णरसदभिक्षुकीणां तु तद् वर्णनीयमवशिष्यते। तदिहादावभिधीयते । उभयेषां गूढपुरुषत्वाविशेषेऽप्यध्यायपृथक्त्वकरणं कर्तृभेदद्योतनार्थम् । कापटिकादीनां हि पञ्चानां मन्त्रिसहितो राजा कर्ता 'तमर्थमानाभ्यामुत्साह्य मन्त्री ब्रूयादि'त्युक्तत्वात् । सत्रितीक्ष्णरसदभिक्षुकीणां तु विना मन्त्रिणं स्वयमेव राजा कर्ता, मन्त्रिशुद्धिपरिज्ञानायापि तन्नियोजनात् । यद्वक्ष्यति —'तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजे'त्यादि । इत्थं स्फुटः कर्तृभेदः । स्वरूपतोऽप्युभयेषामस्ति भेदः । संस्थाशब्दवाच्या हि कापटिकादयः स्वस्थाने सम्यक् तिष्ठन्तो राजार्थमनुतिष्ठन्ति, न सञ्चरन्तः, सत्रिप्रभृतयस्तु सर्वत्र सञ्चरन्त एव राजार्थमनुतिष्ठन्ति सञ्चारपदवाच्या इति ।

ये चास्येत्यादि । अस्य राज्ञः, सम्बन्धिनः सगन्धाः, अवश्यभर्तव्याः अवश्यपोष्याः ये वान्तिम , लक्षणं सामुद्रिकादि, अङ्गविद्यां शिक्षाव्याकरणादिम् अङ्गस्पर्शेन शुभाशुभपरिज्ञानविद्यां वा , जम्भकविद्यां वशीकरणान्तर्धानविद्यां, मायागतम् इन्द्रजालम् , आश्रमधर्मं मन्वादिधर्मशास्त्रं, निमित्तं कपिञ्जलरुत-पूर्णकुम्भदर्शनादि, अन्तरचक्रं पक्षिभिः शुभाशुभज्ञापनं पक्षिशास्त्रम्, इत्यधीयानाः एवञ्जातीयकमधीत्य विदन्तः, संसर्गविद्या अधीयाना व कामतदनुबन्धिगीतनृत्तादिशास्त्राणि अधीयानाश्च, ते, सत्रिणः सत्रिसंज्ञाः ।

ये जनपद इत्यादि । त्यक्तात्मानः शरीरनिरपेक्षाः । व्यालं व्याघ्रादिम् । तीक्ष्णाः तदाख्याः ।

ये बन्धुषु निःस्नेहाः क्रूराश्चालसाश्च ते रसदाः ।

परिव्राजिका वृत्तिकामा दरिद्रा विधवा प्रगल्भा ब्राह्मण्यन्तःपुरे कृतसत्कारा महामात्रकुलान्यधिगच्छेत् । एतया मुण्डावृषल्यो व्याख्याताः । इति सञ्चाराः ।

तान् राजा स्वविषये मन्त्रिपुरोहितसेनापतियुवराजदौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातृप्रदेष्टृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिषदध्यक्षदण्डदुर्गान्तपालाटविकेषु श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् भक्तितः सामर्थ्ययोगाच्चापसर्पयेत् ।

ये बन्धुष्वित्यादि । क्रूराः आततायिनः । अलसाः अनुत्साहाः । रसदाः तदाख्याः, विषदानेऽपि निश्शङ्का इति कृत्वा तथोक्तिः ।

परिव्राजिकेत्यादि । वृत्तिकामा भोगार्थिनी । महामात्रकुलानि अधिगच्छेत् असकृदमात्यगृहाणि गच्छेत् सत्कारस्वीकारार्थम् । यैवम्भूता, सा परिव्राजिकेत्यभिधीयत इत्यर्थः । **एतयेति** । एतया ब्राह्मणपरिव्राजिकया उक्तया, मुण्डावृषल्यो व्याख्याताः उक्तप्रायाः ब्राह्मणपरिव्राजिकासमानाचारा वेदितव्या इत्यभिप्रायः । तत्र मुण्डाः शाक्यभिक्षुक्यः, वृषल्यः शूद्राः । इति सञ्चाराः इत्युक्तरूपाः सत्त्रिप्रभृतयः सञ्चारशब्देनाख्यायन्ते ।

सञ्चाराणां विनियोगमाह — **तानिति** । राजा स्वविषये आत्मजनपदे तान् सञ्चारान् अपसर्पयेत् चारयेत् । केषु चारयेत्, मन्त्रिपुरोहितसेनापतिप्रभृतिष्वष्टादशपुरुषेषु विषये, मन्त्र्यादीनां शुद्धिज्ञानायेत्यर्थलभ्यम् । तत्र मन्त्र्यादयः प्रसिद्धाः । दौवारिको द्वाराधिकृतः प्रतिहारी, अन्तर्वंशिकः अन्तःपुराधिकृतः, प्रशास्ता स्कन्धावारनिवेशयिता, समाहर्ता राजार्थसमाहरणकर्ता, सन्निधाता भाण्डागाराधिकृतः, प्रदेष्टा कण्टकशोधनाधिकृतः, नायकः एकद्वसहस्रपदातिनेता, पौरव्यावहारिकः पुरमुख्यः पुरप्राड्विवाको वा । पुरपाठेऽप्ययमेवार्थः । कार्मान्तिकः आकरादिकर्माधिकृतः । मन्त्रिपरिषत् मन्त्रिसभा, तदध्यक्षः । भाषाटीकायां तु मन्त्रिपरिषदध्यक्षो नाम द्वादशमण्डलाधिकारनेतेत्युक्तम् । दण्डपालः सैन्यसेनामुख्यादिनेता । सेनापतिस्तु अक्षौहिणीश्वरः पूर्वमुक्तः । दुर्गपालः प्राकारादिरक्षी, अन्तपालः राज्य-

तेषां बाह्यं चारं छत्रभृङ्गारव्यजनपादुकासनयानवाहनोपग्राहिणस्तीक्ष्णा विद्युः। तं सत्रिणः संस्थास्वर्पयेयुः।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारका रसदाः कुब्जवामनकिरातमूकबधिरजडान्धच्छद्मानो नटनर्तकगायनवादकवाग्जीवनकुशीलवाः स्त्रियश्चाभ्यन्तरं चारं विद्युः। तं भिक्षुक्यः संस्थास्वर्पयेयुः।

सीमारक्षी यो वीवधाध्यक्ष इत्युच्यते, आटविकः अटवीराज्याधिपतिः। तान् कीदृशान्, श्रद्धेयदेशवेषशिल्पभाषाभिजनापदेशान् देशो मध्यदेशगौडदेशादिः, वेषः प्रलम्बश्मश्रुत्वादिः, शिल्पं कलाकौशलं, भाषा प्राच्योदच्यादिव्याहारभेदः, अभिजनः ब्राह्मणादिजन्म, एषां देशादीनाम् अपदेशो निर्देशः श्रद्धेयः अनभिशङ्कनीयो विश्वसनीयो येषां तान् तथाभूतान्। कथं कृत्वा चारयेत्, भक्तितः सामर्थ्ययोगाच्च भक्तिं सेव्यगतां सामर्थ्ययोगं सेवकगतं चानुसृत्य। अयं भावः — सेव्येषु मन्त्र्यादिषु यो यद्देवभक्तः तस्मिंस्तद्देवभक्तवेषान् स्वस्वसामर्थ्यानुरूपच्छत्रग्रहणादिकर्मनियुक्तांश्च कृत्वा चारयेदिति।

सञ्चाराणां मध्ये तीक्ष्णाः मन्त्र्यादीनां बाह्यं समाचारं छत्रभृङ्गाराद्युपग्रहणवृत्त्या तान् सेवमानाः सन्तो जानीयुरित्याह — **तेषामित्यादि**। तत्र छत्रम् आतपत्रम्। भृङ्गारः पात्रभेदः कनकालुकाख्यः। व्यजनं तालवृन्तम्। पादुका उपानत्। आसनम् उपवेशसंवेशाधारः। यानम् आन्दोलिका। वाहनम् अश्वः। **तमिति**। तं तीक्ष्णविदितं चारं, सत्रिणः उक्तलक्षणाः, संस्थासु, अर्पयेयुः निवेदयेयुः।

विषदानसुलभसौकर्या सूदारालिकादिवृत्तिमाश्रिताः रसदाः, तथा कुब्जवामनादिच्छलजीविनः, नटनर्तकादयः, स्त्रियश्च गृहान्तर्गतं चारं जानीयुरित्याह — **सूदेत्यादि**। सूदः अन्नकारः, आरालिको भक्ष्यकारः, स्नापकः स्नपयिता, संवाहकः अङ्गमर्दकः, आस्तरकः शय्यास्तरणकर्ता, कल्पकः नापितः, प्रसाधकः अलङ्कर्ता, उदकपरिचारकः जलहारकः। कुब्जः गडुलः, वामनः खर्वः, किरातः अल्पतनुः, जडः लोकव्यवहारानभिज्ञः। कुब्जादिषु शेषाः प्रतीताः। नटः नवरसाभिनयकर्ता, नर्तकः चारणः अङ्गविक्षेपमात्रकर्ता, गायनः गान्धर्ववित्, वादकः वंशवीणादिवादयिता, वाग्जीवनः पुरावृत्तकथनो-

संस्थानामन्तेवासिनः संज्ञालिपिभिश्चारसञ्चारं कुर्युः । न चान्योन्यं संस्थास्ते वा विद्युः ।

भिक्षुकीप्रतिषेधे द्वास्स्थपरम्परा मातापितृव्यञ्जनाः शिल्पकारिकाः कुशीलवा दास्यो वा गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा

पजीवी पुस्तकवाचकः, कुशीलवः वेणः लङ्घनप्लवनादिवृत्तिः । स्त्रियः प्रतारिकाः, स्त्रीग्रहणं षण्डस्याप्युपलक्षणम् । **तमिति** । तं रसदादिविज्ञातं चारं भिक्षुक्य उक्तलक्षणाः, संस्थास्वर्पयेयुः ।

संस्थास्वर्पितश्चारः केन द्वारेण राजानं प्राप्नुयादित्यत्राह — **संस्थानामित्यादि** । संज्ञालिपिभिः अर्थसूचनाय स्वसंकेतकल्पिताभिर्लिपिभिः पत्रे निवेशिताभिः । चारसञ्चारं चारस्य बाह्यस्याभ्यन्तरस्य च व्यापारस्य सञ्चारं राज्ञि समर्पणम् । **न चेति** । संस्थाः ते वा अन्योन्यं न विद्युः, संस्थाः संस्थान्तरवेदिनः सञ्चाराश्च सञ्चारान्तरवेदिनो न भवेयुः, संवादच्छलनपरिहारार्थम् एकविज्ञाने सर्वग्रहणं मा भूदित्येतदर्थं च । अन्योन्यवेदने हि स्वस्वचारस्यान्यचारेण संवादं मिथ्यैव परिकल्प्य स्वामिनं वञ्चयेयुः, एकस्मिन् विज्ञाते तद्द्वारेणान्यस्य तद्द्वारेणान्यस्येति क्रमेण सर्वस्य ग्रहणं च प्रसज्येतेति ।

यदि भिक्षुक्यो नान्तः प्रवेशं लभेरन्, तदा सूदादिसकाशाच्चारः कथं निष्क्रामयितव्य इत्यत्राह — **भिक्षुकीति** । भिक्षुकीप्रतिषेधे भिक्षुकीनामन्तःप्रवेशप्रतिरोधे, द्वाःस्थपरम्परा चारं निर्हरेत् । एको द्वाःस्थस्तदनन्तराय द्वाःस्थाय, स तदनन्तरायेति क्रमेण चरमो द्वाःस्थो भिक्षुक्यादये बाह्यजनाय राज्ञे वा चारं समर्पयेदित्यर्थः । तदभावे मातापितृव्यञ्जनाः अन्तःपुरसेवकजनस्य माताहं पिताहमिति बन्धुत्वापदेशिनो वृद्धाः स्त्रियः पुरुषाश्च चारं निर्हरेयुः । शिल्पकारिकाः केशसंस्कारपत्रवल्लीरचनादिवैचित्र्यं शिल्पं तत्कर्त्र्यः, कुशीलवाः गायन्यः, दास्यो वा परिचारिका वा, चारं निर्हरेयुः । गीतपाठ्यवाद्यभाण्डगूढलेख्यसंज्ञाभिर्वा गीतेन सूचनीयार्थसूचकपदबन्धचारुणा गेयेन, पाठ्येन तथाविधेन श्लोकेन, वाद्येन वंशवीणादिना, भाण्डगूढलेख्येन भाण्डे जलकुम्भादौ क्षिप्तेन गूढलेख्येन च याः संज्ञा अर्थसूचनाः ताभिर्वा चारं निर्हरेयुः अर्थात् तत्तत्कुशलाः । उक्तोपायासम्भवे सूदादयः स्वयमेव चारानिर्हरणायान्तःपुराद् दीर्घरोगोन्मादापदेशादिना निमित्तेन निर्गच्छेयुरित्याह —

चारं निर्हरेयुः। दीर्घरोगोन्मादाग्निरसविसर्गेण वा गूढनिर्गमनम्।

त्रयाणामेकवाक्ये सम्प्रत्ययः। तेषामभीक्ष्णविनिपाते तूष्णीदण्डः प्रतिषेधो वा।

कण्टकशोधनोक्ताश्चापसर्पाः परेषु कृतवेतना वसेयुः सम्पातनिश्चारार्थं, त उभयवेतनाः।

गृहीतपुत्रदारांश्च कुर्यादुभयवेतनान्।
तांश्चारिप्रहितान् विद्यात् तेषां शौचं च तद्विधैः॥

दीर्घेत्यादि। दीर्घरोगोन्मादाग्निरसविसर्गेण समाहारद्वन्द्वोऽयम्। दीर्घरोगेण गुल्मादिना उन्मादेन ग्रहपीडया अग्निरसविसर्गेण शालायामग्निदानेन अन्नादौ विषदानेन च। अग्निरसविसर्गवचनं तज्जनितेऽन्तःपुरसम्भ्रमे गूढपुरुषाणां रोगाद्यपदेशं विनैव निर्गमनसौकर्यात्।

गूढपुरुषार्पितस्य चारस्य कथं विश्वास्यतेत्याकाङ्क्षायाम् अन्योन्यानभिज्ञाः त्रयो गूढपुरुषाः परचारमधिकृत्य यदि वाक्यमेकार्थं ब्रूयुस्तदा तत्र विश्वासः कार्यो नत्वन्यथेत्यभिप्रायेणाह — त्रयाणामित्यादि। एकवाक्ये परस्परवाक्यसंवादिनि वाक्ये। सम्प्रत्ययः विश्वासः। अभीक्ष्णविनिपाते पौनःपुनिके वाक्यविसंवादे। तेषां तूष्णींदण्डः प्रतिषेधो वा ते उपांशु ताडनीयाः गूढपुरुषकर्मणो वारणीया वेत्यर्थः।

किमेतावन्त एव चारपुरुषाः, उतान्येऽपि सन्तीति जिज्ञासायामाह— कण्टकेत्यादि। कण्टकशोधनोक्ताः कण्टकशोधनाधिकरणोक्ताः सिद्धप्रव्रजितचक्रचराद्यश्च अपसर्पाः गूढपुरुषाः कार्याः। ते परेषु शत्रुषु तद्राज्ये तन्मन्त्र्यादिष्वष्टादशतीर्थेषु च कृतवेतनाः कल्पितजीविकाः वसेयुः सेवां कुर्युः। किमर्थं, सम्पातनिश्चारार्थं सम्पातानां चाराणां निश्चारार्थं निरायासानुष्ठानार्थं शत्रुचाराणां स्वराज्यापसर्पणे प्रवृत्तिपरिहाराय च। ते उभयवेतनाः विजिगीषोः शत्रोश्च वेतनग्राहिणः।

गृहीतेत्यादि। उभयवेतनान्, गृहीतपुत्रदारान् कुर्यात् गृहीता राज्ञा पूजापूर्वमात्मवशे कृताः पुत्रा दाराश्च येषां तांस्तथाभूतान् कृत्वा परेषु विसृजेदित्यर्थः। अरिप्रहितान् तान् शत्रुप्रेषितान् उभयवेतनान्, तेषां शौचं च स्वीयानामुभयवेतनानां शुद्धिं च, तद्विधैः विद्यात् उभयवेतनद्वारेण जानीयात्॥

एवं शत्रौ च मित्रे च मध्यमे चावपेच्चरान्।
उदासीने च तेषां च तीर्थेष्वष्टादशस्वपि ॥
अन्तर्गृहचरास्तेषां कुब्जवामनषण्डकाः।
शिल्पवत्यः स्त्रियो मूकाश्चित्राश्च म्लेच्छजातयः ॥
दुर्गेषु वणिजः संस्था दुर्गान्ते सिद्धतापसाः।
कर्षकोदास्थिता राष्ट्रे राष्ट्रान्ते व्रजवासिनः ॥
वने वनचराः कार्याः श्रमणाटविकादयः।
परप्रवृत्तिज्ञानार्थाः शीघ्राश्चारपरम्पराः ॥
परस्य चैते बोद्धव्यास्तादृशैरेव तादृशाः।
चारसञ्चारिणः संस्था गूढाश्चागूढसंज्ञिताः ॥

एवमित्यादि। आवपेत् विसृजेत्। अष्टादशसु तेषां तीर्थेष्वपि शत्रुमित्रमध्यमोदासीनानां मन्त्रिपुरोहितसेनापतिप्रभृतिषु पूर्वोक्तेषु कार्यस्थानेषु च ॥

अन्तरित्यादि। तेषाम् अन्तर्गृहचराः शत्र्वादितत्तीर्थान्तानाम् अन्तर्गृहसञ्चारिणः कर्तव्याः। चित्राः नानाप्रकाराः ॥

दुर्गेष्विति। दुर्गेषु जलादिदुर्गवत्सु राजधान्यादिमहानगरेषु, वणिजः, सम्यक् तिष्ठन्तीति संस्थाः गूढपुरुषाः कार्याः। दुर्गान्ते दुर्गसीमायां सिद्धतापसाः संस्थाः कार्याः। राष्ट्रे कर्षका उदास्थिताश्च संस्थाः कार्याः। राष्ट्रान्ते राष्ट्रसीमायां व्रजवासिनः गोपालाः गूढपुरुषाः कार्याः ॥

वने इति। वने श्रमणाटविकादयः क्षपणाटवीपालप्रभृतयो वनचराः कार्याः। परप्रवृत्तिज्ञानार्थाः शत्रुव्यापारज्ञानप्रयोजनाः शीघ्राः क्षिप्रचारिण्यः चारपरम्पराः कर्तव्याः ॥

परस्येति। एते तादृशाः उक्तजातीयाः, गूढाश्चागूढसंज्ञिताः छन्नरूपा अपि अच्छन्नचिह्नधारिणः, परस्य शत्रोः, चारसंचारिणः सत्रितीक्ष्णादयः, संस्थाश्च कापटिकोदास्थितप्रभृतयश्च, तादृशैरेव तज्जातीयैरेव, बोद्धव्याः ज्ञातव्याः ॥

अकृत्यान् कृत्यपक्षीयैर्दर्शितान् कार्यहेतुभिः ।
परापसर्पज्ञानार्थं मुख्यानन्तेषु वासयेत् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे द्वादशोऽध्यायः
गुढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः, गुढपुरुषप्रणिधिः ॥

अकृत्यानिति । अकृत्यान् मुख्यान् असाध्यान् विरुद्धानपि राष्ट्रमुख्यान्, कृत्यपक्षीयैः कार्यहेतुभिः साध्यपक्षोचितैः कार्यकारणैः, दर्शितान् कृत्यता यथा स्यात् तथा बोधितान्, कृत्वेत्यार्थम् । परापसर्पज्ञानार्थं शत्रुचारपुरुषज्ञानाय अन्तेषु राष्ट्रसीमसु वासयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे द्वादशोऽध्यायः
गूढपुरुषोत्पत्तौ सञ्चारोत्पत्तिः, गूढपुरुषप्रणिधिः ॥

९. प्रक. स्वविषये कृत्याकृत्यपक्षरक्षणम्।

कृतमहामात्यापसर्पः पौरजानपदानपसर्पयेत्।

सत्रिणो द्वन्द्विनस्तीर्थसभाशालापूगजनसमवायेषु विवादं कुर्युः—सर्वगुणसम्पन्नश्चायं राजा श्रूयते। न चास्य कश्चिद् गुणो दृश्यते यः पौरजानपदान् दण्डकराभ्यां पीडयति इति।

तत्र येऽनुप्रशंसेयुः तानितरस्तं च प्रतिषेधयेत्—मात्स्यन्यायाभिभूताः प्रजा मनुं वैवस्वतं राजानं चक्रिरे[1]। धान्यषड्भागं पण्यदशभागं हिरण्यं चास्य भागधेयं प्रकल्पयामासुः। तेन भृता राजानः प्रजानां योगक्षेमवहाः। तेषां किल्बिषं[2] दण्डकरा हरन्ति, योगक्षेमव-

---

स्वविषये कृत्याकृत्यपक्षरक्षणमिति सूत्रम्। स्वविषये स्वपुरे स्वजनपदे च, कृत्याकृत्यपक्षरक्षणं कृत्याः क्रुद्धलुब्धभीतावमानिताः शत्रुभेद्याः तद्विपरीता अकृत्याः कृत्यपक्षस्य अकृत्यपक्षस्य च रक्षणं परोपजापात् पालनम् अत्रोच्यत इत्यर्थः।

तत्र जानपदकृत्याकृत्यपक्षावबोधो जानपदेषु गूढपुरुषप्रणिधानादृते न भवतीति तदिदं पूर्वाध्यायानुक्तमिदानीं प्राप्तावसरमाह — **कृते**त्यादि। **कृतमहामात्यापसर्पः** महामात्यग्रहणं पूर्वोक्ताष्टादशतीर्थोपलक्षणम्। मन्त्रिपुरोहितादिषु चारप्रणिधानानन्तरमित्यर्थः। पौरजानपदान् अपसर्पयेत् अपसर्पैर्गूढपुरुषैः परिशोधयेत् ते स्वस्मिन्ननुरागिणोऽपरागिणो वेति। 'प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्चे'ति णिच्।

सत्रिण इति। सत्रिणः, द्वन्द्विनः कलहायमानाः सन्तः, तीर्थसभाशालापूगजनसमवायेषु नद्यादितीर्थेषु ब्राह्मणादिसभासु अन्नपानीयादिशालासु कर्मकरबृन्देषु नानाजातीयजनसङ्घेषु च विवादं विरुद्धं वादं वक्ष्यमाणप्रकारं कुर्युः। सर्वगुणेत्यादि स्फुटार्थम्।

तत्रेति। तत्र तीर्थादिषु। ये अनुप्रशंसेयुः यथोक्तराजनिन्दानुगुणं कथयेयुः सत्यमेवमेतादिति, तान् तं च पूर्वनिन्दकं च इतरः सत्र्यन्यतमः प्रतिषेधयेत् वारयेत्। प्रतिषेधनप्रकारं प्रपञ्चयति — **मात्स्यन्यायेत्यादि**। मनुं वैवस्वतं मनुनामानं विवस्वतः सूनुम्। धान्यषड्भागं धान्यस्य षष्ठमंशम्। पण्यदशभागं पण्यादीनां वस्त्रादीनां विक्रेयद्रव्याणां दशमांशम्। हिरण्यं

---

१. 'चक्रुः', २. 'षमदण्डकरा अयो' ग. पीठः.

हाश्च प्रजानाम् । तस्मादुञ्छषड्भागमारण्यका अपि निर्वपन्ति— तस्यैतद् भागधेयं योऽस्मान् गोपायतीति । इन्द्रयमस्थानमेतद् राजानः प्रत्यक्षहेडप्रसादाः । ताननवमन्यमानं[1] दैवोऽपि दण्डः स्पृशति[2] । तस्माद् राजानो नावमन्तव्याः इति क्षुद्रकान् प्रतिषेधयेत् ।

किंवदन्तीं च विद्युः ।

ये चास्य धान्यपशुहिरण्यान्याजीवन्ति, तैरुपकुर्वन्ति व्यसने अभ्युदये वा, कुपितं बन्धुं राष्ट्रं वा व्यावर्तयन्ति, अमित्रमाटविकं वा

यथादेशप्रसिद्धम् । भागधेयम् अंशम् । तेन भृताः यथोक्तभागधेयरूपभृतिग्राहिणः सन्तः । प्रजानां योगक्षेमवहाः पौरजानपदानां योगक्षेमवहनरूपकर्मकराः । पौरजानपदान् दण्डकराभ्यां पीडयतीति यद् दूषणमुद्भावितं तत्र समाधिमाह — तेषामिति । तेषां दण्डकराः तत्सम्बन्धिनो दण्डकराः राजभिः प्रजासु प्रयुज्यमाना दण्डाः प्रजाभ्यो गृह्यमाणाः कराश्चेत्यर्थः । प्रजानां किल्बिषं हरन्ति पापं चौर्यादिजनितमपनुदन्ति, योगक्षेमवहाश्च योगक्षेमसाधकाश्च भवन्ति । तत्र दण्डानां किल्बिषहरत्वं दण्डानुभवस्य प्रायश्चित्तानुष्ठानस्थानीयत्वाद् बोद्धव्यं, योगक्षेमवहत्वं च स्वधर्मव्यतिक्रमभयोत्पादनेन सन्मार्गप्रवर्तकत्वात् । कराणां योगक्षेमवहत्वं तु जनहितेषु पूर्तादिकर्मसु विनियुज्यमानत्वात् स्पष्टमेव । तस्मादिति । तस्मात् कराणां रक्षाभृतिरूपत्वात्, आरण्यका अपि ऋषयोऽपि, उञ्छषड्भागम् उञ्छस्य कणश आत्तस्य धान्यादेः षष्ठमंशं, निवपन्ति वितरन्ति । किं कृत्वा, यः अस्मान् रक्षति तस्यैतद् भागधेयमिति मत्वा । इन्द्रेति । राजानः प्रत्यक्षहेडप्रसादाः प्रत्यक्षनिग्रहानुग्रहाः, अत एव एतद् इन्द्रयमस्थानम् इमे इन्द्रयमस्थानस्थिताः इन्द्रयमतुल्या इत्यर्थः, तात्स्थ्यात् ताच्छब्द्यम् । तानवमन्यमानमित्यादि स्फुटार्थम् । ताननवमन्यमानानिति पाठे व्यधिकरणे द्वितीये ।

किंवदन्तीमिति । किंवदन्तीं च विद्युः जनश्रुतिं च जानीयुः, अर्थात् सत्रिणः ।

ये चेति । ये अस्य राज्ञः धान्यपशुहिरण्यानि आजीवन्ति उपजीवन्ति, तैः धान्यादिभिः व्यसने अभ्युदये वा अस्य उपकुर्वन्ति, ये वा कुपितं बन्धुं राष्ट्रं च व्यावर्तयन्ति कोपान्निवर्तयन्ति, ये वा अमित्रं शत्रुम् आटविकं

१, 'वै', २. 'मानानां देवोऽपि दण्डं स्पृ' ग. पाठः.

प्रतिषेधयन्ति, तेषां मुण्डजटिलव्यञ्जनास्तुष्टातुष्टत्वं विद्युः।

तुष्टान् भूयः पूजयेत्। अतुष्टांस्तुष्टिहेतोस्त्यागेन साम्ना च प्रसादयेत्। परस्पराद्वा भेदयेदेनान् सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च। तथाप्यतुष्यतो दण्डकरसाधनाधिकारेण वा जनपदविद्वेषं ग्राहयेत्। विद्विष्टानुपांशुदण्डेन जनपदकोपेन वा साधयेत्। गुप्तपुत्रदारानाकरकर्मान्तेषु वा वासयेत् परेषामास्पदभयात्।

क्रुद्धलुब्धभीतावमानिनस्तु परेषां कृत्याः। तेषां कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जनाः परस्पराभिसम्बन्धम् अमित्रप्रतिसम्बन्धं वा विद्युः।

अटवीपालं प्रतिषेधयन्ति शत्रुभावाद् वारयन्ति, तेषां तुष्टातुष्टत्वं तुष्टत्वमतुष्टत्वं च, मुण्डजटिलव्यञ्जना मुण्डजटिलवेषा विद्युः।

तुष्टातुष्टत्ववेदनानन्तरकार्यमाह — **तुष्टानित्यादि**। भूयः पूजयेत् तुष्ट्यतिशयार्थम्। तुष्टिहेतोः तुष्टयर्थम्। त्यागेन अर्थदानेन। साम्ना सान्त्ववादेन। अर्थदानादिनाप्यतुष्टावाह — **परस्परादिति**। एनान् अतुष्टान् परस्पराद् भेदयेत् मिथः संहता भूत्वा मापकार्षुरिति। सामन्ताटविकतत्कुलीनावरुद्धेभ्यश्च भेदयेत् सामन्तादिषु मोपजापं कार्षुरिति। तथापि अतुष्यतः दानेऽप्यार्जवमप्रतिपद्यमानान्, दण्डकरसाधनाधिकारेण दण्डसाधनाधिकारदानेन वा करसाधनाधिकारदानेन वा जनपदविद्वेषं जानपदविरोधं ग्राहयेत्। विद्विष्टान् तथा प्राप्तजनपदविद्वेषान्, उपांशुदण्डेन रहोघातेन जनपदकोपेन जानपदनिष्ठया स्वविद्विष्टाजिघांसया वा, साधयेत् दमयेत्। किञ्च गुप्तपुत्रदारान् आकरकर्मान्तेषु वासयेत्, तत्पुत्रदारगुप्तिं स्वयमङ्गीकृत्य तान् अतुष्टान् खनिकर्मस्थानेषु व्यापारयेत्। कस्मात्, परेषामास्पदभयात् शत्रुपक्ष्याणामास्पदमिमे स्युरिति भयात्। तदेवं गूढपुरुषप्रणिधानं व्याख्यातम्।

अथ स्वविषये कृत्याकृत्यपक्षरक्षणमाह—**क्रुद्धेत्यादि**। क्रुद्धलुब्धभीतमानिनः परेषां कृत्याः शत्रूणां कृत्याः साध्या भेद्या भवन्ति। एतेन तद्विपरीता अभेद्या अकृत्या इत्यर्थादुक्तप्रायम्। तेषां क्रुद्धादीनां, परस्पराभिसम्बन्धम्

---

१. 'प्रतिसाधयेत्', २. 'न्धं ममित्राटविकस' ग. पाठः.

तुष्टानर्थमानाभ्यां पूजयेत् । अतुष्टान् सामदानभेददण्डैः साधयेत् ।

एवं स्वविषये कृत्यानकृत्यांश्च विचक्षणः ।
परोपजापात् संरक्षेत् प्रधानान् क्षुद्रकानपि ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे त्रयोदशोऽध्यायः स्वविषये कृत्याकृत्यपक्षरक्षणम् ॥

अमित्रप्रतिसम्बन्धं वा अन्योन्यसम्बन्धं शत्रुसम्बन्धं च, कार्तान्तिकनैमित्तिकमौहूर्तिकव्यञ्जना विद्युः, कार्तान्तिकाः कृतान्तो दैवं पूर्वकर्म तद्विदिनः नैमित्तिका. शुभाशुभशकुनज्ञाः मौहूर्तिकाः त्रिकालवृत्तज्ञाः तद्वेषा जानीयुः । एतेन अकृत्यज्ञानमप्युक्तप्रायम् ।

एवं कार्तान्तिकादिव्यञ्जनद्वारेण अकृत्येषु कृत्येषु च विज्ञातेषु विजिगीषोः कर्तव्यमाह — **तुष्टानिति** । तुष्टान् राज्ञि प्रीतिमतः अकृत्यपक्ष्यानित्यर्थः, अर्थमानाभ्यां पूजयेत् अर्थो धनं मानो बहुमानचिह्नं वलयाङ्गदादि तद्दानेन सत्कुर्यात् । अतुष्टान् कृत्यान् कृत्यपक्ष्यानित्यर्थः, सामदानभेददण्डैः साधयेद् दमयेत् ।

एवमित्यादि । एवम् उक्तप्रकारेण । विचक्षणः नीतिज्ञः । क्षुद्रकानपि अमुख्यानपि ।

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरण त्रयादशोऽध्यायः स्वविषये कृत्याकृत्यपक्षरक्षणम् ॥

१०. प्रक. परविषये कृत्याकृत्यपक्षोपग्रहः।

कृत्याकृत्यपक्षोपग्रहः स्वविषये व्याख्यातः परविषये वाच्यः।

संश्रुत्यार्थान् विप्रलब्धः, तुल्यकारिणोः शिल्पे वोपकारे वा विमानितः, वल्लभावरुद्धः, समाहूय पराजितः, प्रवासोपतप्तः, कृत्वा व्ययमलब्धकार्यः, स्वधर्माद् दायाद्याद् वोपरुद्धः, मानाधिकाराभ्यां भ्रष्टः, कुल्यैरन्तर्हितः, प्रसभाभिमृष्टस्त्रीकः, काराभिन्यस्तः, परोक्तदण्डितः, मिथ्याचारवारितः, सर्वस्वमाहारितः, बन्धनपरिक्लिष्टः, प्रवासितबन्धुरिति क्रुद्धवर्गः।

परविषये कृत्याकृत्यपक्षोपग्रह इति सूत्रम्। परविषये शत्रुजनपदे, कृत्याकृत्यपक्षोपग्रहः कृत्यपक्षस्य अतुष्टवर्गस्य अकृत्यपक्षस्य तुष्टवर्गस्य च उपग्रहः उपजापादिना सङ्ग्रहः स्वायत्तीकरणम् इहोच्यत इत्यर्थः।

प्रकरणसङ्गतिमाह — **कृत्याकृत्ये**त्यादि।

कृत्या नाम क्रुद्धलुब्धभीतमानिन इत्युक्तम्। तत्र प्रथमं क्रुद्धान् व्युत्पादयति — **संश्रुत्ये**ति। अर्थान् संश्रुत्य विप्रलब्धः ददामीति प्रतिज्ञाय तददानेन वञ्चितः, शिल्पे उपकारे वा तुल्यकारिणोः समानं कर्म कृतवतोर्मध्ये विमानितः अनभिनन्दितोऽन्यतरः, वल्लभावरुद्धः राज्ञः परमाप्तसेवकैः प्रतिषिद्धराजकुलप्रवेशः, समाहूय पराजितः द्यूतक्रीडार्थमाहूय हृतधनः, प्रवासोपतप्तः राजकृतेनावरोधेन स्वेप्सितदेशवासप्रतिबन्धः प्रवासः तेन दुःखितः, कृत्वा व्ययमलब्धकार्यः कार्यार्थं राजवल्लभादिभ्य उत्कोचं दत्त्वाप्यलब्धप्रयोजनः, स्वधर्माद् दायाद्याद् वा उपरुद्धः स्वधर्मो दाक्षिणात्यानां मातुलकन्यापरिणयादिः दायाद्यं दायत्वेन भोग्यं भागिनेयानां केरलेषु मातुलधनं तादृशात् स्वधर्माद् दायाद्याच्च प्रतिषिद्धः, मानाधिकाराभ्यां भ्रष्टः मानः छत्रान्दोलिकादिः परिच्छदबहुमानः अधिकारः समाहर्तृसन्निधातृप्रभृतिनियोगः ताभ्यां प्रच्यावितः, कुल्यैः कुलभवैः राजबन्ध्वादिभिर्निमित्तभूतैः अन्तर्हितः अप्रकाशं गतः, अपलपितगुणत्वादित्यर्थम्। प्रसभाभिमृष्टस्त्रीकः बलात्कारधर्षितदारः, काराभिन्यस्तः बन्दीकृतः, परोक्तदण्डितः अविचार्यैव परवचनप्रत्ययमात्रेण कृतदण्डः, मिथ्याचारवारितः प्राणिवधरूपत्वाद् यज्ञः पापकर्मेत्येवञ्ज्ञानीनेन मिथ्याज्ञानेन आचाराद् यज्ञादिसत्कर्मानुष्ठानाद्

---

१. 'पातितः' ग. पाठः.

स्वयमुपहतः, विप्रकृतः, पापकर्माभिख्यातः, तुल्यदोषदण्डेनोद्विग्नः, पर्यात्तभूमिः, दण्डेनोपहतः, सर्वाधिकरणस्थः, सहसोपचितार्थः, तत्कुलीनोपाशंसुः, प्रद्विष्टो राज्ञा, राजद्वेषी चेति भीतवर्गः।

परिक्षीणोऽत्यात्तस्वः कदर्यो व्यसन्यत्याहितव्यवहारश्चेति लुब्धवर्गः।

आत्मसम्भावितो मानकामः शत्रुपूजामर्षितो नीचैरुपहितस्तीक्ष्णः साहसिको भोगेनासन्तुष्ट इति मानिवर्गः।

वारितः, सर्वस्वमाहारितः हृतसर्वस्वः, बन्धनपरिक्लिष्टः बन्धनेन कार्येष्वयथार्हनियन्त्रणया परिक्लिष्टः, प्रवासितबन्धुः प्रवासितः स्वदेशान्निष्कासितो बन्धुः पुत्रादिर्यस्य सः, इति एवञ्जातीयः, क्रुद्धवर्गो वेदितव्य इति शेषः।

भीतवर्गमाह— **स्वयमित्यादि**। स्वयमुपहतः धनार्थं स्वकृतेन परमारणादिना नृशंसकर्मणा दूषितः, विजिगीषुणा वा स्वयं धनदानेन नृशंसकर्म परमारणादिकं कारयित्वा दूषितः। स हि विजिगीषुसकाशाद् भीतो भवति— 'शत्रुपक्षादधिकधनलाभे मामप्ययं हन्यादि'ति विजिगीषुरात्मानमभिशङ्कतेति मत्वा। विप्रकृतः अन्तःपुरादौ विजिगीषुविरुद्धक्रियारम्भः, पापकर्माभिख्यातः ब्रह्महत्यादिपापकर्माभिशस्तः, तुल्यदोषदण्डेन उद्विग्नः स्वसमानदोषेऽन्यस्मिन् दण्डं प्रयुक्तं दृष्ट्वा भीतः मय्यपि दण्डः पतेदिति, पर्यात्तभूमिः भूम्यपहर्ता, दण्डेनोपहतः कर्शितः, सर्वाधिकरणस्थः सर्वेषु राजकीयनियोगस्थानेषु प्राप्तस्वाम्यः, सहसोपचितार्थः अकस्माद् साहसेन वा वर्धितधनः, साहसेति च पाठः। तत्कुलीनोपाशंसुः तस्य राज्ञः कुलीनं दायादम् उपाशंसुः कामुक उपाश्रित इत्यर्थः। शेषं स्फुटम्।

लुब्धवर्गमाह—**परीत्यादि**। परिक्षीणः विनष्टसर्ववैभवः, अत्यात्तस्वः अत्यात्तं राज्ञा दण्डकररूपतयातिमात्रं गृहीतं स्वं धनं यस्य सः, कदर्यः कृपणः, व्यसनी स्त्रीपानादिव्यसनवान्, अत्याहितव्यवहारः अतिमात्रप्रयुक्तधननिमित्तव्यवहारः।

मानिवर्गमाह—**आत्मेति**। आत्मसम्भावितः अहमतीव विद्वान् शूर इति, मानकामः धनमवधीर्य पूजामात्राभिलाषी, शत्रुपूजामर्षितः अनेन मम शत्रुः पूजित इति प्राप्तामर्षः, नीचैरुपहितः दुर्जनैः क्वचित् कार्येऽभिनिवे-

तेषां मुण्डजटिलव्यञ्जनैर्यो यद्भक्तिः कृत्यपक्षीयस्तं तेनोपजापयेत् ।

यथा मदान्धो हस्ती मत्तेनाधिष्ठितो यद्यदासादयति तत् सर्वं प्रमृद्नात्येवमयमशास्त्रचक्षुरन्धो राजान्धेन मन्त्रिणाधिष्ठितः पौरजानपदवधायाभ्युत्थितः। शक्यमस्य प्रतिहस्तिप्रोत्साहनेनापकर्तुम्, अमर्षः क्रियताम् इति क्रुद्धवर्गमुपजापयेत् ।

यथा लीनः सर्पो यस्माद् भयं पश्यति तत्र विषमुत्सृजत्येवमयं राजा जातदोषाशङ्कस्त्वयि पुरा क्रोधविषमुत्सृजति, अन्यत्र गम्यताम् इति भीतवर्गमुपजापयेत् ।

यथा श्वगणिनां धेनुः श्वभ्यो दुग्धे न ब्राह्मणेभ्यः एवमयं राजा सत्त्वप्रज्ञावाक्यशक्तिहीनेभ्यो दुग्धे नात्मगुणसम्पन्नेभ्यः। असौ राजा पुरुषविशेषज्ञः सेव्यतामिति लुब्धवर्गमुपजापयेत् ।

शितः, तीक्ष्णः आत्मत्यागी, साहसिकः अतर्कितप्रवृत्तिः साहसं तद्वान्, भोगेन असन्तुष्टः अल्पतया भृत्या तृप्तिमप्राप्तः ।

क्रुद्धादीनां कृत्यपक्षीयाणां मध्ये यो यदभिलषति तं मुण्डजटिलव्यञ्जनमुखेन तद्दानपूर्वं भेदयेदित्याह — तेषामित्यादि ।

तत्र क्रुद्धवर्गस्य भेदनप्रकारमाह—**यथा मदान्ध** इत्यादि । मत्तेनाधिष्ठितः प्रमादिना हस्तिपकेन नियम्यमानः। आसादयति दृष्टिविषयं करोति । प्रमृद्नाति नाशयति । अशास्त्रचक्षुः राजशास्त्रलक्षणनेत्रहीनः। अभ्युत्थितः उद्युक्तः। प्रतिहस्तिप्रोत्साहनेन प्रत्यर्थ्युत्साहजननेन । अमर्षः क्रियतां प्रकोप उत्पाद्यतां, राज्ञः ।

भीतवर्गस्याह— **यथा लीन** इत्यादि । भयं पश्यति आत्मनो विपत्तिमभिशङ्कते । पुरा जातदोषाशङ्कः पूर्वमुत्पन्नदोषवितर्कः, अथवा पुराशब्द उत्सृजतीत्यनेन सम्बध्यते उत्स्रक्ष्यतीत्यर्थः। 'यावत्पुरानिपातयोर्लट्' इति लट् ।

लुब्धवर्गस्याह — **यथा श्वगणिना**मित्यादि । श्वगणिनां धेनुः श्वगणस्वामिनां गौः। दुग्धे क्षीरं स्रावयति । अयं सन्निहितः। दुग्धे फलं ददाति । असौ विप्रकृष्टः सामन्तः। पुरुषविशेषज्ञः पुरुषतारतम्यवेदी ।

---

१. 'हस्तिप्रो' ग. पाठः.

यथा चण्डालोदपानश्चण्डालानामेवोपभोग्यो नान्येषामेवमयं राजा नीचो नीचानामेवोपभोग्यो न त्वद्विधानामार्याणाम्। असौ राजा पुरुषविशेषज्ञः तत्र गम्यतामिति मानिवर्गमुपजापयेत्।

तथेति प्रतिपन्नांस्तान् संहितान् पणकर्मणा।
योजयेत यथाशक्ति सापसर्पान् स्वकर्मसु॥
लभेत सामदानाभ्यां कृत्यांश्च परभूमिषु।
अकृत्यान् भेददण्डाभ्यां परदोषांश्च दर्शयेत्॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
चतुर्दशोऽध्यायः परविषये कृत्याकृत्यपक्षोपग्रहः॥

मानिवर्गस्याह — **यथा चण्डाले**त्यादि। चण्डालोदपानः चण्डालकूपः। आर्याः शिष्टाः।

तथेतीति। तथेति प्रतिपन्नान् उपजापानुरोधेन परपक्षप्रवेशमङ्गीकृतवतः, पणकर्मणा संहितान् सत्यशपथादिना कृतसन्धानान्, तान् कृत्यान्, सापसर्पान् चारसहितान् कृत्वा, यथाशक्ति स्वकर्मसु योजयेत नियुञ्जीत॥

लभेतेति। परभूमिषु परजनपदे, कृत्यान्, सामदानाभ्यां, लभेत साधयेत्, भेदस्य तेषु स्वत एव सिद्धत्वादनुपयोग इत्यभिप्रायः। अकृत्यान् भेददण्डाभ्यां लभेत। अकृत्यान् प्रति भेदनसाधनेषु परदोषप्रदर्शनस्य मुख्यत्वादाह — परदोषान् दर्शयेच्च बोधयेच्च॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
चतुर्दशोऽध्यायः परविषये कृत्याकृत्यपक्षोपग्रहः॥

११. प्रक. मन्त्राधिकारः ।

कृतस्वपक्षपरपक्षोपग्रहः कार्यारम्भांश्चिन्तयेत् । मन्त्रपूर्वाः सर्वारम्भाः ।

तदुद्देशः संवृतः कथानामनिःस्रावी पक्षिभिरप्यनालोक्यः स्यात् । श्रूयते हि शुकशारिकाभिर्मन्त्रो भिन्नः श्वभिरन्यैश्च तिर्यग्योनिभिः । तस्मान्मन्त्रोद्देशमनायुक्तो नोपगच्छेत् । उच्छिद्येत मन्त्रभेदी ।

मन्त्रभेदो हि दूतामात्यस्वामिनामिङ्गिताकाराभ्याम् । इङ्गितमन्यथावृत्तिः । आकृतिग्रहणमाकारः ।

मन्त्राधिकार इति सूत्रम् । कर्मणामारम्भोपायादिकार्यनिरूपणं मन्त्रः, स इहाधिक्रियत इत्यर्थः । सर्वोपधाशुद्धा मन्त्रिणः कर्तव्या इत्युक्तम् । मन्त्रस्वरूपं तु नोक्तम् । तदिहोच्यत इति सम्बन्धः ।

स्वविषये परविषये च कृत्याकृत्यानां स्वानुकूलीकरणानन्तरं विजिगीषुणा स्वविषये दुर्गादीनां परविषये सन्धिविग्रहादीनां च कर्मणाम् आरम्भाः विमृश्य राज्ञा निर्धारयितव्या इत्याह — **कृते**त्यादि । चिन्तयेत् मन्त्रयेत् । चिन्तने हेतुमाह — **मन्त्रपूर्वाः सर्वारम्भा** इति । प्रथमं मन्त्रः तत आरम्भ इत्येष क्रमः कर्मसमृद्धिफलो लोके नियतो यस्मात् तस्माच्चिन्तयेदित्यभिप्रायः ।

मन्त्रदेशमाह — **तदि**त्यादि । तदुद्देशः मन्त्रयोग्यो देशः, संवृतः सर्वत आवृतः । कथानां वचनानाम् अनिस्स्रावी निस्स्रावो बहिर्निःष्यन्दः तद्वान् न भवतीत्यनिःस्रावी, अन्तः कथ्यमानं बहिःस्थितैर्यथा न श्रूयेत तथा सन्निवेशित इत्यर्थः । पक्षिभिरपि अनालोक्यः अदृश्यश्च स्यात् । कुत इत्यत आह—**श्रूयते ही**त्यादि । भिन्नः प्रकाशितः । **तस्मा**दित्यादि । अनायुक्तः राज्ञा मन्त्रकर्मणि अनियुक्तः । मन्त्रभेदने दण्डमाह — **उच्छिद्येते**ति । उच्छेदनमुन्मूलनम् ।

विनैव वचनमायुक्तानामिङ्गिताकाराभ्यामपि मन्त्रभेदो भवतीत्याह— **मन्त्रभेदो ही**त्यादि । अन्यथावृत्तिः स्वाभाविकचेष्टितविलक्षणं चेष्टितम् । **आकृतिग्रहणम्** आकारः आकृतिः अङ्गसंस्थानं तद्रूपं ग्रहणं भावज्ञानसाधनं स्वाभाविकाकृतिविलक्षणो मुखमालिन्यादिराकृतिविशेष इत्यर्थः, स आकारः आकारशब्दवाच्यः ।

तस्य संवरणम् आयुक्तपुरुषरक्षणमा कार्यकालादिति । तेषां हि प्रमादमदसुप्तप्रलापकामादिरुत्सेकः प्रच्छन्नोऽवमतो वा मन्त्रं भिनत्ति । तस्माद् रक्षेन्मन्त्रम् ।

मन्त्रभेदो ह्ययोगक्षेमकरो राज्ञस्तदायुक्तपुरुषाणां च । तस्माद् गुह्यमेको मन्त्रयेतेति भारद्वाजः । मन्त्रिणामपि हि मन्त्रिणो भवन्ति । तेषामप्यन्ये । सैषा मन्त्रिपरम्परा मन्त्रं भिनत्ति ।

तस्मान्नास्य परे विद्युः कर्म किञ्चिच्चिकीर्षितम् ।
आरब्धारस्तु जानीयुरारब्धं कृतमेव वा ॥

तस्येति । तस्य संवरणम् इङ्गिताकारयोर्गोपनं, स च तच्च तदितीह 'नपुंसकमनपुंसकेने'ति नपुंसकशेष एकवद्भावश्च । आयुक्तपुरुषरक्षणम् आयुक्तानां पुरुषाणां मन्त्राधिकृतानां दूतमन्त्रिप्रभृतीनां मन्त्रभेदस्थानेभ्यो रक्षणं च, आ कार्यकालात् कार्यसिद्धिकालमभिव्याप्य, कर्तव्यमिति शेषः । मन्त्रभेदस्थानं प्रपञ्चयति — तेषां हीति । तेषाम् आयुक्तानाम् । प्रमादमदसुप्तप्रलापकामादिः प्रमादः कार्यान्तरवैयग्र्यप्रभवमनवधानं मदो मद्यपानादिजश्चित्तविकारः सुप्तप्रलापः स्वप्नालापः कामो विषयतृष्णा एते आद्यो यस्य दोषसमुदायस्य सः, उत्सेकः गर्वः, प्रच्छन्नः कुड्यान्तर्गतः श्रोता, अवमतः जडोऽयमित्यवज्ञातः, वाशब्दः समुच्चये, मन्त्रं भिनत्ति रहसि विमृश्य निर्णीतमर्थं बहिरुद्गिरति । तस्मादिति । तस्मात् प्रमादादेरवमतपर्यन्ताद् वर्गात्, मन्त्रं रक्षेत् ।

मन्त्रभेदो हीत्यादि । अयोगक्षेमकरः योगक्षेमविघातकः । गुह्यं गोप्यमर्थम् । एकः मन्त्रिणापि द्वितीयेन विनाभूतः । भारद्वाजपक्षस्य समर्थकमाह — मन्त्रिणामपीत्यादि । मन्त्रिपरम्परा मन्त्रिसन्तानः ।

तस्मादिति । तस्मात् मन्त्रभेदप्रसङ्गात्, अस्य विजिगीषोः, चिकीर्षितं कर्तुमिष्टं, कर्म, परे अन्ये, न विद्युः, किन्तु आरब्धारः कर्मानुष्ठानोपक्रमकर्तारः, जानीयुः । तेऽपि कदा जानीयुः, आरब्धं जानीयुः आरम्भानन्तरमनुमिनुयुः, आरम्भमात्रेण कर्मणः कृत्स्ना गतिरनुमातुं शक्या चेत् । यदि न शक्या तेऽप्या निष्पत्तेर्न जानीयुरित्यभिप्रायेणाह — कृतमेव वेति ॥

---

१. न्ययो' ख. पाठः. २. 'न्ति । सै' ग. पाठः.

नैकस्य मन्त्रसिद्धिरस्तीति विशालाक्षः। प्रत्यक्षपरोक्षानुमेया हि राजवृत्तिः। अनुपलब्धस्य ज्ञानमुपलब्धस्य निश्चयबलाधानमर्थद्वैधस्य संशयच्छेदनमेकदेशदृष्टस्य शेषोपलब्धिरिति मन्त्रिसाध्यमेतत्। तस्माद् बुद्धिवृद्धैः सार्धमासीत मन्त्रम्।

न कञ्चिदवमन्येत सर्वस्य शृणुयान्मतम्।
बालस्याप्यर्थवद् वाक्यमुपयुञ्जीत पण्डितः॥

एतन्मन्त्रज्ञानं नैतन्मन्त्ररक्षणमिति पाराशराः। यदस्य कार्यमभिप्रेतं तत्प्रतिरूपकं मन्त्रिणः पृच्छेत्—कार्यमिदमेवमासीदेवं वा यदि भवेत् तत् कथं कर्तव्यमिति। ते यथा ब्रूयुः तत् कुर्यात्। एवं मन्त्रोपलब्धिः संवृतिश्च भवतीति।

तदिदं भारद्वाजमतमाक्षिप्य विशालाक्षः प्रत्यवतिष्ठत इत्याह—**नैकस्येत्यादि**। प्रत्यक्षपरोक्षेत्यादिवाक्येन राजकर्मणः सर्वस्य सहायसापेक्षत्वं मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्तं स्मारयति। अज्ञातस्य ज्ञानं, ज्ञातस्य निश्चयेन दृढीकरणम्, इदमदो वेत्यर्थयोर्द्विधाभवने सन्देहनिवर्तनम्, अंशेनोपलब्धस्यांशान्तरानुमितिरित्येवञ्जातीयं कार्यं मन्त्रिसाध्यमित्याह— **अनुपलब्धस्येत्यादिना**। **तस्मादिति**। तस्माद् राजवृत्तेः सहायसापेक्षत्वनियमात्, **बुद्धिवृद्धैः** बुद्धिप्रशस्तैः सार्धं, मन्त्रम् आसीत मन्त्रमुद्दिश्यासीत। मन्त्रशब्दस्य भावार्थत्वाद्वा 'अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वक्तव्यम्' इति कर्मसंज्ञायां द्वितीया।

न कञ्चिदित्यादि। नावमन्येत नावजानीयात्। उपयुञ्जीत स्वीकुर्वीत॥

सोऽयं विशालाक्षपक्षो मन्त्रज्ञानानुकूलः, न तु मन्त्ररक्षणानुकूल इति वदन्तः पराशरशिष्याः प्रत्यवतिष्ठन्ते इत्याह—**एतदित्यादि**। कस्तर्हि मन्त्ररक्षणोपाय इत्याह—**यदस्येति**। अस्य यत् कार्यम्, अभिप्रेतं मन्त्रयितुमिष्टं, तत्प्रतिरूपकं तत्प्रतिबिम्बभूतं तत्समानरूपं कार्यं कथागतं पुराणगतं वापदिश्य, मन्त्रिणः पृच्छेत्। कथं पृच्छेत्, इदं कार्यम्, **एवमासीद्** यदि अनेन प्रकारेण निष्पन्नं चेत्, अथवा एवं भवेद् यदि अनेन प्रकारेण निष्पाद्यं चेत्, कथं कर्तव्यं तर्हि केन प्रकारेणानुष्ठेयमिति। ते पृष्टा मन्त्रिणः, यथा ब्रूयुः, तत् कुर्यात् अनुतिष्ठेत्। एवम् अस्मिन् मन्त्रानुष्ठानप्रकारे, मन्त्रोपलब्धिः संवृतिश्च भवति मन्त्रज्ञानं मन्त्रगोपनं च सिध्यतीति।

नेति पिशुनः। मन्त्रिणो हि व्यवहितमर्थं वृत्तमवृत्तं वा पृष्टमनादरेण ब्रुवन्ति प्रकाशयन्ति वा। स दोषः। तस्मात् कर्मसु ये येष्वभिप्रेतास्तैः सह मन्त्रयेत्। तैर्मन्त्रयमाणो हि मन्त्रबुद्धिं गुप्तिं च लभत इति।

नेति कौटल्यः। अनवस्था ह्येषा। मन्त्रिभिस्त्रिभिश्चतुर्भिर्वा सह मन्त्रयेत। मन्त्रयमाणो ह्येकेनार्थकृच्छ्रेषु निश्चयं नाधिगच्छेत्। एकश्च मन्त्री यथेष्टमनवग्रहश्चरति। द्वाभ्यां मन्त्रयमाणो द्वाभ्यां संहताभ्यामवगृह्यते, विगृहीताभ्यां विनाश्यते। त्रिषु चतुर्षु वा नैकान्तं कृच्छ्रेणोपपद्यते महादोषम्। उपपन्नं तु भवति। ततः परेषु कृच्छ्रेणार्थनिश्चयो गम्यते, मन्त्रो वा रक्ष्यते।

तदुभयमपि न सिध्यतीति वदन् नारदः प्रत्यवतिष्ठते — **नेतीति**। उभयासिद्धौ हेतुमाह — **मन्त्रिणो** इत्यादि। व्यवहितं रूपान्तरावच्छादितस्वरूपम्। अनादरेण ब्रुवन्ति अनास्थया कथयन्ति नतु पर्यालोच्य कथयन्ति, प्रकाशयन्ति वा भिन्दन्ति च, अस्मास्वविश्वस्तोऽयं राजास्मदनुष्ठेयमप्यर्थमस्मासु न प्रकाशयतीति कोपादिति भावः। **तस्मादिति**। तस्माद् यथोक्तदोषप्रसङ्गात्, ये येषु कर्मसु अभिप्रेता मन्त्रणानुष्ठाननिपुणतया विश्वस्ततया चाभिमताः, तैः सह मन्त्रयेत्। तथा मन्त्रणे गुणमाह—**तैरित्यादि**।

इदमपि मतमयुक्तमित्याह — **नेतीति**। कुत इत्यत्राह — **अनवस्थेति**। हि यतः एषा अनवस्था यथोक्ताभ्युपगमोऽनवस्थापादकः। अयं भावः—तत्तत्कर्माभिप्रेतैः सह मन्त्रणाङ्गीकारे कर्मणां बहुत्वाद् बहुप्रकारत्वाच्च मन्त्रीयत्तानवधारणप्रसङ्ग इति। स्वमतमाह — **मन्त्रिभिस्त्रिभिरित्यादि**। एकेन सह मन्त्रणे दोषमाह — **मन्त्रयमाण** इत्यादि। अर्थकृच्छ्रेषु कार्यसङ्कटेषु क्लेशनिर्धारणीयेषु कार्येष्वित्यर्थः। अनवग्रहः निष्प्रतिद्वन्द्वः। चरति वक्ति अनुतिष्ठति च। द्वाभ्यां सह मन्त्रणे दोषमाह — **द्वाभ्यामित्यादि**। संहताभ्याम् अवगृह्यते एकमताभ्यां सच्यां स्ववशं नीयते राजा, विगृहीताभ्यां विनाश्यते परस्परविपरीतमताभ्यां सद्भ्यां कार्यहानिं प्राप्यते। त्रिचतुरमन्त्रिपक्षे विशेषमाह — **त्रिष्विति**। त्रिषु चतुर्षु वा मन्त्रसहायेषु,

१. 'ष्टा अना', २. 'ह्यते। तत् त्रि', ३. 'पः उपपन्नस्तु भ' ग. पाठः.

देशकालकार्यवशेन त्वेकेन सह द्वाभ्यामेको वा यथासामर्थ्यं मन्त्रयेत ।

कर्मणामारम्भोपायः पुरुषद्रव्यसम्पद् देशकालविभागः विनिपातप्रतीकारः कार्यसिद्धिरिति पञ्चाङ्गो मन्त्रः । तानेकैकशः पृच्छेत् समस्तांश्च । हेतुभिश्चैषां मतिप्रविवेकान् विद्यात् । अवाप्तार्थः कालं नातिक्रामयेत् । न दीर्घकालं मन्त्रयेत । न च तेषां पक्ष्यैर्येषाम् अपकुर्यात् ।

महान् दोषोऽनर्थो येन तत महादोषं परमानर्थहेतुभूतं राजावग्रहणादिकं, नैकान्तं नियतं न भवति, कृच्छ्रेण उपपद्यते कदाचिदुत्पाद्यमानमपि महता यत्नेनोत्पद्यते नाल्पेन यत्नेनेत्यर्थः । महादोष इति पाठे एकद्व्यमन्त्रिपक्षोक्तो महान् दोष इत्यर्थः कर्मधारयेण लभ्यः । उपपन्नं तु भवति मन्त्रनिश्चयेन मन्त्ररक्षणेन च उपपत्तियुक्तं भवति, अर्थाच्चिन्त्यमानं कर्म । पञ्चादिषु मन्त्रसहायेषु को दोषस्तत्राह — तत इत्यादि । ततः परेषु चतुर्भ्योऽधिकेषु पञ्चादिषु ।

देशकालकार्यापेक्षया कदाचिदेकेन द्वाभ्यां च सह मन्त्रणम्, असहायस्य सतो वा मन्त्रणमिष्यत इत्याह — देशेत्यादि । यथासामर्थ्यम् आत्मात्ममन्त्रिसामर्थ्यानतिक्रमेण ।

अथ मन्त्रस्य पञ्चाङ्गत्वं व्युत्पादयति — कर्मणामिति । कर्मणाम् आरम्भोपायः स्वविषये परिखाप्राकारादिरूपदुर्गादिसृष्टिलक्षणानां परविषये सन्धिविग्रहादिनिमित्तदूतसम्प्रेषणादिलक्षणानां च कार्याणामुपक्रमोपायः, पुरुषद्रव्यसम्पत् स्वविषये पुरुषाः दुर्गादिनिर्माणकुशलास्तक्षायस्कारादयः द्रव्याणि पृथुच्छदादिदारव्यवृक्षादीनि परविषये पुरुषाः सन्ध्याद्यनुष्ठानकुशलाः दूतसेनापतिप्रभृतयः द्रव्याणि रत्नस्वर्णादीनि, तेषां सम्पद् गुणवत्ता समृद्धिश्च, देशकालविभागः देशः स्वविषये दुर्गाद्यारम्भे जनपदमध्यान्तादिरनूपादिश्च कालः सुभिक्षदुर्भिक्षादिर्वर्षादिश्च परविषये सन्ध्यादौ देशः महाफलोर्वरादिः कालः अभियोगानभियोगाद्यवस्था तेषां सर्वेषां विभागः विवेकः विनिपातप्रतीकारः विनिपातो विघ्नो दुर्गनिर्माणादिविषयः सन्धिपुरुषप्रेषणादिविषयश्च तस्य प्रतीकारः प्रशमनं, कार्यसिद्धिः कर्मफलं क्षयः स्थानं वृद्धिरित्येवं त्रिरूपम् । इति पञ्चाङ्गो मन्त्रः । मन्त्रविषयमर्थं मन्त्रिष्वेकैक-

मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवाः ।
षोडशेति बार्हस्पत्याः ।
विंशतिम् इत्यौशनसाः ।
यथासामर्थ्यम् इति कौटल्यः ।

ते ह्यस्य स्वपक्षं परपक्षं च चिन्तयेयुः । अकृतारम्भमारब्धानुष्ठानमनुष्ठितविशेषं नियोगसम्पदं च कर्मणां कुर्युः । आसन्नैः सह कार्याणि पश्येत्, अनासन्नैः सह पत्रसम्प्रेषणेन मन्त्रयेत । इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रम् । स तच्चक्षुः । तस्मादिमं द्व्यक्षं सहस्राक्षमाहुः ।

माहूयान्यासन्निधाने पृच्छेत् — कस्तेऽत्राभिप्राय इति, संमेल्य च सभायां तान् सर्वान् 'कोऽत्र वोऽभिप्राय' इति पृच्छेदित्याह — **तानेकैकश इत्यादि । हेतुभिरित्यादि** । एषां मतिप्रविवेकान् अभिप्रायविभागान्, हेतुभिः विद्यात् कारणैः पर्यालोचयेद् अर्थनिश्चयार्थम् । अवाप्तार्थः निश्चितार्थः । अपकार्यजनबन्धुभिः सह न मन्त्रयेतेत्याह — **न च तेषामित्यादि** ।

अथ राजनिर्णीतकार्यजातानुष्ठान-राजनिर्णेतव्यनवनवकार्यजातोल्लेखनादिसर्वराष्ट्रकर्मनिर्वहणप्रधाना मन्त्रिपरिषन्नाम काचिद् राज्ञो भवति । तस्यां राज्ञा कति मन्त्रिणः पारिषदाः कर्तव्या इत्याकाङ्क्षायां द्वादशेति मनुशिष्याणां षोडशेति बार्हस्पत्यानां विंशतिरित्यौशनसानां कार्यानुष्ठातृपुरुषसामर्थ्यानुगुण्येन यथोक्तसङ्ख्यास्तन्न्यूनसङ्ख्यास्तदधिकसङ्ख्या वेत्यात्मनश्च मतमित्याह— **मन्त्रिपरिषदमित्यादि** ।

पारिषदानां व्यापारमाह — **ते हीत्यादि** । स्वपक्षं परपक्षं च चिन्तयेयुः स्वपक्षगतं परपक्षगतं च कार्यं समीक्षापूर्वमनुतिष्ठेयुः । कर्मणां मध्ये अकृतारम्भम् अकृतस्य कर्मणोऽनुष्ठानोपक्रमम्, आरब्धानुष्ठानम् उपक्रान्तस्य परिसमापनम्, अनुष्ठितविशेषं परिसमापितस्य संस्कारं परिनिष्ठितप्रासादादिशोभार्थसुधालेपचित्रार्पणादिजातीयं, नियोगसम्पदं नियोगाः तत्तत्कर्मकराधिकाराः तेषां सम्पदं गुणवत्तां बाहुल्यं च, कुर्युः । मन्त्रिपरिषत्सभ्येष्वासन्नानासन्नेषु विषये राजा कथं व्यवहरेदित्येतदाह — **आसन्नैरित्यादि** पत्रस प्रेषणेन लिखितसकलार्थस्य लेखस्य प्रेषणेन । इत्थं बहुमन्त्रिबुद्धिसाहाय्येनार्थदर्शनस्य महाफलतयात्मसमर्थितस्य स्तुत्यर्थं सहस्राक्षपदनिर्वचन

आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदं चाहूय ब्रूयात् । तत्र यद् भूयिष्ठाः कार्यसिद्धिकरं वा ब्रूयुस्तत् कुर्यात् । कुर्वतश्च—

नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च ।
गूहेत् कूर्म इवाङ्गानि यत् स्याद् विवृतमात्मनः ॥
यथा ह्यश्रोत्रियः श्राद्धं न सतां भोक्तुमर्हति ।
एवमश्रुतशास्त्रार्थो न मन्त्रं श्रोतुमर्हति ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः ॥

भङ्ग्यार्थवादमाह—**इन्द्रस्य हीति**। स इन्द्रः, तच्चक्षुः तद् ऋषिसहस्रं मन्त्रिपरिषदात्मकं चक्षुः कार्यतत्त्वदर्शनसाधनं यस्य सः । द्व्यक्षमिति विशेषणेन वस्तुतः पुरुषान्तरवद् द्विनयन एवासौ सहस्राक्ष इत्युपचर्यत इति दर्शितम् ।

प्राणापायशङ्कावहे कार्ये पूर्वोक्तान् मन्त्रिणः मन्त्रिपरिषदं चेमां मेलयित्वा तत्त्वं पृच्छेदित्याह— **आत्ययिक** इत्यादि। तत्र भूयिष्ठा बहुतमाः, यद् ब्रूयुः, तत् कुर्याद् अनुतिष्ठेत्, अथवा यत् कार्यसिद्धिकरं ब्रूयुः अर्थाद् अभूयिष्ठा अपि, तत् कुर्यात् । कुर्वतश्चेति वक्ष्यमाणश्लोकान्वयि ।

नास्येति, यथा ह्यश्रोत्रिय इति च श्लोकावतिरोहितार्थौ ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
पञ्चदशोऽध्यायः मन्त्राधिकारः ॥

१२. प्रक. दूतप्रणिधिः।

उद्धृतमन्त्रो दूतप्रणिधिः । अमात्यसम्पदोपेतो निसृष्टार्थः, पादगुणहीनः परिमितार्थः, अर्धगुणहीनः शासनहरः ।

सुप्रतिविहितयानवाहनपुरुषपरिवापः प्रतिष्ठेत । शासनमेवं वाच्यः परः, स वक्ष्यत्येवं, तस्येदं प्रतिवाक्यम्, एवमतिसन्धातव्यम् इत्यधीयानो गच्छेत्। अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेत्। अनीकस्थानयुद्धप्रतिग्रहापसारभूमीरात्मनः परस्य चावेक्षेत । दुर्गराष्ट्रप्रमाणं सारवृत्तिगुप्तिच्छिद्राणि चोपलभेत ।पराधिष्ठानमनुज्ञातः प्रवि-

---

दूतप्रणिधिरिति सूत्रम् । दूता नाम निसृष्टार्थाः परिमितार्थाः शासनहरा इति त्रिप्रकाराः, तेषां प्रणिधानं परेषु सन्देशदानपूर्वं प्रेषणमिहाभिधीयत इति सूत्रार्थः ।

उद्धृतेति । दूतप्रणिधिः दूतस्य प्रणिधानम्, उद्धृतमन्त्रः उद्धृतः निर्धारितार्थः मन्त्रः यस्मिन् स तथाभूतः, भवति । मन्त्रार्थनिर्धारणोत्तरकालकार्यं दूतसम्प्रेषणमित्यर्थः । एवञ्च मन्त्रकथानन्तरं दूतसम्प्रेषणप्रस्तावः सङ्गत इत्यभिप्रायः । पूर्वोक्तजानपदत्वाद्यमात्यसम्पद्युक्तो दूतो निसृष्टार्थः, तस्मात् पादगुणप्रत्यवरः परिमितार्थः, अर्धगुणप्रत्यवरः शासनहरः इत्याह— **अमात्यसम्पदे**त्यादि ।

दूतकरणीयमाह — **सुप्रतिविहिते**ति । सुप्रतिविहितं सम्यक् सज्जीकृतं यानं शिबिकान्दोलिकादि वाहनमश्वादि पुरुषाः शुश्रूषादिकर्मकराः परिवापः शय्यास्तरणगोणिकादिश्च यस्य सः सुप्रतिविहितयानवाहनपुरुषपरिवापः, तथाभूतः सन् प्रतिष्ठेत, दूतः शत्रुविषयं प्रति । शत्रुः स्वामिसन्देशमित्थं बोधनीयः, बोधितः स एवं वदिष्यति, तथा वदत ईदृशं प्रत्युत्तरं वक्तव्यं, शत्रोरतिसन्धानमित्थं कर्तव्यमित्येवञ्जातीयमर्थं पुनःपुनरनुसन्दधानो गच्छेदित्याह — **शासनमि**त्यादि । **अटवी**ति । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च प्रतिसंसर्गं सख्यं गच्छेत् । दूत्यायात्मप्रयाणं तेभ्यो निवेद्य वा गच्छेदित्यर्थः । परविषयं गतस्य कर्माह—**अनीके**ति । आत्मनः, परस्य च अनीकस्थानयुद्धप्रतिग्रहापसारभूमीः अनीकस्य सैन्यस्य निवेशयोग्यभूमिं युद्धस्वीकारार्हभूमिम् अपसरणानुकूलभूमिं च, अवेक्षेत जानीयात् । दुर्गराष्ट्रप्रमाणं दुर्गराष्ट्रयोरियत्तां, सारवृत्तिगुप्तिच्छि-

शेत् । शासनं च यथोक्तं ब्रूयात् प्राणाबाधेऽपि दृष्टे । परस्य वाचि वक्त्रे दृष्ट्यां च प्रसादं,वाक्यपूजनमिष्टपरिप्रश्नं गुणकथासङ्गमासन्नमासनं सत्कारमिष्टेषु स्मरणं विश्वासगमनं च लक्षयेत् तुष्टस्य, विपरीतमतुष्टस्य । तं ब्रूयात् — दूतमुखा वै राजानस्त्वं चान्ये च । तस्मादुद्यतेष्वपि शस्त्रेषु यथोक्तं वक्तारः । तेषामन्तावसायिनोऽप्यवध्याः, किमङ्ग पुनर्ब्राह्मणाः । परस्यैतद् वाक्यमेष दूतधर्मः इति ।

वसेदविसृष्टः, पूजया नोत्सिक्तः, परेषु बलित्वं न मन्येत, वाक्यमनिष्टं सहेत, स्त्रियः पानं च वर्जयेत्, एकः शयीत, सुप्तमत्तयोर्हि

द्राणि सारं धान्यस्वर्णाद्युत्पत्तिं वृत्तिं जनानां जीविकां गुप्तिं रक्षां छिद्रं शत्र्वाक्रमणद्वारं च, उपलभेत । सारवृत्तिशब्दस्थाने सारवत्ताशब्दपाठः कामन्दकेन नूनं दृष्टः । अत एव स आह — "सारवत्तां च राष्ट्रस्य दुर्गं तद्गुप्तिमेव च । छिद्रं च शत्रोर्जानीयाद्" इति । पराधिष्ठानं शत्रुगृहम्, अनुज्ञातः प्रविशेत् परानुज्ञानानन्तरं प्रविशेत् । शासनं स्वामिसन्देशं च, प्राणाबाधेऽपि दृष्टे यथोक्तं ब्रूयात् प्राणभयेऽप्युपस्थिते स्वस्वामिसन्दिष्टप्रकारं कथयेत्, नतु स्वप्राणरक्षार्थमप्यन्यथा कथयेदित्यर्थः । परतुष्टातुष्टत्वस्य तदनुगुणव्यवहारार्थं लक्षणीयत्वादाह — परस्येत्यादि । वाग्वदनदर्शनेषु प्रसन्नत्वं, दूतोच्यमानवाक्यादरः, स्वामिगतसर्वकुशलप्रश्नः, स्वामिगुणप्रस्तावेऽवधानदानं, दूतान्तिकोपवेशनं, दूतविषयो बहुमानः, स्वादुभोग्यफलादिसंविभागे दूतस्मरणं, दूतं प्रति विश्वासोपगम इत्येतैश्चिह्नैः शत्रोस्तुष्टत्वं विपरीतैरतुष्टत्वं च विदित्वा व्यवहरेदित्यभिप्रायः । तमित्यादि । तं ब्रूयात् अतुष्टं परं वक्ष्यमाणरीत्या ब्रूयात् । दूतमुखाः दूतो मुखं स्वाभिप्रायनिवेदनद्वारं येषां ते । तस्मात् दूतानां स्वस्वामिवदनस्थानीयत्वात् । उद्यतेष्वपि वधार्थमुद्धृतेष्वपि सत्सु । वक्तारः अर्थाद् दूताः । तेषां दूतानां मध्ये । अन्तावसायिनोऽपि चण्डाला अपि । किमङ्ग पुनर्ब्राह्मणाः ब्राह्मणा अवध्या इति किमु वक्तव्यमित्यर्थः ।

वसेदिति । अविसृष्टः वसेत् यावद्विसर्जनम् । पूजया नोत्सिक्तः गर्वितो न भवेत् । परेषु बलित्वं न मन्येत अहं बलवानिति मतिं शत्रुसकाशे

१. 'खेन रा', २. 'न्तेवासिनो' ग. पाठः.

भावज्ञानं दृष्टम् । कृत्यपक्षोपजापमकृत्यपक्षे गूढप्रणिधानं रागापरागौ भर्तरि रन्ध्रं च प्रकृतीनां तापसवैदेहकव्यञ्जनाभ्यामुपलभेत। तयोरन्ते-वासिभिश्चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा, तेषामसम्भाषायां याचकमत्तोन्मत्तसुप्तप्रलापैः पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा चारमुपलभेत । उपलब्धस्योपजापमुपेयात् । परेण चोक्तः स्वासां प्रकृतीनां परिमाणं नाचक्षीत । सर्वं वेद भवानिति ब्रूयात्, कार्यसिद्धिकरं वा ।

न प्रकाशयेत् । अनिष्टं वाक्यं परोक्तं सहेत । स्त्रियः, पानं मद्यसेवनं च वर्जयेत् । **एकः** असहायः शयीत । पानवर्जनैकशयनयोः कारणमाह—**हि** यस्मात्, सुप्तमत्तयोः, भावज्ञानं स्वप्नप्रलापमदप्रलापाभ्यां **हृदयवेदनं दृष्टं** प्रत्यक्षानुभूतम् । **कृत्यपक्षेति** । कृत्यपक्षोपजापं कृत्यवर्गस्य भेदनम्, **अकृत्य-पक्षे, गूढ**प्रणिधानं तीक्ष्णरसदसामादिप्रयोगं, प्रकृतीनाम् अमात्यादीनां भर्तरि रागापरागौ रन्ध्रं च द्वेषस्थानं च, तापसवैदेहकव्यञ्जनाभ्यां संस्थाभ्याम्, उपलभेत । **तयोरिति** । तयोरन्तेवासिभिः तापसवैदेहकयोः शिष्यैः, चिकित्सकपाषण्डव्यञ्जनोभयवेतनैर्वा भिषग्वेषैः पाषण्डवेषैः उभयवेतनैश्च पूर्वोक्तैर्वा, चारम् उपलभेत परचर्यां विद्यात् । तेषामसम्भाषायां तापसव्यञ्जनादीनां सम्भाषणासौकर्ये, याचकमत्तोन्मत्तसुप्तप्रलापैः तेषां भैक्षकालभवैः प्रलापैः मत्तसाधारणैरुन्मत्तसाधारणैः सुप्तसाधारणैश्च प्रलापैः, पुण्यस्थानदेवगृहचित्रलेख्यसंज्ञाभिर्वा पुण्यस्थानेषु नदीतीरजनमण्डपमुनिगृहादिषु देवगृहेषु च गूढपुरुषान्योन्यसम्पातयोग्येषु भित्त्यर्पिताभिरालेख्यविशेषसंज्ञाभिरक्षरविशेषसंज्ञाभिर्वा, चारमुपलभेत । उपलब्धस्य परवृत्तस्य, उपजापम् उपेयाद् उपलब्धपरवृत्तानुरूपं भेदोपायं प्रयुञ्जीत, यथापेक्षम् । परेण, उक्तश्च पृष्टश्च, स्वासाम् आत्मीयानां प्रकृतीनां स्वाम्यमात्यादीनां परिमाणम् इयत्तां सार फल्गुतां वा, नाचक्षीत । तत्र किमुत्तरं प्रतिपद्येत, तत्राह—**सर्वमिति** । भवान् सर्वं वेद चारचक्षुषा भवता न किञ्चिदत्राविदितमस्तीत्यर्थः, इति ब्रूयात् स्तुयात् । यदि स्तुत्या परो न परितुष्यति तदा किं कर्तव्यं तत्राह — **कार्य-सिद्धिकरं वा** ब्रूयात् परिमाणं यावद् उच्यमानं दूतकार्यसिद्धिकरं स्यात्, तावद् ब्रूयात् न कृत्स्नमित्यर्थः ।

---

१. 'हविचि' ग. पाठः.

कार्यस्य सिद्धावुपरुध्यमानस्तर्कयेत् किं भर्तुर्मे व्यसनमासन्नं पश्यन्, स्वं वा व्यसनं प्रतिकर्तुकामः, पार्ष्णिग्राहासारावन्तःकोपमाटविकं वा समुत्थापयितुकामः, मित्रमाक्रन्दं वा व्यापादयितुकामः, स्वं वा परतो विग्रहमन्तःकोपमाटविकं वा प्रतिकर्तुकामः, संसिद्धं मे भर्तुर्यात्राकालमभिहन्तुकामः, सस्यकुप्यपण्यसङ्ग्रहं दुर्गकर्म बलसमुत्थानं वा कर्तुकामः, स्वसैन्यानां वा व्यायामदेशकालावाकाङ्क्षमाणः, परिभवप्रम-

यदि परो दूतोपक्षिप्तं सन्ध्यादिकार्यमुचितकालेऽप्यसाधयन् 'स्थीयतां तावदिह त्वया कञ्चित् कालम् । अभिमतं ते करिष्यामी'त्युक्त्वा दूतं स्वपुरे चिरमुपरुन्धे, तदा दूतः किं कुर्यात्, तत्राह — **कार्यस्ये**त्यादि । कार्यस्यासिद्धाविति पाठे परः कार्यं च दूतस्य न साधयति, प्रतिजिगामिषुं च दूतं न विसर्जयतीति रीत्यावतरणिका बोद्धव्या । तर्कयेद् उपरोधकारणं विकल्प्य चिन्तयेत् । तर्कणप्रकाराः **'किं भर्तुरि'**त्यादयः । परो, मे भर्तुः स्वामिनः, व्यसनं प्रकृतिगतम्, आसन्नं सन्निकृष्टं पश्यन्, माम् उपरुणद्धि किं न विसर्जयति किम् । एवमुत्तरत्र प्रथमान्तेषु क्रिया योज्या । अथवा स्वं व्यसनं प्रतिकर्तुकामः प्रशमयितुमिच्छुः । अथवा पार्ष्णिग्राहासारौ पार्ष्णिग्राहः शत्रुमित्रभूतः स्वामिशत्रुः आसारः शत्रुमित्रमित्रं तौ समुत्थापयितुकामः स्वामिद्रोहार्थमुद्योजयितुकामः । अथवा अन्तःकोपं मन्त्र्यादिप्रकोपम् उपजापादिनोत्पादयितुकामः । अथवा आटविकं युद्धार्थमुद्योजयितुकामः, अथवा मित्रं स्वामिनः पुरस्तान्मित्रम्, आक्रन्दं स्वामिनः पृष्ठतोमित्रं वा व्यापादयितुकामः हन्तुकामः । अथवा स्वं परतो विग्रहं परेण विग्रहमुपस्थितं स्वम् अन्तःकोपं मन्त्र्यादिप्रकोपं, स्वम् आटविकं कुपितं, प्रतिकर्तुकामः । अथवा संसिद्धं सुकरतयोपनतं, मे भर्तुः यात्राकालं शत्रवभियानकालम् अभिहन्तुकामः । सस्यकुप्यपण्यसंग्रहं कर्तुकामः आरब्धे युद्धे सस्यादिपरिक्षयो मा मां बाधिष्टेति । अथवा दुर्गकर्म भिन्नस्फुटितदुर्गसंस्कारं कर्तुकामः । अथवा बलसमुत्थानं सैन्यवृद्धिं सैन्यस्य तत इतो विप्रकीर्णस्य समाहरणं वा कर्तुकामः । अथवा स्वसैन्यानां व्यायामदेशकालौ आकाङ्क्षमाणः शत्रुषु विक्रमणयोग्यौ देशकालावुदीक्षमाणः, मामुपरुणद्धि किम् । अथवा परिभवप्रमदाभ्यां परि-

१. 'माक्रन्दाभ्यां वा' ख. पाठः. २. 'द्दा' ग. पाठः.

दाभ्यां वा, संसर्गानुबन्धार्थी वा मामुपरुणद्धीति। ज्ञात्वा वसेदपसरेद् वा। प्रयोजनमिष्टमवेक्षेत वा। शासनमनिष्टमुक्त्वा बन्धवधभयादविसृष्टोऽप्यपगच्छेद् अन्यथा नियम्येत।

प्रेषणं सन्धिपालत्वं प्रतापो मित्रसङ्ग्रहः।
उपजापः सुहृद्भेदो दण्डगूढातिसारणम्॥

बन्धुरत्नापहरणं चारज्ञानं पराक्रमः।
समाधिमोक्षो दूतस्य कर्म योगस्य चाश्रयः॥

भवेन मन्त्र्याद्यन्तःकोपोत्पादनादिजनितेनानादरेण, प्रमदेन सहसंवासप्रीत्या च मामुपरुणद्धि किम्। अथवा संसर्गानुबन्धार्थी संसर्गो विवाहादिनिमित्तः सम्बन्धः तदर्थी अनुबन्धो दोषोत्पादः तदर्थी च, माम् उपरुणद्धि किम्। इति एवं रीत्या तर्कयेदिति सम्बन्धः। **ज्ञात्वेति**। ज्ञात्वा तर्कणपूर्वं कारणं निश्चित्य, वसेत् स्नेहनिमित्तमुपरोधनमिति निश्चये सति, अपसरेद् वा अविसृष्टोऽपि अन्यथा निश्चये सति। अथवा इष्टं प्रयोजनं स्वाम्यर्थम् अवेक्षेत स्वाम्यर्थसिद्धिमवेक्ष्य वसेत् शत्रुपुर एव वसन् स्वामिनं प्रति गूढसन्देशप्रेषणेन शत्रुदुरभिसन्धीनां प्रतिविधानं कारयेदित्यभिप्रायः। **शासनमिति**। अनिष्टं शासनं शत्रुद्विष्टं स्वामिसन्देशम्, उक्त्वा, दूतः अविसृष्टोऽपि शत्रुणा, बन्धवधभयाद् आत्मनो बन्धनं वधं वा शत्रुः करिष्यतीति शङ्कया, अपगच्छेत्। अन्यथा अनपगमने नियम्येत नियन्त्र्येत शत्रुणा।

श्लोकद्वयेन दूतकर्म संगृह्णाति—**प्रेषणमिति, बन्धुरत्नेति** च। प्रेषणं शत्रुदेशगतागतं शत्रौ स्वामिशासननिवेदनार्थं स्वामिनि शत्रुदेशवृत्तान्तस्य स्वावगतस्य निवेदनार्थं च, सन्धिपालत्वं कृतसन्धिरक्षणं, प्रतापः यथापेक्षं शत्रौ विक्रमणं, मित्रसंग्रहः, उपजापः कृत्यभेदनं, सुहृद्भेदः, दण्डगूढातिसारणं दण्डस्य सेनायाः गूढानां तीक्ष्णरसदादीनां चाक्रामणम्। गूढदण्डेत्यपि पाठः। बन्धुरत्नापहरणं बन्धूनां रत्नानां च स्वीकरणं, चारज्ञानं चाराणां गूढपुरुषाणामनुष्ठानसौष्ठवपरिज्ञानं, पराक्रमः अवसरे विक्रमणं, समाधिमोक्षः सन्धिविश्वासार्थमाहितः पुत्रादिः समाधिः तस्य मोचनं, योगस्य आश्रयश्च औपनिषदकोक्तस्य मारणादेः सेवनं च, दूतस्य कर्म भवति।

स्वदूतैः कारयेदेतत् परदूतांश्च रक्षयेत् ।
प्रतिदूतापसर्पाभ्यां दृश्यादृश्यैश्च रक्षिभिः ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
षोडशोऽध्यायः दूतप्रणिधिः ॥

स्वदूतैरिति । एतद् उक्तं सर्वं कर्म, स्वदूतैः कारयेत्, अर्थाद् राजा । प्रतिदूतापसर्पाभ्यां प्रतिदूतप्रतिचाराभ्यां, दृश्यादृश्यैः रक्षिभिश्च दृश्यैः स्वदेशस्थैः अदृश्यैः शत्रुविषये तत्सेवकच्छद्मभिः रक्षिपुरुषैश्च, परदूतान् रक्षयेच्च यथा परदूताः स्वदेशे मित्रसंग्रहादिकर्म न कुर्युस्तथा तच्चेष्टितानि यत्नेन गवेषयेच्चेत्यभिप्रायः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
षोडशोऽध्यायः दूतप्रणिधिः ॥

१३. प्रक. राजपुत्ररक्षणम् ।

रक्षितो राजा राज्यं रक्षत्यासन्नेभ्यः परेभ्यश्च[1] । पूर्वं दारेभ्यः पुत्रेभ्यश्च ।

दाररक्षणं निशान्तप्रणिधौ वक्ष्यामः ।

पुत्ररक्षणं — जन्मप्रभृति राजपुत्रान् रक्षेत् । कर्कटकसधर्माणो हि जनकभक्षाः राजपुत्राः ।

तेषामजातस्नेहे पितर्युपांशुदण्डः श्रेयानिति भारद्वाजः ।

नृशंसमदृष्टवधः क्षत्रविनाशश्चेति विशालाक्षः । तस्मादेकस्थानावरोधः श्रेयानिति ।

अहिभयमेतदिति पाराशराः । कुमारो हि विक्रमभयान्मां पिता

राजपुत्ररक्षणम्इति सूत्रम् । राजपुत्रेभ्यो राज्ञो रक्षणमभिधीयत इति सूत्रार्थः । पूर्वं चतुर्वर्णाश्रमतद्धर्माणां रक्षणं राज्ञा कर्तव्यमित्युक्तं, तस्य तु रक्षणं नोक्तम् । तदधुनोच्यते ।

राजा स्वबन्धुभ्यः परेभ्यश्च रक्षितः स्वप्रजास्तेभ्यो रक्षितुं प्रभवतीत्याह — **रक्षित** इत्यादि । बन्धुभ्यः केभ्यः, दारेभ्यः पुत्रेभ्यश्च, पूर्वमित्यनेन दारपुत्रा एव प्रथमं विपत्तिस्थानं राज्ञ इति दर्शयति ।

दाररक्षणमित्यादि । स्पष्टम् ।

पुत्ररक्षणमिति । उच्यत इति शेषः । **जन्मप्रभृती**त्यादि । कर्कटकसधर्माणः कुलीरसमानस्वभावाः । तमेव धर्मं जनकमारकत्वरूपमाह—**जनकभक्षा** इति । कर्कटका हि जनकं मारयन्त एव जायन्त इति प्रसिद्धिः, अत एव कुलिनं जनकमीरयन्ति नाशयन्तीति व्युत्पत्त्या ते कुलीरा उच्यन्ते ।

अत्र भारद्वाजमतमाह — **तेषा**मित्यादि । यावत् पितुः पुत्रेषु जातेषु स्नेहो नोदेति तावत् तेषां रहसि वधः प्रशस्ततर इत्यर्थः ।

निरपराधशिशुमारणमिदं महते पापाय भवति क्षत्रियकुलपरिक्षयाय चेति कृत्वा राजपुत्राणामन्तःपुरे क्वचिदवरोधनं श्रेय इति विशालाक्षो मन्यत इत्याह — **नृशंस**मित्यादि ।

एतत् सर्पसहवासवद् भयावहमिति पाराशरा मन्यन्त इत्याह — **अही**ति । भयस्थानत्वमेवोपपादयति — **कुमार** इत्यादि । विक्रमभयात्

---

१. 'छात्रेभ्य' ग. पाठः.

रुणद्धीति ज्ञात्वा तमेवाङ्के कुर्यात्। तस्मादन्तपालदुर्गे वासः श्रेयानिति।

औरभ्रकं भयमेतदिति पिशुनः । प्रत्यापत्तेर्हि तदेव कारणं ज्ञात्वान्तपालसखः स्यात्। तस्मात् स्वविषयादपकृष्टे सामन्तदुर्गे वासः श्रेयानिति ।

वत्सस्थानमेतदिति कौणपदन्तः । वत्सेनेव हि धेनुं पितरमस्य सामन्तो दुह्यात् । तस्मान्मातृबन्धुषु वासः श्रेयानिति ।

ध्वजस्थानमेतद् इति वातव्याधिः । तेन हि ध्वजेनादितिकौशिक-

स्ववधभयात् । तमेवाङ्के कुर्यात् विक्रममेवायत्नप्राप्ये समीपप्रदेशे स्वगृहे कुर्यात्। अन्तपालदुर्गे राष्ट्रसीमपालकाधिष्ठिते दुर्गे । तत्रस्थेन दूरविप्रकर्षाद् विक्रमो गृह इव न सुकर इति भावः ।

तावद्दूरस्थितादपि कुमाराद् भेतव्यमेवेति नारदो मन्यत इत्याह — **औरभ्रकमिति** । उरभ्रस्य मेषस्येदं कर्म औरभ्रम् औरभ्रमिव औरभ्रकम् । यथा मेषस्य पुरःस्थं प्रतिमेषं मूर्ध्ना जिघट्टयिषोर्दूरापसरणं पुरस्तादभिपतने शक्त्यतिशयाधायकत्वाद् भयस्थानं, तथा राजपुत्रस्य दूरान्तपालदुर्गावरोधन-मिदं पितृजिघांसोरनुबलाधानाय कल्पमानं भयस्थानं भवतीत्यभिप्रायः। भय-स्थानत्वमेव विशदयति— **प्रत्यापत्तेरि**त्यादि। प्रत्यापत्तेः पितृद्रोहप्रकृत्यनिव-र्तनात् । तदेव **कारणं** विक्रमणशङ्कारूपम्। अन्तपालसखः अन्तपालसहायः। एतेनानुबलसम्पत्तिरुक्ता । **तस्मादि**त्यादि । स्वविषयादपकृष्टे स्वजनपदाद् दूरस्थे । सामन्तदुर्गे विषयानन्तरस्य राज्ञो दुर्गे ।

तदिदं सामन्तदुर्गलक्षणं कुमारवासस्थानं गोवत्सबन्धनस्थानतुल्यम् । तं हि कुमारं गोवत्सस्थानीयं व्याजं कृत्वा धेनुस्थानीयतत्पितृसकाशात् सामन्तः स्वाभीप्सितमर्थजातं क्षीरस्थानीयं पुनःपुनर्हरेदित्यतः कारणात् कुमारस्य मातृ-बान्धवेषु निवेशनं प्रशस्ततरं कौणपदन्तो मन्यत इत्याह — **वत्से**त्यादि ।

इदं मतमुद्धवो दूषयतीत्याह — **ध्वजे**त्यादि। एतद् ध्वजस्थानं ध्वज-सादृश्यम्, अर्थात् कुमारस्य । तद् विशदयति — **तेन हीति** । तेन ध्वजेन जीविकाचिह्नेन । **आदितिकौशिकवादि**ति । नानादेवप्रतिकृतिप्रदर्शनेन भैक्ष-मर्जयन्ती या जीवति सा भिक्षुकी देवाविर्भावकत्वसादृश्याददितिरित्युच्यते कौशिको व्यालग्राही अदितिवत् कौशिकवच्च । यथाहि अदितयो देवप्रति-

वदस्य मातृबान्धवा भिक्षेरन् । तस्माद् ग्राम्यधर्मेष्वेनमवसृजेयुः । सुखोपरुद्धा हि पुत्राः पितरं नाभिद्रुह्यन्तीति ।

जीवन्मरणमेतदिति कौटल्यः । काष्ठमिव हि घुणजग्धं राजकुलमविनीतपुत्रमभियुक्तमात्रं भज्येत । तस्माद् ऋतुमत्यां महिष्याम् ऋत्विजश्चरुमैन्द्राबार्हस्पत्यं निर्वपेयुः । आपन्नसत्त्वायां कौमारभृत्यो गर्भभर्मणि प्रजने च वियतेत । प्रजातायाः पुत्रसंस्कारं पुरोहितः कुर्यात् । समर्थं तद्विदो विनयेयुः ।

कृतीः कौशिकाश्च सर्पान् ध्वजान् कृत्वान्नादिकं भिक्षन्ते, तथा मातृबान्धवाः कुमारं निमित्तं कृत्वा स्वाभीष्टमर्थं याचेरन्निति वाक्यार्थः। **तस्मा**दित्यादि तस्माद् एनं ग्राम्यधर्मेषु स्त्रीसेवादिषु अवसृजेत् यथेच्छसञ्चाराय । अवसर्गस्य फलमाह — **सुखे**त्यादि । सुखोपरुद्धाः वैषयिकानन्दयथेच्छानुभवसंविधानेनावरुद्धाः ।

स्वमतमाह — **जीव**दिति । एतद् जीवन्मरणम् इदं ग्राम्यधर्मावसर्जनं राजपुत्रस्य जीवत एव मरणं, शास्त्राद्यविनीतत्वाद् व्यसनोपहतबुद्धित्वशरीरत्वाच्च मरणतुल्यम् । यथा वम्रिचर्वितं दारु स्पृष्टमात्रमकृतभञ्जनयत्नमपि भग्नं भवति, तथा शास्त्रसदाचाराशिक्षितकुमारं राजकुलं परेण जिगीषितमात्रम् अप्रयुक्तविक्रममपि परिध्वस्तं भवतीत्याह — **काष्ठमिवे**त्यादि सर्वेष्वेषु पक्षेषु दोषदर्शनात् पुत्रगुणवत्त्वाय दृष्टादृष्टार्थाः प्रयत्ना गर्भाधानप्रकालात् प्रभृति आस्थेया इत्याह — **तस्मादि**त्यादि । ऋतुमत्याम् ऋतुः आर्तवदर्शनादिषोडशनिशात्मकः कालो गर्भाधानयोग्यः तद्वत्याम् । ऐन्द्राबार्हस्पत्यं चरुं निर्वपेयुः इन्द्राबृहस्पतिद्वन्द्वदेवताकं हविः साधयेयुः हविर्द्रव्यकामेष्टिविशेषं कुर्युरित्यर्थः । तत्रेन्द्रप्रीणनमैश्वर्यप्रतापाद्यर्थं बृहस्पतिप्रीणनं बुद्धिविद्याद्यर्थं बोद्धव्यम् । आपन्नसत्त्वायां जातगर्भायाम् । कौमारभृत्यः शिशुवैद्यः । गर्भभर्मणि गर्भपोषणे । प्रजने प्रसवे । वियतेत विशिष्य यत्नं कुर्यात् । प्रजातायाः प्रसूतायाः । समर्थं विनयेयुः ग्रहणधारणपटुं विद्याः शिक्षयेयुः । के, तद्विदः शिक्षणज्ञाः ।

१. 'प्रसवने' ग. पाठः.

सत्रिणामेकश्चैनं मृगयाद्यूतमद्यस्त्रीभिः प्रलोभयेत्—पितरि विक्रम्य राज्यं गृहाणेति। तदन्यः सत्री प्रतिषेधयेद् इत्याम्भीयाः।

महादोषमबुद्धबोधनमिति कौटल्यः। नवं हि द्रव्यं येन येनार्थजातेनोपदिह्यते तत्तदाचूषति, एवमयं नवबुद्धिर्यद्यदुच्येत तत्तच्छास्त्रोपदेशमिवाभिजानाति। तस्माद् धर्ममर्थं चास्योपदिशेन्नाधर्ममनर्थं च।

सत्रिणस्त्वेनं तव स्मः इति वदन्तः पालयेयुः। यौवनोत्सेकात् परस्त्रीषु मनः कुर्वाणम् आर्याव्यञ्जनाभिः स्त्रीभिरमेध्याभिः शून्यागारेषु रात्रावुद्वेजयेयुः। मद्यकामं योगपानेनोद्वेजयेयुः। द्यूतकामं कापटिकैः पुरुषैरुद्वेजयेयुः। मृगयाकामं प्रतिरोधकव्यञ्जनैस्त्रासयेयुः।

विनीतस्य कुमारस्य पितृद्रोहनिवृत्त्युपायम् आम्भाचार्यानुयायिमतेनाह — **सत्रिणाम्** इत्यादि। मृगयाद्यूतमद्यस्त्रीभिः प्रलोभनसाधनैः। प्रलोभयेत् प्रलोभ्योपदिशेत्। अन्यः प्रलोभकादपरः।

तद् दूषयति — **महेति**। अबुद्धबोधनं महादोषम् अज्ञातस्य पितृद्रोहरूपस्य पापकर्मण उपदेशः परमानर्थः। **नवमिति**। हिशब्दो दृष्टान्ते। यथा नवं द्रव्यं मृद्भाण्डादिकं, येन येन अर्थजातेन जलघृतादिना, उपदिह्यते लिप्यते, तत्तद् आचूषति आपिबति अन्तर्गृह्णाति, एवम् अनेन प्रकारेण, नवबुद्धिः सदसद्व्यवहाराप्रविष्टबुद्धिः, अयं राजपुत्रः, यद्यद् उच्येत, तत्तत् तत् सर्वं, शास्त्रोपदेशमिव, अभिजानाति हृदये निवेशयति। **तस्मादिति**। तस्माद् यथोक्तात् कारणात्, अस्य धर्मम् अर्थं च उपदिशेत्, अधर्मं पितृद्रोहादिम्, अनर्थं मृगयाद्यूतपानादिकं च, नोपदिशेत्।

यदि स्वत एव राजपुत्रः परस्त्रीमद्यादिषु कामनां कुर्यात्, तदा तन्निवारणार्थं सत्रिणस्तमुपासीरन्नित्याह — **सत्रिण** इत्यादि। तव स्म इति वदन्तः त्वत्सेवका वयमिति विश्वासयन्तः। पालयेयुः परस्त्रीमद्यादिप्रवृत्तेर्वारयेयुरित्यर्थः। पालनप्रकारानाह — **यौवनेत्यादि**। यौवनोत्सेकाद् यौवनमदात्। आर्याव्यञ्जनाभिः अभिजातस्त्रीवेषधारिणीभिः। अमेध्याभिः स्वभावादशुचिभिः स्त्रीभिः करणैः उद्वेजयेयुः जुगुप्सयेयुः, परस्त्रीरतादित्यार्थम्। योगपानेन विरसद्रव्ययुक्तेन मद्येन। कापटिकैः छलदेवनदक्षैः। प्रतिरोधकव्यञ्जनैः चौरवेषैः। विक्रमबुद्धिं विक्रमे विक्रम्य हनने बुद्धिर्यस्य तम्। तथेत्यनु-

---

१. 'त्याजीम्भी', २. 'श्चैनं', ३. 'रसेव्याभि' ग. पाठः.

पितरि विक्रमबुद्धिं तथेत्यनुप्रविश्य भेदयेयुः — अप्रार्थनीयो राजा, विपन्ने घातः, सम्पन्ने नरकपातः, संक्रोशः प्रजाभिरेकलोष्टवधश्चेति ।

विरागं प्रियमेकपुत्रं वा बध्नीयात् । बहुपुत्रः प्रत्यन्तमन्यविषयं वा प्रेषयेद् यत्र गर्भः पण्यं डिम्बो वा न भवेत् । आत्मसम्पन्नं सैनापत्ये यौवराज्ये वा स्थापयेत् ।

बुद्धिमानाहार्यबुद्धिर्दुर्बुद्धिरिति पुत्रविशेषाः । शिष्यमाणो धर्मार्थावुपलभते चानुतिष्ठति च बुद्धिमान् । उपलभमानो नानुतिष्ठत्याहार्यबुद्धिः । अपायनित्यो धर्मार्थद्वेषी चेति दुर्बुद्धिः ।

प्रविश्य भेदयेयुः तथा कुर्म इति वाङ्मात्रेण तच्छन्दानुवृत्त्या ततो निवर्तयेयुः । अप्रार्थनीय इत्यादिर्निवर्तनार्थम् उपदेशः । राजा, अप्रार्थनीयः अर्थयितुम् एषितुं योग्यः अर्थनीय एष्टव्यः तद्विपरीतः प्रार्थनीयः अनेष्टव्यः द्वेष्य इति यावत्, प्रशब्दस्येह प्रस्मरतीत्यादाविव धात्वर्थविपरीतद्योतकत्वात्, प्रार्थनीयो न भवतीत्यप्रार्थनीयः अद्वेष्य इत्यर्थः । विपन्ने घातः पितृवधसमुद्यमे विफलिते सति तव वधो भवेत्, सम्पन्ने नरकपातः फलिते सति पितृवधपातकिनस्ते नरके पतनं, संक्रोशः लोकनिन्दा, प्रजाभिः एकलोष्टवधश्च प्रजाभिः समुदिताभिः कर्त्रीभिः एकैकमृत्खण्डप्रक्षेपेण घातश्च तव भवेत् ।

एवं कृतेऽपि यः पितरि निःस्नेह एव पितुः प्रिय एकश्च पुत्रो भवेत्, तदा तं बध्नीयादित्याह — **विरागमित्यादि** । बहुपुत्रश्चेद् राजा यथोक्तं पुत्रं कर्शयेदित्यभिप्रायेणाह — **बहुपुत्र इत्यादि** । प्रत्यन्तं म्लेच्छदेशम् । अन्यविषयं वा अन्यदेशं वा । यत्र गर्भः पण्यं डिम्बो वा न भवेत् यस्मिन् देशे गर्भः अन्नं राजपुत्रोचितं, पण्यं तादृशं वसनादिकमापणलभ्यं भोग्यवस्तु, डिम्बो राजपुत्रनिमित्तः प्रकृतीनां विप्लवश्च, न स्यात् । गर्भ इत्यस्य स्थाने गर्व इत्यपि पाठः । तदा त्वर्थः स्फुट एव । गुणसम्पन्नपुत्रविषये त्वाह — **आत्मसम्पन्नमित्यादि** ।

पुत्रं विभजते — **बुद्धिमानित्यादि** । पुत्रविशेषाः पुत्रभेदाः । उपदिश्यमानधर्मार्थज्ञानानुष्ठाननिष्ठो बुद्धिमान् । तज्ज्ञानमात्रवांस्तदनुष्ठानविमुख आहार्यबुद्धिः, नित्यप्रमादी धर्मार्थद्वेषणशीलश्च दुर्बुद्धिरिति त्रयाणां लक्षणमाह — **शिष्यमाण इत्यादि** ।

स यद्येकपुत्रः पुत्रोत्पत्तावस्य प्रियतेत । पुत्रिकापुत्रानुत्पादयेद् वा । वृद्धस्तु व्याधितो वा राजा मातृबन्धुकुल्यगुणवत्सामन्तानामन्यतमेन क्षेत्रे बीजमुत्पादयेत् । न चैकपुत्रमविनीतं राज्ये स्थापयेत् ।

बहूनामेकसंरोधः पिता पुत्रहितो भवेत् ।
अन्यत्रापद ऐश्वर्यं ज्येष्ठभागि तु पूज्यते ॥
कुलस्य वा भवेद् राज्यं कुलसङ्घो हि दुर्जयः ।
अराजव्यसनाबाधः शश्वदावसति क्षितिम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्यायः राजपुत्ररक्षणम् ॥

स इति । स दुर्बुद्धिः, एकपुत्रो यदि एक एव राज्ञः पुत्रश्चेत्, अस्य दुर्बुद्धेः, पुत्रोत्पत्तौ पुत्रस्य राज्यार्हस्योत्पत्तौ प्रियतेत विशेषेण यत्नं कुर्यात् । अथवा पुत्रिकापुत्रान् पुत्रिकायाः 'अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति' इति परिभाषापूर्वं वराय दत्तायाः सुतायाः पुत्रान्, उत्पादयेद् राज्यार्थम् । अदुहितृको वृद्धभावाद् व्याधेर्वा गर्भाधानाक्षमश्चेद् राजा, तदा मातृबन्धोः स्वकुलजातस्य गुणवत्सामन्तस्य वा नियोगेन स्वमहिष्यां बीजमुत्पादयेदित्याह — वृद्धस्त्वित्यादि । सर्वथा तु अशिक्षितमेकं पुत्रं राज्ये न निवेशयेदित्याह — न चेत्यादि ।

बहूनामिति । बहूनां पुत्राणां मध्ये, एकसंरोधः एकस्य दुर्बुद्धेः संरोधः प्रत्यन्तादिष्ववरोधः, कर्तव्य इति शेषः । पिता, आपदोऽन्यत्र अनापदि पुत्रहितः पुत्रानुकूलवृत्तिः भवेत् । पुत्रेषु बहुषु पितृप्रियेषु विद्यमानेषु कस्य राज्यभाक्त्वमित्यत्राह — ऐश्वर्यं राजत्वं, ज्येष्ठभागि तु ज्येष्ठपुत्राश्रयमेव, पूज्यते प्रशस्यते ॥

पक्षान्तरमाह — कुलस्येति । अथवा राज्यं कुलस्य बहुपुत्रसङ्घस्य भवेत् बहुपुत्रसङ्घनेतृकं कार्यमित्यर्थः । तथा करणे गुणमाह — कुलसङ्घः कुलात्मको राज्यनेता सङ्घः, दुर्जयः जेतुमशक्यः शत्रुणा भवति । गुणान्तरमाह — अराजव्यसनाबाधः राजव्यसनदोषनिमित्त आबाधो जनपीडा राजव्यसनाबाधः तस्याभावः, शश्वत् सर्वदा क्षितिम् आवसति भूमिमधितिष्ठति राज्येऽनुवर्तत इत्यर्थः । नेतृसङ्घस्यावयव एकस्मिन् व्यसनविनष्टेऽप्यन्यैः सम्यक् प्रजापरिपालननिर्वर्तनादिति भावः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
सप्तदशोऽध्यायः राजपुत्ररक्षणम् ॥

१४,१५. प्रक॰ अवरुद्धवृत्तम्, अवरुद्धे च वृत्तिः।

राजपुत्रः कृच्छ्रवृत्तिरसदृशे कर्मणि नियुक्तः पितरमनुवर्तेत, अन्यत्र प्राणाबाधकप्रकृतिकोपपातकेभ्यः। पुण्यकर्मणि नियुक्तः पुरुषमधिष्ठातारं याचेत। पुरुषाधिष्ठितश्च सविशेषमादेशमनुतिष्ठेत्। अभिरूपं च कर्मफलमौपायनिकं च लाभं पितुरुपनाययेत्।

तथाऽप्यतुष्यन्तमन्यस्मिन् पुत्रे दारेषु वा स्निह्यन्तमरण्याय आपृच्छेत। बन्धवधभयाद् वा यः सामन्तो न्यायवृत्तिर्धार्मिकः सत्यवागविसंवादकः प्रतिग्रहीता मानयिता चाभिपन्नानां तमाश्रयेत

अवरुद्धवृत्तमिति सूत्रम्। अवरुद्धो नाम राज्ञा स्वसन्निधेर्विवासितः तेन राज्ञि कथं व्यवहर्तव्यमित्येतदिहोच्यत इति सूत्रार्थः। आत्मसम्पन्नः राजपुत्रः सैनापत्यादौ स्थाप्य इत्युक्तं प्राक्। तत्रात्मसम्पन्नेष्वनेकेष्वेकश्चेत् सेनापतिर्युवराजो वा क्रियेत, तदान्यो राजपुत्रो विजिगीषुः सम्पन्न इति तस्य वृत्तमभिधानीयमिति सम्बन्धः।

अवरुद्धो राजपुत्रः क्लेशनिर्वर्त्यदेहयात्रः स्वाननुरूपे कर्मणि पित्रा चोदितो यथापितृनियोगं कर्मानुतिष्ठेत्, तच्चेत् कर्म स्वप्राणसंशयकरं प्रकृतिकोपपातकजनकं वा न भवेदित्याह-- **राजपुत्र** इत्यादि। अनुष्ठानप्रकारमाह-- **पुण्येत्यादि**। अधिष्ठातारं पुरुषं याचेत कर्मनेतारं कमपि स्वाधश्वरपुरुषं पितृसकाशाद् याचित्वा लभेत। आदेशं पितृनियोगम्। सविशेषमनुतिष्ठेत् विशेषो गुणवत्ता तद्युक्तं यथा भवति तथा चरेत्। अभिरूपं हृद्यं प्रशस्तम् कर्मफलं स्वकर्मोत्पादितं धान्यादिकम्। औपायनिकं लाभं च कर्षकादिभ्य उपायनात्मना लब्धं द्रव्यं च। पितुरुपनाययेत् पितुः सकाशं प्रापयेत् तत्परितोषार्थं, नतु स्वयमुपयुञ्जीत।

तथापीत्यादि। तथापि अतुष्यन्तं कर्मफललाभोपनायनेनाप्यात्मतुष्टिमकुर्वन्तं पितरम्। दारेषु स्वमातृव्यतिरिक्तायां पत्न्याम्। अरण्याय आपृच्छेत 'तपसे वनं गन्तुं मेऽनुज्ञां देही'त्यर्थयेत। यथोक्तापृच्छादैन्यप्रकाशनेऽप्यार्जवमप्रतिपद्यमाने पितरि आत्मबन्धनहननशङ्कायां वा जातायां गत्यन्तराभावादभिद्रोग्धुं गुणवत्सामन्तसाहाय्यसम्पादने वियतेतेत्याह - **बन्धवधभयादित्यादि**। अविसंवादकः अविप्रलम्भकः। अभिपन्नानां प्रा

तत्रस्थः कोशदण्डसम्पन्नः प्रवीरपुरुषकन्यासम्बन्धमटवीसम्बन्धं कृत्यपक्षोपग्रहं वा कुर्यात्।

एकचरः सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तानाजीवेत्। पाषण्डसङ्घद्रव्यमश्रोत्रियभोग्यं देशद्रव्यमाढ्यविधवाद्रव्यं वा गूढमनुप्रविश्य सार्थयानपात्राणि च मदनरसयोगेनातिसन्धायावहरेत्। पारग्रामिकं वा योगमातिष्ठेत्। मातुः परिजनोपग्रहेण वा चेष्टेत।

ग्रहीता मानयिता च शरणागतानां स्वीकर्ता सत्कर्ता च। तं सामन्तमाश्रित्य तिष्ठन् कोशदण्डाभ्यां स्वार्जिताभ्यां युक्तो भूत्वा प्रकृष्टवीरपुरुषकन्यकायाः परिणयं स्वपितृजनपदाटविकसख्यं स्वपितृकृत्यवर्गस्वीकरणं च सहायोपचयार्थं कुर्यादित्याह—**तत्रस्थ** इत्यादि। अटवीसम्बन्धमित्यटवीशब्दस्तात्स्थ्यादाटविके वर्तते।

असहायविषय आह—**एकचर** इति। एकचरः एकाकी अलब्धकोशदण्डादिसहायः, सुवर्णपाकमणिरागहेमरूप्यपण्याकरकर्मान्तान् सुवर्णपाकं पुटपाकेन लोहादेः सुवर्णत्वापादनकर्म रसतन्त्रप्रयोगमिति यावत्, मणिरागहेमरूप्यपण्यानि वज्रवैदूर्यमौक्तिकादिर्मणिः लाक्षादिरञ्जनद्रव्यं रागः हेम स्वर्णं रूप्यं रजतम् इत्येतद्रूपाणि पण्यानि विक्रेयपदार्थान् आकरकर्मान्तं रत्नादिखनिव्यापारं च, आजीवेत् उपजीवेत्। एष कोशार्जनेऽभ्युपायः। उपायान्तरमाह—**पाषण्डेति**। पाषण्डसङ्घद्रव्यं पाषण्डैः स्वसङ्घार्थं सङ्गृह्य स्थापितं धनम्, अश्रोत्रियभोग्यं देशद्रव्यं छान्दसब्राह्मणभोग्यातिरिक्तं देश्यजनसमुदायद्रव्यम्। देवद्रव्यमित्यपि पाठः। आढ्यविधवाद्रव्यं वा आढ्याः समृद्धधना या विधवास्तासां द्रव्यं वा, गूढं द्रव्यापजिहीर्षागुप्तिपूर्वं, अनुप्रविश्य अनुकूलाचरणेन वशयित्वा अर्थात् पाषण्डादीन् अवहरेत्। किञ्च सार्थयानपात्राणि सार्थस्य वणिक्सङ्घस्य यानपात्राणि पोतान् पण्ययुक्तान्, मदनरसयोगेन मदकररसदानोपायेन, अतिसन्धाय वञ्चयित्वा अर्थाद् वणिक्सङ्घम्, अवहरेत्। **पारग्रामिकमिति**। अथवा पारग्रामिकं योगं 'विजिगीषुः परग्राममवाप्तुकाम' इत्यादिना दुर्गलम्भोपायाधिकरणे वक्ष्यमाणम् उपायम्, आतिष्ठेत् आद्रियेत। अथवा मातुः, परिजनोपग्रहेण सेवकजनानुकूलनेन,

---

१. 'को वा' ग. पाठः.

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपाषण्डच्छद्मभिर्वा नष्टरूपस्त-द्व्यञ्जनसखः छिद्रे प्रविश्य राज्ञः शस्त्ररसाभ्यां प्रहृत्य ब्रूयात् — अह-मसौ कुमारः, सहभोग्यमिदं राज्यमेको नार्हति भोक्तुं, तत्र ये काम-यन्ते भर्तुं तानहं द्विगुणेन भक्तवेतनेनोपस्थास्ये इति। इत्यवरुद्धवृत्तम् ॥

अवरुद्धं तु मुख्यपुत्रापसर्पाः प्रतिपाद्यानयेयुः, माता वा प्रति-गृहीता। त्यक्तं गूढपुरुषाः शस्त्ररसाभ्यां हन्युः। अत्यक्तं तुल्यशी-लाभिः स्त्रीभिः पानेन मृगयया वा प्रसज्ज्य रात्रावुपगृह्यानयेयुः।

चेष्टेत वियतेत स्ववृद्ध्यर्थम्। अथवा, कारुशिल्पिकुशीलवचिकित्सकवाग्जी-वनपाषण्डच्छद्मभिः कारवः तक्षायस्काराः शिल्पिनः चित्रकारादयः कुशी-लवा गायनाः चिकित्सका वैद्याः वाग्जीवनाः पुरावृत्तकथनोपजीविनः पाषण्डाः क्षपणकबौद्धभिक्षुप्रभृतयो वेदबाह्याः तद्वेषैः सह, नष्टरूपः छन्नस्वरूपः, तद्व्य-ञ्जनसखः कार्वादिवेषपुरुषतुल्यः, राज्ञः पितुः, छिद्रे अपकारस्थाने, प्रविश्य, शस्त्ररसाभ्यां प्रहृत्य राजानं हत्वा, ब्रूयाद्, अर्थात् सचिवादीन्। अह-मित्यादिर्वचनप्रकारः। कुमारः राजपुत्रः। सहभोग्यं ससहायनिर्वेश्यं ससहाय-शासनीयं वा। भर्तुम् अमात्यादिपदेष्वधिकर्तुम्। तान् भर्तुकामान्। द्विगुणेन मत्पितृदत्ताद् द्विरावृत्तेन। उपस्थास्ये पूजयिष्यामि। इत्यवरुद्धवृत्तं वर्णित-मिति शेषः॥

अवरुद्धे च वृत्तिरिति सूत्रम्। अवरुद्धं पुत्रादिं प्रति विजिगीषोर्वृत्त-मिति सूत्रार्थः। विजिगीषोरवरुद्धावस्थायां वृत्तमुक्तम्, अवरोद्धृवस्थायां वृत्त-मधुनोच्यते।

अवरुद्धमिति। मुख्यपुत्रापसर्पाः मुख्यानाममात्यादीनां ये पुत्राः तद्रूपा अपसर्पाः चाराः, प्रतिगृहीता माता वा राजपूजिता स्वमाता वा, अव-रुद्धं राजपुत्रं, प्रतिपाद्य 'पिता ते यौवराज्यं दद्यात् त्वं चेत् तदनुकूलवृत्तिरि'ति भाषया पितृहितवृत्तिमभ्युपगमय्य, आनयेयुः पितुरन्तिकम्। कथञ्चिदपि विधेयतानासादनात् पित्रा परित्यक्तं राजपुत्रम् आयुधविषप्रयोगाभ्यां गूढपुरुषा हन्युः, अविधेयत्वेऽप्येकपुत्रत्वादपत्यस्नेहाद् वा अपरित्यक्तं तं समानस्वभा-वाभिः स्त्रीभिः मद्येन खेटनेन वा प्रसक्तिं कारयित्वा बद्ध्वा रात्रौ राजान्तिकं प्रापयेयुरित्याह,— **त्यक्तमित्यादि**।

उपस्थितं च राज्येन मदूर्ध्वमिति सान्त्वयेत् ।
एकस्थमथ संरुन्ध्यात् पुत्रवान् वा प्रवासयेत् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
अष्टादशोऽध्यायः अवरुद्धवृत्तमवरुद्धे च वृत्तिः ॥

उपस्थितमिति । उपस्थितं तथा प्राप्तम् अवरुद्धम् अर्थाद् धार्मिकं, राज्येन मदूर्ध्वमिति सान्त्वयेत् राज्यमिदं मदुत्तरकाले त्वदीयं भविष्यतीति राज्येन निमित्तेनानुनयेत् । अथ एकस्थम् अभ्रातृकं पुत्रम् अर्थादधार्मिकं सन्तं, संरुन्ध्यात् कारागृहे निवेशयेत् । पुत्रवान् वा प्रवासयेत् बहुपुत्रसद्भाव-पक्षे अधार्मिकं पुत्रं हन्यादित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
अष्टादशोऽध्यायः अवरुद्धवृत्तम् अवरुद्धे च वृत्तिः ॥

१६. प्रक. राजप्रणिधिः।

राजानमुत्तिष्ठमानमनूत्तिष्ठन्ते भृत्याः। प्रमाद्यन्तमनुप्रमाद्यन्ति। कर्माणि चास्य भक्षयन्ति। द्विषद्भिश्चातिसन्धीयते। तस्मादुत्थानमात्मनः कुर्वीत। नालिकाभिरहरष्टधा रात्रिं च विभजेत्। छायाप्रमाणेन वा त्रिपौरुषी पौरुषी चतुरङ्गुला चच्छाया मध्याह्न इति चत्वारः पूर्वे दिवसस्याष्टभागाः। तैः पश्चिमा व्याख्याताः।

तत्र पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयात्। द्वितीये पौरजानपदानां कार्याणि पश्येत्। तृतीये स्नानभोजनं सेवेत, स्वाध्यायं च कुर्वीत। चतुर्थे हिरण्यप्रतिग्रहमध्यक्षांश्च कुर्वीत। पञ्चमे

राजप्रणिधिरिति सूत्रम्। राज्ञः प्रणिधिः प्रणिधानं व्यापार उच्यत इति सूत्रार्थः। इन्द्रियजयप्रकरणे 'उत्थानेन योगक्षेमसाधनम्' इत्युक्तम्, उत्थानस्वरूपं त्वनुक्तमिहाभिधीयते।

राजा स्वकर्मणि व्याप्रियते चेद्, अमात्यसमाहर्तृसन्निधातृप्रभृतयो भृत्याः स्वस्वकर्मसु व्याप्रियन्ते, स चेदालस्यान्न व्याप्रियते तेऽपि न व्याप्रियन्ते, राज्ञः कार्याणि च नाशयन्ति, तथाभूतोऽसौ राजा शत्रुभिर्वञ्च्यते च। तस्मादात्मनो व्यापारं राजानुतिष्ठेदित्याह— **राजानमित्यादि**। अनुष्ठेयानां कर्मणां कालविभागनियमं वक्तुमाह — **नालिकाभिरिति**। अहश्च रात्रिं च, नालिकाभिरष्टधा विभजेत् नालिका घटिका षष्टिविनाडिकात्मिका नालिकाप्रमाणेनाह्नो रात्रेश्च प्रत्येकमष्टौ भागान् कल्पयेत्। तत्रैकोऽष्टमभागः पादोननालिकाचतुष्टयात्मको मुहूर्ताख्यः सुप्रसिद्धः। दिवसस्याष्टावष्टमभागान् दर्शयति — **छायेत्यादि**। त्रिपौरुषी पुरुषत्रयपरिमाणा छाया, पौरुषी एकपुरुषपरिमाणा, चतुरङ्गुला अङ्गुलचतुष्टयपरिमाणा चेति त्रयः, मध्याह्नश्चतुर्थः, इति छायाप्रमाणेन एवम्प्रकारेण पुरुषच्छायामानेन, दिवसस्य, पूर्वे अष्टभागाः आदिमा अष्टमभागाः, चत्वारो भवन्ति। तैः उक्तैः पूर्वैरष्टभागैः, पश्चिमाः व्याख्याताः उत्तरा अष्टभागा उक्तप्रायाः, चतुरङ्गुला पौरुषी त्रिपौरुषी दिनान्त इत्येवं चत्वार इत्यूहितुं शक्या इत्यर्थः।

दिवसस्याष्टभागेष्वष्टसु क्रमेणानुष्ठेयानि कर्माणि दर्शयति—**तत्र पूर्वे इत्यादि**। रक्षाविधानं राज्यनुष्ठितम्। आयव्ययौ गताहोरात्रवृत्तौ। पश्येत् विमृशेत्। स्नानभोजनं स्नानं च भोजनं च। स्वाध्यायं वेदाध्ययनम्। हिर-

मन्त्रिपरिषदा पत्रसंप्रेषणेन मन्त्रयेत, चारगुह्यबोधनीयानि च बुध्येत। षष्ठे स्वैरविहारं मन्त्रं वा सेवेत। सप्तमे हस्त्यश्वरथायुधीयान् पश्येत्। अष्टमे सेनापतिसखो विक्रमं चिन्तयेत्। प्रतिष्ठितेऽहनि सन्ध्यामुपासीत।

प्रथमे रात्रिभागे गूढपुरुषान् पश्येत् । द्वितीये स्नानभोजनं कुर्वीत स्वाध्यायं च । तृतीये तूर्यघोषेण संविष्टः चतुर्थपञ्चमौ शयीत। षष्ठे तूर्यघोषेण प्रतिबुद्धः शास्त्रमितिकर्तव्यतां च चिन्तयेत् । सप्तमे मन्त्रमध्यासीत, गूढपुरुषांश्च प्रेषयेत् । अष्टमे ऋत्विगाचार्यपुरोहितसखः स्वस्त्ययनानि प्रतिगृह्णीयात्, चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येत्। सवत्सां धेनुं वृषभं च प्रदक्षिणीकृत्योपस्थानं गच्छेत् ।

आत्मबलानुकूल्येन वा निशाहर्भागान् प्रतिविभज्य कार्याणि सेवेत।

ण्यप्रतिग्रहं गतदिवसोत्थितधनस्वीकारम् । अध्यक्षान् कुर्वीत कार्यविशेषेषु नियुञ्जीत । पत्रसम्प्रेषणेन मन्त्रयेत लेख्यद्वारकसंवादेन कार्यमालोचयेत् । चारगुह्यबोधनीयानि बुध्येत चारेभ्यो रहसि उपदेश्यानि कार्याणि अवगच्छेत्। स्वैरविहारं स्वच्छन्दावस्थानं विश्रमार्थम् । हस्त्यश्वरथायुधीयान् हस्त्यादियुक्तान् पदातीन् । सेनापतिसखः सेनापतिसमेतः । प्रतिष्ठिते अवसिते ।

रात्रिभागेष्वनुष्ठेयानि कर्माण्याह — **प्रथम** इत्यादि । तृतीये तूर्यघोषेण संविष्टः तृतीये रात्रिभागे गीतवाद्यश्रवणसुखमनुभवन्नेव शयितः। चतुर्थपञ्चमौ शयीत चतुर्थे पञ्चमे च रात्रिभागे कृत्स्ने स्वप्यात् । शास्त्रम् अर्थशास्त्रम् । इतिकर्तव्यतां कालोचितकार्यपरिपाटीम् । प्रेषयेद् यथाविषयं प्राणिदध्यात् । ऋत्विगाचार्यपुरोहितसखः ऋत्विग् याजकः आचार्यः विद्योपदेष्टा पुरोहितः मन्त्रिपुरोहितोत्पत्तिप्रकरणोपवर्णितगुणः एषां सखा । स्वस्त्ययनानि माङ्गलिकमन्त्रपाठपूर्वाण्याशीर्वचनानि । **चिकित्सकमाहानसिकमौहूर्तिकांश्च पश्येदि**ति । चिकित्सकदर्शनं देहावस्थापरिज्ञानार्थम् महानसाधिकृतदर्शनं कल्पनीयेष्टाहारकथनार्थम् मौहूर्तिकदर्शनं तदहर्ग्रहशुभाशुभचिन्तनार्थम्। उपस्थानम् आस्थानमण्डपम् ।

त इमे निशाहर्भागा औत्सर्गिकाः, वैशेषिका अपि तु कार्यद्रष्ट्रा कल्प्यमाना न दुष्यन्तीत्याह — **आत्मे**त्यादि । वा अथवा । आत्मबलानुकूल्येन आत्मनो यद् बलं कार्यानुष्ठानशक्तिस्तदानुगुण्येन ।

उपस्थानगतः कार्यार्थिनामद्वारासङ्गं कारयेत्। दुर्दर्शो हि राजा कार्याकार्यविपर्यासमासन्नैः कार्यते। तेन प्रकृतिकोपमरिवशं वा गच्छेत्। तस्माद् देवताश्रमपाषण्डश्रोत्रियपशुपुण्यस्थानानां बालवृद्धव्याधितव्यसन्यनाथानां स्त्रीणां च क्रमेण कार्याणि पश्येत्, कार्यगौरवादात्ययिकवशेन वा।

सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत्।
कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वा विजायते॥
अग्न्यगारगतः कार्यं पश्येद् वैद्यतपस्विनाम्।
पुरोहिताचार्यसखः प्रत्युत्थायाभिवाद्य च॥
तपस्विनां तु कार्याणि त्रैविद्यैः सह कारयेत्।
मायायोगविदां चैव न स्वयं कोपकारणात्॥

उपस्थानेत्यादि। अद्वारासङ्गं कारयेत् द्वारे आसङ्गः सक्तिर्निरोध इति यावत् तदभावं कारयेत्, सुलभदर्शनो भवेदित्यभिप्रायः। दुर्लभदर्शनत्वे दोषमाह — दुर्दर्श इत्यादि। कार्याकार्यविपर्यासं कार्याकार्ययोरकरणं व्युत्क्रमकरणं वा। आसन्नैः अन्तिकसेवकैः। तेन कार्याकार्यविपर्यासनेन। प्रकृतिकोपम् अमात्यादिरोषम्। अरिवशं शत्रुगोचरम्। कार्यदर्शने क्रममाह— तस्माद् देवताश्रमेत्यादि। अत्राश्रमशब्दो मुन्युपलक्षकः। व्यसनिशब्दो दुःखाभिभूतपरः। शेषं स्पष्टम्। कार्यगौरवाद् आत्ययिकवशेन वा कार्याणि पश्येत् कार्यस्य महत्त्वापेक्षया वा अमहत्त्वेऽप्यतिपातित्वापेक्षया वा कार्याणि चिन्तयेत्, क्रमं यथोक्तमनादृत्यापीत्यभिप्रायः।

सर्वमिति। सर्वं गुरु लघु च, आत्ययिकं कार्यं, शृणुयात् श्रुत्वानुतिष्ठेत्, नातिपातयेत् नातिक्रामयेत्। अतिक्रान्तम् अतिपातितकालं किमपि सद्यस्सुकरं कार्यं, कृच्छ्रसाध्यं असाध्यं वा भवति, कालान्तरे॥

अग्न्यगारेत्यादि। अग्न्यगारगतः अग्निहोत्रशालागतः। वैद्यतपस्विनां विदुषां तापसानां च॥

तपस्विनामित्यादि। त्रैविद्यैः सह त्रयीविद्याविद्भिः साकं, त्रैविद्यसाहित्यवचनं कार्यनिर्णये प्रत्ययार्थम्। मायायोगविदां मायाप्रयोगाभिज्ञानाम्। न स्वयम् एकाकी सन् न कारयेत्, कुतः, कोपकारणात् कोपान्निमित्तात्॥

राज्ञो हि व्रतमुत्थानं यज्ञः कार्यानुशासनम् ।
दक्षिणा वृत्तिसाम्यं च दीक्षितस्याभिषेचनम् ॥
प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥
तस्मान्नित्योत्थितो राजा कुर्यादर्थानुशासनम् ।
अर्थस्य मूलमुत्थानमनर्थस्य विपर्ययः ॥
अनुत्थाने ध्रुवो नाशः प्राप्तस्यानागतस्य च ।
प्राप्यते फलमुत्थानाल्लभते चार्थसम्पदम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः ॥

राज्ञ इति । उत्थानम् उद्योगः, यज्ञः क्रत्वनुष्ठानं, कार्यानुशासनं व्यवहारनिर्णयः, दक्षिणा दानं, वृत्तिसाम्यं शत्रौ मित्रे च गुणदोषापेक्षया तुल्यं व्यवहरणं, दीक्षितस्य अभिषेचनम् अवभृथनिर्वर्तनं च राज्ञो व्रतम् ॥

प्रजासुख इति । प्रजासुखे सति, राज्ञः सुखम्, अस्ति । प्रजानां हिते च सति राज्ञो हितम्, अस्ति । राज्ञः आत्मप्रियं हितं न भवति, किं तर्हि, प्रजानां प्रियं तु हितं प्रजानां प्रियमेव हितं भवति ॥

तस्मादिति । तस्माद् उक्तात् कारणात्, राजा नित्योत्थितः नित्योद्योगी सन्, अर्थानुशासनम् अर्थव्यवहारं, कुर्यात् । उत्थानम् उद्यमः, अर्थस्य मूलं सिद्ध्युपायः, विपर्ययः अनुत्थानम् अनर्थस्य मूलम् ॥

अनुत्थान इति । अनुत्थाने आलस्यादुद्योगाकरणे, प्राप्तस्य पूर्वसिद्धस्य, अनागतस्य सेत्स्यतश्च अर्थस्य, नाशः, ध्रुवः निश्चितः । उत्थानात् फलं प्राप्यते, अर्थात् सद्यः, अर्थसम्पदं लभते च अर्थस्य प्राप्तस्य रक्षणसिद्ध्या, अप्राप्तस्य प्राप्तिसिद्ध्या च समृद्धिं प्राप्नोति च । उत्थानस्यैवं त्रैकाल्यहितत्वं समर्थितम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
एकोनविंशोऽध्यायः राजप्रणिधिः ॥

१७. प्रक. निशान्तप्रणिधिः ।

वास्तुकप्रशस्ते देशे सप्राकारपरिखाद्वारमनेककक्ष्यापरिगतमन्तःपुरं कारयेत् ।

कोशगृहविधानेन वा मध्ये वासगृहं, गूढभित्तिसञ्चारं मोहनगृहं तन्मध्ये वा वासगृहं, भूमिगृहं वा आसन्नकाष्ठचैत्यदेवतापिधानद्वारमनेकसुरुङ्गासञ्चारम् । प्रासादं वा गूढभित्तिसोपानं, सुषिरस्तम्भप्रवे-

निशान्तप्रणिधिरिति सूत्रम् । निशान्तं राजभवनं तस्य प्रणिधिः, तत्सम्बद्धमनुष्ठानमुच्यत इति सूत्रार्थः । 'दाररक्षणं निशान्तप्रणिधौ वक्ष्याम' इत्युक्तं राजपुत्ररक्षणे । तदिदानीमभिधीयते ।

वास्तुकेत्यादि । वास्तुकप्रशस्ते वास्तुविद्याभिज्ञश्लाघिते । सप्राकारपरिखाद्वारं प्राकारः सालः परिखा दुर्गवेष्टनखातिका द्वाराणि अपवरकाणि एतैर्युक्तम् । अनेककक्ष्यापरिगतम् अनेकाभिः कक्ष्याभिः प्रकोष्ठकैः परिगतम् अन्तःपुरं कारयेत् ।

कोशेति । कोशगृहविधानेन कोशगृहनिर्माणविधया सन्निधातृनिचयकर्मप्रकरणे वक्ष्यमाणया, मध्ये अन्तःपुरमध्ये, स्वस्य वासगृहं गर्भागारं कारयेद्, राजा । गूढभित्तिसञ्चारं गूढः अनन्यलक्ष्यः भित्तिसञ्चारः भित्त्यन्तरस्थो गतागतमार्गो यस्य तथाभूतं, मोहनगृहं मार्गव्यामोहकरत्वाद् मोहनसंज्ञं किमपि वृत्ताकारं गृहं, कारयेत् । तन्मध्ये वा तथाकारितस्य मोहनगृहस्य मध्ये वा वासगृहं कारयेत् । भूमिगृहं वा कारयेद् भूमिं खात्वा तदन्तः कृतसन्निवेशं गृहं भूमिगृहं तच्च कारयेद्, अर्थान्मोहनगृहस्य मध्ये । कीदृशं भूमिगृहम्, आसन्नकाष्ठचैत्यदेवतापिधानद्वारम् आसन्नकाष्ठे चैत्ये निकटदिग्वर्तिनि देवालये या देवता प्रसिद्धा दुर्गा तदन्या वा रौद्री तद्रूपं पिधानम् उत्कीर्णतद्देवताप्रतिमाङ्कं दारुलोहादिमयमाच्छादनं यस्य तत् तथाभूतं द्वारं यस्य तादृशम् । देवतापिहितद्वारे तस्मिन् गतागतमार्गसंविधानमाह — अनेकसुरुङ्गासञ्चारम् अनेकाः सुरुङ्गासञ्चाराः तिर्यग्भूखातात्मकाः सञ्चरणमार्गा यस्य तत् तादृशम् । किञ्च प्रासादं, गूढभित्तिसोपानं गूढानि अन्याविदितानि भित्तिसोपानानि भित्त्यन्तरगतानि आरोहणानि यस्य तं तथाभूतम्, अथवा सुषिरस्तम्भप्रवेशापसारं वा अन्तः सुषिरवता स्तम्भेन स्तम्भमार्गेण प्रवेशः

शापसारं वा। वासगृहं यन्त्रबद्धतलावपातं कारयेद् आपत्प्रतीकारार्थम्। आपदि वा कारयेत्। अतोऽन्यथा वा विकल्पयेत् सहाध्यायिभयात्।

मानुषेणाग्निना त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहति, न चात्रान्योऽग्निर्ज्वलति, वैद्युतेन भस्मना मृत्संयुक्तेन करकवारिणावलिप्तं च।

जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिरक्षीवे जातस्याश्वत्थस्य प्रतानेन वा गुप्तं सर्पा विषाणि वा न प्रसहन्ते। मार्जारमयूरनकुलपृषतो-

---

अपसारो निर्गमश्च यस्मिंस्तं तथाभूतं वा कारयेत्। प्रकारान्तरमाह—**वासगृहमिति**। वासगृहं, यन्त्रबद्धतलावपातं यन्त्रबद्धं तलावपातं च यन्त्रेणोपरिभूमौ धारितं यन्त्रस्रंसने सत्यधोदेशनिपातुकं च कारयेत्। किमर्थम्, आपत्प्रतीकारार्थे शत्रुभयप्रतिक्रियार्थम् अधःस्थितशत्रुमारणार्थमित्यर्थः। आपदि वा कारयेत् पूर्वमतादृशमप्यापत्समये वा तादृशं कारयेत्। उक्तं वासगृहकाप्ल्यप्रकारं शत्रुरपि तुल्यशास्त्रवेत्ता विज्ञाय चेष्टेतेति यदि शङ्का स्यात्, तदा प्रकारान्तरेण स्वबुद्धिप्रतिभातेन वासगृहं विकल्पयेदित्याह — **अतोऽन्यथा वेत्यादि**।

निर्मितस्य निशान्तस्याग्निभयपरिहारोपायमाह— **मानुषेणेति**। मानुषेणाग्निना शत्रुनिहतस्य वा शूलारोपणमारितस्य वा मनुष्यस्यास्थ्नि कल्माषवेणुना मथनादुत्थितेनाग्निना, त्रिः अपसव्यं परिगतं त्रीन् वारान् वामावर्तेन परीतं, परिगमनस्य अथर्वोक्तमन्त्रोच्चारणपूर्वकत्वं तु साम्प्रदायिकमर्थगम्यम्। अन्तःपुरम् अन्योऽग्निर्न दहति। अत्र अन्तःपुरे, अन्योऽग्निर्न च ज्वलति। मृत्संयुक्तेन वल्मीकमृत्तिकासंमिश्रेण, वैद्युतेन भस्मना विद्युदुद्भूताग्निदग्धद्रुमभवेन भासितेन, करकवारिणा वर्षोपलजलयुक्तेन सता, अवलिप्तं च कृतलेपनमन्तःपुरं च, अन्योऽग्निर्न दहति, न चात्र ज्वलति।

विषप्रतीकारमाह— **जीवन्तीति**। जीवन्तीश्वेतामुष्ककपुष्पवन्दाकाभिः जीवन्ती गुडूची श्वेता शङ्खिनी मुष्कको लोध्रभेदः पुष्पवन्दाका करवीरोपरिजाता वृक्षरुहा ताभिः अर्थात् तासां मूलैः पत्रैश्च गुम्फिताभिर्मालाभिः गृहनिवेशिताभिः, अक्षीवे शिग्रौ जातस्य अश्वत्थस्य पिप्पलस्य, प्रतानेन च तत्पत्रनिर्मितेन माल्येन च गृहनिवेशितेन, गुप्तं गृहं सर्पाः, विषाणि दारदादीनि स्थावरविषाणि वा, न प्रसहन्ते न बाधन्ते। मार्जारमयूरनकुलपृषतोत्सर्गः सर्पान्

सर्गः सर्पान् भक्षयति । शुकः शारिका भृङ्गराजो वा सर्पविषशङ्कायां क्रोशति । क्रौञ्चो विषाभ्याशे माद्यति, ग्लायति जीवञ्जीवकः, म्रियते मत्तकोकिलः, चकोरस्याक्षिणी विरज्येते । इत्येवम् अग्निविषसर्पेभ्यः प्रतिकुर्वीत ।

पृष्ठतः कक्ष्याविभागे स्त्रीनिवेशो गर्भव्याधिवैद्यप्रत्याख्यातसंस्था वृक्षोदकस्थानं च । बहिः कन्याकुमारपुरम् । पुरस्तादलङ्कारभूमिः मन्त्रभूमिरुपस्थानं कुमाराध्यक्षस्थानं च । कक्ष्यान्तरेष्वन्तर्वंशिकसैन्यं तिष्ठेत् ।

भक्षयति बिडालकेकिबभ्रुमृगाः गृहे निर्यन्त्रणविसृष्टाः सर्पान् नाशयन्ति । शुकः, शारिका पक्षिभेदः, भृङ्गराजो वा धूम्याटोऽलिभेदो वा, सर्पविषशङ्कायां क्रोशति क्रन्दति । विषाभ्याशे विषसान्निध्ये, क्रौञ्चः पक्षिविशेषः, माद्यति विह्वलति । जीवञ्जीवकः पक्षिभेदः ग्लायति क्षीणहर्षो भवति । मत्तकोकिलः म्रियते । चकोरस्य चन्द्रिकाप्रियस्य पक्षिणः, अक्षिणी विरज्येते विरागं प्राप्नुतः स्ववर्णं त्यजत इत्यर्थः । इत्येवम् उक्तप्रकारं वस्तुतत्त्वं विदित्वा, अग्निविषसर्पेभ्यः, प्रतिकुर्वीत रक्षां विदधीत ।

पृष्ठत इति । पृष्ठतः कक्ष्याविभागे राजावसथस्य पश्चाद्भागे पृथङ्निर्मितायां कक्ष्यायां, स्त्रीनिवेशः देवीवासस्थानं भवति । तस्य पृष्ठतः कक्ष्याविभागे, गर्भव्याधिवैद्यप्रत्याख्यातसंस्थाः गर्भसंस्था देवीनां गर्भावस्थायां वासार्था तस्याः पृष्ठतो व्याध्यवस्थायां वासार्था व्याधिसंस्था तस्याः पृष्ठत अचिकित्सनीयरोगा इति वैद्येन परित्यक्तानां देवीनां वासार्था वैद्यप्रत्याख्यातसंस्था चेत्येतास्तिस्रः संस्थाः । तासां पृष्ठतः वृक्षोदकस्थानं च उद्यानतटाकादिकं च भवति । बहिः उक्तेभ्यो बहिर्देशे, कन्याकुमारपुरं कन्यानिवेशः अप्राप्तयौवनराजपुत्रनिवेशश्च भवति । इत्थं पृष्ठसन्निवेशः उक्तः । पुरस्तात्सन्निवेशमाह — पुरस्तादिति । पुरस्ताद् वासभवनस्यासन्ने कक्ष्याविभागे, अलङ्कारभूमिः दृष्टिविलोभनविचित्रमण्डनयुक्तः प्रासादः, ततो मन्त्रभूमिः मन्त्रसभा, तत उपस्थानम् आस्थानमण्डपः, ततः कुमाराध्यक्षस्थानं कुमारस्थानं यून राजपुत्राणां स्थानम् अध्यक्षस्थानं सन्निधातृसमाहर्तृप्रभृतीनां कार्याध्यक्षाणां स्वकर्मानुष्ठानस्थानं च, भवति । कक्ष्यान्तरेषु कक्ष्याणां मध्येषु अन्तर्वंशिकसैन्यम् अन्तःपुराधिकृतानां कञ्चुकिप्रभृतीनां गणः, तिष्ठेत् ।

अन्तर्गृहगतः स्थविरस्त्रीपरिशुद्धां देवीं पश्येत् । न काञ्चिदभिगच्छेत् । देवीगृहे लीनो हि भ्राता भद्रसेनं जघान, मातुः शय्यान्तर्गतश्च पुत्रः कारूशम् । लाजान् मधुनेति विषेण पर्यस्य देवी काशिराजं, विषदिग्धेन नूपुरेण वैरन्त्यं, मेखलामणिना सौवीरं, जालूथमादर्शेन, वेण्यां गूढं शस्त्रं कृत्वा देवी विडूरथं जघान । तस्मादेतान्यास्पदानि परिहरेत् ।

मुण्डजटिलकुहकप्रतिसंसर्गं बाह्याभिश्च दासीभिः प्रतिषेधयेत् । नचैनाः कुल्याः पश्येयुरन्यत्र गर्भव्याधिसंस्थाभ्यः । रूपाजीवाः

अन्तर्गृहेत्यादि । अन्तर्गृहगतः स्ववासगृहस्थितः, नतु देवीगृहगतः, स्थविरस्त्रीपरिशुद्धाम् आप्तवृद्धपरिचारिकया परिशोधितां, देवीं पश्येत् । काञ्चिद् नाभिगच्छेत् कामपि देवीमुद्दिश्य स्वयं तद्गृहं न गच्छेत् । देवीगृहाभिगमने दोषं निदर्शयति—देवीगृह इत्यादि । भ्राता कलिङ्गेश्वरस्य भद्रसेनस्य राज्ञः सोदर्यः वीरसेननामा । स हि तद्भार्यया कृतसंजल्पस्तद्गृहैकदेशस्मिल्लीनो राज्यं च जिहीर्षुर्भद्रसेनं जघानेति इतिहासः । कारूशं करूशदेशाधिपतिम् । वृद्धस्त्रीजनापरिशोधितदेवीदर्शने दोषं निदर्शयति—लाजामिति । देवी, मधुनेति मधुना माक्षिकेण मिश्रिताः इति वदन्ती, लाजान् विषेण पर्यस्य मिश्रयित्वा भोजयित्वा च, काशिराजं युद्धविजितदेवीबन्धूपरोधापराधिनं, जघान । वैरन्त्यं तन्नामकं वनवासिदेशेश्वरं, देवी सपत्नीमिथ्याभिशंसनमन्युवशंवदा, विषदिग्धेन स्पर्शवेधिगरलोपलिप्तेन, नूपुरेण जघान क्रीडाभिघातमिषेण मारितवतीत्यर्थः । सौवीरं तद्देशपतिं परन्तपसत्यं मेखलामणिना काञ्चीरत्नेन विषदिग्धेन, देवी अतिवाक्पारुष्यतापिता, जघान । जालूथं राजानम् अयोध्याधिपतिं, देवी पतिदारान्तरासक्तिमन्यूपतप्ता, आदर्शेन मुकुरेण विषदिग्धेन, अघ्नन आदर्शस्पर्शेन मुखे विसर्पमुत्पाद्य व्यापादयामास । देवी शस्त्रं वेण्यां गूढं कृत्वा विडूरथं राजानं जघान । तस्माद् एतानि आस्पदानि व्यापत्तिनिमित्तानि, परिहरेत् ।

मुण्डेत्यादि । मुण्डजटिलकुहकैः मुण्डैः बौद्धभिक्षुक्षपणकादिभिः जटिलैः शैवपाशुपतादिभिः कुहकैः मायाप्रयोक्तृभिश्च प्रतिसंसर्गं परिचयम् अर्थाद् देवीनां, प्रतिषेधयेद् वारयेत् । बाह्याभिः दासीभिश्च प्रतिषेधयेद् अर्थात् प्रतिसंसर्गम् । नचेति । कुल्याः देवीबान्धवाः, एनाः देवीः, गर्भव्याधिसंस्थाभ्योऽन्यत्र

स्नानप्रघर्षशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येयुः । आशीतिकाः पुरुषाः पञ्चाशत्काः स्त्रियो वा मातापितृव्यञ्जनाः स्थविरवर्षवराभ्यागारिकाश्चावरोधानां शौचाशौचं विद्युः स्थापयेयुश्च स्वामिहिते ।

स्वभूमौ च वसेत् सर्वः परभूमौ न सञ्चरेत् ।
नच बाह्येन संसर्गं कश्चिदाभ्यन्तरो व्रजेत् ॥
सर्वं चावेक्षितं द्रव्यं निबद्धागमनिर्गमम् ।
निर्गच्छेदधिगच्छेद् वा मुद्रासङ्क्रान्तभूमिकम् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः ॥

प्रसवव्याध्यनुमरणकालेभ्योऽन्यस्मिन् काले, न पश्येयुः । रूपेत्यादि । रूपाजीवाः वेश्याः । स्नानप्रघर्षशुद्धशरीराः स्नानेन कायमलवर्षणेन च शुद्धदेहाः । पश्येयुः, राजानं परिचर्यार्थम् । देवीनां शौचाशौचगवेषणपूर्वं पथि स्थापनं बन्धुकरणीयं के कुर्युस्तत्राह— **आशीतिका** इति । मातापितृव्यञ्जनाः मातापितृसधर्माणः, आशीतिका अशीतिवयस्काः, पुरुषाः, पञ्चाशत्काः पञ्चाशद्वयस्काः, स्त्रियो वा, स्थविरवर्षवराभ्यागारिकाश्च वृद्धाः षण्डाश्च येऽभ्यागारिकाः कुटुम्बचिन्तकास्ते च, अवरोधानाम् अन्तःपुरस्त्रीणां शौचाशौचं विद्युः स्वामिहिते स्थापयेयुश्च, अर्थादवरोधान् ।

स्वभूमाविति । सर्वः देवीजनोऽन्तर्वंशिकजनश्च, स्वभूमौ आत्मनः क्लृप्ते स्थाने, वसेत्, परभूमौ न सञ्चरेत् । आभ्यन्तरः कश्चिद् जनः बाह्येन जनेन संसर्गं नच व्रजेद् गच्छेत् ॥

सर्वमिति । निबद्धागमनिर्गमम् अमुकस्थानादागतममुकस्थानं गमिष्यतीति पुस्तकार्पितागमनिर्गमं, मुद्रासंक्रान्तभूमिकं मुद्राभिरागमनिर्गमस्थानसम्बन्धिनीभिः संक्रान्ता अङ्किता भूमिः आधारभाण्डं यस्य तत् तथाभूतं, सर्वं द्रव्यं धनम्, अवेक्षितं स्वयं साक्षाद् दृष्टं सत्, निर्गच्छेद् अधिगच्छेद्वा निर्गमयेत् स्वीकुर्याद्वा ॥

इति कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे
विंशोऽध्यायः निशान्तप्रणिधिः ॥

१८. प्रक. आत्मरक्षितकम्।

शयनादुत्थितः स्त्रीगणैर्धन्विभिः परिगृह्येत, द्वितीयस्यां कक्ष्यायां कञ्चुकोष्णीषिभिर्वर्षवराभ्यागारिकैः, तृतीयस्यां कुब्जवामनकिरातैः, चतुर्थ्यां मन्त्रिभिः सम्बन्धिभिर्दौवारिकैश्च प्रासपाणिभिः।

पितृपैतामहं महासम्बन्धानुबन्धं शिक्षितमनुरक्तं कृतकर्माणं जनमासन्नं कुर्वीत, नान्यतोदेशीयमकृतार्थमानं स्वदेशीयं वाप्यपकृत्योपगृहीतम्। अन्तर्वंशिकसैन्यं राजानमन्तःपुरं च रक्षेत्।

गुप्ते देशे माहानसिकः सर्वमास्वादबाहुल्येन कर्म कारयेत्। तद् राजा तथैव प्रतिभुञ्जीत पूर्वमग्नये वयोभ्यश्च बलिं कृत्वा।

आत्मरक्षितकमिति सूत्रम्। आत्मनो रक्षणमुच्यत इत्यर्थः। राज्ञः पुत्रदारेभ्यो रक्षणमुक्तं, तदन्येभ्य इदानीमभिधीयते।

शयनादित्यादि। धन्विभिः धनुष्पाणिभिः। परिगृह्येत परिवार्येत। कञ्चुकोष्णीषिभिः वारवाणशिरस्त्राणधारिभिः। वर्षवराभ्यागारिकैः षण्डैः राजगृहकार्यचिन्तकैश्च। कुब्जवामनकिरातैः गडुलैः खर्वैर्म्लेच्छजातिविशेषैश्च। प्रासपाणिभिः कुन्तहस्तैः।

अङ्गरक्षकमाह — **पित्रि**त्यादि। पितृपैतामहं वंशपारम्पर्यप्राप्तम्। महासम्बन्धानुबन्धं महान् प्रशस्तः सम्बन्धोऽन्वयः येषां ते महासम्बन्धाः महाकुलाः तैरनुबन्धः सम्बन्धानुवृत्तिर्यस्य तम्। शिक्षितं कृतविद्यम्। कृतकर्माणं कृतं दृष्टं कर्म अनुरक्तपुरुषोचितं यस्य तम्। आसन्नं कुर्वीत निकटवर्तिनं कुर्वीत स्वदेहरक्षार्थम्। वैदेशिकमकृतधनहिरण्यादिदानसत्कारं सन्तं, स्वदेशीयमपि वा पूर्वमपकृत्य पश्चात् स्वीकृतं जनम् आसन्नं न कुर्यादित्याह —**नान्यतोदेशीयमि**त्यादि। **अन्तरि**ति। अन्तर्वंशिकसैन्यं कञ्चुकिनिर्मुण्डकादिगणः, राजानम् अन्तःपुरं च रक्षेत्।

अभ्यवहाररक्षार्थमाह—**गुप्ते** इति। माहानसिकः पाकशालानियुक्तः, गुप्ते अन्यादृश्ये देशे, सर्वं कर्म सर्वप्रकारं पाककर्म, आस्वादबाहुल्येन कारयेत् बहुलमास्वाद्य साधयेत्, अथवा आस्वादः स्वादुता तदतिशययुक्तं कारयेत्। राजा, तत् साधितमन्नादिकं, तथैव तेनैव रूपेण युक्तं नतु यातयामतया वैरूप्यमापन्नं, प्रतिभुञ्जीत। किं कृत्वा, पूर्वं स्वयमभ्यवहरणात्

अग्नेर्ज्वालाधूमनीलता शब्दस्फोटनं च विषयुक्तस्य, वयसां विपत्तिश्च। अन्नस्योष्मा मयूरग्रीवाभः शैत्यमाशु क्लिष्टस्येव वैवर्ण्यं सोदकत्वमक्लिन्नत्वं च। व्यञ्जनानामाशुशुष्कत्वं च क्वाथः श्यामफेनपटलविच्छिन्नभावो गन्धस्पर्शरसवधश्च। द्रवेषु हीनातिरिक्तच्छायादर्शनं फेनपटलसीमन्तोर्ध्वराजीदर्शनं च। रसस्य मध्ये नीला राजी, पयसस्ताम्रा, मद्यतोययोः काली, दध्नः श्यामा, मधुनः श्वेता। द्रव्याणामार्द्राणाम्

प्राक्, अग्नये बलिं कृत्वा वैश्वदेवं कृत्वा, वयोभ्यश्च बलिं कृत्वा पक्षिभ्यश्च बलिं दत्वा। तदुभयं विहितानुष्ठानार्थं विषप्रतीकारार्थं च बोद्धव्यम्।

विषयुक्तचिह्नान्याह—**अग्नेरिति**। विषयुक्तस्य विषदूषितान्नसंपृक्तस्य, अग्नेः, ज्वालाधूमनीलता ज्वालाधूमयोर्नीलत्वं, शब्दस्फोटनं च चटचटाशब्दश्च भवति। विषयुक्तानां वयसां विषसंपृष्टान्नभक्षिणां पक्षिणां, विपत्तिश्च मरणं च भवति। **अन्नस्येति**। अन्नस्य विषमिश्रस्य, ऊष्मा बाष्पः, मयूरग्रीवाभः मयूरकण्ठवद् मेचकः, आशु शैत्यं सद्यः शीतत्वं, क्लिष्टस्येव वैवर्ण्यं करसंपिष्टस्येव वर्णवैरूप्यं, सोदकत्वं सिक्थैकीभावः अवैशद्यं वा, अक्लिन्नत्वं च असम्यक्पाकत्वं च भवति। **व्यञ्जनानामिति**। व्यञ्जनानां सूपादीनाम्, आशुशुष्कत्वं शीघ्रशोषः, क्वाथः अग्नियोगे तक्रादेरिवोत्क्वथनं, श्यामफेनपटलविच्छिन्नभावः श्यामस्य जायमानस्य फेनमण्डलस्य विच्छिन्नत्वं व्यञ्जनाद् विभक्ततया स्थितिः, गन्धस्पर्शरसवधश्च गन्धस्पर्शरसानां नाशश्च, भवति। **द्रवेष्विति**। द्रवेषु यूषादिषु विषयुक्तेषु, हीनातिरिक्तच्छायादर्शनं हीनाया अतिरिक्ताया वा स्वीयच्छायाया दर्शनं, फेनपटलसीमन्तोर्ध्वराजीदर्शनं फेनपटलस्य दर्शनं सीमन्तदर्शनं विभागदर्शनम्—अर्थात् फेनपटलस्य यूषादिभ्यो विभक्ततयावस्थानदर्शनम्—ऊर्ध्वराजीदर्शनम् उपरिरेखादर्शनं च, भवति। **रसस्येति**। रसस्य सर्पिस्तैलेक्षुरसादेः विषयुक्तस्य, मध्ये नीला राजी, पयसः क्षीरस्य मध्ये ताम्रा राजिः, मद्यतोययोः सुराजलयोः मध्ये काली राजिः, दध्नः श्यामा वैदूर्यवर्णा राजिः, मधुनः माक्षिकस्य श्वेता राजिः, भवति। **द्रव्याणामिति**। आर्द्राणां द्रव्याणाम् आम्रदाडिमफलादीनां विषयुक्तानाम्, आशुप्रम्लानत्वम्, उत्पक्वभावः अतिपक्वस्येव पूतीभावः, क्वाथनीलश्यावता च क्वाथे निष्पाके नीलत्वं कार्ष्ण्यं श्यावत्वं कापिश्यं च भवति। शुष्काणां द्रव्याणाम्

१. 'मा च म' ख. पाठः.

आशुप्रम्लानत्वमुत्पक्वभावः क्वाथनीलश्यावता च । शुष्काणामाशुशातनं वैवर्ण्यं च । कठिनानां मृदुत्वं मृदूनां कठिनत्वं च । तदभ्याशे क्षुद्रसत्त्ववधश्च । आस्तरणप्रावरणानां श्याममण्डलता तन्तुरोमपक्ष्मशातनं च । लोहमणिमयानां पङ्कमलोपदेहता स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च । इति विषयुक्तलिङ्गानि ।

विषप्रदस्य तु शुष्कश्याववक्त्रता वाक्सङ्गः स्वेदो विजृम्भणं चातिमात्रं वेपथुः प्रस्खलनं वाक्यविप्रेक्षणमावेगः कर्मणि स्वभूमौ चानवस्थानमिति ।

तस्मादस्य जाङ्गलीविदो भिषजश्चासन्नाः स्युः ।

आशुशातनं चूर्णीभावः, वैवर्ण्यं च भवति । कठिनानां द्रव्याणां विषयुक्तानां मृदुत्वं, मृदूनां कठिनत्वं च भवति । **तदभ्याश** इति । तदभ्याशे क्षुद्रसत्त्ववधश्च विषयुक्तद्रव्यसमीपे चरतां क्षुद्रजन्तूनां पिपीलिकादीनां मरणं च भवति । **आस्तरणे**त्यादि । आस्तरणप्रावरणानाम् आसनशयनकम्बलानां नीशाराणां च कार्पासतन्तुवास्त्रिकादिमयानां विषस्पृष्टानां, श्याममण्डलता विवर्णमण्डलयुक्तता, तन्तुरोमपक्ष्मशातनं च तन्तूनां रोम्णां च यानि पक्ष्माणि सूक्ष्मांशाः तेषां शातनं भ्रंशनं च, भवति । **लोहे**त्यादि । लोहमणिमयानां लोहः सुवर्णादिः मणिः स्फटिकादिः तन्मयानां वस्तूनां विषयुक्तानां, पङ्कमलोपदेहता पङ्कमलेनोपदेहो लेपनं यस्मिंस्तत्ता, स्नेहरागगौरवप्रभाववर्णस्पर्शवधश्च स्नेहः स्निग्धत्वं रागः त्विट् गौरवं गुरुत्वं प्रभावः स्वकार्यसाधनशक्तिः वर्णः शुक्लादिः स्पर्शः श्लक्ष्णखरादिस्पर्शगुणः एतेषां नाशश्च भवति । इति विषयुक्तलिङ्गानि विषयुक्तवस्तुलक्षणानि, विजानीयादिति शेषः ।

विषप्रदस्य निग्रहाय लिङ्गान्याह — **विषे**त्यादि । शुष्कश्याववक्त्रता शुष्ककपिशमुखत्वम् । वाक्सङ्गः वाचि प्रतिबन्धः । प्रस्खलनम् अविषमेऽपि देशे । वाक्यविप्रेक्षणं वाक्ये अनेकेनाप्युच्यमानेऽवधानदानम् । आवेगः परवशता । कर्मणि अनवस्थानं स्वव्यापारेऽनवस्थितिः आरब्धं कर्मानिर्वर्त्यैवान्यत्र प्रवृत्तिः । स्वभूमौ अनवस्थानं च प्रथमादिकक्ष्यानियुक्तस्य तां विहाय द्वितीयादिकक्ष्यागमनं च ।

तस्मादित्यादि । अस्य राज्ञः । जाङ्गलीविदः विषविद्याभिज्ञाः । भिषजश्च विषेतरचिकित्सकाश्च ।

भिषग् भैषज्यागारादास्वादविशुद्धमौषधं गृहीत्वा पाचकपेषकाभ्यामात्मना च प्रतिस्वाद्य राज्ञे प्रयच्छेत् । पानं पानीयं चौषधेन व्याख्यातम् ।

कल्पकप्रसाधकाः स्नातशुद्धवस्त्रहस्ताः समुद्रमुपकरणमन्तर्वंशिकहस्तादादाय परिचरेयुः ।

स्नापकसंवाहकास्तरकरजकमालाकारकर्म दास्यः कुर्युः, ताभिरधिष्ठिता वा शिल्पिनः । आत्मचक्षुषि निवेश्य वस्त्रमाल्यं दद्युः, स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्ववक्षोबाहुषु च । एतेन परस्मादागतकं च व्याख्यातम् ।

भिषगिति । भिषग्, भैषज्यागाराद् औषधशालायाः, आस्वादविशुद्धं स्वयमास्वादेन निर्दोषतयावगतम्, औषधं गृहीत्वा, पाचकपेषकाभ्याम् औषधपक्तृपेष्टृभ्याम्, आत्मना च, प्रतिस्वाद्य राजसमक्षं स्वादयित्वा, राज्ञे प्रयच्छेद् दद्यात । पानमिति । पानं मद्यं, पानीयं च जलं च, औषधेन व्याख्यातम् औषधदानोक्तविधिना शोधयित्वा दातव्यमित्युक्तप्रायमित्यर्थः ।

कल्पकेत्यादि । कल्पकप्रसाधकाः कल्पका नापिताः श्मश्रुशिल्पिनः प्रसाधका अलङ्कर्तारश्च, स्नातशुद्धवस्त्रहस्ताः सन्तः स्नाताः शुद्धवस्त्राः शुद्धहस्ताश्च सन्तः, समुद्रं मुद्राङ्कितम् उपकरणं क्षुरवस्त्राभरणमञ्जूषादिकम्, अन्तर्वंशिकहस्ताद् आदाय तदुपनेतृकञ्चुकिहस्ताद् गृहीत्वा, परिचरेयुः, राजानम् ।

स्नापकेत्यादि । तत्र संवाहकः अङ्गमर्दकः । आस्तरकः आसनशयनकल्पकः । शेषाः प्रसिद्धाः । स्नापकादिकर्म दास्यः सुपरीक्षिताः कुर्युः । ताभिः दासीभिः, अधिष्ठिता अध्यक्षिताः, शिल्पिनो वा स्नापकादिशिल्पिनो वा, कुर्युः । आत्मेत्यादि । वस्त्रमाल्यम् आत्मचक्षुषि, निवेश्य विषयोगशुद्धिबोधनार्थं निधाय, दद्युः राज्ञे । स्नानानुलेपनप्रघर्षचूर्णवासस्नानीयानि च स्नानं गन्धामलकादि अनुलेपनं चन्दनादि प्रघर्षः पञ्चकषायादि चूर्णवासः पटवासकादि स्नानीयं स्नाने शिरसि देयं चूर्णम् एतानि च, स्ववक्षोबाहुषु स्ववक्षःसहितेषु भुजेषु, चाद् उक्ते च, निवेश्य दद्युः । एतेनेति । परस्मादागतकं च परदेशात् प्राप्तं भोग्यवस्तु च, एतेन उक्तेन वस्त्रादिदानविधिना, व्याख्यातं प्रतिपादितदानविधानं, बोद्धव्यमिति शेषः ।

कुशीलवाः शस्त्राग्निरसवर्जं नर्मयेयुः। आतोद्यानि चैषामन्तस्तिष्ठेयुः, अश्वरथद्विपालङ्काराश्च।

मौलपुरुषाधिष्ठितं यानवाहनमारोहेत्, नावं चाप्तनाविकाधिष्ठिताम्। अन्यनौप्रतिबद्धां वातवेगवशां च नोपेयात्। उदकान्ते सैन्यमासीत। मत्स्यग्राहविशुद्धमवगाहेत। व्यालग्राहपरिशुद्धमुद्यानं गच्छेत्।

लुब्धकैः श्वगणिभिरपास्तस्तेनव्यालपराबाधभयं चललक्षपरिचयार्थं मृगारण्यं गच्छेत्।

आप्तशस्त्रग्राहाधिष्ठितः सिद्धतापसं पश्येद्, मन्त्रिपरिषदा सामन्तदूतम्। सन्नद्धोऽश्वं हस्तिनं रथं वारूढः सन्नद्धमनीकं गच्छेत्।

कुशीलवा इति। कुशीलवाः लङ्घनप्लवनादिनर्मवृत्तयो मनुष्यजातिभेदाः, शस्त्राग्निरसवर्जम् आयुधवह्निविषाणि प्रेक्षणीयाङ्गानि वर्जयित्वा तदन्यैरुपकरणैरित्यर्थः, नर्मयेयुः क्रीडां दर्शयेयुः, राजान्तिके। एषां कुशीलवानाम्, आतोद्यानि च वाद्यानि च, अन्तः राजभवनाभ्यन्तरे, तिष्ठेयुः, विषशङ्कापरिहारार्थं, नर्मप्रदर्शनावसरे परं तैर्गृह्येरन्नित्यभिप्रायः। **अश्वरथद्विपालङ्काराश्च** अश्वादीनां त्रयाणाम् अलङ्काराश्च, अन्तस्तिष्ठेयुरिति सम्बध्यते।

मौलेत्यादि। मौलपुरुषाधिष्ठितम् आप्तप्रधानपुरुषकृताध्यक्ष्यं, यानवाहनं शिबिकादिकमश्वादिकं च, आरोहेत्। नावं च, आप्तनाविकाधिष्ठितां विश्वस्ततारकाध्यक्षितां सतीम्, आरोहेत्। अन्यनौप्रतिबद्धाम् अन्यया नावा सहैव नेतव्या यथा स्यात् तथान्यस्यां नावि सूत्रबद्धां, नावं, वातवेगवशां वातायत्तगमनां नावं च, नोपेयात् नारोहेत्। नावा गच्छतश्च रक्षार्थमुभयतीरयोः सैन्यं तिष्ठेदित्याह — **उदकान्त** इति। **मत्स्येत्यादि**। मत्स्यग्राहविशुद्धं मत्स्यग्राहाः कैवर्ताः तैर्विशुद्धं परिशोधितम्, अर्थान्निश्चिततिमिनक्रादिहिंस्रजन्त्वसान्निध्यं, जलम्, अवगाहेत स्नानार्थम्। **व्यालेत्यादि**। व्यालग्राहपरिशुद्धं व्यालग्राहाः सर्पग्राहिणः तैः परिशोधितम्, उद्यानं गच्छेत्।

लुब्धकैरिति। लुब्धकैः व्याधैः, श्वगणिभिः श्वगणजीविभिश्च, अपास्तस्तेनव्यालपराबाधभयं निरस्तचोरव्याघ्राद्युपद्रवभयं, मृगारण्यं, चललक्षपरिचयार्थं हरिणादिषु चललक्ष्येषु वेधाभ्यासार्थं, गच्छेत्।

अपूर्वं सिद्धतापसं दिदृक्षुमागतम् आप्तशस्त्रिगुप्त एव सन् पश्येत् शत्रुप्रणिहितत्वभयादित्यभिप्रेत्याह — **आप्तेत्यादि**। **मन्त्रीत्यादि**। मन्त्रिपरिषदा, अधिष्ठित इत्यर्थः, सामन्तदूतं पश्येत्। **सन्नद्ध** इति। **सन्नद्धः** शिरस्त्रा-

निर्याणेऽभियाने च राजमार्गमुभयतः कृतारक्षं दण्डिभिरपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं गच्छेत् । न पुरुषसम्बाधमवगाहेत । यात्रासमाजोत्सवप्रवहणानि च दशवर्गिकाधिष्ठितानि गच्छेत् ।

यथा च योगपुरुषैरन्यान् राजाधितिष्ठति ।
तथायमन्यबाधेभ्यो रक्षेदात्मानमात्मवान् ॥

इति कौटलीयार्थशास्त्रे विनयाधिकारिके प्रथमाधिकरणे एकविंशोऽध्यायः आत्मरक्षितकम् । एतावता कौटलीयस्यार्थशास्त्रस्य विनयाधिकारिकं प्रथममधिकरणं समाप्तम् ॥

णाद्यामोचनसुभगयुद्धोचितवेषः, अश्वं हस्तिनं रथं वा आरूढः सन्, सन्नद्धम् अनीकं युद्धसज्जं सैन्यं, गच्छेत् ।

निर्याण इति । निर्याणे देशान्तरं प्रति गमने, अभियाने प्रवेशे च, राजमार्गम् उभयतः राजमार्गस्योभयपार्श्वयोः, दण्डिभिः वेत्रिभिः, कृतारक्षं कृतरक्षाविधानं यथा भवति तथा, अपास्तशस्त्रहस्तप्रव्रजितव्यङ्गं शस्त्रहस्ताः प्रव्रजिताः सन्न्यासिनः व्यङ्गाः अङ्गविहीनाश्च अपास्ताः राजदृष्टिगोचरादुत्सारिताः यस्मिन् कर्मणि तद् यथा भवति तथा, गच्छेत् । **न पुरुषे**त्यादि । पुरुषसम्बाधं जनसङ्कुलं प्रदेशं, नावगाहेत न प्रविशेत् । **यात्रे**त्यादि । यात्रासमाजोत्सवप्रवहणानि च यात्रा देवतानां, समाजो जनसमुदायः, उत्सवः इन्द्रवसन्तोत्सवादिः, प्रवहणम् उद्यानभोजनादि एतानि, दशवर्गिकाधिष्ठितानि गच्छेद् दशवर्गिकेण दशभटनायकेन अधिष्ठितानि कृत्वा गच्छेद् न त्वेकाकी परिमितपरिवारो वेत्यर्थः ।

अध्यायप्रान्ते श्लोकमाह — **यथा चे**ति । यथा, अयं राजा विजिगीषुः, योगपुरुषैः कार्पटिकैः गूढपुरुषैः, अन्यान् नृपतीन्, अधितिष्ठति बाधत इत्यर्थः, तथा, अन्यबाधेभ्यः तत्प्रकारेभ्यः अन्यनृपोत्पादितेभ्यः योगपुरुषोपद्रवेभ्यः, आत्मानम्, आत्मवान् प्रयत्नवान् सन् रक्षेत् ॥

व्याख्यायाम**र्थशास्त्रस्य कौटल्यमुनि**जन्मनः ।
आद्याधिकरणं पूर्तिं **गाणपत्यामु**पागमत् ॥

इति श्री**वाञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बाश्रीरामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु कौटलीयार्थशास्त्रव्याख्यायां विनयाधिकारिके प्रथमाधिकरणे एकविंशोऽध्यायः आत्मरक्षितकम् । विनयाधिकारिकं प्रथममधिकरणं समाप्तम् ॥

अध्यक्षप्रचारः — द्वितीयमधिकरणम् ।

१९. प्रक. जनपदनिवेशः।

भूतपूर्वमभूतपूर्वं वा जनपदं परदेशापवाहनेन स्वदेशाभिष्यन्दवमनेन वा निवेशयेत् ।

शूद्रकर्षकप्रायं कुलशतावरं पञ्चशतकुलपरं ग्रामं क्रोशद्विक्रोशसीमानमन्योन्यारक्षं निवेशयेत् । नदीशैलवनगृष्टिदरीसेतुबन्धशाल्मलीशमीक्षीरवृक्षानन्तेषु सीम्नां स्थापयेत् ।

अष्टशतग्राम्या मध्ये स्थानीयं, चतुश्शतग्राम्या द्रोणमुखं,

अथाध्यक्षप्रचाराख्यं द्वितीयमधिकरणमारभ्यते । यथोक्तगुणसम्पन्नो राजा सर्वाणि कार्याणि तत्तदध्यक्षद्वारेणैवाध्यक्षयितुं प्रभवतीत्यतोऽध्यक्षांस्तद्व्यापारांश्च प्राधान्येनाभिधातुमिदमधिकरणम् । तत्रेदं प्रथमं सूत्रं — **जनपदनिवेश** इति । जनश्चतुर्वर्णाश्रमजातिलक्षणः, पदं तस्य स्थानं स्थानीय-द्रोणमुख-कार्वटिक-संग्रह-ग्रामादिकं, तस्य निवेशः रचनात्राभिधीयत इति सूत्रार्थः । 'स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतिरि'त्युक्तं, तत्र स्वाम्यमात्यप्रकृती प्रतिपादिते, जनपदप्रकृतिरिदानीमभिधीयते ।

भूतेत्यादि । भूतपूर्वं पूर्वं स्थितम्, अभूतपूर्वम् अभिनवं वा, जनपदं, परदेशापवाहनेन परदेशाज्जनानयनेन, स्वदेशाभिष्यन्दवमनेन वा अभिष्यन्दोऽतिवृद्धिः वमनमाहरणं स्वदेशे जनानामतिवर्धनादाधारापर्याप्तिदोषादन्यत्राहरणेन वा, निवेशयेद् रचयेत् ।

शूद्रेत्यादि । ग्रामं, शूद्रकर्षकप्रायं शूद्रकृषीवलबहुलं, कुलशतावरं गृहशतान्यूनं, पञ्चशतकुलपरं पञ्चशतानधिकगृहयुक्तं, क्रोशद्विक्रोशसीमानं क्रोशसीमानं द्विक्रोशसीमानं वा एकस्माद् ग्रामाद् ग्रामान्तरस्य क्रोशदूरव्यवधानं क्रोशद्वयव्यवधानं वा यथा भवेत् तथा क्लृप्तमित्यर्थः, अन्योन्यमारक्षतीत्यन्योन्यारक्षं परस्परसाहाय्यकरणक्षमं, निवेशयेत् । **नदीत्यादि** । सीम्नाम् अन्तेषु, नदी, शैलः शिलाकूटः, वनं, गृष्टिर्बदरा नामौषधिर्वृक्षविशेषो वा, दरी श्वभ्रं, सेतुबन्धः, शाल्मली स्थिरायुराख्यो वृक्षः, शमी सक्तुफला, क्षीरवृक्षः वटादिरित्येतान् स्थापयेत् सीमरक्षार्थम् ।

अष्टशतेत्यादि । अष्टशतग्राम्याः अष्टशतानां ग्रामाणां समूहस्य, मध्ये, स्थानीयं तदाख्यं तावद्ग्रामजनतायाः क्रयविक्रयादिकर्मणोपजीव्यं रमणीयं

द्विशतग्राम्याः कार्वटिकं, दशग्रामीसङ्ग्रहेण सङ्ग्रहणं स्थापयेत् ।

अन्तेष्वन्तपालदुर्गाणि जनपदद्वाराण्यन्तपालाधिष्ठितानि स्थापयेत् । तेषामन्तराणि वागुरिकशबरपुलिन्दचण्डालारण्यचरा रक्षेयुः ।

ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यो ब्रह्मदेयान्यदण्डकराण्यभिरूपदायकानि प्रयच्छेत् । अध्यक्षसङ्ख्यायकादिभ्यो गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकारिकेभ्यश्च विक्रयाधानवर्जम् ।

महाग्रामं, स्थापयेत् निवेशयेत्, चतुश्शतग्राम्याः मध्ये, द्रोणमुखं तदाख्यं स्थानीयप्रत्यवरं ग्रामभेदं स्थापयेत्, द्विशतग्राम्या मध्ये, कार्वटिकं तदाख्यं कर्वटापरपर्यायं द्रोणमुखप्रत्यवरं स्थापयेत्, दशग्रामीसंग्रहेण ग्रामदशकसंग्रहणेन, संग्रहणं तदाख्यं कर्वटादधमं महाद्रङ्गापरपर्यायं स्थापयेत् ।

अन्तेष्विति । अन्तेषु जनपदावसानेषु, अन्तपालदुर्गाणि, अन्तपालाधिष्ठितानि अन्तपालैरनुष्ठिताध्यक्ष्याणि, जनपदद्वाराणि जनपदप्रवेशमार्गभूतानि च स्थापयेत् । तेषाम् अन्तराणि अन्तपालदुर्गाणामन्तरालदेशान्, वागुरिकशबरपुलिन्दचण्डालारण्यचराः वागुरिकाः मृगबन्धनजीविनः शबराः शूद्राद् भिल्ल्यां जाताः पुलिन्दाः निष्ट्यात् किरात्यां जाताः चण्डालाः श्मशानपालाः अरण्यचराः वनचारिणश्च, रक्षेयुः ।

ऋत्विगित्यादि । ऋत्विगाचार्यपुरोहितश्रोत्रियेभ्यः याजकाध्यापकपुरोधश्छान्दसेभ्यः, अदण्डकराणि दण्डो नाम द्विःकृषिक्लृप्तौ त्रिःकृष्यनुष्ठानादिनिमित्तः कुल्यादिजलात्युपयोगादिनिमित्तो वा दमः करः कृषिफलषष्ठांशः तदुभयरहितानि, अभिरूपदायकानि अभिरूपेभ्यः अर्हेभ्यः पुत्रादिभ्यो दायः दानं येषां तानि तथाभूतानि वंशपारम्पर्यभोग्यानीत्यर्थः यथेच्छविनियोगयोग्यानीति वा, ब्रह्मदेयानि ब्राह्मणेभ्यो देयानि अर्थात् क्षेत्राणि, प्रयच्छेद् दद्यात् । अध्यक्षेत्यादि । विक्रयाधानवर्जं मूल्यमादाय दानं विक्रयः आधीकरणमाधानं तदुभयाधिकारवर्जं केवलोपभोगायेत्यर्थः, अध्यक्षसंख्यायकादिभ्यः अध्यक्षाः सुवर्णाध्यक्षादयः सङ्ख्यायकाः गणकाः तत्प्रभृतिभ्यः, गोपस्थानिकानीकस्थचिकित्सकाश्वदमकजङ्घाकारिकेभ्यश्च गोपः दशग्रामीपञ्चग्राम्याद्यधिकारी स्थानिको नगरचतुर्भागाधिकारी अनीकस्थः हस्तिशिक्षा-

---

१. 'खार्व' ख. पाठः. २. 'ङ्घालके' ग. पाठः.

करदेभ्यः कृतक्षेत्राण्यैकपुरुषिकाणि प्रयच्छेत् । अकृतानि कर्तृभ्यो नादेयात् ।

अकृषतामाच्छिद्यान्येभ्यः प्रयच्छेत् । ग्रामभृतकवैदेहका वा कृषेयुः । अकृषन्तोऽवहीनं दद्युः । धान्यपशुहिरण्यैश्चैनाननुगृह्णीयात् । तान्यनु सुखेन दद्युः ।

अनुग्रहपरिहारौ चैभ्यः कोशवृद्धिकरौ दद्यात् । कोशोपघातिकौ वर्जयेत् । अल्पकोशो हि राजा पौरजानपदानेव ग्रसते । निवेशसमकालं यथागतकं वा परिहारं दद्यात् । निवृत्तपरिहारान् पितेवानुगृह्णीयात् ।

विचक्षणः चिकित्सको वैद्यः अश्वदमकः अश्वशिक्षाभिज्ञः जङ्घाकरिकः जाङ्घिको दूरदेशगतागतजीवी एतेभ्यश्च, क्षेत्रं प्रयच्छेदिति सामर्थ्यलभ्यम् ।

करदेभ्य इति । करदेभ्यः राजभागदायिभ्यः, कृतक्षेत्राणि कृतानि क्षेत्राणि पूर्वसिद्धसौष्ठवान् व्रैहेयशालेयादीन् केदारान्, ऐकपुरुषिकाणि एकेनैव ग्रहीतृपुरुषेण भोग्यानि, प्रयच्छेत् । अकृतानि साध्यसौष्ठवानि अर्थात् क्षेत्राणि, कर्तृभ्यो नादेयात् सौष्ठवसाधकेभ्यः करदेभ्यो न गृह्णीयात्, सर्वविधस्वाम्येन तेष्वेव स्थापयेदित्यर्थः । इह आदेयादित्यात्मनेपदाकरणमार्षम् ।

अकृषतामिति । अकृषतां कृषिमकुर्वतां, क्षेत्राणीति शेषः, आच्छिद्य हृत्वा, अन्येभ्यः प्रयच्छेत् । तदभावे ग्रामभृतकवैदेहकाः ग्रामाधिकारिणो वणिजश्च, कृषेयुः । अकृषन्तः अभ्युपेत्य कृषिमकुर्वन्तः, अवहीनं नष्टं, दद्युः । अनुपायाच्चेदकर्षणं तदा कथमित्याह — धान्यपशुहिरण्यैश्च कृष्यनुष्ठानापेक्षितैः, एनान् अभ्युपेतकृषीन् अनुगृह्णीयात् । अनु पश्चात् कृषिफलप्राप्त्यनन्तरं, तानि, धान्यादीनि सुखेन आत्मवृत्त्यपीडया, दद्युः, कर्षका राज्ञे ।

अनुग्रहेत्यादि । एभ्यः कृषिकर्तृभ्यः, अनुग्रहपरिहारौ च स्वस्थवृद्ध्यर्थं दीयमानं द्रव्यमनुग्रहः दौस्थ्यपरिहारेण स्वास्थ्यसिद्ध्यर्थं दीयमानं द्रव्यं परिहारः तौ, कोशवृद्धिकरौ दद्यात् आत्मकोशवर्धने यथा पर्यवस्येतां तथा दद्यात् । कोशोपघातिकौ कोशक्षयफलौ अनुग्रहपरिहारौ, वर्जयेत् । कुतः, हि यतः अल्पकोशः राजा पौरजानपदानेव, ग्रसते पीडयति, स्वकोशपूरणार्थम् । **निवेशेत्यादि** । निवेशसमकालं परिहारं निवेशः इदम्प्रथमकुलस्थापनं तत्तुल्यकालं परिहारं तत्काले क्लृप्तो यः स्वास्थ्यसिद्ध्यर्थं उपकारस्तमित्यर्थः, दद्यात् । यथागतकं वा दद्यात् आगतानतिक्रमेण च दद्यात्

आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् वारिस्थलपथपण्यपत्तनानि च निवेशयेत् ।

सहोदकमाहार्योदकं वा सेतुं बन्धयेत् । अन्येषां वा बध्नतां भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात्, पुण्यस्थानारामाणां च । सम्भूयसेतुबन्धादपक्रामतः कर्मकरबलीवर्दाः कर्म कुर्युः । व्ययकर्मणि च भागी स्याद्, न चांशं लभेत ।

नवनवागतकुलेभ्योऽपि दद्यादित्यर्थः । **निवृत्तेत्यादि** । निवृत्तपरिहारान् प्रत्यर्पितपरिहारद्रव्यान्, पितेव, अनुगृह्णीयाद् वृद्ध्यर्थमनुग्रहद्रव्यं दत्त्वोपकुर्यात् ।

आकरेत्यादि । आकरकर्मान्तद्रव्यहस्तिवनव्रजवणिक्पथप्रचारान् आकरकर्मान्तः आकरव्यापारस्थानं द्रव्यवनं दारुचन्दननिर्यासाद्युपकरणप्रसवक्षमं वनं हस्तिवनं गजवनं व्रजप्रचारः गोध्यक्षवक्ष्यमाणः वणिक्पथप्रचारः वणिक्पथव्यापारः एतान्, वारिस्थलपथपण्यपत्तनानि च जलपथस्थलपथपण्यक्रयविक्रयस्थानानि च, निवेशयेत् कारयेत् । पत्तनशब्दस्य क्रयविक्रयस्थानवाचित्वमाश्रित्येत्थं व्याख्यातम् । नावैकगम्यपुरवाचित्वाश्रयणे तु पण्यपत्तनं पण्यप्रधानं नौमात्रगम्यं पुरमिति व्याख्येयम् । पट्टनशब्दपाठे पुनः पण्यपट्टनं पण्यप्रधानं पट्टनं शकटैरश्वैर्नौभिश्च गम्यं पुरमित्यर्थः, 'पट्टनं शकटैर्गम्यं घोटकैर्नौभिरेव च' इति यादवाभिधानात् ।

सहोदकमिति । सहोदकं नित्यप्रवृत्तोदकं नद्यादौ, सेतुं वारणं, बन्धयेत् कुल्यादिद्वारेण कृष्याद्यर्थम् । आहार्योदकं नद्यादितो वर्षासु तुङ्गस्थलेभ्यश्च समानेयजलं सेतुं वा बन्धयेत् । बध्नतां सेतुं रचयताम्, अन्येषां वा जनानां च, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् भूमिः प्रभूतजलावरोधयोग्यं स्थलं मार्गः जलप्रवेशनिर्गमसरणिः वृक्षोपकरणं सारदार्वादिकम् एतैरनुग्रहम् एतद्दानोपकारं कुर्यात् । पुण्यस्थानारामाणां च निर्मीयमाणानां विषये, भूमिमार्गवृक्षोपकरणानुग्रहं कुर्यात् । **सम्भूयेत्यादि** । सम्भूयसेतुबन्धाद् जनैः सङ्घीभूय क्रियमाणात सेतुबन्धाद्, अपक्रामतः अपसरतः अनिच्छया स्वीयं कर्मांशमकुर्वतो जनस्य कर्मकरबलीवर्दाः भृत्याः उक्षाणश्च, कर्म कुर्युः राजा बलात् तैः कर्म कारयेदित्यभिप्रायः । अपक्रामतोऽन्यमपि दण्डमाह — **व्ययकर्मणीति** । व्ययकर्मणि च भागी अंशभाक् स्यात्, अंशं च न लभेत, अर्थात् सेतुबन्धानन्तरभवे तत्फले ।

मत्स्यप्लवहरितपण्यानां सेतुषु राजा स्वाम्यं गच्छेत् । दासाहितकबन्धूननशृण्वतो राजा विनयं ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च राजा बिभृयात्, स्त्रियमप्रजातां प्रजातायाश्च पुत्रान् ।

बालद्रव्यं ग्रामवृद्धा वर्धयेयुरा व्यवहारप्रापणात्, देवद्रव्यं च ।

अपत्यदारान् मातापितरौ भ्रातॄनप्राप्तव्यवहारान् भगिनीः कन्या विधवाश्चाबिभ्रतः शक्तिमतो द्वादशपणो दण्डोऽन्यत्र पतितेभ्यः, अन्यत्र मातुः ।

पुत्रदारमप्रतिविधाय प्रव्रजतः पूर्वः साहसदण्डः, स्त्रियं च प्रव्रा-

---

मत्स्येत्यादि । सेतुषु, उत्पद्यमानानामिति शेषः, मत्स्यप्लवहरितपण्यानां मत्स्याः प्रसिद्धाः प्लवाः कारण्डवाः जलजलजविहारिणः हरितानि पद्मोत्पलकशेरुकादीनि एषां पण्यवस्तूनां, स्वाम्यं स्वामित्वं, राजा गच्छेत्, नतु सम्भूयसेतुकारिणोऽपि । दासेत्यादि । अननुशृण्वतः स्वरक्षकनिदेशावधीरिणः, दासाहितकबन्धून् दासान् गर्भदास-गृहजात-क्रीत-लब्ध-दायोपगतादीन् आहितकान् स्वामिना धनग्रहणेनाधितां नीतान् बन्धून् पुत्रादींश्च, राजा, विनयं प्रणतिं, ग्राहयेत् । बालवृद्धव्याधितव्यसन्यनाथांश्च अनाथा ये बालादयः तांश्च, बिभृयात् पोषयेत् । अप्रजातां वन्ध्यां स्त्रियं, प्रजातायाः पुत्रांश्च, बिभृयात्, सा च ते च यद्यनाथा इत्यार्थम् ।

बालेत्यादि । बालद्रव्यं बालस्य अप्राप्तव्यवहारस्य नाथहीनस्य द्रव्यं, ग्रामवृद्धाः, वर्जयेयुः नोपयुञ्जीरन् तथैव स्थापयेयुर्वर्धनार्हं चेद् वर्धयेयुश्चेत्यभिप्रायः । कियन्तं कालम्, आ व्यवहारप्रापणात् व्यवहारप्राप्तिकालं यावत् । देवद्रव्यं च देवालयद्रव्यं च, ग्रामवृद्धा वर्जयेयुः, अवधेरयोगान्नित्यम् ।

अपत्येत्यादि । अपत्यदारान् अपत्यं दारांश्च । दारमिति पाठे समाहारद्वन्द्वः । अप्राप्तव्यवहारान् भ्रातॄन् बालान् सोदर्यान् । कन्याः भगिनीः विधवा भगिनीश्च । शक्तिमतः रक्षणोपायवतः । पतितेभ्योऽन्यत्र पतितव्यतिरेकेण, अपत्यादीनामपतितानामेवारक्षणे दण्डो नतु पतितानाम् । पतितेष्वपि प्रतिप्रसवमाह — अन्यत्र मातुरिति । माता तु पतितापि रक्षणीयैवेत्यर्थः ।

पुत्रेत्यादि । पुत्रदारमप्रतिविधाय प्रव्रजतः पुत्राणां दाराणां च जीवनोपायमदर्शयित्वा सन्न्यस्यतः, स्त्रियं प्रव्राजयतश्च प्रव्रजन्तीं प्रयोजयतश्च, पूर्वः

जयतः । लुप्तव्यवायः प्रव्रजेदापृच्छय धर्मस्थान्, अन्यथा नियम्येत ।

वानप्रस्थादन्यः प्रव्रजितभावः, सुजातादन्यः सङ्घः, सामुत्थायकादन्यः समयानुबन्धो वा नास्य जनपदमुपनिविशेत ।

न च तत्रारामा विहारार्थाः शालाः स्युः । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा न कर्मविघ्नं कुर्युः, निराश्रयत्वाद् ग्रामाणां, क्षेत्राभिरतत्वाच्च पुरुषाणां कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवतीति ।

साहसदण्डः प्रथमः साहसदण्डः 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः' इति मनूक्तलक्षणः कर्तव्यः । लुप्तेत्यादि । लुप्तव्यवायः निश्शेषनष्टमैथुनशक्तिः पुरुषः, धर्मस्थान् धर्मशास्त्रानुसारेण व्यवहारनिर्णयेऽधिकृतान् प्राड्विवाकादीन्, आपृच्छय अनुज्ञाप्य, प्रव्रजेत् परिव्रजेत् सन्न्यस्येत, अन्यथा नियम्येत अनेवंप्रव्रजन् कारागृहे निवेश्येत ।

अथ जनपदवासानर्हानाह—वानेत्यादि । वानप्रस्थादन्यः प्रव्रजितभावः वैखानसादतिरिक्तः प्रव्रजितावस्थः, अर्थाच्चतुर्थाश्रमी, अस्य राज्ञो जनपदं नोपनिविशेत नाध्यासीत । प्रतिषेधनिमित्तं तु अभिशङ्कनीयशीलत्वमुक्तप्रायम् । सुजातादन्यः सङ्घः सुष्ठु जातात् राजराज्यक्षेमायोत्पन्नात् जनसङ्घाद् अन्यो दुर्जातः जनसङ्घः, अस्य जनपदं नोपनिविशेत । सामुत्थायकादन्यः समयानुबन्धो वा समुत्थायकाः सम्भूयसेतुबन्धादिराजप्रजानुकूलकर्मकारिणः तेषां सम्बन्धी सामुत्थायकः सामुत्थायकात् समयानुबन्धाद् अन्यः राजजनपदद्रोहफलः समयानुबन्धः सङ्केतरचना च, अस्य जनपदं नोपनिविशेत ।

न चेति । तत्र जनपदे, आरामाः विहारार्थाः सर्वजनविनोदस्थानान्युपवनानि, शालाश्च प्रेक्षणीयप्रयोगशालाश्च, न स्युः । आरामशालाप्रतिषेधस्य फलमाह — नटेत्यादि । नटनर्तनगायनवादकवाग्जीवनकुशीलवा वा, कर्मविघ्नं कृष्याद्यनुष्ठानविघ्नं न कुर्युः, नाट्यनृत्तगानवादनकथावर्णननर्मक्रियासु स्ववृत्तिषु न चेष्टेरन्निति भावः । कस्मात्, ग्रामाणां निराश्रयत्वाद् नाट्यादिप्रयोगयोग्यशालारहितत्वात् । एवञ्च सिद्धं परमफलमाह —क्षेत्रेत्यादि । पुरुषाणां क्षेत्राभिरतत्वाद् विनोदस्थानाभावेन स्वस्वकर्मस्थानासक्तत्वात्, कोशविष्टिद्रव्यधान्यरसवृद्धिर्भवति कोशस्य, विष्टेः हठकारयितव्यस्य कर्मणः, द्रव्यस्य द्रुभवस्य दार्वादिपदार्थस्य, धान्यस्य, रसस्य तैलेक्षुरसादेश्च वृद्धिः भवति इति एवम्प्रकारं फलम् उन्नेयमित्यर्थः ।

परचक्राटवीग्रस्तं व्याधिदुर्भिक्षपीडितम् ।
देशं परिहरेद् राजा व्ययक्रीडाश्च वारयेत् ॥
दण्डविष्टिकराबाधै रक्षेदुपहतां कृषिम् ।
स्तेनव्यालविषग्राहैर्व्याधिभिश्च पशुव्रजान् ॥
वल्लभैः कार्मिकैः स्तेनैरन्तपालैश्च पीडितम् ।
शोधयेत् पशुसङ्घैश्च क्षीयमाणं वणिक्पथम् ॥
एवं द्रव्यद्विपवनं सेतुबन्धमथाकरान् ।
रक्षेत् पूर्वकृतान् राजा नवांश्चाभिप्रवर्तयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः,
आदितो द्वाविंशः ॥

परचक्रेति । राजा परचक्राटवीग्रस्तं परचक्रं शत्रुकपटः शत्रुसैन्यं वा अटवी तात्स्थ्याद् अटवीपालः ताभ्यां ग्रस्तं, व्याधिदुर्भिक्षपीडितं, देशं परिहरेत् परचक्रादिभ्यो दूरीकुर्यादित्यर्थः । व्ययक्रीडाश्च धनव्ययहेतुभूताः क्रीडाश्च वारयेत् ॥

दण्डविष्टीति । दण्डविष्टिकराबाधैः दण्डविष्टिकराणामतिरेचननिमित्ताभिः पीडाभिः, उपहतां कृषिं रक्षेत्, युक्तदण्डविष्टिकरो भूत्वेत्यार्थम् । स्तेनव्यालविषग्राहैः व्याधिभिश्च उपहतान् पशुव्रजांश्च रक्षेत् स्तेनादिभिरुपघातो यथा न भवेत् तथा पालयेत् ॥

वल्लभैरित्यादि । वल्लभैः राजदयितैः, कार्मिकैः राजशुल्काधिकृतैः, स्तेनैः, अन्तपालैः, पशुसङ्घैश्च व्याघ्रादिसङ्घैश्च, पीडितम्, अत एव क्षीयमाणं वणिक्प्रचारवैरल्यात्, वणिक्पथं शोधयेत् रक्षेत् वल्लभादिपीडापरिहारद्वारेण ॥

एवमित्यादि । स्पष्टार्थः श्लोकः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
प्रथमोऽध्यायः जनपदनिवेशः,
आदितो द्वाविंशः ॥

२०. प्रक. भूमिच्छिद्रविधानम् ।

अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेत् । प्रदिष्टाभयस्थावरजङ्गमानि च ब्राह्मणेभ्यो ब्रह्मसोमारण्यानि, तपोवनानि च तपस्विभ्यो गोरुतपराणि प्रयच्छेत् । तावन्मात्रमेकद्वारं खातगुप्तं स्वादुफलगुल्मगुच्छमकण्टकिद्रुममुत्तानतोयाशयं दान्तमृगचतुष्पदं भग्ननखदंष्ट्रव्यालं मार्गायुकहस्तिहस्तिनीकलभं मृगवनं विहारार्थं राज्ञः कारयेत् ।

सर्वातिथिमृगं प्रत्यन्ते चान्यन्मृगवनं भूमिवशेन वा निवेशयेत् ।

कुप्यप्रदिष्टानां च द्रव्याणामेकैकशो वा वनं निवेशयेद्, द्रव्यवनकर्मान्तानटवीश्च द्रव्यवनापाश्रयाः ।

भूमिच्छिद्रविधानमिति सूत्रम् । भूमिच्छिद्रं सस्याद्युत्पत्त्यनर्हा भूमिः तस्य विधानं सफलत्वसम्पादनप्रकारः उच्यत इति सूत्रार्थः । वणिक्पथप्रचारान् निवेशयेदित्युक्तमधस्तात्, निवेशनस्थानं त्वधुनाभिधीयते ।

अकृष्यायामिति । अकृष्यायां भूमौ मालगर्तशैलशर्करिलप्रायतया कृषिराहितायां भूमौ, पशुभ्यो गोमाहिषमेषेभ्यः विवीतानि प्रयच्छेत् तृणजलवन्ति स्थलानि विसृजेत् । प्रदिष्टेत्यादि । किञ्च, प्रदिष्टाभयस्थावरजङ्गमानि दत्ताभयानि स्थावरजङ्गमानि स्थावराणि वृक्षलतादीनि जङ्गमानि सौम्यमृगादीनि च येषु तानि तथाभूतानि, गोरुतपराणि गव्यूतिपरमपरिमाणानि, ब्रह्मसोमारण्यानि वेदाध्ययनसोमयागाद्यनुष्ठानार्थानि वनानि, ब्राह्मणेभ्यः प्रयच्छेत् ब्राह्मणसमुदायोपयोगाय विसृजेत्, तपोवनानि च यथोक्तविशेषणानि, तपस्विभ्यः प्रयच्छेत् । तावदिति । तावन्मात्रं गोरुतपरम्, एकद्वारं, खातगुप्तं परिखापरिक्षिप्तं, स्वादुफलगुल्मगुच्छं मनोज्ञफललताप्रतानस्तबकम्, अकण्टकिद्रुमं कण्टकशून्यवृक्षयुक्तम्, उत्तानतोयाशयम् अगम्भीरजलाधारं, दान्तमृगचतुष्पदं दान्ताः मनुष्यपरिचयविश्वस्ता मृगाश्चतुष्पदाश्चाम्ये यस्मिंस्तत् तथाभूतं, भग्ननखदंष्ट्रव्यालं भग्ननखदंष्ट्राः उद्धृतनखदंष्ट्रा व्याला व्याघ्रादिमृगा यस्मिंस्तत् तथाभूतं, मार्गयुकहस्तिहस्तिनीकलभं मृगयुकर्मयोग्याः करिकरिणीकरिपोताः यस्मिंस्तत् तथाभूतं, मृगवनं, राज्ञः विहारार्थं कारयेत् । मार्गयुकशब्दः आर्हीयठगन्तः । मार्गायुकेति मातृकापाठेषु द्वितीयस्याचो दीर्घत्वं साध्यम् ।

सर्वेत्यादि । प्रत्यन्ते समीपे, भूमिवशेन वा योग्यभूम्युपलम्भानुसारेण प्रत्यन्ते वा, सर्वातिथिमृगं सर्वे अतिथिमृगा यस्मिन् देशान्तरालब्धकोपद्रुता आगत्य वसन्ति तत् सर्वातिथिमृगं नाम, अन्यद् मृगवनं निवेशयेत्

प्रत्यन्ते हस्तिवनमटव्यारक्षं निवेशयेत्। नागवनाध्यक्षः पार्वतं नादेयं सारसमानूपं च नागवनं विदितपर्यन्तप्रवेशनिष्कसनं नागवनपालैः पालयेत्। हस्तिघातिनं हन्युः। दन्तयुगं स्वयंमृतस्याहरतः सपादचतुष्पणो लाभः।

नागवनपाला हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखा हस्तिमूत्रपुरीषच्छन्नगन्धा भल्लातकीशाखाप्रतिच्छन्नाः पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह चरन्तः शय्यास्थानपद्यालण्डकूलपातोद्देशेन हस्तिकुलपर्यग्रं विद्युः।

कुप्येति। कुप्यप्रदिष्टानां कुप्याध्यक्षप्रकरणोक्तानां, द्रव्याणां शाकतिनिशादिसारदारुवर्गस्य उटजाचिमियादिवेणुवर्गस्य मालतीमूर्वादिवल्कवर्गस्य चेत्येतेषाम् एकैकशो वा वनं निवेशयेत् एकैकस्य एकैकं वनं कल्पयेत्। द्रव्यवनकर्मान्तान् अटवीश्च द्रव्यवनसम्बद्धानि कर्माणि वनानि च, द्रव्यवनापाश्रयाः द्रव्यवनोपजीविनः पुरुषाः, निवेशयेयुरिति विपरिणामेन सम्बन्धः विद्ध्युरित्यर्थः।

प्रत्यन्ते इति। प्रत्यन्ते जनपदावसानदेशे, हस्तिवनं नागवनम्, अटव्यारक्षम् अटव्या आरक्षाः परिरक्षका यस्मिंस्तत् तथाभूतं, निवेशयेत्। नागवनाध्यक्षः, पार्वतं नादेयं सारसम् आनूपं च पर्वताश्रयं नद्याश्रयं सरोव्यपाश्रयं साम्बुदेशाश्रयं च, नागवनं, विदितपर्यन्तप्रवेशनिष्कसनं विज्ञातपरिसराभिगमनिर्गमं कृत्वा, नागवनपालैः पालयेत्। हस्तिघातिनं शबरपुलिन्दादिं, हन्युः। स्वयंमृतस्य अर्थाद्धस्तिनः, दन्तयुगम्, आहरतः उपनयतः वनेचरजनस्य, सपादचतुष्पणो लाभः पारितोषिकं, देय इति शेषः।

नागवनेत्यादि। नागवनपालाः, हस्तिपकपादपाशिकसैमिकवनचरकपारिकर्मिकसखाः हस्तिपक आधोरणः पादपाशिकः पादपाशबन्धनकुशलः सैमिकः सीमाधिकृतः वनचरकः वनवासी पारिकर्मिकः हस्तिपरिचरणचतुरः एतैः सहिताः, हस्तिमूत्रपुरीषच्छन्नगन्धाः हस्तिमूत्रपुरीषगन्धन्यक्कृतगात्रान्तराः, भल्लातकीशाखाप्रतिच्छन्नाः अरुष्कराख्यवृक्षविटपावच्छादिताः, पञ्चभिः सप्तभिर्वा हस्तिबन्धकीभिः सह गजबन्धनशिक्षिताभिर्वशाभिः सह, चरन्तः सन्तः, शय्यास्थानपद्यालण्डकूलपातोद्देशेन शयनावस्थानपदपङ्क्तिविष्ठावप्राघातप्रदेशदर्शनेन, हस्तिकुलपर्यग्रं गजयूथसञ्चारपरमावधिं विद्युः।

---

1. 'भल्लकी' ख. पाठः.

यूथचरमेकचरं निर्यूथं यूथपतिं हस्तिनं व्यालं मत्तं पोतं बद्ध-मुक्तं च निबन्धेन विद्युः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिनो गृह्णीयुः । हस्तिप्रधानो हि विजयो राज्ञाम् । परानीकव्यूहदुर्ग-स्कन्धावारप्रमर्दना ह्यतिप्रमाणशरीराः प्राणहरकर्माणो हस्तिन इति ।

कलिङ्गाङ्गगजाः श्रेष्ठाः प्राच्याश्चेदिकरूशजाः ।
दाशार्णाश्चापरान्ताश्च द्विपानां मध्यमा मताः ॥
सौराष्ट्रिकाः पाञ्चनदास्तेषां प्रत्यवराः स्मृताः ।
सर्वेषां कर्मणा वीर्यं जवस्तेजश्च वर्धते ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्,
आदितस्त्रयोविंशः ॥

यूथेत्यादि । यूथचरं यूथेनैव सह चरति नत्वेकाकी यस्तम्, एकचरम् एक एव चरति नतु यूथेन सह यस्तं, निर्यूथं यूथनिर्गतं, यूथपतिं, व्यालं क्रूरस्वभावं, मत्तं प्रभिन्नं, पोतं दशवर्षकं, बद्धमुक्तं च, हस्तिनं, निबन्धेन विद्युः यूथचरादिहस्तीयत्तादिकं गणनपुस्तके समारोप्य तेन जानीयुरित्यर्थः । अनीकस्थप्रमाणैः प्रशस्तव्यञ्जनाचारान् हस्तिशिक्षाविचक्षणैः प्रमाणभूतैः श्लाघितलक्षणचर्यान् हस्तिनः, गृह्णीयुः, राजार्थे । हि यस्मात् कारणात्, राज्ञां विजयः शत्रुजयः हस्तिप्रधानः हस्तिमुख्यसाधनकः । हस्तिनां मुख्य-साधनत्वं विशदयितुमाह — परेत्यादि । अतिप्रमाणशरीराः महाप्रमाणदेहाः अत एव प्राणहरकर्माणः, हस्तिनः, परानीकव्यूहदुर्गस्कन्धावारप्रमर्दनाः परेषां शत्रूणां सैन्यविन्यासस्य प्राकारादिदुर्गस्य राजधान्याश्च विध्वंसकाः खलु इतिर्हेतुवचनः गृह्णीयुरित्यनेन सम्बन्धनीयः ।

गजेषूत्तममध्यमाधमान् श्लोकाभ्यामाह — कलिङ्गेत्यादिना सौराष्ट्रिका इत्यादिना च । कलिङ्गाङ्गगजाः कलिङ्गाङ्गदेशोद्भवा गजाः । दाशार्णा दशार्णदेशभवाः, आपरान्ताः पश्चिमदेशजाः । प्रत्यवराः अधमाः । श्रेष्ठादीनां त्रयाणां वीर्यवेगप्रतापाः क्रियया वर्धन्त इत्याह — सर्वेषामित्यादि ।

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वितीयोऽध्यायः भूमिच्छिद्रविधानम्,
आदितस्त्रयोविंशः ॥

१. 'बन्धमु' क. ग., 'बद्धं मु' ख. पाठः. २. 'ञ्चजनाः' ख. पाठः.

२१. प्रक. दुर्गविधानम् ।

चतुर्दिशं जनपदान्ते साम्परायिकं दैवकृतं दुर्गं कारयेद्, अन्तर्द्वीपं स्थलं वा निम्नावरुद्धमौदकं, प्रास्तरं गुहां वा पार्वतं, निरुदकस्तम्बमिरिणं वा धान्वनं, खञ्जनोदकं स्तम्बगहनं वा वनदुर्गम् । तेषां नदीपर्वतदुर्गं जनपदारक्षस्थानं, धान्वनवनदुर्गमटवीस्थानम् आपद्यपसारो वा ।

जनपदमध्ये समुदयस्थानं स्थानीयं निवेशयेद् वास्तुकप्रशस्ते देशे नदीसङ्गमे ह्रदस्य वा अविशोषस्याङ्के सरसस्तटाकस्य वा वृत्तं दीर्घं

दुर्गविधानमिति सूत्रम् । दुर्गरचनोच्यत इति सूत्रार्थः । जनपदप्रकृतिरुक्ता, दुर्गप्रकृतिरधुनाभिधीयते ।

चतुर्दिशमिति । जनपदान्ते, चतुर्दिशं चतसृषु दिशासु व्यापकं, साम्परायिकं युद्धोचितं, दैवकृतं दुर्गं कारयेत् स्वभावविषमस्थलं दुर्गत्वेनाश्रयेत् । किंरूपं तद् कारयेदित्यत्राह — **अन्तरित्यादि** । अन्तर्द्वीपं मध्यगतद्वीपम् अर्थात् समन्तान्नदीपरिवेष्टनमित्येकं, निम्नावरुद्धं स्थलं वा निम्नैः सरोभिः समन्ताद् वेष्टितं स्थलं वेत्यपरम्, औदकं जलपरिवेष्टनदुर्गमत्वादौदकपदव्यपदेश्यं दुर्गम् । प्रास्तरं गुहां वा पर्वतप्रस्तरमयमित्येकं देवखातबिलात्मकं वेत्यपरम्, पार्वतं पर्वतकृतं दुर्गम् । निरुदकस्तम्बम् इरिणं वा जलतृणसङ्घातशून्यमित्येकम् ऊषरं वेत्यपरम्, धान्वनं धन्वकृतं दुर्गम् । खञ्जनोदकं खञ्जनं पङ्किलत्वाद् गतिवैक्लव्यकरमुदकं यस्मिंस्तत् तथाभूतमित्येकं स्तम्बगहनं वा अप्रकाण्डद्रुमदुष्प्रवेशं वेत्यपरं, वनदुर्गं तदाख्यम् । तदेवमौदकाद्येकैकद्वैविध्यादष्टौ दुर्गाणि सिद्धानि । **तेषामिति** । तेषां दुर्गाणां मध्ये, नदीपर्वतदुर्गं नदीदुर्गं पर्वतदुर्गं च, आपदि जनपदारक्षस्थानं जनपदस्य रक्षाहेतुः, भवति, धान्वनवनदुर्गम् अटवीस्थानं धान्वनदुर्गं वनदुर्गं च आटविकरक्षास्थानमापदि, अपसारो वा, आपदि अपसरणस्थानं वा, अर्थाद् राज्ञः ॥

दुर्गविधानमुक्त्वा स्थानीयादिकमाह— **जनपदेत्यादि** । जनपदमध्ये, समुदयस्थानं धनोत्पत्तिस्थानभूतं, स्थानीयं महाग्रामादिकं पूर्वोक्तं निवेशयेत् । कीदृशे प्रदेशे, वास्तुकप्रशस्ते वास्तुविद्याभिज्ञनिर्दिष्टे देशे, नदीसङ्गमे नद्युपश्लेषे, अविशोषस्य सदाजलस्य, ह्रदस्य सरसः, तटाकस्य पद्माक-

चतुरश्रं वा वास्तुकवशेन प्रदक्षिणोदकं पण्यपुटभेदनमंसवारिपथाभ्यामुपेतम् । तस्य परिखास्तिस्रो दण्डान्तराः कारयेत् चतुर्दश द्वादश दशेति दण्डान् विस्तीर्णाः विस्तारादवगाधाः पादोनमर्धं वा त्रिभागमूला मूले चतुरश्राः पाषाणोपहिताः पाषाणेष्टकाबद्धपार्श्वा वा तोयान्तिकीरागन्तुतोयपूर्णा वा सपरिवाहाः पद्मग्राहवतीः ।

चतुर्दण्डावकृष्टं परिखायाः षड्दण्डोच्छ्रितमवरुद्धं तद्द्विगुणविष्कम्भं खाताद् वप्रं कारयेद् ऊर्ध्वचयं मञ्चपृष्ठं कुम्भकुक्षिकं वा हस्तिभि-

---

रस्य वा अङ्के समीपे वा । कीदृशं निवेशयेत्, वास्तुकवशेन वास्तुस्थित्यनुसारेण वृत्तं वर्तुलाकारं, दीर्घं, चतुरश्रं वा, प्रदक्षिणोदकं प्रदक्षिणवाहिसलिलं, पण्यपुटभेदनं पण्यपुटानां पण्यकरण्डानां तत्तत्पण्योत्पत्तिस्थानेभ्यः प्रहितानां भेदनं बन्धविस्रंसनम् अनन्यत्रकार्यतया सङ्केतितं यस्मिंस्तत् तथाभूतम्, अंसवारिपथाभ्यामुपेतं स्थलमार्गजलमार्गाभ्यां गम्यम् । तस्येति । तस्य स्थानीयस्य, तिस्रः प्रथममध्यमतृतीयाः, परिखाः कारयेत्, कीदृशीः, दण्डान्तराः द्विचत्वारिंशदङ्गुल एको हस्त इति गणनया देशकालमानप्रकरणोक्तया चत्वारो हस्ता एको दण्डः दण्डमितम् अन्तरं परस्परव्यवधानं यासां ताः तथोक्ताः, चतुर्दशदण्डान् द्वादशदण्डान् दशदण्डान् इत्येवंक्रमेण विस्तीर्णाः, विस्ताराद् विस्तारपरिमाणात् पादोनं चतुर्भागहीनम्, अर्धं वा, अवगाधाः निम्नाः, तदुभयानुपपत्तावाह — त्रिभागमूला वा विस्तारत्रिभागमानं मूलम् अधस्तलं निम्नत्वं यासां तास्तथाभूताः, मूले चतुरश्राः सम्यग्बद्धाः, पाषाणोपहिताः शिलारचिताः, पाषाणेष्टकाबद्धपार्श्वा वा, तोयान्तिकीः आजलोदयदेशखाताः स्वतः सम्पन्नजला इत्यर्थः, आगन्तुतोयपूर्णा वा नद्याद्यागतजलसम्भृता वा, सपरिवाहा जलनिर्गममार्गोपेताः, पद्मग्राहवतीः नलिननक्रयुक्ताः ।

वप्रविधानमाह — चतुर्दण्डावकृष्टमिति । खाताद् वप्रं कारयेत् परिखातादुद्धृतया मृदा प्राकाराधारभूतं चयं निर्मापयेत् । कथम्भूतं, परिखाया चतुर्दण्डावकृष्टं षोडशहस्तविप्रकृष्टं, षड्दण्डोच्छ्रितं चतुर्विंशतिहस्तोन्नतम् अवरुद्धं मृद्गलनं यथा न भवेत् तथाधस्तात् कृतसंरोधं, तद्द्विगुणविष्कम्भम् उच्छ्रयद्विगुणविस्तारम्, ऊर्ध्वचयम् अधःस्थूलोपरिकृशमूर्ध्वचयाख्यं, मञ्चपृष्ठम् उपर्यधस्ताच्च तुल्यवैपुल्यं मञ्चपृष्ठाख्यं, कुम्भकुक्षिकं वा ऊर्ध्वाधःकृ

गोभिश्च क्षुण्णं कण्टकिगुल्मविषवल्लीप्रतानवन्तम् । पांसुशेषेण वास्तुच्छिद्रं वा पूरयेत् ।

वप्रस्योपरि प्राकारं विष्कम्भद्विगुणोत्सेधमैष्टकं द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्तादिति कारयेत् । रथचर्यासञ्चारं तालमूलमुरजकैः कपिशीर्षकैश्चाचिताग्रं पृथुशिलासंहितं वा शैलं कारयेद्, न त्वेव काष्ठमयम्, अग्निरवहितो हि तस्मिन् वसति ।

विष्कम्भचतुरश्रमट्टालकमुत्सेधसमावक्षेपसोपानं कारयेत्, त्रिंशद्दण्डान्तरं च ।

मध्यस्थूलं कुम्भकुक्षिकाख्यं वा, हस्तिभिर्गोभिश्च क्षुण्णं प्रघातदृढीकृतं, कण्टकिगुल्मविषवल्लीप्रतानवन्तं कण्टकवद्भिस्तृणसङ्घातैः विषलताप्रतानैश्च युक्तम् । **पांस्वित्यादि** । पांसुशेषेण वप्रविनियुक्तावशिष्टया मृदा, वास्तुच्छिद्रं नगरवास्तुगर्तं राजवास्तुगर्तं च, पूरयेद्वा पूरयेच्च ।

प्राकारविधानमाह — **वप्रस्येति** । विष्कम्भद्विगुणोत्सेधं स्वविस्तारद्विगुणोच्छ्रयम् । ऐष्टकं पक्केष्टकचितम् । उत्सेधमानं विशदयन्नाह — द्वादशहस्तादूर्ध्वम् ओजं युग्मं वा त्रयोदशपञ्चदशादिविषमसंख्यहस्तप्रमाणोत्सेधं चतुर्दशषोडशादिसमसंख्यहस्तप्रमाणोत्सेधं वेत्यर्थः । उत्सेधमानस्य परमावधिमाह — आ चतुर्विंशतिहस्तात् चतुर्विंशतिहस्तोत्तमपरिमाणोत्सेधमित्यर्थः । उत्सेधं केचिद् विषमसंख्यमिच्छन्ति समसंख्यमपरे, तत्रान्यतरानिर्बन्धोऽकिञ्चित्कर इत्योजयुग्मोभयोक्त्या सूचयति । इति एवम्प्रकारं, प्राकारं, वप्रस्योपरि कारयेत् । अनुक्तविशेषणकथनपूर्वं प्राकारस्य प्रकारान्तरमाह — **रथेत्यादि** । रथचर्यासञ्चारं रथचर्यया रथगत्या सञ्चारो रथिगतागतं यस्मिंस्तं तथाभूतम् उपरि रथगतागतपर्याप्तविस्तारयुक्तत्वमनेनोक्तं, तालमूलमुरजकैः कपिशीर्षकैश्च आचिताग्रं तालवृक्षमूलप्रतिकृतिभिर्मुरजप्रतिकृतिभिः कपिशीर्षप्रतिकृतिभिश्च शिलेष्टकाचूर्णनिर्मिताभिः समन्विताग्रं, पृथुशिलासंहितं शैलं वा विपुलशिलाबद्धम् ऐष्टकविलक्षणं शिलामयं वा, कारयेद्, अर्थात् प्राकारम् । काष्ठमयं तु प्राकारं, नैव कारयेत् । कुतः, हि यतः, तस्मिन् काष्ठमये, अग्निः अवहितः सन् वसति ।

विष्कम्भेत्यादि । अट्टालकं प्राकाराग्रे रणगृहं, कारयेत् । कीदृशं, विष्कम्भचतुरश्रं विस्तारस्यानुरूपम् अर्थादायामे चोत्सेधे च, उत्सेधसमावक्षेपसो-

---

१. 'श्वाराचि' ग. पाठः.

द्वयोरट्टालकयोर्मध्ये सहर्म्यद्वितलामध्यर्धायामां प्रतोलीं कार येत् ।

अट्टालकप्रतोलीमध्ये त्रिधानुष्काधिष्ठानं सापिधानच्छिद्रफल कसंहितमितीन्द्रकोशं कारयेत् ।

अन्तरेषु द्विहस्तविष्कम्भं पार्श्वे चतुर्गुणायाममनुप्राकारम् अ हस्तायतं देवपथं कारयेत् ।

दण्डान्तरा द्विदण्डान्तरा चार्याः कारयेद्, अग्राह्ये देशे प्रध वितिकां निष्कुहद्वारं च ।

पानम् उत्सेधानुरूपावरोहसोपानं, त्रिंशद्दण्डान्तरं च त्रिंशद्दण्डप्रमाणमिथोऽव्य धानं च ।

द्वयोरिति । द्वयोरट्टालकयोर्मध्ये, सहर्म्यद्वितलां हर्म्यं धवलगृहमि ख्यातमैष्टकं गृहं तेन तदीयेन च द्वितलेन सहिताम्, अध्यर्धायामां विस रात् सार्धगुणपरिमाणदैर्ध्यां, प्रतोलीं गृहविशेषं, कारयेत् ।

अट्टालकप्रतोलीमध्य इति । अट्टालकप्रतोल्योर्मध्ये, **इन्द्रकोशं** ख विशेषं कारयेत् । कथम्भूतं, त्रिधानुष्काधिष्ठानं त्रयाणां धानुष्काणां धनि स्थितिपर्याप्तं, सापिधानच्छिद्रफलकसंहितं सापिधानानि अवच्छादसाधन तानि छिद्राणि यस्मिंस्तेन तथाभूतेन फलकेन संहितं कृतसन्धानं च ।

अन्तरेष्विति । अनुप्राकारम्, अन्तरेषु अट्टालकप्रतोलीन्द्रकोशानाम रालेषु, द्विहस्तविष्कम्भं द्विहस्तविस्तारं, पार्श्वे अर्थात् प्राकारस्य, चतुर्गुणाय अष्टहस्तायतमित्यर्थः, देवपथं देवपथ इव देवपथः रहस्यमार्गः तं, कारये मातृकायाम् 'अष्टहस्तायतमि'त्यपि पठ्यते । तत्तु पुनरुक्तं द्रष्टव्यम् ।

दण्डेत्यादि । दण्डान्तराः दण्डप्रमाणविष्कम्भाः, द्विदण्डान्तरा चार्याः आरोहावरोहभूमीः कारयेत् । **अग्राह्य इति** । अग्राह्ये ग्रहणायोग्ये प्रधावितिकां प्रतिपक्षैर्बाणे प्रयुज्यमाने तद्गोचरपरिहारेण भटस्य सुखस्थि नार्थः क्षुद्रो वरणः प्रधावितिका तां, कारयेत्, प्राकारोपरि । निष्कुहद्वा कोटरविवरं च प्राकारबहिर्वर्तिप्रतिपक्षचेष्टितगूढदर्शनार्थं, कारयेत् प्रधा कान्तिके ।

बहिर्जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः छन्नपथं कारयेत् ।

प्राकारमुभयतो मण्डपकमध्यर्धदण्डं कृत्वा प्रतोलीषट्तलान्तरं द्वारं निवेशयेत् पञ्चदण्डादेकोत्तरवृद्ध्याष्टदण्डादिति चतुरश्रम् । द्विदण्डं वा । षड्भागमायामादधिकमष्टभागं वा ।

बहिरिति । बहिः परिखाबहिर्भूमिषु, जानुभञ्जनीत्रिशूलप्रकरकूपकूटावपातकण्टकप्रतिसराहिपृष्ठतालपत्रशृङ्गाटकश्वदंष्ट्रार्गलोपस्कन्दनपादुकाम्बरीषोदपानकैः **छन्नपथं** कारयेत् जानुभञ्जन्यो जानुमात्रीनामधेया दारुमया यन्त्रकीलाः त्रिशूलप्रकरः सारदारुलोहनिर्मितानां तीक्ष्णत्रिशृङ्गाणामायुधविशेषाणां समूहः कूपा अन्धवः कूटा अयश्शलाकाः अवपातास्तृणादिच्छन्ना गर्ताः कण्टकप्रतिसराः आयसाः कण्टकाचिता रज्जुविशेषाः अहिपृष्ठानि निर्मांससर्पपृष्ठास्थिसदृशाकाराण्ययोमयानि तीक्ष्णाग्राणि तालपत्राणि तथाविधान्येव तालपत्राकाराणि शृङ्गाटकानि त्रिकोटिकानि लौहयन्त्राणि श्वदंष्ट्रास्तदाकारा यन्त्रभेदाः अर्गलानि विष्कम्भाकाराणि यन्त्राणि उपस्कन्दनानि स्खलनार्थानि काष्ठानि पादुकाः एकपादमात्रपातपर्याप्ताः पङ्कपूरिता गर्ताः अम्बरीषाणि अग्निसम्भृततप्तभ्राष्ट्रगर्भा गर्ताः उदपानकानि दुष्पीतोदकाः कुपुष्करिण्यः एतैश्छन्नं पन्थानं कारयेत् ।

इत्थं परिखावप्रप्राकाराणां विधानमुक्त्वा द्वारविधानमाह — **प्राकारमुभयत इत्यादि** । अस्यार्थः — यत्र द्वारं निर्मितितं तत्र प्राकारोभयभागयोः अध्यर्धदण्डविस्तारं मण्डपं परिकल्प्य प्रतोलीषट्तलैरवच्छादितं तदाधारभूतैः षड्भिस्तोरणस्तम्भैर्युक्तं द्वारं निवेशयेत् कारयेत् । पञ्चदण्डात् प्रभृति एकोत्तरवृद्ध्या अष्टदण्डपरमावधिकेन विस्तारेण प्राकारानुरूपेण युक्तं चतुरश्रं निवेशयेदिति । **द्विदण्डं वेति** । दण्डद्वयविस्तारयुक्तं वा द्वारं निवेशयेत् । इदमेकीयपक्षे । पक्षान्तरमाह — **षड्भागमिति** । आयामाद् दैर्घ्येण, षड्भागमष्टभागं वाधिकम् आश्रितविस्तारमानापेक्षया तदीयषष्ठांशाधिकं तदीयाष्टमांशाधिकं वा निवेशयेत् । इदमेवं विवृण्वन्ति — पञ्चदण्डचतुरश्रस्य षड्भागः साष्टाङ्गुलं हस्तत्रयम्, अष्टभागस्तु सार्धं हस्तद्वयं, चतुर्विंशत्यङ्गुल एको हस्तः, हस्तचतुष्टयमेको दण्ड इति चाश्रयणादिति । एवं षड्दण्डचतुरश्रादिषूह्नेयम् ।

पञ्चदशहस्तादेकोत्तरमष्टादशहस्तादिति तुलोत्सेधः।

स्तम्भस्य परिक्षेपाः षडायामा द्विगुणो निखातः चूलिकायाश्चतुर्भागः।

आदितलस्य पञ्च भागाः शाला वापी सीमागृहं च। दशभागिकौ समत्तवारणौ द्वौ प्रतिमञ्चौ अन्तरम् आणिः। हर्म्यं च समुच्छ्र्यादर्धतलं स्थूणावबन्धश्च। आर्धवास्तुकमुत्तमागारं त्रिभागान्तरं वा,

---

पञ्चदशेत्यादि। एतद् व्याचक्षते— द्वादशहस्तोत्सेधस्य प्राकारसभागृहस्य पञ्चदशहस्तोत्सेधांस्तुलास्तम्भान् कुर्यात्। एवं तद्धस्तचतुर्भागाश्रयेण एकोत्तरवृद्ध्या अष्टादशहस्तपर्यन्तमुत्सेधं कुर्यात्। स एष तुलोत्सेध इति। तलोत्सेध इति पाठे उक्तमानैस्तुलास्तम्भैरुपलक्षितस्यादितलस्योच्छ्र्य इत्यर्थः।

स्तम्भस्येति। स्तम्भस्य परिक्षेपाः परिधयः षडायामाः स्तम्भोत्सेधषड्भागदीर्घाः, पञ्चदशहस्तोत्सेधस्य स्तम्भस्य परिधिमानं सार्धद्विहस्तं कल्पनीयमिति भावः। निखातो द्विगुणः स्तम्भस्य निखातायामः परिक्षेपायामद्विगुणः, पञ्चदशहस्तोत्सेधस्य पञ्चहस्त इति भावः। चूलिकायाश्चतुर्भागः चूलिका नाम स्तम्भशिखा तस्या आयामः परिक्षेपायामचतुर्भाग इत्यर्थः।

आदीत्यादि। अयमर्थः—प्रतोलिकात्रितलेषु मध्ये प्रथमतलं पञ्चधा विभज्य तेषु पञ्चसु भागेषु शाला वापी सीमागृहं च कार्याणीति। इदं विवृण्वन्ति — मध्यमे भागे वापीं वापीप्रान्तभागयोः दीर्घचतुरश्रे द्वे शाले शालाप्रान्तयोः सीमागृहं च कारयेदिति। सीमागृहं नाम शालाद्वयप्रान्तयुगलगते पञ्चभागे क्रियमाणं चतुष्कोणं कोष्ठगृहमित्याहुः। **दशभागिकावि**ति। दशभागिकौ शालादशभागविस्तारौ, समत्तवारणौ निर्यूहयुक्तौ, द्वौ प्रतिमञ्चौ मञ्चप्रतिकृती ऐष्टकौ सन्निवेशविशेषौ, कार्यौ, अर्धाच्छालायाः प्रान्ततः। अन्तरं शालासीमागृहयोरन्तरालं कार्यम्। आणिः कार्यः। स च क्षुद्रं द्वारमित्याहुः। **हर्म्यं चे**ति। हर्म्यम् उपरितलं चन्द्रशाला तच्च, समुच्छ्र्यादर्धतलम् उत्सेधेन प्रथमतलस्यार्धं प्रथमतलोत्सेधापेक्षयार्धोत्सेधं कार्यम्। आणिहर्म्यमिति पाठे आणिः सीमा तत्रत्यं हर्म्यं सीमागृहवदुपरितले सीमनिर्मिता चन्द्रशालेत्यर्थः। स्थूणावबन्धश्च क्षुद्रस्तम्भनिवेशश्च अर्धाद् द्वितीयतले। **आर्धवास्तुकमि**ति। उत्तमागारं तृतीयतलम्, आर्धवास्तुकं त्रिदण्ड एको वास्तुरिति परिभाषया वास्तोरर्धं सार्धदण्डः तत्प्रमाणकं कार्यम्, अर्धाद्

इष्टकावबद्धपार्श्वं, वामतः प्रदक्षिणसोपानं गूढभित्तिसोपानमितरतः।

द्विहस्तं तोरणशिरः, त्रिपञ्चभागिकौ द्वौ कवाटयोगौ, द्वौ द्वौ परिघौ, अरत्निरिन्द्रकीलः, पञ्चहस्तमणिद्वारं, चत्वारो हस्तिपरिघाः।

निवेशार्धं हस्तिनखः मुखसमः। सङ्क्रमोऽसंहार्यो वा भूमिमयो वा निरुदके।

प्राकारसमं मुखमवस्थाप्य त्रिभागगोधामुखं गोपुरं कारयेत्। प्राकारमध्ये कृत्वा वापीं पुष्करिणीद्वारं, चतुश्शालमध्यर्धान्तराणिकं

पञ्चदण्डचतुरश्रस्य द्वारस्य। त्रिभागान्तरं वा पञ्चदण्डत्रिभागोऽन्तरमवकाशो यस्य तत् तथाभूतं वा, उत्तमागारं कार्यम्। इह वाशब्दात् त्रिभागद्वयान्तर-पक्षार्धान्तरपक्षयोरपि सङ्ग्रह इत्याहुः। इष्टकावबद्धपार्श्वं, वामतः प्रदक्षि-णसोपानम्, इतरतो दक्षिणतः, गूढभित्तिसोपानं च कार्यम्। तृतीयतलवि-धिरयमधस्तलेऽपि योज्यः।

द्विहस्तमिति। तोरणशिरः द्वारशीर्षं, द्विहस्तं, कार्यम्। त्रिपञ्चभा-गिकौ त्रयः पञ्चभागा अनयोरिति तथाभूतौ, द्वौ कवाटयोगौ कार्यौ। द्वौ द्वौ परिघौ अर्गले, कार्यौ। इन्द्रकीलः कवाटधारणार्थः प्रधानः कीलविशेषः, अरत्निः निष्कनिष्ठमुष्टिकहस्तदीर्घः कार्यः। अणिद्वारं क्षुद्रद्वारम् अर्थान्महा-कवाटमध्यगं, पञ्चहस्तं कार्यम्। हस्तिपरिघाश्चत्वारः गजार्गलानि लक्षणया गजगतिद्वाराणि चत्वारि कार्याणि, कृत्स्नो द्वारमण्डपावकाशश्चतुर्गजप्रवेशपर्याप्त कार्य इत्यभिप्रायः।

निवेशार्धमिति। हस्तिनखः दुर्गावतरणार्थः क्रमनिम्नो हस्तिनखाभो मृत्कूटः, निवेशार्धं द्वारसन्निवेशस्यार्धमानः पञ्चदण्डचतुरश्रस्य सार्धद्विदण्डोत्से-धमान इत्यर्थः, मुखसमः द्वारसमानविस्तारश्च, कार्यः। **संक्रम इति**। संक्रमः दुर्गसञ्चरः, असंहार्यः स्थिरो दार्वादिमय इत्यर्थः तथाविधो वा, निरुदके भूमिमयो वा, कार्यः।

इत्थं महाद्वारविधानमभिधाय द्वारान्तरविकल्पमाह—**प्राकारेत्यादि**। प्राकारसमं मुखमवस्थाप्य प्राकारतुल्यमानं निस्सरणं परिकल्प्य, त्रिभाग-गोधामुखं त्रिभागः विस्तारतृतीयांशस्तत्प्रमाणं गोधामुखं गोधामुखाकारं द्वारं यस्य तत् तथाभूतं, गोपुरं पुरद्वारं, कारयेत्। **प्राकारमध्य इति**। प्राकार-मध्ये वापीं कृत्वा पुष्करिणीद्वारं वापीयोगवशेन पुष्करिण्याख्यं द्वारं कारयेत्।

कुमारीपुरं, मुण्डहर्म्यं द्वितलं मुण्डकद्वारं, भूमिद्रव्यवशेन वा। त्रिभागाधिकायामा भाण्डवाहिनीः कुल्याः कारयेत्।

तासु पाषाणकुद्दालकुठारीकाण्डकल्पनाः।
मुसण्ठिमुद्गरा दण्डचक्रयन्त्रशतघ्नयः ॥
कार्याः कार्मारिकाः शूलवेधनाग्राश्च वेणवः।
उष्ट्रग्रीव्योऽग्निसंयोगाः कुप्यकल्पे च यो विधिः ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः ॥

अध्यर्धान्तराणिकम् अन्तरम् अणिश्च पूर्वोक्तादध्यर्धाधिकं यस्य तत् तथाभूतं, चतुश्शालं शालाचतुष्टयं, कृत्वा, कुमारीपुरं कुमारीपुराख्यं द्वारं कारयेद्, अर्थाद् यथोक्तचतुश्शालयुक्तं द्वारमेव कुमारीपुरसंज्ञं बोद्धव्यम्। द्वितलं द्विभूमं, मुण्डहर्म्यं निश्शृङ्गं हर्म्यं, वृत्तमालिकामित्यन्ये, कृत्वा, मुण्डकद्वारं मुण्डहर्म्ययोगान्मुण्डकाख्यं द्वारं, कारयेत्। भूमिद्रव्यवशेन वा भूमिद्रव्यसम्पदनुरोधेन वा, कारयेद्, अर्थाद् यथोक्तमेकैकं द्वारम्। **त्रिभागेत्यादि।** त्रिभागाधिकायामाः त्रिभागाधिकः स्वविस्तारमानापेक्षया तृतीयांशाभ्यधिकमानः आयामो दैर्घ्यं यासां तास्तथाभूताः, भाण्डवाहिनीः कर्मोपकरणगतागतव्यवहारार्थाः, कुल्याः कारयेत्।

कुल्यासु निवेशनीयानि भाण्डानि श्लोकद्वयेनाह — **तास्वित्यादि, कार्या इत्यादि** च। काण्डः बाणः, कल्पना गजोपकरणं, मुसण्ठिर्गदा सायःकीला दारुमयी मुद्गरः दीर्घगदाकारं स्थूलाग्रमायुधम्, दण्डः क्षेपणीयो लगुडविशेषः, चक्रं सारवृत्तमायुधं, यन्त्रं जामदग्न्यभैमादि, शतघ्निः लोहकण्टकाचितं चतुस्तालप्रमाणमायुधम्। कार्मारिकाः कर्मारोऽयस्कारः तच्छिल्पसाध्याः तोमरादयः, उष्ट्रग्रीव्यः उष्ट्रग्रीवाकाराः शस्त्र्यः, अग्निसंयोगाः अग्निः संयुज्यते विपक्षदाहार्थमेष्वित्यग्निसंयोगाः गुल्गुलुमदनसर्जरसश्रीवेष्टगन्धपाषाणादयः, कुप्यकल्पे च यो विधिः कुप्याध्यक्षप्रकरणे यो विधियते स च, तासु कुल्यासु, कार्यः। स तु शाकतिनिशादिदारुवर्गः उटजचिमियादिवेणुवर्गः गोधासेरकद्वीपिप्रभृतिचर्मवसादिश्चेति बोद्धव्यम्। स्पष्टमन्यत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
तृतीयोऽध्यायः दुर्गविधानम्, आदितश्चतुर्विंशः ॥

२२. प्रक. दुर्गनिवेशः।

त्रयः प्राचीना राजमार्गास्त्रय उदीचीना इति वास्तुविभागः। स द्वादशद्वारो युक्तोदकभूमिच्छन्नपथः।

चतुर्दण्डान्तरा रथ्याः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः संयानीयव्यूहश्मशानग्रामपथाश्चाष्टदण्डाः। चतुर्दण्डः सेतुवनपथः। द्विदण्डो हस्तिक्षेत्रपथः। पञ्चारत्नयो रथपथश्चत्वारः पशुपथो द्वौ क्षुद्रपशुमनुष्यपथः।

प्रवीरे वास्तुनि राजनिवेशश्चातुर्वर्ण्यसमाजीवे। वास्तुहृदयादुत्तरे नवभागे यथोक्तविधानमन्तःपुरं प्राङ्मुखमुदङ्मुखं वा कारयेत्।

दुर्गनिवेश इति सूत्रम्। दुर्गं परिखावप्रप्राकाराट्टालप्रतोलीन्द्रकोशदेवपथादिकं यथोक्तं तस्मिन् निवेशः राजमार्गादिविभजनपूर्वं योग्यदेशरचनीयं राजामात्यादि-दुर्गान्तर्निवासिप्रकृतिभवनसंस्थानं, तदिहोच्यत इति सूत्रार्थः।

राजमार्गाः प्राक्प्रत्यगायतास्त्रयो दक्षिणोत्तरायतास्त्रय इत्येवं षोढा वास्तुर्विभक्तव्य इत्याह — **त्रय** इत्यादि। **स** इति। स वास्तुविभागः, द्वादशद्वारः दिशिदिशि द्वारत्रिकक्रमेण द्वादशभिर्द्वारैर्युक्तः, युक्तोदकभूमिच्छन्नपथः उदकं वापीकूपादि भूमिर्जलनिर्गममार्गः छन्नपथः गूढसुरुङ्गामार्गः ते युक्ता वास्तुविस्तारानुरूपा यस्मिन् स तथाभूतः, कार्यः इति शेषः।

चतुरित्यादि। रथ्या अल्पमार्गाः उपवीथ्य इत्यर्थः, चतुर्दण्डान्तराः चतुर्दण्डविस्ताराः। राजमार्गद्रोणमुखस्थानीयराष्ट्रविवीतपथाः राजमार्गो द्रोणमुखपथः स्थानीयपथः राष्ट्रपथः विवीतपथ इत्येते, संयानीयव्यूहश्मशानग्रामपथाश्च संयानीयं क्रयविक्रयव्यवहारप्रधानं पट्टनं तत्पथः व्यूहपथः शत्रुपरिवेष्टनावसरे प्राकारेषु समन्तात् सद्यो गन्तुमुपकल्पितः सैन्यस्य मार्गः श्मशानपथः ग्रामपथ इत्येते च, अष्टदण्डाः कार्याः। सेतुवनपथः सेतुपथो वनपथश्च, चतुर्दण्डः। हस्तिक्षेत्रपथः हस्तिपथः क्षेत्रपथश्च, द्विदण्डः। रथपथः पञ्चारत्नयः निष्कनिष्ठमुष्टिकहस्तपञ्चकविस्तार इत्यर्थः, पशुपथः गोमहिषादिमार्गः, चत्वारोऽरत्नयः अरत्निचतुष्टयप्रमाणः, क्षुद्रपशुमनुष्यपथः मेषादिक्षुद्रपशुमार्गः मनुष्यमार्गश्च, द्वौ अरत्नी।

प्रवीर इति। प्रवीरे प्रकर्षेण वीर्ययुक्ते, चातुर्वर्ण्यसमाजीवे वर्णचतुष्टयोपजीव्यगुणसम्पन्ने, वास्तुनि, राजनिवेशः राजभवनं, कार्यम्। वा-

तस्य पूर्वोत्तरं भागमाचार्यपुरोहितेज्यातोयस्थानं मन्त्रिणश्चावसेयुः। पूर्वदक्षिणं भागं महानसं हस्तिशाला कोष्ठागारं च। ततः परं गन्धमाल्यधान्यरसपण्याः प्रधानकारवः क्षत्रियाश्च पूर्वां दिशमधिवसेयुः। दक्षिणपूर्वं भागं भाण्डागारमक्षपटलं कर्मनिषद्याश्च। दक्षिणपश्चिमं भागं कुप्यगृहमायुधागारं च। ततः परं नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः पक्वान्नसुरामांसपण्याः रूपाजीवास्तालावचरा वैश्याश्च दक्षिणां दिशमधिवसेयुः। पश्चिमदक्षिणं भागं खरोष्ट्रगुप्तिस्थानं कर्मगृहं च। पश्चिमोत्तरं भागं यानरथशालाः। ततः परम्

स्त्वित्यादि। एकाशीतिपदात्मकस्य वास्तुनो मध्यमो नवभागो वास्तुहृदयं, वास्तुहृदयाद्, उत्तरे नवभागे, यथोक्तविधानं निशान्तप्रणिधिप्रतिपादितप्रकारम्, अन्तःपुरं, प्राङ्मुखम् उदङ्मुखं वा कारयेत्। **तस्येति**। आचार्यपुरोहितेज्यातोयस्थानम् आचार्यपुरोहितयोर्यज्ञस्थानं तोयस्थानं च, मन्त्रिणश्च, तस्य अन्तःपुरस्य, पूर्वोत्तरं भागमावसेयुः पूर्वोत्तरे भागे स्थितिं कुर्युरित्यर्थः। महानसं पाकशाला, हस्तिशाला हस्तिपृष्ठाकारं सभागृहं, कोष्ठागारं च अन्तर्गृहमपवरकाख्यं च, पूर्वदक्षिणं भागम्, आवसेयुरिति सम्बध्यते आश्रयेयुरिति च तदर्थः। **तत इति**। ततः परं राजभवनाद् बहिः, गन्धमाल्यधान्यरसपण्याः गन्धपण्याः माल्यपण्याः धान्यपण्याः रसपण्याश्च, प्रधानकारवः मुख्यशिल्पिनः, क्षत्रियाश्च, पूर्वां दिशमधिवसेयुः। भाण्डागारम्, अक्षपटलं रूप्याद्यायव्ययगणनस्थानं, कर्मनिषद्याश्च स्वर्णरजतशिल्पस्थानानि च, दक्षिणपूर्वं भागम्, अधिवसेयुः आश्रयेयुः। कुप्यगृहं स्वर्णरजतेतरस्थानम्, आयुधागारं च, दक्षिणपश्चिमं भागम् आश्रयेत्। **ततः परमिति**। ततः परं, नगरधान्यव्यावहारिककार्मान्तिकबलाध्यक्षाः नगरव्यावहारिकः धान्यव्यावहारिकः कार्मान्तिकः आकरादिकर्मान्ताधिकृतः बलाध्यक्षः सेनाध्यक्ष इत्येते, पक्वान्नसुरामांसपण्याः पक्वान्नादिविक्रेतारः, रूपाजीवा वेश्याः, तालावचरा नटाः, वैश्याश्च, दक्षिणां दिशम् अधिवसेयुः। खरोष्ट्रगुप्तिस्थानं गर्दभक्रमेलककारागृहाणि, कर्मगृहं च यत्र गृहादिकं निर्मीयते च ध्वंस्यते च परीक्षाद्यर्थं तत् स्थलं च, अथवा खरोष्ट्रादिव्यापारशाला च, पश्चिमदक्षिणं भागम्, आश्रयेत्। यानरथशालाः शिबिकादियानशाला रथशालाश्च, पश्चिमोत्तरं भागम्, आश्रयेयुः। **ततः परमिति**। ततः परं ततः परस्तात्, पश्चिमां दिशम्,

ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः शूद्राश्च पश्चिमां दिशमधिवसेयुः, उत्तरपश्चिमं भागं पण्यभैषज्यगृहम्, उत्तरपूर्वं भागं कोशो गवाश्वं च। ततः परं नगरराजदेवता लोहमणिकारवो ब्राह्मणाश्चोत्तरां दिशमधिवसेयुः। वास्तुच्छिद्रानुलासेषु श्रेणीप्रवहणिकनिकाया आवसेयुः।

अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् शिववैश्रवणाश्विश्रीमदिरागृहं च पुरमध्ये कारयेत्। कोष्ठकालयेषु यथोद्देशं वास्तुदेवताः स्थापयेत्। ब्राह्मैन्द्रयाम्यसैनापत्यानि द्वाराणि। बहिः परिखाया धनुश्शतावकृष्टाश्चैत्यपुण्यस्थानवनसेतुबन्धाः कार्याः, यथादिशं च दिग्देवताः।

ऊर्णासूत्रवेणुचर्मवर्मशस्त्रावरणकारवः ऊर्णावानकारवः कार्पासतन्तुवानकारवः वेणुवानकारवः चर्मकारवो वर्मकारवः शस्त्रावरणकारव इत्येते, शूद्राश्च, अधिवसेयुः। पण्यभैषज्यगृहं पण्यगृहम् औषधशाला च, उत्तरपश्चिमं भागम्, अधिवसेत्। कोशः धान्यादिसंग्रहस्थानं, गवाश्वं च गावोऽश्वाश्च, उत्तरपूर्वं भागम् अधिवसेत्। तत इति। ततः परं, नगरराजदेवताः नगरदेवताः राजकुलदेवताश्च, लोहमणिकारवः अयस्कारवैकटिकाः, ब्राह्मणाश्च, उत्तरां दिशमधिवसेयुः। वास्त्वित्यादि। श्रेणीप्रवहणिकनिकायाः श्रेणी रजकतन्तुवायतुन्नवायादयः प्रवहणिकाः विदेशागता वणिजः तेषां समूहाः, वास्तुच्छिद्रानुलासेषु वास्तुच्छिद्रावकाशेषु आवसेयुः। वसेयुरिति श्रेयान् पाठः।

अपराजितेत्यादि। अपराजिताप्रतिहतजयन्तवैजयन्तकोष्ठकान् अपराजिता दुर्गा अप्रतिहतो विष्णुः जयन्तः सुब्रह्मण्यः वैजयन्त इन्द्रः एतेषामालयान्, शिववैश्रवणाश्विश्रीमदिरागृहं च शिवादीनां मदिरान्तानां पञ्चानां गृहं च, पुरमध्ये कारयेत्। कोष्ठकेत्यादि। कोष्ठकालयेषु पूर्वोक्तेषु, यथोद्देशं स्वस्वदेशानतिक्रमेण, वास्तुदेवताः स्थापयेत्। ब्राह्मेत्यादि। ब्राह्मैन्द्रयाम्यसैनापत्यानि ब्राह्मं ब्रह्मदेवताकमुत्तरम् ऐन्द्रं पूर्वं याम्यं दक्षिणं सैनापत्यं पश्चिममित्येतानि, द्वाराणि, अर्थात् पुरस्य। बहिरिति। परिखाया बहिः, धनुश्शतावकृष्टाः दण्डशतविप्रकृष्टाः, चैत्यपुण्यस्थानवनसेतुबन्धाः चैत्य उद्देशवृक्षः पुण्यस्थानं तीर्थादिकं वनं सेतुबन्ध इत्येते, कार्याः। दिग्देवताश्च, यथादिशं स्वस्वदिगनुरोधेन कार्याः।

उत्तरः पूर्वो वा श्मशानवाटः, दक्षिणेन वर्णोत्तमानाम्। तस्यातिक्रमे पूर्वः साहसदण्डः।

पाषण्डचण्डालानां श्मशानान्ते वासः।

कर्मान्तक्षेत्रवशेन वा कुटुम्बिनां सीमानं स्थापयेत्। तेषु पुष्पफलवाटषण्डकेदारान् धान्यपण्यनिचयांश्च अनुज्ञाताः कुर्युः, दशकुलीवाटं कूपस्थानम्। सर्वस्नेहधान्यक्षारलवणभैषज्यशुष्कशाकयवसवल्लूरतृणकाष्ठलोहचर्माङ्गारस्नायुविषविषाणवेणुवल्कलसारदारुप्रहरणावरणाश्मनिचयाननेकवर्षोपभोगसहान् कारयेत्। नवेनानवं शोधयेत्।

उत्तर इत्यादि। वर्णोत्तमानां शूद्राणाम्। वर्णोत्तराणामित्यपि पाठः। पूर्वः साहसदण्डः सार्धद्विशतपणलक्षणः।

पाषण्डेत्यादि। पाषण्डचण्डालानां कापालिकादीनां प्लवपुल्कसादीनां च।

कर्मान्तेत्यादि। कुटुम्बिनां दुर्गान्तवासयितव्यानां वर्णावराणां, कर्मान्तक्षेत्रवशेन कर्मनिर्वृत्तेः क्षेत्रस्य चानुरूप्येण, सीमानं तदुपयोक्तव्यक्षेत्रमर्यादां, स्थापयेत्। वाशब्दश्चस्थाने वाक्यभूषणम्। तेष्विति। तेषु क्षेत्रेषु पुष्पफलवाटषण्डकेदारान् पुष्पफलवाटः पुष्पफलदायकं वनं षण्डः पद्मादिसङ्घातः केदारो धान्योत्पादभूमिः एतान्, धान्यपण्यनिचयांश्च धान्यपण्यसंग्रहांश्च, अनुज्ञाताः कुर्युः, अर्थात् तत्कर्मार्हाः। ते च सीताध्यक्षो विवीताध्यक्षो दुर्गसीमवासिनः कुटुम्बिनश्च। दशकुलीत्यादि। दशकुलीवाटं मध्यमहलद्वयकर्षणीया भूमिः कुलं दशानां कुलानां समाहारो दशकुली। दशगवकृष्या भूमिरित्यपरे। तावत्प्रमाणं वाटं, कूपस्थानं कूपमातृकं, कुर्युः एकैकस्य दशकुलीवाटस्यैकैकं कूपं पोषणार्थं कुर्युरिति भावः। निचेतव्यद्रव्याण्याह —
सर्वस्नेहेत्यादि। सर्वविधस्नेहादिद्वाविंशतिनिचयान् बहुवर्षोपभोगक्षमान् निवेशयेद् दुर्गेषु। तत्र शाकं वृक्षसम्बन्धि मूलपत्रकरीराग्रफलकाण्डाधिरूढकत्वक्पुष्पकवकात्मकं दशकम्। यवसं धान्यपलालम्। वल्लूरं शुष्कमांसम्। अङ्गारो निर्वाणाग्निकमिन्धनम्। स्नायुर्वस्नसा। प्रहरणं खड्गादि। स्पष्टमन्यत्। नवेनेति। नवेन अनवं शोधयेत् नूतने यथोक्तद्रव्यजाते लब्धे पुराणं तद् व्यययेत्।

हस्त्यश्वरथपादातमनेकमुख्यमवस्थापयेत् । अनेकमुख्यं हि परस्परभयात् परोपजापं नोपैतीति ।

एतेनान्तपालदुर्गसंस्कारा व्याख्याताः ।

न च बाहिरिकान् कुर्यात् पुरराष्ट्रोपघातकान् ।
क्षिपेज्जनपदस्यान्ते सर्वान् वा दापयेत् करान् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्थोऽध्यायः दुर्गनिवेशः, आदितः पञ्चविंशः ॥

हस्तीत्यादि । हस्त्यश्वरथपादातं चतुरङ्गं सैन्यम्, अनेकमुख्यम् अनेके मुख्या बलप्रधाना यस्मिंस्तत् तथाभूतम् , अवस्थापयेद् , दुर्गेषु । बलप्रधानानां बहुत्वे गुणमाह— **अनेकेत्यादि** । एकश्चेद् बलप्रधानः स समानपुरुषान्तराभावान्निर्भयो लोभादिना परोपजापमङ्गीकृत्य कृत्स्नं बलं स्वाधिष्ठीयमानं भेदयेत् , बहवश्चेद् बलप्रधानाः ते परस्पराभिशङ्किताः परोपजापं नोपगच्छेयुरिति बहुप्रधानाधिष्ठितं बलं पराभेद्यं भवतीति भावः ।

एतेनेति । एतेन यथोक्तेन पुरदुर्गसंस्कारविधिना, अन्तपालदुर्गसंस्काराः व्याख्याताः जनपदसीमापालाधिष्ठितानां दुर्गाणां गुणाधानान्युक्तप्रायाणि, ते पुरदुर्गसंस्कारवद् विधातव्या इत्यर्थः ।

अध्यायान्ते श्लोकमाह — **न चेति** । बाहिरिकान् कितववञ्चकनटनर्तकादीन् , न च कुर्यात् पुरे नैव वासयेदित्यर्थः, अर्थाद् राजा । तत्र हेतुसमर्पकं विशेषणं पुरराष्ट्रोपघातकानिति, यतस्ते पौरान् जानपदांश्च कापथप्रवर्तनयोपघ्नन्ति तस्मादित्यर्थः । यदि वासयेत् तदा विधिमाह—जनपदस्य, अन्ते सीमायाम् 'जनपदे चैतानि'त्यपपाठः । क्षिपेद् वासयेद्, बाहिरिकान् । सर्वान् वा सर्वानिव जनपदान्तवास्तव्यानन्यान् कौटुम्बिकानिवेत्यर्थः, करान् दापयेद् बाहिरिकान् । इहाणिकर्तॄणां बाहिरिकाणां णौ कर्मत्वमपाणिनीयं, जल्पतिप्रभृतित्वकल्पनया वा ददातेरौपसंख्यानिकं तत् साध्यम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्थोऽध्यायः दुर्गनिवेशः, आदितः पञ्चविंशः ॥

२३. प्रक. सन्निधातृनिचयकर्म ।

सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारं कुप्यगृहमायुधागारं बन्धनागारं च कारयेत् ।

चतुरश्रां वापीमनुदकोपस्नेहां खानयित्वा पृथुशिलाभिरुभयतः पार्श्वं मूलं च प्रचित्य सारदारुपञ्जरं भूमिसमत्रितलमनेकविधानं कुट्टिमदेशस्थानतलमेकद्वारं यन्त्रयुक्तसोपानं देवतापिधानं भूमिगृहं कारयेत् । तस्योपर्युभयतोनिषेधं सप्रग्रीवमैष्टकं भाण्डवाहिनीपरिक्षिप्तं कोशगृहं कारयेत् प्रासादं वा । जनपदान्ते ध्रुवनिधिमापदर्थमभित्यक्तैः पुरुषैः कारयेत् ।

सन्निधातृनिचयकर्मेति सूत्रम् । सन्निधाता द्रव्यं सञ्चित्य निधाता भाण्डागाराधिपतिः तस्य निचयकर्म द्रव्यसंग्रहरक्षणकर्म, तदिहोच्यत इति सूत्रार्थः । निचेयद्रव्यप्रसङ्गान्निचेतृव्यापाराभिधानम् ।

सन्निधातेति । सन्निधाता, कोशगृहं रत्नसुवर्णादिनिधानस्थानं, पण्यगृहं विक्रेयद्रव्यनिवेशस्थानं, कोष्ठागारम् उदरोपयोगिधान्यस्नेहादिनिक्षेपस्थानं, कुप्यगृहं सारदारुवेणुवल्लीवर्गादिरक्षणस्थानम्, आयुधागारं, बन्धनागारं च कारागृहं च, कारयेत् ।

कोशगृहनिर्माणप्रकारमाह—चतुरश्रामिति । चतुरश्रां, वापीं तदाकारं गर्तम्, अनुदकोपस्नेहाम् उदकोपक्लेदरहितां, खानयित्वा, उभयतः समन्तात्, पार्श्वं मूलं च, पृथुशिलाभिः, प्रचित्य, सारदारुपञ्जरं सारदारुमयपञ्जरयुक्तं, भूमिसमत्रितलं भूमिसमानि भूम्यानुरूप्यनिर्मितानि त्रीणि तलानि उपरितलमध्यमतलाधस्तलानि यस्य तत् तथाभूतम्, अनेकविधानम् अनेकानि विधानानि कोष्ठकादिरचनाः यस्मिंस्तत् तथाभूतं, कुट्टिमदेशस्थानतलं देश उपरितलं स्थानं मध्यतलं तलम् अधोभूमिका इत्येतानि कुट्टिमानि दृढनिबद्धानि यस्य तत् तथाभूतम्, एकद्वारं, यन्त्रयुक्तसोपानं यन्त्रे युक्तानि यथावसरनिवेशनापसरणक्षमतया संश्लिष्टानि सोपानानि यस्य तत् तथाभूतं, देवतापिधानम् उत्कीर्णदेवताप्रतिमाङ्कं पिधानं दार्वादिमयमाच्छादनं यस्य तत् तथाभूतं, भूमिगृहं कारयेत् । तस्येति । तस्य भूमिगृहस्य, उपरि, उभयतोनिषेधं बहिरन्तश्चार्गलयुक्तं, सप्रग्रीवं प्रग्रीवेण मुखशालया सहितम्, ऐष्टकं पक्वेष्टकामयं, भाण्डवाहिनीपरिक्षिप्तं द्रव्याधारशालापरिवृतं, कोशगृहं प्रासादं वा उपरिगृहमिव कारयेत् । जनपदेत्यादि । आपदर्थं विपत्कालोपयोगार्थं,

पक्केष्टकास्तम्भं चतुश्शालमेकद्वारमनेकस्थानतलं विवृतस्तम्भापसारमुभयतः पण्यगृहं, कोष्ठागारं च, दीर्घबहुलशालं कक्ष्यावृतकुड्यमन्तः कुप्यगृहं, तदेव भूमिगृहयुक्तमायुधागारं, पृथग् धर्मस्थीयं महामात्रीयं विभक्तस्त्रीपुरुषस्थानमपसारतः सुगुप्तकक्ष्यं बन्धनागारं कारयेत् ।

सर्वेषां शालाखातोदपानवच्च स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्वदैवपूजनयुक्ताः कारयेत् ।

ध्रुवनिधिम् अनपायनिधिकम् अर्थात् प्रासादं, जनपदान्ते, अभित्यक्तैः वध्यैः पुरुषैः, कारयेत् । वध्यपुरुषा हि राज्ञा यत्नरक्षिताः निधिगुप्तिस्थानविधानरहस्यं निर्माणकाले नोद्भिन्द्युः, निर्माणनिर्वृत्त्युत्तरकाले च सद्यो मारिता भवन्तीति सोऽयं ध्रुवनिधिरनन्यवेद्यो वेदितव्यः ।

पण्यगृहादिविधिमाह—**पक्केत्यादि** । पक्केष्टकास्तम्भं पक्केष्टकामयैः स्तम्भैर्युक्तं, चतुश्शालं चतस्रश्चतुर्दिग्गता अन्योन्यसम्मुखीनाः शाला यस्मिंस्तत् तथाभूतम्, एकद्वारम्, अनेकस्थानतलम् अनेकैः कोष्ठैर्भूमिकाभिश्च युक्तम्, उभयत उभयपार्श्वयोः, विवृतस्तम्भापसारं विवृतस्तम्भः विस्तृतस्तम्भः अपसारोऽलिन्दो यस्य तत् तथाभूतं, पण्यगृहं, कोष्ठागारं च कारयेत् । दीर्घबहुलशालं, कक्ष्यावृतकुड्यं कक्ष्याभिः प्रकोष्ठकैः वृतं परीतं कुड्यं यस्मिंस्तत् तथाभूतं, कुप्यगृहम्, अन्तः कारयेत् । भूमिगृहयुक्तं, तदेव कुप्यगृहमेव, आयुधागारं कारयेत् । बन्धनागारं, धर्मस्थीयं महामात्रीयं पृथक् कारयेद् धर्मस्थीयमित्येकं महामात्रीयमित्यपरं च प्रत्येकं निर्मापयेत् । तत्र धर्मस्था व्यवहारनिर्णेतारः तत्सम्बन्धि धर्मस्थीयं व्यवहारार्थमागतानामवस्थित्यर्थं व्यवहारपराजितनिरोधार्थं च स्थानमित्यर्थः । महामात्राः सन्निधातृसमाहर्तृप्रभृतयोऽर्थाधिकारिणः तत्सम्बन्धि महामात्रीयं विश्वासाधित्वेन गृहीतानां युद्धप्रगृहीतादीनां च जनानां निवेशस्थानमित्यर्थः । बन्धनागारं कीदृशं, विभक्तस्त्रीपुरुषस्थानम्, अपसारतः सुगुप्तकक्ष्यम् अपसरणमार्गमनुसृत्य सुष्ठु रक्षितकक्ष्यम् ।

सर्वेषामिति । सर्वेषां कोशगृहादीनां षण्णां, शालाखातोदपानवत् शालापरिखाकूपैस्तुल्यं स्नानगृहाग्निविषत्राणमार्जारनकुलारक्षाः स्नानगृहम् अग्नित्राणं मानुषाग्निना त्रिरपसव्यपरिगमनरूपं निशान्तप्राणिध्युक्तं विषत्राणं मार्जारनकुलौ विषत्राणभूतौ मार्जारनकुलौ वा आरक्षां रक्षिपुरुषैर्गुप्तिं च, स्वदैवपूजनयुक्ताः स्वस्वदैवतार्चनयुक्ताः, कारयेत् । तत्र कोशगृहस्य धनदो देवता, पण्यकोष्ठागारयोः श्रीदेवी, कुप्यगृहस्य विश्वकर्मा, आयुधबन्धनागारयोर्यमवरुणाविति विवेकः ।

कोष्ठागारे वर्षमानमरत्निमुखं कुण्डं स्थापयेत् ।

तज्जातकरणाधिष्ठितः पुराणं नवं च रत्नं सारं फल्गु कुप्यं वा प्रतिगृह्णीयात् । तत्र रत्नोपधावुत्तमो दण्डः कर्तुः कारयितुश्च, सारोपधौ मध्यमः, फल्गुकुप्योपधौ तच्च तावच्च दण्डः ।

रूपदर्शकविशुद्धं हिरण्यं प्रतिगृह्णीयाद्, अशुद्धं छेदयेत् । आहर्तुः पूर्वः साहसदण्डः ।

शुद्धं पूर्णमभिनवं च धान्यं प्रतिगृह्णीयात् । विपर्यये मूलद्विगुणो दण्डः ।

तेन पण्यं कुप्यमायुधं च व्याख्यातम् ।

सर्वाधिकरणेषु युक्तोपयुक्ततत्पुरुषाणां पणद्विपणचतुष्पणाः, परमपहारेषु पूर्वमध्यमोत्तमवधा दण्डाः ।

कोष्ठेत्यादि । कोष्ठागारे, वर्षमानं वर्षं वृष्टिर्मीयतेऽनेनेति तथाभूतम्, अरत्निमुखम् अरत्निचतुरश्रमुखं, कुण्डं गर्तं, स्थापयेत् खानयेत् ।

तज्जातेत्यादि । पुराणं नवं च, विविच्येति शेषः, रत्नं मणिमुक्तादिकं, सारं चन्दनादि, फल्गु वस्त्रादि, कुप्यं वा दारुचर्मवेणुवल्ककोष्ठोपकरणादिकं वा, तज्जातकरणाधिष्ठितः रत्नादितद्वस्तुव्यवहारिवंश्यैः कायस्थैश्चोपेतः सन्, प्रतिगृह्णीयात् संगृह्णीयात् । तत्रेति । तत्र, रत्नोपधौ निर्गुणरत्नं प्रतिनिधाय गुणवद्रत्नहरणे, कर्तुः कारयितुश्च, उत्तमो दण्डः पणसाहस्ररूप उत्तमसाहसः । सारोपधौ, मध्यमः मध्यमसाहसः । फल्गुकुप्योपधौ, तच्च तावच्च दण्डः यद् द्रव्यं हृतं तच्च तत्समपरिमाणं तज्जातीयमपरं चेत्युभयं दण्डो भवति ।

रूपेत्यादि । हिरण्यं प्रणीतमुद्राङ्कं स्वर्णं रजतं च दीनारादिकं, रूपदर्शकविशुद्धं रूपपरीक्षकमुखेन विज्ञातशुद्धिकं, प्रतिगृह्णीयात् । अशुद्धं कूटप्रणीतं, हिरण्यं, छेदयेद् भञ्जयेद् अपुनरुपयोगाय । आहर्तुः कूटहिरण्यानेतुः, पूर्वः साहसदण्डः ।

शुद्धमिति । शुद्धं निर्बुसं, पूर्णम् अनूनमानम्, अभिनवं च धान्यं, प्रतिगृह्णीयाद्, धान्यग्रहणाधिकृतः । विपर्यये अतथाविधधान्यप्रतिग्रहे, मूलद्विगुणो दण्डः ।

पण्यकुप्यायुधप्रतिग्रहेऽपि धान्योक्त एव न्याय इत्याह — तेनेत्यादि ।

सर्वेत्यादि । सर्वाधिकरणेषु सर्वेष्वधिकारस्थानेषु, युक्तोपयुक्ततत्पुरुषाणां युक्तः प्रधानः उपयुक्तस्तत्सहकारी तत्पुरुषाः तयोरधस्तराः तेषां, पणद्विपण-

कोशाधिष्ठितस्य कोशावच्छेदे घातः। तद्वैयावृत्त्यकाराणामर्धदण्डः। परिभाषणमविज्ञाते। चोराणामभिप्रधर्षणे चित्रो घातः।

तस्मादाप्तपुरुषाधिष्ठितः सन्निधाता निचयाननुतिष्ठेत्।
बाह्यमाभ्यन्तरं चायं विद्याद् वर्षशतादपि।
यथा पृष्टो न सज्जेत व्ययशेषं च दर्शयेत्॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चमोऽध्यायः सन्निधातृनिचयकर्म,
आदितः षड्विंशः॥

चतुष्पणाः एकः पणः द्वौ पणौ चत्वारः पणाश्च, दण्डाः, अपहारेषु पूर्वोक्तजातीयेषु। परमपहारेषु सकृद्दण्डनात् परतोऽपहारेषु, पूर्वमध्यमोत्तमवधा दण्डाः पूर्वसाहसो मध्यमसाहस उत्तमसाहसो वधश्च दण्डाः। तत्राद्यास्त्रयो दण्डा यथाक्रमं प्रयोक्तव्याः, वधदण्डस्तु ततोऽपि परस्तादपहारेषु प्रयोक्तव्य इति बोद्धव्यम्।

कोशेत्यादि। कोशाधिष्ठितस्य कोशाधिष्ठातुः भाण्डागाराध्यक्षस्य, कोशावच्छेदे कोशस्य सुरुङ्गाद्युपायेनापहारे, घातः वधदण्डः। तद्वैयावृत्त्यकाराणां तस्य वैयावृत्त्यकाराः विशेषेण आ समन्ताद् वर्तत इति व्यावृत्तः परिचारकः तस्य कर्म वैयावृत्त्यं परिचर्या तत् कुर्वन्तः परिचारकाः तेषाम्, अर्धदण्डः। अविज्ञाते सति अर्थात् कोशाधिष्ठातृकृते कोशावच्छेदे, परिभाषणं तद्वैयावृत्त्यकाराणां सनिन्दोपालम्भः। **चोराणा**मिति। चोराणाम् अभिप्रधर्षणे कुड्यसन्धिच्छेदादिना धनापहरणे, चित्रो घातः।

तस्मादित्यादि। स्पष्टम्।

बाह्यमिति। बाह्यं जनपदोत्थम्, आभ्यन्तरं नगरोत्थं च, आयं, विद्यात्, सन्निधाता। कथं विद्यात्, यथा वर्षशतादपि पृष्टः अतीतं वर्षशतमाधिकृत्यापि आयं चोदितः, न सज्जेत न सक्तो भवेत् निष्प्रतिबन्धं वदेदित्यर्थः, व्ययशेषं दर्शयेच्च व्ययितावशिष्टं द्रव्यं दृष्टिगोचरं कारयेच्च, भाण्डागारे॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चमोऽध्यायः सन्निधातृनिचयकर्म,
आदितः षड्विंशः॥

२४. प्रक. समाहर्तृसमुदयप्रस्थापनम् ।

समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथं चावेक्षेत ।

शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राध्यक्षः सुरा सूना सूत्रं तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताध्यक्षो द्वारबाहिरिकादेयं च दुर्गम् ।

सीता भागो बलिः करो वणिक् नदीपालस्तरो नावः पट्टनं विवीतं वर्तनी रज्जूश्चोररज्जूश्च राष्ट्रम् ।

समाहर्तृसमुदयप्रस्थापनमिति सूत्रम् । समाहर्ता विषयबल्यध्यक्षः तेन करणीयं समुदयप्रस्थापनं धनोत्पत्तिप्रवर्तनमुच्यत इति सूत्रार्थः । अर्थोपधाशुद्धः सन्निधातृकर्मणि समाहर्तृकर्मणि च नियोक्तव्य इत्युक्तं प्राक् । तद्व्यापार इदानीमभिधीयते ।

दुर्गादिसप्तकं समाहर्त्रा चिन्तनीयमित्याह— **समाहर्तेत्यादि** ।

दुर्गपदार्थं विवृणोति — **शुल्कमित्यादि** । शुल्कं घट्टदेयं, दण्डः दम उत्तमसाहसादिः, पौतवं तुलामानपरिच्छेदः, नागरिको नगराध्यक्षः, लक्षणाध्यक्षः क्षेत्रारामादिसीमाचिह्नाध्यक्षः, मुद्राध्यक्षः, सुरा मद्याध्यक्षः, सूना प्राणिवधाध्यक्षः, सूत्रं सूत्राध्यक्षः, तैलं तद्विक्रयी, घृतं तद्विक्रयी, क्षारः गुडविक्रयी, सौवर्णिकः सुवर्णनियुक्तः, पण्यसंस्था पण्यनिवेशशाला, वेश्याः, द्यूतं, वास्तुकम् आवसथनिर्मातारस्तक्षादयः, कारुशिल्पिगणः कारवः स्थूलशिल्पकाराः शिल्पिनः सूक्ष्मशिल्पकाराः तेषां गणः, देवताध्यक्षः देवालयकार्यधूर्वहः, द्वारबाहिरिकादेयं च द्वारबाहिरिकसम्बन्धि आदेयं पुरादिद्वारपालैर्भृतित्वेन ग्राह्यं बाहिरिकेभ्यो नटनर्तकादिभ्यो राज्ञा ग्राह्यं चेति यावत्, दुर्गं शुल्कादिद्वाविंशत्युपायलभ्यं द्रव्यं दुर्गशब्दितमित्यर्थः ।

सीतादित्रयोदशकं राष्ट्रशब्दितमित्याह — **सीतेत्यादि** । सीता कृषिः, भागः धान्यषड्भागः, बलिः उपहारः भिक्षा वा, करः फलवृक्षादिसम्बद्धं राजदेयं, वणिक् वणिग्द्वारेणादेयं, नदीपालः तीर्थरक्षकद्वारेणादेयं, तरः नदीतरणवेतनं, नावः नावध्यक्षद्वारलभ्यं, पट्टनम् अल्पनगरलभ्यं, विवीतं विवीताध्यक्षद्वारेणादेयं, वर्तनी मार्गः तल्लभ्यम् अर्थादन्तपालद्वारलभ्यं, रज्जूः विषयपालादेयमित्याहुः, चोररज्जूः चोरग्राहकाय ग्रामदेयमित्याहुः ।

सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोहलवणभूमिप्रस्तररसधातवः खनिः ।

पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः ।

पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम् ।

गोमहिषमजाविकं खरोष्ट्रमश्वाश्वतराश्च व्रजः ।

स्थलपथो वारिपथश्च वणिक्पथः ।

इत्यायशरीरम् । मूलं भागो व्याजी परिघः क्लृप्तं रूपिकमत्ययश्चायमुखम् ।

खनिमाह — **सुवर्णे**त्यादि । वज्रः हीरकः, मणिर्मरतकादिः । भूमिधातुः प्रस्तरधातुः रसधातुश्च । स्पष्टमन्यत् । सुवर्णादिद्वादशकं खननलभ्यत्वात् खनिशब्दवाच्यम् ।

सेतुमाह — **पुष्पे**त्यादि । पुष्पवाटः कुङ्कुमादिवनं, फलवाटः वार्तोकोर्वारुकादिवाटी, अनयोः पुष्पफलशब्दाभ्यां ग्रहणं वाटशब्देन तु इक्षुवाटस्य, षण्डं कदलीक्रमुकादि, केदारः धान्यक्षेत्रं, मूलवापः आर्द्रकहरिद्रालामज्जाद्युत्पत्तिस्थलम् । पुष्पवाटादयः षट् सेतुशब्दिताः ।

वनमाह — **पशुमृगे**त्यादि । पशुवनमृगवनद्रव्यवनहस्तिवनानां परिग्रहो वनमिति शब्द्यत इत्यर्थः । तत्र पशुर्गवयादिः, मृगो हरिणादिः, द्रव्यं शाकतिनिशादि, हस्ती कालिङ्गादिः ।

गवाद्यष्टकं व्रजशब्दितमित्याह — **गोमहिषमि**त्यादि । अजाश्छागाः । अविका मेषाः । खरा गर्दभाः । अश्वतराः वेसराः । स्पष्टमन्यत् ।

वणिक्पथं द्विविधमाह — **स्थले**त्यादि ।

इतीति । इति आयशरीरम् उक्तसप्तषष्टिप्रकारं दुर्गादिसप्तकं धनागमस्थानम् । उक्त आयशरीरे मूलादिसप्तकं प्रधानत्वाद् मुखस्थानीयमित्याशयेनाह — **मूलमि**त्यादि । मूलं धान्यफलादिविक्रयलब्धं धनम् । मूल्यमित्येव पाठः क्वचित् । भागः षड्भागः, व्याजी विंशतिभागः पुनर्माने मा भूदूनतेत्यधिकं गृह्यमाणः, परिघः आतरद्रव्यं, क्लृप्तम् अमुकग्रामस्यैतावदिति प्रतिनियतं हिरण्यं धान्यं च, रूपिकं लवणाध्यक्षेण तद्विक्रयिभ्यः प्रस्थशतस्याष्टशो गृह्यमाणो लवणभागः, अत्ययश्च अध्यक्षप्रचार-धर्मस्थीय-कण्टकशोधनोक्तविधया गृह्यमाणमपराधदण्डद्रव्यं च, आयमुखम् । अत्र संग्रहश्लोकान् पठन्ति —

देवपितृपूजादानार्थं स्वस्तिवाचनमन्तःपुरं महानसं दूतप्रावर्तिमं कोष्ठागारमायुधागारं पण्यगृहं कुप्यगृहं कर्मान्तो विष्टिः पत्त्यश्वरथद्विपपरिग्रहो गोमण्डलं पशुमृगपक्षिव्यालवाटाः काष्ठतृणवाटश्चेति व्ययशरीरम् ।

राजवर्षं मासः पक्षो दिवसश्च व्युष्टम् । वर्षाहेमन्तग्रीष्माणां तृतीय

"शरीरं सप्तधायस्य तावन्त्येव मुखानि च ।
प्रभेदा. सप्तषष्टिः स्युर्व्यये द्वाविंशतिः स्थिताः ॥
द्वाविंशतिविधं दुर्गं राष्ट्रभेदास्त्रयोदश ।
खनिर्द्वादशधा तत्र सेतवश्चैव षड्विधाः ॥
वनं चतुर्विधं ज्ञेयं व्रजभेदोऽपि चाष्टधा ।
द्विधा वणिक्पथश्चैवं शरीरं सप्तषष्टिधा ॥" इति ।

अथ व्ययशरीरमाह—देवेत्यादि । देवपितृपूजादानार्थं देवपितृपूजादानप्रयोजनकं, तत्र देवपूजा देवाराधनं पितृपूजा श्राद्धकर्म दानं पर्वसु ब्राह्मणबालवृद्धातुरानाथादिभ्यो दीयमानं, स्वस्तिवाचनं शान्तिकपौष्टिकार्थे पुरोहिताय दीयमानम्, अन्तःपुरं देवीभोगिनीराजपुत्रेभ्यो देयं, महानसं पाकशालार्थो व्ययः, दूतप्रावर्तिमं दूतस्य परविषयगतागतप्रवर्तनार्थो व्ययः, कोष्ठागारं भोज्यद्रव्यावस्थानगृहं तन्निर्माणादिनिमित्तो व्ययः, आयुधागारम् आयुधनिर्माणशाला तद्रक्षणशाला च, पण्यगृहं पण्यगृहार्थो व्ययः, कुप्यगृहं तत्सम्बद्धं धनं शाकतिनिशादिसारदारुवेणुवल्लीवल्कादिच्छेदनानयनरक्षणादिविषयो व्यय इति यावत्, कर्मान्तः कृष्यादिव्यापारव्ययः, विष्टिः हठकारितकर्मार्थो व्ययः, पत्त्यश्वरथद्विपपरिग्रहः पत्त्यादिचतुष्टयार्थो व्ययः, गोमण्डलं गोमहिषमेषाद्यर्थो व्ययः, पशुमृगपक्षिव्यालवाटाः पशवो वन्यपशवः मृगा हरिणादयः पक्षिणः शुकशारिकादयः व्यालाः सिंहव्याघ्रादयः एषां वाटाः रक्षणस्थानानि तन्निमित्तो व्यय इत्यर्थः, काष्ठतृणवाटः काष्ठतृणवाटार्थो व्ययः, चशब्दादावश्यकव्ययान्तरपरिग्रहः, त एते द्वाविंशतिर्व्ययाः व्ययशरीरम् ।

राजेत्यादि । राजवर्षम् आ राजराज्याभिषेकादारब्धः संवत्सरः, मासः, पक्षः, दिवसश्च, व्युष्टं राजवर्षादिचतुष्टयं व्युष्टसंज्ञमित्यर्थः । एतच्च अमुकराजवर्षेऽमुकमासेऽमुकपक्षेऽमुकदिवसेऽमुकपुरुषेणानीतमेतावद् धनम्, अद्यामुकपुरुषायैतावद् दत्तमिति रीत्या निबन्धपुस्तकादिषु लेख्यमिति बोद्धव्यम् । वर्षाहेमन्तेत्यादेरयमर्थः—राजवर्षस्य त्रिधा विभक्तस्य सिंहकन्यातुलावृश्चिका-

सप्तमा दिवसोनाः पक्षाः, शेषाः पूर्णाः । पृथगधिमासक इति कालः ।

करणीयं सिद्धं शेषमायव्ययौ नीवी च ।

संस्थानं प्रचारः शरीरावस्थापनमादानं सर्वसमुदयापिण्डः सञ्जातम् एतत् करणीयम् ।

कोशार्पितं राजहारः पुरव्ययश्च प्रविष्टं, परमसंवत्सरानुवृत्तं शासनमुक्तं मुखाज्ञप्तं चापातनीयम्, एतत् सिद्धम् ।

सिद्धिप्रकर्मयोगः दण्डशेषमाहरणीयं, बलात्कृतप्रतिस्तब्धमवसृष्टं च प्रशोध्यम्, एतच्छेषमसारमल्पसारं च ।

श्चत्वारो रविमासा वर्षर्तुरित्येको भागः, धनुर्मकरकुम्भमीनाख्याश्चत्वारो हेमन्त इति द्वितीयः, मेषवृषभमिथुनकुलीराख्याश्चत्वारो ग्रीष्म इति तृतीयः इत्येतेषां त्रयाणां भागानां ये प्रत्येकमष्टौ पक्षास्तेषु तृतीयपक्षे सप्तमपक्षे **चैकैको** दिवसो हीयते, अवशिष्टास्तु पक्षा अनूनदिवसा इति । **पृथगिति** । अधिमासकः अधिकः सौरमासादतिरिक्तः शुक्लप्रतिपदादिर्दर्शावसानश्चान्द्रो मासः, पृथग्, इति कालः उक्तप्रकारो व्यवहारार्थः कालो विज्ञेयः ।

करणीयादिषट्कमुद्दिशति — **करणीयमित्यादि** ।

करणीयं षड्विधमाह — **संस्थानमित्यादिना** । तत्र संस्थानम् अमुकग्रामादियदादेयमिति क्लृप्तिः, प्रचारो देशः, शरीरावस्थापनं जनपदनगरयोरायशरीरमेतावदिति निश्चयः, आदानं धान्यहिरण्यादेर्यथाकालग्रहणं, सर्वसमुदयपिण्डः सर्वेषां समुदयानां पिण्डः प्रतिग्रामं प्रतिनगरं चोत्पन्नानां धनानां सङ्घातः तज्ज्ञानमित्यर्थः, सञ्जातं सर्वोपायलब्धधनेयत्ताज्ञानम्, एतद् उक्तं षट्कं, करणीयम् अवश्यकार्यत्वात् करणीयशब्दितम् ।

सिद्धमाह—**कोशेत्यादि** । कोशार्पितं भाण्डागारिकहस्तेऽर्पितं, राजहारः राज्ञा स्वीयकार्यार्थं समाहर्तृसकाशाद् गृहीतं, पुरव्ययश्च पुरे शालानिर्माणाद्यर्थं व्ययितं धनं च, प्रविष्टं प्रविष्टशब्दितम् । परमसंवत्सरानुवृत्तम् अतीतवर्षसम्बद्धमप्रविष्टतया स्थितं, शासनमुक्तं राजाज्ञालेखनिरस्तं, मुखाज्ञप्तं राजवाग्विश्राणितं च, आपातनीयम् आपातनीयशब्दितं समुदयाद् व्यवकलनीयमिति कृत्वा । एतत् प्रविष्टत्रिकमापातनीयत्रिकं चेत्युभयरूपं षट्कं, सिद्धं सिद्धशब्दितम् ।

षड्विधं शेषमाह—**सिद्धीत्यादि** । सिद्धिप्रकर्मयोगः सिद्धौ सिद्धधान्यादौ प्रकर्मयोगः स्वायत्तीकरणप्रवृत्तिरदत्तकरप्रवेशनार्था, दण्डशेषं सैन्योपयु-

वर्तमानः पर्युषितोऽन्यजातश्चायः। दिवसानुवृत्तो वर्तमानः। परमसांवत्सरिकः परप्रचारसङ्क्रान्तो वा पर्युषितः। नष्टप्रस्मृतमायुक्तदण्डः पार्श्वं पारिहीणिकमौपायनिकं डमरगतकस्वमपुत्रकं निधिश्चान्यजातः। विक्षेपव्याधितान्तरारम्भशेषश्च व्ययप्रत्यायः। विक्रये पण्यानामर्घवृद्धिरुपजा मानोन्मानविशेषो व्याजी क्रयसङ्घर्षे वा वृद्धिरित्यायः।

क्तावशिष्टद्रव्यं च, आहरणीयं सुखेनाहर्तुं शक्यत्वादाहरणीयसंज्ञम्। बलात्कृतप्रतिस्तव्यं राजवल्लभाद्याश्रयबलाददत्तं देयं प्रतिस्तव्धापरपर्यायम्, अवसृष्टं च पुरमुख्यैः कामचारादत्तं च, प्रशोध्यं प्रयत्नसाध्यत्वात् प्रशोध्यसंज्ञम्। एतद् उक्तमाहरणीयद्विकं प्रशोध्यद्विकं चेतीदं चतुष्टयमित्यर्थः, असारं प्रवेशनार्थे कृतेऽपि व्यये निष्फलम्, अल्पसारं च बहुव्ययसाध्याल्पफलं च, शेषं तत्संज्ञम्।

आयं त्रेधा विभज्य व्युत्पादयति — **वर्तमान** इति। आयः, वर्तमानः पर्युषितः अन्यजातश्च इति त्रिविधः। तत्र दिवसानुवृत्तः नित्यः, वर्तमानः। परमसांवत्सरिकः अतीतवर्षग्राह्यः वर्तमानवर्षे गृहीतः, परप्रचारसंक्रान्तः भूतपूर्वाध्यक्षकालप्रविष्टः यद्वा शत्रुविषयादागतः, वाशब्दः समुच्चये, पर्युषितः तदाख्यः। नष्टप्रस्मृताद्यष्टकमन्यजात इत्याह— **नष्टेत्यादि**। नष्टप्रस्मृतं विस्मृताभिज्ञातमिति भाषाटीका। प्रशब्द इह प्रकर्षे नतु धात्वर्थविपरीतत्वे इति तत्पक्षे वक्तव्यम्। नष्टमपगतं प्रस्मृतं विस्मृतमिति तु कोष्ठागाराध्यक्षप्रकरणे भट्टस्वामी। आयुक्तदण्डः तत्तत्कार्याध्यक्षेभ्योऽपराधिभ्यो गृहीतो दण्डः, पार्श्वं करातिरेचनलक्षणवक्रोपायलब्धं धनम्। प्रभुत्वाधिगम्यामिति केचित्। पारिहीणिकं चतुष्पदविनाशितसस्यदण्डाधिगम्यं धनम्, औपायनिकम् उपायनत्वेन गृहीतं, डमरगतकस्वं डमरः शत्रुकलहविप्लवः तदवसरे शत्रुसैन्यादपहृतं धनम्, अपुत्रकम् अविद्यमानदायादकं धनं, निधिश्च निधिलाभश्च, अन्यजातः अष्टावेतेऽन्यजातशब्दिताः। आयस्य प्रकारान्तरमाह — **विक्षेपेत्यादि**। विक्षेपव्याधितान्तरारम्भशेषश्च विक्षेपशेषः किञ्चित्कार्यसाधनाय नियुक्तस्य सैन्यस्यार्थे व्ययितावशिष्टं धनं व्याधितशेषः भेषजशालाव्ययितशिष्टम् अन्तरारम्भशेषः दुर्गप्रासादादिनिमित्तव्ययितावशिष्टम् इत्येतत् त्रिकं, व्ययप्रत्यायः तदाख्ययोच्यते। पुनरप्यायस्य पाञ्चविध्यमाह — **विक्रय** इत्यादिना। विक्रये पण्यानामर्घवृद्धिः कक्षाभ्यधिकेन मूल्येन पण्यविक्र-

नित्यो नित्योत्पादिको लाभो लाभोत्पादिक इति व्ययः । दिवसानुवृत्तो नित्यः । पक्षमाससंवत्सरलाभो लाभः । तयोरुत्पन्नो नित्योत्पादिको लाभोत्पादिक इति ।

व्ययसंजातादायव्ययविशुद्धा नीवी प्राप्ता चानुवृत्ता चेति ।

याल्लब्धमधिकं धनं विक्रेतृसकाशादुपस्थापितम्, उपजा प्रतिषिद्धविक्रयलब्धं, मानोन्मानविशेषः मानोन्मानयोर्विशेषकरणेन मेयाधिक्यसम्पादनाल्लब्धं, व्याजी विंशतिभागः पुनर्मीयमानमेयोनतापरिहारार्थमधिकतया गृह्यमाणः, क्रयसंघर्षे वृद्धिः स्पर्धया मूल्यवर्धनाल्लब्धं, वाशब्दश्चकारार्थः । इत्यायः उक्तप्रकारेणायो व्याख्यातः । भाषाटीका तु नष्टप्रस्मृतादिकमन्तरारम्भशेषान्तमेकादशकमन्य-जातभेद इति, व्ययप्रत्यायादिषट्कमायस्य प्रकारान्तरमिति च व्याचष्टे । तत्तु 'विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः' इति कोष्ठागाराध्यक्षवक्ष्य-माणग्रन्थेन विरुध्यते ।

अथ व्ययमाह — **नित्य** इति । नित्यो नित्योत्पादिकः लाभो लाभो-त्पादिक इति चतुर्विधो व्ययः । तत्र दिवसानुवृत्तः प्रात्यहिको व्ययः नित्यः । **पक्षमाससंवत्सरलाभ** इति तादर्थ्यात् ताच्छब्द्यं, पक्षलाभार्थो मासलाभार्थः संवत्सरलाभार्थश्च व्ययः, लाभः लाभशब्दितः । तयोर्नित्यलाभयोः, **उत्पन्नः** तत्र नित्योत्पन्नो लाभोत्पन्नश्च व्ययः, नित्योत्पादिको लाभोत्पादिक इति व्यप-दिश्यत इति शेषः । यथाक्रमं च संबन्धः । कृप्तवेतनातिरेकेण एतावतो नित्यव्ययस्यैतावादिति विशेषतः कर्मकरेभ्यो यद् दीयते स व्ययो नित्यव्य-योत्पन्नत्वान्नित्योत्पादिकशब्दितः, एतावतो लाभनिमित्तव्ययस्यैतावदिति विशे-षतस्तेभ्यो यद् दीयते स लाभाख्यव्ययोत्पन्नत्वाल्लाभोत्पादिकशब्दित इति विवेक्तव्यम् ।

सर्वव्ययावशेषो नीवीत्याह—**व्यये**त्यादि । व्ययसञ्जाताद् व्ययसमष्टेः सर्वव्ययद्वारेभ्य इत्यर्थः, उत्थितेति शेषः, आयव्ययविशुद्धा आयव्ययस-म्यग्गणनपरिनिश्चिता, नीवी नीवीशब्दितं द्रव्यमित्यर्थः । सा च द्विप्रकारा प्राप्ता चानुवृत्ता चेति । तत्र प्राप्ता भाण्डागारं प्रविष्टा, अनुवृत्ता तत्प्रवेशाय प्रस्थितेति ज्ञेयम् ।

एवं कुर्यात् समुदयं वृद्धिं चायस्य दर्शयेत् ।
ह्रासं व्ययस्य च प्राज्ञः साधयेच्च विपर्ययम् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः
समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः ।

अध्यायान्ते श्लोकमाह — **एवमिति** । एवम् उक्तैः प्रकारैः, समुदयं धनोत्पत्तिं, कुर्यात्, आयस्य वृद्धिं च, व्ययस्य ह्रासं च दर्शयेत्, समाहर्ता। स कीदृशः, प्राज्ञः प्रजानुपपीडयायवृद्धिप्रदर्शने कर्मकरानुपपीडया व्ययह्रासप्रदर्शने च निपुणः । विपर्ययं च साधयेत् आयव्यययोर्वृद्धिह्रासवैपरीत्यं यदि यदृच्छयोपनमेत् तदपि वारयेदित्यर्थः, यद्वा विपर्ययं व्ययवृद्धिमपरिहार्यतया प्रसक्तां कालान्तरभाव्यायवृद्ध्युपायनिश्चयेन समर्थयेदपीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठोऽध्यायः
समाहर्तृसमुदयप्रस्थापनम्, आदितः सप्तविंशः ॥

२५. प्रक. अक्षपटले गाणनिक्याधिकारः।

अक्षपटलमध्यक्षः प्राङ्मुखमुदङ्मुखं वा विभक्तोपस्थानं निबन्धपुस्तकस्थानं कारयेत् ।

तत्राधिकरणानां सङ्ख्याप्रचारसञ्जाताग्रं, कर्मान्तानां द्रव्यप्रयोगे वृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं, रत्नसार-

---

अक्षपटले गाणनिक्याधिकार इति सूत्रम् । अक्षपटले अक्षाणां द्रव्याणां पटले गणनपुस्तकलेखनादिकर्मानुष्ठानदेशे, गाणनिक्याधिकारः गाणनिका गणननियुक्तास्तेषां कर्म गाणनिक्यं तस्याधिकारः प्रस्ताव इह क्रियत इति सूत्रार्थः । अर्थोपधाशुद्धा अर्थसम्बद्धे कर्मणि नियोक्तव्या इत्युक्तमधस्तात् । स पुनरर्थव्यापार इदानीमभिधीयत इति सम्बन्धः ।

अक्षेत्यादि । अध्यक्षः आयुक्तप्रधानः, अक्षपटलं तत्तदध्यक्षाणां सम्भूयस्वस्वकर्मानुष्ठानदेशं कारयेत् । कीदृशं, प्राङ्मुखमुदङ्मुखं वा, दिग्द्वयोपादानं तन्मुखस्य माङ्गलिकत्वद्योतनायाताद्दृशस्य वैपरीत्यद्योतनाय च । पुनः कीदृशं, विभक्तोपस्थानं विभक्तानि उत्तममध्यमाधमानामध्यक्षाणां पृथक्स्थित्यनुकूलतया विभज्य विहितानि उपस्थानान्यन्तःकक्ष्याः यस्मिंस्तत् तथाभूतम् । पुनः कथम्भूतं, निबन्धपुस्तकस्थानं गणकपुस्तकनिवेशाधिष्ठानभूतम् ।

निबन्धपुस्तकेषु लेखनीयं वस्तुजातमाह — **तत्रेति** । तत्र अक्षपटले, अधिकरणानां संख्याप्रचारसञ्जाताग्रं द्रव्योत्पत्तिस्थानानां संख्यां नामतः परिगणनं प्रचारसञ्जातयोरग्रं च प्रचारो जनपदः सञ्जातं सर्वोत्पत्तिसमुदायः तयोरियत्तां च, निबन्धपुस्तकस्थं कारयेत् एतावद्भ्य उत्पत्तिस्थानेभ्य इयत्परिमाणे जनपदे प्रत्यब्दमेतावद् धनमुत्पद्यत इति निबन्धपुस्तके लेखयेदित्यर्थः । **कर्मान्तानां द्रव्यप्रयोगे** कर्मान्ताः खनिधान्योत्पत्तिभूमिपण्यरूप्यादिकर्मस्थानानि तत्सम्बद्धे द्रव्यप्रयोगे तत्तत्कर्मकरेभ्यो द्रव्याणां विनियोग इत्यर्थः, **वृद्धिक्षयव्ययप्रयामव्याजीयोगस्थानवेतनविष्टिप्रमाणं** वृद्धि क्षयव्ययादीनामष्टानां प्रमाणं च, निबन्धपुस्तकस्थं कारयेत् । तत्र वृद्धिः कुसीदं, क्षयः युग्यपुरुषविनियोगः, व्ययः धान्यहिरण्यविनियोगः, प्रयामः सिद्धधान्यराशिः क्रयादरो वा, व्याजी तुलादण्डसम्बद्धा दण्डव्याजी प्रस्थमानसम्बद्धा मानव्याजी चेत्युभयविधा, योगो द्रव्यापद्रव्यमिश्रणं, स्थानं ग्रामादिकं, वेतनं

फल्गुकुप्यानामर्घप्रतिवर्णकप्रतिमानमानोन्मानभाण्डं, देशग्रामजातिकुलसङ्घानां धर्मव्यवहारचारित्रसंस्थानं, राजोपजीविनां प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं, राज्ञश्च पत्नीपुत्राणां रत्नभूमिलाभं निर्देशौत्पादिकप्रतीकारलाभं, मित्रामित्राणां च सन्धिविक्रमप्रदानादानं निबन्धपुस्तकस्थं कारयेत् ।

ततः सर्वाधिकरणानां करणीयं सिद्धं शेषमायव्ययौ नीवीम्

कर्मकरभृतिः, विष्टिः बलकारितं कर्म । रत्नसारफल्गुकुप्यानामर्घप्रतिवर्णकप्रतिमानमानोन्मानभाण्डं रत्नादीनां चतुर्णामर्घादिषट्कं, निबन्धपुस्तकस्थं कारयेत् । तत्र अर्घं मूल्यं, प्रतिवर्णको वर्णगुणः, प्रतिमानं माषगुञ्जादि, मानम् आकृतिपरिच्छेदः, उन्मानमूर्ध्वमानं, भाण्डं मूलधनम् । देशग्रामजातिकुलसङ्घानां देशः पूर्वदेशमध्यमदेशादिः ग्रामः प्रसिद्धः जातिर्ब्राह्मणादिः कुलं गोत्रं सङ्घगणः एषां पञ्चानां, धर्मव्यवहारचारित्रसंस्थानं धर्मः यजनादिः स्मृत्युक्तः व्यवहारो दायभागः चारित्रं समुदाचारो देशादिप्रतिनियतो मातुलकन्यापरिणयादिलक्षणः तेषां संस्थानमविचालनं यद्वा स्वरूपं, निबन्धपुस्तकस्थं कारयेत् । राजोपजीविनां, प्रग्रहप्रदेशभोगपरिहारभक्तवेतनलाभं प्रग्रहः पूजा मन्त्रिपुरोहितादीन् प्रति प्रत्युद्गमनबहुमानः प्रदेशो वासस्थानं भोग उपायनं परिहारः करमुक्तिः भक्तम् अश्वगजपदात्यभ्यवहारः वेतनं भृतिः इत्येषां लाभं, निबन्धपुस्तकस्थं कारयेत् । राज्ञः, पत्नीपुत्राणां च पत्नीनां पुत्राणां च, रत्नभूमिः लाभं तदुपयुज्यमानानां रत्नानां भूमीनां स्थानीयादीनां च लाभं, निबन्धपुस्तकस्थं कारयेत् । निर्देशौत्पादिकप्रतीकारलाभं निर्देशं राजतत्पत्नीपुत्राणां नित्यदेयातिरिक्तं देयं सामन्तव्यपदेशाख्यम् औत्पादिकलाभम् उत्सवादिभवं धनलाभं प्रतीकारलाभं व्याध्यादिप्रशमननिमित्तं धनलाभं च, निबन्धपुस्तकस्थं कारयेत् । औत्पत्तिकेति पाठे भूकम्पनिर्घाताद्युत्पातदोषशान्त्यर्थं धनलाभमित्यर्थो बोद्धव्यः । मित्रामित्राणां, सन्धिविक्रमप्रदानादानं च मित्रेषु सन्धाय प्रदीयमानं धनम् अमित्रेषु विक्रम्य विगृह्य आदीयमानं धनं च, निबन्धपुस्तकस्थं कारयेत् ।

तत इति । सर्वाधिकरणानां सर्वेषां कर्मस्थानानाम् अर्थात् तदध्यक्षाणां, करणीयं सिद्धं शेषम् आयव्ययौ नीवीं करणीयादिषट्कं पूर्वाध्यायो-

उपस्थानं प्रचारचरित्रसंस्थानं च निबन्धेन प्रयच्छेत् । उत्तममध्यमावरेषु च कर्मसु तज्जातिकमध्यक्षं कुर्यात्, सामुदायिकेष्ववक्लृप्तिकं यमुपहत्य न राजानुतप्येत ।

सहग्राहिणः प्रतिभुवः कर्मोपजीविनः पुत्रा भ्रातरो भार्या दुहितरो भृत्याश्चास्य कर्मच्छेदं वहेयुः ।

त्रिशतं चतुःपञ्चाशच्चाहोरात्राणां कर्मसंवत्सरः । तमाषाढीपर्य-

क्तलक्षणम्, उपस्थानं कायस्थानां स्वस्वकार्यदर्शनार्थसन्निधानकालं, प्रचारचरित्रसंस्थानं च प्रचारो जनपदः चरित्रमाचारः संस्थानं पूर्वस्थितिरित्येतत्त्रिकं च, निबन्धेन प्रयच्छेत् निबन्धपुस्तके विलिख्य दद्यात् । **उत्तमे**त्यादि । उत्तममध्यमावरेषु कर्मसु, तज्जातिकं तदनुरूपम्, अध्यक्षं कुर्यात । तत्रोत्तमं कर्म धनसंग्रहणं भाण्डागाराधिकारश्च, मध्यमं कोष्ठागारायुधागारादिगतं कर्म, अवरं सुरासूनाद्यध्यक्षकर्म । तज्जातिकानां बहुत्वे व्यवस्थार्थमाह— **सामुदायिकेष्वि**ति । सामुदायिकेषु एककर्मसाधकसमुदायान्तर्गतेषु बहुषु कर्मकरेषु मध्ये, अवक्लृप्तिकम् अवक्लृप्तिर्नाम असावदः कर्माध्यक्षयितुं क्षम इति नैपुणगुणकीर्त्युपलम्भमूला सम्भावना सास्मिन्नस्तीत्यवक्लृप्तिकस्तं यथोक्तसम्भावनाविषयमित्यर्थः । अयमभिप्रायः — कर्मकरेषु नैपुणयुक्तं समनैपुणेषु गुणयुक्तं समगुणेषु च कीर्तियुक्तमध्यक्षं कुर्यादिति । अवक्लृप्तिकमपि किं सर्वमेवाध्यक्षं कुर्यात्, नेत्याह— **यमुपहत्य न राजानुतप्येते**ति । राजा, यम् उपहत्य अपराधवशाद् दण्डयित्वा, नानुतप्येत पश्चात्तप्तो न भवेत्, तं तथाविधमवक्लृप्तिकमध्यक्षं कुर्यादिति सम्बन्धः । एतेन ब्राह्मणात्मबन्धुमहासम्बन्धिनां व्युदासः सिद्धः ।

अपचरदध्यक्षविषयं सामान्यन्यायमाह — **सहग्राहिण** इति । अस्य कर्मच्छेदम् अनेनाध्यक्षेणादत्तं देयशेषं, सहग्राहिणः सहहर्तारः, प्रतिभुवो लग्नकाः, कर्मोपजीविनः कर्मकराः संख्यायकाः, पुत्राः, भ्रातरः, भार्याः, दुहितरः, भृत्याश्च इत्येतेऽष्टौ, वहेयुः प्रापयेयुः पूर्वपूर्वाभावे यथोत्तरं दद्युरित्यर्थः ।

त्रिशतमिति । अहोरात्राणां त्रिशतं चतुष्पञ्चाशच्च कर्मसंवत्सरः चतुष्पञ्चाशदधिकत्रिशतसंख्याका दिवसाः सर्वकर्मविषय एकः संवत्सरो गण्यते । तत्र दिवसषट्कोनता ऋतावृतावेकदिवसह्रासाद् बोद्धव्या । तं कर्मसंवत्सरम् आषाढीपर्यवसानं दद्यात् आषाढमासपूर्णिमान्तम् अर्थाच्छ्रावण-

वसानमूनं पूर्णं वा दद्यात् । करणाधिष्ठितमधिमासकं कुर्यात् । अपसर्पाधिष्ठितं च प्रचारम् । प्रचारचरित्रसंस्थानान्यनुपलभमानो हि प्रकृतः समुदयमज्ञानेन परिहापयति, उत्थानक्लेशासहत्वादालस्येन, शब्दादिष्विन्द्रियार्थेषु प्रमादेन, सङ्क्रोशाधर्मानर्थभीरुर्भयेन, कार्यार्थिष्वनुग्रहबुद्धिः कामेन, हिंसाबुद्धिः कोपेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन ।

तेषामानुपूर्व्या यावानर्थोपघातः तावानेकोत्तरो दण्ड इति

मासोपक्रमं कल्पयेत् । ऊनं पूर्णं वा दद्यात् तं चाध्यक्षस्यान्तरालकालापगमे तावत्पर्यन्तमपूर्णं गणयेत्, पूर्णकालस्थितिपक्षे तु पूर्णं गणयेत् कर्मभृतिशोधनादावित्यर्थः । अधिमासकं करणाधिष्ठितं गणकाधिष्ठितं गणकद्वारेण गणितं, कुर्यात् । प्रचारं च जनपदं च, अपसर्पाधिष्ठितं चारावेक्षितं, कुर्यात् । अपसर्पाप्रणिधाने दोषमाह— **प्रचारे**त्यादि । प्रचारचरित्रसंस्थानानि देशवृत्तान्तान् तत्पूर्वस्थितीश्च, अनुपलभमानः अपसर्पद्वारेणाविजानन्, प्रकृतः अध्यक्षः, अज्ञानेन हेतुना, समुदयं धनोत्पत्तिं, परिहापयति परिहीयमानं प्रयोजयति । पुनः केन केन हेतुनेत्येतद् **उत्थाने**त्यादिनाभिधीयते । उत्थानक्लेशासहत्वादालस्येन उद्यमखेदासहनत्वनिमित्तयालसतया, शब्दादिषु इन्द्रियार्थेषु प्रमादेन गीतकामिन्यादिषु विषयेष्वनवधानप्रवृत्त्या, संक्रोशाधर्मानर्थभीरुर्भयेन निन्दाधर्मलोपानर्थोपनिपातशङ्कित्वमूलेन साध्वसेन, कार्यार्थिषु अनुग्रहबुद्धिः कामेन कार्यार्थिनोऽनुग्रहीष्यामीत्येवंबुद्धिमूलया स्वेच्छया, हिंसाबुद्धिः कोपेन नृशंसत्वनिमित्तेन क्रोधेन, विद्याद्रव्यवल्लभापाश्रयाद् दर्पेण विद्याद्रव्यराजवल्लभव्यपाश्रयनिमित्तेन मदेन, तुलामानतर्कगणिकान्तरोपधानाल्लोभेन तुलान्तरेण उन्मानदण्डविशेषेण मानान्तरेण प्रस्थादिमानसाधनविशेषेण तर्कान्तरेण संभावनाविशेषेण गणिकान्तरेण गणनविशेषेण च यदुपधानं छलनं तत्प्रयोजकेन लोभेनेत्यर्थः । तदेवमज्ञानालस्यप्रमादभयकामकोपदर्पलोभात्मका अष्टौ दोषाः समुदयपरिहापननिमित्तभूता वेदितव्याः ।

परिहापितसमुदयानां दण्डचिन्तायामाह— **तेषामिति** । तेषाम् उक्तदोषयुक्तानामष्टानाम्, आनुपूर्व्या क्रमेण, यावान् अर्थोपघातः तत्तद्दोषवशादुपहृतो यत्परिमाणोऽर्थः, तावान् एकोत्तरः तत्परिमाण एकादिगुणाधिकोऽर्थः, दण्ड

मानवाः। सर्वत्राष्टगुण इति पाराशराः। दशगुण इति बार्हस्पत्याः। विंशतिगुण इत्यौशनसाः। यथापराधम् इति कौटल्यः।

गाणनिक्यान्याषाढीमागच्छेयुः। आगतानां समुद्रपुस्तभाण्डनीवीकानामेकत्रासम्भाषावरोधं कारयेत्। आयव्ययनीवीनामग्राणि श्रुत्वा नीवीमवहारयेत्। यच्चाग्रादायस्यान्तरवर्णे नीव्या वर्धेत, व्ययस्य वा यत् परिहापयेत्, तदष्टगुणमध्यक्षं दापयेत्। विपर्यये तमेव प्रति स्यात्।

इति, मानवाः मनुशिष्याः, वदन्तीति शेषः। सर्वेषु दोषेष्वविशेषादष्टगुण इति पाराशराः, दशगुण इति बार्हस्पत्याः, विंशतिगुण इति शुक्रशिष्याश्च मन्यन्त इत्याह — **सर्वत्रे**त्यादि। स्वमतमाह—**यथे**त्यादि। यथापराधम् अपराधानुसारेण अपराधमहत्त्वाल्पत्वादिपर्यालोचनया दण्डः कल्पनीय इत्यभिप्रायः।

अथाध्यक्षाणां वार्षिकगणितप्रदर्शनकाल उच्यते — **गाणनिक्यानी**ति। गाणनिक्यानि गणनाः अर्थात् तत्प्रदर्शकाः अध्यक्षाः आषाढीम् आगच्छेयुः गणनप्रदर्शनार्थमाषाढमासि आगच्छेयुः। समुद्रपुस्तभाण्डनीवीकानां समुद्रं मुद्रायुक्तं पुस्तभाण्डं निबन्धपुस्तकपेटी नीवी व्ययितशिष्टधनं च येषां तथाविधानाम्, आगतानाम् अध्यक्षाणाम्, एकत्रासम्भाषावरोधं पुस्तकदर्शनस्थलेऽन्योन्यमन्त्रणशून्यमवरुध्य रक्षणं कारयेत्। आयव्ययनीवीनाम्, अग्राणि इयत्ताः, श्रुत्वा मुखत आकर्ण्य, नीवीम्, अवहारयेत् उपनाययेत्। **यच्चे**ति। नीव्याः, अन्तरवर्णे व्ययितावशेषस्यावहारितस्य प्रकारवर्णनपुस्तके, यद् धनम्, आयस्याग्राद् अध्यक्षोक्ताद्, वर्धेत अधिकतया विभाव्येत, व्ययस्य वा अग्राद् अध्यक्षोक्ताद्, यद् धनं, परिहापयेद् परिहीणं कुर्यात्, तद् अष्टगुणम्, अध्यक्षं दापयेद् अध्यक्षसकाशाद् गृह्णीयादित्यर्थः। **विपर्यय** इति। आयस्य यथाप्राप्तादधिकतया लेखनं व्ययस्य यथाकृतादूनतया लेखनं व्ययितावशेषस्य यथास्थितादाधिक्येन लेखनं वा विपर्ययः तस्मिन् पुस्तकदृष्टे सति, तमेव प्रति स्यात् अधिकमध्यक्षस्यैव भागः अध्यक्षायैव देयं नतु तस्य दण्डः कश्चिदित्यर्थः। 'लक्षणेत्थम्भूते'त्यादिना भागे प्रतेः कर्मप्रवचनीयता।

यथाकालमनागतानामपुस्तनीवीकानां वा देयदशबन्धो दण्डः। कार्मिके चोपस्थिते कारणिकस्याप्रतिबध्नतः पूर्वः साहसदण्डः, विपर्यये कार्मिकस्य द्विगुणः।

प्रचारसमं महामात्राः समग्राः श्रावयेयुरविषममात्राः। पृथग्भूतो मिथ्यावादी चैषामुत्तमदण्डं दद्यात्।

अकृताहोरूपहरं मासमाकाङ्क्षेत। मासादूर्ध्वं मासद्विशतोत्तरं दण्डं दद्यात्। अल्पशेषनीवीकं पञ्चरात्रमाकाङ्क्षेत ततः परम्।

क्लृप्तकालेऽनागतानां पुस्तकनीवीविरहेणागतानां चाध्यक्षाणां देयदशगुणो दण्ड इत्याह — **यथाकालमित्यादि**। **कार्मिक** इति। कार्मिके अध्यक्षे उपस्थिते पुस्तदर्शनार्थं यथाकालं सन्निहिते सति, अप्रतिबध्नतः अप्रतियुज्यमानस्य असम्बध्नतः, कारणिकस्य गणनाधिकृतस्य, पूर्वः साहसदण्डः। विपर्यये अप्रतियोगदोषे कार्मिकगते सतीत्यर्थः, कार्मिकस्य द्विगुणः पूर्वः साहसदण्डः।

प्रचारेत्यादि। महामात्राः राज्ञः प्रधानभूताः कर्मसहार्याः, समग्राः, अविषममात्राः अविषमाः परस्परानुकूलाः प्रवृत्तीः संगता आयव्ययनीवीयत्ता वा, प्रचारसमं श्रावयेयुः प्रचारो जनपदः तात्स्थ्याज्जानपदाः तत्साधारणं यथा भवति तथा श्रावयेयुः, जानपदान् सदसि मेलयित्वा बोधयेयुरित्यर्थः। एषां महामात्राणां मध्ये, पृथग्भूतः विसंवादी, मिथ्यावादी च, उत्तमदण्डम् उत्तमसाहसदण्डं, दद्यात्।

अकृतेत्यादि। अकृताहोरूपहरं कृते क्लृप्ते अहोरूपे दिवसे हर्तव्यं यो हरत्युपनयति स कृताहोरूपहरः उपहर्तव्यद्रव्ययथाकालोपहर्ता स न भवतीत्यकृताहोरूपहरः तं, तथाविधमध्यक्षं, मासम् आकाङ्क्षेत प्रतीक्षेत, हर्तव्यहरणार्थमेकमासावधिं तस्मै दद्यादित्यर्थः। मासावधावहर्तुर्दण्डमाह — **मासा**दिति। मासाद् ऊर्ध्वम् अनुपहरणे, मासद्विशतोत्तरं मासस्यैकैकस्य द्वे शते उत्तरे यस्य तं तथाभूतं, दण्डं पूर्वोक्तं, दद्यात्। अल्पशेषार्पणीयनीवीके विशेषमाह — **अल्पे**त्यादि। अल्पशेषनीवीकं, ततः परं मासात् परतः, पञ्चरात्रं रात्रिपञ्चकमधिकम्, आकाङ्क्षेत। तत ऊर्ध्वमप्यनुपहरणे दण्डं दद्यादित्यर्थसिद्धम्।

कोशपूर्वमहोरूपहरं धर्मव्यवहारचरित्रसंस्थानसङ्कलननिर्वर्तनानुमानचारप्रयोगैरवेक्षेत ।

दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् । व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैश्चायं समानयेत् । व्युष्टदेशकालमुखलाभकारणदेययोगपरिमाणाज्ञा-

---

कोशेत्यादि । कोशपूर्वम् अहोरूपहरम् अर्पणीयनीवीधनपुरस्सरं कलसदिवसपुस्तकोपनेतारम् अध्यक्षं, धर्मव्यवहारचरित्रसंस्थानसंकलननिर्वर्तनानुमानचारप्रयोगैः अवेक्षेत धर्मप्रयोगादिभिरष्टभिः प्रकारैः परीक्षेत—किमसौ वस्तुत एव सद्वृत्तः उत दाम्भिक इति । तत्र धर्मः स्मृतिविहितः, व्यवहारः पूर्वपक्षोत्तरपक्षलक्षणः, चरित्रं लोकाचारः, संस्थानं पूर्वस्थितिः, सङ्कलनं सर्वधनैकीकारगणना, निर्वर्तनं कार्यनिष्पत्तिः, अनुमानं कृतेनाकृताभ्यूहः, चारा गूढपुरुषाः ।

गणनलेखनपरिपाटीमाह— **दिवसे**त्यादि । दिवसपञ्चरात्रपक्षमासचातुर्मास्यसंवत्सरैश्च प्रतिसमानयेत् दिवसः पञ्चरात्रं पक्षो मासश्चातुर्मास्यं संवत्सर इत्येभिर्विभागैः संख्याय सम्पादयेत् अर्थाद् आयव्ययनीवीः । अयं भावः — संवत्सरस्यादिमे मासि पूर्वपक्षस्य प्रतिपदमारभ्या पञ्चम्याः दैनन्दिनीः आयव्ययनीवीः पृथग् गणनपुस्तकेषु विलिख्य पञ्चमीपर्यन्तादिवसपञ्चकाङ्कान् संकलय्य निवेशयेत् । एवं षष्ठ्यादिदशम्यन्तदिवसपञ्चकाङ्कान् एकादश्यादिपञ्चदश्यन्तदिवसपञ्चकाङ्कांश्च प्रत्येकं संकलय्य निवेशयेत् । तानिमांस्त्रीन् दिवसपञ्चकाङ्कानेकीकृत्य पक्षाङ्कं, पूर्वापरपक्षद्वयाङ्कैकीकरणेन मासाङ्कं, मासचतुष्टयाङ्कैकीकरणेन चातुर्मास्याङ्कं, चातुर्मास्यत्रिकाङ्कैकीकरणेन संवत्सराङ्कं च सम्यक् संख्याय सम्पादयेदिति । आयव्ययनीवीनां साधारणविधिवचनानन्तरं प्रातिस्विकविधिष्वभिधानीयेषु प्रथममायस्य व्ययनीवीनिमित्तत्वेन प्राधान्यात् तं दर्शयति— **व्युष्टे**त्यादि । व्युष्टदेशकालमुखोत्पत्त्यनुवृत्तिप्रमाणदायकदापकनिबन्धकप्रतिग्राहकैः आयं समानयेत् व्युष्टादिविवरणयुक्ताम् आयगणनां सम्पादयेदित्यर्थः । तत्र व्युष्टं राजवर्षमासपक्षदिवसाः, देशः, कालो वर्षादिः, मुखम् आयमुखमायशरीरं च, उत्पत्तिः तदुत्पन्नं शुल्कादि, अनुवृत्तिः स्थानान्तरसंक्रान्तिः, प्रमाणं, दायकः करस्य दाता, दापकः दापयिता राजपुरुषः, निबन्धको लेखकः, प्रतिग्राहको ग्रहीता । व्ययसमानयनविधिमाह — **व्युष्टदेशकालमुखलाभे**त्यादि । तत्र व्युष्टदेशकाल-

पकोद्धारकनिधातृकप्रतिग्राहकैश्च व्ययं समानयेत् । व्युष्टदेशकालमुखानुवर्तनरूपलक्षणपरिमाणनिक्षेपभाजनगोपायकैश्च नीवीं समानयेत् ।

राजार्थे कारणिकस्याप्रतिबध्नतः प्रतिषेधयतो वाज्ञां निबन्धादायव्ययमन्यथा वापि कल्पयतः पूर्वः साहसदण्डः ।

क्रमावहीनमुत्क्रममविज्ञातं पुनरुक्तं वा वस्तुकमवलिखतो द्वादशपणो दण्डः ।

नीवीमवलिखतो द्विगुणः, भक्षयतोऽष्टगुणः, नाशयतः पञ्चबन्धः प्रतिदानं च । मिथ्यावादे स्तेयदण्डः । पश्चात् प्रतिज्ञाते द्विगुणः प्रस्मृतोत्पन्ने च ।

मुखानि पूर्वोक्तानि, लाभः 'पक्षमाससंवत्सरलाभो लाभ' इति गताध्यायोक्तः कारणं निमित्तं, देयं दानीयद्रव्यं, योगो द्रव्यापद्रव्यमिश्रणं, परिमाणमियत्ता, आज्ञापकः चोदकः, उद्धारकः ऋणग्राही ऋणं वा, निधातृकः भाण्डागारिकः, प्रतिग्राहकः ब्राह्मणादिः । नीवीविधिमाह— **व्युष्टदेशकालमुखानुवर्तने**त्यादि । तत्र रूपं द्रव्यस्य स्वरूपं, लक्षणं तच्चिह्नं, परिमाणं तन्मानं, निक्षेपभाजनं द्रव्यनिधानभाण्डं, गोपायकस्तद्रक्षः, शेषं प्रतीतम् ।

अथ यथासम्भवं सामान्यदण्डमाह — **राजार्थे** इति । राज्ञो धनहिरण्यादिलाभरूपे प्रयोजने, अप्रतिबध्नतः असम्बध्नतः राजार्थं पुस्तकेष्वलिखत इत्यर्थः, आज्ञां, प्रतिषेधयतो वा अननुतिष्ठतश्च, आयव्ययं, निबन्धात् क्लृप्तनियमाद्, अन्यथा प्रकारान्तरेण, कल्पयतोऽपि वा, कारणिकस्य पूर्वः साहसदण्डः ।

क्रमेत्यादि । वस्तुकं, क्रमावहीनमवलिखतः उत्तममध्यमाधमेषु क्रमहीनं लिखतः, उत्क्रममवलिखतः पूर्वमधमं पश्चादुत्तममिति व्युत्क्रमं लिखतः, अविज्ञातमवलिखतः वेदितुमनर्हया रीत्या लिखतः, पुनरुक्तमवलिखतो वा लिखितं पुनर्लिखतो वा, द्वादशपणो दण्डः ।

नीवीमिति । नीवीम्, अवलिखतः अवहीनं लिखतः, द्विगुणः पणचतुर्विंशतिः, दण्डः । नीवीं भक्षयतः, अष्टगुणः पणषण्णवतिः, दण्डः । नीवीं नाशयतः नटनर्तकादिभ्यो दत्त्वा लोपयतः, पञ्चबन्धः पञ्चगुणः षष्टिपणो दण्डः, प्रतिदानं च नाशितपुनर्दानं च, भवति । मिथ्यावादे स्तेयदण्डः असत्यवचने चौर्यदण्डः । पश्चात् प्रतिज्ञाते पूर्वमलिखित एव गणनपरिशोधनायां

अपराधं सहेताल्पं तुष्येदल्पेऽपि चोदये ।
महोपकारं चाध्यक्षं प्रग्रहेणाभिपूजयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्यायः अक्षपटले गाणनिक्याधिकारः,
आदितोऽष्टाविंशः ॥

विज्ञाते विषये, प्रस्मृतोत्पन्ने च पूर्वं विस्मृत्य पश्चाच्चिन्तिते च विषये, द्विगुणः स्तेयदण्डाद्द्विगुणः, दण्डः ।

श्लोकमाह — **अपराधमिति** । अल्पमपराधं सहेत, अर्थादध्यक्षस्य । अल्पेऽपि उदये आयवृद्धौ अर्थादध्यक्षोपपादितायां, तुष्येत् । महोपकारम् अध्यक्षं, चशब्दस्त्वर्थे, प्रग्रहेण प्रकृष्टग्रहणेन यावज्जीवपरिग्रहेण, अभिपूजयेत् बहुमानयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तमोऽध्यायः अक्षपटले गाणनिक्याधिकारः,
आदितोऽष्टाविंशः ॥

२६. प्रक. समुदयस्य युक्तापहृतस्य प्रत्यानयनम् ।

कोशपूर्वाः सर्वारम्भाः । तस्मात् पूर्वं कोशमवेक्षेत ।

प्रचारसमृद्धिश्चरित्रानुग्रहश्चोरग्रहो युक्तप्रतिषेधः सस्यसम्पत् पण्यबाहुल्यमुपसर्गप्रमोक्षः परिहारक्षयो हिरण्योपायनमिति कोशवृद्धिः ।

प्रतिबन्धः प्रयोगो व्यवहारोऽवस्तारः परिहापणमुपभोगः परिवर्तनमपहारश्चेति कोशक्षयः ।

सिद्धीनामसाधनमनवतारणमप्रवेशनं वा प्रतिबन्धः । तत्र दशबन्धो दण्डः ।

समुदयस्य युक्तापहृतस्य प्रत्यानयनमिति सूत्रम् । समुदयो नाम द्रव्योत्पत्तिस्थानेभ्य उत्थितं धनं, युक्ता अध्यक्षाः, युक्तापहृतस्य समुदयस्य प्रत्यानयनं पुनःप्रापणमिहाभिधीयत इति सूत्रार्थः ।

किमर्थं धनसंग्रहे महान् यत्न उपदिश्यत इत्यपेक्षायामाह—**कोशे**त्यादि । सर्वारम्भाः कोशपूर्वाः सर्वाणि कार्याणि तन्त्रसम्बद्धानि जनपदनिवेशादीनि आवापसम्बद्धानि च सन्धिविग्रहादीनि धननिमित्तकानि । तस्मात् कारणात्, कोशं, पूर्वं सर्वकार्याणामग्रे, अवेक्षेत यथा स वृद्धिं प्राप्नुयात् न क्षयं तथा चिन्तयेदित्यर्थः ।

कोशस्योदयहेतून् नव दर्शयति—**प्रचारे**त्यादि । प्रचारसमृद्धिः जनपदसम्पत्, चरित्रानुग्रहः देशजातिकुलाचाराणां पूर्वस्थित्यनतिक्रमेण परिपालनं, चरित्ररक्षणसन्तुष्टा हि जनाः कोशं राज्ञो वर्धयन्तीति, चोरग्रहः तस्करवधस्तस्करेभ्यो धनग्रहणं च, युक्तप्रतिषेधः युक्तानामध्यक्षाणां प्रतिषेधो धनापहाराद् वारणम् उत्कोचग्रहणनिमित्ताद्वा प्रजापीडनाद् वारणं, सस्यसम्पत् उच्चावचधान्यसमृद्धिः, पण्यबाहुल्यं पण्यानां जलजानां स्थलजानां च विक्रेयद्रव्याणां बहुलमुत्पत्तिरुपलम्भश्च, उपसर्गप्रमोक्षः अग्न्याद्युपद्रवमोचनं, परिहारक्षयः करमुक्त्यभावः अवधौ धनग्रहणोपेक्षाविरहो वा, हिरण्योपायनं सुवर्णरजतादिरूपोपदा, इति कोशवृद्धिः एवं नव कोशवृद्धिहेतवः ।

कोशक्षयहेतूनष्टावुद्दिशति—**प्रतिबन्ध** इत्यादि ।

सिद्धीनामिति । सिद्धीनां सिद्धद्रव्याणां राजग्राह्यकरादीनाम्, असाधनम् अनुत्पादनम्, उत्पन्नानां वा अनवतारणमहस्तप्रापणम्, अवतारितानां वा अप्रवेशनं भाण्डागाराप्रापणम्, इति प्रतिबन्धस्त्रिधा । **तत्रे**ति । तत्र प्रतिबन्धे, दशबन्धो दशगुणः, दण्डः ।

कोशद्रव्याणां वृद्धिप्रयोगः प्रयोगः। पण्यव्यवहारो व्यवहारः। तत्र फलद्विगुणो दण्डः।

सिद्धं कालमप्राप्तं करोत्यप्राप्तं प्राप्तं वेत्यवस्तारः। तत्र पञ्चबन्धो दण्डः।

क्लृप्तमायं परिहापयति व्ययं वा विवर्धयतीति परिहापणम्। तत्र हीनचतुर्गुणो दण्डः।

स्वयमन्यैर्वा राजद्रव्याणामुपभोजनमुपभोगः। तत्र रत्नोपभोगे घातः, सारोपभोगे मध्यमः साहसदण्डः, फल्गुकुप्योपभोगे तच्च तावच्च दण्डः।

राजद्रव्याणामन्यद्रव्येणादानं परिवर्तनं, तद् उपभोगेन व्याख्यातम्।

कोशेत्यादि। कोशद्रव्याणां कोशप्रवेश्यद्रव्याणां, वृद्धिप्रयोगः वृद्ध्यर्थं प्रयोगः स्वयं वृद्धिमुपजीव्य पश्चाद् मूलं कोशेऽर्पयिष्यामीति, स प्रयोगः। पण्यव्यवहारः कोशद्रव्यैर्वाणिज्यकरणं, व्यवहारः। तत्र प्रयोगव्यवहारयोः दण्डः फलद्विगुणः।

सिद्धमिति। सिद्धं प्राप्तं, कालं ग्राह्यद्रव्यग्रहणकालम्, अप्राप्तं, करोति आपादयति उत्कोचलिप्सया, अप्राप्तं वा कालं प्राप्तं करोति प्रद्वेषेण, इत्यवस्तारः इत्यनेन प्रकारेण प्राप्तकालाप्राप्तीकरणमप्राप्तकालप्राप्तीकरणमिति द्विविधोऽवस्तारः। तत्र अवस्तारे, दण्डः पञ्चबन्धः।

क्लृप्तमिति। क्लृप्तं प्रतिनियतम् आयं परिहापयति न्यूनयति, व्ययं वा क्लृप्तं विवर्धयति अतिरेचयति, इति परिहापणम्, एवं द्विधा परिहापणम्। तत्र, दण्डः हीनचतुर्गुणः नाशितद्रव्यचतुर्गुणः।

रत्नसारफल्गुकुप्यानां राजद्रव्याणां स्वयमुपभोजनं परैर्वोपभोजनमिति द्विविध उपभोग इत्याह — **स्वय**मित्यादि। तत्र दण्डोपदेशवाक्यं — **तत्रे**त्यादि। **तच्च** उपभुक्तद्रव्यं च। तावच्च तत्परिमाणमपरं च।

परिवर्तनं व्याचष्टे — **राजद्रव्याणा**मित्यादि। अन्यद्रव्येणादानन् अन्यद् द्रव्यं सच्छायं प्रतिनिधाय ग्रहणम्। उपभोगेन तद् व्याख्यातमिति उपभोगसमानदण्डं परिवर्तनमित्यर्थः।

सिद्धमायं न प्रवेशयति, निबद्धं व्ययं न प्रयच्छति, प्राप्तां नीवीं विप्रतिजानीत इत्यपहारः । तत्र द्वादशगुणो दण्डः ।

तेषां हरणोपायाश्चत्वारिंशत्—पूर्वं सिद्धं पश्चादवतारितं, पश्चात् सिद्धं पूर्वमवतारितं, साध्यं न सिद्धम्, असाध्यं सिद्धं, सिद्धमसिद्धं कृतम्, असिद्धं सिद्धं कृतम्, अल्पसिद्धं बहुकृतं, बहुसिद्धमल्पं कृतम्, अन्यत् सिद्धमन्यत् कृतम्, अन्यतः सिद्धमन्यतः कृतं, देयं न दत्तमदेयं

त्रिप्रकारमपहारमाह—**सिद्धमिति** । सिद्धम् उत्पन्नम्, आयं, न प्रवेशयति लेख्ये नारोपयति इत्येकोऽपहारः । निबद्धं पुस्तकारोपितं व्ययं राजाज्ञप्तं पारितोषिकादिलक्षणं, न प्रयच्छति राजनिर्दिष्टाय पात्राय न ददाति, इति द्वितीयोऽपहारः । प्राप्तां हस्तगतां, नीवीं, विप्रतिजानीते नाद्यापि हस्तप्राप्तेत्यपलपति, इति तृतीयोऽपहारः । तत्र अपहारे, दण्डो द्वादशगुणः ।

तेषामिति । तेषाम् अध्यक्षाणां, हरणोपायाः राजद्रव्यापहरणद्वाराणि, चत्वारिंशद् वक्ष्यमाणरीत्या । अपहारपरिहरणार्थमपहृतप्रत्यानयनार्थं च तद्व्युत्पादनम् । तान् दर्शयति—**पूर्वं सिद्धमित्यादिना** । **पूर्वं सिद्धं पश्चादवतारितमिति**, पूर्वसस्यत्वात् पूर्वप्रवेश्यः शाल्यादेः करः पश्चिमसस्यगोधूमादिकरेण सह प्रवेशितः स तु मध्यकालेऽध्यक्षेणोपजीव्यो भवति । **पश्चात् सिद्धं पूर्वमवतारितमिति**, पश्चिमसस्यगोधूमादिकरस्य कियांश्चिद् भागः पूर्वसस्यकरेण सह पूर्वमेव प्रवेशित आत्ययिकराजकार्यार्थत्वच्छलात् । **साध्यं न सिद्धमिति**, ग्राह्यः करो न गृहीतो लञ्चादिना राज्ञ एवमाज्ञेति । **असाध्यं सिद्धमिति**, अकरददेवब्राह्मणादेरग्राह्यः करो गूढं गृहीतः । **सिद्धमसिद्धं कृतमिति**, करदेन प्रवेशित एव करः अप्रवेशित इत्युक्त्वापहृतः, गृहीत एव करस्यैकदेशो न गृहीत इत्यपलपितो वा । **असिद्धं सिद्धं कृतमिति**, कृत्स्नकरदानार्हे काले तस्य करस्यार्धं दत्त्वा शेषार्धं पश्चाद् दास्यामीत्युक्तेन लञ्चवशीकृतेनाध्यक्षेण तच्छेषार्धं दत्तत्वेन पुस्तके लिखितम् । **अल्पसिद्धं बहुकृतमिति**, पञ्चाशति प्रविष्टायां शतं प्रविष्टमित्यध्यक्षेण लञ्चग्राहिणा लिखितम् । **बहुसिद्धमल्पं कृतमिति**, शतं गृहीत्वा पञ्चाशदिति पुस्तके लिखितं लञ्चादिना । **अन्यत् सिद्धमन्यत् कृतमिति**, शालिः सिद्धः कोद्रवो लिखितः शालिकरग्रहणनिमित्तस्य लाभस्यात्मसात्कारार्थम् । **अन्यतः सिद्धमन्यतः कृतमिति**, देवदत्ताद् गृहीतं यज्ञदत्ताद् गृहीतमिति पुस्तके लिखितम् । **देयं**

दत्तं, काले न दत्तमकाले दत्तम्, अल्पं दत्तं बहु कृतं, बहु दत्तमल्पं कृतम्, अन्यद् दत्तमन्यत् कृतम्, अन्यतो दत्तमन्यतः कृतं, प्रविष्टमप्रविष्टं कृतम्, अप्रविष्टं प्रविष्टं कृतं, कुप्यमदत्तमूल्यं प्रविष्टं, दत्तमूल्यं न प्रविष्टं, सङ्क्षेपो विक्षेपः कृतः, विक्षेपः सङ्क्षेपो वा, महार्घमल्पार्घेण परिवर्तितम्, अल्पार्घं महार्घेण वा, समारोपितोऽर्घः, प्रत्यवरोपितो वा,

---

न दत्तम् अदेयं दत्तमिति, देयं स्वर्णरजतादिकं कस्मैचिद् दातव्यतया राज्ञाज्ञापितं तस्मै न दत्तं, किन्तु अदेयं फल्गुकुप्यादिकं कालान्तरे कथञ्चिद् दत्तम्। **काले न दत्तमकाले दत्तमि**ति, यज्ञाद्यर्थं कस्मैचिद् दीयतामिति राज्ञाज्ञप्तं यज्ञादिकाले वर्तमाने न दत्तं किन्त्वतिक्रान्ते कथञ्चिद् दत्तं लञ्चग्रहणपीडापुरस्सरम्। **अल्पं दत्तं बहुकृतमि**ति, शतं दीयतामिति राजाज्ञायां तत् पञ्चाशतात्मसात्कारार्थया सार्धं पुस्तके विलिखितम्। **बहुदत्तमल्पं कृतमि**ति, शतं देवदत्ताय दीयतामिति राजादेशे विंशतिं स्वयं गृहीत्वाशीतिमात्रं तस्मै दत्तम्। **अन्यद् दत्तमन्यत् कृतमि**ति, राज्ञादिष्टाः शालयः कोद्रवास्तु दत्ताः। **अन्यतो दत्तमन्यतः कृतमि**ति, देवदत्तायादिष्टं यज्ञदत्ताय दत्तम्। **प्रविष्टमप्रविष्टं कृतमि**ति, कोशेनिवश्यमुपहास्तितमेव द्रव्यमनुपहस्तितमिति वा किञ्चिदेवोपहस्तितमिति वोक्त्वापहृतम्, अथवा कार्यविशेषार्थं 'प्रजाभ्यो धनमुत्थाप्यानीयतामि'त्यादिष्टे तदुत्थाप्य नाद्याप्युत्थितमित्युक्त्वा कालहरणेनोपजीवितम्। **अप्रविष्टं प्रविष्टं कृतमि**ति, अगृहीत एव करदेभ्यः करो लञ्चं गृहीत्वा प्रविष्ट इति लिखितः। **कुप्यमदत्तमूल्यं प्रविष्टमि**ति, कुप्यं वस्त्रादिकं राजादेशाद् ऋणेन गृहीतं कथञ्चित् कालान्तरे दत्तमूल्यैकदेशं कृत्वा दत्तसमग्रमूल्यमिति पुस्तके लिखितम्। **दत्तमूल्यं न प्रविष्टमि**ति, महामूल्यदानेन क्रीतं कुप्यं तावन्मूल्यक्रीतत्वेन पुस्तकेऽनिबद्धम् अर्थादल्पमूल्यक्रीतत्वेन निबद्धमित्ययं विंशोऽपहारोपायः। **संक्षेपो विक्षेपः कृत** इति, संक्षेपः जनसमूहदेयः पिण्डकरः विक्षेपः कृतः विप्रकीर्णकरः कृतः समूहिभ्यः प्रत्येकं विभज्य ग्राह्यः कृत इत्यर्थः, तथाकरणे हि राजद्रव्यमुपजीवितुं शक्यं ग्राम्यजनाश्चेति। **विक्षेपः संक्षेपो वे**ति, जनादेकस्माद् बहुभिर्मासैरल्पशो ग्राह्यो विप्रकीर्णकरः एकस्मिन्नेव समये संपिण्ड्य ग्राह्यः कृतः, एवं हि कुर्वताध्यक्षेण राजद्रव्यमुपजीवितुं लभ्यते जनाश्चेति। **महार्घमल्पार्घेण परिवर्तितमि**ति, महार्घं युग्यवाहनादि अल्पार्घेण युग्यादिना विनिमितं विनिमायापहृतम्। **अल्पार्घं महार्घेण वे**ति, अल्पमूल्यम् अत एव

रात्रयः समारोपिताः, प्रत्यवरोपिता वा, संवत्सरो मासविषमः कृतः, मासो दिवसविषमो वा, समागमविषमः, मुखविषमः, धार्मिकविषमः, निर्वर्तनविषमः, पिण्डविषमः, वर्णविषमः, अर्घविषमः, मानविषमः, मापनविषमः, भाजनविषम इति हरणोपायाः ।

महाविक्रयविषयभूतं सामुद्रलवणादि पण्यं महामूल्येन अत एव अल्पविक्रयविषयेण सैन्धवलवणादिना परिवर्तितं विनिमितं, तद्धि शीघ्रविक्रयेण लाभमुत्पादयत् पण्याध्यक्षस्योपजीव्यं भवतीति । **समारोपितोऽर्घ** इति, अर्घस्य यथास्थितादर्घादतिरेचनमित्यर्थः। तथा हि करणे क्रेतारः स्वोपकारकामा भवन्तः पण्याध्यक्षस्यार्घनियामकस्योपजीव्या भवन्तीति। **प्रत्यवरोपितो** वेति, अर्घ इति सम्बध्यते, अर्घप्रत्यवरोपणे हि कृते विक्रेतारः यथास्थितार्घकामा भवन्तः पण्याध्यक्षस्योपजीव्या भवन्तीति । **रात्रयः समारोपिता** इति, पञ्चरात्रवेतनं कर्मकरेभ्यो दत्त्वा सप्तरात्रवेतनं दत्तमित्येवञ्जातीयो रात्रिसमारोपः, अनेन ह्युपायेन कर्मकरेभ्यो धनमपह्रियते। **प्रत्यवरोपिता** वेति, रात्रय इति वर्तते, स्वामिसकाशाद् दशरात्रव्ययं गृहीत्वाष्टरात्रव्ययो गृहीत इत्येवञ्जातीयं रात्रिप्रत्यवरोपणम्, अनेन ह्युपायेन स्वामिद्रव्यमुपजीव्यते। **संवत्सरो मासविषमः कृत** इति, अधिमासरहित एव संवत्सरः साधिमासः कृत इत्यर्थः, अनेनोपायेनाधिमासलाभोऽपह्रियते। **मासो दिवसविषमो** वेति, अनूनदिवसो मासो दिवसोनः कृतः। **समागमविषम** इति, समागमे विषये विषमो व्यापार इत्यर्थः, तद्यथा समागतानां दृष्टानां कर्मकराणां भक्तवेतनदाने परोक्षं कमपि द्रष्टव्यमपदिश्य स्वयं तद्भक्तवेतनं गृह्णाति । **मुखविषम** इति, कुतश्चिदायमुखादुत्पन्नं द्रव्यमन्यस्मादायमुखादुत्पन्नमिति ख्यापितं तदधिकृतादुत्कोचं गृहीत्वा । **धार्मिकविषम** इति, 'ब्राह्मणेभ्यः प्रत्येकं पणशतं दीयतामि'ति राजादेशे पुरोहितेन पुरोहितपुरुषेण वा तदर्धापहरणम् । **निर्वर्तनविषम** इति, किञ्चित्कर्मनिर्वर्तनप्रवृत्तौ विषमाचरणमित्यर्थः, तद्यथा — करदेभ्यः करोद्ग्राहकर्म निर्वर्तनप्रसङ्गे करदान् 'युष्माभिरद्यैव करो निर्यातयितव्य' इत्यवरुध्य लञ्चग्रहणेन काश्चिन्मुञ्चतीति । **पिण्डविषम** इति, पिण्डे समूहे विषमाचरणं, यथा — समूहदेये विषये समूहिनमेकं लञ्चग्रहणादिना वर्जयित्वा समूहिभ्य इतरेभ्यो देयग्रहणम् । **वर्णविषम** इति, ब्राह्मणा एवाद्योत्तीर्णाः नान्ये इत्युक्त्वा

तत्रोपयुक्तनिधायकनिबन्धकप्रतिग्राहकदायकदापकमन्त्रिमन्त्रि-वैयावृत्यकरानेकैकशोऽनुयुञ्जीत । मिथ्यावादे चैषां युक्तसमो दण्डः । प्रचारे चावघोषयेत् — अमुना प्रकृतेनोपहताः प्रज्ञापयन्त्विति । प्रज्ञा-पयतो यथोपघातं दापयेत् । अनेकेषु चाभियोगेष्वपव्ययमानः सकृ-देव परोक्तः सर्वं भजेत । वैषम्ये सर्वत्रानुयोगं दद्यात् । महत्यर्थाप-हारे चाल्पेनापि सिद्धः सर्वं भजेत ।

तद्दिवसवेतनस्यात्मसात्करणं नावध्यक्षेण कृतम्, अथवा स्वर्णेऽष्टवर्णके ग्राह्ये नववर्णकं स्वर्णदायकाद् गृहीत्वाष्टवर्णकस्यैव राज्ञेऽर्पणं सुवर्णाध्यक्षेण कृतम् । **अर्घविषम** इति, सेनानिवेशादावर्घस्याव्यवस्थितत्वात् तं किञ्चिद-धिकमपदिश्य राजार्थोपजीवनम् । **मानविषम** इति, परिमाणोन्मानसाधन-वैषम्यमित्यर्थः, तच्च हीनैस्तैर्देयं दत्त्वा महद्भिर्दत्तमिति ख्यापनम्, अथवा देयस्य हीनैर्दानं महद्भिः स्वीकरणम् । **मापनविषम** इति, मापनकृतं वैषम्यं मातृहस्तविशेषोत्पादितं वस्त्रादिमानविषयं वैषम्यम् । **भाजनविषम** इति, 'आज्यपूर्णं घटशतं दीयतामि'त्युक्ते अल्पानां घटानां शतं दत्त्वा महतां घटानां शतं दत्तमिति लेखनं, तेन राजद्रव्यमपह्रियत इत्ययं चत्वारिंशत्तमो द्रव्या-पहरणोपायः । इतिशब्दः परिसमाप्तिवचनः, हरणोपायाः समाप्ताः, किञ्चिद्-भेदेन संभवन्तोऽप्यन्ये यथोक्तेष्वेवान्तर्भवन्तीत्यभिप्रायः ।

तत्रेति । तत्र हरणोपायेषु शङ्क्यमानेष्विति शेषः, उपयुक्तादीन् अष्टौ **एकैकशः** प्रत्येकम्, **अनुयुञ्जीत** पृच्छेद् — 'इदमनेनाध्यक्षेणापहृतं नवे'ति । तत्रोपयुक्तो युक्तानामुपरि नियुक्तः प्रत्ययितपुरुषः, निधायकः भाण्डागारिकः, निबन्धको लेखकः, प्रतिग्राहकः प्रतिग्रहीता, दायकः करदः, दापकः राजपु-रुषः, मन्त्री युक्तस्य धीसचिवः, मन्त्रिवैयावृत्यकरः मन्त्रिणः कर्मकरः । **मिथ्ये-त्यादि** । मिथ्यावादे च, एषाम् उपयुक्तादीनां, युक्तसमः अध्यक्षतुल्यो, दण्डः । **प्रचारे** च जनपदे च, **अवघोषयेत्** सपटहताडमवख्यापयेत्, केन प्रकारेण, **अमुना प्रकृतेन** अध्यक्षेण, **उपहताः** उत्कोचग्रहणादिना पीडिता जनाः, **प्रज्ञा-पयन्तु** आवेदयन्तु स्वां स्वां पीडामित्यर्थम्, इति अनेन प्रकारेण । **प्रज्ञाप-यतः** जनस्य, **यथोपघातम्** उपघातानुरोधेन, **दापयेद्** द्रव्यम् । **अनेके-ष्विति** । अनेकेष्वभियोगेषु उपघातावेदनेष्वनेककृतेषु युगपत् प्राप्तेषु सत्सु, **अपव्ययमानः** सर्वमुपघातमात्मकृतमनभ्युपगच्छन् युक्तः, **सकृदेव परोक्तः**

कृतप्रतिघातावस्थः सूचको निष्पन्नार्थः षष्ठमंशं लभेत, द्वादशमंशं भृतकः। प्रभूताभियोगादल्पनिष्पत्तौ निष्पन्नस्यांशं लभेत। अनिष्पन्ने शारीरं हैरण्यं वा दण्डं लभेत, न चानुग्राह्यः।

निष्पत्तौ निक्षिपेद् वादमात्मानं वापवाहयेत्।
अभियुक्तोपजापात् तु सूचको वधमाप्नुयात्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे अष्टमोऽध्यायः
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्,
आदितः एकोनत्रिंशः॥

एकत्राभियोगे एकेनाभियोक्त्रा साक्ष्यादिभिर्विभावितः पराजितः, सर्वं भजत सर्वाभियोगार्थं यथाभागं दद्यात्। **वैषम्य इति**। अनेकेष्वभियोगेष्वेकत्र संप्रतिपत्तिरितरत्र विप्रतिपत्तिश्च वैषम्यं तस्मिन्, सर्वत्रानुयोगं दद्याद् विप्रतिपन्नेषु सर्वेष्वभियोगेषु साक्षिप्रश्नावसरं दद्याद् रागद्वेषादिनिमित्तमिथ्याभियोगशङ्कापनुत्तये। एकाभियोक्तृविषयमाह— **महतीति**। महति अर्थापहारे, प्रभूतस्वर्णरजतादिनानार्थापहारे केनचित् प्रज्ञापिते, अल्पेनापि सिद्धः एकदेशेनापि साक्ष्यादिभिर्विभावितापचारः, सर्वं भजेत अभियोगविषयं कृत्स्नमर्थं दद्याद्, अर्थाद् विप्रतिपद्यमानो युक्तः।

कृतप्रतिघातेत्यादि। सूचकः अध्यक्षापचारपिशुनः, कृतप्रतिघातावस्थः कृतः स्वीकृतः प्रतिघातावस्थः प्रतिघातार्थोऽवस्थः अध्यक्षोत्पाद्यानर्थप्रतीकारार्थः प्रतिभूर्येन स तथाभूतः भवेदिति शेषः, यद्यध्यक्षापचारं कश्चित् सूचयेत् स प्रतिघातप्रातिभाव्यं गृहीत्वैव सूचयेदित्यर्थः। स निष्पन्नार्थः सिद्धसूचितार्थः, षष्ठमंशं लभेत, साधिताद् धनात्। **द्वादशमिति**। भृतकः भृत्यः सूचकः, द्वादशमंशं लभेत। **प्रभूतेत्यादि**। बहुप्रकारद्रव्यविषयेऽभियोगे प्रभूताभियोगाद् अभियोगविषयबहुप्रकारद्रव्यमध्याद्, अल्पनिष्पत्तौ अल्पस्यैव साक्ष्यादिभिः संसिद्धौ, निष्पन्नस्यांशं लभेत सूचकः। **अनिष्पन्न इति**। अनिष्पन्ने अभियुक्तेऽर्थे सर्वथैवासंसिद्धे सति, शारीरं हैरण्यं वा दण्डं मिथ्याभियोगनिमित्तं दमं, लभेत, न चानुग्राह्यः न च रक्षणीयः, निर्दोषविसृष्टाध्यक्षप्रभवेभ्योऽनर्थेभ्य इत्यार्थम्।

निष्पत्ताविति। निष्पत्तौ सूचितार्थसत्यत्वसिद्धौ, वादम् अभियोगं, निक्षिपेद् विरमयेत् सूचकः, आत्मानं वा **अपवाहयेत्** आत्मानं चाभियोग-

बन्धान्मोचयेत्, अनिष्पत्तौ वादपरिसमापनमात्ममोचनं वा सूचकेन कर्तुमशक्यमित्यभिप्रायः। भट्टस्वामी तु 'निष्पत्तौ सूचितार्थसंसिद्धौ, निक्षिपेद् अन्यत्र दूष्यादौ सञ्चारयेद्, वादं सूचकत्वापवादम्। आत्मानं वापवाहयेद् अहमेतस्मिन् काले विषयेऽत्र नासमिति प्रख्यापयेद्' इति व्याचष्टे। यदि तु अभियुक्तेनाध्यक्षेण लञ्चोपप्रलोभनाद्युपायैर्भेदं नीतः सूचकः स्वाभियुक्तार्थासाधकं राजान्तिके ब्रूयात्, तदा स वधदण्डमर्हतीत्याह — **अभियुक्ते**त्यादि॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे अष्टमोऽध्यायः
समुदयस्य युक्तापहृतस्य प्रत्यानयनम्,
आदित एकोनत्रिंशः॥

२७. प्रक. उपयुक्तपरीक्षा ।

अमात्यसम्पदोपेताः सर्वाध्यक्षाः शक्तितः कर्मसु नियोज्याः । कर्मसु चैषां नित्यं परीक्षां कारयेत् चित्तानित्यत्वान्मनुष्याणाम् । अश्वसधर्माणो हि मनुष्या नियुक्ताः कर्मसु विकुर्वते ।

तस्मात् कर्तारं करणं देशं कालं कार्यं प्रक्षेपमुदयं चैषु विद्यात् ते यथासन्देशमसंहता अविगृहीताः कर्माणि कुर्युः, संहता भक्षयेयुः

उपयुक्तपरीक्षेति सूत्रम् । उपयुक्ता युक्तानामुपरि नियुक्ताः प्रत्ययितपुरुषाः, औपरिका इति ये व्यपदिश्यन्ते, तेषां परीक्षा दोषगवेषणेति सूत्रार्थः । युक्तापहृतप्रत्यानयनोक्त्या गताध्याये युक्तानां परीक्षणीयत्वमवगतं, तत् किमुपयुक्तानामप्यस्ति, उत नेति सन्देहे प्रकरणमिदमारब्धमिति सङ्गतिः ।

अमात्येत्यादि । अमात्यसम्पदोपेताः 'जानपदोऽभिजात' इत्युक्तजानपदत्वादिगुणसमृद्धियुक्ताः । एतेनार्थोपधाशुद्धियोगमात्रेण नालमिति सूचितम् । सर्वाध्यक्षाः सर्वे अध्यक्षा उपयुक्ता युक्ताश्च, शक्तितः तत्तत्कर्मसामर्थ्यानुसारेण, कर्मसु नियोज्याः । एषां कर्मसु च, परीक्षां दोषगवेषणां नित्यं कारयेत् । अर्थोपधाशुद्धानामेव कर्मसु नियोक्तव्यत्वस्य प्रागभिधानान्नियोगानन्तरं पुनः परीक्षायाः किं कारणं, तत्राह — **मनुष्याणां चित्तानित्यत्वादिति** । मनुष्यचित्तं स्वभावादव्यवस्थितं यतः । स्वाभाविकचित्तानित्यत्वमुक्त्वावस्थाविशेषभवमाह— **अश्वेत्यादि** । यथाहि अश्वा रथवहनकर्मानियोगदशायां साधुशीला एव सन्तस्तन्नियोगदशायां विकारं प्राप्नुवन्ति, एवं कर्मसु अनियोगदशायां सुशीला एव परिदृष्टाः नियोगदशायां शीलवैकृतं प्राप्नुवन्तीत्यर्थः ।

तस्मादिति । तस्मात् यथोक्तात् कारणात्, कर्तारम् अध्यक्षं, करणं धर्माद्यधिकरणम् अनुष्ठानं वा, देशं स्थानीयादिकं, कालम् अहोरात्रादिं दुर्भिक्षकालादिं वा, कार्यं करणीयं, प्रक्षेपं कर्मकरभृतिम्, उदयं लाभं च, एषु अध्यक्षेषु विषये, विद्यात् । ते अध्यक्षाः, यथासन्देशं स्वाम्यादेशानतिक्रमेण, असंहता अकृतान्योन्यसङ्केताः, अविगृहीताः अकृतान्योन्यविरोधाः, कर्माणि कुर्युः । संहतिविग्रहयोर्दोषमाह — **संहता** इत्यादि । कर्माणीत्यनुवर्तते । कर्माणि भक्षयेयुः कर्मफलान्यपहरेयुः । कर्माणि विनाशयेयुः निष्फलीकुर्युः ।

विगृहीता विनाशयेयुः। न चानिवेद्य भर्तुः किञ्चिदारम्भं कुर्युरन्यत्रापत्प्रतीकारेभ्यः। प्रमादस्थानेषु चैषामत्ययं स्थापयेद् दिवसवेतनव्ययद्विगुणम्।

यश्चैषां यथादिष्टमर्थं सविशेषं वा करोति स स्थानमानौ लभेत।

अल्पायतिश्चेन्महाव्ययो भक्षयति। विपर्यये यथायतिव्ययश्च न भक्षयति इत्याचार्याः। अपसर्पेणैवोपलभ्यते इति कौटल्यः।

स्वामिनमपृष्ट्वा न कमपि कर्मविशेषमग्निजलादिनिमित्तविपत्प्रतीकारातिरेकेण कुर्युरित्याह—**न चानिवेद्ये**त्यादि। **प्रमादे**त्यादि। एषाम् अध्यक्षाणां, प्रमादस्थानेषु स्त्रीमद्यादिव्यसनेषु दृष्टेषु, अत्ययं दण्डं, स्थापयेत् सद्य एव प्रयुञ्जीत। कियन्तं स्थापयेत्, दिवसवेतनव्ययद्विगुणं दिवसवेतनस्य प्रमाददिवससम्बन्धिनोऽध्यक्षवेतनस्य दिवसव्ययस्य प्रमादनिमित्तकतद्दिवसकर्मादर्शनजन्यस्यार्थनाशस्य च द्विगुणम्।

यश्चैषामिति। एषाम् अध्यक्षाणां मध्ये, यः, अर्थं राजकार्यं, यथादिष्टं करोति स्वाम्युपदिष्टप्रकारकं निष्पादयति, सविशेषं वा करोति आदिष्टाभ्यधिकगुणयुक्तं वा निष्पादयति, सः, स्थानमानौ लभेत प्रकृष्टं पदान्तरं पूजां च प्राप्नुयात्।

राजार्थजानपदार्थग्रसनाग्रसनोपलम्भेऽभ्युपायाकाङ्क्षायां व्ययमहत्त्वाल्पत्वसमत्वलिङ्गकमनुमानमाचार्या अभ्युपायं मन्यन्त इत्याह—**अल्पे**त्यादि। अल्पायतिरल्पधनागमः, महाव्ययश्चेद् अनल्पार्थोपभोगो यदि भवेत्, तदा सः भक्षयति राजप्रजार्थमुपजीवति। विपर्यये यथायतिव्ययश्च महायतित्वे सत्यल्पव्यय आयत्यनुरूपव्ययश्च, न भक्षयति। इत्याचार्याः। स्वमतमाह—**अपसर्पेणैवे**ति　अपसर्पेणैवोपलभ्यते चारद्वारेणैव दुष्टादुष्टत्वमध्यक्षाणां निश्चीयते 'त्रयाणामेकवाक्ये संप्रत्यय' इति गूढपुरुषप्रणिध्युक्तादिशेत्यर्थः। एवकारेण महाव्ययत्वाल्पव्ययत्वयोरुपलब्ध्युपायत्वं व्यवच्छिद्यते। ते ह्यल्पायतेरपि महाकुटुम्बिन उद्धारग्रहणेन महाव्ययत्वदर्शनात् प्रभूतराजप्रजाद्रव्यापहारिणोऽपि सहजकृपणतयाल्पव्ययत्वदर्शनाच्च व्यभिचरिते इत्यभिप्रायः।

यः समुदयं परिहापयति स राजार्थं भक्षयति। स चेदज्ञानादिभिः परिहापयति तदेनं यथागुणं दापयेत्।

यः समुदयं द्विगुणमुद्भावयति स जनपदं भक्षयति। स चेद्राजार्थमुपनयत्यल्पापराधे वारयितव्यः, महति यथापराधं दण्डयितव्यः।

यः समुदयं व्ययमुपनयति स पुरुषकर्माणि भक्षयति। स कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु यथापराधं दण्डयितव्यः।

यः समुदयमिति। यः, समुदयं द्रव्योत्पत्तिं, परिहापयति न्यूनयति, स राजार्थं भक्षयति। सः, अज्ञानादिभिः अज्ञानालस्यभयप्रमादकामकोपदर्पलोभैर्गणनिक्याधिकारोक्तैः, परिहापयति चेद्, एनं, तद् हापितं द्रव्यं, यथागुणं द्विगुणं त्रिगुणम् अधिकगुणं वा अपराधानुसारिगुणं, दापयेत्।

यः समुदयं द्विगुणमिति। यः समुदयं, द्विगुणं क्लृप्तादधिकम्, उद्भावयति, सः, जनपदं भक्षयति कथमन्यथा समुदयाधिक्यमिति। सः, राजार्थम् उपनयति चेत् स्वोद्भावितमधिकं साकल्येन राज्ञेऽर्पयति चेत्, तर्हि, अल्पापराधे अल्पेऽपराधे जनपदपीडने, वारायितव्यः 'मा पुनरेवं जानपदेभ्यः क्लृप्ताधिकमुद्भावये'ति प्रतिषेद्धव्यः। महति द्विगुणत्रिगुणाद्युद्भावनरूपे कोशक्षयफलकजनपदकर्शनहेतावपराधे स्वयमपहरणरूपे च, यथापराधं दण्डयितव्यः। यदुक्तं —

"यथान्नकर्शनात् प्राणाः क्षीयन्ते सर्वदेहिनाम्।
तथा कोशा नरेन्द्राणां क्षीयन्ते राष्ट्रकर्शनात्॥" इति।

यः समुदयं व्ययमिति। यः, व्ययं कर्मार्थव्ययाय क्लृप्तं धनं, समुदयम् उपनयति समुदये प्रवेशयति व्ययितमकृत्वेत्यार्थः, सः, पुरुषकर्माणि भक्षयति पुरुषान् कर्मकरान् कर्माणि च नाशयति कर्माननुष्ठापनेन। तस्य दण्डमाह —स इति। सः, कर्मदिवसद्रव्यमूल्यपुरुषवेतनापहारेषु कर्मार्थदिवसस्य यद् द्रव्यं तद्दिवसकर्मसाध्यं फलं तस्य मूल्यं कल्पितः कश्चिदर्घः कर्मदिवसद्रव्यमूल्यं पुरुषवेतनं पुरुषाणां कर्मकराणां वेतनं कर्मदिवसद्रव्यमूल्यस्य पुरुषवेतनस्य च अपहारेषु विनाशनेषु, यथापराधम् अपराधानुसारेण दण्डयितव्यः कर्मदिवसद्रव्यमूल्यं कर्मकरपुरुषवेतनं च यावत् कर्माकरणेन हापितं तावद् दापयितव्य इत्यभिप्रायः।

तस्मादस्य यो यस्मिन्नधिकरणे शासनस्थः स तस्य कर्मणो याथातथ्यमायव्ययौ च व्याससमासाभ्यामाचक्षीत ।

मूलहरतादात्विककदर्यांश्च प्रतिषेधयेत् । यः पितृपैतामहमर्थमन्यायेन भक्षयति स मूलहरः । यो यद्यदुत्पद्यते तत्तद् भक्षयति स तादात्विकः । यो भृत्यात्मपीडाभ्यामुपचिनोत्यर्थं स कदर्यः । स पक्षवांश्चेदनादेयः, विपर्यये पर्यादातव्यः ।

यो महत्यर्थसमुदये स्थितः कदर्यः सन्निधत्ते, अवनिधत्ते, अवस्रावयति वा — सन्निधत्ते स्ववेश्मनि, अवनिधत्ते पौरजानपदेषु, अवस्रावयति परविषये — तस्य सत्री मन्त्रिमित्रभृत्यबन्धुपक्षमागतिं गतिं च द्रव्याणामुपलभेत ।

तस्मादिति । तस्मात् समुदयविषयेऽपराधे दण्डविधानात्, योऽध्यक्षः, यस्मिन्नधिकरणे, शासनस्थो नियुक्तः, सः, तस्य कर्मणः तदधिकरणसम्बद्धस्य कर्मणः, याथात्तथ्यं यथास्थितिम्, आयव्ययौ च, व्याससमासाभ्यां संक्षेपविस्ताराभ्याम्, अस्य राज्ञः, आचक्षीत निवेदयेत् ।

मूलहरेत्यादि । मूलहरतादात्विककदर्यान् प्रतिषेधयेत् मूलहरणादिकर्मणो वारयेत् । के पुनर्मूलहरादय इत्यत्राह—**यः पितृपैतामहमिति** । यः, पितृपैतामहं पितृपितामहार्जितम्, अर्थम्, अन्यायेन भक्षयति दुर्विनियोगेन नाशयति, स मूलहरः । यद्यदुत्पद्यते प्रत्यहं लभ्यते, तत्तद् यः, भक्षयति दुर्विनियोगेन नाशयति, स तादात्विकः । यः भृत्यात्मपीडाभ्याम् अर्थम्, उपचिनोति वर्धयति, स कदर्यः । प्रतिषेधानन्तरमपि मूलहरणाद्यनुवृत्तावाह—**स इति** । सः मूलहराद्यन्यतमः, पक्षवांश्चेत् पक्षो बन्धुसम्पत् तद्वान् यदि, अनादेयः अग्राह्यः तद्बन्धुकोपपरिहारार्थमगृहीतधन एव स्थानादवरोपणीय इत्यर्थः । विपर्यये पक्षवत्त्वाभावे, पर्यादातव्यः सर्वस्वं हर्तव्य इत्यर्थः ।

यो महतीति । यः कदर्यः महति अर्थसमुदये स्थितः सन्, सन्निधत्ते अवनिधत्ते अवस्रावयति वा, तत्र सन्निधानावनिधानावस्रावणानि विवृणोति—स्ववेश्मनि सन्निधत्ते भूगर्तस्तम्भकोटरादिषु स्थापयति, पौरजानपदेषु अवनिधत्ते रक्षणार्थं निक्षिपति, परविषये अवस्रावयति शत्रुजनपदे धनसञ्चारणं करोति, तस्य अध्यक्षस्य, मन्त्रिमित्रभृत्यबन्धुपक्षं मन्त्र्यादिचतुष्टयबलं, द्रव्याणामागतिं गतिं च, सत्री गूढपुरुषप्रणिध्युक्तलक्षणः, उपलभेत ।

यश्चास्य परविषये सञ्चारं कुर्यात् तमनुप्रविश्य मन्त्रं विद्यात्। सुविदिते शत्रुशासनापदेशेनैनं घातयेत् ।

तस्मादस्याध्यक्षाः सङ्ख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कर्माणि कुर्युः ।

उत्तराध्यक्षा हस्त्यश्वरथारोहाः। तेषामन्तेवासिनः शिल्पशौचयुक्ताः सङ्ख्यायकादीनामपसर्पाः ।

बहुमुख्यमनित्यं चाधिकरणं स्थापयेत् ।

यश्चेति । यश्च परविषये, अस्य कदर्यस्य, सञ्चारं द्रव्यसञ्चारणं कुर्यात्, तम्, अनुप्रविश्य अनुकूलतया प्रविश्य तन्मित्रं तद्भृत्यो वा भूत्वेत्यर्थः, मन्त्रं विद्यात् अभिसन्धिरहस्यं जानीयात् सत्री । सुविदित इति । सुविदिते सत्रिद्वारेण सम्यग् विज्ञाते मन्त्रे, एनं कदर्यं, शत्रुशासनापदेशेन घातयेत् शत्रुणा कदर्यमभिसम्बुध्य प्रहितं 'प्रेषितोऽर्थः प्रतीष्टः, अवशिष्टः क्षिप्रं प्रेष्यतामि'ति लिखितवृत्तान्तं किमपि लेख्यं शत्रुविषयागतजनहस्तादन्तपालेन गृहीतोपनीतमित्येवं कूटसृष्टस्यैव शत्रुशासनस्य अपदेशेन प्रख्यापनेन हतं कारयेत् ।

तस्मादिति । तस्माद् राजद्रव्यापहारे यथोक्तदण्डविधानात्, अध्यक्षाः, अस्य राज्ञः, कर्माणि धनसम्बद्धानि कार्याणि, संख्यायकलेखकरूपदर्शकनीवीग्राहकोत्तराध्यक्षसखाः कुर्युः संख्यायकादिसाक्षिकाः सन्तः कुर्युः । संख्यायकाः गणकाः, लेखकाः प्रसिद्धाः, रूपदर्शकाः निष्कदीनारादिरूपपरिशोधकाः, नीवीग्राहकाः व्ययितशिष्टधनग्रहणाधिकृताः, उत्तराध्यक्षा औपरिकाः ।

के पुनरुत्तराध्यक्षाः कर्तव्या इत्यत्राह — उत्तरेत्यादि । हस्त्यश्वरथारोहाः हस्त्यारोहा अश्वारोहा रथारोहाश्च वृद्धभावादिना युद्धाक्षमत्वं प्रतिपन्नाः, उत्तराध्यक्षाः कर्तव्याः । तेषामिति । तेषाम् उत्तराध्यक्षाणां, शिल्पशौचयुक्ता अन्तेवासिनः शिल्पं नियोगानुष्ठानकौशलं शौचं स्वकृत्याविसंवादनं ताभ्यामुपेताः शिष्याः, संख्यायकादीनामपसर्पाः संख्यायकलेखकादिप्रवृत्त्युपलम्भार्था गूढपुरुषाः कर्तव्याः ।

बह्वित्यादि । अधिकरणं युक्तकर्मस्थानं, बहुमुख्यं स्थापयेत् बहवो मुख्याः प्रधाना यस्मिंस्तत् तथाभूतं कुर्यात्, बहवश्चेत् प्रधानास्तेऽन्योन्यशङ्किता राजार्थं नापहरन्तीति। अनित्यं च स्थापयेत् अनित्यं न विद्यते नित्यः

यथा ह्यनास्वादयितुं न शक्यं
जिह्वातलस्थं मधु वा विषं वा ।
अर्थस्तथा ह्यर्थचरेण राज्ञः
स्वल्पोऽप्यनास्वादयितुं न शक्यः ॥
मत्स्या यथान्तस्सलिले चरन्तो
ज्ञातुं न शक्याः सलिलं पिबन्तः ।
युक्तास्तथा कार्यविधौ नियुक्ता
ज्ञातुं न शक्या धनमाददानाः ॥
अपि शक्या गतिर्ज्ञातुं पततां खे पतत्रिणाम् ।
नतु प्रच्छन्नभावानां युक्तानां चरतां गतिः ॥
आस्रावयेच्चोपचितान् विपर्यस्येच्च कर्मसु ।
यथा न भक्षयन्त्यर्थं भक्षितं निर्वमन्ति वा ॥

स्थिरश्चिरस्थायी युक्तो यस्मिंस्तत् तथाभूतं च कुर्यात् । नित्यो हि युक्तश्चिरसंवाससुलभां मित्रसम्पदमवष्टभ्यात्मदोषान् निह्नुवीत, जानपदाश्च तस्य दोषान् कालान्तरात्मापकारभिया नाविष्कुर्युरिति ।

अध्यायान्ते श्लोकानाह — यथाहीत्यादि । अनास्वादयितुं न शक्यम् अर्थादास्वादनपरिहारमिच्छतापि । अशक्यत्वोपपादकमाह — **जिह्वातलस्थमिति** । विनापि पुरुषयत्नेन तदुदरप्रवेशं यद्देशसन्निकर्षे लभेत तद्देशनित्यसन्निहितमित्यर्थः । **अर्थ** इति । योऽत्यल्पत्वाद् भक्षितविज्ञातोऽप्यनर्थापर्यवसायी मधुस्थानीयो, यश्च महत्त्वाद् वधदण्डान्तपरमानर्थपर्यवसायी विषस्थानीयः, स उभयविधोऽपि । अर्थचरः अर्थेषु व्याप्रियमाणोऽध्यक्षः । तदेवमर्थभक्षणस्याध्यक्षदुष्परिहरत्वमनेनोक्तम् ॥

कृतमप्यध्यक्षैरर्थभक्षणं जलचरमत्स्यजलपानवद् गगनचरपक्षिगतिवच्च स्वामिना दुरवबोधमिति श्लोकद्वयेनाह — **मत्स्या यथान्तरिति**, **अपि शक्या गतिरिति** च ॥

अत एतेषु राजा किं कुर्यात्, तत्राह— **आस्रावयेदिति** । उपचितान् **अर्थभक्षणसमृद्धान्** अध्यक्षान्, आस्रावयेद् भक्षितमर्थमाहारयेद् उपचयरूपेण लिङ्गेनापसर्पाद्युपायेन च तदपचारमवगम्येत्यार्थम् । कर्मसु विपर्यस्येत् व्यत्ययेन निवेशयेद् उच्चकर्मस्थानेभ्योऽवरोप्य नीचकर्मस्थानेषु नियु-

न भक्षयन्ति ये त्वर्थान् न्यायतो वर्धयन्ति च।
नित्याधिकाराः कार्यास्ते राज्ञः प्रियहिते रताः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा,
आदितस्त्रिंशः ॥

ज्ञीतेत्यर्थः । आस्रावणविपर्यसनभयाच्चाध्यक्षा अर्थभक्षणे न प्रवर्तन्ते, भक्षितं चार्थं प्रत्याहरन्तीत्यभिप्रायेणाह —**यथेत्यादि** । तथा आस्रावयेदित्येवं पूर्वार्धेन सम्बन्धः । सोऽयमर्थभक्षकविषयो विधिः प्रपञ्चितः ॥

ये पुनरर्थचरा अपि सन्तो महान्तं यत्नमास्थाय राजजानपदार्थं न भक्षयन्ति, प्रत्युत न्यायतः परिवर्धयन्ति, तथाविधा राजप्रियहितानुष्ठानपराः स्थिराधिकाराः कर्तव्या इत्याह –– **न भक्षयन्तीत्यादि** ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
नवमोऽध्यायः उपयुक्तपरीक्षा,
आदितस्त्रिंशः ॥

२८. प्रक. शासनाधिकारः ।

शासने शासनमित्याचक्षते । शासनप्रधाना हि राजानः, तन्मूलत्वात् सन्धिविग्रहयोः ।

तस्मादमात्यसम्पदोपेतः सर्वसमयविदाशुग्रन्थश्चार्वक्षरो लेखवाचनसमर्थो लेखकः स्यात् । सोऽव्यग्रमना राज्ञः सन्देशं श्रुत्वा

शासनाधिकार इति सूत्रम् । शासनं नाम लिखितकार्यार्थं तालपत्रादि, तस्याधिकारो विधिरुच्यत इति सूत्रार्थः । 'अर्धगुणहीनः शासनहरः' इति शासनं यत् सूत्रितं दूतप्रणिधौ तदिह निरूप्यत इति सङ्गतिः ।

किं तच्छासनमित्याह—**शासने शासनमित्याचक्षत** इति । पत्रारूढोऽर्थः शासनं तस्मिन् शासनमिति व्यपदेशं कुर्वन्त्याचार्याः, नतु सन्दिष्टेऽर्थे वाचिकाख्ये इत्यर्थः । कुतः पुनः शासनवाचिकयोर्मध्ये शासनस्य निरूपणादरो नतु वाचिकस्येत्याकाङ्क्षायामाह — **शासनेत्यादि** । सन्धिविग्रहयोरिति षाड्गुण्योपलक्षणम् । तेनायमर्थः— हि यस्माच्छासनमेव राज्ञां मन्त्रगुप्तिपुरस्सरषाड्गुण्यव्यापाराव्यभिचारनिर्वाहकतया प्रधानं, वाचिकं तु सन्देशहरगतप्रमादादिदोषसम्भावितमन्त्रभेदतया व्यभिचारित्वान्न प्रधानमिति ।

शासनस्य प्रधानत्वाद् विशिष्टगुण एव तल्लेखको भवितुमर्हतीत्याह —**तस्मादित्यादि** । तस्माद्, अमात्यसम्पदोपेतः 'जानपदोऽभिजात' इति मन्त्रिपुरोहितोत्पत्तिप्रकरणोक्ताः पञ्चविंशतिर्जानपदत्वादयो गुणा अमात्यसम्पत् तया युक्तः, सर्वसमयवित् सर्वेषां वर्णानाम् आश्रमाणां वर्णातिरिक्तानां चाचाराभिज्ञः, आशुग्रन्थः शीघ्रवाक्यसन्दर्भप्रसरः, चार्वक्षरः चारूणि एकैकशः समुदायतश्च दर्शनीयान्यक्षराणि लिपयो यस्य सः, लेखवाचनसमर्थः लेखस्य स्फुटसुस्वरयथास्थानवाक्यविश्रमसुभगपठनप्रवीणः, लेखस्याप्रकाश्यार्थस्य संज्ञालेखस्य वर्जिताक्षरस्य पदवाक्यसंकेतितलेखाविशेषात्मकस्य वाचने व्यवहारे समर्थ इत्यपरे । एवमेकोनत्रिंशता गुणैर्युक्तो लेखकः स्यात् । स च लेखको राज्ञोच्यमानं वाचिकमनाकुलेन मनसा श्रुत्वार्थान् पौर्वापर्यक्रमेण परलेखार्थानुगुण्यानानुगुण्याभ्यां च निश्चित्य लेखं लिखेदित्याह— **सोऽव्यग्रेत्यादि** । तत्र युक्तानामव्यग्रमनस्कता राजसत्काराद् भवति । यदाहुः —

"नीचापि बुद्धिर्नृपमानयोगाच्छ्रेष्ठत्वमायाति तदाश्रितानाम् ।
अग्र्यापि निर्वाति हि मानहीना स्नेहं विना दीपशिखेव तूर्णम् ॥"

निश्चितार्थं लेखं विदध्याद्, देशैश्वर्यवंशनामधेयोपचारमीश्वरस्य, देशनामधेयोपचारमनीश्वरस्य।

जातिं कुलं स्थानवयश्श्रुतानि कर्मर्द्धिशीलान्यथ देशकालौ।
यौनानुबन्धं च समीक्ष्य कार्ये लेखं विदध्यात् पुरुषानुरूपम् ॥

इति। परलेखानुरूप्यानानुरूप्यानिश्चयविषयेऽपि श्लोकमुदाहरन्ति —

"श्रुत्वा नरेन्द्रवाक्यं परभावं चावधार्य परलेखात्।
लेखः खलु कर्तव्यो गुणदोषविनिश्चयज्ञेन ॥"

इति। कीदृशं विदध्यात्, ईश्वरस्य राज्ञः, देशैश्वर्यवंशनामधेयोपचारं देशादीनां चतुर्णामुपचारो यस्मिंस्तं तथाभूतम्। तत्र देशोपचारोऽध्युष्यमाणदेशनिर्देशेनोपचारः, यथा — मध्यदेशमलङ्कुर्वाणमिति। ऐश्वर्योपचारः भूकोशदण्डसम्पन्निर्देशोपचारः 'मध्यदेशाधिपतिमसंख्याताप्रतिहतदण्डक्षपितरिपुपक्षम्' इत्येवञ्जातीयः। वंशोपचारः 'सोमान्वयभूषणम्' इत्येवम्प्रकारः। नामधेयोपचारः 'महाराजाधिराजश्रीसिंहवर्मदेवम्' इत्येवञ्जातीयः। अनीश्वरस्य अमात्यादेः, देशनामधेयोपचारं देशोपचारनामोपचारयुक्तम्। तत्र देशोपचारः 'कान्यकुब्जमलङ्कुर्वाणम्' इत्यादिः। नामोपचारः 'श्रीसोमदत्तमि'त्यादिः।

जातिकुलाद्येकादशकमपि लेखविधौ समीक्षणीयमित्याह — **जाति**मित्यादि। तत्र जातिर्ब्राह्मणादिः। तत्समीक्षा च ब्राह्मणो ब्राह्मणस्य ज्यायसोऽभिवादपूर्वं कनीयस आशीर्वचनपूर्वं क्षत्रियस्य स्वस्त्यादिपदपूर्वं, क्षत्रियादिर्ब्राह्मणस्य प्रणामपूर्वमित्येवञ्जातीया। कुलम् अन्ववायो भोजादिः। स्थानमधिकारः सान्धिविग्रहिकादिः। वयो यौवनादि। श्रुतं शास्त्रविज्ञानम्। कर्म वृत्तिः। ऋद्धिर्धनसम्पत्। शीलं सदाचारः। देशो वासस्थानम्। कालः तदात्वमायतिश्च। यौनानुबन्धो विवाहसम्बन्धः। इदं जात्याद्येकादशकं, समीक्ष्य पर्यालोच्य, कार्ये कार्यविषये, पुरुषानुरूपं पुरुषाणां हीनमध्यमोत्तमानां यथाक्रममाज्ञापनबोधनविज्ञापनाद्युक्तिप्रकारैरनुरूपं लेखं विदध्यात्। श्लोकं चात्रोदाहरन्ति —

"वित्तं बन्धुर्वयः कर्म विद्या भवति पञ्चमी।
एतानि मान्यस्थानानि गरीयो यद्यदुत्तरम् ॥" इति।

अर्थक्रमः, सम्बन्धः, परिपूर्णता, माधुर्यमौदार्यं, स्पष्टत्वमिति लेखसम्पत् ।

तत्र यथावदनुपूर्वक्रिया प्रधानस्यार्थस्य पूर्वमभिनिवेश इत्यर्थस्य क्रमः ।

प्रस्तुतस्यार्थस्यानुपरोधादुत्तरस्य विधानमा समाप्तेरिति सम्बन्धः ।

अर्थपदाक्षराणामन्यूनानतिरिक्तता हेतूदाहरणदृष्टान्तैरर्थोपवर्णनाश्रान्तपदतेति परिपूर्णता ।

लेखसम्पदमाह — **अर्थक्रम** इत्यादि ।

अर्थक्रमादीन् षड् लेखगुणान् स्वयमेव व्याचष्टे — **तत्रे**त्यादि । तत्र अर्थक्रमादीनां मध्ये । यथावदनुपूर्वक्रिया यथार्हं क्रमकरणम् । तदेव स्फुटप्रतिपत्तये विवृणोति — प्रधानस्यार्थस्य पूर्वमभिनिवेश इति । अभ्यर्हितस्यार्थस्य पूर्वं लेखनं पश्चादन्यस्येत्ययमर्थक्रमो नाम लेखगुणः ।

सम्बन्धमाह —**प्रस्तुतस्ये**ति । प्रस्तुतस्य प्रक्रान्तस्य, अर्थस्य, अनुपरोधाद् अबाधात्, उत्तरस्यार्थस्य, आ समाप्तेर्विधानम् आ लेखपरिसमापनालेखनं पूर्वपूर्वलिखितार्थाविरोधेनोत्तरोत्तरार्थलेखनमिति यावत्, इत्ययं सम्बन्धाख्यो गुणः ।

परिपूर्णतामाह — **अर्थे**त्यादि । अर्थपदाक्षराणामन्यूनानतिरिक्तता अर्थस्य पदानामक्षराणां चान्यूनतानतिरिक्तता च । अर्थन्यूनता यथा — 'हस्तिनौ प्रयच्छे'त्युक्ते हस्तिनं प्रयच्छेति लेखनम् । इहार्थमात्रं न्यूनं पदाक्षराणि तु न न्यूनानि न चातिरिक्तानि । 'हस्तिनं प्रयच्छे'त्युक्ते हस्तिनौ प्रयच्छेति लेखनेऽर्थातिरिक्तता पदाक्षराणि तु तावन्त्येव । पदन्यूनता यथा — 'कालिङ्गं हस्तिनं प्रयच्छे'त्युक्ते विशेषणपरित्यागेन 'हस्तिनं प्रयच्छे'ति लेखनं, 'हस्तिनं प्रयच्छे'ति निर्विशेषणोक्तौ सविशेषणलेखनं पदाधिकता । अक्षरन्यूनता यथा — सलिलशब्दोक्तौ वारिशब्दलेखनं, तद्वैपरीत्यलेखनेऽक्षराधिकता । हेतूदाहरणदृष्टान्तैरर्थोपवर्णना हेतुः कारणम् उदाहरणं शास्त्रसंवादाभिधानं दृष्टान्तो लोकसिद्धार्थनिदर्शनं हेत्वादिभिस्त्रिभिरर्थस्य प्रस्तुतस्य उपवर्णना सम्प्रतिपत्तिसम्पादनम् । अश्रान्तपदता वाक्यार्थे पदवचनं, यथा 'सन्धिं कुरु' इति पदसमूहप्रतिपाद्यस्यार्थस्य 'सन्धत्स्व' इत्येकेन पदेन प्रतिपादनम् । इति परिपूर्णता अनेन प्रकारेण परिपूर्णता नाम गुणः ।

सुखोपनीतचार्वर्थशब्दाभिधानं माधुर्यम् ।
अग्राम्यशब्दाभिधानमौदार्यम् ।
प्रतीतशब्दप्रयोगः स्पष्टत्वमिति ।
अकारादयो वर्णास्त्रिषष्टिः ।

वर्णसङ्घातः पदम् । तच्चतुर्विधं नामाख्यातोपसर्गनिपाताश्चेति । तत्र नाम सत्त्वाभिधायि । अविशिष्टलिङ्गमाख्यातं क्रियावाचि । क्रियाविशेषकाः प्रादय उपसर्गाः । अव्ययाश्चादयो निपाताः ।

सुगमसुन्दरार्थप्रतिपादकशब्दप्रयोगो नाम माधुर्यम्, अग्राम्यशब्दप्रयोग औदार्यं, सुप्रसिद्धशब्दप्रयोगश्च स्पष्टत्वमित्याह—**सुखोपनीते**त्यादि ।

शब्दप्रसङ्गात् तद्गतं पदवाक्यविभागं पदवाक्यगतं च लेखे करणीयं विशेषान्तरं निरूपयिष्यन् पदारम्भकत्वात् प्रथममक्षराणि निरूपयति—**अकारादयो वर्णास्त्रिषष्टि**रिति । तत्र ह्रस्वदीर्घप्लुतभेदादचो द्वाविंशतिः, कादयो मावसानाः स्पर्शाख्याः पञ्चविंशतिः, यरलवा अन्तःस्थाख्याश्चत्वारः, अयोगवाहा अनुस्वारविसर्गजिह्वामूलीयोपध्मानीयाश्चत्वारः, यमाक्षराणि चत्वारि, शषसहा ऊष्माख्याश्चत्वारः इत्येवं वर्णानां त्रिषष्टित्वम् । यदाहुः—

"दीर्घाः स्वराणां तत्राष्टौ पञ्च ह्रस्वाः प्लुता नव ।
चतुर्धायोगवाहोष्मयमान्तस्थाः पृथक् पृथक् ।
विंशतिः पञ्च च स्पर्शास्त्रिषष्टिरिति कीर्तिताः ॥"

इति । स्वरानुनासिक्यकृतस्तु भेदो न संख्यातो लौकिकप्रयोगे तदनादरात् ।

पदस्वरूपमाह —**वर्णसंघातः पद**मिति । नियतानुपूर्वीकाणां वर्णानां समूहोऽर्थविशेषसङ्केतितः पदमित्युच्यते । तच्चतुर्विधं नामादिभेदादित्याह—**त**दिति । नामादिस्वरूपमाह — **तत्रे**ति । तेषु नामादिषु मध्ये, **सत्त्वाभिधायि** जातिगुणद्रव्यवाचकं, **नाम** इत्युच्यते । **अविशिष्टलिङ्गं** स्त्रीपुन्नपुंसकरूपलिङ्गविशेषशून्यं क्रियावाचकम् **आख्यातम्** । **क्रियाविशेषकाः** क्रियागतप्रकर्षादिविशेषद्योतकाः, प्रादयः प्र परा अप सम् अनु इत्यादयः **उपसर्गाः** । अव्ययाः लिङ्गवचनविभक्तिभेदरहिताः, चादयः च वा ह इत्यादयः, **निपाताः** ।

पदसमूहो वाक्यमर्थपरिसमाप्तौ । एकपदावरस्त्रिपदपरः परपदार्थानुरोधेन वर्गः कार्यः । लेखपरिसंहरणार्थ इतिशब्दो वाचिकमस्येति च ।

वाक्यस्वरूपमाह— **पदे**त्यादि । पदसमूहः पदानां सङ्घातो वाक्यम् इत्युच्यते, अर्थपरिसमाप्तौ अर्थस्य पर्यवसाने सति तेन पदसमूहेन चेदेको विशिष्टार्थो नैराकाङ्क्ष्येण बुद्धौ प्रतिष्ठितो भवतीत्यर्थः । समासकरणविषयमाह—**एके**त्यादि । वर्गः समासः, परपदार्थानुरोधेन कार्यः एकं तत् पदं समासघटकादेकस्मात् पदाद् अन्यत् समासघटकं पदं तस्य अर्थानुरोधेन अर्थमनुसृत्य कार्यः अर्थस्य समासघटकपदान्तरार्थेन सहैकीभावयोग्यतामभिलक्ष्य कार्य इत्यर्थः । पदयोः पदानां वा सति सामर्थ्ये समासः कार्यो नान्यथेत्यभिप्रायः । स च कथम्भूतः कार्यः, एकपदावरस्त्रिपदपरः समस्यमानपदातिरेकेणैकं पदम् अवरं निकृष्टं यस्मिन् स तथाभूतः अर्थाद् द्विपदावरः त्रीणि पदानि पराणि उत्कृष्टानि यस्मिन् स तथाभूतश्च कार्यः, त्र्यधिकपदसमासस्तु न कार्यो माधुर्याद्युक्तगुणहानात् । यदाहुः—

> "माधुर्यमभिवाञ्छन्तः प्रसादं च सुमेधसः ।
> समासवन्ति भूयांसि न पदानि प्रयुञ्जते ॥"

इति । **अपरा व्याख्या** — एकपदावरस्त्रिपदपरः इत्यनयोर्यथोक्त एवार्थः, विशेष्यस्तु पदसमूहः, स च सामर्थ्यात् समासलक्षणः । तावता च दीर्घसमासप्रतिषेधस्योक्तस्य सिद्धिः । 'परपदार्थानुरोधेन वर्गः कार्यः' इत्यनेन तु अर्थान्तरं संगृह्यते । तद्यथा— वर्गो विरामोऽवसानं विच्छेद इति पर्यायाः । वर्गः अर्थविश्रान्तिचिह्नं सुखप्रतिपत्त्यर्थं क्रियमाणं, परपदार्थानुरोधेन परपदार्थानुसारेण, कार्यः । अनुपरोधेनेति पाठे परपदार्थानुपघातेन कार्यः । यथा— 'पुराणं मानवो धर्मः स्वको वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि, न हन्तव्यानि हेतुभिः ॥' इत्यस्मिन् श्लोके चत्वारीत्यत्र विरामचिह्नस्य करणे परपदार्थेन नोपरोधः, 'चत्वारि न' इत्यत्र करणे तु स्फुट एव सः इति । लेखपरिसमाप्तिचिह्नमाह — **लेखे**त्यादि । अन्ते इतिशब्दलेखनं 'वाचिकमस्ये'ति लेखनं वा लेखसमाप्तिसूचनप्रयोजनकमित्यर्थः । तत्र लेखनीयार्थस्य निरवशेषतायामितिशब्दः सावशेषतायां 'वाचिकमस्य' इत्युक्तिः । वाचिकमस्येति

निन्दा प्रशंसा पृच्छा च तथाख्यानमथार्थना ।
प्रत्याख्यानमुपालम्भः प्रतिषेधोऽथ चोदना ॥
सान्त्वमभ्यवपत्तिश्च भर्त्सनानुनयौ तथा ।
एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः ॥

तत्राभिजनशरीरकर्मणां दोषवचनं निन्दा । गुणवचनमेतेषामेव प्रशंसा । कथमेतदिति पृच्छा । एवम् इत्याख्यानम् । देहीत्यर्थना । न प्रयच्छामीति प्रत्याख्यानम् । अननुरूपं भवत इत्युपालम्भः । मा कार्षीः इति प्रतिषेधः । इदं क्रियताम् इति चोदना । योऽहं स भवान्, मम यद् द्रव्यं तद् भवतः इत्युपग्रहः सान्त्वम् । व्यसनसाहाय्यमभ्यवपत्तिः । सदोषमायतिप्रदर्शनमभिभर्त्सनम् ।

लेखनं च 'वाचिकमस्य लेखहरमुखाच्छ्रोतव्यम्' इत्यादिरीत्या लेखनमिति बोद्धव्यम् ।

अथ लेखनीयतया सम्भावितान् अर्थान् श्लोकाभ्यामुद्दिशति—**निन्दे**त्यादि । निन्दाप्रशंसादित्रयोदशकविषयतया त्रयोदशविधा **लेखार्थाः** इत्यर्थः ॥

निन्दादिकं क्रमेण व्याचष्टे—**तत्रे**त्यादि । अभिजनशरीरकर्मणां दोषवचनं प्रकृतिकुटिला वैश्वामित्रा इत्यभिजनदोषवचनं कुष्ठितो व्याधित इति शरीरदोषवचनं गोघ्नो ब्रह्महेति कर्मदोषवचनं, सेयं **निन्दा** त्रिप्रकारा । तद्वैपरीत्येन तेषामेवाभिजनादीनां गुणवचनं **प्रशंसा** । कथमेतत् करणीयमिति कर्तव्याजिज्ञासा **पृच्छा** । एवमेतत् करणीयमित्युपदेशः पृष्टेन क्रियमाण **आख्यानं** । सन्ध्यादिनिमित्तं किञ्चित् कोशदण्डादिकं देहीति याचनमर्थना । अर्थितस्य न प्रयच्छामीति वचनं **प्रत्याख्यानम्** । अननुरूपं भवत इदं कार्यमित्युक्तिरु**पालम्भः** । मा कार्षीरित्यकार्यप्रवृत्तेर्वारणमाप्तभावात् क्रियमाणं **प्रतिषेधः** । इदं क्रियतां सन्धानं विग्रहणं वास्मिन् देशकाल इति प्रेरणा **चोदना** । योऽहं स भवान्, मम यद् द्रव्यं तद् भवत इति स्वशरीरसम्बोध्यशरीरयोः स्वद्रव्यसम्बोध्यद्रव्ययोश्चाभेदवचनभङ्ग्यानुकूलनं **सान्त्वम्** । व्यसने रिपूपप्लवादौ साह्यकरण**मभ्यवपत्तिः** । अनित्थंकुर्वाणमाचिरात् त्वां घातयेयं, बद्ध्वा वा कारागृहे निवेशयेयमित्येवमनर्थदोषयुक्तमुत्तरकालकथन**मभिभर्त्सन**मित्युच्यते ।

अनुनयस्त्रिविधोऽर्थकृतावतिक्रमे पुरुषादिव्यसने चेति ।
प्रज्ञापनाज्ञापरिदानलेखास्तथा परीहारनिसृष्टिलेखौ ।
प्रावृत्तिकश्च प्रतिलेख एव सर्वत्रगश्चेति हि शासनानि ।
अनेन विज्ञापितमेवमाह तद् दीयतां चद्यदि तत्त्वमस्ति ।
राज्ञः समीपे वरकारमाह प्रज्ञापनैषा विविधोपदिष्टा ॥

भर्तुराज्ञा भवेद् यत्र निग्रहानुग्रहौ प्रति ।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम् ॥
यथार्हगुणसंयुक्ता पूजा यत्रोपलक्ष्यते ।
अप्याधौ परिदाने वा भवतस्तावुपग्रहौ ॥

अनुनय इति । अर्थकृतावित्यादयो निमित्तसप्तम्यः । अर्थकरणनिमित्तोऽतिक्रमनिमित्तः पुरुषादिव्यसननिमित्त इति त्रिप्रकारोऽनुनयः । तत्र सामवायिकादिकार्यमवश्यकरणीयमकुर्वाणं प्रति तत्करणार्थं मित्रेण क्रियमाणोऽनुनय आद्यः । स्ववाक्यातिक्रमकुपितं प्रति कोपप्रशमनाय क्रियमाणोऽनुनयो द्वितीयः । पितृभ्रातृपुत्रमित्रामात्यमरणादिव्यसनेष्ववश्यानुग्राह्यं पूर्वमननुगृह्य पश्चात् कार्यवशात् तं प्रति क्रियमाणोऽनुनयस्तृतीयः ।

भूयोऽप्यष्टौ शासनभेदान् श्लोकेनोद्दिशति — **प्रज्ञापने**त्यादि ॥

श्लोकैरेव तेषां विवरणमारभमाणः प्रथमं प्रज्ञापनलेखं व्याचष्टे — **अनेने**ति । प्रज्ञापना नाम महामात्रादीन् प्रति तदीयगूढपुरुषैः क्रियमाणा तन्मित्रामित्रराजपुरुषवृत्तान्तस्यावेदना । एषा विविधा बहुप्रकारा उपदिष्टा ।ताममित्रविषयां पूर्वार्धेन प्रदर्शयति—अनेन राजानुचरेण देवदत्तनाम्ना विज्ञापितं राजान्तिके 'महामात्रेण कुतश्चिन्निधिरधिगत आत्मसात्कृत' इति । विज्ञापितश्च राजानेन प्रकारेणाह — 'यदि महामात्रः स्वयं तं निधिं न प्रयच्छति तदाहमेव तं द्विगुणमाहारयिष्यामी'ति । तत्त्वमस्ति चेद्यदि तद् दीयतां यदि निधिद्रव्याधिगमः सत्यः तर्हि तद् दीयतां राज्ञे इत्यर्थः । मित्रविषयां तृतीयपादेन दर्शयति — राज्ञः समीपे वरकारम् आह कल्याणं कर्म त्वया क्रियमाणं निवेदयति, अर्थाद् देवदत्तादिः । इह चेत्पदयदिपदयोः सहप्रयोगोऽपिशब्दचशब्दयोरिव द्रष्टव्यः ॥

सामान्यतो यस्मिन्कस्मिंश्चिज्जने विषये विशेषेण पुनर्भृत्येषु विषये निग्रहमनुग्रहं वाधिकुर्वती भर्तुराज्ञा यस्मिन् लेखे, स आज्ञालेख इत्याह — **भर्तुरि**त्यादि ॥

जातेर्विशेषेषु पुरेषु चैव ग्रामेषु देशेषु च तेषु तेषु ।
अनुग्रहो यो नृपतेर्निदेशात् तज्ज्ञः परीहार इति व्यवस्येत् ॥
निसृष्टिस्थापना कार्यकरणे वचने तथा ।
एष वाचिकलेखः स्याद् भवेन्नैसृष्टिकोऽपि वा ॥

परिदानलेखमाह — **यथार्हेत्यादि** । यत्र यस्मिन् लेखे, यथार्हगुणसंयुक्ता उत्तममध्यमाधमसम्बोध्यतारतम्यानुसारिणी, पूजा 'धार्मिकस्य गुणवतस्तवेदमसदृशं दुःखमुपनतं, किं कुर्मः, क्षन्तव्यमेव विवेकिभिरीदृशं कथञ्चिद्' इत्युक्तिरूपः शोककाले, 'स्वनियोगसविशेषानुष्ठानस्यापर्याप्तमपीदमस्माभिर्यत्किञ्चित् पारितोषिकं दीयमानं स्वीकरोतु भवानि'त्युक्तिरूपः स्वामिपरितोषकाले, स्वामिबहुमानः, उपलक्ष्यते, स परिदानलेख इति विधेयाध्याहारः, तस्यैव लक्षणीयतया क्रमप्राप्तत्वात् । तस्य विषयद्वैविध्येन द्वैविध्यं सूचयन्नाह — **अपीति** । तौ परिदानलेखौ, अप्याधौ परिदाने वा, अपिवाशब्दौ समुच्चयार्थौ, आधिर्बन्धुमरणनिमित्ता भृत्यानां मनोव्यथा परिदानं परिरक्षणं भृत्यविषयदयाविष्करणमिति यावत्, आधौ च परिदाने च, उपग्रहौ स्वीकारहेतू स्वतातिशयप्रतिपत्तिहेतू, भवतः ॥

परिहारलेखमाह — **जातेरिति** । अमुकस्य कालस्यामुकब्राह्मणेभ्यः करो न ग्राह्य इत्येवंप्रकारो यो जातिविशेषविषयोऽनुग्रहः, अमीषु नगरेषु वणिग्भ्यः शुल्कममुकस्य कालस्य न ग्राह्यमित्येवंविधो यः पुरविषयः, नवागतकुटुम्बिभ्यः इयतः कालस्य न ग्राह्यः कर इत्येवंप्रायो यो ग्रामविषयः, न कोऽपि राजभागधेयोऽमुकदेशे कालस्यैतावतो ग्राह्य इत्येवञ्जातीयो यो देशविषयः, स सर्वविधोऽप्यनुग्रहो राजशासनात् प्रवृत्तः परीहारसंज्ञित इति लेखप्रकाराभिज्ञो जानीयादिति श्लोकार्थः । तत्रानुग्रहः कश्चित् कराग्रहणरूपः, कश्चित् स्वयं धनदानरूपः, कश्चिदुभयरूप इति त्रिप्रकारो वेदितव्यः ॥

निसृष्टिलेखमाह — **निसृष्टीत्यादि** । कार्यकरणे तथा वचने, निसृष्टिस्थापना कस्यचिदाप्तपुरुषस्य प्रामाण्याख्यानम् 'अमुकस्य क्रिया ममैव क्रिया अमुकस्य वचनं ममैव वचनमि'त्येवं रूपं, निसृष्टिलेख इति लक्ष्यस्याध्याहारः क्रमप्राप्तत्वात् । एतस्य प्रकारद्वयमाह — एष निसृष्टिलेखः, वाचिकलेखः स्यात् वचनप्रमाणीकरणाख्यायी सन् वाचिक इति वक्तुमर्हः, नैसृष्टिकोऽपि वा भवेत् क्रियाप्रमाणीकरणाख्यायी सन् नैसृष्टिक इति वक्तुमर्हः ॥

विविधां दैवसंयुक्तां तत्त्वजां चैव मानुषीम् ।
द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति ॥
दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च ।
प्रतिलेखो भवेत् कार्यो यथा राजवचस्तथा ॥

यत्रेश्वरांश्चाधिकृतांश्च राजा रक्षोपकारौ पथिकार्थमाह ।
सर्वत्रगो नाम भवेत् स मार्गे देशे च सर्वत्र च वेदितव्यः ॥

उपायाः सामोपप्रदानभेददण्डाः ।

तत्र साम पञ्चविधं—गुणसङ्कीर्तनं सम्बन्धोपाख्यानं परस्परोपकारसन्दर्शनमायतिप्रदर्शनमात्मोपनिधानमिति ।

प्रावृत्तिकमाह—**विविधामिति ।** विविधाम् अनेकप्रकारां, दैवसंयुक्तां यथाकालवृष्टिपातसुभिक्षाद्यनुकूलदैवफलसिद्धिसम्बद्धाम् अग्निवात्योपप्लवादिदुर्दैवफलसिद्धिसम्बद्धां च, तत्त्वजां पारमार्थिकीम्, मानुषीं चैव यातव्यसमुच्छेदादिरूपां परचक्रचोरादिजनितराज्योपद्रवादिरूपां च, तां प्रवृत्तिं प्रावृत्तिकव्यपदेशनिमित्तभूतां वार्तां, शासनं प्रति लेखविषये, द्विविधां व्यवस्यन्ति शुभाशुभात्मना द्विप्रकारां निश्चिन्वन्ति । प्रवृत्तिद्वैविध्यवचनभङ्ग्या चानया तन्निवेदनफलकस्य प्रावृत्तिकलेखस्य द्वैविध्यमभिहितं बोद्धव्यम् ॥

प्रतिलेखमाह—**दृष्ट्वेति ।** लेखं परस्मादागतं, यथातत्त्वं दृष्ट्वा यथावस्थितपदपदार्थानतिक्रमेण पूर्वं स्वयं वाचनया विज्ञाय, ततः प्रत्यनुभाष्य च पश्चाद् राज्ञः सकाशेऽनुवाच्य च, यथा राजवचः राज्ञ उत्तरवचनं भवति, तथा प्रतिलेखः कार्यो भवेत् ॥

यत्र लेखे राजा ईश्वरान् दुर्गराष्ट्रान्तपालादीन् समाहर्तृप्रशास्तृप्रभृतीनधिकृतांश्च पथिकानां पथि सहायदानलक्षणां रक्षां भक्तयवसेन्धनादिदानलक्षणमुपकारं चाज्ञापयति, स लेखः राज्ञो देशान्तरसञ्चारणे स्वनिवासदेशे सर्वस्मिंश्च काले लेखनार्हत्वान्नाम्ना सर्वत्रगो भवेदित्याह—**यत्रेश्वरांश्चेत्यादि ॥**

शासनाधीनत्वं सन्धिविग्रहयोरुक्तमधस्तात् । सन्धिविग्रहानुष्ठानस्य उपायप्रयोगसापेक्षत्वात् तेष्वपि व्युत्पत्तिः शासनलेखकस्यापेक्षितेति कृत्वा तान् दर्शयति—**उपाया इत्यादि ।**

तत्र साम्नः पञ्च प्रभेदानुद्दिशति—**तत्र सामेत्यादि ।**

तत्राभिजनशरीरकर्मप्रकृतिश्रुतद्रव्यादीनां गुणागुणग्रहणं प्रशंसा स्तुतिर्गुणसङ्कीर्तनम् ।

ज्ञातियौनमौखस्रौवकुलहृदयमित्रसङ्कीर्तनं सम्बन्धोपाख्यानम् ।

स्वपक्षपरपक्षयोरन्योन्योपकारसङ्कीर्तनं परस्परोपकारसन्दर्शनम् ।

अस्मिन्नेवं कृत इदमावयोर्भवतीत्याशाजननमायतिप्रदर्शनम् ।

योऽहं स भवान्, यन्मम द्रव्यं तद् भवता स्वकृत्येषु प्रयोज्यताम् इत्यात्मोपनिधानमिति ।

उपप्रदानमर्थोपकारः ।

तत्र प्रथमं सामप्रभेदं व्याचष्टे—**तत्राभिजने**त्यादि । अभिजनः कुलं, शरीरं कर्म च प्रसिद्धे, प्रकृतिः स्वभावः, श्रुतं शास्त्रजनितः संस्कारः, द्रव्यं रथगजतुरगादिपरिग्रहः, आदिपदेन वयोरूपादिग्रहणम् । अभिजनादीनामेषां गुणग्रहणं गुणस्य वस्तुसतः स्वरूपाख्यानं, गुणागुणग्रहणमिति पाठे गुणागुणयोर्वस्तुसतोः स्वरूपाख्यानं, प्रशंसा सश्लाघमाख्यानं, स्तुतिरविद्यमानगुणकीर्तनं च, गुणसङ्कीर्तनं नाम भवति ।

सम्बन्धोपाख्यानं व्याचष्टे—**ज्ञाती**त्यादि । ज्ञातिः समानकुलोत्पन्नः, यौनो योनिकृतः सम्बन्धो विवाहाख्यः, मौखो मुखकृतः सम्बन्धो वाक्सम्बन्धः शिष्याचार्यभावलक्षणः, स्रौवः स्रुवनामकयज्ञपात्रविशेषकृतः सम्बन्धो याज्ययाजकभावरूपः, कुलं पूर्वपुरुषपरम्परा, हृदयं मनोनिबन्धः, मित्रम् उपकारकं, ज्ञात्यादीनां सतानां सङ्कीर्तनं सम्बन्धोपाख्यानमित्युच्यते ।

स्वपक्षेत्यादि । स्वपक्षपरपक्षयोः, अन्योन्योपकारसङ्कीर्तनं परस्परोपकारो यथा स्यात् तथा कथनं, परस्परोपकारसन्दर्शनं नाम सामभेदः ।

अस्मिन्निति । अस्मिन् कार्ये, एवं कृते अनेन प्रकारेणानुष्ठिते सति, आवयोरिदं भवति तव च मम चैतत् फलं भविष्यति इत्याशाजननम्, आयतिप्रदर्शनं नाम ।

योऽहमिति । योऽहं स भवान् आवामभिन्नौ, तस्माद्, मम यद् द्रव्यं भूमिहिरण्याद्यस्ति, तद् भवता स्वकृत्येषु प्रयोज्यतां स्वीयद्रव्यनिर्विशेषमुपयुज्यताम्, इतीदृशम्, आत्मोपनिधानं नाम पञ्चमः सामप्रभेदः ।

उपप्रदानाख्यं द्वितीयमुपायं व्याचष्टे—**उपे**त्यादि । अर्थोपकारः भूमिहिरण्यादिरूपार्थदानेनोपकारकरणम्, उपप्रदानम् ।

शङ्काजननं निर्भर्त्सनं च भेदः।

वधः परिक्लेशोऽर्थहरणं दण्ड इति।

अकान्तिर्व्याघातः पुनरुक्तमपशब्दः संप्लव इति लेखदोषाः।

तत्र कालपत्रकमचारुविषमविरागाक्षरत्वमकान्तिः।

पूर्वेण पश्चिमस्यानुपपत्तिर्व्याघातः।

उक्तस्याविशेषेण द्वितीयमुच्चारणं पुनरुक्तम्।

लिङ्गवचनकालकारकाणामन्यथाप्रयोगोऽपशब्दः।

अवर्गे वर्गकरणं वर्गे चावर्गक्रिया गुणविपर्यासः संप्लव इति।

तृतीयमुपायं व्याचष्टे — **शङ्के**त्यादि। मित्रेष्वेकस्यापकाराधानेनान्येषां हृदि 'अस्मानप्यसावुच्छेत्स्यती'ति शङ्काया अपरागस्पर्धाहेतोरुत्पादनमेको भेदः, 'त्वामविधेयमभिघातयिष्यामी'त्येवम्प्रकारं निर्भर्त्सनमपरो भेदः।

दण्डं व्याचष्टे — **वध** इत्यादि। वधो व्यापादनं, परिक्लेशो बन्धनताडनादिभिर्दुःखोत्पादनम्, अर्थहरणं धनापहारः, इदं त्रयं दण्डः। इतिशब्दः समाप्तौ, लेखगुणाख्यानं परिसमाप्तमित्यर्थः।

अथ लेखदोषानाह —**अकान्ति**रित्यादि।

तत्रेति। तत्र लेखदोषेषु पञ्चसूद्दिष्टेषु मध्ये, कालपत्रकं काले मषीप्रसरणात् स्वभावतो वा मलिने पत्रे लिखितम्, अकान्तिः तदाख्यो दोषः। अचारुविषमविरागाक्षरत्वम् अचारूणि असुन्दराणि विषमाणि अनियतस्थौल्यसौक्ष्म्याणि विरागाणि शुद्धोदकप्रायमषीलिखितानि चाक्षराणि यस्मिंस्तस्य भावस्तत्त्वं च, अकान्तिः। एवमस्य दोषस्याधारप्रयुक्तत्वेनाधेयप्रयुक्तत्वेन च द्वैविध्यं दर्शितम्।

व्याघातमाह — **पूर्वेणे**त्यादि। पूर्वेणार्थेनोत्तरस्यानुपपत्तिर्विरोधः, व्याघातः, यथा 'प्रणम्याज्ञापयती'ति। इह हि प्रणामाज्ञापनयोर्विरोधः प्रतीतः।

पुनरुक्तमाह — **उक्तस्ये**त्यादि। तद्यथा — पूज्यो मान्य इत्यादिलेखनम्।

अपशब्दं व्याचष्टे — **लिङ्गे**त्यादि। स्त्रीलिङ्गे प्रयोक्तव्ये पुन्नपुंसकप्रयोगो लिङ्गस्यान्यथाप्रयोगः, एकवचने द्विबहुवचनप्रयोगो वचनस्यान्यथाप्रयोगः, वर्तमाने भूतभविष्यत्प्रयोगः कालस्यान्यथाप्रयोगः, कर्मकारके कर्तृकरणादिकारकप्रयोगः कारकस्यान्यथाप्रयोगः। लिङ्गादीनामिवज्जातीयोऽन्यथाप्रयोगोऽपशब्द इत्युच्यते।

सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः,
आदितः एकत्रिंशः ॥

संप्लवमाह—**अवर्ग** इति । वर्गो यतिश्छेद इति पर्यायाः, अवर्गे वर्गायोग्ये वर्गकरणं, वर्गे वर्गयोग्ये अवर्गक्रिया च इति द्वयं, गुणविपर्यासः गुणानामर्थक्रमादिलेखगुणानां वैपरीत्यं च, संप्लवो नाम नाम्ना भवति ।

अध्यायान्ते श्लोकमाह—**सर्वे**त्यादि । कौटल्येन, सर्वशास्त्राणि बार्हस्पत्यादीनि, अनुक्रम्य ज्ञात्वा, प्रयोगमुपलभ्य च शास्त्रानुष्ठानं दृष्ट्वा च, नरेन्द्रार्थे राज्ञः कृते प्रयोजनाय, शासनस्य विधिः, कृत उपदिष्टः । शास्त्रलोकदृष्टस्यापि सतः शासनविधेरिह कौटल्यकृतत्ववचनं कौटल्येन कार्त्स्न्यसौष्ठवातिशययोगसम्पादनादिति बोद्धव्यम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
दशमोऽध्यायः शासनाधिकारः,
आदित एकत्रिंशः ॥

२९. प्रक. कोशप्रवेश्यरत्नपरीक्षा।

कोशाध्यक्षः कोशप्रवेश्यं रत्नं सारं फल्गु कुप्यं वा तज्जातकरणाधिष्ठितः प्रतिगृह्णीयात् ।

ताम्रपर्णिकं, पाण्ड्यकवाटकं, पाशिक्यं, कौलेयं, चौर्णेयं, माहेन्द्रं, कार्दमिकं, स्रौतसीयं, ह्रादीयं, हैमवतं च मौक्तिकम् ।

कोशप्रवेश्यरत्नपरीक्षेति सूत्रम् । कोशो भाण्डागारं तत्प्रवेशनार्हाणां रत्नानां माणिक्यमुक्ताप्रवालादीनां, रत्नग्रहणेन संग्राह्यद्रव्योपलक्षणात् सारफल्गुकुप्यानां च, परीक्षात्रोपदिश्यत इति सूत्रार्थः।

'कोशपूर्वाः सर्वारम्भाः' इति प्रक्रान्तायाः कोशप्रकृतेः समाहर्तृसन्निधातृव्यापारैरुत्पादनं रक्षणं च प्रागभिहितं, स्वरूपलक्षणं त्वनुक्तमिदानीमभिधीयत इति सङ्गतिः ।

कोशाध्यक्ष इति । कोशाध्यक्षः भाण्डागाराधिकृतः, कोशप्रवेश्यं रत्नं मणिमुक्तादिकं, सारं चन्दनागुरुप्रभृतिकं, फल्गु पट्टदुकूलजातीयं, कुप्यं कुप्याध्यक्षप्रकरणोक्तं सारदारुवेणुवल्कादिकम् आयुधागाराध्यक्षप्रकरणोक्तं यन्त्रायुधावरणादिकं च, वाशब्दः समुच्चये, तज्जातकरणाधिष्ठितः तेषु रत्नादिषु जातास्तज्जातास्तत्सम्बद्धव्यवहारैकवृत्तय इत्यर्थः तज्जातैः करणैः कायस्थैश्च अधिष्ठितः समन्वितः सन्, प्रतिगृह्णीयात् ।

अभ्यर्हितत्वान्मौक्तिकस्य परीक्षां प्रथममाह — **ताम्रपर्णिक**मिति । मौक्तिकं, ताम्रपर्णिकं ताम्रपर्णी नाम पाण्ड्येषु प्रसिद्धा नदी तस्याः समुद्रसङ्गमप्रदेशे समुत्पन्नं, पाण्ड्यकवाटकं मलयकोटिपर्वतोत्पन्नं, पाशिक्यं पाटलिपुत्रान्तिकगतायां पाशिकाख्यायां नद्यामुत्पन्नं, कौलेयं सिंहलद्वीपे मयूरग्रामे कुला नाम नदी तस्यामुत्पन्नं, चौर्णेयं केरलेषु मुरचिनामकपत्तनसमीपे चूर्णी नाम नदी तस्यामुत्पन्नं, माहेन्द्रं महेन्द्रपर्वताभ्यर्णाम्भोधिसम्भवं, कार्दमिकं कर्दमा नाम पारसीकेषु नदी तस्यामुत्पन्नं, स्रौतसीयं बर्बरकूले स्रौतसी नाम नदी तस्यामुत्पन्नं, ह्रादीयं बर्बरकूले समुद्रैकदेशे श्रीघण्टो नाम ह्रदः तस्मिन्नुत्पन्नं, हैमवतं च हिमालयसम्भवं च, भवति । इत्थं मौक्तिकस्योत्पत्तिक्षेत्राणि दश भवन्ति ।

शङ्खः शुक्तिः प्रकीर्णकं च योनयः ।

मसूरकं त्रिपुटकं कूर्मकमर्धचन्द्रकं कञ्चुकितं यमकं कर्तकं खरकं सिक्थकं कामण्डलुकं श्यावं नीलं दुर्विद्धं चाप्रशस्तम् ।

स्थूलं वृत्तं निस्तलं भ्राजिष्णु श्वेतं गुरु स्निग्धं देशविद्धं च प्रशस्तम् ।

शीर्षकमुपशीर्षकं प्रकाण्डकमवघाटकं तरलप्रतिबन्धं चेति यष्टि-प्रभेदाः ।

मौक्तिकस्य योनीस्तिस्र आह— **शङ्ख** इत्यादि । शङ्खः शुक्तिश्च जलजौ प्रसिद्धौ । प्रकीर्णकं गजकुम्भादिकम् । आहुश्च—

"करका वारिधाराश्च मलयाचन्दनोदकम् ।
शङ्खशुक्तिनिपीतं यन्मौक्तिकं तत् प्रजायते ॥"
"सूकरमृगेन्द्रदंष्ट्रोद्भवानि करिकुम्भजातानि ।
वंशाभोगभुजङ्गोत्तमाङ्गजानि प्रकीर्णानि ॥"

इति ।

अथ मौक्तिकस्य त्रयोदश दोषानाह— **मसूरकमिति** । मसूरकं तदाख्यधान्यविशेषाकारं, त्रिपुटकं तदाख्यधान्याकारं, कूर्मकं तदाकारम्, अर्धचन्द्रकम् अर्धचन्द्राकृति, कञ्चुकितं पटलितं, यमकं युग्मकं, कर्तकं छिन्नकं, खरकम् अश्लक्ष्णं, सिक्थकं सिक्थाकारबिन्दुयुक्तं, कामण्डलुकं कमण्डल्वाकारं, श्यावं कपिशवर्णं, नीलं नीलवर्णं, दुर्विद्धम् अस्थानविद्धम्, ईदृशं मौक्तिकम् अप्रशस्तम् । गुणात् प्राग् दोषवचनं दुष्टस्यात्यन्तानुपादेयत्वद्योतनार्थम् ।

मौक्तिकस्याष्टौ गुणानाह— **स्थूलमिति** । स्थूलं पृथु, वृत्तं चारुपरिमण्डलं, निस्तलं तलरहितं मसृणभूम्यनवस्थायि, भ्राजिष्णु दीप्तिमत्, श्वेतं धवलं, गुरु अलघु, स्निग्धम् अरूक्षं, देशविद्धं च यथास्थानविद्धं च, मौक्तिकं प्रशस्तम् । एषु यस्यकस्यचित् पूर्वोक्तदोषाभावरूपतया सिद्धस्यापीह शब्दतो ग्रहणं स्थूलत्वादिनिर्विशेषं गुणत्वं द्योतयितुम् ।

अथ पञ्च यष्टिभेदानाह— **शीर्षकमिति** । मौक्तिकं महदेकं मध्ये पार्श्वयोस्तु सर्वाणि तनूनि समानि यस्याः सा यष्टिः शीर्षकमित्युच्यते । उपशीर्षकं नाम महदेकं मौक्तिकं मध्ये तत्पार्श्वयोस्तु सममल्पपरिमाणमेकैकमित्येवंक्रमेणानेकैस्त्रिकैः समैर्ग्रथिता यष्टिः । प्रधानमेकं मध्ये तत्पार्श्वयोर्द्वे द्वे

यष्टीनामष्टसहस्रमिन्द्रच्छन्दः । ततोऽर्धं विजयच्छन्दः । शतं देवच्छन्दः । चतुष्षष्टिरर्धहारः । चतुष्पञ्चाशद् रश्मिकलापः । द्वात्रिंशद् गुच्छः । सप्तविंशतिर्नक्षत्रमाला । चतुर्विंशतिरर्धगुच्छः । विंशतिर्माणवकः । ततोऽर्धमर्धमाणवकः । एत एव मणिमध्यास्तन्माणवका भवन्ति । एकशीर्षकः शुद्धो हारः । तद्वच्छेषाः । मणिमध्योऽर्धमाणव-

इत्येवंक्रमेणानेकैः पञ्चकैर्ग्रथिता यष्टिः प्रकाण्डकम् । प्रधानमेकं महन्मौक्तिकं मध्ये कृत्वा पार्श्वयोः क्रमकृशोत्तरोत्तरमौक्तिकैर्ग्रथिता यष्टिरवघाटकाख्या । तरलप्रतिबन्धं नाम समप्रमाणमौक्तिकगुम्फिता यष्टिः । चशब्दः समुच्चये । इति यष्टिप्रभेदाः यष्टीनां सराणां प्रभेदाः ।

शीर्षकादीनां पञ्चानां यष्टीनां प्रत्येकं संख्यानियमप्रयुक्तानेकादश भेदानाह— **यष्टीनामिति** । यष्टीनां शीर्षकादिलक्षणानामुक्तानाम्, अष्टसहस्रम् अष्टोत्तरं सहस्रम्, इन्द्रच्छन्दः तदाख्यं भूषणमुच्यते, शीर्षकेन्द्रच्छन्द उपशीर्षकेन्द्रच्छन्द इत्यादिप्रकारैर्व्यपदिश्यत इत्यर्थः । एवमुत्तरत्रापि बोद्धव्यम् । ततोऽर्धं चतुरुत्तरा पञ्चशती, विजयच्छन्दः । शतं देवच्छन्दः शतयष्टिकं देवच्छन्दाख्यम् । एकाशीत्युत्तरैर्यष्टीनामष्टभिः शतैर्युक्तो देवच्छन्द इति क्वचिद् व्याख्यातम् । **चतुष्षष्टिरित्यादिकम् अर्धमाणवक** इत्येवमन्तमुत्तानार्थम् । **एत एवेति** । उक्ता एवेन्द्रच्छन्दादयो, मणिमध्या माणिक्यमध्याः सन्तः, तन्माणवका भवन्ति इन्द्रच्छन्दाद्युपपदमाणवकाः भवन्ति, इन्द्रच्छन्दमाणवको विजयच्छन्दमाणवक इत्येवमादिसंज्ञायुक्ता भवन्तीत्यर्थः । **एके-त्यादि** । एकशीर्षकः शुद्धो हारः एकानि केवलान्युपशीर्षकादिलक्षणास्पृष्टानि शीर्षकाणि शीर्षकाख्याः यथोक्तसंख्या यष्टयो यस्य स तथाभूतः अर्थाद् इन्द्रच्छन्दादिर्विशेष्यः शुद्धहाराख्यो भवति, इन्द्रच्छन्दशीर्षकशुद्धहारो विजयच्छन्दशीर्षकशुद्धहारो देवच्छन्दशीर्षकशुद्धहारोऽर्धहारशीर्षकशुद्धहारो रश्मिकलापशीर्षकशुद्धहार इत्यादिरीत्या व्यवहार्यो भवतीत्यर्थः । शीर्षकविषयेऽभिहितं शुद्धहारव्यपदेशमुपशीर्षकादावतिदिशति — **तद्वदिति** । तद्वद् शीर्षकवत् , शेषा उपशीर्षकादयः, बोद्धव्या इति शेषः । एतदुक्तं भवति— एकशीर्षकवद् एकोपशीर्षक एकप्रकाण्डक एकावघाटक एकतरलप्रतिबन्ध इत्यपरे चत्वारः शुद्धहारा इन्द्रच्छन्दोपशीर्षकशुद्धहारो विजयच्छन्दोपशीर्षकशुद्धहार इत्यादिक्रमेण प्रत्येकमुपगृहीतेन्द्रच्छन्दविजयच्छन्दादिसंज्ञाका ऊह-

कास्त्रिफलकः फलकहारः पञ्चफलको वा । सूत्रमेकावली शुद्धा । सैव मणिमध्या यष्टिः । हेममणिचित्रा रत्नावली । हेममणिमुक्तान्तरोऽपवर्तकः । सुवर्णसूत्रान्तरं सोपानकम् । मणिमध्यं वा मणिसोपानकम् ।

तेन शिरोहस्तपादकटीकलापजालकविकल्पा व्याख्याताः ।

मणिः कौटो मालेयकः पारसमुद्रकश्च ।

नीया इति। **मणिमध्य** इति। मणिर्मरतकादिर्मध्ये यस्य स मणिमध्यः, अर्ध माणवकः पूर्वोक्तो दशयष्टिः, त्रिफलकः पञ्चफलको वा त्रिभिः पञ्चभिर्वा स्वर्णफलकैर्युक्तो भवन्, फलकहारः फलकहारसंज्ञो भवति, स च द्विप्रकारः। **सूत्रमिति** । शुद्धा मणिहीना, एकावली एकः सरः शीर्षकाद्यन्यतमलक्षणः, सूत्रं तदाख्या भवति । **सैवेति** । सैव एकावल्येव, मणिमध्या सती, यष्टिः यष्टिसंज्ञा। **हेमेत्यादि**। हेममणिचित्रा हेममयैर्मणिभिराहितवैचित्र्या यष्टिः, रत्नावली तदाख्या। **हेममणिमुक्तेत्यादि** । हेममणिमुक्तान्तरः हेममणिमुक्ताः पूर्वं हेमगुलिका ततः पद्मरागादिरत्नं ततो मौक्तिकमित्येवंक्रमगुम्फिताः अन्तरे मध्ये यस्य स तथाभूतः, अपवर्तकः तदाख्यः। **सुवर्णेत्यादि**। सुवर्णसूत्रान्तरं सुवर्णसूत्रम् अप्रत्युप्तमणिकं केवलस्वर्णफलकम् अन्तरे मध्ये यस्य तत् तथाभूतं, सोपानकं तत्संज्ञम् । **मणीत्यादि** । मणिमध्यं मणिसोपानकं मणियुक्तं प्रत्युप्तमणिकं मध्यं मध्यसुवर्णफलकं यस्य तत् तथाभूतं मणिसोपानकाख्यम् ।

तेनेति । तेन यथोक्तेन शीर्षकादिकण्ठाभरणप्रकारेण, शिरोहस्तपादकटीकलापजालकविकल्पाः शिरआदिचतुष्टयस्य कलापजालकविकल्पाः कलापः सरः जालकं सरसमूहः तयोर्विकल्पाः प्रकाराः, व्याख्याताः उक्तप्राया इत्यर्थः। अत्रायं सङ्ग्रहश्लोकः श्रीभट्टस्वामिनः —

"अष्टौ गुणास्त्रिधा योनिर्दश सम्पत्तिभूमयः ।
त्रयोदशैव मुक्तानां दोषा हाराश्च विंशतिः ॥" इति ।

इति मौक्तिकप्रकरणम् ।

अथ मणीनां गुणादीन् वक्तुमुपक्रमते— **मणिरिति** । मणिः, कौटः कोटिर्मलयसागरान्तरं तत्रभवः, मलयैकदेशः कर्णीवनाख्यो माला तस्यां जातो मालेयकः, पारसमुद्रः सिंहलद्वीपस्थो रोहणाद्रिः तज्जः पारसमुद्रकः, इति

सौगन्धिकः पद्मरागः अनवद्यरागः पारिजातपुष्पकः बालसूर्यकः।

वैडूर्यः — उत्पलवर्णः शिरीषपुष्पक उदकवर्णो वंशरागः शुकपत्रवर्णः पुष्यरागो गोमूत्रको गोमेदकः।

नीलावलीय इन्द्रनीलः कलायपुष्पको महानीलो जाम्बवाभो जीमूतप्रभो नन्दकः स्रवन्मध्यः।

शुद्धस्फटिकः मूलाटवर्णः शीतवृष्टिः सूर्यकान्तश्चेति मणयः।

त्रिविध इत्यर्थः। एवं च मणीनां योनयस्तिस्र इत्युक्तं भवति। प्रायिकं चैतत् स्फटिकवैदूर्यमरतकादीनां विन्ध्यविदूरदर्दरादिषूत्पत्तिदर्शनादित्याहुः। श्लोकं चोदाहरन्ति —

"विन्ध्यो विदूरशैलो मलयो विन्ध्योपलक्षणोद्देशः।
स्त्रीराज्यं चेति पुनस्तस्याकरभूमयोऽभिहिताः॥" इति।

मणिषु पञ्चप्रकारां माणिक्यजातिमाह — **सौगन्धिक** इति। सौगन्धिकः तदाख्यकुसुमवद् ईषन्नैल्यरूषितरक्तवर्णः, पद्मरागः पद्मवर्णः, अनवद्यरागः अनवद्यं कुङ्कुमं तद्वर्णः, पारिजातपुष्पकः पारिजातकुसुमवर्णः, बालसूर्यकः उदयमानसूर्यारुणः।

अष्टप्रकारां वैदूर्यजातिमाह — **वैडूर्य** इति। वैडूर्य इत्यधिकारः। उत्पलवर्णः कोकनदशोणः, शिरीषपुष्पकः शिरीषपुष्पवर्णः, उदकवर्णः उदकवत् स्वच्छवर्णः, वंशरागः वेणुपत्रवर्णः, शुकपत्रवर्णः शुकपक्षच्छविः, पुष्यरागो हरिद्रापिञ्जर इति स्वामी, गोमूत्रकः गोमूत्रच्छायः, गोमेदकः गोमेदो गोरोचना तद्वर्णः।

अष्टविधामिन्द्रनीलजातिमाह —**नीले**त्यादि। नीलावलीयः शुक्ल एव नीलराजितरञ्जितः, इन्द्रनीलः मयूरबर्हवर्णः, कलायपुष्पकः कलायो धान्यभेदः तत्पुष्पसमच्छविः, महानीलः भ्रमरवर्णः, जाम्बवाभः जम्बूफलवर्णः, जीमूतप्रभः मेघवर्णः, नन्दकः अन्तःशुक्लो बहिर्नीलः, स्रवन्मध्यः स्रवज्जलाकाररश्मिप्रसरः।

चतुर्विधां स्फटिकजातिमाह—**शुद्धे**त्यादि। शुद्धस्फटिकः अत्यन्तशुक्लः, मूलाटवर्णः उद्धृतस्नेहदधिच्छायः, शीतवृष्टिः चन्द्रकान्तः यश्चन्द्रकिरणस्पर्शे द्रवति, सूर्यकान्तः यः सूर्यकरसम्पर्केऽग्निं वमति। चशब्दः समुच्चये। इति मणयः मणिभेदाः।

षडश्रश्चतुरश्रो वृत्तो वा, तीव्ररागः संस्थानवानच्छः स्निग्धो गुरुरर्चिष्मानन्तर्गतप्रभः प्रभानुलेपी चेति मणिगुणाः ।

मन्दरागप्रभः सशर्करः पुष्पच्छिद्रः खण्डो दुर्विद्धो लेखाकीर्ण इति दोषाः ।

आर्याश्चात्राचार्यैरुदाहृताः—

"शशरुधिरजपाबन्धूकसन्निभाः पारिजातपुष्पाभाः ।
तरुणतरणित्विषो वा त एव खलु पद्मरागाः स्युः ॥
शुकबर्हवारिसैन्धवशिरीषकुसुमप्रभं हरिद्राभम् ।
मार्जारनयननैल्यं वंशच्छदकान्ति वैदूर्यम् ॥
बर्हिणचन्द्रकवर्णा भ्रमराभाः पक्वजम्ब्वाभाः ।
सूर्यांशुतापयोगात् कृच्छ्रालोका महानीलाः ॥
मन्दरमथनायासितवासुकिजविषोद्भवा मरतकस्य ।
प्रथमोत्पत्तिः कथिता केचिद् भुजगाण्डजेति जगुः ॥
गरुडच्छदप्रकाशं कदलीदलवंशपत्रवर्णं वा ।
परिपक्वकलमकणिशानुकारि वा मरतकं गदितम् ॥"

इति ।

केचित् पुनः सौगन्धिकशब्दस्य माणिक्यपर्यायतां वदन्तः सौगन्धिक इति वैदूर्याधिकारवद् माणिक्याधिकारस्तस्य प्रभेदाः पद्मरागादयश्चत्वार इति, उत्पलवर्णादयो नीलावलीयान्ता वैदूर्यस्य नव प्रभेदा इति, इन्द्रनील इत्यधिकारः कलायपुष्पकादयः स्रवन्मध्यान्तास्तस्य षट् प्रभेदा इति, शुद्धस्फटिकादयश्चत्वारः स्फटिकप्रभेदा इति च व्याचक्षत इत्याह स्वामी ।

अथैकादश मणिगुणानाह—**षडश्र** इति । षडश्रः षट्कोटिः, चतुरश्रश्चतुष्कोटिः, वृत्तः चारुपरिमण्डलः, तीव्ररागः अत्यन्तभास्वरः, संस्थानवान् भूषणप्रतिवापयोग्यावयवसन्निवेशः, अच्छः निर्मलः, स्निग्धः मसृणः, गुरुः भारवान्, अर्चिष्मान् दीप्तिमान्, अन्तर्गतप्रभः मध्यभागेऽपि प्रभातरलः, प्रभया स्वीयया सन्निकृष्टमनुलिम्पतीति प्रभानुलेपी, चेति समुच्चये ।

सप्त मणिदोषानाह—**मन्देत्यादि** । मन्दरागप्रभः मन्दरागो वर्णरहितः मन्दप्रभो द्युतिहीनः, सशर्करः पुलकितः, पुष्पच्छिद्रः बिन्दुगर्भः, खण्डः दीर्णः, दुर्विद्धः अस्थानविद्धः, लेखाकीर्णः राजियुक्तः, इति दोषाः । अत्र भट्टस्वामिना बार्हस्पत्यौ द्वौ श्लोकावुदाहृतौ—

विमलकः सस्यकोऽञ्जनमूलकः पित्तकः सुलभको लोहिताक्षो मृगाश्मको ज्योतीरसको मैलेयक आहिच्छत्रकः कूर्पः प्रतिकूर्पः सुगन्धिकूर्पः क्षीरपकः शुक्तिचूर्णकः शिलाप्रवालकः पुलकः शुक्रपुलकः इत्यन्तरजातयः।

शेषाः काचमणयः।

सभाराष्ट्रकं मध्यमराष्ट्रकं कास्तीरराष्ट्रकं श्रीकटनकं मणिमन्तकमिन्द्रवानकं च वज्रम्।

"पुष्पच्छिद्रोऽथ दुर्विद्धः शर्करानुगतस्तथा।
मन्दरागप्रभश्चैव जातिभेदाः प्रकीर्तिताः॥
प्रान्तश्च वामवृत्तश्च वलिताश्यः (क) शान्वितः।
कुण्ठिकश्च विशीर्णश्च नहि शास्त्रे प्रशस्यते॥" इति।

अथावान्तरजातिमणीनाह—विमलक इति। विमलकः श्वेतहरितः, सस्यको नीलः, अञ्जनमूलकः नीलश्यामः, पित्तका गोपित्तवर्णः, सुलभकः शुक्लः, लोहिताक्षः पर्यन्तरक्तः कृष्णमध्यः, मृगाश्मकः सितासितः, ज्योतीरसकः शुक्ललोहितः, मैलेयकः हिङ्गुलकच्छायः, आहिच्छत्रकः मन्दरागः, कूर्पः शर्करिलः, प्रतिकूर्पः सिक्थकरुचिः, सुगन्धिकूर्पः मुद्गवर्णः, क्षीरपको दुग्धवर्णः, शुक्तिचूर्णको नैकवर्णः, शिलाप्रवालकः प्रवालवर्णः, पुलकः कृष्णगर्भः, शुक्रपुलकः शुक्लगर्भः, इत्यन्तरजातयः अनेन प्रकारेणाष्टादशावान्तरजातिमणयो बोद्धव्याः। त एते प्रशस्ताः।

अप्रशस्तानाह—शेषा इति। शेषाः उक्तेभ्योऽन्ये, काचमणयः अधममणयः। अत्र सङ्ग्रहश्लोकं पठन्ति—

"पञ्चविंशतिभेदानां गुणास्त्वेकादश स्मृताः।
सप्त दोषा मणीनां तु दशाष्टौ च विजातयः॥" इति।

अथ वज्रमणेराकरयोनिवर्णगुणदोषा वर्ण्यन्ते। तत्राकरानाह—सभेत्यादि। वज्रं हीरः, सभाराष्ट्रकं वैदर्भकं, मध्यमराष्ट्रकं कोसलोत्पन्नं, कास्तीरराष्ट्रकं कास्तीरराष्ट्रजं, श्रीकटनकं श्रीकटनपर्वतभवं, मणिमन्तकम् उत्तरापथवर्तिमणिमन्तकाख्यपर्वतजम्, इन्द्रवानकं कालिङ्गकं, चः समुच्चये। एवं सभाराष्ट्रादयो वज्रस्य षडाकरा उक्ताः। एतच्चोपलक्षणमन्यत्रापि वज्रस्योत्पत्तिदर्शनादिति ज्ञेयम्।

खनिः स्रोतः प्रकीर्णकं च योनयः ।

मार्जाराक्षकं च शिरीषपुष्पकं गोमूत्रकं गोमेदकं शुद्धस्फटिकं मूलाटीपुष्पकवर्णं मणिवर्णानामन्यतमवर्णमिति वज्रवर्णाः ।

स्थूलं स्निग्धं गुरु प्रहारसहं समकोटिकं भाजनलेखि तर्कुभ्रामि भ्राजिष्णु च प्रशस्तम् ।

नष्टकोणं निरश्रि पार्श्वापवृत्तं च अप्रशस्तम् ।

वज्रस्य त्रिविधां योनिमाह — **खनिरिति** । खनिः खन्यमानो भूप्रदेशविशेषः, स्रोतः जलप्रवाहविशेषः, प्रकीर्णकं गजदन्तमूलादि ।

वज्रस्य वर्णानाह — **मार्जारेत्यादि** । मार्जाराक्षकं मार्जारनेत्रच्छायम् । शेषं व्याख्यातचरम् । मार्जारनेत्रादिपुष्पकान्तसवर्णत्वं प्रायिकत्वात् पृथगभिधाय विरलदर्शनं मण्यन्तरसाधारणं वर्णान्तरमतिदिशति — **मणिवर्णानामन्यतमवर्णमिति** । इति वज्रवर्णाः ।

अष्टौ गुणानाह — **स्थूलमिति** । स्थूलादित्रिकमवगतार्थम् । प्रहारसहं शिलापुत्रकप्रहारेणाप्यभेद्यं, समकोटिकं समास्तुल्याः कोटयो यस्य तत्, भाजनलेखि सोदकमसृणकांस्यपात्रीनिवेशितं वज्रं परिचाल्यमानं सत् पात्रे लेखोत्पादकं, तर्कुभ्रामि तर्कुभ्रमियन्त्रं तद्वद् भ्रमणशीलं, भ्राजिष्णु अतिमात्रदीप्तिकं, चः समुच्चये, प्रशस्तम् उत्तमं वज्रम् । श्लोकाश्चात्र भवन्ति —

"तर्कुभ्रामि स्निग्धं समकोटि महद् गुरु प्रहारसहम् ।
तमति च भाजनलेखि प्रशस्ततमं वज्रमुद्दिष्टम् ॥
क्षिप्तमग्नौ च यद् वज्रं वर्णान्यत्वं न गच्छति ।
शाणे वा घृष्यमाणं च निकषे वा विरज्यते ॥
वृत्तिकैराहतं यच्च विपत्तिं नैव गच्छति ।
रागवर्णसमायुक्तं बही रश्मिसमन्वितम् ॥
गुरुस्नेहयुतं चैव गुणैरेभिः समन्वितम् ।
एतद् विशिष्टं वज्राणां रत्नाधिपतिकीर्तितम् ॥
नष्टकोणं निरश्रीकं पार्श्वयातं च वर्जयेत् ।" इति ।

अधमं त्रिविधमाह—**नष्टेत्यादि** । नष्टकोणं शिखरशून्यं, निरश्रि अश्रिरहितं, पार्श्वापवृत्तम् एकपार्श्वनिस्सृतम् । अन्ये तु दोषाः यथोक्तगुणवैपरीत्यात्मानः स्वयमूहनीयाः । यदाहुः—

प्रवालकम् आलकन्दकं वैवर्णिकं च रक्तं पद्मरागं च करटगर्भिणिकावर्जमिति ।

चन्दनं—सातनं रक्तं भूमिगन्धि । गोशीर्षकं कालताम्रं मत्स्यगन्धि । हरिचन्दनं शुकपत्रवर्णमाम्रगन्धि । तार्णसं च । ग्रामेरुकं रक्तं रक्तकालं वा बस्तमूत्रगन्धि । दैवसभेयं रक्तं पद्मगन्धि । जावकं च ।

"विरूपान् मन्दरागांश्च निष्प्रभान् क्रूरदर्शनान् ।
दग्धांश्चोद्गारिणश्चैव वज्राञ्छत्रुषु निक्षिपेत् ॥"

इति ।

इति वज्रनिरूपणम् ।

अथ प्रवालमाह—**प्रवालकमिति** । प्रवालकम्, आलकन्दकम् अलकन्दो नाम बर्बरकूले समुद्रैकदेशस्तत्र भवं, वैवर्णिकं विवर्णो नाम यवनद्वीपे समुद्रैकदेशस्तत्रोत्पन्नं च, इति द्वियोनिकम् । रक्तं पद्मरागं चेति द्विवर्णकम् । करटगर्भिणिकावर्जमिति द्विदोषत्ववचनं, करटं क्रिमिजग्धं गर्भिणिकां स्थूलमध्यं च वर्जयित्वान्यत् प्रवालकमुपादेयमित्यर्थः । इतिशब्दः समाप्तौ, रत्नपरीक्षा समाप्तेत्यर्थः ।

इति प्रवालनिरूपणम् ।

अथ सारेषु निरूपणीयेषु प्रथमं सारमुख्यं चन्दनमाह—**चन्दनमिति** । चन्दनम् अधिक्रियत इत्यर्थः । तस्य सातनादय उत्पत्तिभूमयः षोडश, रक्तादयो वर्णा नव, भूमिगन्धादयो गन्धाः षट्, लघुत्वादयो गुणा एकादश । त एतेऽभिधीयन्ते । **सातनमिति** । सातनं सातनदेशभवं, रक्तं रक्तवर्णं, भूमिगन्धि नवसिक्तभूसमानगन्धम् । गोशीर्षकं तद्देशजं, कालताम्रं कृष्णशोणं, मत्स्यगन्धि मत्स्यतुल्यगन्धं, रक्तकरवीरतुल्यगन्धीति स्वामी । हरिचन्दनं हरिदेशजं चन्दनं, शुकपत्रवर्णम्, आम्रगन्धि चूतफलतुल्यगन्धि । तार्णसं च तृणसाख्यनदीनिकटभवं चन्दनं, चकारात् शुकपत्रवर्णम् आम्रगन्धि च । ग्रामेरुकं ग्रामेरुप्रभवं, रक्तं रक्तकालं वा, बस्तमूत्रगन्धि अजमूत्रगन्धि, बस्तशब्दः कस्तूरीमृगवचन इत्यन्ये । दैवसभेयं देवसभायां भवं, रक्तं, पद्मगन्धि । सातनादयस्त्रयोदश मलयैकदेशाः । जावकं च जावक-

जोङ्गकं रक्तं रक्तकालं वा स्निग्धम्। तौरूपं च। मालेयकं पाण्डुरक्तम्। कुचन्दनं कालवर्णकं गोमूत्रगन्धि। कालपर्वतकं रूक्षमगुरुकालं रक्तं रक्तकालं वा। कोशकारपर्वतकं कालं कालचित्रं वा। शीतोदकीयं पद्माभं कालस्निग्धं वा। नागपर्वतकं रूक्षं शैवलवर्णं वा। शाकलं कपिलमिति।

लघु स्निग्धमश्यानं सर्पिःस्नेहलेपि गन्धसुखं त्वगनुसार्यनुल्बणमविराग्युष्णसहं दाहग्राहि सुखस्पर्शनमिति चन्दनगुणाः।

देशभवं च, रक्तं पद्मगन्धि चेत्यनुषज्यते। जोङ्गकं, रक्तं रक्तकालं वा, स्निग्धं स्नेहगुणयुक्तं, गन्धान्तरानुक्त्यात्रापि पद्मगन्धीति सम्बध्यते। तौरूपं च, जोङ्गकमिव रक्तं रक्तकालं वा स्निग्धं पद्मगन्धि चेत्यर्थः। जावकादित्रिकं कामरूपजं बोद्धव्यम्। मालेयकं, पाण्डुरक्तं, पूर्ववत् पद्मगन्धि च। एवञ्च दैवसभेयादिमालेयकान्तस्य चकस्य पद्मगन्धित्वमुक्तं भवति। कुचन्दनं, कालवर्णकं कृष्णं, गोमूत्रगन्धि गोमूत्रं हि परिणामे सुगन्धि, अपरे तु गोमूत्रं नीलोत्पलमिति सम्प्रदाय इत्याहुः। कालपर्वतकं तद्देशभवं, रूक्षं खरम्, अगुरुकालम् अगुरुवत् कृष्णं, रक्तं, रक्तकालं वा कृष्णारुणं वा। पूर्वोक्तन्यायेनात्र गोमूत्रगन्धीति सम्बन्धनीयम्। कतिपयादर्शेषु 'कुचन्दनं कालरूक्षमगुरुकालं रक्तं रक्तकालं वा कालपर्वतकमनवद्यवर्णं वा' इति पाठो दृश्यते स गन्धानुक्तेरशुद्धः प्रतिभाति। तत्रानवद्यवर्णमित्यस्य कुङ्कुमवर्णमित्यर्थः, शेषं तु सुबोधम्। कोशकारपर्वतकं तदाख्यदेशभवं, कालं, कालचित्रं वा कृष्णकर्बुरं वा। शीतोदकीयं शीतोदकदेशभवं, पद्माभं पद्मवर्णं, कालस्निग्धं वा। नागपर्वतकं तदाख्यदेशजं, रूक्षं खरं, शैवलवर्णं जलनीलीवर्णम्। शाकलं शाकलदेशोद्भवं, कपिलं कडारवर्णम्। इह कालपर्वतकादीनां शाकलान्तानां कुचन्दनवद् गोमूत्रगन्धित्वं द्रष्टव्यम्।

एवं जातिवर्णगन्धा उक्ताः। गुणानाह—लघ्वित्यादि। लघु अभारिकं, स्निग्धं मसृणम्, अश्यानं चिरशोषि, सर्पिःस्नेहलेपि घृतमिव देहं स्नेहेन लिम्पति यत् तथाभूतं, गन्धसुखं गन्धेन मोदजनकं, त्वगनुसारि त्वचमनुप्रविश्य सुखकरम्, अनुल्बणं सूक्ष्मत्वादस्फुटम्, अविरागि द्रव्यान्तरमिश्रणे स्वेदाद्युपघाते चाविकृतवर्णगन्धम्, उष्णसहं स्वलिप्ताङ्गस्योष्णसंवेदनप्रतिबन्धि, दाहग्राहि सन्तापहरं, सुखस्पर्शनं स्पर्शे नवनीतवत् सुखाव-

अगुरु—जोङ्गकं कालं कालचित्रं मण्डलचित्रं वा। श्यामं दोङ्गकम्। पारसमुद्रकं चित्ररूपम्। उशीरगन्धि नवमालिकागन्धि वेति।

गुरु स्निग्धं पेशलगन्धि निर्हारि अग्निसहमसंप्लुतधूमं समगन्धं विमर्दसहमित्यगुरुगुणाः।

तैलपर्णिकं—अशोकग्रामिकं मांसवर्णं पद्मगन्धि। जोङ्गकं रक्तपीतकमुत्पलगन्धि गोमूत्रगन्धि वा। ग्रामेरुकं स्निग्धं गोमूत्रगन्धि।

हम्। इति चन्दनगुणाः अनेन प्रकारेणैकादश चन्दनस्य गुणा विज्ञेयाः। अत्र सङ्ग्रहश्लोकं पठन्ति—

"षड् गन्धा नवधा वर्णो गुणाश्चैकादश स्मृताः।
चन्दनानां समासेन षोडशोत्पत्तिभूमयः॥" इति।

अथागुरुजातिवर्णगन्धगुणानाह—**अगुर्वित्यादि**। अगुर्वित्यधिकारः। जोङ्गकं तदाख्यमगुरु त्रिविधं, कालं कृष्णं, कालचित्रं कृष्णगौररेखामिश्रं, मण्डलचित्रं कृष्णगौरबिन्दुचित्रमिति स्वामी, वाशब्दः समुच्चये। दोङ्गकं तदाख्यं, श्यामम्। जोङ्गकदोङ्गके कामरूपभवे। पारसमुद्रकं सिंहलद्वीपोत्पन्नं, चित्ररूपं नानावर्णम्। गन्धमाह—**उशीरगन्धि नवमालिकागन्धि वेति**। गन्धद्वैविध्यमनेनोक्तम्।

अगुरुणो जातिवर्णगन्धानुक्त्वा गुणानाह—**गुर्विति**। गुरु भारिकं, स्निग्धम् अपरुषं, पेशलगन्धि हृद्यगन्धं, निर्हारि दूरप्रसृत्वरगन्धम्, अग्निसहम् अग्निना क्षिप्रं न दह्यते, असंप्लुतधूमम् अव्याकुलधूमं, समगन्धं दह्यमानमादिमध्यान्तेष्वेकरूपगन्धं, विमर्दसहं वस्त्रादिनिर्मार्जनेऽप्यक्षीयमाणगन्धमित्यर्थः। इति अगुरुगुणाः। तदेवम्—

"उत्पत्तिभूमयस्तिस्रः कृष्णो वर्णः प्रधानतः।
द्वावेवागुरुणो गन्धौ गुणास्तस्याष्ट कीर्तिताः॥"

इति सङ्ग्रहश्लोकः।

अथ तैलपर्णिकस्य योन्यादिकमाह—**तैलपर्णिकमित्यादि**। तैलपर्णिकमित्यधिकारः। अशोकग्रामिकम् अशोकग्रामे कामरूपवर्तिनि भवं, मांसवर्णं हरिणमांसपेशीवर्णमिति स्वामी, पद्मगन्धि। जोङ्गकं कामरूपस्थे जोङ्गाख्ये प्रदेशे भवं, रक्तपीतकं मनश्शिलावर्णम्, उत्पलगन्धि गोमूत्रगन्धि वा भवति। ग्रामेरुकं कामरूपवर्तिनि ग्रामेरुसंज्ञे ग्रामे भवं, स्निग्धं, गोमूत्रगन्धि,

सौवर्णकुड्यकं रक्तपीतं मातुलुङ्गगन्धि । पूर्णकद्वीपकं पद्मगन्धि नवनीतगन्धि वेति ।

भद्रश्रीयं — पारलौहित्यकं जातीवर्णम् । आन्तरवत्यमुशीरवर्णम् । उभयं कुष्ठगन्धि चेति ।

कालेयकः — स्वर्णभूमिजः स्निग्धपीतकः । औत्तरपर्वतको रक्तपीतकः । इति साराः ।

पिण्डक्वाथधूमसहमविरागि योगानुविधायि च । चन्दनागुरुवच्च तेषां गुणाः ।

जोङ्गकवद् रक्तपीतवर्णम् । सौवर्णकुड्यकं सुवर्णकुड्यो नाम ग्रामः कामरूपगः तत्र जातं, रक्तपीतं, मातुलुङ्गगन्धि । पूर्णकद्वीपकं पूर्णकद्वीपः कामरूपेष्वेव तत्र भवं, पद्मगन्धि, नवनीतगन्धि वा, वर्णस्तु रक्तपीतम् ।

भद्रश्रीयस्य योन्यादिकमाह — भद्रश्रीयमित्यादि । भद्रश्रीयं चन्दनविशेषः । भद्रश्रीयपदार्थे 'केचित् कर्पूरमित्याहुस्तक्कोलमिति चापरे । श्रीवासकं तथा केचित् केचिल्लोहितचन्दनम् ॥' इति विप्रतिपत्तयः स्वामिनोक्ताः । पारलौहित्यकं कामरूपे लौहित्याख्यनदपारभवं, जातीवर्णं जातीकुसुमवर्णम् । आन्तरवत्यं कामरूपेष्वेवान्तरवत्याख्यनदीतीरे जातम्, उशीरवर्णं लामज्जच्छायम् । उभयं पारलौहित्यमान्तरवत्यं, कुष्ठगन्धि च पारिभाव्याख्यौषधगन्धि च । इतिशब्दः [illegible] ।

कालेयकस्य योन्यादिकमाह — कालेयक इति । कालेयको नाम काष्ठविशेषः, स स्वर्णभूमिजः सुवर्णभूमिर्नाम देशस्तत्रोत्पन्नः, स्निग्धपीतकः मसृणः पीतवर्णश्च । औत्तरपर्वतकः हैमवतः, रक्तपीतकः मनश्शिलावर्णः । इति उक्तैः प्रकारैः, साराः चन्दनादिकालेयकान्ताः सारपदार्था निरूपिता इत्यर्थः।

अथ तैलपर्णिकादीनां त्रयाणां गुणमाह—पिण्डेत्यादि। पिण्डक्वाथधूमसहं पिण्डं पेषणादिना पिण्डीकरणं क्वाथम् अग्निना क्वथनं धूमं धूपनं च सहत इति तथाभूतं, पेषणक्वथनधूपनेष्वविनष्टयादिगन्धमित्यर्थः, अविरागि द्रव्यान्तरामिश्रणेन कालान्तरेण वा निर्विकारस्वभावं, योगानुविधायि च गन्धयुक्त्यनुकूलं च। तैलपर्णिकादित्रिकं तु विशेष्यं गम्यम् । उक्ताः पिण्डसहत्वादयो न केवलं तैलपर्णिकादीनां गुणाः, किन्तु चन्दनागुरुवच्च तेषां गुणा भव-

कान्तनावकं प्रैयकं चौत्तरपर्वतकं चर्म । कान्तनावकं मयूरग्रीवाभम् । प्रैयकं नीलपीतश्वेतं लेखाबिन्दुचित्रम् । तदुभयमष्टाङ्गुलायामम् ।

बिसी महाबिसी च द्वादशग्रामीये । अव्यक्तरूपा दुहिलिका चित्रा वा बिसी । परुषा श्वेतप्राया महाबिसी । द्वादशाङ्गुलायाममुभयम् ।

श्यामिका कालिका कदली चन्द्रोत्तरा शाकुला चारोहजाः । कपिला बिन्दुचित्रा वा श्यामिका । कालिका कपिला कपोतवर्णा वा । तदुभयमष्टाङ्गुलायामम् । परुषा कदली हस्तायता । सैव चन्द्रचित्रा

न्तीत्याह — चन्दनागुरुकल्पा तेषां गुणाः इति । चन्दनवद् गुणाः एकादश लघुत्वादयः, अगुरुवद् गुणा अष्टौ गुरुत्वादयः ।

इति सारनिरूपणम् ।

अथ फल्गुषु निरूपणीयेषु प्रथमं पञ्चदशप्रकारा चर्मजातिर्निरूप्यते— कान्तनावकमित्यादिना इति चर्मजातय इत्यन्तेन । तत्रादौ प्रकारद्वयमुद्दिशति — कान्तनावकमिति । कान्तनावकं तदाख्यदेशभवं, प्रैयकं च तदाख्यदेशभवं च, औत्तरपर्वतकं हैमवतं चर्म । एवञ्च कान्तनावकप्रैयकाख्यौ हिमवत एवैकदेशौ बोद्धव्यौ । तत्र कान्तनावकं, मयूरग्रीवाभमित्येकविधम् । प्रैयकं तु, नीलपीतं, श्वेतं, लेखाबिन्दुचित्रं लेखाभिः कृतवैचित्र्यं बिन्दुभिः कृतवैचित्र्यं चेति चतुर्विधम् । तदुभयं कान्तनावकं प्रैयकं च, अष्टाङ्गुलायामम् ।

बिसीति । बिसी महाबिसी च इत्येते चर्मणी, द्वादशग्रामीये हिमालयस्थेषु द्वादशम्लेच्छग्रामेषु भवे । तत्र बिस्याः स्वरूपमाह— अव्यक्तेत्यादि । बिसी, अव्यक्तरूपा सरटविशेषवद् बहुवर्णप्रतिभासयोगादनिर्धारितैकवर्णा, दुहिलिका लोमशा, दुहिलितिकेति क्वापि पाठः, चित्रा वा, भवति । महाबिसी परुषा खरस्पर्शा, श्वेतप्राया धवलवर्णभूयिष्ठा । उभयं बिसी महाबिसीति द्वयं, द्वादशाङ्गुलायामम् ।

आरोहाख्यहिमवत्प्रदेशभवान् श्यामिकाकालिकादीन् पञ्च भेदान् उद्दिशति — श्यामिकेत्यादि । श्यामिका, कपिला कडारवर्णा, बिन्दुचित्रा वा, भवति । कालिका, कपिला, कपोतवर्णा वा, भवति । तदुभयं श्यामिकादिद्वयम् , अष्टाङ्गुलायामम् । कदली, परुषा कर्कशस्पर्शा, हस्तायता चतु-

चन्द्रोत्तरा । कदलीत्रिभागा शाकुला कोठमण्डलचित्रा कृतकर्णिकाजिनचित्रा चेति ।

सामूरं चीनसी सामूली च बाह्लवेयाः । षट्त्रिंशदङ्गुलमञ्जनवर्णं सामूरम् । चीनसी रक्तकाली पाण्डुकाली वा । सामूली गोधूमवर्णेति ।

सातिना नलतूला वृत्तपुच्छा च औद्राः । सातिना कृष्णा । नलतूला नलतूलवर्णा । कपिला वृत्तपुच्छा च । इति चर्मजातयः ।

चर्मणां मृदु स्निग्धं बहुलरोम च श्रेष्ठम् ।

विंशत्यङ्गुलदीर्घा । वर्णस्त्वस्याः कालिकावत् । सैव कदली, चन्द्रचित्रा चन्द्राकारमण्डलयुक्ता, चन्द्रोत्तरा नाम भवति । प्रमाणं त्वस्याः कदलीवत् । शाकुला, कदलीत्रिभागा कदल्यपेक्षया त्रिगुणपरिमाणा त्रिहस्तायामेत्यर्थ इत्येके, कदलीप्रमाणतृतीयांशप्रमाणा अष्टाङ्गुलायतेत्यर्थ इत्यपरे, कोठमण्डलचित्रा रक्तमण्डलयुक्ता, कृतकर्णिकाजिनचित्रा कृतैः स्वभावकृतैः कर्णिकाजिनैश्चर्मग्रन्थिभिः चित्रा जनितशोभा । चशब्दः समुच्चये । इतिशब्द आरोहजसमाप्तौ ।

त्रिप्रकारां बाह्लवेयजातिमाह—सामूरमित्यादि । बाह्लवः हिमवत एकदेशः तत्र भवाश्चर्मजातयो बाह्लवेयाः । ढप्रत्ययान्तश्चायम् । षट्त्रिंशादित्यादि चीनसीसामूल्योः प्रमाणं सामूरवत् षट्त्रिंशदङ्गुलं द्रष्टव्यम् । इतिशब्दः समाप्तौ ।

इत्थं मूषिकादिस्थलचरचर्माण्यभिधाय जलचरचर्माण्याह — सातिनेति । सातिना नलतूला वृत्तपुच्छा च इति त्रिविधाः, औद्राः उद्रो जलमार्जारस्तस्येमे त्वग्भेदा इत्यर्थः । सातिना, कृष्णा कृष्णवर्णा । नलतूला नलतूलवर्णा नलतूलो नलाख्यतृणविशेषस्य पक्ष्म तस्येव वर्णो यस्याः सा । वृत्तपुच्छा, कपिला कडारवर्णा । इति चर्मजातयः उक्तेन प्रकारेण चर्मजातयोऽनुक्ता अपि यथाप्रसिद्धि बोद्धव्या इत्यर्थः ।

चर्मगुणांस्त्रीनाह — चर्मणामित्यादि । चर्मणामिति निर्धारणे षष्ठी । शेषं स्पष्टम् ।

इति चर्मनिरूपणम् ।

शुद्धं शुद्धरक्तं पक्षरक्तं च आविकम् । खचितं वानचित्रं खण्डसङ्घात्यं तन्तुविच्छिन्नं च ।

कम्बलः केचलकः कलमितिका सौमितिका तुरगास्तरणं वर्णकं तलिच्छकं वारवाणः परिस्तोमः समन्तभद्रकं च आविकम् ।

पिच्छिलमार्द्रमिव च सूक्ष्मं मृदु च श्रेष्ठम् ।

अष्टप्रोतिसङ्घात्या कृष्णा भिङ्गिसी वर्षवारणम्, अपसारक इति नैपालकम् ।

अथाविकं सप्तदशप्रकारं निरूपयिष्यन् प्रथमं रागभेदेन त्रिविधमाह — **शुद्धमिति** । अवयो मेषा नाम लोमोपकारिणः पशवः तल्लोमभवम् आविकम् । अधिकारश्चायम् । शुद्धं शुक्लं, शुद्धरक्तं सर्वारुणं, पक्षरक्तं च एकदेशारुणं च, भवति । क्रियाभेदेन चतुर्विधमाह — **खचितमिति** । खचितं सूचिवानकर्मनिष्पादितं, वानचित्रं वानकर्मणा कृतवैचित्र्यं, खण्डसङ्घात्यं खचितानामुतानां वा बहूनां खण्डानां सङ्घातेन निष्पादितं, तन्तुविच्छिन्नं च अनुतविसृष्टैस्तन्तुभिर्मध्ये कृतविच्छेदं जालकोपयोगि च ।

संस्थानकृतान् दश भेदानाह — **कम्बल इति** । कम्बलः प्रसिद्धः, केचलकः वन्याशिरस्त्राणं, कौचपक इत्यपपाठः । कलमितिका गजोपर्यास्तरणं, कुलमितिकेति क्वचित् पाठः । सौमितिका कलमितिकैव कृष्णवर्णा गजपर्याणोपर्यास्तरणं, तुरगास्तरणं प्रसिद्धं, वर्णकं वर्णकम्बलः, तलिच्छकं कम्बलविशेषः, तलिक्ष्थकमित्यपि पाठः । वारवाणः कञ्चुकः, परिस्तोमः कम्बलभेदो विस्तारचित्रः, यो विस्तृतवदयामासते निर्माणवैचित्र्यात् स इति व्याचक्षते, कुथ इति त्वेके । समन्तभद्रकं सर्वाङ्गपट्टः, गजादिजघनत्राणमित्यपरे । चशब्दः समुच्चये । इहाविकाधिकारे पुनराविकमिति वचनं वैचित्र्यार्थम् ।

गुणानाह — **पिच्छिलमिति** । पिच्छिलमिव श्लक्ष्णमिव भासमानम्, आर्द्रमिव च भासमानं, सूक्ष्मं, मृदु च, श्रेष्ठं भवति ।

अष्टेत्यादि । अष्टप्रोतिसङ्घात्या प्रोतय एव प्लोतयः खण्डाः तत्सङ्घातनिष्पन्ना, सा कृष्णा कृष्णवर्णा, वर्षवारणं वृष्टिरोधसाधनभूता च, भिङ्गिसी तदाख्यः कम्बलभेदः एकः, अपसारकः काण्डपट इत्यपरः । अनयोर्भेदयोर्गुणात् प्रागनभिधानं गुणासम्बन्धद्योतनार्थम् । इति नैपालकम् अनेन प्रका-

सम्पुटिका चतुराश्रिका लम्बरा कटवानकं प्रावरकः सत्तलिकेति मृगरोम ।

वाङ्गकं श्वेतं स्निग्धं दुकूलं, पौण्ड्रकं श्यामं मणिस्निग्धं, सौवर्णकुड्यकं सूर्यवर्णम् । मणिस्निग्धोदकवानं चतुरश्रवानं व्यामिश्रवानं च ।

एतेषामेकांशुकमध्यर्धद्वित्रिचतुरंशुकमिति ।

रेण नेपालदेशभवमाविकं निरूपितमित्यर्थः । नेपालग्रहणाच्च वक्ष्यमाणं मृगरोमादिकमन्यदेशजं सूचितम् ।

षड्विधं मृगरोमजमाह—सम्पुटिकेति । सम्पुटिका जङ्घात्राणं सुक्थणाभिधानमिति कचिट्टीकादर्शे लिखितं, सन्थनमित्यन्यत्र लिखितं दृश्यते । चतुराश्रिका दशारहिता नवाङ्गुलिचिह्नितकोणा । लम्बरा प्रच्छदपटविशेषः । कटवानकं स एव स्थूलसूत्रो भाष्पक इति तद्देशीयानां प्रसिद्ध इति स्वामी । प्रावरकः पूर्वोक्त एवान्यतरतोदशो रोमावर्तक इति तद्देशप्रसिद्ध इति स्वामी । सत्तलिका तूलिकाख्य आस्तरणविशेष इति स्वामी । इति मृगरोम अनेन प्रकारेण मृगरोमजमुक्तम् ।

अथ त्रिप्रकारं दुकूलमाह—वाङ्गकमित्यादि । वाङ्गकं वङ्गदेशभवं, दुकूलं, श्वेतं, स्निग्धं मसृणम् । पौण्ड्रकं पुण्ड्रदेशभवं, श्यामं, मणिस्निग्धं मरतकस्निग्धम् । सौवर्णकुड्यकं कामरूपस्थे सुवर्णकुड्याख्ये प्रदेशे भवं, सूर्यवर्णम् उद्यदादित्यद्युति । दुकूलस्य वानमपि त्रिप्रकारमाह—मणीत्यादि । मणिस्निग्धोदकवानं नाम दुकूलस्य साधनद्रव्यं जलेनार्द्रीकृत्य मणिबन्धेनावघृष्य वानं, चतुरश्रवानं वर्णान्तरासंसृष्टं शुद्धं वानं, व्यामिश्रवानं कार्पासकतन्तुमिश्रितैः कौशेयकतन्तुभिर्वानम्, अथवा वर्णान्तरसंसृष्टवानम् । चः समुच्चये ।

एतेषामिति । एतेषां दुकूलानां मध्ये, एकांशुकं तानवानयोरेकतन्तुकम्, अर्थात् प्रशस्तं सूक्ष्मत्वात् । अध्यर्धद्वित्रिचतुरंशुकम् अध्यर्धांशुकं द्यंशुकं त्र्यंशुकं चतुरंशुकं च, अर्थादपकृष्टमुत्तरोत्तरं स्थूलत्वात् । तत्र यदेकगुणं तन्यते द्विगुणमूयते द्विगुणं वा तन्यते एकगुणमूयते तदध्यर्धांशुकम् । यद् द्विगुणं तन्यते द्विगुणमूयते तद् द्यंशुकम् । यत् त्रिगुणं तन्यते त्रिगुणमूयते तत् त्र्यंशुकम् । यच्चतुर्गुणं तन्यते चतुर्गुणमूयते तच्चतुरंशुकम् । इतिशब्दो दुकूलनिरूपणसमाप्तौ ।

तेन काशिकं पौण्ड्रकं च क्षौमं व्याख्यातम् ।

मागधिका पौण्ड्रिका सौवर्णकुड्यका च पत्रोर्णाः । नागवृक्षो लिकुचो वकुलो वटश्च योनयः । पीतिका नागवृक्षिका, गोधूमवर्णा लैकुची, श्वेता वाकुली, शेषा नवनीतवर्णा ।

तासां सौवर्णकुड्यका श्रेष्ठा । तया कौशेयं चीनपट्टाश्च चीनभूमिजा व्याख्याताः ।

माधुरमापरान्तकं कालिङ्गकं काशिकं वाङ्गकं वात्सकं माहिषकं च कार्पासिकं श्रेष्ठमिति ।

तेनेति । तेन दुकूलगताध्यर्धांशुकत्वादिनिरूपणेन, काशिकं काशिदेशभवं, पौण्ड्रकं च पुण्ड्रदेशजं च, क्षौमं व्याख्यातं क्षौममेव निरूपितम् अध्यर्धांशुकद्व्यंशुकादिरूपं स्थूलं दुकूलमेव हि क्षौममिति व्यपदिश्यत इत्यभिप्रायः ।

मगधपुण्ड्रकसुवर्णकुड्यकाख्यदेशत्रयभवां नागकेसरडहुमधगन्धन्यग्रोधाख्यवृक्षचतुष्टययोनिं पत्रोर्णामाह — मागधिकेति । पत्रोर्णाः वृक्षपत्रेषु क्रिमिलालाकृता ऊर्णाः पट्टसूत्रस्य योनयः तासां योनिभेदनिमित्तं गुणभेदमाह — पीतिकेत्यादि । नागवृक्षिका पीतिका नागवृक्षयोनिः पीतवर्णा । लैकुची लिकुचयोनिः । वाकुली वकुलयोनिः । शेषा वटयोनिः ।

मागधिकादीनां पत्रोर्णानां मध्ये श्रेष्ठामाह — तासामित्यादि । तयेति । तया पत्रोर्णया, कौशेयं कोशकारभवं, चीनभूमिजाश्चीनपट्टाश्च चीनदेशभवा वस्त्रविशेषाश्च, व्याख्याताः योनितो वर्णतश्च निर्दिष्टाः, तेऽपि पत्रोर्णावन्नागवृक्षादियोनयः पीतकादिवर्णाश्चेत्यभिप्रायः ।

कार्पासिकमाह — माधुरमिति । माधुरं मधुरा पाण्ड्यराजधानी तया पाण्ड्यदेशलक्षणात् पाण्ड्यदेशजमित्यर्थः, आपरान्तकम् अपरान्तः कोङ्कणदेशस्तत्प्रभवं, कालिङ्गकं कलिङ्गभवं, काशिकं काशिजं, वाङ्गकं वङ्गजं, वात्सकं वत्सविषयोद्भवं, माहिषकं माहिष्मती कुन्तलदेशराजधानी तया देश लक्षणात् तद्देशभवमित्यर्थः, यद्वा महिषकदेशोत्पन्नं, चः समुच्चये, कार्पासिकं पाण्ड्यादिदेशसप्तकभवं कार्पासतन्तुजं वस्त्रं, श्रेष्ठम् । इतिशब्दः फल्गुसमाप्तौ । इति फल्गुनिरूपणम् ।

अतः परेषां रत्नानां प्रमाणं मूल्यलक्षणम् ।
जातिं रूपं च जानीयान्निधानं नवकर्म च ॥
पुराणप्रतिसंस्कारं कर्मगुह्यमुपस्करान् ।
देशकालपरीभोगं हिंस्राणां च प्रतिक्रियाम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकादशोऽध्यायः कोशप्रवेश्यरत्नपरीक्षा.
आदितो द्वात्रिंशः ॥

अध्यायान्ते श्लोकावाह—अत इति, पुराणेत्यादि च । **अतः** अस्मादुक्तात् मौक्तिकादिकार्पासिकान्तात् सप्तदशकात्, **परेषा**मन्येषां, **रत्नानां** रत्नप्रभृतीनां, **प्रमाणं** माषकाङ्गुलादिकं तुलामानपौतवदेशकालमानप्रकरणयोर्वक्ष्यमाणं, **मूल्यलक्षणं** मूल्यं लक्षणं च, तत्र मूल्यं —

"द्वे शते यद् धृतं रत्नं तण्डुलानां प्रमाणतः ।
शतद्वयं सहस्राणां तस्य मूल्यं प्रकीर्तितम् ॥"

इत्युक्तरूपं, लक्षणं प्राशस्त्यं यथा मौक्तिकानां स्थूलनिस्तलादि, अथवा लक्षणं —

"क्षीरकुम्भे मणिः क्षिप्तो यो रञ्जयति तेजसा ।
शुक्लत्वं चोद्धृतो याति तं शुद्धमिति निर्दिशेत् ॥"

इत्युक्तजातीयं, **जातिं** मुक्तादीनां ताम्रपर्णिकत्वादिकं, **रूपं** वर्णं षडश्रचतुरश्रादिकं वा, **निधानं** निधीयमानवस्त्वेकान्तगोपनानुकूलं निधानप्रकारं, **नवकर्म च** आकरोद्धृतमात्रस्य शोधनवेधनघर्षणादिकं, **पुराणप्रतिसंस्कारं** पुराणस्य असम्भोगातिभोगादिभिर्विवर्णितस्य बन्धच्युतस्य श्लथबन्धस्य वा नवीकरणं, यदाह —

"अतिभोगादसम्भोगाद् धूमाग्निस्वेदघर्षणात् ।
भूम्यम्बुलवणैश्चापि मुक्तावर्णो विरज्यते ॥"

इति, **कर्मगुह्यं** कर्मरहस्यं रत्नादीनां वर्णापचारणरञ्जनघर्षणादिकम्, **उपस्करान्** शाणादीनि रत्नादिकर्मोपकरणानि, **देशकालपरीभोग**मिति समाहारद्वन्द्वः, तत्र देशकालौ रत्नादीनामुत्पत्तिक्रयविक्रयानुकूलौ, परीभोग उपयोगः शीतयोर्देशकालयोर्मृगरोमजमुपयोज्यम् उष्णयोः कार्पासिकमित्येवंरूपः, हिं-

स्त्राणां क्षौमाद्युपघातकानां मूषिकादीनां, प्रतिक्रियां मार्जारोत्सर्गादिना प्रतिविधानं कृमिमूषिकादिजग्धानां वस्त्रादीनां सीवनादिना संस्करणं च, जानीयात्, अर्थात् कोशाध्यक्षः ।

एषोऽत्र भट्टस्वामिनः सर्वसङ्ग्रहः ---

"मौक्तिकं मणयो वज्रं प्रवालं च समासतः ।
रत्नं चतुर्विधं प्रोक्तं साराः पञ्चविधा मताः ॥
चन्दनागुरुणी श्रेष्ठे मध्यमं तैलपर्णिकम् ।
भद्रश्रीयं च जानीयात् कालेयकमथेतरत् ॥
चर्माविमृगरोमाणि दुकूलं क्षौमजातयः ।
कार्पासिकं च पत्रोर्णं कौशेयं फल्गु चाष्टधा ॥
कुप्यं कुप्यायुधाध्यक्षप्रोक्तमित्यत्र नोदितम् ।
मुक्ताफलाद्यशेषास्तु भेदाः सप्तदशोदिताः ॥" इति ।

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकादशोऽध्यायः कोशप्रवेश्यरत्नपरीक्षा,
आदितो द्वात्रिंशः ॥

३०. प्रक. आकरकर्मान्तप्रवर्तनम् ।

आकराध्यक्षः शुल्बधातुशास्त्ररसपाकमणिरागज्ञस्तज्ज्ञसखो वा तज्जातकर्मकरोपकरणसम्पन्नः किट्टमूषाङ्गारभस्मालिङ्गं वाकरं भूतपूर्वमभूतपूर्वं वा भूमिप्रस्तररसधातुमत्यर्थवर्णगौरवमुग्रगन्धरसं परीक्षेत ।

आकरकर्मान्तप्रवर्तनमिति सूत्रम् । आकरेषु सुवर्णाद्युत्पत्तिस्थानेषु कर्मान्ताः तदुपलम्भानुकूलाः क्रियाः आकरकर्मान्ताः तेषां प्रवर्तनमनुष्ठापनमाकरकर्मान्तप्रवर्तनं, तदिहाभिधीयत इति सूत्रार्थः ।

'गुप्तपुत्रदारानाकरकर्मान्तेषु वासयेदि'ति पूर्वमुक्तम् । आकरकर्मान्तास्तु नोक्ताः, त इदानीमुच्यन्त इति सङ्गतिः ।

आकराध्यक्ष इति । शुल्बधातुशास्त्ररसपाकमणिरागज्ञः शुल्बशास्त्रं भूसिराविज्ञानं शाकलादि, अथवा शुल्बं ताम्रं तस्य ताम्ररजतहेमता येनोपदिश्यन्ते तच्छुल्बशास्त्रं, कनकपञ्चाशीक्रियावादशुल्बशास्त्रमिति स्वामी, धातुशास्त्रं धातुभ्यः सर्जिकागन्धकादियुक्त्या सत्त्वपातनोपदेशकं धातुकौटल्यादिशास्त्रं, रसः रसबन्धविज्ञानं 'रसोपनिषदाख्यमि'ति स्वामी, पाकः कनकादीनां वर्णकोत्कर्षणाद्यनुकूलमभिपचनकर्म, मणिरागः मणीनां वर्णभेदोत्पादनकर्म, एषु शुल्बशास्त्रादिषु ज्ञः कोविदः, तज्ज्ञसखो वा शुल्बशास्त्राद्यभिज्ञसहायश्च, तज्जातकर्मकरोपकरणसम्पन्नः तज्जातैस्तन्नित्योद्योगिभिः कर्मकरैः उपकरणैश्च खनित्रभस्त्रासन्दंशशाणयन्त्रादिभिः सम्पन्न उपेतः, आकराध्यक्षः, किट्टमूषाङ्गारभस्मलिङ्गं किट्टं लोहमलं मूषा आवर्तनभाण्डम् अङ्गारो भस्म च लिङ्गं भूतपूर्वत्वचिह्नं यस्य तं तथाभूतं, भूतपूर्वं पूर्वप्रवृत्तविच्छिन्नम् , आकरं, परीक्षेत उक्तलिङ्गदर्शनेन जानीयात् । भूमिप्रस्तररसधातुं भूमिर्मृत्तिका प्रस्तरः पाषाणः रसः सलिलपारतादिः भूमिप्रस्तररसात्मकाः धातवः सत्त्वप्रकृतयो यस्मिंस्तं भूमिधातुकं प्रस्तरधातुकं रसधातुकं चेत्यर्थः, अत्यर्थवर्णगौरवं वर्णोत्कर्षयुक्तं भारोत्कर्षयुक्तं च, उग्रगन्धरसं तीव्रगन्धयुक्तं तीव्ररसयुक्तं च, अभूतपूर्वम् आकरं वा परीक्षेत नवमाकरं च परीक्षेत, किमाकरगता धातवः उत्कृष्टसत्त्वा उतापकृष्टसत्त्वा आहो मध्यमसत्त्वा इति तदीयवर्णगुरुत्वगन्धरसानां दर्शनतोलनाघ्राणास्वादनैर्निश्चिनुयादित्यभिप्रायः ।

पर्वतानामभिज्ञातोद्देशानां बिलगुहोपत्यकालयनगूढखातेष्वन्तः-प्रस्यन्दिनो जम्बूचूततालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्ड-रीकशुकमयूरपत्रवर्णाः सवर्णोदकौषधिपर्यन्ताश्चिक्कणा विशदा भारि-काश्च रसाः काञ्चनिकाः ।

अप्सु निष्ठ्यूतास्तैलवद्विसर्पिणः पङ्कमलग्राहिणश्च ताम्ररूप्ययोः शतादुपरि वेद्धारः ।

भूमिप्रस्तररसधातुषु रसः पारनिर्दिष्टोऽप्यव्यभिचरितफलरूपसुवर्णयोनित्वेन महाफलत्वादल्पायासत्वाच्चाभ्यर्हित इति कृत्वा तमेव पञ्चप्रकारं प्रथमं निरूपयति — **पर्वतानामि**ति । अभिज्ञातोद्देशानाम् अभिज्ञाताः पूर्वभूपपरिज्ञाताः आकरविद्याधीता वा उद्देशाः येषां तथाभूतानां, पर्वतानां, **बिलगुहोपत्यकालयनगूढखातेषु** बिलं भूविवरं गुहा देवखातगृहम् उपत्यका शैलासन्नभूमिः लयनं शिलाटङ्कनकर्मनिर्मितं गृहं गूढखातं महाशिलापिहितद्वारं बिलम् इत्येतेषु पञ्चसु, अन्तःप्रस्यन्दिनः मध्यप्रस्राविणः, जम्बूचूततालफलपक्वहरिद्राभेदहरितालक्षौद्रहिङ्गुलकपुण्डरीकशुकमयूरपत्रवर्णाः जम्बूफलादित्रिकं प्रसिद्धं पक्वहरिद्राभेदः शोधितहरिद्राभङ्गः हरितालं धातुभेदः क्षौद्रं मधु हिङ्गुलको रागद्रव्यविशेषः पुण्डरीकं सिताम्बुजं शुकमयूरपत्रे शुकपक्षमयूरपक्षौ जम्बूफलादीनां दशानां वर्ण इव वर्णो येषां ते तथाभूताः, सवर्णोदकौषधिपर्यन्ताः सवर्णोदकः स्ववर्णसमानवर्णजलः सवर्णौषधिः स्ववर्णसमानवर्णौषधिश्च पर्यन्तः परिसरप्रदेशो येषां ते तथाभूताः, चिक्कणाः स्पृष्टहस्तसङ्गिनः, विशदाः शुचयः, भारिकाश्च गुरवश्च, रसाः, काञ्चनिकाः काञ्चनं सुवर्णं तत्प्रयोजनाः ।

तेषामेव लक्षणान्तरमाह — **अप्स्वि**ति । अप्सु निष्ठ्यूता जले क्षिप्ताः, तैलवद्विसर्पिणः जले तैलवद् विसर्पणशीलाः, पङ्कमलग्राहिणश्च जलगतं पङ्कमादाय कतकवदधोगत्वराश्च, यथोक्ताः काञ्चनिकाः रसाः, ताम्ररूप्ययोरुपरि वेद्धारः ताम्रस्य रूप्यस्य चोपरि क्षिप्ताः सन्तः जात्यन्तरापादकाः सुवर्णत्वापादका इत्यर्थः । वेध्यवेद्ध्रोः योगपरिमाणमाह — **शतादि**ति । शतमासाद्य, ल्यब्लोपे पञ्चमी, तच्च शतं ताम्ररूप्ययोर्वेध्ययोः पलशतं वेद्धुस्तु रसस्य परिमाणम् एकपलात्मकं विशेषाकथनात्, तथा च ताम्रपलशते रूप्यपलशते वा काञ्चनिकरसो वेधशास्त्रविधिनैकपलः क्षिप्तस्तत्सर्वं स्वर्णीकरोती-

---

1. 'दगुडहरिताळमनश्शिलाक्षौ' ग. पाठः.

तत्प्रतिरूपकमुग्रगन्धरसं शिलाजतु विद्यात् ।

पीतकास्ताम्रकास्ताम्रपीतका वा भूमिप्रस्तरधातवो भिन्ना नीलराजीमन्तो मुद्गमाषकृसरवर्णा वा दधिबिन्दुपिण्डचित्रा हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णा भिन्नाश्चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः सगुलिका अर्चिष्मन्तस्ताप्यमाना न भिद्यन्ते बहुफेनधूमाश्च सुवर्णधातवः प्रतीवापार्थास्ताम्ररूप्यवेधनाः ।

त्युक्तं भवति । इह वेद्धार इति 'विध विधान' इत्यस्मात् तृच्, विधानं च रूपान्तरापादनलक्षणं विवक्षितमिति बोद्धव्यम् ।

तत्समरूपगन्धरसे शिलाजतुनि तद्भ्रमापनोदनार्थमाह — **तत्प्रतिरूपकमिति** । तत्प्रतिरूपकं तस्य काञ्चनिकरसस्य प्रतिरूपकं सदृशरूपं समानवर्णम्, उग्रगन्धरसं तद्वदुग्रगन्धमुग्ररसं च रसवस्तु, शिलाजतु तत्संज्ञं द्रव्यान्तरं, विद्याद् उपयोगादिना परीक्ष्य निश्चिनुयात् । अथवा रूपगन्धरसमात्रसाम्योक्त्या तैलवद्विसर्पित्वपङ्कमलग्राहित्वयोरभावस्य द्योतनात् तेनैव शिलाजतुत्वमवधारयेदित्यर्थः ।

अथ त्रिविधान् भूमिप्रस्तरधातूनाह — **पीतका** इति । पीतकाः केवलपीताः, ताम्रकाः केवलताम्राः, ताम्रपीतकाः उक्तोभयमिश्राः, वेति विकल्पे, एवं त्रिविधाः, भूमिप्रस्तरधातवः भूमिधातवः प्रस्तरधातवश्च, भिन्ना नीलराजीमन्तः विदारिता मध्ये नीलरेखायुक्ताः, मुद्गमाषकृसरवर्णा वा मुद्गमाषतिलौदनसवर्णाः, वेति विकल्पे । दधिबिन्दुपिण्डचित्राः दधिबिन्दुचित्रा दधिकणाकारैः सूक्ष्मैर्बिन्दुभिराकीर्णाः दधिपिण्डचित्राश्च दधिपिण्डसदृशैः स्थूलबिन्दुभिराकीर्णाश्च, हरिद्राहरीतकीपद्मपत्रशैवलयकृत्प्लीहानवद्यवर्णाः हरिद्रा रजनी हरीतकी पथ्या पद्मपत्रं पद्मदलं शैवलं जलनीली यकृत् कालखण्डाख्यो मांसविशेषः प्लीहा गुल्मः अनवद्यं कुङ्कुमम् एषामिव वर्णो येषां ते तथाविधाः । भिन्नेषु विशेषमाह — भिन्नाः सन्तः, चुञ्चुवालुकालेखाबिन्दुस्वस्तिकवन्तः चुञ्चुवालुका सूक्ष्मवालुकेति स्वामी तद्वन्तः लेखा राजयः तद्वन्तः बिन्दुमन्तः स्वस्तिकस्त्रिकोणरेखाविशेषस्तद्वन्तः, सगुलिकाः गुटिकाकारशर्करोपेताः, अर्चिष्मन्तो दीप्तिमन्तः । परीक्षान्तरमाह — ताप्यमानाः सन्तः न भिद्यन्ते न स्फुटन्ति । कीदृशास्तर्हि भवन्तीत्यत्राह — बहुफेनधूमाः बहुफेनाः बहुधूमाश्च भवन्ति । चशब्दः समुच्चये । एवंलक्षणाः भूमिप्रस्तरधातवः,

शङ्खकर्पूरस्फटिकनवनीतकपोतपारावतविमलकमयूरग्रीवावर्णाः सस्यकगोमेदकगुडमत्स्यण्डिकावर्णाः कोविदारपद्मपाटलीकलायक्षौमातसीपुष्पवर्णाः ससीसाः साञ्जना विस्रा भिन्नाः श्वेताभाः कृष्णाः कृष्णाभाः श्वेताः सर्वे वा लेखाबिन्दुचित्रा मृदवो ध्मायमाना न स्फुटन्ति बहुफेनधूमाश्च रूप्यधातवः ।

सर्वधातूनां गौरववृद्धौ सत्त्ववृद्धिः । तेषामशुद्धा मूढगर्भा वा तीक्ष्णमूत्रक्षारभाविता राजवृक्षवटपीलुगोपित्तरोचनामाहिषखरकरभमूत्र-

---

प्रतीवापार्थाः प्रतीवापो नाम वेधनद्रव्यस्यावर्तमाने ताम्रे रूप्ये वा चूर्णीकृत्य प्रक्षेपः तदर्थास्तत्प्रयोजनाः, ताम्ररूप्यवेधनाः ताम्रस्य रूप्यस्य वा स्वर्णत्वापादकाः, अत एव सुवर्णधातवः सुवर्णहेतुभूता धातव इत्युच्यन्त इत्यर्थः ।

रूप्यधातूनाह—शङ्खेत्यादि । रूप्यधातवः रूप्यहेतवो धातवः, शङ्खवर्णकर्पूरवर्णादयोऽष्टौ सस्यकवर्णगोमेदकवर्णादयश्चत्वारः कोविदारवर्णपद्मवर्णादयः षडित्येवमष्टादशप्रकाराः । तत्र कपोतः आरण्यः कलरवः, पारावतो ग्राम्यः, विमलकः श्वेतरक्तो मणिः । सस्यको नीलमणिः, गुडः पिण्डशर्करा, मत्स्यण्डिका शर्करा । कोविदारस्ताम्रपुष्पाख्यो वृक्षः, पाटली अमोघाख्या, कलायः सतीनकः, क्षौमं क्षुमाभेदः, अतसी उमाख्या । शेषं प्रसिद्धम् । ससीसाः योगेष्टाख्यलोहानुविद्धाः, साञ्जनाः सीसकवच्छुक्लवर्णमञ्जनमिति स्वामी तदनुविद्धाः, विस्राः दुर्गन्धाः, भिन्नाः खण्डिताश्चेत्, श्वेताभाः कृष्णाः श्वेतवर्णाः सन्तो मध्ये कृष्णवर्णाः, कृष्णाभाः श्वेताः कृष्णवर्णाः सन्तो मध्ये श्वेतवर्णाः, सर्वे वा वेति विकल्पे शङ्खादिवर्णा अष्टादशविधा अपि, लेखाबिन्दुचित्राः स्ववर्णभिन्नवर्णाभिर्लेखाभिर्बिन्दुभिश्च चित्राः, मृदवः, ध्मायमाना न स्फुटन्ति ताप्यमाना न भिद्यन्ते, बहुफेनधूमाश्च भवन्ति ।

सर्वधातूनामिति । सर्वधातूनां सर्वेषामुक्तानां वक्ष्यमाणानां च धातूनां, गौरववृद्धौ गुरुत्वोत्कर्षे सति, सत्त्ववृद्धिः सत्त्वं धातुगतः सारः तस्य वृद्धिः, भवति । अशुद्धानामनभिव्यक्तसत्त्वानां च धातूनां शोधनप्रकारमाह—तेषामिति । तेषां धातूनां मध्ये, अशुद्धाः अशुद्धद्रव्यान्तरसंसर्गादुष्टाः, मूढगर्भा वा स्वदोषादेवाप्रकाशमानसत्त्वा वा धातवः, तीक्ष्णमूत्रक्षारभाविताः

लण्डपिण्डबद्धास्तत्प्रतीवापास्तदवलेपा वा विशुद्धाः स्रवन्ति ।

यवमाषतिलपलाशपीलुक्षारैर्गोक्षीरराजक्षीरैर्वा कदलीवज्रकन्द-प्रतीवापो मार्दवकरः ।

मधु मधुकमजापयः सतैलं घृतगुडकिण्वयुतं सकन्दलीकम् ।
यदपि शतसहस्रधा विभिन्नं भवति मृदु त्रिभिरेव तन्निषेकैः ॥

गोदन्तशृङ्गप्रतीवापो मृदुस्तम्भनः ।

तीक्ष्णमूत्रं नरमूत्रमित्येके गजाश्वगोगर्दभच्छागमूत्रमित्यपरे इति स्वामी तीक्ष्ण-क्षारः कदल्यपामार्गादिभस्म ताभ्यां भाविताः असकृत् सेचनादिना संस्कृताः, राजवृक्षवटपीलुगोपित्तरोचनामहिषखरकरभमूत्रलण्डपिण्डबद्धाः राजवृक्षः श-म्याकः वटः प्रसिद्धः पीलुर्गुडफलाख्यो वृक्षः गोपित्तरोचना गोपित्तं गोरोचना च महिषखरकरभमूत्रलण्डं सैरिभगर्दभबालोष्ट्राणां मूत्रपुरीषम् एतैः पिण्डबद्धाः राजवृक्षादिकल्कैर्महिषादिमूत्रलण्डेन च सह मिश्रितैरुक्ततीक्ष्णमूत्रक्षारभावि-तस्यात्मनश्चूर्णैर्बद्धपिण्डा इत्यर्थः, तत्प्रतीवापाः राजवृक्षादिचूर्णकृतप्रतीवापाः, तदवलेपा वा तच्चूर्णकृतोपलेपा वा सन्तः, विशुद्धाः द्रव्यान्तरसंसर्गजदोष-निर्मुक्ताः, स्रवन्ति मूढगर्भतापहानेन सत्त्वमुद्गिरन्ति ।

यवमाषतिलपलाशपीलुभस्मभिर्गोक्षीरराजक्षीरैश्च सम्मिश्रिताभ्यां कदली-कन्दवनसूरणकन्दाभ्यां प्रतीवापात् स्वर्णरूप्ययोर्मार्दवमुपजायत इत्याह— **यवमाषे**त्यादि । इह वेत्यन्तस्य विशुद्धाः स्रवन्तीत्यनेन सम्बन्धं मत्वा यव-क्षारादिभिः साधनैः पूर्ववत् पिण्डबन्धनादिविधया वा धातवो विशुद्धाः स्रव-न्तीत्यर्थं केचिद् वर्णयन्ति ।

मृदूकारप्रकारान्तरं श्लोकेनाह— **मधुमधुकमि**ति । सतैलं, घृतगुड-किण्वयुतं सर्पिश्शर्करासुराबीजसहितं, सकन्दलीकं कच्छजझाटभेदयुक्तं, यत्, मधु क्षौद्रं, मधुकं यष्ट्याख्यम्, अजापयः छागीक्षीरं च, त्रिभिरेव, तन्निषेकैः निषेको नाम स्वर्णादावौषधकल्कनिक्षेपः मध्वाद्यष्टककल्कनिक्षेपैः, शतसहस्रधा विभिन्नमपि नानाप्रकारकाठिन्ययुक्तमपि स्वर्णादिकं, मृदु भवति ॥

मार्दवापायकरमाह—**गोदन्ते**त्यादि । गोदन्तशृङ्गप्रतीवापः गोर्दन्त-शृङ्गचूर्णयोर्द्रुतसुवर्णाद्युपरि प्रक्षेपः, मृदुस्तम्भनः मार्दवविलोपनो भवति । इति स्वर्णरूप्यधातुप्रकरणम् ।

भारिकः स्निग्धो मृदुश्च प्रस्तरधातुर्भूमिभागो वा पिङ्गलो हरितः पाटलो लोहितो वा ताम्रधातुः ।

काकमेचकः कपोतरोचनावर्णः श्वेतराजिनद्धो वा विस्रः सीसधातुः ।

ऊषरकर्बुरः पक्वलोष्टवर्णो वा त्रपुधातुः ।

कुरुम्बः पाण्डुरोहितः सिन्दुवारपुष्पवर्णो वा तीक्ष्णधातुः ।

काकाण्डभुजपत्रवर्णो वा वैकृन्तकधातुः ।

अच्छः स्निग्धः सप्रभो घोषवान् शीततीव्रस्तनुरागश्च मणिधातुः ।

अथ ताम्रधातुमाह— **भारिक** इति । भारिकः गुरुः, स्निग्धो मसृणः, मृदुश्च, प्रस्तरधातुः पाषाणधातुः, भूमिभागो वा भूमिधातुर्वा, ताम्रधातुः ताम्रयोनिर्भवति । तस्य चतुर्विधान् वर्णानाह — पिङ्गलः कपिलः, हरितो नीलः, पाटल ईषद्रक्तः, लोहितो वा रक्तो वा ।

सीसधातुमाह—**काके**त्यादि । काकमेचकः काक इव कृष्णः, कपोतरोचनावर्णः कपोतवर्णो गोरोचनावर्णश्च, श्वेतराजिनद्धः धवललेखाबहुलः, विस्रो वा दुर्गन्धो वा, सीसधातुः सीससंज्ञलोहयोनिर्धातुर्भवति ।

त्रपुसंज्ञस्य शुक्लसीसस्य योनिं धातुमाह— **ऊषरे**त्यादि । ऊषरकर्बुरः ऊषरदेशवदापाण्डुः, पक्वलोष्टवर्णो वा, त्रपुधातुः ।

अयोधातुमाह —**कुरुम्ब** इति । कुरुम्बः श्लक्ष्णपाषाणप्रायः इति स्वामी, पाण्डुरोहितः श्वेतरक्तः, सिन्दुवारपुष्पवर्णो निर्गुण्डीपुष्पवर्णः, वेति विकल्पे, तीक्ष्णधातुः तीक्ष्णम् अयः तद्योनिर्धातुर्भवति ।

वैकृन्तकधातुमाह—**काकाण्डे**त्यादि । काकाण्डभुजपत्रवर्णो वा काकाण्डवर्णो भूर्जपत्रवर्णो वा, क्वचिद् भूर्जेत्येव पाठः । काण्डेति पाठे काण्डो वृक्षजातिविशेष इति व्याख्येयम् । वैकृन्तकधातुः वैकृन्तकाख्यलोहविशेषयोनिर्धातुः । कांस्यादिकं तु तमरकादियुक्तताम्रादिनिष्पाद्यमिति तस्य न धात्वन्तरमस्ति । एवं लोहधातवः सप्ताभिहिताः ।

अथ मणिधातूनाह — **अच्छ** इति । अच्छो बिम्बग्राही, स्निग्धो मसृणः, सप्रभः सद्युतिः, घोषवान् अग्नितापने टङ्कच्छेदने च महाशब्दः,

धातुसमुत्थं तज्जातकर्मान्तेषु प्रयोजयेत् ।

कृतभाण्डव्यवहारमेकमुखम्, अत्ययं चान्यत्रकर्तृक्रेतृविक्रेतॄणां स्थापयेत् ।

आकरिकमपहरन्तमष्टगुणं दापयेदन्यत्र रत्नेभ्यः ।

स्तेनमनिसृष्टोपजीविनं च बद्ध्वा कर्म कारयेद्, दण्डोपकारिणं च ।

शीततीव्रः अतिशीतस्वभावः अग्नेरपनयने क्षिप्रशीतो वा, तनुरागः अल्परागः, मणिधातुः मणियोनिर्धातुर्भवति । इयमत्र संग्रहार्या —

"कनकं रूप्यं ताम्रं सीसं त्रपु तीक्ष्णकं च वैकृन्तम् ।
मणयोऽष्टौ निर्दिष्टा अष्टानां धातवोऽप्यष्टौ ॥" इति ।

इत्थं धातुपरीक्षामुपदिश्य तत्कर्मान्तप्रवर्तनमधिकृत्याह — **धातुसमुत्थमिति** । धातुसमुत्थितमित्यपि पाठः । धातुभ्यः स्वल्पधनव्ययप्रयत्नेन प्रथममुत्पन्नं स्वर्णादिद्रव्यं, तज्जातकर्मान्तेषु धातुसम्बद्धकर्मस्थानेषु स्वर्णरूप्याद्याकरेषु, प्रयोजयेत् विनियुञ्जीत बहुतरोत्पत्त्यर्थम् । विनियोज्यस्य धातुसमुत्थत्ववचनं पूर्वपूर्वसम्यक्प्रवृत्तिफलोपलम्भे सत्येवोत्तरोत्तरप्रवृत्तिः कार्येति द्योतयितुम् ।

कृतेत्यादि । कृतभाण्डव्यवहारं घटितसुवर्णादिभाण्डविक्रयम्, एकमुखम् एकद्वारकमेकविक्रयस्थानकं, स्थापयेत् प्रख्यापयेत् । **अन्यत्रकर्तृक्रेतृविक्रेतॄणां** स्थापितान्यदेशे भाण्डक्रियाक्रयविक्रयकारिणाम्, अत्ययं च दण्डं च 'पञ्चविंशतिपणमत्ययं चान्यत्रकर्तृक्रेतृविक्रेतृपरीक्षितृभ्य' इति लक्षणाध्यक्षोक्तं, स्थापयेत् । दण्ड इह द्रव्यसारतारतम्यापेक्षः शुल्काध्यक्ष-धर्मस्थीय-कण्टकशोधनोक्तोऽपराधानुरूपः कल्पनीयः प्रमाणाकथनादिति केचित् ।

आकरिकमिति । अपहरन्तम् आकराद् द्रव्यं हरन्तं, आकरिकम् आकरकर्मकरम्, अष्टगुणम् अपहृतद्रव्याष्टगुणमत्ययं दापयेत् । तत्रापवादमाह — **अन्यत्र रत्नेभ्य** इति । रत्नापहारे तु नायं दण्डः, किन्तु घातो वक्ष्यते ।

स्तेनमिति । स्तेनम् आकरिकमनाकरिकं वा चोरम्, अनिसृष्टोपजीविनं च विना राजानुमतिं धातुवादविद्यया वृत्तिं वर्तयन्तं च, बद्ध्वा निगडितं कृत्वा, बद्धमिति पाठेऽप्ययमेवार्थः, कर्म आकरव्यापारं, कारयेत् । दण्डोपकारिणं च महापराधेषु प्राड्विवाकनिर्णीतो देहदण्डप्रतिनिधिर्धनदण्डो

व्ययक्रियाभारिकमाकरं भागेन प्रक्रयेण वा दद्यात्, लाघविकमात्मना कारयेत् ।

लोहाध्यक्षः ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् कारयेत्, लोहभाण्डव्यवहारं च ।

लक्षणाध्यक्षः चतुर्भागताम्रं रूप्यरूपं तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं कारयेत् पणम्, अर्धपणं पादमष्टभागमिति ।

देहपीडापरिहारार्थत्वादपराधिनं प्रति उपकारो भवतीति दण्डोपकारः स उच्यते तद्वन्तं च अर्थाददत्तदण्डं, बद्ध्वा कर्म कारयेत् ।

व्ययक्रियेत्यादि । व्ययक्रियाभारिकं व्ययक्रिययोर्भारिकं गुरुं गुरुधनव्ययसाध्यं गुरुप्रयत्नसाध्यं चेत्यर्थः, आकरं, भागेन दद्याद् व्ययलाभभागव्यवस्थया परेषां प्रतिपादयेत् । प्रक्रयेण वा दद्यात् अस्याकरस्यैतावत् सुवर्णादिकं राजार्थे देयमिति परिपण्य वा परेषां दद्यात् । लाघविकं लघुव्ययसाध्यं लघुश्रमसाध्यं चाकरम्, आत्मना कारयेत् स्वयं व्यापारयेत् ।

अथावान्तराध्यक्षव्यापारमाह — **लोहाध्यक्ष** इति । लोहाध्यक्षः सुवर्णरूप्ययोर्वक्ष्यमाणत्वात् तदतिरिक्तं ताम्रादिकमिह लोहः तदध्यक्षः, ताम्रसीसत्रपुवैकृन्तकारकूटवृत्तकंसताललोहकर्मान्तान् आरकूटो रीतिः वृत्तं तदाख्यो लोहः कंसो घोषाख्यः तालः कांस्यं सातिशयनादयुक्तं वाद्योपयोगि लोहः कालायसं ताम्रादीनां कर्मान्तान् तद्भाण्डघटनकर्माणि, कारयेत् । लोहभाण्डव्यवहारं च ताम्रादिनिर्मितभाण्डक्रयविक्रयव्यवहारं च कारयेत् ।

अथ पण्यव्यवहारार्थं लक्षणाध्यक्षव्यापारमाह—**लक्षणेत्यादि** । लक्षणाध्यक्षः लक्षणं पणमाषकादिरूपनिर्माणं तदध्यक्षः टङ्कशालाध्यक्ष इति यावत् । पणव्यवहारश्च रूप्यरूपश्चतुर्विधः ताम्ररूपश्चतुर्विधः इत्यष्टविधे तस्मिन् रूप्यरूपः **चतुर्भागताम्रमित्यादिना**, ताम्ररूपश्च **पादाजीवमित्यादिना** व्युत्पाद्यते । षोडशमाषको हि पणः प्रसिद्धः, तस्य चतुर्भागश्चत्वारो माषाः तत्प्रमाणं ताम्रं यस्य तथाविधं, **तीक्ष्णत्रपुसीसाञ्जनानामन्यतममाषबीजयुक्तं** तीक्ष्णं कालायसं त्रपु रङ्गं सीसं योगेष्टाख्यम् अञ्जनं रसाञ्जनम् एषां चतुर्णामन्यतमस्य माषप्रमाणेन बीजेन निर्माणार्थेन युक्तम्, अर्थात् परिशिष्टैकादशमाषपरिमाणरूप्यकं, रूप्यरूपं रूप्यांशभूम्ना रूप्यमयं, पणं पणसंज्ञं नाणकविशेषं, कारयेत् । इति उक्तेन प्रकारेण, अर्धपणं पादम् अष्टभागं

पादाजीवं ताम्ररूपं माषकमर्धमाषकं काकणीमर्धकाकणीमिति ।

रूपदर्शकः पणयात्रां व्यवहारिकीं कोशप्रवेश्यां च स्थापयेत् । रूपिकमष्टकं शतं, पञ्चकं शतं व्याजीं, पारीक्षिकमष्टभागिकं शतम् । पञ्चविंशतिपणमत्ययं चान्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्यः ।

कारयेत् पणोक्तताम्राद्यर्धप्रमाणयोगेनार्धपणाख्यं तच्चतुर्भागप्रमाणयोगेन पादपणं तदष्टभागप्रमाणयोगेनाष्टभागाख्यं च निर्मापयेदित्यर्थः । प्रकारान्तरार्थो वा इतिशब्दः इति कारयेदिति योज्यः, त्रिपादकादिकं प्रकारान्तरमपि व्यवहारानुगुणं निर्मापयेदित्यर्थः । पादाजीवं रूप्यरूपचतुर्भागव्यवहार्यं, ताम्ररूपं ताम्रांशभूम्ना ताम्रमयं रूपं, माषकं माषकाख्यं कारयेत् । ताम्रस्यैकादश धान्यमाषाः रूप्यस्य चत्वारस्तीक्ष्णाद्यन्यतमस्यैक इति योगप्रमाणेन रूप्यरूपपणवत् षोडशधान्यमाषप्रमाणकोऽयं ताम्ररूपमाषको द्रष्टव्यः । एवं माषकोक्तताम्राद्यर्धप्रमाणयोगेनार्धमाषकं तच्चतुर्भागप्रमाणयोगेन काकणीं, तदष्टभागप्रमाणयोगेनार्धकाकणीं च कारयेत् ।

रूपदर्शक इति । रूपदर्शकः रूपपरीक्षकः, पणयात्रां पणदानादानप्रस्थानं, व्यवहारिकीं व्यवहारप्रयोजनां, कोशप्रवेश्यां च कोशप्रवेशनयोग्यां च, स्थापयेद् ईदृशी पणयात्रा व्यवहारार्था ईदृशी कोशप्रवेशनार्थेति तत्सारासारभावपर्यालोचनया व्यवस्थापयेत् । इयं राजकर्तृका पणयात्रा । जानपदकारितायां तस्यां राजभाव्यमाह — **रूपिकमि**त्यादि । अष्टास्योपदा दीयते अष्टकं पञ्चास्योपदा दीयते पञ्चकम् । अष्टकं शतं पणशतेऽष्टपणग्रहणं रूपिकसंज्ञं, पणशते पञ्चपणग्रहणं व्याजीसंज्ञं, पणशतेऽष्टभागग्रहणं पारीक्षिकसंज्ञम् । रूपिकं व्याजीं पारीक्षिकं च यथोक्तलक्षणं स्थापयेद् व्यवस्थापयेत । तत्र रूपिकं कर्मकरभृतिः, व्याजी राजभागः, पारीक्षिकं परीक्षकभृतिरिति बोद्धव्यम् । पञ्चविंशतिपणम् , अत्ययं च दण्डं च स्थापयेद् , अर्थादपराधे सति । स चापराधः सन्निहिताष्टभागिकपदानुकर्षणेनाष्टभागभवं दण्डमिति व्याख्यानादष्टभागापहारलक्षणो द्रष्टव्यः । अनया दिशा चतुर्भागाद्यपहारे दण्डद्वैगुण्यादिकमुन्नेयम् । केष्वपराधिषु विषयेऽयं दण्ड इत्याकाङ्क्षायामाह — **अन्यत्र कर्तृक्रेतृविक्रेतृपरीक्षितृभ्य इति** । ये करणक्रयणादावधिकृतास्तदतिरिक्तेषु विषये । ते च जानपदा अध्यक्षपुरुषकर्मकरा वेत्यवसेयम् । अन्यत्रकर्त्रादीनां त्वपराधे द्रव्यसारासारतापेक्षो दण्डः प्रागुक्त एव ।

खन्यध्यक्षः शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् कारयेत् पणनव्यवहारं च ।

लवणाध्यक्षः पाकमुक्तं लवणभागं प्रक्रयं च यथाकालं सङ्गृह्णीयाद्, विक्रयाच्च मूल्यं रूपं व्याजीं च ।

आगन्तुलवणं षड्भागं दद्यात् । दत्तभागविभागस्य विक्रयः । पञ्चकं शतं व्याजीं, रूपं, रूपिकं च । क्रेता शुल्कं, राजपण्यच्छेदानु-

---

भट्टस्वामी त्वाह — 'तेषां खन्यत्रकर्त्रादीनामुक्त एव दण्डः "कूटकुरूपकं कुर्वतः कारयतो निपातयतो वा सहस्रदण्ड" इति' इति । ईदृशं मूलवाक्यं मृग्यम् ।

अथ खन्यध्यक्षव्यापारमाह — **खन्यध्यक्ष** इत्यादि । खन्यध्यक्षः स्वर्णरत्नाद्याकराधिकारी, शङ्खवज्रमणिमुक्ताप्रवालक्षारकर्मान्तान् शङ्खानां कर्मान्तान् पाटनघर्षणादिक्रियाः वज्रमणिमुक्ताप्रवालानां कर्मान्तान् खननशोधनरञ्जनादिक्रियाः क्षाराणां कर्मान्तान् यवक्षारादीनाम् उत्पादनादिक्रियाश्च, कारयेत् । पणनव्यवहारं च शङ्खादिक्रयविक्रयव्यवहारं च कारयेत् ।

लवणाध्यक्षव्यापारमाह—**लवणे**त्यादि । लवणाध्यक्षः, पाकमुक्तं परिणतं निष्पन्नं, लवणभागं भागार्पिताकरलभ्यं लवणस्य भागं, प्रक्रयं च प्रक्रयः परिपणः अमुकाकरस्यैतावल्लवणं देयमिति परिभाष्यार्पितादाकराल्लभ्यं चेत्यर्थः, यथाकालं क्लृप्तकालानतिक्रमेण, संगृह्णीयात् । तदिदं राजपण्यं वणिग्भिर्विक्रेतव्यम् । **विक्रयाच्चे**ति । विक्रयाच्च तद्विक्रयलब्धद्रव्याच्च, मूल्यं पण्यमूल्यं, रूपं पारीक्षिकमष्टभागिकलक्षणं, व्याजीं च पुनर्मीयमानोनतापरिहारार्थमधिकतया गृह्यमाणां मानव्याजीं च, संगृह्णीयादिति वर्तते ।

इत्थं राजपण्यसम्बद्धमभिधायागन्तुकपण्यसम्बद्धमाह— **आगन्तुलवणमिति** । आगन्तुलवणं परदेशागतं लवणम्, अर्थात् तद्विक्रेता, षड्भागं दद्यात् षष्ठं भागं राज्ञे दद्यात् । दत्तभागविभागस्य दत्तो राज्ञेऽर्पितः भागः षड्भागो विभागो मानव्याजी च येन तस्यागन्तुलवणव्यवहारिणः, विक्रयो भवति । विक्रये इति सप्तम्यन्तपाठस्तु श्रेयान् उत्तरग्रन्थेनैकवाक्यत्वस्य स्वरसतो लाभात् । न केवलं षड्भाग-मानव्याज्योर्द्वयोरेव दानं, किन्त्वन्येषामपि त्रयाणां तद् भवतीत्याह — **पञ्चकमित्या**दि । पणशते पणपञ्चकलक्षणां व्याजीं, पारीक्षिकं शतस्याष्टभागिकलक्षणं रूपशब्दवाच्यं, पणशते पणाष्टक-

रूपं च वैधरणं दद्यात् । अन्यत्रक्रेता षट्छतमत्ययं च ।

विलवणमुत्तमं दण्डं दद्यात्, अनिसृष्टोपजीवी च अन्यत्र वानप्रस्थेभ्यः । श्रोत्रियास्तपस्विनो विष्टयश्च भक्तलवणं हरेयुः ।

अतोऽन्यो लवणक्षारवर्गः शुल्कं दद्यात् ।

एवं मूल्यं विभागं च व्याजीं परिघमत्ययम् ।
शुल्कं वैधरणं दण्डं रूपं रूपिकमेव च ॥
खनिभ्यो द्वादशविधं धातुं पण्यं च संहरेत् ।
एवं सर्वेषु पण्येषु स्थापयेन्मुखसङ्ग्रहम् ॥

लक्षणं रूपिकसंज्ञं च, दद्यादित्यनुषज्यते । क्रेतेति । क्रेता शुल्कं दद्यात्, नतु विक्रेता । राजपण्यच्छेदानुरूपं राजपण्याद् विक्रीयमाणाद् यश्छेदः यावन्नष्टं तदनुरूपं, वैधरणं वैधरणशब्दितं छिन्नपूरणं च दद्यात् । अन्यत्रक्रेता विद्यमाने राजपण्येऽन्यतो लवणं क्रीणानः, षट्छतम्, अत्ययं च दण्डं च, दद्यात् ।

विलवणमिति । विलवणं विड(कृतकलवण)मृदादिमिश्रं लवणम्, अर्थात् तथाविधलवणव्यवहर्ता, उत्तमं दण्डम् उत्तमसाहसं, दद्यात् । अनिसृष्टोपजीवी च यो राजाननुमत एव लवणमुत्पाद्योपजीवति स च, उत्तमं दण्डं दद्यात् । तत्रापवादमाह — वानप्रस्थेभ्योऽन्यत्र वानप्रस्थान् विहाय । तेषां त्वनिसृष्टोपजीविनां न दण्ड इत्यर्थः । **श्रोत्रिया** इति । श्रोत्रियाः वेदाध्यायिनः, तपस्विनः दीनाः, विष्टयः हठकारितकर्मकारिणश्च, भक्तलवणम् अन्नाभ्यवहारमात्रपर्याप्तं लवणं, हरेयुः विनैव शुल्कं नयेयुः ।

अत इति । अतोऽन्यः उक्तादितरः, लवणक्षारवर्गः 'सैन्धव-सामुद्र-विड-यवक्षार-सौवर्चलोद्भिदजा लवणवर्गः' इति 'फाणित-गुड-मत्स्यण्डिका-खण्ड-शर्कराः क्षारवर्गः' इति च कोष्ठागाराध्यक्षे वक्ष्यमाणो लवणवर्गः क्षारवर्गश्च, अर्थात् तत्कर्ता, शुल्कं दद्यात् शुल्कमेव दद्यान्न तु व्याज्यादिकमित्यर्थः ।

अथ श्लोकानाह — **एवमित्यादि** । एवम् उक्तप्रकारेण, खनिभ्यः, मूल्यं प्रतीतं, विभागं षड्भागं, व्याजीं पञ्चकं शतं मानव्याजीत्युभयविधां, परिघं पारीक्षिकं धातुसमुत्थितानां तज्जातकर्मान्तेषु प्रयोगात् सिद्धं लाभविशेषं वा, अत्ययम् आश्रावितं दमं, शुल्कं प्रतीतं, वैधरणं छिन्नपूरणं, दण्डम्

आकरप्रभवः कोशः कोशाद् दण्डः प्रजायते ।
पृथिवी कोशदण्डाभ्यां प्राप्यते कोशभूषणा ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः आकरकर्मान्तप्रवर्तनम्,
आदितः त्रयस्त्रिंशः ॥

अश्रावितं दत्तं, रूपं रूप्यरूपं ताम्ररूपमिति द्विविधं, रूपिकम् अष्टकं शतं, धातुं सुवर्णरूप्यादिधातुं, पण्यं विक्रेयं च, द्वादशविधम् उक्तद्वादशप्रकारम् उपादानं, संहरेत् समुत्पादयेत् । एवं, सर्वेषु पण्येषु पणनयोग्येषु मध्ये, मुखसंग्रहं मुखमिव मुखं प्रधानं सारस्तस्य संग्रहं, स्थापयेत् ॥

आकरस्य सर्वार्थसाधकतामध्यायान्तिमश्लोकेन दर्शयति — **आकरे**-त्यादिना ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वादशोऽध्यायः आकरकर्मान्तप्रवर्तनम्,
आदितस्त्रयस्त्रिंशः॥

३१. प्रक. अक्षशालायां सुवर्णाध्यक्षः ।

सुवर्णाध्यक्षः सुवर्णरजतकर्मान्तानामसम्बन्धावेशनचतुश्शालामेकद्वारामक्षशालां कारयेत् । विशिखामध्ये सौवर्णिकं शिल्पवन्तमभिजातं प्रात्ययिकं च स्थापयेत् ।

जाम्बूनदं शातकुम्भं हाटकं वैणवं शृङ्गिशुक्तिजं, जातरूपं रसविद्धमाकरोद्गतं च सुवर्णम् ।

अक्षशालायां सुवर्णाध्यक्ष इति सूत्रम् । अक्षशालायां सुवर्णरूप्यादिनिर्माणशालायां, नियुक्तः सुवर्णाध्यक्षः अर्थात् तस्य व्यापार इहाभिधीयत इति तदर्थः । प्रक्रान्तायां कोशप्रकृतौ प्रधानभूतस्य सुवर्णादेरुत्पत्तिः समनन्तराध्याययोरुक्ता । तस्यावस्थान-जाति-वर्ण-गुणशोधन-दोषपरीक्षण-परिकर्मादिकथनपूर्वमर्जनं रक्षणं चेदानीमभिधीयते ।

सुवर्णाध्यक्ष इति । सुवर्णाध्यक्षः, सुवर्णरजतकर्मान्तानां सुवर्णरजतसम्बद्धानामलङ्कारादिघटनक्रियाणाम्, अक्षशालाम् अवस्थानभूतां शालां, कारयेत् । सुवर्णादिपरिकर्मस्थानमक्षशालेत्यभिधीयते । तां कीदृशीम्, असम्बन्धावेशनचतुश्शालाम् असम्बन्धानि परस्परानुपश्लिष्टानि आवेशनानि शिल्पकर्मस्थानभूतानि चतुश्शालानि पृथक् पृथक् चतस्रश्चतस्रः शाला यस्यां ताम् । असम्बाधावेशनेति पाठेऽप्ययमेवार्थः । एकद्वारां रक्षासौकर्यार्थं द्वारेणैकेन युक्तां च । विशिखामध्ये रथ्यामध्ये, सौवर्णिकं पौरजानपदानां रूप्यसुवर्णक्रयविक्रयकर्माधिकारिणं, स्थापयेत् । कथम्भूतं, शिल्पवन्तं क्षेपणादिवक्ष्यमाणकर्मनिपुणम्, अभिजातं कुलीनं, प्रात्ययिकम् उपधाशुद्धम् । चकाराज्जानपदत्वादिगुणयुक्तम् । सौवर्णिकस्य व्यापारः सौवर्णिकप्रचारे वक्ष्यते । तस्यात्र निर्देशः सुवर्णाध्यक्षाधीनत्वज्ञापनाय राजधनपौरजानपदधनानां रक्षाविधानतुल्यत्वज्ञापनाय च ।

अथ पञ्चविधं पञ्चवर्णं त्रियोनि सुवर्णमाह — **जाम्बूनदमिति** । सुवर्णं, जाम्बूनदं मेरुप्रभवजम्बूनदीसमुद्भूतं जम्बूफलरसवर्णं, शातकुम्भं शतकुम्भपर्वतोत्पन्नं पद्मकिञ्जल्कवर्णं, हाटकं हाटकाकरोत्पन्नम् अम्लानाख्यकुरण्टककुसुमसवर्णं, वैणवं वेणुपर्वतजं कार्णिकारपुष्पवर्णं, शृङ्गिशुक्तिजं सुवर्णभूमिजमिति भाषाटीका, तच्च मनश्शिलावर्णम् । इति पञ्चप्रकारस्य पञ्चवर्णस्य सुवर्णस्य त्रिविधामुत्पत्तिमाह — **जातरूपमिति** । जातरूपं स्वतः

किञ्जल्कवर्णं मृदु स्निग्धमनादि भ्राजिष्णु च श्रेष्ठं, रक्तपीतकं मध्यमं, रक्तमवरं श्रेष्ठानाम् ।

पाण्डु श्वेतं चाप्राप्तकम् । तद् येनाप्राप्तकं तच्चतुर्गुणेन सीसेन शोधयेत्, सीसान्वयेन भिद्यमानं शुष्कपटलैर्ध्मापयेत्, रूक्षत्वाद् भिद्यमानं तैलगोमये निषेचयेत् ।

आकरोद्गतं सीसान्वयेन भिद्यमानं पाकपत्राणि कृत्वा गण्डिकासु कुट्टयेत्, कन्दलीवज्रकन्दकल्के वा निषेचयेत् ।

तुत्थोद्गतं गौडिकं काम्बुकं चाक्रवालिकं च रूप्यम् । श्वेतं

सुवर्णमेवोत्पन्नं, रसविद्धं रसयोगेन काञ्चनीकृतम्, आकरोद्गतं च आकरगतमृत्पाषाणादिभ्यः पातितं च । क्रियावादोत्पन्नमित्यपि केचित् । तत्पक्षे चतुर्योनित्वं बोध्यम् । अत्रायं भट्टस्वामिनः श्लोकः—

"हेम्नः पञ्चप्रकारस्य त्रियोनेः पञ्च वर्णकाः ।
जम्बूकोकनदाम्लानकर्णिकारमनश्शिलाः ॥" इति ।

गुणानाह— **किञ्जल्के**त्यादि । किञ्जल्कवर्णं, मृदु तप्तमतप्तं चारूक्षं, स्निग्धम् अखरम्, अनादि नादरहितम्, अनुनादीति पाठे दीर्घनादं, भ्राजिष्णु भास्वरं च, सुवर्णं श्रेष्ठम् उत्तमोत्तमं भवति । रक्तपीतकं लोहितहारिद्रवर्णं मध्यमं श्रेष्ठानामेव मध्ये भवति । रक्तम् अवरम् उत्तमाधमं भवति ।

अथ शोधनप्रकारमाह—**पाण्डुश्वेतमि**ति । पाण्डु हरिणवर्णं, श्वेतं सितं च, अप्राप्तकं तत्संज्ञं द्रव्यान्तरयोगेनोत्तमवर्णतामप्राप्तमिति कृत्वा । तत् तथाविधं स्वर्णं, येनाप्राप्तकं येनापद्रव्येणाशुद्धतां गतं, तच्चतुर्गुणेन सीसेन, शोधयेद् आवर्तयेद् आ सीसक्षयात् । सीसान्वयेन सीसानुवेधेन, भिद्यमानं वियुज्यमानं, शुष्कपटलैः शुष्कारण्यगोमयैः, ध्मापयेत् । रूक्षत्वाद् भिद्यमानं, तैलगोमये तैले गोमये च, निषेचयेत् पुनःपुनरावर्त्य प्रक्षिपेत् ।

आकरोद्गतस्य शोधने विशेषमाह—**आकरोद्गतमि**ति । आकरोद्गतं सुवर्णं, सीसान्वयेन भिद्यमानं, पाकपत्राणि कृशपत्राणि, कृत्वा, गण्डिकासु काष्ठफलकेषु, कुट्टयेत् अर्थात् काष्ठेन । अथवा, कन्दलीवज्रकन्दकल्के कन्दली वल्लिभेदः वज्रं श्रीबेरं कन्दं पद्ममूलम् एतद्योगसिद्धे कषाये, निषेचयेत् ।

रूप्यं चतुर्विधमाह—**तुत्थोद्गतमि**ति । तुत्थोद्गतं तुत्थपर्वतजं जातिकुसुमाभं, गौडिकं कामरूपजं तगरकुसुमवर्णं, काम्बुकं कम्बुपर्वतोत्पन्नं, चाक्रवालिकं चक्रवालाकरोद्भूतं तदुभयं कुन्दपुष्पाभम् इति चतुर्धा रूप्यं श्रेष्ठम् ।

स्निग्धं मृदु च श्रेष्ठम् । विपर्यये स्फोटनं च दुष्टम् । तत् सीसचतुर्भागेन शोधयेत् ।

उद्गतचूलिकमच्छं भ्राजिष्णु दधिवर्णं च शुद्धम् ।

शुद्धस्यैको हारिद्रस्य सुवर्णो वर्णकः । ततः शुल्बकाकण्युत्तरापसारिता आ चतुस्सीमान्तादिति षोडश वर्णकाः ।

सुवर्णं पूर्वं निकष्य पश्चाद् वर्णिकां निकषयेत् । समरागलेखमनि-

---

तस्य श्वैत्यं स्निग्धत्वं मार्दवमिति त्रीन् गुणानाह — **श्वेतमित्यादि** । दोषानाह— **विपर्यय** इति । विपर्यये दुष्टम् उक्तगुणवैपरीत्ये दोषाः कृष्णत्वरूक्षत्वखरत्वरूपाः, स्फोटनं च दुष्टं भिद्यमानत्वं च दोष इत्याहत्य चत्वारो दोषाः । शुद्धिमाह— तद् दुष्टं रजतं, सीसचतुर्भागेन रजतप्रमाणचतुर्भागेन सीसेन, शोधयेत् ।

शुद्धस्य लक्षणमाह — **उद्गतचूलिकमित्यादि** । उत्थितबुद्बुदं, स्वच्छं, रुचिमत्, दधिप्रभं च शुद्धम् ।

अथ शुद्धसुवर्णस्य षोडश वर्णकानाह— **शुद्धस्येति** । शुद्धस्य स्वभावशुद्धस्य यथोक्तविधिशोधितस्य वा, हारिद्रस्य हरिद्राभङ्गभासुरस्य सुवर्णस्य, सुवर्णः षोडशमाषप्रमाणः एको वर्णकः शुद्धो भवति । ततः तस्मिन् वर्णके, शुल्बकाकणी शुल्बस्य ताम्रस्य काकणी माषचतुर्भागः, प्रक्षिप्तेति शेषः, उत्तरा अधिका सुवर्णकाकणी, अपसारिता तस्माद् वर्णकाद् अपनीता च, भवति । आ कुतः इमे काकणीप्रक्षेपापसारणे इत्यत्राह — आ चतुस्सीमान्तात् आ चतुर्माषावधेः आ षोडशकाकण्यवधेरित्यर्थः । इति एकादिषोडशान्तानां शुल्बकाकणीनां वर्णके मिश्रणं स्वर्णकाकणीनां वर्णकादपनयनं चेत्यनया रीत्या, षोडश वर्णकाः, मिश्राः सम्पद्यन्त इति शेषः । त एते शुद्धवर्णकेन सह सप्तदश भवन्ति । इह चतुरित्यनेन काकणीग्रहणे वर्णकषोडशत्वासिद्ध्या तत्सिद्धये षोडशपर्यन्तकाकण्यपेक्षणात् सामर्थ्याच्चतुर्माषग्रहणं विज्ञेयम् ।

निकषच्छेदतापलक्षणां त्रिविधां वर्णकपरीक्षामाह — **सुवर्णमिति** । सुवर्णं परीक्ष्यं, पूर्वं प्रथमं, निकष्य निकषे घर्षणेन दत्तरेखं कृत्वा, पश्चाद्, वर्णिकां, तद्वर्णकपरीक्षार्थं निकषयेत् । निरुपाधिकं निकषितमाह— **समरागे**त्यादि । समरागलेखं तुल्यरागया रेखया युक्तम्, अनिम्नोन्नते देशे निकषो-

श्रोन्नते देशे निकषितम् । परिमृदितं परिलीढं नखान्तराद्वा गैरिकेणावचूर्णितमुपधिं विद्यात् । जातिहिङ्गुलकेन पुष्पकासीसेन वा गोमूत्रभावितेन दिग्धेनाग्रहस्तेन संस्पृष्टं सुवर्णं श्वेतीभवति ।

सकेसरः स्निग्धो मृदुर्भ्राजिष्णुश्च निकषरागः श्रेष्ठः ।

कालिङ्गकस्तापीपाषाणो वा मुद्गवर्णो निकषः श्रेष्ठः । समरागी विक्रयक्रयहितः । हस्तिच्छविकः सहरितः प्रतिरागी विक्रयहितः । स्थिरः परुषो विषमवर्णश्चाप्रतिरागी क्रयहितः ।

छेदश्चिक्कणः समवर्णः श्लक्ष्णो मृदुर्भ्राजिष्णुश्च श्रेष्ठः ।

पलप्रदेशे, निकषितं, न्याय्यं भवतीति शेषः । व्याजनिकषितमाह — **परिमृदितमित्यादि** । परिमृदितं गाढनिकषितं वर्णोत्कर्षार्थं विक्रेता करोति । परिलीढम् अगाढनिकषितं वर्णापकर्षार्थं क्रेता करोति, हस्तेनोन्मृष्टलीढमिति स्वामी । नखान्तराद् गैरिकेण नखान्तरनिहितेन पीतधातुना, अवचूर्णितं प्रक्षिप्तचूर्णम् उत्कर्षार्थं विक्रेता तत्पक्ष्यो वा परीक्षकः करोति । इति त्रिविधम् उपधिं विद्यात् । उपधिमन्यमाह — **जातीत्यादि** । गोमूत्रभावितेन जातिहिङ्गुलकेन हंसपादाख्यहिङ्गुलकविशेषेण, पुष्पकासीसेन वा किञ्चित्पीतवर्णेन हरितालेन वा, दिग्धेन लिप्तेन, अग्रहस्तेन, संस्पृष्टं, सुवर्णं, श्वेतीभवति हीनवर्णं भवति । अयं क्रेतृप्रयोज्यो व्याजः ।

गुणानाह — **सकेसर** इति । सकेसरः बहुलकेसरः, स्निग्धो, मृदुः भ्राजिष्णुश्च, निकषरागः निकषरेखावर्णः, श्रेष्ठः ।

निकषगुणमाह — **कालिङ्गक** इति । कालिङ्गकः कलिङ्गदेशे महेन्द्रपर्वतादुत्पन्नः पाषाणः, तापीपाषाणो वा, तापी नाम आरट्टदेशवाहिनी नदी तद्गतः पाषाणो वा, मुद्गवर्णो निकषः श्रेष्ठः । समरागी यथास्थितवर्णग्राही, विक्रयक्रयहितः क्रेतृविक्रेत्रोरुभयोरप्यनुकूलः । हस्तिच्छविकः गजचर्मवत् खरशुष्कः, सहरितः हरितवर्णयुक्तः, प्रतिरागी अपकृष्टस्यापि सुवर्णस्य रागोत्कर्षप्रदर्शकः, विक्रयहितः विक्रेतुरनुकूलः । स्थिरः दृढः, परुषः खरः, विषमवर्णः नानावर्णश्च, अप्रतिरागी उत्कृष्टस्यापि सुवर्णस्य यथास्थितरागाप्रदर्शकः निकषः, क्रयहितः क्रेतुरनुकूलः ।

निकषमुक्त्वा छेदमाह — **छेद** इति । छेदः छिन्नः स्वर्णखण्डः । चिक्कणः स्निग्धः, समवर्णः बहिरन्तश्च तुल्यवर्णः, श्लक्ष्णः मसृणः, मृदुः भ्राजिष्णुश्च श्रेष्ठः ।

तापे बहिरन्तश्च समः किञ्जल्कवर्णः कुरण्डकपुष्पवर्णो वा श्रेष्ठः। श्यावो नीलश्चाप्राप्तकः।

तुलाप्रतिमानं पौतवाध्यक्षे वक्ष्यामः। तेनोपदेशेन रूप्यसुवर्णं दद्यादाददीत च।

अक्षशालामनायुक्तो नोपगच्छेत्। अभिगच्छन् उच्छेद्यः। आयुक्तो वा सरूप्यस्वर्णस्तेनैव जीयेत। विचितवस्त्रहस्तगुह्याः काञ्चनपृषतत्वष्टृतपनीयकारवो ध्मायकचरकपांसुधावकाः प्रविशेयुर्निष्कसेयुश्च। सर्वं चैषामुपकरणमनिष्ठिताश्च प्रयोगास्तत्रैवावतिष्ठेरन्। गृहीतं सुवर्णं धृतं च प्रयोगं करणमध्ये दद्यात्। सायं प्रातश्च लक्षितं कर्तृकारयितृमुद्राभ्यां निदध्यात्।

अथ तापमाह—ताप इति। अग्नितापितः स्वर्णभागः, बहिरन्तश्च समः समानवर्णः, तापनात् पूर्वं पश्चाच्च किञ्जल्कवर्णः, कुरण्डकपुष्पवर्णो वा अम्लानकुसुमवर्णो वा, श्रेष्ठः। श्यावः कपिशः, नीलश्च, अप्राप्तकः तत्संज्ञः अशुद्ध इति यावत्।

अथ रूप्यसुवर्णयोरुन्मानविध्यपेक्षायामाह — तुलेत्यादि। तुलाप्रतिमानं तुलापरिच्छेदविधिं, पौतवाध्यक्षे तुलामानपौतवप्रकरणे, वक्ष्यामः। इयमनागतावेक्षणरूपा तन्त्रयुक्तिः। तेनोपदेशेन तत्प्रकरणोक्तमानविधिना, रूप्यसुवर्णं, दद्याद्, आददीत च गृह्णीयाच्च।

पालनविधिमाह — अक्षशालामिति। अक्षशालाम्, अनायुक्तः अनधिकृतः, नोपगच्छेत्। अभिगच्छन् वारितोऽप्यभिमुखं गच्छन्, उच्छेद्यः हृतसर्वस्वः कर्तव्यः। आयुक्तो वा नियुक्तोऽपि वा, सरूप्यस्वर्णः रूप्यस्वर्णसहितो, गच्छन्, तेनैव रूप्येण स्वर्णेन च, जीयेत दण्ड्येत। विचितेत्यादि। विचितवस्त्रहस्तगुह्याः वस्त्रं हस्तौ गुह्यं च विचितं रूप्यस्वर्णयुक्तं न वेति परीक्षितं येषां ते तथाविधाः भूत्वा, काञ्चनपृषतत्वष्टृतपनीयकारवः काञ्चनकारवः रसवेधस्वर्णीकरणशिल्पिनः पृषतकारवो गुलिकादिसूक्ष्मशिल्पकारिणः त्वष्टृकारवः पट्टपात्रादिशिल्पिनः तपनीयकारवः नानाजातीयभूषणशिल्पिनश्च, ध्मायकचरकपांसुधावकाः भस्त्राध्मायकाः परिचारकाः धूलिशोधकाश्च, प्रविशेयुः अक्षशालां निष्कसेयुश्च ततो निर्गच्छेयुश्च। सर्वं चेति। एषां कारुप्रभृतीनां, सर्वम् उपकरणम्, अनिष्ठिताः प्रयोगाश्च असमाप्तानि शिल्पानि च, तत्रैव अवतिष्ठेरन् अक्षशालातो बहिर्न नीयेरन्। गृहीतमिति। गृहीतं भाण्डागाराद्

क्षेपणो गुणः क्षुद्रकमिति कर्माणि । क्षेपणः काचार्पणादीनि । गुणः सूत्रवानादीनि । घनं सुषिरं पृषतादियुक्तं क्षुद्रकमिति ।

अर्पयेत् काचकर्मणः पञ्चभागं काञ्चनं दशभागं कटुमानम् । ताम्रपादयुक्तं रूप्यं रूप्यपादयुक्तं वा सुवर्णं संस्कृतकं तस्माद् रक्षेत् ।

पृषतकाचकर्मणः त्रयो हि भागाः परिभाण्डं द्वौ वास्तुकम् । चत्वारो वा वास्तुकं त्रयः परिभाण्डम् ।

आत्मनोपात्तं सुवर्णं, प्रयोगं च यत्र सुवर्णं प्रयुक्तं तं पदार्थं च, करणमध्ये धृतं दद्यात् करणानां राजलेखकानां स्वस्वपुस्तकेष्वर्थं लिखतां साक्षिभूतानां मध्ये तुलाधृतं कृत्वा प्रत्यर्पयेत्, अर्थात् सुवर्णाध्यक्षः । सायं प्रातश्च दैनन्दिनव्यापारस्यावसाने प्रारम्भे च, कर्तृकारयितृमुद्राभ्यां लक्षितं कर्तृकारयित्रोः सौवर्णिकसुवर्णाध्यक्षयोर्मुद्राभ्यां चिह्नितं, स्थापयेत्, सुवर्णम् । करणमध्य इत्येव ।

अथ कर्म त्रिधा विभज्य व्याचष्टे—**क्षेपण** इत्यादि । क्षेपणः तदाख्यं कर्म, काचार्पणादीनि मणिसंयोजनादीनि । गुणः तत्कर्म, सूत्रवानादीनि कटिसूत्रग्रथनादीनि । क्षुद्रकं सूक्ष्मपरिकर्म, घनं कटकाङ्गुलीयकादि सुषिरं सरन्ध्रं स्थालभृङ्गारादि, पृषतादियुक्तं पृषतो गुटिका आदिपदात् पत्रभङ्गादि तद्युक्तम् । इतिशब्दः प्रकारान्तरसंग्रहार्थः ।

अर्पयेदिति । काचकर्मणः मणिसंयोजनस्य विधिरुच्यत इति वाक्यशेषः । पञ्चभागं मणेः पञ्चमं भागं तलभागं काञ्चनम् अर्पयेद् आधारसुवर्णे प्रवेशयेत् । दशभागं काञ्चनप्रवेशितस्य भागस्यार्धं, कटुमानम् अर्पयेत् मणिदार्ढ्यार्थो वास्तुकोपरिसुवर्णपट्टिकाबन्धः कटुमानमित्युच्यते । तत्र प्रवेशयेदित्यर्थः । रत्नार्पणाधारबन्धे रूप्यमये ताम्रपादयोजनेन तावद्रूप्यहरणं, सुवर्णमये रूप्यपादयोजनेन तावत्सुवर्णहरणं च पश्यतोहरैः सुकरं यतः, तस्मात् कारणाद् आधारबन्धो द्रव्यान्तरमिश्रणाद् यत्नेन रक्षणीय इत्युपदिशति—**ताम्रपादे**त्यादि । संस्कृतकं, यथोक्तमिश्रणाशुद्धमपि रूप्यं सुवर्णं वा शुद्धसदृशं प्रतिभायादित्यर्थः ।

शुद्धकाचकर्मविधिमुक्त्वा मिश्रकाचकर्मविधिमाह—**पृषते**त्यादि । पृषतकाचकर्मणः गुटिकामिश्रकाचकर्मणि क्रियमाणे, तदर्थं सुवर्णं पञ्चधा विभज्य त्रयो भागाः, परिभाण्डं पद्मस्वस्तिकाद्याकारं पृषतमणिप्रतिवापस्थानं भवति, द्वौ वास्तुकं द्वौ भागौ आधारपीठबन्धः । इत्येकः प्रकारः । यदि मणयः स्थूलास्तदा विधिमाह—**चत्वारो वे**त्यादि ।

त्वष्टृकर्मणः। शुल्बभाण्डं समसुवर्णेन संयूहयेत्। रूप्यभाण्डं घनं घनसुषिरं वा सुवर्णार्धेन अवलेपयेत्। चतुर्भागसुवर्णं वालुकाहिङ्गुलकस्य रसेन चूर्णेन वा वासयेत्।

तपनीयं ज्येष्ठं सुवर्णं सुरागं, समसीसातिक्रान्तं पाकपत्रपक्वं सैन्धविकयोज्ज्वालितं नीलपीतश्वेतहरितशुकपोतवर्णानां प्रकृतिर्भवति। तीक्ष्णं चास्य मयूरग्रीवाभं श्वेतभङ्गं चिमिचिमायितं पीतचूर्णितं काकणिकः सुवर्णरागः।

त्वष्टृकर्माह— **त्वष्टृ**त्यादि। त्वष्टृकर्मणः ताम्ररजतनिर्मितघनपत्रादिकर्मणः विधिरुच्यत इति शेषः। शुल्बभाण्डं ताम्रभाण्डं, समसुवर्णेन संयूहयेत् ताम्रपलतुल्यपलेन सुवर्णेन दृढपत्रीकृतेन संयोजयेत्। रूप्यभाण्डं, घनम् अङ्गुलीयककङ्कणादि, घनसुषिरं वा स्थालीकलशभृङ्गारादिकं वा, सुवर्णार्धेन अवलेपयेत् रूप्यपलशतकृतं भाण्डं पञ्चाशता सुवर्णपलैस्तनुपत्रीकृतैरेव श्लेषयेत्। अवलेपविधिमुक्त्वा वासनाविधिमाह— **चतुर्भागसुवर्णमिति**। रूप्यभाण्डमिति वर्तते। अयमर्थः —रूप्यपलशतकृतं भाण्डं पञ्चविंशतिपलसुवर्णेन चूर्णीकृतेन वालुकाहिङ्गुलकचूर्णमिश्रेण पारतयुक्तेन तुषाग्निद्रवीकृतेन वासयेत्। एवं तावत् सुवर्णस्य समस्यार्धस्य चतुर्भागस्य च योजनेन त्रिप्रकारं त्वष्टृकर्म व्युत्पादितम्।

तपनीयकर्माह — **तपनीयमित्यादि**। तपनीयम् अलङ्कारार्थं घटनीयं कनकं, ज्येष्ठम् उत्तमं सप्तदशवर्णकं षोडशवर्णकं वा, सुवर्णं किञ्जल्काद्यन्यतमवर्णं, सुरागं स्निग्धभ्राजिष्णुरागं, नीलपीतादीनां पञ्चानां प्रकृतिः कारणं भवति। अनेवम्भूताशुद्धस्वर्णविषये आह — **समसीसेत्यादिना**। समसीसातिक्रान्तं तत्तुल्यमानसीसशोधितं, पाकपत्रपक्वं तनुपत्रात्मकं कृत्वारण्यगोमयदग्धं, सैन्धविकया सौराष्ट्रमृत्तिकया सह उज्ज्वालितम्, इत्थं शोधनेन संस्कृतं, नीलादीनां प्रकृतिर्भवति। **तीक्ष्णं चेति**। अस्य तपनीयस्य, तीक्ष्णं तदाख्यो लोहविशेषश्च, प्रकृतिर्भवतीत्यनुवर्तते, अर्थान्नीलादीनां पञ्चानाम्। कीदृशं तीक्ष्णं मयूरग्रीवाभं, श्वेतभङ्गं छेदे शुक्लं, चिमिचिमायितम् अत्यन्तभास्वरम्, ईदृशं तीक्ष्णं, पीतचूर्णितं तप्तचूर्णीकृतं स्वर्णे प्रक्षिप्तमित्यार्थम्। कियति स्वर्णे कियत् तीक्ष्णं रञ्जनार्थं प्रक्षेप्तव्यमित्यत्राह — **काकणिक इति**। सुवर्णरागः षोडशमाषप्रमाणस्य सुवर्णस्य रागो रञ्जकस्तीक्ष्णांशः, काकणिकः काकणी माषचतुर्भागस्तत्प्रमाणकः।

तारमुपशुद्धं वा। अस्थितुत्थे चतुः, समसीसे चतुः, शुष्कतुत्थे चतुः, कपाले त्रिर्गोमये द्विः, एवं सप्तदशतुत्थातिक्रान्तं सैन्धविकयोज्ज्वालितम्। एतस्मात् काकण्युत्तरापसारिता। आ द्विमाषादिति सुवर्णे देयं, पश्चाद् रागयोगः। श्वेततारं भवति।

त्रयोंऽशाः तपनीयस्य द्वात्रिंशद्भागश्वेततारमूर्छितं तत् श्वेतलोहितकं भवति। ताम्रं पीतकं करोति।

स्वर्णानन्तरं रूप्यमाह — **तारमित्यादि**। उपशुद्धम् अत्यन्तशुद्धं, तारं रजतं, वाशब्दो विकल्पे। नीलादीनां प्रकृतिर्भवतीत्यनुवर्तते। तारस्याशुद्धस्य शोधनप्रकारमाह—**अस्थितुत्थ** इति। अस्थितुत्थे अस्थिचूर्णयुक्तमृत्तिकानिर्मितायां मूषायां, चतुः चतुर्वारान्, आवर्तितम्, एवं समसीसे मृत्तिकासीससमप्रमाणनिर्मिते तुत्थे चतुः, शुष्कतुत्थे 'शुष्कतुत्थः कटुशर्करामूषा' इति भट्टस्वामी, तस्यां चतुः, कपाले शुद्धमृत्तिकामूषायां त्रिः, गोमये गोमयकृतमूषायां द्विः, एवं सप्तदशतुत्थातिक्रान्तं सप्तदशमूषावर्तितं, पश्चात्, सैन्धविकया लवणयुक्तसौराष्ट्रमृत्तिकया सह, उज्ज्वालितम् उज्ज्वलनसंस्कृतं, शुद्धमित्यार्थम्। एतस्मात् काकणी उक्तरीत्या शोधिताद् रूप्यात् काकणी, सुवर्णे प्रक्षिप्ता, उत्तरा अपसारिता अधिका सुवर्णकाकणी अपनीता भवति। इति आ द्विमाषात् सुवर्णे देयम् एवं सुवर्णकाकण्यपनयनपूर्वकरूप्यकाकणीप्रक्षेपोपचयक्रमेण अष्टकाकण्यधिकः सुवर्णे रूप्यप्रक्षेपः कर्तव्यः। पश्चाद्, रागयोगः रागयोगार्थो यथोक्ततीक्ष्णकाकणीप्रक्षेपः। श्वेततारं भवति एवं करणे स्वर्णं श्वेततारसमप्रभं संपद्यते। केचित्तु श्वेततारं रागार्थं भवतीति व्याचक्षते।

रागयोगमाह — **त्रयोंऽशा** इत्यादि। एवं स्वामी व्याचष्टे — सामान्यसुवर्णाद् द्वात्रिंशद्धा विभक्ताद् अंशत्रयमपनीय, तपनीयस्य यथोक्तप्रकारशोधिततपनीयस्य, त्रयोंऽशाः सामान्यस्वर्णे प्रक्षिप्यन्त इति शेषः। तत् स्वर्णं, द्वात्रिंशद्भागश्वेततारमूर्छितं द्वात्रिंशद्भागिकेन श्वेतरजतेन सहावर्तितं सत्, श्वेतलोहितकं भवति.श्वेतलोहितात्मकवर्णद्वयसम्भिन्नं भवति। ताम्रं कर्तृ, पीतकं पीतवर्णं करोति, अर्थात् तदेव सामान्यस्वर्णं कर्म। इहापि पूर्ववत् 'त्रयोंऽशा' इत्यादि योजनीयं, श्वेततारस्थाने च ताम्रम्। तथाच तत् स्वर्णं द्वात्रिंशद्भागिकताम्रेण सहावर्तितं सत् पीतवर्णं जायत इत्युक्तं भवति। भाषाटीका त्वन्यथा व्याचष्टे — द्वात्रिंशति भागेषु त्रयोंऽशास्तपनीयस्य, शेषास्तु रजत-

तपनीयमुज्ज्वाल्य रागत्रिभागं दद्यात् । पीतरागं भवति ।

श्वेततारभागौ द्वावेकस्तपनीयस्य मुद्गवर्णं करोति ।

कालायसस्यार्धभागाभ्यक्तं कृष्णं भवति । प्रतिलेपिना रसेन द्विगुणाभ्यक्तं तपनीयं शुकपत्रवर्णं भवति । तस्यारम्भे रागविशेषेषु प्रतिवर्णिकां गृह्णीयात् ।

तीक्ष्णताम्रसंस्कारं च बुध्येत । तस्माद् वज्रमणिमुक्ताप्रवालरूपाणामपनेयिमानं च रूप्यसुवर्णभाण्डबन्धप्रमाणानि चेति ।

स्येत्येवं मिश्रयित्वावर्तने कृते तच्छ्वेतलोहितवर्णं भवति । एवं द्वात्रिंशद्भागात्मके ताम्रे शुद्धसुवर्णस्य त्रीन् भागान् योजयित्वावर्तने कृते तत् पीतरागं भवतीति ।

तपनीयमुज्ज्वाल्येति । तपनीयं सामान्यस्वर्णं, सैन्धविकयोज्ज्वाल्य, रागत्रिभागं शोधितस्वर्णत्रिभागं, दद्यात् । पीतरागं भवति तथाकरणे तत् सामान्यस्वर्णं पीतरागं पीतरक्तं भवति । अपरा व्याख्या—तपनीयं शोधितसुवर्णं सैन्धविकयोज्ज्वाल्य तत्र रागत्रिभागं ताम्रत्रिभागं दद्यात् । तत् पीतरागं भवतीति ।

द्विगुणशुद्धरूप्ययुक्तं शुद्धसुवर्णमावर्तितं मुद्गवर्णं भवतीत्याह—**श्वेततारभागावित्यादि** । पश्चाद्रागयोग इति सर्वशेषो द्रष्टव्यः ।

कालायसस्येति । कालायसस्य तीक्ष्णस्य, अर्धभागाभ्यक्तम् अर्धभागेन रागार्थस्य तीक्ष्णस्य प्रमाणं तृतीयांश उक्तः तदर्धभागेन अर्थात् षड्भागेन अभ्यक्तमनुलिप्तं न त्वावर्तितं, तपनीयं, कृष्णम् अञ्जनवर्णं, भवति । प्रतिलेपिना द्रवीकृतेन कालायसेन, रसेन पारतयुक्तेन, द्विगुणाभ्यक्तं द्विगुणमनुलिप्तं, तपनीयं, शुकपत्रवर्णं भवति । **तस्येति** । तस्य नीलादेरुक्तस्य, आरम्भे, रागविशेषेषु शुद्धाशुद्धस्वर्णरजतरूपेषु रञ्जकभेदेषु विषये, प्रतिवर्णिकां तारतम्यपरिच्छेदार्थं, गृह्णीयात् ।

रञ्जनार्थतीक्ष्णताम्रयोः शुद्धिपरिज्ञानापेक्षायामाह—**तीक्ष्णेत्यादि** । तीक्ष्णताम्रयोः संस्कारं शोधनं, बुध्येत धातुशोधनशास्त्राज्जानीयात् । तस्मात् सुवर्णरजतादिशुद्धिप्रकारज्ञानस्य यो हेतुः कारुहरणशङ्कारूपस्तेनैव हेतुनेत्यर्थः, वज्रमणिमुक्ताप्रवालरूपाणाम्, अपनेयिमानं च असारहीरमाणिक्यादिप्रक्षेपेण सारहीरमाणिक्यादिपरिवर्तनादिकं हरणप्रकारं च, रूप्यसुवर्णभाण्डबन्धप्रमा-

समरागं समद्वन्द्वमसक्तपृषतं स्थिरम्।
सुप्रमृष्टमसंपीतं विभक्तं धारणे सुखम्॥
अभिनीतं प्रभायुक्तं संस्थानमधुरं समम्।
मनोनेत्राभिरामं च तपनीयगुणाः स्मृताः॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः,
आदितश्चतुस्त्रिंशः॥

णानि च रूप्यसुवर्णाभरणादीनां संव्यूहनादीनि च 'शुल्बभाण्डं समसुवर्णेन संयूहयेत्' इत्यादिनोक्तानि, बुध्येतेति सम्बध्यते। इतिशब्दः प्रकारे।

अध्यायान्ते श्लोकद्वयं तपनीयगुणचतुर्दशकप्रतिपादकमाह— **समरागमित्यादि**। समरागं समवर्णिकं, समद्वन्द्वं तोलनतो वर्णतश्च स्वसमानद्वितीयम्, असक्तपृषतम् असंसक्तगुटिकं, स्थिरम् अविसंवादि, सुप्रमृष्टं पूर्वोक्तविधिना सैन्धविकया सम्यगुज्ज्वालितम्, अप्रमृष्टमिति पाठे अकृत्रिमच्छायम्, असम्पीतं छायोत्कर्षार्थं पायितं न भवति, विभक्तं सुविभक्तावयवं, धारणे सुखम् आमुच्यताम् अदुःखकरम्, अभिनीतम् अनुद्धृणं, प्रभायुक्तं द्युतिमत्, संस्थानमधुरम् आकृतिरमणीयं, समम् अनिम्नोन्नतप्रदेशं, मनोनेत्राभिरामं मनोहरं दृष्टिसुखं च, तपनीयगुणाः स्वर्णाभरणगुणाः॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोदशोऽध्यायः अक्षशालायां सुवर्णाध्यक्षः,
आदितः चतुस्त्रिंशः॥

३२. प्रक. विशिखायां सौवर्णिकप्रचारः ।

सौवर्णिकः पौरजानपदानां रूप्यसुवर्णमावेशनिभिः कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः, अनिर्दिष्टकालं कार्यापदेशम् ।

कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः । कार्यस्यान्यथाकरणे वेतननाशः तद्द्विगुणश्च दण्डः ।

यथावर्णप्रमाणं निक्षेपं गृह्णीयुस्तथाविधमेवार्पयेयुः, कालान्तरादपि च तथाविधमेव प्रतिगृह्णीयुरन्यत्र क्षीणपरिशीर्णाभ्याम् ।

विशिखायां सौवर्णिकप्रचार इति सूत्रम् । विशिखायां विशिखेह सौवर्णिकविपणिः तस्यां, सौवर्णिकप्रचारः सौवर्णिकस्य सुवर्णे नियुक्तस्य प्रचारो व्यापारः, सोऽभिधीयत इत्यर्थः । पूर्वाध्याये शिल्पवत्त्वाभिजात्यप्रात्ययिकत्वादिगुणयुक्तं विशिखायां सौवर्णिकं कुर्यादित्युक्तम् । तस्य व्यापारस्तु नोक्तः । स इहोच्यत इति सम्बन्धः ।

सौवर्णिक इति । सौवर्णिकः, पौरजानपदानां पुरवासिनां बहिर्विषयवासिनां च, रूप्यसुवर्णं रूप्यशिल्पं सुवर्णशिल्पं च, आवेशनिभिः शिल्पिशालीयैः सुवर्णकारादिभिः, कारयेत् । निर्दिष्टकालकार्यं च कर्म कुर्युः इयता कालेनेदृशं कटकाङ्गदादि निर्मायार्पणीयम् एतावच्च वेतनमिति परिभाषणपूर्वं शिल्पं कुर्युः, अर्थादावेशनिनः । कार्यापदेशम् अनिर्दिष्टकालमिति निर्मातव्यवस्तुगौरवनिमित्तं तु अपरिभाषितकालमपि कर्म कुर्युः ।

कालातिपातन इति । परिभाषितकालातिक्रमे, पादहीनं परिभाषितचतुर्भागहीनं, वेतनं भवति, तद्द्विगुणः गृह्यमाणवेतनद्विगुणः दण्डश्च भवति । कार्यस्यान्यथाकरणे कटकं परिभाष्य केयूरादिकरणे, वेतननाशः, तद्द्विगुणः नष्टवेतनद्विगुणः, दण्डश्च भवति । कण्टकशोधने कारुकरक्षणे कारूणां सर्वेषां दण्ड उक्तः. सुवर्णकारूणां त्विह दण्डकथन विशेषज्ञापनार्थं — कार्वन्तरदण्डवत् सुवर्णकारुदण्डं प्रशास्तारः केवला न कुर्युः किन्तु सौवर्णिकसहिता एव कुर्युरिति ।

यथावर्णेत्यादि । निक्षेपं घटनीयरूप्यसुवर्णादि, यथावर्णप्रमाणं यद्वर्णिकं यत्प्रमाणं च, गृह्णीयुः, तथाविधमेव तत्प्रकारमेव न तु लेशतोऽपि वर्णप्रमाणयोर्हीनम्, अर्पयेयुः कारवः । कालान्तरादपि चेति ग्रहीतुः कारुकस्य दीर्घप्रवासादिना मरणादिना वा निमित्तेन तत्पुत्रादिहस्तादपि च, तथाविधमेव

आवेशनिभिः सुवर्णपुद्गललक्षणप्रयोगेषु तत्तज्जानीयात् ।

तप्तकलधौतकयोः काकणिकः सुवर्णे क्षयो देयः । तीक्ष्णकाकणी रूप्यद्विगुणा रागप्रक्षेपस्तस्य षड्भागः क्षयः ।

वर्णहीने माषावरे पूर्वः साहसदण्डः, प्रमाणहीने मध्यमः, तुलाप्रतिमानोपधावुत्तमः, कृतभाण्डोपधौ च ।

प्रतिगृह्णीयुः स्वार्पितवर्णप्रमाणकमेव निक्षेपं प्रतिगृह्णीयुः, न तु तदभ्यधिकवर्णप्रमाणकं कालातिपातदोषापदेशेन प्रार्थयेयुः, न वा पुत्रादीनां वेतनहानिर्दण्डो वेत्यभिप्रायः । अपरा व्याख्या — कालान्तरादपि देशविभ्रमादिनिमित्ते कालातिपाते जातेऽपि, तथाविधमेव यथानिक्षिप्तमघटितमेव, अर्पयेयुः कारवः, निक्षेपकाश्च प्रतिगृह्णीयुरिति । तत्रापवादमाह — क्षीणपरिशीर्णाभ्यामन्यत्र उपभोगघृष्टं प्रच्युतावयवं च निक्षेपमपहाय । क्षीणपरिशीर्णयोस्तु दण्डो दाप्य एव ।

आवेशनिभिरिति । सुवर्णपुद्गललक्षणप्रयोगेषु सुवर्णः किञ्जल्कवर्णादिः पुद्गलम् आभरणभृङ्गारादि लक्षणं मुद्रा एतेषां स्वर्णादिसम्बन्धिनां प्रयोगेषु व्यवहारेषु हरणोपायानुष्ठानेषु वा, तत्तत् छलमच्छलं च ज्ञेयं सर्वं वस्तुतत्त्वम्, आवेशनिभिर्जानीयात् शिल्पिद्वारेण विद्यात्, सौवर्णिकः ।

'अन्यत्र क्षीणपरिशीर्णाभ्यामि'त्युक्तस्य प्रतिप्रसवमाह — तप्तेत्यादि । तप्तकलधौतकयोः अशुद्धस्वर्णरजतयोर्विषये, सुवर्णे काकणिकः षोडशमाषके माषचतुर्भागप्रमाणः, क्षयो देयः निक्षेपं घटितं तावन्मात्रन्यूनमेव निक्षेपकः प्रतिगृह्णीयात् । तीक्ष्णकाकणी कालायसकाकणी, रूप्याद्विगुणा रजतकाकणीद्वयसुक्ता, रागप्रक्षेपः रागार्थं षोडशमाषकस्वर्णे प्रक्षेप्तव्येत्यर्थः । तस्य षड्भागः प्रक्षिप्तकाकणीत्रयस्य षड्भागः अर्धादर्धकाकणिकः, क्षयः देयो भवति ।

अथ दण्डमाह — वर्णेत्यादि । माषावरे वर्णहीने माषप्रमाणे सुवर्णे उत्कृष्टवर्णहानिं नीते सति, पूर्वः साहसदण्डः । माषावरे प्रमाणहीने प्रतिमानहानिं नीते सति, मध्यमः साहसदण्डः । तुलाप्रतिमानोपधौ न केवलं माषमात्रप्रतिमानहानिः, किन्तु हापितप्रतिमानस्य पूरणकैतवमपि यत्र प्रयुज्यते तादृशे विषय इत्यर्थः, उत्तमः साहसदण्डः । कृतभाण्डोपधौ च माषावरविषये घटितरूपपरिवर्तनादिकैतवे च, उत्तमः साहसदण्डः । अनया दिशा द्विमाषत्रिमाषादिविषयहान्यादौ तत्तद्दण्डद्वैगुण्यत्रैगुण्यादिकमूह्यम् ।

सौवर्णिकेनादृष्टमन्यत्र वा प्रयोगं कारयतो द्वादशपणो दण्डः, कर्तुर्द्विगुणः, सापसारश्चेत्। अनपसारः कण्टकशोधनाय नीयेत। कर्तुश्च द्विशतो दण्डः पणच्छेदनं वा।

तुलाप्रतिमानभाण्डं पौतवहस्तात् क्रीणीयुः। अन्यथा द्वादशपणो दण्डः।

घनं घनसुषिरं संयूह्यमवलेप्यं सङ्घात्यं वासितकं च कारुकर्म।

तुलाविषममपसारणं विस्रावणं पेटकः पिङ्कश्चेति हरणोपायाः।

सन्नामिन्युत्कीर्णिका भिन्नमस्तकोपकण्ठी कुशिक्या सकटुकक्ष्या

सौवर्णिकेनाननुमतं विशिखायाम्, अनुमतमपि वा विशिखातोऽन्यत्रालङ्कारादिनिर्माणं कारयतः कर्तुश्च दण्डमाह — **सौवर्णिकेने**त्यादि। सापसारश्चेदिति कारयिता यदि सापसारस्तदायं दण्ड इत्यर्थः। अपसारोऽपसरणं तच्च स्वर्णादेः स्वामिशुद्धागमप्रतिपादनेन चोरशङ्काकलङ्कादात्मव्यावृत्तिः, तद्वान् सापसारः। अनपसारविषये त्वाह — **अनपसार** इति। अनपसारश्चेत् कारयिता, कण्टकशोधनाय वाक्यकर्मानुयोगादिना शुद्धाशुद्धत्वनिर्णयाय, नीयेत प्रदेष्टृसन्निधिम्। कर्तुश्च स्वर्णकारादेरनपसारस्य, द्विशतो दण्डो भवति। तस्य द्विशतपणदण्डदानासामर्थ्ये त्वाह — **पणच्छेदनं वे**ति। पणच्छेदनं पणनसाधनपञ्चाङ्गुलिच्छेदनम्।

तुलाप्रतिमानेत्यादि। तुलाप्रतिमानभाण्डं तुलाप्रतिमानसाधनं माषद्विमाषादिकम्, उपलक्षणात् प्रस्थद्रोणादिकं मानसाधनं च, पौतवहस्तात् वक्ष्यमाणपौतवाध्यक्षसकाशात्, क्रीणीयुः क्रीत्वा तेन व्यवहरेयुः सुवर्णकारादयः। तुलामानभाण्डमिति पाठे तुलाभाण्डं माषद्विमाषादिकं मानभाण्डं प्रस्थद्रोणादिकं चेति व्याख्येयम्। अन्यथा स्वयं निर्माणेऽन्यतः क्रयणे वा, द्वादशपणो दण्डः।

अथ हरणोपायद्वारभूतं कारोः कर्म षट्प्रकारमाह — **घनमि**त्यादि। घनम् अङ्गुलीयकादि, घनसुषिरं भृङ्गारादि, संयूह्यं स्थूलपत्रयोजनम्, अवलेप्यं लघुपत्रयोजनं, सङ्घात्यं कटिसूत्रादि, वासितकं रसादिना वासितम्।

तेषु कर्मसु प्रयोज्यान् पञ्च हरणोपायान् नामत उद्दिशति — **तुले**त्यादि।

तत्र तुलाविषममाह — **सन्नामिनी**त्यादि। सन्नामिनी मृदुलोहनिर्मिता यथाकामसंनाम्या, उत्कीर्णिका तीक्ष्णचूर्णेन पारतेन वा पूरिताभ्यन्तरसुषिरा,

पारिवेल्ल्ययस्कान्ता च दुष्टतुलाः ।

रूप्यस्य द्वौ भागावेकः शुल्बस्य त्रिपुटकम् । तेनाकरोद्गतमपसार्यते तत् त्रिपुटकापसारितं, शुल्बेन शुल्बापसारितं, वेल्लकेन वेल्लकापसारितं, शुल्बार्धसारेण हेम्ना हेमापसारितम् ।

मूकमूषा पूतिकिट्टः करटकमुखं नाली सन्दंशो जोङ्गनी सुवर्चिका लवणं तदेव सुवर्णमित्यपसारणमार्गाः । पूर्वप्रणिहिता वा पिण्डवालुका मूषाभेदादग्निष्ठा उद्ध्रियन्ते ।

भिन्नमस्तका सरन्ध्राग्रा सा हि वाताभिमुखं धृता वातेन नामिता भवतीति, उपकण्ठी ग्रन्थिबहुला, कुशिक्या शिक्यं तोल्यवस्तुनिवेशाधारः तत् कुत्सितं यस्याः सा, सकटुकक्ष्या अप्रवणसूत्रा, पारिवेल्ली परिवेल्लः परिचलनं तद्वती, अयस्कान्ता अयस्कान्ताख्यलोहनिर्मिता, सा हि यतः स्वर्णं ततो याति। चः समुच्चये । अष्टावेता दुष्टतुलाः । इत्थं सम्भाविताष्टविधदुष्टतुलं तुलाविषमम् ।

अथापसारणमुच्यते। तत्र यदसारद्रव्यं प्रक्षिप्य सारद्रव्यमपसार्यतेऽपह्रियते तदपद्रव्यं चतुर्विधमादावाह—**रूप्यस्येति**। द्वौ रूप्यस्य भागौ एकः शुल्बस्य भाग इति भागत्रयमिदं मेलयित्वावर्तितं, त्रिपुटकं तत्संज्ञम् । तेन त्रिपुटकेन प्रक्षिप्तेन, आकरोद्गतं शुद्धम्, अपसार्यते आकर एवाशुद्धमिदमुत्पन्नमिति व्यपदिश्यापह्रियते, तत् तथाविधमपसारणसाधनं, त्रिपुटकापसारितं तदाख्यमपद्रव्यमेकम् । शुल्बेन ताम्रप्रक्षेपेण अपसार्यते तथापह्रियते, तत् शुल्बापसारितं तदाख्यम् अपसारणसाधनं द्वितीयम् । वेल्लकेन तीक्ष्णलोहं रूप्यं च समभागमावर्तितं वेल्लकमिति प्रसिद्धं तेन साधनेन प्रक्षिप्तेन, अपसार्यते, तद् वेल्लकापसारितं तृतीयम् । शुल्बार्धसारेण ताम्रसमभागयोगावर्तितेन, हेम्ना साधनेन, अपसार्यते तथापह्रियते, तत् तथाविधं साधनं, हेमापसारितं तत्संज्ञं चतुर्थम् ।

अथापद्रव्यप्रक्षेपेण सारद्रव्यापहरणस्य मार्गानाह—**मूकमूषेत्यादि**। मूकमूषा ससम्पुटार्धमूषा, पूतिकिट्टो लोहमलं, करटकमुखं काकमुखं कर्तरीमुखं वा, नाली प्रसिद्धा, सन्दंशः कङ्कमुखं, जोङ्गनी लोहकटिका, सुवर्चिका क्षारविशेषः, लवणं प्रसिद्धम् । तदेव सुवर्णमिति तादृशं हीनवर्णकमेवाकरोद्गतं सुवर्णमिति मिथ्यावादः, अपसारणमार्गाः त एते सुवर्णापहरणोपायाः । अय-

पश्चाद्बन्धने आचितकपत्रपरीक्षायां वा रूप्यरूपेण परिवर्तनं विस्रावणम्, पिण्डवालुकानां लोहपिण्डवालुकाभिर्वा ।

गाढश्चाभ्युद्धार्यश्च पेटकः संयूह्यावलेप्यसङ्घात्येषु क्रियते । सीसरूपं सुवर्णपत्रेणावलिप्तमभ्यन्तरमष्टकेन बद्धं गाढपेटकः । स एव पटलसम्पुटेष्वभ्युद्धार्यः । पत्रमाश्लिष्टं यमकपत्रं वावलेप्येषु क्रियते ।

अर्थः — आकरोद्गते मूकमूषायामावर्त्यमाने शुद्धसुवर्णे लोहमलहरणव्याजेन सुवर्चिकालवणक्षेपव्याजेन च त्रिपुटकादिकमपद्रव्यं प्रक्षिप्य करटमुखादिना साधनेन शुद्धसुवर्णमपहरन्ति सुवर्णकाराः कृतकच्छायमीदृशमेव सुवर्णमाकरादुद्गतमिति वदन्त इति । हरणोपायविकल्पमाह — **पूर्वप्रणिहिता वेति ।** पूर्वप्रणिहिताः पूर्वमेवाग्नौ प्रक्षिप्ताः, पिण्डवालुका वा अपसारणमार्गा इति सम्बध्यते । द्रव्यधात्वनुगमपरिगृहीततच्छायाः सूक्ष्मबालुकाः द्रवीभूतेन रूप्येण सुवर्णेन वा सम्पर्कात् पिण्डतां प्रतिपन्नाः पिण्डवालुकाः । उपायीभावप्रकारमाह — **मूषाभेदादग्निष्ठा उद्ध्रियन्त** इति । पूर्वमेवाग्निप्रक्षिप्तपिण्डवालुकाप्रमाणं सारद्रव्यमपहृत्य मूषा भिन्नेत्यपदेशेन तत्सम्पृक्तास्ता एव पिण्डबालुकास्तत्स्वामिसमक्षमग्नेरुद्ध्रियन्त इत्यर्थः ।

विस्रावणमाह — **पश्चादित्यादि** । पश्चाद्बन्धने पूर्वं निर्मितस्य उत्तरकालसन्धानप्रसङ्गे, आचितकपत्रपरीक्षायां वा प्रचुरघटितपत्रपरीक्षाप्रसक्तौ वा, रूप्यरूपेण परिवर्तनं रजतभाण्डप्रक्षेपेण सुवर्णमयस्य विनिमानं, विस्रावणम् । इत्येको विस्रावणप्रकारः । अपरमाह—**पिण्डेत्यादि** । पिण्डवालुकानां सुवर्णाकरसम्भूतानां, लोहपिण्डवालुकाभिः लोहाकरसम्भूताभिर्वालुकाभिः परिवर्तनं वा विस्रावणम् ।

पेटकमाह — **गाढश्चेति** । पेटकः संश्लेषः, पिटधातोः संश्लेषणार्थत्वात्, स गाढश्च अभ्युद्धार्यश्चेति द्विविधः, संयूह्यावलेप्यसङ्घात्येषु संयूह्यादिषु त्रिषु पूर्वोक्तेषु कर्मसु विषये, क्रियते अनुष्ठीयते । सीसरूपं सीसपत्रं, सुवर्णपत्रेण, अवलिप्तम् आच्छादितम्, अभ्यन्तरम् आच्छादिताच्छादकयोरन्तरालम्, अष्टकेन बद्धं जतुसर्जरसादिना पटलसम्पुटेषु दृढसंश्लेषणार्थं बद्धं, यदि भवतीति शेषः । गाढपेटकः अर्थात् स एष बन्धो गाढपेटकाख्यः । **स एवेति** । स एव पेटकः, पटलसम्पुटेषु अभ्युद्धार्थः अष्टकबन्धरहितत्वादभ्युद्धर्तुं शक्य इति सोऽभ्युद्धार्यपेटकः । स एष द्रव्यापद्रव्ययोः समप्रविभागीके संयूहने

शुल्बं तारं वा गर्भः पत्राणाम् । सङ्घात्येषु क्रियते शुल्बरूपं सुवर्णपत्रसंहतं प्रमृष्टं सुपार्श्वम् । तदेव यमकपत्रसंहतं प्रमृष्टम् । ताम्रताररूपं चोत्तरवर्णकः ।

तदुभयं तापनिकषाभ्यां निश्शब्दोल्लेखनाभ्यां वा विद्यात् । अभ्युद्धार्यं बदराम्ले लवणोदके वा सादयन्ति । इति पेटकः ।

घनसुषिरे वा रूपे सुवर्णमृन्मालुकाहिङ्गुलककल्को वा तप्तोऽवतिष्ठते । दृढवास्तुके वा रूपे वालुकामिश्रजतुगान्धारपङ्को वा तप्तोऽव-

---

हरणप्रकारः । अथ सारार्धभागेषु लेप्येषु हरणप्रकारमाह — पत्रामात । पत्रं सुवर्णपत्रम्, आश्लिष्टम् एकपार्श्वयोजितं, यमकपत्रं वा उभयपार्श्वयोजितं वा अवलेप्येषु, क्रियते । बहिःपत्रमुक्त्वा गर्भपत्रमाह—शुल्बं तारं वा, पत्राणां सुवर्णपत्राणां, गर्भः क्रियते । सङ्घात्यविषयं विधिमाह— सङ्घात्येष्विति । सङ्घात्येषु विषये, शुल्बरूपं ताम्रभाण्डं, सुवर्णपत्रसंहतम् एकपार्श्वे सुवर्णपत्रच्छादितं, प्रमृष्टं प्रकर्षेणोज्ज्वलितं, सुपार्श्वं शोभनैकपार्श्वं, क्रियते । तदेव शुल्बरूपं, यमकपत्रसंहतम् उभयपार्श्वयोः सुवर्णपत्रावच्छादितं, प्रमृष्टं, क्रियते । पूर्वस्य सुपार्श्वमिति संज्ञा समनन्तरस्य प्रमृष्टमिति संज्ञेत्येके । ताम्रताररूपं च उत्तरवर्णक इति । न केवलं सुवर्णपत्रं यथोक्तमवच्छादनार्थमुपयुज्यते, किंतु ताम्रभाण्डरजतभाण्डे अपीत्यर्थः । ताभ्यां पुनरौचित्यात् कृष्णायसादिभाण्डमवच्छाद्यं भवतीत्यवगन्तव्यम् ।

पेटकस्य परीक्षामाह — तदुभयमिति । तदुभयं गाढपेटकम् अभ्युद्धार्यपेटकं च, तापनिकषाभ्याम् अग्नितापननिकषघर्षणाभ्यां, निश्शब्दोल्लेखनाभ्यां वा निश्शब्दं शब्दहीनं छेदनम् उल्लेखनं तीक्ष्णमुखलेखनं ताभ्यां वा, विद्यात् । अभ्युद्धार्ये विशेषमाह —अभ्युद्धार्यं, बदराम्ले कर्कन्धूफलरसे, लवणोदके वा, सादयन्ति निवेशयन्ति । तथा करणे लोहितवर्णः सञ्जायत इति भाषाटीका । इति पेटकः व्याख्यात इति शेषः ।

पञ्चविधं पिङ्कं तत्परीक्षणं चाह— घनेत्यादि । घनसुषिरे रूपे घने सुषिरवति च भाण्डे कटकाद्यलङ्कारे, सुवर्णमृन्मालुकाहिङ्गुलककल्को वा सुवर्णमृत् सुवर्णमालुका च धातुविशेषौ हिङ्गुलको जातिहिङ्गुलकः एतेषां मिलितानां कल्कः, तप्तः तापयित्वा प्रक्षिप्तः, अवतिष्ठते अवस्थितो भवति । अतस्तद्योजनेन तावत् स्वर्णमपह्रियत इत्यर्थः । अन्यदपद्रव्यमाह — दृढवास्तुके रूपे वा दृढ-

तिष्ठते । तयोस्तापनमवध्वंसनं वा शुद्धिः । सपरिभाण्डे वा रूपे लवणमुल्कया कटुशर्करया तप्तमवतिष्ठते । तस्य क्राथनं शुद्धिः । अभ्रपटलमष्टकेन द्विगुणवास्तुके वा रूपे बध्यते । तस्यापिहितकाचकस्योदके निमज्जत एकदेशः सीदति । पटलान्तरेषु वा सूच्या भिद्यते । मणयो रूप्यं सुवर्णं वा घनसुषिराणां पिङ्कः । तस्य तापनमवध्वंसनं वा शुद्धिः । इति पिङ्कः ।

तस्माद् वज्रमणिमुक्ताप्रवालरूपाणां जातिरूपवर्णप्रमाणपुद्गललक्षणान्युपलभेत ।

पीठबन्धे अलङ्कारे वा, वालुकामिश्रः पिण्डवालुकायुक्तः जतुगान्धारपङ्कः लाक्षासिन्दूरपङ्कः, तप्तोऽवतिष्ठते । तत्र शुद्धिमाह — तयोः घनसुषिर-दृढवास्तुकयोर्विषये, तापनं दाहः, अवध्वंसनं वा ताडनं वा, शुद्धिः शोधनोपायः । सपरिभाण्डे रूपे पृषतमणिबन्धे, लवणम्, उल्कया ज्वालया, कटुशर्करया तप्तं मृदुपाषाणविशेषेण सह तप्तम्, अवतिष्ठते । तस्य, क्राथनम् अर्थाद् बदराम्लोदके, शुद्धिः शुद्धिहेतुः । पिङ्कस्य प्रकारान्तरमाह— **अभ्रेत्यादि** । अभ्रपटलं काचमणिः, अष्टकेन द्विगुणवास्तुके लाक्षादिना द्विगुणावगाढबन्धे, रूपे, बध्यते सम्बध्यते अवतिष्ठत इत्यर्थः । तत्परीक्षामाह — **तस्येति** । तस्य प्रत्युप्तमणेरन्तरवच्छादितकाचस्य सुवर्णाभरणस्य, उदके निमज्जतः परीक्षार्थं बदराम्लोदके प्रक्षिप्तस्य, एकदेशः सीदति अभ्रपटलरहितोऽवयवो गुरुत्वादधो गच्छति । अर्थादेकदेशान्तरमभ्रपटलयुक्तं लघुत्वादधो न गच्छति । अभ्रपटलातिरिक्तताम्रपटलादिविषये तु सूच्या भेदनमेव शुद्धिज्ञानोपाय इत्याह — **पटलान्तरेष्विति** । पुनः पिङ्कस्य घनसुषिराभरणविषये त्रीन् प्रकारानाह— **मणय इति** । घनसुषिराणां घनसुषिराभरणविषये, मणयः पिङ्कः काचमणयो जात्यमणिहरणोपायः, रूप्यं पिङ्कः रजतं सुवर्णहरणोपायः, सुवर्णं पिङ्कः अशुद्धं स्वर्णं शुद्धस्वर्णहरणोपायः । तत्र शोधनप्रकारमाह—**तस्येत्यादि** । **इति पिङ्कः** व्याख्यात इति शेषः ।

तस्मादिति । उच्चावचहरणोपायसम्भवात्, वज्रमणिमुक्ताप्रवालरूपाणां वज्रादिरूपाणां चतुर्णां, जातिरूपवर्णप्रमाणपुद्गललक्षणानि जातिरुत्पत्तिः रूपमाकारः वर्णो रागः प्रमाणं माषकादिपरिमाणं पुद्गलमाभरणं लक्षणं लक्ष्म, एतानि, उपलभेत विद्यात् ।

कृतभाण्डपरीक्षायां पुराणभाण्डप्रतिसंस्कारे वा चत्वारो हरणोपायाः—परिकुट्टनमवच्छेदनमुल्लेखनं परिमर्दनं वा। पेटकापदेशेन पृषतं गुणं पिटकां वा यत् परिशातयन्ति तत् परिकुट्टनम्। यद् द्विगुणवास्तुकानां वा रूपे सीसरूपं प्रक्षिप्य अभ्यन्तरमवच्छिन्दन्ति तदवच्छेदनम्। यद् घनानां तीक्ष्णेनोल्लिखन्ति तदुल्लेखनम्। हरितालमनश्शिलाहिङ्गुलकचूर्णानामन्यतमेन कुरुविन्दचूर्णेन वा वस्त्रं संयूह्य यत् परिमृद्नन्ति तत् परिमर्दनम्। तेन सौवर्णराजतानि भाण्डानि क्षीयन्ते। न चैषां किञ्चिदवरुग्णं भवति।

भग्नखण्डघृष्टानां संयूह्यानां सदृशेनानुमानं कुर्यात्। अव-

इदानीं कृतभाण्डपरीक्षणविषयं परिकुट्टनादिकं हरणोपायचतुष्टयमाह—**कृते**त्यादि। पुराणभाण्डप्रतिसंस्कारे वा जीर्णभाण्डनवीकरणे वा। परिकुट्टनादिकं लक्षयति—**पेटके**त्यादि। पेटकापदेशेन पूर्वोक्तपेटकपरीक्षणव्याजेन, पृषतं क्षुद्रगुटिकां, गुणं कटकाद्यंशमल्पं, पिटकां वा बृहदंशं वा, यत् परिशातयन्ति पातयन्ति, तत् परिकुट्टनं तदाख्यम्। द्विगुणवास्तुकानां बहुपत्रपुटघटितानां, रूपे भाण्डे, सीसरूपं सीसपत्रं सुवर्णानुलिप्तं, प्रक्षिप्य अभ्यन्तरं सुवर्णपत्रं, यदवच्छिन्दन्ति अवच्छिद्यापहरन्ति, तदवच्छेदनं नाम। घनानां घननिर्मितानां, रूप इति वर्तते, तीक्ष्णेन निशितशस्त्रेण, यदुल्लिखन्ति, तद् उल्लेखनम्। हरितालमनश्शिलाहिङ्गुलकानाम् अन्यतमचूर्णेन वा, कुरुविन्दाख्यपाषाणविशेषचूर्णेन च, वस्त्रं, संयूह्य मिश्रयित्वा, यत् परिमृद्नन्ति यत् परिघर्षयन्ति, तत् परिमर्दनं तदाख्यम्। तेन परिमर्दनेन, सौवर्णराजतानि भाण्डानि, क्षीयन्ते प्रमाणहानिं प्राप्नुवन्ति। एषां भाण्डानाम्, अवरुग्णं भङ्गः, किञ्चिद् न च भवति मनागपि न भवति च। सोऽयं विनैव भाण्डभङ्गमपहरणोपायः।

परिकुट्टनादिकृतं वर्णकर्णिकादिपातनम् एतावदिति कथं निर्णेतव्यं तत्राह—**भग्ने**त्यादि। संयूह्यानां दृढपत्रघटितभाण्डानां, भग्नखण्डघृष्टानां भग्नं परिकुट्टनशातितं खण्डमवच्छेदनहृतं घृष्टमुल्लेखनपरिमर्दनकर्मापहृतम् एषां भग्नादीनां, सदृशेनानुमानं कुर्यात् सजातीयावयवप्रमाणेन लिङ्गेनानुमितिं कुर्यात्, भग्नस्यावयवस्याभग्नावयवप्रमाणेन खण्डस्याखण्डावयवप्रमाणेन घृष्टस्याघृष्टावयवप्रमाणेन चेयत्तां निश्चिनुयादित्यर्थः। **अवलेप्यानामि**ति। अव-

लेप्यानां यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् । विरूपाणां वा । तापनमुदकपेषणं च बहुशः कुर्यात् ।

अवक्षेपः प्रतिमानमग्निर्गण्डिका भण्डिकाधिकरणी पिञ्छः सूत्रं चेल्लम् बोल्लनं शिर उत्सङ्गो मक्षिका स्वकायेक्षा दृतिरुदकशरावमग्निष्ठमिति काचं विद्यात् ।

राजतानां विस्रं मलग्राहि परुषं प्रस्तीतं विवर्णं वा दुष्टमिति विद्यात् ।

लेप्यानां तनुपत्रघटितभाण्डानां, यावदुत्पाटितं तावदुत्पाट्यानुमानं कुर्यात् यावानंशोऽवच्छिद्य गृहीतस्तावन्तमपरमंशमवच्छिद्य तत्प्रतिमानेनापहृतांशमानं निश्चिनुयात् । **विरूपाणा**मिति । विरूपाणां वा प्रचुरापद्रव्यमिश्रणेन हीनवर्णकतामापादितानां सुवर्णभाण्डानां च, सदृशेनानुमानं कुर्यादित्यनुवर्तते, प्रतिमिततदीयैकांशस्य शुद्धीकरणेन वर्णहानीयत्तां विज्ञाय तत्सादृश्येन शेषांशानां वर्णहानीयत्तामभ्यूहेदित्यर्थः । शोधनप्रकारमाह—**तापन**मिति । तापनं पत्रीकृत्याग्नौ दहनम्, उदकपेषणं च तत्तमुदके प्रक्षिप्य चुक्रिकायोजनेन कुट्टनं च, बहुशो बहुकृत्वः, कुर्याद् यावद् वैवर्ण्यमपैति तावदित्यार्थम् । इयत्तानिर्णयफलं तु 'वर्णहीने माषकावरे पूर्वः साहसदण्ड' इत्यादि पूर्वोक्तदण्डविधानम् ।

पूर्वोक्ताकरोद्भवापसारणमार्गातिरेकिणोऽवक्षेपादीन् सप्तदश हरणोपायानाह— **अवक्षेप** इति । अवक्षेपः हस्तलाघवेन सारमपहृत्यापद्रव्यप्रक्षेपः, प्रतिमानं तद्विनिमयादि, अग्निः अग्निमध्ये हरणप्रयोगः, गण्डिका काष्ठाधिकरणी रत्नप्रतिवापाधारकाष्ठं, भण्डिका उपस्काराधारः स्वर्णद्रवनिषेकसाधनम् , अधिकरणी अयस्पात्रविशेषः, पिञ्छः मयूरबर्हः, सूत्रं सुवर्णतुलातन्तुः, चेलं वस्त्रं, बोल्लनं कथाव्याजेन द्रष्टृचित्तव्याक्षेपकरणं, चेलबोल्लनमिति समस्तपाठे वस्त्रपटलिका, शिरः शीर्षकण्डूयनादि, उत्सङ्गः अङ्कः उपलक्षणाद् गुह्यप्रदेशश्च, मक्षिका मक्षिकानिवारणव्याजेन निर्यासद्रवलिप्तस्वाङ्गसंश्लेषणं, स्वकायेक्षा स्वेदादिदर्शनव्याजः, दृतिः ध्मानभस्त्रा, उदकशरावं जलपात्रम् , अग्निष्ठम् अग्निप्रक्षिप्तमपद्रव्यम् , इति एवम्प्रकारं, काचम् अपहरणोपायं, विद्यात् ।

राजतानां पञ्च दुष्टिचिह्नान्याह — **राजताना**मित्यादि । राजतोक्त्या पूर्वोक्तस्य स्वर्णविषयत्वं सूचितम् । विस्रं सीसादिसंसर्गेदुर्गन्धि । मल-

एवं नवं च जीर्णं च विरूपं चापि भाण्डकम् ।
परीक्षितात्ययं चैषां यथोद्दिष्टं प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः,
आदितः पञ्चत्रिंशः ॥

श्राहि मलिनम् । परुषं खरस्पर्शम् । प्रतीतं कठिनम् । विवर्णम् अपद्रव्यमिश्रणोपहृतनिजप्रभम् । एतच्छोधनप्रकारस्तु 'अश्वितुत्थे चतुः समसीसे चतुः' इत्यादिना पूर्वाध्याये दर्शित एव ।

अध्यायान्ते श्लोकमाह — **एवमित्यादि** । विरूपम् अपद्रव्यमिश्रणदूषितम् । अत्ययं दण्डम् । यथोद्दिष्टं 'वर्णहीने माषकावरे' इत्यादिना विहितप्रकारम् । प्रकल्पयेत् प्रकर्षेण कल्पयेत् अवश्यं प्रयुञ्जीतेत्यर्थः । उदाहृतौ चात्र भट्टस्वामिना बार्हस्पत्यौ श्लोकौ—

"अचोराश्चोरधर्माणो वणिजः कारवस्तथा ।
तस्मात् तेषु न विश्वासः कर्तव्यो भूतिमिच्छता ॥
प्रकाशतस्करानेतान् परद्रव्यापहारिणः ।
शिल्पिनो वणिजश्चैव राजा दण्डेन वारयेत् ॥" इति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्दशोऽध्यायः विशिखायां सौवर्णिकप्रचारः,
आदितः पञ्चत्रिंशः ॥

३३. प्रक. कोष्ठागाराध्यक्षः ।

कोष्ठागाराध्यक्षः सीताराष्ट्रक्रयिमपरिवर्तकप्रामित्यकापमित्यकसिंहनिकान्यजातव्ययप्रत्यायोपस्थानान्युपलभेत ।

सीताध्यक्षोपनीतः सस्यवर्णकः सीता ।

पिण्डकरः, षड्भागः, सेनाभक्तं, बलिः, करः, उत्सङ्गः, पार्श्वं, पारिहीणिकम्, औपायनिकं, कौष्ठेयकं च राष्ट्रम् ।

कोष्ठागाराध्यक्ष इति सूत्रम् । कोष्ठमुदरं तेन तदर्थानि धान्यस्नेहक्षारलवणादीन्यभ्यवहार्यद्रव्याणि लक्ष्यन्ते, तेषामगारं संग्रहसंगोपनस्थानं तस्य अध्यक्षः कोष्ठागाराध्यक्षः अर्थात् तद्व्यापारः स इहाभिधीयत इति सूत्रार्थः ।

प्रक्रान्तायाः कोशप्रकृतेराकरकर्मान्तप्रवर्तनादिनोत्पादनरक्षणादिकमुक्तम् । शरीरस्थितिहेतुतया प्रधानस्य धान्यादेरुत्पादनरक्षणव्ययप्रकारादिकं तु नोक्तम् । तदिहोपदिश्यत इति सम्बन्धः । यद्वा 'सन्निधाता कोशगृहं कोष्ठागारं पण्यगृहं कुप्यगृहमायुधागारं बन्धनागारं च कारयेद्' इति कोष्ठागारकरणं पूर्वमुक्तम् । तदध्यक्षव्यापारस्त्वनभिहित इदानीमभिधीयत इति सङ्गतिः ।

तमाह — **कोष्ठागारे**त्यादि । कोष्ठागाराध्यक्षः, सीतादीनि सीता राष्ट्रं क्रयिमं परिवर्तकः प्रामित्यकम् आपमित्यकं सिंहनिका अन्यजातः व्ययप्रत्यायः उपस्थानमित्येतान् दश पदार्थान् उपलभेत चिन्तयेत् ।

तान् यथोद्देशं विवृणोति — **सीताध्यक्षोपनीत** इत्यादि । सीताध्यक्षेण धान्यकरग्रहणकर्माधिकृतेन उपनीतः कोष्ठागारे प्रवेशितः, सस्यवर्णकः धान्यजातिः, सीता तदाख्या । कोष्ठागाराध्यक्षस्तां शुद्धामन्यूनां च गृह्णीयात् ।

राष्ट्रमाह — **पिण्डे**त्यादि । पिण्डकरः तत्तद्ग्रामदेयतया क्लृप्तः करसमुदायः, षड्भागः षडिति चतुर्थादिभागस्याप्युपलक्षणं तेन षड्भागचतुर्भागादिरूपस्तत्तद्देशसिद्धो राजभाग इत्यर्थः, सेनाभक्तं सेनासन्नाहनकाले यथादेशप्रसिद्धं स्नेहतण्डुललवणादि राजदेयमिति स्वामी, सैनिकानां तण्डुलहिरण्यादिदानसमये राजार्थे तैर्दीयमानः स्नेहतण्डुलाद्यंश इति भाषाटीका । बलिः षड्भागातिरिक्तः यथादेशप्रसिद्धो दशबंधशतिबन्धादिकः यं भिक्षाभक्तं वदन्ति, करः फलवृक्षादिसम्बद्धं राजदेयम्, उत्सङ्गो राज्ञे पुत्रजन्माद्युत्सवावसरेषु पौरजानपदैर्दत्तं शालाकमध्वादि, पार्श्वम् उचितकरादधिकग्रहणं योगवृत्ताधिकरणस्य द्वितीये कोशाभिसंहरणाध्याये वक्ष्यमाणं, पारिहीणिकं चतु-

धान्यमूल्यं कोशनिर्हारः प्रयोगप्रत्यादानं च क्रयिमम् ।

सस्यवर्णानामर्घान्तरेण विनिमयः परिवर्तकः ।

सस्ययाचनमन्यतः प्रामित्यकम् ।

तदेव प्रतिदानार्थमापमित्यकम् ।

कुट्टकरोचकसक्तुशुक्तपिष्टकर्म तज्जीवनेषु तैलपीडनमौरभ्रचाक्रिकेष्विक्षूणां च क्षारकर्म सिंहनिका ।

व्यदविनाशितसस्यदण्डलभ्यम्, औपायनिकम् उपायनार्थं कौशेयादिकं, कौष्ठेयकं च राजस्थापिततटाकारामाद्युत्पन्नं च, इत्येवं दशप्रकारं राष्ट्रम् । पूर्वं समाहर्तृसमुदयप्रस्थापनाध्याये राष्ट्रान्तर्गतो बलिरुक्तः पार्श्वपारिहीणिकानि चान्यजातान्तर्गतान्युक्तानि । तेषामिह पुनःपाठः समाहर्त्रुत्पादितानामपि कोष्ठागारप्रवेश्यतां ज्ञापयितुम् ।

धान्यमूल्यमिति । धान्यमूल्यं धान्यविक्रयहिरण्यं, कोशनिर्हारः हिरण्येन धान्यक्रयः, प्रयोगप्रत्यादानं वृद्धिप्रयुक्तधान्यप्रवेशनम्, इत्येवं त्रिप्रकारं क्रयिमम् ।

परिवर्तकमाह — **सस्येत्यादि** । सस्यवर्णानां सस्यजातीयानाम्, अर्घान्तरेण विनिमयः एकेन शालिप्रस्थेन चतुःप्रस्थकोद्रवग्रहणमित्येवञ्जातीयो विनिमयः, परिवर्तकः तदाख्यः ।

प्रामित्यकमाह — **सस्येत्यादि** । अन्यतः मित्रादेः, सस्ययाचनम् अप्रतिदानार्थं, प्रामित्यकं तत्संज्ञम् ।

आपमित्यकमाह — **तदेवेति** । अन्यतः सस्ययाचनमेव, प्रतिदानार्थं सवृद्धिकप्रत्यर्पणार्थम्, आपमित्यकं तत्संज्ञम् ।

कुट्टककर्मादिपञ्चकजीविभ्यस्तैलपीडनजीविभ्य इक्षुक्षारकर्मजीविभ्यश्च यदुपादीयते तत् सिंहनिकाख्यमित्याह— **कुट्टकेत्यादि** । कुट्टकादीनां पञ्चानां द्वन्द्वः । कर्मशब्दश्च तेषु प्रत्येकमभिसम्बध्यते । कुट्टककर्म अवघातः, रोचककर्म मुद्गमाषादिविदलनं, सक्तुकर्म घरट्टादिना यवादिचूर्णीकरणं, शुक्तकर्म इक्षुरसादिसन्धानं, पिष्टकर्म गोधूमपेषणादि । कुट्टकादिकर्म, तज्जीवनेषु कुट्टकादिकर्मोपजीविषु विषये तत्कर्मोपजीवनार्थं तेभ्यः शुल्कं यद् गृह्यते तदित्यर्थः, तैलपीडनं तिलेभ्यो यन्त्रनिष्पीडितेभ्यस्तैलोत्पादनकर्म, औरभ्रचाक्रिकेषु औरभ्रेषु यज्ञियोरभ्रसंज्ञपनकर्मकरेषु तैलिषु विषये तदुपजीवनेष्वित्यनुव-

नष्टप्रस्मृतादिरन्यजातः ।

विक्षेपव्याधितान्तरारम्भशेषं च व्ययप्रत्यायः ।

तुलामानान्तरं हस्तपूरणमुत्करो व्याजी पर्युषितं प्रार्जितं चोपस्थानमिति ।

धान्यस्नेहक्षारलवणानाम् ।

धान्यकल्पं सीताध्यक्षे वक्ष्यामः । सर्पिस्तैलवसामज्जानः स्नेहाः ।

र्दनात् तैलपीडनकर्मोपजीवनार्थं तेभ्यो यद् गृह्यते तदित्यर्थः, इक्षूणां क्षारकर्म च फाणितगुडखण्डादिकर्म च तत्कर्मोपजीविभ्यो यदुपादीयते तच्चेत्यर्थः । संहनिकेति तु व्याख्यापाठः सुष्ठु ।

अन्यजातमाह—**नष्टेत्यादि** । नष्टप्रस्मृतादिः नष्टमपगतं प्रस्मृतं विस्मृतं चेति द्वयम् । आदिपदादायुक्तदण्डादिर्ग्राह्यः ।

व्ययप्रत्यायमाह — **विक्षेपेत्यादि** । विक्षेपशेषं किञ्चित्कार्यसाधनाय प्रेषितस्य सैन्यस्यार्थे व्ययिताद् धनादवशिष्टं, व्याधितशेषं भेषजशालाव्ययितावशिष्टम्, अन्तरारम्भशेषं दुर्गप्रासादादिपरिकर्मार्थे निर्गतस्य धनस्य लघुपरिव्ययकरणाच्छेषम् ।

उपस्थानमाह — **तुलेत्यादि** । तुलामानान्तरं तुलामानभेदः तुलामानाभ्यामधिकाभ्यां गृहीत्वा हीनाभ्यां दानादुत्पन्नं, हस्तपूरणं कराभ्यां प्रस्थादौ धान्यस्य यत्नप्रवेशनं प्रस्थाग्रे कराभ्यां धान्यधारणं वा, हस्तप्रपूरणमिति पाठे हस्तश्लथीकाराङ्गुलिविरलीकरणादिना व्रीह्यादिमेयधान्यानां पूगीफलादिगण्यपण्यानां च प्रच्यावनम्, उत्करः धान्यादिराशिः शालाकादिर्वा, गणनमानप्रदेशयोर्गण्यमेयवस्तुविक्षेपणं वा, व्याजी षोडशभागादि पुनर्माननयूनतापरिहारायाधिकतया गृह्यमाणं, पर्युषितं गतवत्सरशेषं, प्रार्जितं च पुष्पताम्बूलादिकं च स्वनैपुण्योत्पादितम्, उपस्थानं तदाख्यम् । इतिशब्द उद्दिष्टसीतादिपदार्थविवरणोपसंहारार्थः ।

धान्येत्यादि । धान्यस्नेहक्षारलवणानामित्यधिकार आध्यायपरिसमाप्तेः ।

तत्र धान्यकल्पः सीताध्याये वक्ष्यत इत्याह—**धान्यकल्पमित्यादि** । इयमनागतावेक्षणलक्षणा तन्त्रयुक्तिः । **सर्पिरित्यादि** । सर्पिस्तैलं वसा मज्जेत्येते चत्वारः स्नेहाः ।

फाणितगुडमत्स्यण्डिकाखण्डशर्कराः क्षारवर्गः।

सैन्धवसामुद्रविडयवक्षारसौवर्चलोद्भेदजा लवणवर्गः।

क्षौद्रं मार्द्वीकं च मधु।

इक्षुरसगुलमधुफाणितजाम्बवपनसानामन्यतमो मेषशृङ्गीपिप्पलीक्काथाभिषुतो मासिकः षाण्मासिकः सांवत्सरिको वा चिद्भिटोर्वारुकेक्षुकाण्डाम्रफलामलकावसुतः शुद्धो वा शुक्तवर्गः।

वृक्षाम्लकरमर्दाम्रविदलामलकमातुलुङ्गकोलबदरसौवीरकपरूषकादिः फलाम्लवर्गः।

दधिधान्याम्लादिर्द्रवाम्लवर्गः।

इक्षुविकारभेदाः फाणितादयः क्षारवर्ग इत्याह — **फाणितेत्यादि**। गुडखण्डशर्करयोर्मध्यमावस्था मत्स्यण्डिका।

सैन्धवादिषट्प्रकारं लवणवर्गमाह — **सैन्धवेत्यादि**। उद्भेदज ऊषरलवणमिति स्वामी।

क्षौद्रमिति। क्षौद्रं क्षुद्राभिः सञ्चितम्। मार्द्वीकं मृद्वीकानां रसः। इति द्विविधं मधु।

शुक्तवर्गमाह — **इक्षुरसेत्यादि**। इक्षुरसो, गुलः, मधु, फाणितं च प्रसिद्धं जाम्बवपनसौ जम्बूफलरसः पनसफलरसश्च, एषां षण्णाम्, अन्यतमः, मेषशृङ्गीपिप्पलीक्काथाभिषुतः मेषविषाणाख्याया मागध्याख्यायाश्चौषधेः कषायेण मिश्रः, मासिकः षाण्मासिकः सांवत्सरिको वा मासषण्मासादिकालपरिवासेन क्रमादधममध्यमोत्तमभेदं प्रतिपन्नः, चिद्भिटादिपञ्चकरसैर्व्यस्तैः समस्तैर्मिश्रितः, शुद्धो वा चिद्भिटाद्यमिश्रितो वा, शुक्तवर्गः आसववर्गः। चिद्भिटं वल्लीफलविशेषः, तदेव कटुकमुर्वारुकम्।

फलाम्लवर्गमाह — **वृक्षाम्लेत्यादि**। वृक्षाम्लं तिन्तिडीकं, करमर्दः वशपर्यायः, आम्रामलके प्रसिद्धे, विदलं दाडिमं, मातुलुङ्गं दाडिमभेदः, कोलं क्षुद्रबदरं, बदरं स्थूलबदरं, सौवीरकं स्वादुबदरं, परूषकं मध्यदेशादिप्रसिद्धं मधुराम्लफलम्, आदिग्रहणं जम्बीराद्यर्थम्। यथोक्तप्रकारः फलाम्लवर्गः।

दधीत्यादि। दधि प्रसिद्धं, धान्याम्लं काञ्जिकम्। आदिपदात् तक्रादिग्रहणम्। इत्ययं द्रवाम्लवर्गः।

पिप्पलीमरिचशृङ्गिबेराजाजीकिराततिक्तगौरसर्षपकुस्तुम्बुरुचोरकदमनकमरुवकशिग्रुकाण्डादिः कटुकवर्गः ।

शुष्कमत्स्यमांसकन्दमूलफलशाकादि च शाकवर्गः ।

ततोऽर्धमापदर्थं जानपदानां स्थापयेत् । अर्धमुपयुञ्जीत । नवेन चानवं शोधयेत् ।

क्षुण्णघृष्टपिष्टभृष्टानामार्द्रशुष्कसिद्धानां च धान्यानां वृद्धिक्षयप्रमाणानि प्रत्यक्षीकुर्वीत ।

कोद्रवव्रीहीणामर्धं सारः, शालीनामष्टभागोनः, त्रिभागोनो

पिप्पलीत्यादि । पिप्पल्यादित्रिकं प्रसिद्धं, अजाजी जीरकः, किराततिक्तः भूनिम्बाख्य ओषधिविशेषः, गौरसर्षपः सिद्धार्थः, कुस्तुम्बुरु धान्याख्यं, चोरकः शतपुष्पानुकारी गुच्छ इति स्वामी, दमनकं कान्ताख्यं, मरुवकः पिण्डीतकः, शिग्रुकाण्डः शोभाञ्जनकाण्डः, आदिग्रहणं राजसर्षपाद्यर्थम् । इत्येवञ्जातीयः कटुकवर्गः ।

शुष्केत्यादि । शुष्कशब्दो मत्स्यमांसयोः प्रत्येकं सम्बध्यते । शुष्कमत्स्यः शुष्कमीनः, शुष्कमांसं वल्लूरं, कन्दः सूरणादिः, मूलं शतमूलीप्रभृति, फलं वार्ताकादि, शाकं वास्तुकादि, आदिग्रहणान्माषविकारादिपरिग्रहः । इत्ययं शाकवर्गः ।

तत इति । ततोऽर्धं स्नेहादिवर्गेभ्यः पूर्वोक्तेभ्योऽर्धं, जानपदानाम्, आपदर्थं दुर्भिक्षाद्यापत्समयोपयोगार्थं, स्थापयेत् । अर्धम्, उपयुञ्जीत राजमहानसाद्यर्थे विनियुञ्जीत । नवेन चानवं शोधयेत् नवं प्रक्षिप्य पुराणं कालक्षमं निचितमुपयुञ्जीत ।

धान्यानां क्षोदघर्षणाद्यवस्थासु सतसु वृद्धिक्षयाववश्यम्भाविनौ तत्तत्कर्मकरेभ्योऽनुमन्तव्यौ । अतस्तयोरियत्तानिश्चयं सकृत्प्रत्यक्षीकरणेन कोष्ठागाराध्यक्षोऽधिगच्छेदित्याह — **क्षुण्णे**त्यादि । क्षुण्णं सकृदवहतं, घृष्टं फलीकृतं, पिष्टं श्लक्ष्णचूर्णितं, भृष्टं भ्राष्ट्रपक्वम् , आर्द्रं तिमितं, शुष्कं कृतशोषणं, सिद्धं राद्धम् । सोऽयं धान्यानां सारमात्राया अल्पत्वानल्पत्वतारतम्ये क्षयवृद्धीयत्तापरिज्ञानार्थो विशेषविधिरुक्तः ।

सामान्यतस्तु तदियत्ताविषयं विधिमुपदेष्टुमाह — **कोद्रवे**त्यादि । **कोद्रवव्रीहीणामर्धं सारः** कोद्रवाणां व्रीहीणां च तत्प्रस्थद्वयस्यैकस्तण्डुलप्रस्थः सारः फलति, शेषस्तु क्षय इत्यर्थः । शालीनां कलमाख्यव्रीहिभेदानाम् , अष्ट-

वरकाणाम् । प्रियङ्गूणामर्धं सारो नवभागवृद्धिश्च । उदारकस्तुल्यः । यवा गोधूमाश्च क्षुण्णाः ।

तिला यवा मुद्गमाषाश्च घृष्टाः । पञ्चभागवृद्धिर्गोधूमः सक्तवश्च । पादोना कलायचमसी । मुद्गमाषाणामर्धपादोना । शैम्बानामर्धं सारः । त्रिभागोनो मसूराणाम् ।

पिष्टमामं कुल्माषश्चाध्यर्धगुणः । द्विगुणो यावकः । पुलाकः पिष्टं च सिद्धम् ।

कोद्रववरकोदारकप्रियङ्गूणां त्रिगुणमन्नं चतुर्गुणं व्रीहीणाम्

भागोनः प्रकृत्यष्टमांशन्यूनः, अर्धं सार इति वर्तते । तेन शालीनां प्रस्थाष्टकस्य प्रस्थत्रयं सारो भवति । वरकाणां धान्यभेदानां, त्रिभागोनः प्रस्थत्रये प्रस्थद्वयं सारो भवति । प्रियङ्गूणां कङ्गूनाम्, अर्धं सारः नवभागवृद्धिश्च अष्टसु प्रस्थेषु प्रस्थपञ्चकं तण्डुलानां भवति । उदारकः तृणकोलकः, तुल्यः प्रियङ्गुतुल्यसारः अनवहतावस्थाप्रमाणतुल्यसारो वा भवति । तत्राद्यः शुष्कावघाते, सजलावघाते पर इति विवेकः । यवाः, गोधूमाश्च, क्षुण्णाः सजलावहताः, तुल्याः अनवहतावस्थाप्रमाणतुल्यसाराः ।

क्षुण्णानुक्त्वा घृष्टानाह— **तिला** इत्यादि । घृष्टाः दलिताः, तिलाः, यवाः, मुद्गमाषाश्च, तुल्या इति वर्तते, अघृष्टावस्थातुल्यप्रमाणाः । गोधूमः, पञ्चभागवृद्धिः पञ्चभागेन वर्धते । सक्तवश्च भृष्टयवजाः, पञ्चभागवृद्धयः । कलायचमसी कलायश्चणभेदः तस्य चमसी श्लक्ष्णचूर्णं, पादोना कलायप्रस्थचतुष्टयस्य तच्चूर्णं प्रस्थत्रयप्रमाणं भवति । मुद्गमाषाणाम् मुद्गानां माषाणां च चमसी, अर्धपादोनाष्टभागेन ऊना भवति । शैम्बानां कुलत्थादिकोशीधान्यानाम्, अर्धं, सारः वितुषांशो भवति । मसूराणां चणविशेषाणां, त्रिभागोनः सारः प्रस्थत्रयदलने प्रस्थद्वयं सारो भवति ।

पिष्टमाह — **पिष्टमिति** । आमं पिष्टम् अपक्वं गोधूमादि, कुल्माषश्च मुद्गमाषादिश्च, अध्यर्धगुणः कुडुबचतुष्टये कुडुबषट्कं भवति । यावकः वितुषीकृतो यवः, द्विगुणः चूर्णीकृतो द्वैगुण्यं प्राप्नोति । पुलाकः अर्धसिद्धस्तण्डुलः, पिष्टं च गोधूमादितण्डुलचूर्णं च, सिद्धं राद्धं सत्, द्विगुणं भवति ।

सिद्धमाह — **कोद्रववरके**त्यादि । कोद्रवादिचतुष्टयान्नं तत्तत्तण्डुलात् त्रिगुणं, व्रीह्यन्नं चतुर्गुणं, शाल्यन्नं पञ्चगुणं च वर्धते इत्यर्थः । अष्टगुणं

पञ्चगुणं शालीनाम् । तिमितमपरान्नं द्विगुणमर्धाधिकं विरूढानाम् ।

पञ्चभागवृद्धिर्भृष्टानाम् । कलायो द्विगुणः, लाजा भरुजाश्च ।

षट्कं तैलमतसीनाम् । निम्बकुशाम्रकपित्थादीनां पञ्चभागः । चतुर्भागिकास्तिलकुसुम्भमधूकेङ्गुदीस्नेहाः ।

कार्पासक्षौमाणां पञ्चपले पलसूत्रम् ।

पञ्चद्रोणे शालीनां द्वादशाढकं तण्डुलानां कलभभोजनम्, एकादशकं व्यालानां, दशकमौपवाह्यानां, नवकं सान्नाह्यानाम्, अष्टकं

शालीनामिति भाषाटीकायां पाठो भाति । **तिमितमिति** । तिमितं लवनाद्यवसरे केदारादावार्द्रीकृतव्रीह्याद्यन्नम् , अपरान्नम अपरिणतव्रीह्याद्यन्नं च, द्विगुणं भवति । विरूढानाम् अङ्कुरितानां व्रीह्यादीनाम , अर्थादन्नम्, अर्धाधिकम् अर्धाधिकद्विगुणं भवति । अपरा व्याख्या —तिमितम् आर्द्रीकृतम् , अपरान्नं फलाढकीचणकादि, द्विगुणं भवति । चणकादीनामेव विरूढानाम् अङ्कुरितानाम्, अर्धाधिकम् अर्धमधिकमार्द्रीकृताद् भवति इति ।

भृष्टमाह — **पञ्चभागेत्यादि** । भृष्टानां कृतभर्जनानां तेषामेवावरान्नानां, पञ्चभागवृद्धिः प्रस्थपञ्चकं भृष्टं प्रस्थषट्कं भवति । कलायश्चणभेदो भृष्टः द्विगुणः । लाजाः व्रीह्यादयो, भरुजा यवाश्च, भृष्टाः द्विगुणाः ।

तैलमाह — **षट्कं तैलमतसीनामिति** । षट्सु अतसीबीजप्रस्थेषु एकस्तैलप्रस्थो भवति । निम्बकुशाम्रकपित्थादीनां पञ्चभागः निम्बबीजादीनां प्रस्थपञ्चके एकप्रस्थः स्नेहो भवति । आदिग्रहणमेरण्डादिपरिग्रहार्थम् । तिलकुसुम्भमधूकेङ्गुदीस्नेहाः चतुर्भागिकाः तिलकुसुम्भबीजादीनां प्रस्थचतुष्टये एकः स्नेहप्रस्थो भवति ।

सूत्रमाह — **कार्पासेत्यादि** । क्षौमो वल्कविशेषः । कार्पासपलपञ्चकस्य क्षौमपलपञ्चकस्य च एकपलं सूत्रं भवति ।

अथ भक्तोपयोगाय तण्डुलादीनां व्यवस्थाविशेषानाह — **पञ्चद्रोण** इत्यादि । शालीनां विंशत्याढकात्मके पञ्चद्रोणे तण्डुलानां द्वादशाढकं यथा निष्पद्येत, तथावहननेनिष्पादितास्तत्तण्डुलाः, कलभभोजनं कलभानां बालगजानां भोजनार्थे विनियोज्याः । व्यालानां दुष्टगजानाम्, एकादशकं शाल्याढकविंशतावेकादशाढकक्रमेण निष्पन्नास्तण्डुलाः, भोजनार्थे विनियोज्या इत्यार्थम् । एवमुत्तरेष्वपि । औपवाह्यानां राजवाह्यानां, दशकं दशाढकं विंशतौ

पत्तीनां, सप्तकं मुख्यानां, षट्कं देवीकुमाराणाम्, पञ्चकं राज्ञाम्। अखण्डपरिशुद्धानां वा तण्डुलानां प्रस्थः।

चतुर्भागः सूपः, सूपषोडशो लवणस्यांशः, चतुर्भागः सर्पिषः तैलस्य वा, एकमार्यभक्तम्। प्रस्थषड्भागः सूपः, अर्धस्नेहमवराणाम्। पादोनं स्त्रीणाम्। अर्धं बालानाम्।

मांसपलविंशत्या स्नेहार्धकुडुबः, पलिको लवणस्यांशः, क्षार-

दशाढककमेण साधितास्तण्डुलाः विनियोज्याः। मान्त्राद्यानां समरोचितानां, नवकं नवाढकं विंशतौ नवाढककमनिष्पन्नास्तण्डुलाः। पत्तीनां पदातीनाम्, अष्टकम् अष्टाढकम् अष्टाढककमनिष्पन्नास्तण्डुलाः। मुख्यानां भटप्रधानानां, सप्तकं सप्ताढकं सप्ताढककमनिष्पन्नास्तण्डुलाः। देवीकुमाराणां राजपत्नीनां राजपुत्राणां च, षट्कं षडाढकं षडाढककमनिष्पन्नास्तण्डुलाः। सेयं पूर्वाभ्यः प्रतिपत्तिभ्य उत्तमा प्रतिपत्तिः। राज्ञां पुनरितोऽप्युत्तमामाह—**राज्ञामिति।** राज्ञां, पञ्चकं पञ्चाढकं शालिविंशत्याढके पञ्चाढककमनिष्पन्नास्तण्डुलाः भोजनार्थं विनियोज्याः। तदेवमष्टौ वर्णिकास्तण्डुलानां भक्तोपयोगिन्य उक्ताः। राजभोजने पक्षान्तरमाह—**अखण्डेत्यादि।** वाशब्दः पक्षान्तरे। अखण्डपरिशुद्धानाम् अक्षतावयवानां फलीकरणविवेचनसंशोधितानां च, तण्डुलानां, प्रस्थः आढकचतुर्भागः शाल्यशीतिप्रस्थाद्ववहननादिसंस्कृताद् यथोक्तगुणैकतण्डुलप्रस्थग्रहणक्रमेण सम्पन्नस्तण्डुल इत्यर्थः।

चतुर्भाग इति। सूपः चतुर्भागः प्रस्थस्य प्रकृतत्वात् तच्चतुर्थांशः। सूपषोडशः सूपस्य षोडशांशप्रमाणः, लवणस्यांशः। सर्पिषस्तैलस्य वा, चतुर्भागः सूपचतुर्थभागः। **एकमार्यभक्तमिति।** इदमेकं मध्यमप्रतिपत्तिकस्य पुरुषस्य भोजनं भवति। अवरभोजनमाह—**प्रस्थेत्यादि।** अवराणां निकृष्टानां, प्रस्थषड्भागः सूपः। अर्धस्नेहं अर्धं सूपार्धभागः स्नेहस्तैलादिः यस्य तत्। लवणं तु समानमेव। भोजनस्यान्यपदार्थतामभिप्रेत्य नपुंसकनिर्देशः। **पादोनं स्त्रीणामिति।** पादन्यूनमार्यपुरुषभक्तमार्यस्त्रीणाम्, अवरपुरुषभक्तमवरस्त्रीणां च यथायथं बोध्यम्। **अर्धं बालानामिति।** पूर्ववद् यथायथमार्यबालानामवरबालानां च।

मांससंस्कारे योजनीयानां स्नेहादीनां परिमाणव्यवस्थामाह—**मांसपलेत्यादि।** मांसपलविंशत्या सह, स्नेहार्धकुडुबः स्नेहस्य अर्धकुडुबः प्रस्थाष्ट-

पलयोगः, द्विधरणिकः कटुकयोगः, दध्नश्चार्धप्रस्थः ।

तेनोत्तरं व्याख्यातम् । शाकानामध्यर्धगुणः, शुष्काणां द्विगुणः, स चैव योगः ।

हस्त्यश्वयोस्तदध्यक्षे विधाप्रमाणं वक्ष्यामः । बलीवर्दानां माषद्रोणं यवानां वा पुलाकः । शेषमश्वविधानम् । विशेषो — घाणपिण्याकतुला कणकुण्डकं दशाढकं वा ।

द्विगुणं महिषोष्ट्राणाम् । अर्धद्रोणं खरपृषतरोहितानाम् । आढ-

भागः. योज्यः । लवणस्यांशः, पलिकः पलमितः । क्षारपलयोगः क्षारस्य सुवर्चिकायवक्षारादेः पलयोगः लवणाभावे । कटुकयोगः कटुकानां पिप्पलीमरिचशृङ्गबेराणां योगः, द्विधरणिकः धरणद्वयमानः । धरणप्रमाणं तु 'अष्टाशीतिर्गौरसर्षपा रूप्यमाषकः, ते षोडश धरणमि'ति पौतवाध्यक्षे वक्ष्यते । दध्नश्च, अर्धप्रस्थः प्रस्थस्यार्धं कुडुबद्वयं भवति ।

तेनेति । तेन उक्तयोगमानेन, उत्तरम् अधिकं मांसपलत्रिंशच्चत्वारिंशदादीनां स्नेहादियोगमानमर्धगुणद्वैगुण्यादिरूपं, व्याख्यातं विवृतप्रायम् उन्नेतुं शक्यमित्यर्थः । शाकानां वास्तुकादीनां, स चैव मांसोक्त एव, अध्यर्धगुणः सार्धगुणो, योगः । यथा—शाकपलविंशत्या पादोनकुडुबः स्नेहः अध्यर्धपलिकं लवणम् अध्यर्धपलिकं क्षारमित्यादि । शुष्काणां मांसानां शाकानां च, द्विगुणः स्नेहः मांसविषये कुडुबपरिमाणः शाकविषयेऽध्यर्धकुडुबपरिमाण इत्यादिः ।

हस्त्यश्वयोरिति । हस्त्यश्वयोः, विधाप्रमाणं तण्डुलादिमानं, तदध्यक्षे तयोरध्यक्षे हस्त्यध्यक्षे अश्वाध्यक्षे च, वक्ष्यामः । इतीयमनागतावेक्षणरूपा तन्त्रयुक्तिः । बलीवर्दानाम् उक्ष्णां, माषद्रोणं, यवानां वा पुलाकः अर्धसिद्धस्तण्डुलः, अर्थाद् द्रोणपरिमाणः । शेषम्, अश्वविधानम् अश्वस्योक्तं विधानं ग्राह्यम् । **विशेष इति** । विशेषः अश्वापेक्षया विशेष एषामुच्यत इत्यर्थः । घाणपिण्याकतुला शुष्कस्य तिलकल्कस्य पलशतं, दशाढकं, कणकुण्डकं वा तण्डुलानां सूक्ष्मांशमिश्रमलं वा ।

द्विगुणमित्यादि । उक्तं बलीवर्दविधानं द्विगुणं माषद्विद्रोणं यवपुलाकद्विद्रोणं वा महिषाणामुष्ट्राणां च भवति । अर्धद्रोणं माषाणां यवपुलाकानां वा आढकद्वयं, खरपृषतरोहितानां गर्दभानां बिन्दुचित्रमृगाणां रोहितमृगाणां

क्रमेणकुरङ्गाणाम् । अर्धाढकमजैलकवराहाणां द्विगुणं वा कणकुण्डकम् । प्रस्थौदनः शुनाम् । हंसक्रौञ्चमयूराणामर्धप्रस्थः । शेषाणामतो मृगपशुपक्षिव्यालानामेकभक्तादनुमानं ग्राहयेत् ।

अङ्गारांस्तुषान् लोहकर्मान्तभित्तिलेप्यानां हारयेत् । कणिकाः दासकर्मकरसूपकाराणाम् । अतोऽन्यदौदनिकापूपिकेभ्यः प्रयच्छेत् ।

तुलामानभाण्डं रोचनीदृषन्मुसलोलूखलकुट्टकरोचकयन्त्रपत्रकशूर्पचालनिकाकण्डोलीपिटकसम्मार्जन्यश्चोपकरणानि ।

च। आढकं प्रस्थचतुष्टयम्, एणकुरङ्गाणां एणानां कुरङ्गाणां च मृगभेदानाम्। अर्धाढकं प्रस्थद्वयम्, अजैलकवराहाणाम् । अत्र पक्षान्तरमाह — द्विगुणम् उक्तार्धाढकाद् द्विगुणमेकाढकं, कणकुण्डकं वा । प्रस्थौदनः प्रस्थपरिमितमन्नं शुनाम् । हंसक्रौञ्चमयूराणाम्, अर्धप्रस्थः द्विकुडुबमन्नम् । **शेषाणामिति** । अतः उक्तेभ्यः, शेषाणां मृगपशुपक्षिव्यालानाम्, एकभक्ताद् एकदिवसभुक्तपरीक्षणाद्, अनुमानं शेषदिवसभक्तेयत्तानिश्चयं, ग्राहयेत् कारयेत् ।

पाककर्मणि निष्पन्नानामङ्गाराणाम् अवघातनिष्पतितानां तुषाणां च विनियोगमाह — **अङ्गारानित्यादि** । अङ्गारान् तुषांश्च, लोहकर्मान्तभित्तिलेप्यानां हारयेत् लोहकर्मान्तार्थे भित्तिलेप्यकर्मार्थे च सञ्चिनुयात् । भस्मादिसंग्रहस्याप्येतदुपलक्षणम् । भस्माद्यपि हि केदारादौ दोहदाद्यर्थे विनियुज्यते । कणिकाः तण्डुलकणान्, दासकर्मकरसूपकाराणां, प्रयच्छेद् भक्तार्थे । अतोऽन्यद् दासादिदत्तशेषम्, औदनिकापूपिकेभ्यः सामान्यान्नपाचकेभ्यः अपूपकर्मकरेभ्यश्च, प्रयच्छेत् तत्कर्मविनियोगार्थे ।

उपकरणान्याह — **तुलेत्यादि** । तुलामानभाण्डं तुलाभाण्डं मानभाण्डं च पौतवाध्यक्षे वक्ष्यमाणं, रोचन्यादिद्वादशकं च उपकरणानि । तत्र रोचनी दलनयन्त्रं, दृषत् पेषणी, मुसलोलूखले प्रतीते, कुट्टकरोचकयन्त्रे कुट्टकयन्त्रं रोचकयन्त्रं च आद्यमुष्ट्रग्रीवाकारं तण्डुलादिकुट्टनसाधनं द्वितीयं तु पेषणयन्त्रं, 'तच्च त्रिविधं मनुष्यप्रावर्तितं बलीवर्दप्रावर्तितं सलिलप्रावर्तितं चेति' इति भट्टस्वामी । पत्रकं दारुमय आवपनभेदः, शूर्पं प्रस्फोटनं, चालनिका तितउः, कण्डोली वंशदलादिनिर्मितं भाण्डं, पिटकः पेटारिका, संमार्जनी शोधनी ।

मार्जकारक्षकधारकमायकमापकदायकदापकशलाकाप्रतिग्राहकदासकर्मकरवर्गश्च विष्टिः ।

उच्चैर्धान्यस्य निक्षेपो मूताः क्षारस्य संहताः ।
मृत्काष्ठकोष्ठाः स्नेहस्य पृथिवी लवणस्य च ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः,
आदितः षट्त्रिंशः ॥

कर्मकरानाह — **मार्जक**ेत्यादि । मार्जकः भूमिसंस्कारकः, आरक्षकः कोष्ठागाररक्षी, धारकस्तुलोन्माता, मायको धान्यमाता, मापकस्तदधिष्ठाता, दायको दाता, दापकस्तदधिष्ठाता, शलाकाप्रतिग्राहको मापयष्ट्यादिप्रतिग्राही, दासः क्रीतः, कर्मकरस्तादात्विकभृतिभुक्, वर्ग उक्तजातीयगण आहितकादिः, विष्टिरिति त एते मार्जकादयो विष्टिसंज्ञिताः ।

अध्यायान्ते श्लोकमाह — **उच्चै**रित्यादि । धान्यस्य, उच्चैरुपरि, निक्षेपः भूमिस्पर्शो यथा न भवेत् तथा निक्षेपस्थानम् । क्षारस्य गुडफाणितादेः, संहताः सान्द्रघटिताः, मूताः तृणादिबन्धाः, निक्षेपः गोपनस्थानम् । स्नेहस्य घृततैलादेः, मृत्काष्ठकोष्ठाः मृत्कोष्ठाः कुम्भादयः काष्ठकोष्ठाः दारुकोष्ठाश्च मधूच्छिष्टजतुरसानुलिप्ताः, निक्षेपः । लवणस्य, पृथिवी भूमिः पार्थिवो घटादिर्वा, निक्षेपः । चकाराद् अनुक्तमन्यदपि निक्षेपस्थानमुक्तानाम्, अनुक्तानां शाकशुक्तादीनां निवेशस्थानं च यथार्हं कार्यमिति सूचयति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चदशोऽध्यायः कोष्ठागाराध्यक्षः,
आदितः षट्त्रिंशः ॥

३४. प्रक. पण्याध्यक्षः ।

पण्याध्यक्षः स्थलजलजानां नानाविधानां पण्यानां स्थलपथवारिपथोपयातानां सारफल्ग्वर्घान्तरं प्रियाप्रियतां च विद्यात् । तथा विक्षेपसंक्षेपक्रयविक्रयप्रयोगकालान् ।

यच्च पण्यं प्रचुरं स्यात् तदेकीकृत्यार्घमारोपयेत् । प्राप्तेऽर्घे वार्घान्तरं कारयेत् ।

स्वभूमिजानां राजपण्यानामेकमुखं व्यवहारं स्थापयेत्, पर-

पण्याध्यक्ष इति सूत्रम् । पण्यं विक्रेयं राजद्रव्यं तस्य विक्रये क्रये च नियुक्तः पण्याध्यक्ष इति सूत्रार्थः । सन्निधातृनिचयकर्माभिहितम् । निचितस्य राजपण्यस्य क्रयविक्रयव्यवहार इदानीमुच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहं पण्यगृहं कोष्ठागारमि'त्यादिना पण्यगृहकरणमुक्तम् । तदध्यक्षस्तदध्यक्षव्यापारो वा नोक्तः । स इहोच्यत इति सम्बन्धः । ननु च पण्याध्यक्षकर्म नाम वाणिज्यम् । तच्च कृषिपाशुपाल्यसहपाठात् सीताध्यक्षगोध्यक्षाभ्यामनन्तरं वक्तुमुचितम् । सत्यम् । किन्तु तस्येह कोष्ठागाराध्यक्षानन्तर्येण वचनं कोष्ठागाराध्यक्षस्यापि स्वव्यापाराः क्रयिमपरिवर्तकप्रामित्यकादयः पण्याध्यक्षापेक्षयानुष्ठेया इति ज्ञापनार्थम् ।

पण्याध्यक्ष इति । पण्याध्यक्षः, स्थलजलजानां स्थलजानां कुङ्कुमादीनां जलजानां मुक्ताप्रवालादीनां च, नानाविधानां पृथग् बहुप्रकाराणां, स्थलपथवारिपथोपयातानां, पण्यानां, सारफल्ग्वर्घान्तरं सारस्य बहुमूल्यस्य फल्गुनोऽल्पमूल्यस्य च अर्घान्तरं मूल्यतारतम्यं, प्रियाप्रियतां च प्रियतां शीघ्रविक्रयताम् अप्रियतां मन्दविक्रयतां च, विद्यात् । तथा, विक्षेपादिप्रयोगकालान् विक्षेपः संक्षिप्तद्रव्यविस्तारः संक्षेपः विक्षिप्तद्रव्यसंक्षेपः क्रयः पण्यसंग्रहः विक्रयः संगृहीतपण्यव्ययः इत्येतेषां प्रयोगकालान् अनुष्ठानाननुष्ठानकालान्, विद्यादिति सम्बध्यते ।

यच्चेति । यत् पण्यं कुङ्कुमादि, प्रचुरं प्राज्यं, स्यात्, तद् एकीकृत्य तत् सर्वमेकत्रगतं कृत्वा, अर्घम्, आरोपयेत् आरूढमधिकं स्थापयेत् । प्राप्तेऽर्घे वा न्यायलभ्येऽर्घेऽधिगते वा संति, अर्घान्तरम् अर्घभेदमारोपितात्लघुं, कारयेत् ।

स्वभूमीत्यादि । स्वभूमिजानां स्वविषयोद्भवानां, राजपण्यानाम्, एकमुखम् एकस्थानं, व्यवहारं विक्रयं, स्थापयेद्, राजा । परभूमिजानां पर-

भूमिजानामनेकमुखम् । उभयं च प्रजानामनुग्रहेण विक्रापयेत् । स्थूलमपि च लाभं प्रजानामौपघातिकं वारयेत् । अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत् ।

बहुमुखं वा राजपण्यं वैदेहकाः कृतार्घं विक्रीणीरन् । छेदानुरूपं च वैधरणं दद्युः ।

षोडशभागो मानव्याजी । विंशतिभागस्तुलामानम् । गण्यपण्यानामेकादशभागः ।

परभूमिजं पण्यमनुग्रहेणावाहयेत् । नाविकसार्थवाहेभ्यश्च परिहारमायतिक्षमं दद्यात् । अनभियोगश्चार्थेष्वागन्तूनामन्यत्र सभ्योपकारिभ्यः ।

विषयोपनीतानाम्, अनेकमुखं, स्थापयेत् । उभयं च स्वभूमिजं परभूमिजं च, जानाम्, अनुग्रहेण अनुपपीडया, विक्रापयेत्, अर्थात् पण्याध्यक्षः । स्थूलं प्रभूतमपि, लाभं, प्रजानाम्, औपघातिकम् उपघातः पीडा तत्पर्यवसायिनं, वारयेत् । अजस्रपण्यानां क्षीरशाकादीनां, कालोपरोधं कालविक्रयप्रतिषेधं, संकुलदोषं वा शाकादिषु कैश्चिदानीतचरेष्वविक्रीतेष्वन्यैः शाकाद्यानयनं वा, नोत्पादयेत्

बह्वित्यादि । वैदेहकाः वणिजः, कृतार्घं व्यवस्थापितमूल्यं, राजपण्यं, बहुमुखं वा बहुषु स्थलेषु वा, विक्रीणीरन् । **छेदानुरूपं च वैधरणमिति** । यदि विक्रये कश्चिच्छेदोऽर्घहानिर्भवेत् तदनुरूपं छेदतुल्यमानं, वैधरणं दद्युः । छेदप्रतिनिधेर्वैधरणमिति संज्ञा ।

वणिग्भ्य उपादेयां राजोपदामाह—**षोडशेत्यादि** । षोडशभागो मानव्याजी मेयद्रव्यषोडशांशो मानव्याजीसंज्ञः । स राज्ञे देयः । तुलामानं विंशतिभागः तोलनीयद्रव्यं पलशते पञ्चपलमितं, राज्ञे देयम् । गण्यपण्यानां क्रमुकफलादीनाम्, एकादशभागः, राज्ञे देयः । सर्वेयं व्याजी क्रेतृग्राह्येति केचित् ।

परेत्यादि । परभूमिजं पण्यम्, अनुग्रहेण अन्तपालाटविकराजवल्लभाद्युपद्रववारणेन व्याजीमोक्षेण च, आवाहयेत् आनाययेत् । नाविकसार्थवाहेभ्यश्च जलपथवाहकवणिग्भ्यश्च, परिहारम् आदेयमोक्षम्, आयतिक्षमम्

पण्याधिष्ठातारः पण्यमूल्यमेकमुखं काष्ठद्रोण्यामेकच्छिद्रापिधानायां निदध्युः। अह्नश्चाष्टमे भागे पण्याध्यक्षस्यार्पयेयुः — इदं विक्रीतमिदं शेषमिति। तुलामानभाण्डकं चार्पयेयुः। इति स्वविषये व्याख्यातम्।

परविषये तु — पण्यप्रतिपण्ययोरर्घं मूल्यं च आगमय्य शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभक्तभाटकव्ययशुद्धमुदयं पश्येत्। असत्युदये भाण्डनिर्वहणेन पण्यप्रतिपण्यार्घेण वा लाभं पश्येत्। ततः

उत्तरकालाबाधकं, दद्यात्। अनभियोगश्च उत्तमर्णकर्तृकाभियोगप्रतिषेधश्च, अर्थेषु ऋणादिषु विषये, आगन्तूनां देशान्तरागतानां, तद्विषये अभियोगं विनैव ऋणदानं व्यवस्थाप्यमिति भावः। अत्रापवादमाह—अन्यत्र सभ्योपकारिभ्यः तदुपकारिकर्मकरानपहाय। तेषां तु परस्पराभियोगो भवत्येव।

पण्याधिष्ठातार इति। राजपण्यविक्रेतारः, पण्यमूल्यं पण्यविक्रयागतं धनम्, **एकमुखम्** एकस्थानागतं, काष्ठद्रोण्यां दारुपेटिकायाम्, **एकच्छिद्रापिधानायाम्** एकद्वाराच्छादनायां, **निदध्युः** निक्षिपेयुः। **अह्नश्च,** अष्टमे चरमे, भागे, उपलक्षणात् क्रयसमयावसाने वा, पण्याध्यक्षस्य, अर्पयेयुः। किं कृत्वा, इदं विक्रीतम् इदं शेषमिति एतावद् विक्रीतम् एतावद् विक्रेयमवशिष्यत इति बोधयित्वा। तुलामानभाण्डकं तुलाप्रस्थकुडुवादिकं च, अर्पयेयुः, पण्याध्यक्षस्य। **इति स्वविषये व्याख्यात**मिति। एवं स्वदेशे पण्यपणनविधिर्विवृतः।

परविषये त्विति। व्याख्यायत इति शेषः। **पण्ये**त्यादि। पण्यप्रतिपण्ययोः स्वपण्यपरविषयपण्ययोः, अर्घं समन्यूनाधिकं, मूल्यं च भाण्डोपस्कारादिमूल्यं च, आगमय्य विज्ञाय, शुल्कादिव्ययशुद्धं शुल्कादिव्ययशोधितावशेषम्, उदयं लाभं, पश्येत् समीक्षेत, सति लाभदर्शने स्वपण्यं परविषये प्रेषयेदित्यभिप्रायः। तत्र शुल्कं शुल्काध्यक्षोक्तं, देयशब्दस्य वर्तन्यादिभिः प्रत्येकमभिसम्बन्धः। वर्तनीदेयम् अन्तपालदेयम्, आतिवाहिकदेयं मार्गातिवाहनसहायभूतायुधीयदेयं, गुल्मदेयं वनस्थानिकदेयं, तरदेयं नद्याद्युत्तारकनाविकादिदेयं, भक्तं भोजनं कर्मकरबलीवर्दादिभृतिश्च, भाटकः प्रसेवकादिग्रहणार्थः प्रक्रयः। भागेति स्वपपाठ इति भाति। **असतीति**। असत्युदये लाभादर्शने, **भाण्डनिर्वहणेन** स्वपण्यस्य परदेशनयनेन लाभकालप्रतीक्षापूर्वक-

सारपादेन स्थलव्यवहारमध्वना क्षेमेण प्रयोजयेत् । अटव्यन्तपालपुरराष्ट्रमुख्यैश्च प्रतिसंसर्गं गच्छेदनुग्रहार्थम् ।

आपदि सारमात्मानं वा मोक्षयेत् । आत्मनो वा भूमिमप्राप्तः सर्वदेयविशुद्धं व्यवहरेत् ।

वारिपथे च यानभाटकपथ्यदनपण्यप्रतिपण्यार्घप्रमाणयात्राकालभयप्रतीकारपण्यपत्तनचारित्राण्युपलभेत ।

विक्रयद्वारेण, लाभं पश्येत् । वा अथवा, पण्यप्रतिपण्यार्घेण स्वपण्यस्य प्रतिपण्यार्घकरणेन स्वपण्यदानपूर्वकप्रियपण्यान्तरग्रहणेनेत्यर्थः, लाभं पश्येत् । **तत** इति । ततः लाभदर्शनानन्तरं, सारपादेन समीक्षितलाभचतुर्थांशव्ययेन, स्थलव्यवहारं सुलभापायो जलपथ इति कृत्वा स्थलपथव्यवहारं, क्षेमेणाध्वना स्थलपथेनापि चोराद्युपद्रवरहितेन, प्रयोजयेत् । **अटव्यन्तपालपुरराष्ट्रमुख्यैश्च** अटवीपालान्तपालपुरमुख्यराष्ट्रमुख्यैश्च सह, प्रतिसंसर्गं सोपदानं संगतं, गच्छेद्, अनुग्रहार्थं तदानुकूल्यार्थम् ।

आपदीति । आपदि चोरोपरोधे, सारं रत्नादिद्रव्यम्, आत्मानं वा स्वशरीरं च, मोक्षयेत् रक्षेत् । इदं च सति सम्भवे । उभयमोक्षणासौकर्ये तु सारपरित्यागेनात्मैव मोक्षणीयः । यदाहुः—

"शरीरमर्थाद् गोप्तव्यं राजगुप्तभयार्दितम् ।
वित्तहीनोऽल्पवित्तो वा जीवन् भद्राणि पश्यति ॥"

इति । **आत्मनो वेति** । आत्मनो वा भूमिमप्राप्तः स्वपण्यविक्रयभूमिभूतात् परविषयात् स्वविषयमप्रत्यागतः, परविषयवासकाले कृत्स्नेऽपीत्यर्थः, सर्वदेयविशुद्धं व्यवहरेत् शुल्कादिनिखिलदेयाप्रदानापराधविधुरं विक्रयव्यवहारं कुर्यात्, स्वल्पप्रत्याशया सर्वनाशो मा भूदिति ।

वारिपथे चेति । जलपथे च, यानभाटकादीनि, उपलभेत ज्ञात्वा तदनुरोधेन व्यवहरेत् । तत्र यानभाटकः नाविकभृतिः, पथ्यदनं मार्गभक्तं, पण्यप्रतिपण्यार्घप्रमाणं पण्यप्रतिपण्ययोरर्घतारतम्यं, यात्राकालः यात्रार्हऋतुविशेषलक्षणो गतागतापेक्षितकालेयत्ता वा, भयप्रतीकारः सम्भाविततस्करादिभयप्रतिविधिः, पण्यपत्तनचारित्रं स्वपण्यविक्रयस्थानभूतपरकीयपत्तनसमुदाचारः ।

नदीपथे च विज्ञाय व्यवहारं चरित्रतः ।
यतो लाभस्ततो गच्छेदलाभं परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः,
आदितः सप्तत्रिंशः ॥

अध्यायान्ते श्लोकमाह — **नदीपथे** चेति । नदीपथे च न केवलं समुद्रमार्गे किन्तु नदीमार्गेऽपि, व्यवहारं वाणिज्यं, चरित्रतः तत्तद्देशाचारानुरोधेन, विज्ञाय, यतो येन पथा, लाभः, ततो गच्छेत् । अलाभम् अल्पलाभं क्षयव्ययप्रवासादिमहाक्लेशाननुरूपलाभं जलपथं, परिवर्जयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षोडशोऽध्यायः पण्याध्यक्षः,
आदितः सप्तत्रिंशः ॥

३५. प्रक. कुप्याध्यक्षः ।

कुप्याध्यक्षो द्रव्यवनपालैः कुप्यमानाययेत् । द्रव्यवनकर्मान्तांश्च प्रयोजयेत् । द्रव्यवनाच्छिदां च देयमत्ययं च स्थापयेदन्यत्रापद्भ्यः ।

कुप्यवर्गः — शाकतिनिशधन्वनार्जुनमधूकतिलकसालशिंशपारिमेदराजादनशिरीषखदिरसरलतालसर्जाश्वकर्णसोमवल्ककशाम्रप्रियकधवादिः सारदारुवर्गः ।

कुप्याध्यक्ष इति सूत्रम् । कुप्यं सारदारुवेणुवल्लिवल्कादि, तत्र नियुक्तः कुप्याध्यक्षः, अर्थात् तस्य व्यापारः कुप्यविषय इहोच्यत इति सूत्रार्थः । कोशप्रवेश्यरत्नपरीक्षायां रत्नसारफल्गुकुप्यान्युपक्रम्य रत्नसारफल्गुप्रतिग्रहणमुक्तं, कुप्यस्य त्वनुक्तमिहोच्यत इति सम्बन्धः । अथवा 'सन्निधाता कोशगृहमि'त्यादिना कुप्यगृहविधानं पूर्वमुक्तं, तदध्यक्षव्यापारस्त्वधुनोच्यत इति ।

कुप्याध्यक्ष इत्यादि । कुप्याध्यक्षः, द्रव्यवनपालैः वार्क्षवनरक्षिभिः, कुप्यं सारदार्वादि, आनाययेद् आवाहयेत् । द्रव्यवनकर्मान्तांश्च दारुनिर्मेयान् गृहशकटादिकान्, प्रयोजयेत् कारयेत् । द्रव्यवनच्छिदां च द्रव्यवनच्छेदोपजीविनां च वृक्षमर्मज्ञानां, देयं छेदनीयशिरश्शाखास्कन्धमूलभागभेदेन छेदनदुर्गतारणाद्यर्थे प्रदेयं वेतनं, स्थापयेद् एतावदिति व्यवस्थापयेत् । अत्ययं च दण्डं चाननुज्ञातच्छेदने, स्थापयेत् । किं सर्वदा, नेत्याह — अन्यत्रापद्भ्य इति । शकटयुगभङ्गादिविपत्प्राप्तौ तु कालविलम्बासहयुगयोजनाद्यर्थे अननुज्ञातच्छेदनं नापराधः ।

कुप्यवर्ग इति । वक्ष्यत इति शेषः । अयं चाधिकारः । तत्र शाकाद्येकविंशतिः सारदारुवर्ग इत्याह — शाकतिनिशेत्यादि । शाकः पृथुच्छदाख्यो वृक्षः, तिनिशो नेमी, धन्वनः धनुर्वृक्षः, अर्जुनः ककुभः, मधूकः मधुद्रुमः, तिलकः क्षुरकः, सालः कार्ष्यकाख्यः, शिंशपा तीक्ष्णधूमाख्या, अरिमेदः विट्खदिरः पूतिखदिराख्यः, राजादनः फलाध्यक्षाख्यः, शिरीषः कपीतनः, खदिरस्तिक्तसाराख्यः, सरलः पूतिकाष्ठाख्यः तालः तृणद्रुमः, सर्जः पीतसालकः, अश्वकर्णः सर्जभेदः, सोमवल्कः सितखदिरः, कशः लोमशपुच्छको नकुलवृक्षभेदः, आम्रश्चूतः, प्रियकः गौरसर्जः, धवः धुरन्धराख्यः, आदिग्रहणमनुक्तसंग्रहार्थम् ।

उटजचिमियचापवेणुवंशसातीनकण्टकभाल्लूकादिर्वेणुवर्गः ।

वेत्रशीकवल्लीवाशीश्यामलतानागलतादिर्वल्लीवर्गः ।

मालतीमूर्वार्कशणगवेधुकातस्यादिर्वल्कवर्गः ।

मुञ्जबल्बजादि रज्जुभाण्डम् । तालीतालभूर्जानां पत्रम् । किंशुककुसुम्भकुङ्कुमानां पुष्पम् ।

कन्दमूलफलादिरौषधवर्गः ।

कालकूटवत्सनाभहालाहलमेषशृङ्गमुस्ताकुष्ठमहाविषवेल्लितकगौ-

वेणुवर्गमाह — **उटजे**त्यादि । उटजो महासुषिरस्तनुकण्टकः कर्कशपृष्ठः, चिमियो निस्सुषिरो मृदुत्वक्कः, चापः स्वल्पसुषिरोऽतिखरश्च, वेणुर्निष्कण्टकश्चापयोग्यः, वंशो दीर्घपर्वकः सरन्ध्रः सकण्टकश्च, सातीनकण्टकौ वंणुभेदौ, भाल्लूकः स्थूलदीर्घो महाप्रमाणो निष्कण्टकः ।

वल्लीवर्गमाह — **वेत्रे**त्यादि । वेत्रं प्रसिद्धं, शीकवल्ली हंसवल्लीति देशविशेषप्रसिद्धा, वाशी अर्जुनपुष्पसमानपुष्पा, श्यामलता त्रिपुटीसदृशी, नागलता नागजिह्वा ।

वल्कवर्गमाह — **मालती**त्यादि । मालती माहुलानीति देशविशेषप्रसिद्धा, मूर्वा मरुलिति द्रविडप्रसिद्धा, अर्कः शणोऽतसी च प्रतीताः, गवेधुका नागबला ।

रज्जुभाण्डादिकमाह — **मुञ्जे**त्यादि । मुञ्जबल्बजादि मुञ्जः शरः बल्बजास्तृणविशेषः इत्येवमादि, रज्जुनिर्माणसाधनम् । **ताली**त्यादि । तालीतालभूर्जाः प्रसिद्धाः तेषां पत्रं लेख्योपयोगि । किंशुककुसुम्भकुङ्कुमानां, पुष्पं वस्त्रादिरञ्जनसाधनम् ।

ओषधिवर्गमाह —**कन्दमूले**त्यादि । कन्दाः सूरणादयः मूलान्युशीरादीनि फलानि आमलकहरीतक्यादीनि एतदादिः ओषधिवर्गः ।

विषवर्गमाह — **कालकूटे**त्यादि । कालकूटोऽश्वत्थपत्राकृतिपत्रो वृक्षः पर्वान्तराच्छुष्कमार्द्रं च निर्यासमुद्गिरति । वत्सस्येव नाभिरस्य वत्सनाभः, निर्गुण्डीसदृशपत्रं सूचीपत्रं नीलपल्लवं गोस्तनाकृतिफलं हालाहलं, मेषशृङ्गमुत्पलमुकुलाकारं, मुस्ता द्विविधा मुस्ताकारा खण्डशर्करोपमा च, शङ्खपाण्डरा चेति स्वामी, कुष्ठं . कुष्ठसमानकन्दं, महाविषं मांसवर्णं स्तनचूचुकाकारं,

रार्द्रबालकमार्कटहैमवतकालिङ्गकदारदकाङ्कोलसारकोष्ट्रकादीनि विषाणि ।

सर्पाः कीटाश्च । त एव कुम्भगताः । विषवर्गः ।

गोधासेरकद्वीपिशिंशुमारसिंहव्याघ्रहस्तिमहिषचमरसृमरखड्गगोमृगगवयानां चर्मास्थिपित्तस्नाय्वस्थि(?)दन्तशृङ्गखुरपुच्छानि, अन्येषां वापि मृगपशुपक्षिव्यालानाम् ।

कालायसताम्रवृत्तकांस्यसीसत्रपुवैकृन्तकारकूटानि लोहानि ।

वेल्लितकं मूलजं कृष्णरक्तं, गौरार्द्रं कन्दजं कृष्णं, बालकं पिप्पल्याकारं, मार्कटं कीटेमाकारं, हैमवतं हिमवदुत्पन्नं दीर्घपत्रं, कालिङ्गकं कलिङ्गभवं यवाकृति, दारदकं दरदप्रभवं पत्रविषम्, अङ्कोलसारकम् अङ्कोलवृक्षजं विषम्, उष्ट्रकम् उष्ट्रमेढ्राकारम्, इत्येवं षोडश, आदिग्रहणादनुक्तानामेकोनसप्ततिप्रकाराणां ग्रहणम् । तदेवं स्थावराणि विषाणि पञ्चाशीतिर्भवन्ति दशाश्रयाणि । तथाच भट्टस्वामिनः श्लोकः —

"त्वक्कन्दपत्रपुष्पाणि फलं निर्यास एव च ।
मूलं सारस्तथा धातुर्बीजं चेति दशाश्रयाः ॥
अव्यक्तरसगन्धानि तीक्ष्णान्येकरसानि च ।
पञ्चाशीतिर्विषाण्येवमुपदिष्टानि तत्त्वतः ॥" इति ।

जङ्गमविषाणि द्विविधान्याह — **सर्पाः कीटाश्चेति** । सर्पाः कृष्णसर्पादयः, कीटाः चित्रभेककौण्डिन्यकादयः । उभये चैते प्रत्येकं द्विविधाः संस्कृतासंस्कृतभेदेन । तत्रासंस्कृताः स्वभावस्थिताः । संस्कृतांस्त्वाह — **त एवेति** । त एव सर्पाः कीटाश्च, कुम्भगताः औपनिषदोक्तविधानेन संस्कृत्य कुम्भे त्रपुघटे संयोजिताः । स एष विषवर्गः ।

अथ चर्मादिवर्गानाह — **गोधासेरकेत्यादि** । सेरकः गौरत्वग् गोधाभेदः, द्वीपी चित्रकायः, सृमरः शरभः, अन्ये प्रसिद्धाः, एषां चर्मादीनि कुप्याधिकारात् कुप्यसंज्ञानि संग्राह्याणि च भवन्ति । अन्येषां वापि अनुक्तानामपि मृगपशुपक्षिव्यालानां, चर्मादीनि यथोपयोगं संग्राह्याणि ।

लोहान्याह — **कालायसेत्यादि** । आकरकर्मान्तप्रवर्तनप्रकरणे पूर्वमुक्तानामपि लोहानामिह पुनः पाठः कुप्यसंज्ञार्थः ।

विदलमृत्तिकामयं भाण्डम् ।

अङ्गारतुषभस्मानि मृगपशुपक्षिव्यालवाटाः काष्ठतृणवाटाश्चेति ।

बहिरन्तश्च कर्मान्ता विभक्ताः सर्वभाण्डिकाः ।
आजीवपुररक्षार्थाः कार्याः कुप्योपजीविना ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः,
आदितोऽष्टात्रिंशः ॥

भाण्डमाह — **विदले**त्यादि । भाण्डं, विदलमृत्तिकामयं विदलमयं वंशवेत्रादिमयं पिटकफेलकादि मृत्तिकामयं कुलालभाण्डं घटशरावादि ।

अङ्गारेत्यादि । अङ्गारतुषभस्मानि, मृगपशुपक्षिव्यालवाटाः मृगादीनां वाटाः स्थानानि, काष्ठतृणवाटाश्च काष्ठतृणानां समूहाश्च, कुप्यसंज्ञास्तेऽपि संग्राह्याः ।

अध्यायान्ते श्लोकमाह — **बहिरि**ति । बहिः द्रव्यवननिकटप्रदेशे जनपदे च, अन्तश्च दुर्गाभ्यन्तरे च, कर्मान्ताः शकटादिघटनरूपाः, विभक्ताः असंकीर्णाः पृथगवस्थानाः, सर्वभाण्डिकाः सर्वविधभाण्डसम्बद्धाः, आजीवपुररक्षार्थाः आजीवार्थाः जीविकाप्रयोजनाः हलमुसलशकटादयः पुररक्षार्थाः यन्त्रायुधादयश्च, कार्याः कारयितव्याः, कुप्योपजीविना तत्तत्कुप्यशिल्पाजीवेन प्रयोज्यकर्त्रा कुप्याध्यक्षेण प्रयोजकेन ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तदशोऽध्यायः कुप्याध्यक्षः,
आदितोऽष्टात्रिंशः ॥

३६. प्रक. आयुधागाराध्यक्षः ।

आयुधागाराध्यक्षः साङ्ग्रामिकं दौर्गकर्मिकं परपुराभिघातिकं यन्त्रमायुधमावरणमुपकरणं च तज्जातकारुशिल्पिभिः कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारयेत् । स्वभूमौ च स्थापयेत् । स्थानपरिवर्तनमातपप्रवातप्रदानं च बहुशः कुर्यात् । ऊष्मोपस्नेहक्रिमिभिरुपहन्यमानमन्यथा स्थापयेत् । जातिरूपलक्षणप्रमाणागममूल्यनिक्षेपैश्चोपलभेत ।

सर्वतोभद्रजामदग्न्यबहुमुखविश्वासघातिसङ्घाटियानकपर्जन्यकबाहूर्ध्वबाह्वर्धबाहूनि स्थितयन्त्राणि ।

आयुधागाराध्यक्ष इति सूत्रम् । आयुधशालाध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । कुप्यप्रसङ्गात् तदन्तर्गतायुधप्रस्तावसङ्गतिः । अथवा सन्निधातुरायुधागारकरणं पूर्वमुक्तं, तदध्यक्षस्त्वनुक्त इहाभिधीयत इति सङ्गतिः ।

आयुधागारेत्यादि । आयुधागाराध्यक्षः, साङ्ग्रामिकं सङ्ग्रामप्रयोजनकं, दौर्गकर्मिकं दुर्गकर्म स्वदुर्गरक्षणं तत्साधकं, परपुराभिघातिकं शत्रुदुर्गविध्वंसनानुकूलं, यन्त्रं सर्वतोभद्रजामदग्न्यादि, चक्रयन्त्रमिति मूलपाठश्चिन्त्यः । आयुधं शक्तिचापादि, आवरणं लोहजालादि, उपकरणं च युग्यादि च, तज्जातकारुशिल्पिभिः तज्जातैस्तत्कर्मसमर्थैः कारुभिः स्थूलकर्मकारिभिः शिल्पिभिः सूक्ष्मकर्मकारिभिश्च, तैः कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृतकर्मप्रमाणकालवेतना कर्मप्रमाणं कर्तव्ययन्त्रायुधादीनां सङ्ख्यासंस्थानादिमानं कालोऽवधिः वेतनं भृतिरित्येतानि कृतानि परिभाषितानि यस्यां सा तथाभूता फलनिष्पत्तिर्यन्त्रादिनिष्पत्तिर्येषां तैस्तथाभूतैः, कारयेत् । **स्वभूमौ च स्थापयेदिति** । कारितानि च तानि स्वायत्ते स्थाने निवेश्य रक्षेत् । स्थानपरिवर्तनं स्थानात् स्थानान्तरनिवेशनम्, आतपप्रवातप्रदानम् आतपवातविसारणं च, तेषां बहुशः असकृत् त्रिचतुर्दिवसात्यासं, कुर्यात् । ऊष्मोपस्नेहक्रिमिभिः घर्मप्रस्वेदघुणकादिभिः, उपहन्यमानम्, अन्यथा प्रकारान्तरेणानुपघातहेतुना, स्थापयेत् । **जातीत्यादि** । जात्यादिभिश्च उपलभेत तानि विजानीयात् । तत्र जातिः स्वभावः पाटनादिः, रूपमृजुवक्रतादि, लक्षणं शास्त्रोक्तमुत्तमादिचिह्नं, प्रमाणं मानोन्मानतो दैर्घ्यविस्तारादिपरिच्छेदः, आगमः यतो लब्धं सः, मूल्यम् अर्घः, निक्षेपः कोशभस्त्रादिः ।

यन्त्राण्याह — **सर्वतोभद्रेत्यादि** । अत्र स्वामी व्याचष्टे — "तत्र

पञ्चालिकदेवदण्डसूकरिकामुसलयष्टिहस्तिवारकतालवृन्तमुद्गरद्रुघणगदास्पृक्तलाकुद्दालास्फोटिमोद्घाटिमोत्पाटिमशतघ्नीत्रिशूलचक्राणि चलयन्त्राणि ।

सर्वतोभद्रं शकटचक्रप्रमाणं तीक्ष्णनेमि कुड्यस्थितगन्धर्वहस्तस्थं भ्रमणात् सर्वतः पाषाणान् क्षिपति । अपरे तु सिद्धभूमिकायन्त्राख्यं लघुतरपाषाणक्षेपणमाचक्षते । जामदग्न्यं मध्यरन्ध्रविनिहितमहाशरं यन्त्रम् । बहुमुखं प्राकारोत्सेधाधिगतश्चक्रसन्निविष्टश्चर्मावृतश्चिचतुस्तलो धानुष्काधिष्ठानं च अट्टालको भवति, तत्र स्थिता धन्विनो नराः सर्वतः शरान् क्षिपन्ति । विश्वासघाति तिर्यगवस्थितो नगरस्य बहिःपरिघो यन्त्रविश्लेषणेन हन्ति । सङ्घाटि दीर्घकाष्ठसङ्घटितमट्टालकादिप्रदीपनार्थमग्नियन्त्रम् । यानकं चक्रारूढं दण्डायतं फलककोष्ठि । पर्जन्यकमग्निप्रशमनार्थमुदकयन्त्रम्, अन्ये तु—पञ्चाशद्धस्तायतं बहिः प्राकारस्य सन्ततं यन्त्रविश्लेषणेन समीपगतं व्यापादयतीत्याचक्षते । विश्वासघातिनोऽस्य च विशेषः — तत् प्रच्छन्नं लघुतरं च भवति, एतत्तु तद्विपरीतमिति । बाहुयन्त्रं पर्जन्यकार्धप्रमाणं स्तम्भद्वयं परस्पराभिमुखं यन्त्रविश्लेषणेन मारयति । ऊर्ध्वबाहु ऊर्ध्वस्थितः पर्जन्यकप्रमाणो महास्तम्भः समीपगतान् यन्त्रविश्लेषणेन हन्ति । अर्धबाहु पूर्वस्यैवार्धप्रमाणम् । इत्येवमेतानि दश स्थितयन्त्राणि" इति ।

चलयन्त्राण्याह — **पञ्चालिके**त्यादि । पञ्चालिकं तीक्ष्णमुखनिरन्तरसारदारुफलकं प्राकाराद् बहिरुदकमध्ये शत्रुमार्गनिरोधार्थं क्रियते । देवदण्डः कीलरहितः महास्तम्भः प्रतीतरोचाभिधान इति स्वामी । स प्राकारस्योपरि स्थाप्यते । सूकरिका सूत्रचर्ममयी कार्पासोर्णादिपूर्णमध्या महाभस्त्रा प्रमाणतो गोपुराट्टालकदेवपथादीनां प्रच्छादनी बाह्यपाषाणनिवारणाय क्रियत इति केचित् । 'वेणुमयी चर्मावृता सूकराकारा प्राकारग्रहणनिवारणाय क्रियत इत्यन्ये' इति स्वामी । मुसलयष्टिः खादिरः शूलः । हस्तिवारको 'द्विमुखस्त्रिमुखो वेति केचित् । हस्त्याघाताय हस्तिपरिघ इत्यपरे' इति स्वामी । तालवृन्तं वातचक्रम् । मुद्गरः प्रसिद्धः । द्रुघणो मुद्गराकारः । गदा लगुडी । स्पृक्तला गदैव कण्टकानिचिता । कुद्दालः खनित्रम् । आस्फोटिमं चर्मावृतं चतुःस्तम्भं मृत्पाषाणक्षेपणयन्त्रम् । उद्घाटिमं मुद्गराकृतिरेव यन्त्रभेदः । उत्पाटिमं स्तम्भाद्युत्पाटनं श्येनयन्त्रम् । शतघ्नी स्थूलदीर्घकीलाचितो महास्तम्भः पर्यन्ताहितशकटचक्रः प्राकारोपरि क्रियते । त्रिशूलचक्रे प्रसिद्धे । इत्येतानि सप्तदश चलयन्त्राणि । श्लोकश्चात्र भट्टस्वामिनः —

शक्तिप्रासकुन्तहाटकभिण्डिपालशूलतोमरवराहकर्णकणयकर्पणत्रासिकादीनि च हलमुखानि ।

तालचापदारवशार्ङ्गाणि कार्मुककोदण्डद्रूणा धनूंषि ।

"व्यधितं भ्रमितं चैव भारयुक्तं च कारयेत् ।
पीडनाद् भ्रमणाद् भारात् त्रिधा यन्त्रं प्रवर्तते ॥" इति ।

आयुधान्याह — **शक्तिप्रासेत्यादि** । शक्तिः सर्वलोहमयं करवीरपत्राकृतिमुखम् अधस्ताद् गोस्तनाकारं चतुर्हस्तदीर्घमायुधं, प्रासश्चतुर्विंशत्यङ्गुलो द्विपीठः सर्वलोहमयः काष्ठगर्भश्च , कुन्तः —

"हस्ताः सप्तोत्तमः कुन्तः षड्ढस्तैश्चैव मध्यमः ।
कनिष्ठः पञ्चहस्तैस्तु कुन्तमानं प्रकीर्तितम् ॥"

इत्युक्तलक्षणः, हाटकं त्रिकण्टकं कुन्ततुल्यप्रमाणं, भिण्डिपालः कुन्त एव पृथुफलः, शूलम् एकमुखमनियतहस्तप्रमाणं, तोमरः शराकृतिशिखः —

"चतुर्हस्तः कनिष्ठस्तु चत्वारोऽर्धं च मध्यमः ।
उत्तमः पञ्चहस्तस्तु प्रमाणात् तोमरो भवेत् ॥"

इत्यभिहितत्रिभेदः, वराहकर्णः प्रास एव वराहकर्णाकृतिमुखः, कणयः सर्वलोहमय उभयतस्त्रिकण्टकाकारमुखो मध्यमुष्टिः,

"कनिष्ठो विंशतिः स्यात् तदङ्गुलानां प्रमाणतः ।
द्वाविंशतिर्मध्यमः स्याच्चतुर्विंशतिरुत्तमः ॥"

इत्युक्तप्रकारत्रयः, कर्पणः तोमरतुल्यमानो हस्तक्षेप्यः पक्षयुक्तः शरः —

"कनीयः सप्तकर्षं तु द्विपलं मध्यमं भवेत् ।
उत्तमं नवकर्षं तु कर्पणस्य पलं भवेत् ॥"

इत्युक्तत्रिप्रकारपलप्रमाणः, त्रासिका सर्वलोहमयी प्रासप्रमाणा चूडोपेता, इत्येवञ्जातीयान्यायुधानि, हलमुखानि तीक्ष्णाग्रत्वात् ।

धनूंष्याह — तालेत्यादि । तालचापदारवशार्ङ्गाणि तालं तालमयं चापं वेणुविशेषमयं दारवं धन्वनादिसारवृक्षदारुनिर्मितं शार्ङ्गं विषाणमयम् इत्येवं चतुष्प्रकृतीनि, धनूंषि भवन्ति । तानि च कार्मुककोदण्डद्रूणाः आकृतिक्रियादिभेदात् कार्मुकादिसंज्ञानि भवन्ति । तत्र कार्मुककोदण्डयोः प्रमाणलक्षणादिकं धनुर्वेदादवगन्तव्यं, 'द्रूणस्तु लोकप्रतीत' इति स्वामी ।

मूर्वार्कशणगवेधुवेणुस्नायूनि ज्याः ।

वेणुशरशलाकादण्डासननाराचाश्च इषवः । तेषां मुखानि छेदनभेदनताडनान्यायसास्थिदारवाणि ।

निस्त्रिंशमण्डलाग्रासियष्टयः खड्गाः । खड्गमहिषवारणविषाणदारुवेणुमूलानि त्सरवः ।

परशुकुठारपट्टसखनित्रकुद्दालक्रकचकाण्डच्छेदनाः क्षुरकल्पाः ।

यन्त्रगोष्पणमुष्टिपाषाणरोचनीदृषदश्चायुधानि ।

ज्या आह— **मूर्वे**त्यादि । स्नायुर्वायुवाहिनी नाडी । शेषं प्रतीतम् । तत्र वेणुविदलज्या कोदण्डस्यैव, अन्ययोस्त्वन्या इति स्वामी ।

इषूनाह — **वेणि**त्यादि । तत्र वेणुरुटजांचिमियादिः, शरो जात्यशराख्यः स्तम्बः, शलाका सारदारुमयी, दण्डासनोऽर्धनाराचः, **नाराचः सर्वलोहमयः** । **चकारो** भ्रमरद्रोणमक्षिकादिसंग्रहार्थ इति स्वामी । **इषुकर्माण्याह — तेषामि**ति । तेषाम् इषूणां, मुखानि अग्राणि, छेदनानि कर्तनानि, भेदनानि सशोणिताभिघातदायकानि, ताडनानि अशोणितप्रहारदायकानि च भवन्ति । मुखानां प्रकृतिमाह — **आयसास्थिदारवाणी**ति । आयसानि अस्थिमयानि दारवाणि सारदारुमयानि च ।

खड्गानाह — निस्त्रिंशेत्यादि । तत्र निस्त्रिंशो वक्राग्रः, मण्डलाग्रः ऋजुवृत्ताकाराग्रः, असियष्टिस्तनुदीर्घाकृतिः । त्सरुप्रकृतीराह — **खड्गे**त्यादि । खड्गो गण्डकमृगः, महिषः सैरिभः, वारणो गजः इत्येतेषां विषाणानि शृङ्गाणि दारूणि सारदारूणि वेणुमूलानि वंशमूलानि च, त्सरवः खड्गमुष्टयः ।

क्षुरकल्पानाह — **परशुकुठारे**त्यादि । तत्र परशुः सर्वलोहमयश्चतुर्विंशत्यङ्गुलः, पट्टस उभयान्तत्रिशूलः, क्रकचः करपत्रं, काण्डच्छेदनः काण्डासिकः, शेषं प्रतीतम् ।

यन्त्रेत्यादि । पाषाणशब्दस्य यन्त्रादिषु प्रत्येकं संबन्धः, यन्त्रपाषाणो यन्त्रक्षेप्यपाषाणः, गोष्पणपाषाणो गोष्पणाख्ययष्टिविशेषक्षेप्यः पाषाणः, गावणेति भाषापाठः साधुतरः । मुष्टिपाषाणो मुष्टिक्षेप्यः पाषाणः, रोचनी दलनयन्त्रशिला, दृषद् महाशिला । चकारः समुच्चयार्थः । इत्येतानि आयुधानि ।

---

१. 'लंबक्रका' ख. पाठः

लोहजालजालिकापट्टकवचसूत्रकङ्कटशिंशुमारकखड्गिधेनुकहस्तिगोचर्मखुरशृङ्गसङ्घातं वर्माणि । शिरस्त्राणकण्ठत्राणकूर्पासकञ्चुकवारवाणपट्टनागोदरिकाः । पेटीचर्महस्तिकर्णतालमूलधमनिकाकवाटकिटिकाप्रतिहतवलाहकान्ताश्चावरणानि ।

हस्तिरथवाजिनां योग्याभाण्डमालङ्कारिकं सन्नाहकल्पनाश्चोपकरणानि । ऐन्द्रजालिकमौपनिषदिकं च कर्म ।

वर्माण्याह—**लोहजाले**त्यादि । लोहशब्दो जालादिषु चतुर्षु प्रत्येकं सम्बध्यते । लोहजालं सशिरस्त्राणा प्रावरणी, लोहजालिका मुण्डसन्नाहः, लोहपट्टो विबाहुसन्नाहः, लोहकवचं बाहुरहितं वक्षःपृष्ठमात्रावरणं, सूत्रकङ्कटः कार्पासादिसूत्रमयः सन्नाहः, शिंशुमारकादीनां पञ्चानां चर्मखुरशृङ्गसङ्घातश्च चतुराशिल्पिघटितानि त्वक्शफविषाणानि च, वर्माणि भवन्ति । तत्र शिंशुमारकः अम्बुकपिनामा जलचरः, खड्गी खड्गमृगः, धेनुको गोसदृशो गवय इति व्याख्येयं, सेरकपाठस्तु धेनुकस्थाने भाषाटीकायामुपलभ्यते । हस्ती गजः, गौर्वृषभः । **शिरस्त्राणे**त्यादि । शिरस्त्राणादयः सप्त च वर्माणि । तत्र शिरस्त्राणं शिरोमात्रावरणं, कण्ठत्राणं कण्ठमात्रावरणं, कूर्पासः अर्धबाहुकः, कञ्चुको जानुपर्यन्तः, वारवाणो गुल्फपर्यन्तः, पट्टो विबाहुरलोहमयः, नागोदरिका कराङ्गुलित्राणम् , इत्येतानि देहधार्याणि । करधार्याण्यावरणान्याह—**पेटी**त्यादि । पेट्यादयो नव । तत्र पेटी काष्ठवल्लीमयं खेटकं, चर्म चर्मफलकं, हस्तिकर्णः अवकुण्टनफलकं, तालमूलं काष्ठनिर्मितं खेटकं, धमनिका सूत्रमयी, कवाटं काष्ठमयफलकभेदः, किटिका चर्मवेणुविदलमयी, अप्रतिहतः हस्तवारकाख्यः, वलाहकान्तः अप्रतिहत एव पर्यन्तबद्धलोहपट्टः, चः समुच्चये ।

उपकरणान्याह—**हस्ती**त्यादि । हस्तिरथवाजिनां, योग्याभाण्डं शिक्षापरिकरभूतं कशाङ्कुशादिकम् , आलङ्कारिकम् अलङ्कारप्रयोजनकं पताकाक्षुरप्रमालादिकं, सन्नाहकल्पनाश्च वर्मतोमरशरीरावारकादयश्च, उपकरणानि । उपकरणान्तरमाह—**ऐन्द्रे**त्यादि । ऐन्द्रजालिकं कर्म अल्पसैन्यस्य बहुसैन्यत्वप्रदर्शनमनग्नावग्निप्रदर्शनमित्येवञ्जातीयं मायिकम् , औपनिषदिकं च औपनिषदकाधिकरणोक्तं विषधूमाम्बुदूषणप्रलम्भनादिप्रयोगतत्प्रतिक्रियालक्षणं, चकारादनुक्तमन्यच्च, कर्म, उपकरणपदानुवर्तनादुपकरणसंज्ञम् ।

कर्मान्तानां च,

इच्छामारम्भनिष्पत्तिं प्रयोगं व्याजमुद्दयम् ।
क्षयव्ययौ च जानीयात् कुप्यानामायुधेश्वरः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः,
आदित एकोनचत्वारिंशः ॥

कर्मान्तानां चेति वक्ष्यमाणश्लोकान्वयि । श्लोकमाह—**इच्छामि**ति। कुप्यानां कर्मान्तानां गतप्रकृताध्यायद्वयोक्तद्रव्यसम्बन्धिनां व्यापाराणां विषये, इच्छां राजरुचिम्, आरम्भनिष्पत्तिम् आरम्भसहितां निष्पत्तिं, राजेच्छानुसारेणोपक्रममर्थसिद्धिं चेत्यर्थः। प्रयोगम् उपयोगं, व्याजं दोषं, व्याजिमिति पाठे राजपण्यविक्रयेऽन्तरग्राह्यम्, उद्दयं लाभम्। उन्नयमिति भाषापाठश्च श्रेयान् । क्षयव्ययौ च क्षयं साधनच्छेदं व्ययं कर्मकरादिभक्तादिपरिव्ययं च, जानीयात् पर्यालोचयेत्, आयुधेश्वरः आयुधागाराध्यक्षः । इदं कुप्याध्यक्षस्याप्युपलक्षणम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टादशोऽध्यायः आयुधागाराध्यक्षः,
आदित एकोनचत्वारिंशः ॥

३७. प्रक. तुलामानपौतवम् ।

पौतवाध्यक्षः पौतवकर्मान्तान् कारयेत् ।

धान्यमाषा दश सुवर्णमाषकः । पञ्च वा गुञ्जाः । ते षोडश सुवर्णः कर्षो वा । चतुष्कर्षं पलम् ।

अष्टाशीतिर्गौरसर्षपा रूप्यमाषकः । ते षोडश धरणम् । शैम्ब्यानि वा विंशतिः ।

विंशतितण्डुलं वज्रधरणम् ।

अर्धमाषकः, माषकः, द्वौ, चत्वारः, अष्टौ माषकाः, सुवर्णो, द्वौ, चत्वारः, अष्टौ सुवर्णाः, दश, विंशतिः, त्रिंशत्, चत्वारिंशत्, शतमिति ।

तुलामानपौतवमिति सूत्रम् । तुलाया उन्मानसाधनस्य मानस्य प्रस्थकुडुबादेश्च पौतवम् पोतुर्मानभाण्डशोधकः तस्य कर्म अकृतकरणं कृतशोधनं चेहाभिधीयत इति सूत्रार्थः । तुलाप्रतिमानं 'पौतवाध्यक्षे वक्ष्याम' इत्युक्तं सुवर्णाध्यक्षे । तदेतत् कुप्याङ्गत्वात् कुप्यानन्तरमभिधीयत इति सङ्गतिः ।

पौतवेत्यादि । पौतवाध्यक्षः पौतवाधिकृतः, पौतवकर्मान्तान् तुलाकुडुवादिघटनकर्माणि, कारयेत् ।

अभ्यर्हितत्वात् प्रथमं सुवर्णस्य प्रतिमानमाह—**धान्येत्यादि** । धान्यमाषाः दश सुवर्णमाषकः धान्यमाषदशकप्रतिमानं सुवर्णं माषकसंज्ञम् । **पञ्च वा गुञ्जाः** गुञ्जापञ्चकं वा, माषक इत्यनुवर्तनान्माषकसंज्ञम् । **ते षोडश सुवर्णः कर्षो वा** माषषोडशकं सुवर्णसंज्ञं भवति कर्षसंज्ञं वा । **चतुष्कर्षं पलमिति** चत्वारः कर्षाः पलाख्याः ।

रूप्यस्य प्रतिमानमाह— **अष्टाशीतिरिति** । अष्टाशीतिः **गौरसर्षपाः रूप्यमाषकः** रूप्यस्यैको माषकः । ते रूप्यमाषकाः, षोडश, **धरणं** धरणाख्याः । **शैम्ब्यानि विंशतिर्वा** शिम्बिफलविंशतिर्वा धरणम् ।

वज्राख्यस्य रत्नस्य प्रतिमानमाह— **विंशतीत्यादि** । **विंशतितण्डुलं** मध्यमाखण्डव्रीहितण्डुलप्रमाणं, वज्रधरणं भवति ।

प्रतिमानसंख्या आह — **अर्धमाषक** इति । अर्धमाषकः, माषकः, **द्वौ माषकौ**, चत्वारः माषकाः, अष्टौ माषकाः । सुवर्णः, द्वौ **सुवर्णौ**, चत्वारः

तेन धरणानि व्याख्यातानि ।

प्रतिमानान्ययोमयानि मागधमेकलशैलमयानि, यानि वा नोदकप्रदेहाभ्यां वृद्धिं गच्छेयुरुष्णेन वा ह्रासम् ।

षडङ्गुलादूर्ध्वमष्टाङ्गुलोत्तराः दश तुलाः कारयेल्लोहपलादूर्ध्वमेकपलोत्तराः । यन्त्रमुभयतः शिक्यं वा ।

पञ्चत्रिंशत्पललोहां द्विसप्तत्यङ्गुलायामां समवृत्तां कारयेत् ।

सुवर्णाः, अष्टौ सुवर्णाः, दश विंशतिः त्रिंशत् चत्वारिंशत् शतम् इति चतुर्दश भवन्ति ।

सुवर्णोक्तं प्रतिमानविधिं रूप्येष्वतिदिशति — **तेने**ति । तेन सुवर्णप्रतिमानकथनेन, धरणानि व्याख्यातानि रूप्यधरणानामपि धरणं द्वे चत्वारि अष्टौ दश विंशतिः त्रिंशत् चत्वारिंशत् शतमित्येवं प्रतिमानसंख्या योज्या इत्यर्थः । एवं धरणग्रहणेन रूप्यमाषकाणामप्युपलक्षणाद् अर्धमाषको माषको द्वौ चत्वार इत्यादयः शतान्तसंख्यास्तत्राप्यूहनीयाः ।

कीदृशानि प्रतिमानानीत्यत्राह — **प्रतिमानानी**ति । प्रतिमानानि, अयोमयानि लोहमयानि, मागधमेकलशैलमयानि मगधदेशोत्पन्नशिलामयानि मेकलापरनामकाटवीराज्योद्भवशिलामयानि च भवन्ति । पक्षान्तरमाह — शङ्खशुक्तिप्रभृतीनि यानि, उदकप्रदेहाभ्यां जलार्द्रीकरणमललेपाभ्यां, वृद्धिम् आधिक्यम्, उष्णेन, ह्रासं वा न्यूनतां वा, न गच्छेयुः, तन्मयानि वा भवन्ति । तन्मयानीत्येतच्च यत्पदसामर्थ्यलभ्यम् ।

दशविधास्तुला आह — **षडङ्गुलादि**ति । षडङ्गुलात् षडङ्गुलायामात् प्रभृति, ऊर्ध्वम्, अष्टाङ्गुलोत्तराः अष्टाष्टाङ्गुलाधिकायामाः, दश तुलाः दशप्रकारास्तुलाः, कारयेत् । कियल्लोहपरिमाणाः, लोहपलादूर्ध्वमेकपलोत्तराः एकलोहपलात् प्रभृति एकैकलोहपलाधिकाः । तत्र प्रथमा षडङ्गुलायामा लोहपलप्रमाणा, द्वितीया चतुर्दशाङ्गुलायामा लोहपलद्वयप्रमाणा, तृतीया द्वाविंशत्यङ्गुलायामा त्रिपललोहा च भवतीत्यनेन क्रमेणाष्टसप्तत्यङ्गुला दशपललोहा च दशमी तुला भवति । यन्त्रमुभयतः तुलायन्त्रस्योभयोः पार्श्वयोः, शिक्यं कारयेत् मेयमानयोर्युगपद्धारणार्थम् । वाशब्दादेकतः शिक्यं वा, तयोः पर्यायधारणसम्भवात् । ता एताः सुवर्णरूप्यतुलाः ।

तदन्यतुलामाह — **पञ्चत्रिंशदि**त्यादि । पञ्चत्रिंशत्पललोहां पञ्चत्रिंशत्पलप्रमाणलोहनिर्मितां, द्विसप्तत्यङ्गुलायामां त्रिहस्तदीर्घां, समवृत्तां तदा-

तस्याः पञ्चपलिकं मण्डलं बद्ध्वा समकरणं कारयेत्। ततः कर्षोत्तरं पलं, पलोत्तरं दशपलं, द्वादश पञ्चदश विंशतिरिति पदानि कारयेत्। तत आ शताद् दशोत्तरं कारयेत्। अक्षेषु नद्ध्रीपिनद्धं कारयेत्।

द्विगुणलोहां तुलामतः षण्णवत्यङ्गुलायामां परिमाणीं कारयेत्। तस्याः शतपदादूर्ध्वं विंशतिः, पञ्चाशत्, शतमिति पदानि कारयेत्।

विंशतितौलिको भारः।

दशधरणिकं पलम्। तत्पलशतमायमानी।

पञ्चपलावरा व्यावहारिकी भाजन्यन्तःपुरभाजनी च।

त्यां वर्तुलतयान्विताथीं, कारयेत्। तस्याः, पञ्चपलिकं, मण्डलं चेलं, बद्ध्वा, समकरणम् अनुन्नतानवनतोभयान्तचिह्नं, कारयेत्। ततः समचिह्नात् परतः, कर्षोत्तरं पलं कर्षोऽर्धपलं पादोनपलं पलमिति, कारयेत्। ततः पलोत्तरं दशपलम् एकं पलं द्वे त्रीणि चत्वारि पञ्च षट् सप्ताष्ट नव दशेति, ततः द्वादश पञ्चदश विंशतिरिति षोडश पदानि रेखाः, कारयेत्। तत इति। ततः विंशतेरुपरि, आ शतात् शतमभिव्याप्य, दशोत्तरं दशदशाधिकं त्रिंशच्चत्वारिंशत् पञ्चाशदित्यादिकं, कारयेत्। अक्षेषु पञ्चमदशमपञ्चदशादिषु, नद्ध्रीपिनद्धं वरत्राबन्धं वरत्राकाररेखाबन्धं, कारयेद् विशेषार्थम्। स्वामिटीकादर्शे तु नान्दीपिनद्धं स्वस्तिकमिति दृश्यते।

परिमाणीसंज्ञां तुलामाह — **द्विगुणेत्यादि**। अतः समवृत्तायाः, द्विगुणलोहां सप्ततिपललोहां, षण्णवत्यङ्गुलायामां चतुर्हस्तदीर्घां, परिमाणीं, कारयेत्। तस्याः शतपदादूर्ध्वं समवृत्तादर्शितदिशा कर्षादिक्रमेण कृताच्छतपदात् परतः, विंशतिः, तदूर्ध्वं पञ्चाशत्, तदूर्ध्वं शतम्, अर्थाच्छतद्वयम् इति पदानि कारयेत्।

विंशतीत्यादि। विंशतितौलिकः तुला नाम पलशतं विंशतितुलाप्रमाणः, भारः तत्संज्ञः।

अथ पूर्वोक्तात् सुवर्णपलादाधिकं पलविशेषं सुवर्णरूप्यातिरिक्तद्रव्यपरिच्छेदोपयोगिनमाह — **दशधरणिकमिति**। दशधरणिकं पूर्वोक्तधरणदशकपरिमाणं, पलम्। तत्पलशतं तेषां दशधरणिकानां पलानां शतम्, आयमानी आय एव मीयते अनयेति व्युत्पत्तेरायमानीसंज्ञा तुला।

अन्यास्तिस्रस्तुला आह — **पञ्चपलावरेति**। सप्तपर्णवदिह वीप्सालोपौ। पञ्चभिः पञ्चाभिः पलैः अवरा पूर्वपूर्वापेक्षया यथोत्तरं न्यूना पञ्चपला-

तासामर्धधरणावरं पलम्। द्विपलावरमुत्तरलोहम्। षडङ्गुलावराश्चायामाः।

पूर्वयोः पञ्चपलिकः प्रयामो मांसलोहलवणमणिवर्जम्।

काष्ठतुला अष्टहस्ता पदवती प्रतिमानवती मयूरपदाधिष्ठाना।

काष्ठपञ्चविंशतिपलं तण्डुलप्रस्थसाधनम्। एष प्रदेशो बह्वल्पयोः।

वरा तुला, व्यावहारिकी तदाख्या क्रयविक्रयोपयोगिनी, भाजनी तदाख्या भृत्यदेयार्था, अन्तःपुरभाजनी तदाख्या देवीकुमारादिदेयार्था च भवति। तत्र प्रथमा आयमानीतः पञ्चपलन्यूना पञ्चनवतिपला, द्वितीया व्यावहारिकीतस्तावन्न्यूना नवतिपला, तृतीया भाजनीतस्तावन्न्यूना पञ्चाशीतिपलेति विवेकः।

व्यावहारिक्यादीनामपि पलादिमाने परस्परविशेषमाह — **तासामि**त्यादि। तासां व्यावहारिक्यादीनाम्, अर्धधरणावरम् अर्धेनार्धेन धरणेन पूर्वपूर्वापेक्षया न्यूनं, पलं भवति। तद्यथा — दशधरणिकादायमानीपलादर्धोनं सार्धनवधरणिकं पलं व्यावहारिक्याः, ततोऽर्धोनं नवधरणिकं भाजन्याः, ततोऽर्धोनं सार्धाष्टधरणिकमन्तःपुरभाजन्या इति। द्विपलावरं द्वाभ्यां द्वाभ्यां पलाभ्यां पूर्वपूर्वतो न्यूनम्, उत्तरलोहम् उत्तरासां लोहं भवति। षडङ्गुलावराश्च षट्षडङ्गुलन्यूनाश्च, आयामाः दैर्घ्याणि भवन्ति, अर्थादुत्तरासाम्। तद्यथा — पञ्चत्रिंशत्पललोहा द्विसप्तत्यङ्गुलायामा च यद्यायमानी, तदा त्रयस्त्रिंशत्पललोहा षट्षष्ट्यङ्गुलायामा च व्यावहारिकी भवति, एकत्रिंशत्पललोहा षष्ट्यङ्गुलायामा च भाजनी, एकोनत्रिंशत्पललोहा चतुष्पञ्चाशदङ्गुलायामा चान्तःपुरभाजनीति।

प्रयाममाह—**पूर्वयो**रिति। पूर्वयोः परिमाण्यायमान्योः, पञ्चपलिकः प्रयामः पलशते पञ्चपलमधिकदेयं भवति। मांसलोहलवणमणिवर्जं मांसलोहादीन् वर्जयित्वा, तेषां तु न प्रयामः।

काष्ठतुलामाह — **काष्ठे**त्यादि। काष्ठतुला सारदारुप्रकृतिस्तुला, अष्टहस्ता, पदवती एकद्वित्र्यादिपदरेखोपेता, प्रतिमानवती प्रमाणपाषाणयुक्ता, मयूरपदाधिष्ठाना मयूरपदौ तदाकारस्तम्भौ अधिष्ठानमाधारो यस्यास्तादृशी, मयूरपदाधिष्ठितेति पाठे मयूरपदाश्रितेत्यर्थः। कर्तव्या।

काष्ठपञ्चविंशतीत्यादि। काष्ठपञ्चविंशतिपलम् इन्धनपलपञ्चविंशतिः, तण्डुलप्रस्थसाधनं प्रस्थमिततण्डुलपाकनिष्पादकं भवति। **एष प्रदेशो बह्वल्पयो**रिति। प्रस्थाधिकतण्डुलस्य प्रस्थन्यूनतण्डुलस्य चायमेव पाकापेक्षितकाष्ठ-

इति तुलाप्रतिमानं व्याख्यातम् ।

अथ धान्यमाषद्विपलशतं द्रोणमायमानम् । सप्ताशीतिपलशतमर्धपलं च व्यावहारिकम् । पञ्चसप्ततिपलशतं भाजनीयम् । द्विषष्टिपलशतमर्धपलं चान्तःपुरभाजनीयम् ।

तेषामाढकप्रस्थकुडुबाश्चतुर्भागावराः ।

षोडशद्रोणा खारी, विंशतिद्रोणिकः कुम्भः, कुम्भैर्दशभिर्वहः ।

शुष्कसारदारुमयं समं चतुर्भागशिखं मानं कारयेत् । अन्तश्शिखं वा । रसस्य तु ।

मानव्यवस्थापनमार्गः । एतच्च कोष्ठागाराध्यक्षशेषम् असारस्याप्यमितो व्ययो न कर्तव्यः किमुत सारस्येति सामान्यज्ञापनद्वारेण प्राकरणिकेषु मानेष्ववधानोपदेशार्थं द्रष्टव्यम् ।

इति तुलेत्यादि । इति उक्तप्रकारेण, तुलाप्रतिमानं व्याख्यातं तुलाः षोडशविधाः प्रतिमानानि च चतुर्दशविधानि निरूपितानि ।

अथ द्रोणाढकादिनिरूपणमारभते — **अथेत्यादि** । धान्यमाषद्विपलशतं तुलाद्वयमितधान्यमाषपूरणीयम्, आयमानं नाम द्रोणम् । **सप्ताशीतिपलशतमर्धपलं चेति** । अर्थादायमानद्रोणादर्धत्रयोदशभिः पलैर्न्यूनं, व्यावहारिकं नाम द्रोणं भवति । **पञ्चसप्ततिपलशतमिति** । अर्थाद् व्यावहारिकद्रोणादर्धत्रयोदशपलैर्न्यूनं, भाजनीयं नाम द्रोणं भवति । **द्विषष्टिपलशतमर्धपलं चेति** । अर्थाद् भाजनीयद्रोणाद् अर्धत्रयोदशपलैर्न्यूनम्, अन्तःपुरभाजनीयं नाम द्रोणं भवति । इति चतुर्विधं द्रोणम् ।

तेषामिति । तेषां चतुर्णां द्रोणानाम्, आढकप्रस्थकुडुबाः, चतुर्भागावराः क्रमेण चतुर्भागाः अवराः स्वस्वपूर्वचतुर्भागात्मका अत एव स्वस्वपूर्वतो निकृष्टाश्चेत्यर्थः । एतदुक्तं भवति — द्रोणचतुर्भाग आढक आढकचतुर्भागः प्रस्थः प्रस्थचतुर्भागः कुडुब इति ।

द्रोणादुत्कृष्टान् मानविशेषानाह — **षोडशेत्यादि** । षोडशद्रोणमिता खारी, विंशतिद्रोणमितः कुम्भः, दशकुम्भमितो वहः ।

मानसाधनान्याह — **शुष्केत्यादि** । शुष्कसारदारुमयं, समं तुल्यमूलाग्रं चतुर्भागशिखं शिखा मुखोपरितनावकाशः आ मुखाद् भागत्रयवतः शिखायां मेयचतुर्भागो यथा तिष्ठेत् तथा कृतशिखं, मानं, कारयेत् । अन्त-

सुरायाः पुष्पफलयोः तुषाङ्गाराणां सुधायाश्च शिखामानं द्विगुणोत्तरा वृद्धिः ।

सपादपणो द्रोणमूल्यम् । आढकस्य पादोनः । षण्माषकाः प्रस्थस्य । माषकः कुडुबस्य ।

द्विगुणं रसादीनां मानमूल्यम् ।

विंशतिपणाः प्रतिमानस्य । तुलामूल्यं त्रिभागः ।

चतुर्मासिकं प्रातिवेधनिकं कारयेत् । अप्रतिविद्धस्यात्ययः सपादः सप्तविंशतिपणः । प्रातिवेधनिकं काकणिकमहरहः पौतवाध्यक्षाय दद्युः ।

शिखं वा अन्तर्गता आमूलमुखान्तावकाशान्तःप्रविष्टा शिखा पूर्वोक्तश्चतुर्भागावकाशो यस्य तत् तथाभूतं वा, मानं कारयेत् । धान्यादिमाने चायं विकल्पः। **रसस्य त्विति** । अन्तश्शिखमित्यनुवर्तते । तत्र तुशब्दोऽवधारणार्थः सम्बध्यते । तदयमर्थः—रसस्य घृततैलादेरन्तश्शिखमेव मानं भवतीति ।

सुराया इत्यादि । सुरादीनां षण्णां शिखामानम् अस्ति । किन्तु द्विगुणोत्तरा वृद्धिः द्विगुणाधिका तस्य वृद्धिः । धान्यादिषु शिखामानं यदुक्तं चतुर्भागात्मकं तदिह द्वैगुण्यं यातीत्यर्थः । अतश्च सुरादीनां प्रस्थः पञ्चभिरेव कुडुबैर्भवति, न तु धान्यानामिव चतुर्भिः । तत्रापि सुरायाः बहिश्शिखासम्भवाभावात् प्रस्थोऽन्तश्शिखोऽर्थादन्तःप्रविष्टपञ्चकुडुबः कार्यः ।

तुलामानभाण्डस्य मूल्यमाह — **सपादपण** इत्यादि । **माषकः कुडुबस्ये**त्येतदन्तमतिरोहितार्थम् ।

द्विगुणमिति । रसादीनां घृततैलादीनां, द्विगुणं सपादपणादिपूर्वोक्तद्विगुणमर्धतृतीयपणादिकं, द्रोणादिमूल्यं भवति । धान्यमानापेक्षया रसादिमानानामन्तश्शिखत्वेन रूपपृथुत्वात् श्लक्ष्णतरदारुघटितत्वाच्च मूल्यद्वैगुण्योपपत्तिः ।

विंशतीत्यादि । प्रतिमानस्य चतुर्दशविधप्रतिमानसमुदायस्य, विंशतिपणाः, मूल्यम् । **तुलामूल्यमि**त्यादि । तुलामूल्यम् अनन्तरोक्तस्य विंशतिपणात्मकस्य प्रतिमानमूल्यस्य त्रिभागः ।

चतुरित्यादि । चतुर्मासिकं चतुर्षु चतुर्षु मासेषु भवं, प्रतिवेधनमेव प्रातिवेधनिकं परिशोधनं, विनयादित्वाट्ठक् । कारयेत् । **अप्रतिविद्धस्ये**ति । अप्रतिविद्धस्य अपरिशोधितस्य तुलामानस्य, व्यवहारे, अत्ययो दण्डः,

द्वात्रिंशद्भागस्तप्तव्याजी सर्पिषश्चतुष्षष्टिभागस्तैलस्य । पञ्चाशद्भागो मानस्रावो द्रवाणाम् ।

कुडुबार्धचतुरष्टभागानि मानानि कारयेत् ।

कुडुबाश्चतुरशीतिर्वारकः सर्पिषो मतः ।
चतुष्षष्टिस्तु तैलस्य पादश्च घटिकानयोः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायः तुलामानपौतवम्,
आदितश्चत्वारिंशः ॥

सपादः सप्तविंशतिपणः । **प्रातिवेधनिकमिति** । प्रातिवेधनिकं परिशोधननिमित्तं, काकणिकम् , अहरहः प्रतिदिनं, पौतवाध्यक्षाय, दद्युः, दिवसस्यैका काकणीति क्रमेण मासचतुष्टयस्य सविंशति काकणीनां शतं शोधनकाले तुलामानव्यवहारिणोऽर्पयेयुरित्यर्थः ।

रसादिप्रसङ्गाद् घृतादिगतं किञ्चिदाह — **द्वात्रिंशदित्यादि** । सर्पिषः घृतस्य विलापितस्य क्रीयमाणस्य, द्वात्रिंशद्भागः अधिकतया ग्राह्य इति वाक्यशेषः । तप्तव्याजी स तप्तव्याजीसंज्ञः । तैलस्य, चतुःषष्टिभागः ग्राह्यः । **पञ्चाशद्भाग** इति । पञ्चाशद्भागो मानस्रावः तदाख्यो, द्रवाणां ग्राह्यः । द्रवसामान्यविषयोऽयं मानस्रावः सर्पिस्तैलयोर्यथोक्तव्याज्या सह समुच्चीयत इत्याहुः ।

कुडुबादीनामल्पपरिमाणानां मानसाधनान्याह — **कुडुबार्धेत्यादि** । प्रस्थचतुर्भागः कुडुब उक्तः । तस्य मानसाधनं कुडुबं कुडुबार्धं कुडुबचतुर्भागं कुडुबाष्टभागम् इत्येतानि मानानि, कारयेत् निर्मापयेत् ।

अध्यायान्ते श्लोकमाह — **कुडुबा इत्यादि** । सर्पिषः, चतुरशीतिः कुडुबाः यत्र मान्ति, स वारकस्तत्संज्ञः, मतः । तैलस्य तु, चतुःषष्टिः कुडुबाः यत्र मान्ति, स वारकः । अनयोः सर्पिर्वारकतैलवारकयोः, पादः चतुर्भागः, घटिका सर्पिर्घटिकाख्या तैलघटिकाख्या च, मता ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनविंशोऽध्यायस्तुलामानपौतवम् ,
आदितश्चत्वारिंशः ॥

३८. प्रक. देशकालमानम्।

मानाध्यक्षो देशकालमानं विद्यात्।

अष्टौ परमाणवो रथचक्रविप्रुद्। ता अष्टौ लिक्षा। ता अष्टौ यूकामध्यः। ते अष्टौ यवमध्यः। अष्टौ यवमध्याः अङ्गुलम्।

मध्यमस्य पुरुषस्य मध्यमाया अङ्गुल्या मध्यप्रकर्षो वाङ्गुलम्।

चतुरङ्गुलो धनुर्ग्रहः। अष्टाङ्गुला धनुर्मुष्टिः।

देशकालमानमिति सूत्रम्। देशो भूमिस्तद्विकारः प्राकारस्तम्भादिः कालस्त्रुटिलवादिः तयोर्मानमिति सूत्रार्थः। 'द्वादशहस्तादूर्ध्वमोजं युग्मं वा आ चतुर्विंशतिहस्ताद्' इति दुर्गविधाने, 'चतुर्दण्डान्तरा रथ्याः' 'पञ्चारत्नयो रथपथः' इति दुर्गनिवेशेऽन्यत्र च हस्तदण्डारत्न्यादीनां व्यवहारः कृतः। तेषां प्रमाणं तु नोक्तम्। तथा 'पूर्वे दिवसस्याष्टभागे रक्षाविधानमायव्ययौ च शृणुयाद्' इत्येवं राजप्रणिधौ कालविभाग उक्तः। तस्य मानं तु नोक्तम्। तदुभयमिह मानप्रसङ्गादुच्यत इति सङ्गतिः।

मानाध्यक्ष इति। मानाध्यक्षः पौतवाध्यक्षः, देशकालमानं, विद्यात् वक्ष्यमाणप्रकारेण जानीयात्।

अष्टाविति। अष्टौ, परमाणवः अतीन्द्रिया अणवः संहताः, रथचक्रविप्रुट् रथचक्रोत्थापितं चक्षुर्ग्राह्यमेकं रजो भवति। ता विप्रुषः, अष्टौ, लिक्षा। ता अष्टौ लिक्षाः, यूकामध्यः। ते यूकामध्याः, अष्टौ, यवमध्यः। अष्टौ यवमध्याः अङ्गुलमेकम्।

अङ्गुलस्य प्रकारान्तरमाह— **मध्यमस्येत्यादि**। अङ्गुलशतोत्सेधोऽर्धनवत्यङ्गुलपरिणाहो मध्यमः पुरुषः इति स्वामी। मध्यमस्य पुरुषस्य, मध्यमायाः अङ्गुल्याः हस्तमध्यमाङ्गुल्याः, मध्यप्रकर्षो मध्यप्रदेशपृथुत्वातिशयो वा, अङ्गुलम्।

चतुरङ्गुल इति। चत्वार्यङ्गुलानि, धनुर्ग्रहः धनुर्ग्रहसंज्ञानि। **अष्टाङ्गुलेति**। धनुर्ग्रहद्विगुणा धनुर्मुष्टिः।

द्वादशाङ्गुला वितस्तिः छायापौरुषं च। चतुर्दशाङ्गुलं शमः शलः परिरयः पदं च। द्विवितस्तिररत्निः प्राजापत्यो हस्तः।

सधनुर्ग्रहः पौतवविवीतमानम्। सधनुर्मुष्टिः किष्कुः कंसो वा।

द्विचत्वारिंशदङ्गुलस्तक्षणः क्राकचिककिष्कुः स्कन्धावारदुर्गराजपरिग्रहमानम्। चतुष्पञ्चाशदङ्गुलः कुप्यवनहस्तः।

चतुरशीत्यङ्गुलो व्यामो रज्जुमानं खातपौरुषं च।

चतुररत्निर्दण्डो धनुर्नाळिका पौरुषं च।

गार्हपत्यमष्टशताङ्गुलं धनुः पथिप्राकारमानम्। पौरुषं च अग्निचित्यानाम्।

द्वादशेत्यादि। द्वादशाङ्गुला वितस्तिः तदाख्या। छायापौरुषं चेति छायापौरुषं शङ्कुप्रमाणं, तदपि द्वादशाङ्गुलमित्यर्थः। चतुर्दशेत्यादि। चतुर्दशाङ्गुलं शमसंज्ञं शलसंज्ञं परिरयसंज्ञं पदसंज्ञं च। द्विवितस्तिरिति। चतुर्विंशत्यङ्गुलोऽरत्निः। स प्राजापत्यो विश्वकर्मसम्मतो हस्तः।

सधनुर्ग्रह इति। धनुर्ग्रहयुक्तः चतुरङ्गुलाधिकः प्राजापत्यः अर्थादष्टाविंशत्यङ्गुलमानं पौतवविवीतमानं काष्ठतुलादेः पथ्यर्थक्षेत्रादेश्च हस्तमानं भवति। सधनुर्मुष्टिरिति। अष्टाङ्गुलाधिकः प्राजापत्यः किष्कुसंज्ञः कंससंज्ञो वा।

द्विचत्वारिंशदित्यादि। द्विचत्वारिंशदङ्गुलः हस्तः, तक्षणः वर्धकेः कर्मणि, क्राकचिककिष्कुः करपत्रकर्ममानोपयोगी किष्कुः, स्कन्धावारदुर्गराजपरिग्रहमानं स्कन्धावारादीनां च मानं, भवति। चतुष्पञ्चाशदित्यादि। चतुष्पञ्चाशदङ्गुलः, कुप्यवनहस्तः द्रव्यवनकर्ममानहस्तः।

चतुरशीतीत्यादि। चतुरशीत्यङ्गुलः हस्तः, व्यामः, स च रज्जुमानं, खातपौरुषं च कूपादेः पुरुषमानं च भवति।

चतुररत्निरिति। चः संज्ञासमुच्चये। चतुररत्निप्रमाणस्य दण्डः धनुः नाळिका पौरुषम् इति चतस्रः संज्ञाः।

गार्हपत्यमिति। गृहपतिर्विश्वकर्मा तदृष्टं गार्हपत्यम्, अष्टशताङ्गुलं, धनुः तदाख्यम्। तच्च पथिप्राकारमानम् अध्वमानं प्राकारमानं च भवति। पौरुषं चेति। पुरुषमानम्, अग्निचित्यानाम् अग्निचयनविशेषाणाम्।

षट्कंसो दण्डो ब्रह्मदेयातिथ्यमानम् । दशदण्डा रज्जुः । द्विरज्जुकः परिदेशः । त्रिरज्जुकं निवर्तनम् ।

एकतो द्विदण्डाधिको बाहुः । द्विधनुस्सहस्रं गोरुतम् । चतुर्गोरुतं योजनम् । इति देशमानम् ।

कालमानमत ऊर्ध्वम् । तुटो लवो निमेषः काष्ठा कला नालिका मुहूर्तः पूर्वापरभागौ दिवसो रात्रिः पक्षो मास ऋतुरयनं संवत्सरो युगमिति कालाः ।

निमेषचतुर्भागस्तुटः ।
द्वौ तुटौ लवः ।
द्वौ लवौ निमेषः ।
पञ्च निमेषाः काष्ठा ।
त्रिंशत् काष्ठाः कला ।
चत्वारिंशत् कला नाडिका ।

षट्कंस इत्यादि । कंसषट्कप्रमाणः अर्थात् प्राजापत्यहस्ताष्टकप्रमाणः, दण्डः । सः ब्रह्मदेयातिथ्यमानं ब्रह्मदेयानाम् आतिथ्यानां च मानं भवति । ब्रह्मदेयानि ऋत्विगादिब्राह्मणदेयानि, आतिथ्यानि अतिथिभोजनार्थविसृष्टक्षेत्राणि । दशदण्डेति । अर्थाच्चत्वारिंशद्धस्तप्रमाणा, रज्जुः । द्विरज्जुक इति । विंशतिदण्डप्रमाणः, परिदेशः । त्रिरज्जुकमिति । त्रिंशद्दण्डप्रमाणं, निवर्तनं चतुरश्रनिवर्तनम् ।

एकतो द्विदण्डाधिक इति । निवर्तनस्यैवैकपार्श्वे दण्डद्वयाधिकप्रमाणः पार्श्वान्तरेष्वनधिकप्रमाणः अर्थाद् द्वात्रिंशद्दण्डदीर्घस्त्रिंशद्दण्डविस्तारश्च मानविशेषः, बाहुस्तत्संज्ञः । द्विधनुस्सहस्रमिति । धनुस्सहस्रद्वयप्रमाणं, गोरुतम् । स क्रोश इति व्यवह्रियते । चतुर्गोरुतमिति । अर्थात् क्रोशचतुष्टयं योजनसंज्ञम् । इति देशमानमिति । व्याख्यातमिति शेषः ।

कालमानमित्यादि । व्याख्यास्यत इति शेषः । कालं सप्तदशधा विभजते — तुट इत्यादि ।

तुटादीनि व्याचष्टे — निमेषेत्यादि । निमेषचतुर्भागः कालपरमाणुरिति स्वामी । परमाणुद्वयमिति भाषा । स तुटः तुटसंज्ञः । अयं त्रुटिस्त्रुटिरिति चोच्यते ।

द्वौ तुटावित्यादि चत्वारिंशत्कला नाडिकेत्यन्तमतिरोहितम् ।

सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामाः कुम्भच्छिद्रमाढकमम्भसो वा नालिका ।

द्विनालिको मुहूर्तः । पञ्चदशमुहूर्तो दिवसो रात्रिश्च चैत्रे मास्याश्वयुजे च मासि भवतः । ततः परं त्रिभिर्मुहूर्तैरन्यतरः षण्मासं वर्धते ह्रसते चेति ।

छायायामष्टपौरुष्यामष्टादशभागश्छेदः, षट्पौरुष्यां चतुर्दशभागः, चतुष्पौरुष्यामष्टभागः, द्विपौरुष्यां षड्भागः, पौरुष्यां चतुर्भागः,

---

नालिकायाः प्रकारान्तरमाह — **सुवर्णेत्यादि** । सुवर्णमाषकाश्चत्वारश्चतुरङ्गुलायामा इति मेयमानयोरभेदोपचारात् सुवर्णमाषकचतुष्टयप्रमाणा चतुरङ्गुलदीर्घा जलनिर्गमनालशलाकोच्यते, कुम्भच्छिद्रं तत्समानं जलधारकघटच्छिद्रम्, आढकमम्भसः तत्कुम्भगतमाढकमितं जलम्, इतिशब्द इहाध्याहार्यः, इति वा नालिका इत्येतत्त्रितययोगेन वा नालिका परिच्छिद्यते । यथोक्तमानशलाकायुक्तच्छिद्रात् कुम्भादाढकपरिमितं जलं छिद्रतो यावता कालेन गलति सा वा नालिकेत्यर्थः ।

द्विनालिक इति । नालिकाद्वयं मुहूर्तः । एतदुत्तरं पूर्वापरभागयोर्व्याख्यानं क्रमप्राप्तम् । तत्तु न कृतं सुबोधत्वात् । तौ हि मुहूर्तान्तानामुक्तानां वक्ष्यमाणानां च दिवसादीनां यथासम्भवं पूर्वभागोत्तरभागौ भवतः । तत्र पूर्वाह्णो दिवसपूर्वभागोऽपराह्णो दिवसोत्तरभागः । तथा पूर्वरात्रो रात्रिपूर्वभागोऽपररात्रो रात्र्युत्तरभाग इत्यादि यथाव्यवहारमूह्यम् । **पञ्चदशेत्यादि** । पञ्चदशमुहूर्तो दिवसो रात्रिश्च भवतः, किं सर्वेषु मासेषु, नेत्याह — **चैत्रे** मासि आश्वयुजे मासि च अर्थाद् विषुवयोर्द्वयोः । **ततः परमिति** । विषुवद्द्वयादुपरि, अन्यतरो दिवसो रात्रिश्च, त्रिभिर्मुहूर्तैः षण्मासं वर्धते ह्रसते च एकशश्चतुर्लवोपचयापचयक्रमेण मुहूर्तत्रयं यावत् षण्मासान् उपचीयते क्षीयते च । तत्र दिवसस्य चैत्रविषुवादुपरि वृद्धिः आश्वयुजविषुवादुपरि ह्रासः, रात्रेराश्वयुजविषुवादुपरि वृद्धिश्चैत्रविषुवादुपरि ह्रासः ।

छायया कालमानमाह—**छायायामित्यादि** । छायायाम्, अष्टपौरुष्यां षण्णवत्यङ्गुलायां, दिवसस्य, अष्टादशभागः छेदः अष्टादशो भागः गतांशः त्रिंशन्नाडिकासु पादोनं नाडिकाद्वयमतीतं ज्ञेयं सपादाष्टाविंशतिनाडिकास्तु शेषाः । षट्पौरुष्यां द्विसप्तत्यङ्गुलायां छायायां, चतुर्दशभागः छेदः त्रयोदश

अष्टाङ्गुलायां त्रयो दशभागाः, चतुरङ्गुलायाम् अष्टभागाः, अच्छायो मध्याह्न इति।

परावृत्ते दिवसे शेषमेवं विद्यात्।

आषाढे मासि नष्टच्छायो मध्याह्नो भवति। अतः परं श्रावणादीनां षण्मासानां द्व्यङ्गुलोत्तरा माघादीनां द्व्यङ्गुलावरा छाया इति।

पञ्चदशाहोरात्राः पक्षः। सोमाप्यायनः शुक्लः। सोमावच्छेदनो बहुलः।

तु शेषाः। चतुष्पौरुष्याम् अष्टाचत्वारिंशदङ्गुलायाम्, अष्टभागः छेदः अर्धयामो गतः सप्त शेषाः। द्विपौरुष्यां चतुर्विंशत्यङ्गुलायां, षड्भागश्छेदः पञ्च नालिका गताः पञ्चविंशतिस्तु शेषाः। पौरुष्यां द्वादशाङ्गुलायां, चतुर्भागश्छेदः यामो गतः यामत्रयमवशिष्टम्। अष्टाङ्गुलायां छायायां, त्रयो दशभागाः दशधा विभक्तस्य दिवसस्य त्रयो दशमांशाः अर्थान्नवनालिकाः, छेदः, एकविंशतिस्तु नालिकाः शिष्टाः। चतुरङ्गुलायाम्, अष्टभागाः अष्टधा विभक्तस्य दिवसस्य त्रयोऽष्टमांशाः गता विज्ञेयाः, पञ्च तु शिष्टाः। अच्छायः शङ्कुप्रविष्टच्छायो, मध्याह्नो भवति।

मध्याह्नात् परतोऽप्येवमेवच्छायामानं, किन्तु छेदस्थाने शेषकल्पनया विज्ञेयमित्याह—**परावृत्त** इति। परावृत्ते दिवसे मध्याह्नात् परतः, शेषं गतावशिष्टं दिवसभागम्, एवं विद्यात् चतुरङ्गुलायां त्रयोऽष्टभागा इत्यादिना छायायामष्टपौरुष्यामष्टादशभाग इत्यन्तेन प्रकारेणाष्टभागत्रयप्रभृतिमष्टादशभागान्तं जानीयात्।

आषाढ इति। आषाढे मासि आषाढमासान्ते, नष्टच्छायोऽच्छायः, मध्याह्नः भवति। अतः परं, श्रावणादीनां षण्मासानां पौषान्तानां, द्व्यङ्गुलोत्तरा द्विद्व्यङ्गुलक्रमवृद्धा छाया भवति। तद्यथा—श्रावणस्यान्ते द्व्यङ्गुला भाद्रपदस्य चतुरङ्गुला आश्वयुजस्य षडङ्गुला कार्त्तिकस्याष्टाङ्गुला मार्गशीर्षस्य दशाङ्गुला पौषस्य द्वादशाङ्गुलेति। अतः परं,माघादीनां षण्मासानामाषाढान्तानां, द्व्यङ्गुलावरा द्विद्व्यङ्गुलक्रमक्षीणा, छाया, भवति। यथा—माघस्यान्ते दशाङ्गुला छाया फाल्गुनस्याष्टाङ्गुला चैत्रस्य षडङ्गुला वैशाखस्य चतुरङ्गुला ज्येष्ठस्य द्व्यङ्गुला आषाढस्य तु शङ्कुप्रविष्टेति।

पञ्चदशेत्यादि। पञ्चदशाहोरात्रसमुदायः पक्षसंज्ञः। तत्र सोमाप्यायनः

द्विपक्षो मासः ।

त्रिंशदहोरात्रः प्रकर्ममासः ।

सार्धः सौरः ।

अर्धन्यूनश्चान्द्रमासः ।

सप्तविंशतिर्नाक्षत्रमासः ।

द्वात्रिंशद् मलमासः ।

पञ्चत्रिंशदश्ववाहायाः ।

चत्वारिंशद्धस्तिवाहायाः ।

द्वौ मासावृतुः ।

श्रावणः प्रोष्ठपदश्च वर्षाः ।

आश्वयुजः कार्त्तिकश्च शरत् ।

मार्गशीर्षः पौषश्च हेमन्तः ।

माघः फाल्गुनश्च शिशिरः ।

चन्द्रवृद्धिकरः पक्षः, शुक्लः तत्संज्ञः । सोमावच्छेदनः चन्द्रक्षयकरः, बहुलः तदाख्यः ।

द्विपक्ष इति । उक्तौ शुक्लबहुलपक्षौ समुदितौ, मासः, स एव सावनः ।

त्रिंशदहोरात्र इति । त्रिंशदहोरात्रसमुदायः, प्रकर्ममासः कर्मकरभृति-गणनीयो मासः ।

सार्ध इति । अर्धाहोरात्रसहितत्रिंशदहोरात्रः, सौरः सौरमासः ।

अर्धन्यून इति । अर्धाहोरात्रन्यूनत्रिंशदहोरात्रः, चान्द्रमासः ।

सप्तविंशतिरिति । सप्तविंशत्यहोरात्रो नाक्षत्रमासः ।

द्वात्रिंशदिति । द्वात्रिंशदहोरात्रो मलमासः ।

पञ्चत्रिंशदिति । पञ्चत्रिंशदहोरात्रः तावन्मानो मासः, अश्ववाहायाः अश्वप्रवाहणस्य, अर्थादश्वकर्मभृत्यानाम् । 'अथ प्रवाहणे । वाहा नृणां स्त्रियां वाही' इति केशवस्वामी ।

चत्वारिंशदित्यादि । चत्वारिंशदहोरात्रो गजशुश्रूषाकर्मकरवेतनमासः ।

द्वाविति । उभौ द्विपक्षलक्षणौ मासौ मिलितौ ऋतुसंज्ञौ ।

ऋतुं विभज्य व्याचष्टे—श्रावण इत्यादिना ग्रीष्मपर्यन्तेन । वर्षाः वर्षासंज्ञः । ज्येष्ठामूलीयः ज्येष्ठः । शेषं सुगमम् ।

चैत्रो वैशाखश्च वसन्तः ।
ज्येष्ठामूलीय आषाढश्च ग्रीष्मः ।
शिशिराद्युत्तरायणम् । वर्षादि दक्षिणायनम् ।
द्व्ययनः संवत्सरः ।
पञ्चसंवत्सरो युगमिति ।

दिवसस्य हरत्यर्कः षष्टिभागमृतौ ततः ।
करोत्येकमहश्छेदं तथैवैकं च चन्द्रमाः ॥
एवमर्धतृतीयानामब्दानामधिमासकम् ।
ग्रीष्मे जनयतः पूर्वं पञ्चाब्दान्ते च पश्चिमम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम् ,
आदित एकचत्वारिंशः ॥

शिशिरादीत्यादि । शिशिरप्रभृति ग्रीष्मान्तमृतुत्रयम्, उत्तरायणसंज्ञम् । वर्षादि हेमन्तान्तमृतुत्रयं, दक्षिणायनम् ।

द्व्ययन इति । अयनद्वयात्मा संवत्सरो भवति ।

पञ्चसंवत्सर इति । संवत्सरपञ्चकात्मकः कालो, युगं युगसंज्ञया व्यवह्रियते । इतिशब्दो व्यावहारिककालमानसमाप्तौ ।

अधिमासं श्लोकद्वयेनाह — दिवसस्येति । अर्कः सूर्यः, दिवसस्य अहोरात्रस्य, षष्टिभागम् एकघटिकात्मकं, हरति प्रतिदिवसं छिनत्ति । ततः प्रतिदिवसमेकघटिकाहरणात्, ऋतौ षष्टिदिवसात्मकमासद्वयावसाने, एकमहश्छेदम् एकमधिकमहोरात्रं, करोति उत्पादयति । तथैव अर्कवदेव, चन्द्रमाश्च, एकम् अहश्छेदं करोति । एवम् अनेन प्रकारेण, अर्धतृतीयानामब्दानाम् अर्धोनतृतीयानां वर्षाणाम् अर्थान्माघप्रभृतीनां त्रिंशतो मासानां, ग्रीष्मे पूर्वम्, अधिमासकम् अधिकमासं त्रिंशत्समं द्वितीयम् आषाढं, पञ्चाब्दान्ते अर्थात् पुनरर्धतृतीयवर्षाणामन्ते श्रावणप्रभृतीनां त्रिंशतो मासानामन्ते, पश्चिममधिमासकं च उत्तरमधिकमासं च अर्थात् त्रिंशत्समं द्वितीयं पौषं च, जनयतः, अर्कचन्द्रमसौ ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
विंशोऽध्यायः देशकालमानम् ,
आदित एकचत्वारिंशः ॥

३९. प्रक. शुल्काध्यक्षः।

शुल्काध्यक्षः शुल्कशालां ध्वजं च प्राङ्मुखम् उदङ्मुखं वा महाद्वाराभ्याशे निवेशयेत् ।

शुल्कादायिनश्चत्वारः पञ्च वा सार्थोपयातान् वणिजो लिखेयुः—के कुतस्त्याः कियत्पण्याः क चाभिज्ञानमुद्रा वा कृतेति ।

अमुद्राणामत्ययो देयद्विगुणः ।

कूटमुद्राणां शुल्काष्टगुणो दण्डः ।

भिन्नमुद्राणामत्ययो घटिकाः स्थाने स्थानम् ।

शुल्काध्यक्ष इति सूत्रम् । शुल्कः राज्ञे देयं पञ्चदशभागादि तस्य अध्यक्षः शुल्काध्यक्षः । तद्व्यापारोऽभिधीयते इति सूत्रार्थः । देशविशेषभूतदुर्गसम्बन्धित्वाद् मानपरिच्छेद्यनानाभाण्डविषयत्वाच्च शुल्कस्य देशमानानन्तरमभिधानसङ्गतिः ।

शुल्काध्यक्ष इति । शुल्कशालाध्यक्षः, शुल्कशालां शुल्कग्रहणावस्थानं, ध्वजं च तच्चिह्नं च, प्राङ्मुखमुदङ्मुखं वा, महाद्वाराभ्याशे प्रधानद्वारसमीपे, निवेशयेत् कारयेत् ।

शुल्कादायिन इति । शुल्कग्राहिणः, चत्वारः पञ्च वा पुरुषाः शुल्काध्यक्षनियुक्ताः, सार्थोपयातान् सभाण्डोपगतान्, वणिजो नैगमान्, लिखेयुः । किं कृत्वा, के कुतस्त्या इत्यादि पृष्ट्वेति शेषः । तत्र क इति नामजातिविषयः प्रश्नः, कुतस्त्या इति निवासविषयः, कियत्पण्या इति विक्रेयवस्तुपरिमाणविषयः, क चाभिज्ञानमुद्रेति अन्तपालकृतपण्यविशेषज्ञप्तिमुद्राविषयः । शुल्कादायिनां बहुत्वं विसंवादपरिहारार्थम् ।

अमुद्राणामिति । मुद्रारहितानां वणिजाम्, अत्ययः दण्डः, देयद्विगुणः अन्तपालदेयवर्तनीद्विगुणः । वर्तनी त्वनुपदं वक्ष्यते ।

कूटेत्यादि । कूटमुद्राणां कपटकृतमुद्राणां, शुल्काष्टगुणो दण्डः ।

भिन्नेत्यादि । भिन्नमुद्राणामत्ययः गृहीतनष्टमुद्राणां दण्डः, घटिकाः स्थाने स्थानं वणिगन्तरदृश्ये कापि शुल्कशालैकदेशे घटिकात्रयकालावस्थानं भवति । घटिका इति स्थानक्रियात्यन्तसंयोगे द्वितीया, कपिञ्जलाधिकरणन्यायेन च तासां त्रित्वम् ।

राजमुद्रापरिवर्तने नामकृते वा सपादपणिकं वहनं दापयेत् ।

ध्वजमूलोपस्थितस्य प्रमाणमर्घं च वैदेहकाः पण्यस्य ब्रूयुः— एतत्प्रमाणेनार्घेण पण्यमिदं कः क्रेतेति। त्रिरुद्घोषितमर्थिभ्यो दद्यात्। क्रेतृसङ्घर्षे मूल्यवृद्धिः । सशुल्का कोशं गच्छेत् ।

शुल्कभयात् पण्यप्रमाणं मूल्यं वा हीनं ब्रुवतस्तदतिरिक्तं राजा हरेत् । शुल्कमष्टगुणं वा दद्यात् ।

तदेव निविष्टपण्यस्य भाण्डस्य हीनप्रतिवर्णकेनार्घापकर्षणे सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च कुर्यात् ।

प्रतिक्रेतृभयाद् वा पण्यमूल्यादुपरि मूल्यं वर्धयतो मूल्यवृद्धिं राजा हरेद्, द्विगुणं वा शुल्कं कुर्यात् ।

राजेत्यादि । राजमुद्रापरिवर्तने, नामकृते वा परिवर्तन इत्यनुषङ्गात् कार्पासादिद्रव्याणां तूलादिनामनिवेशेन नामव्यत्ययकरणे वा, सपादपणिकं पादाधिकपणदण्डं, वहनं पण्यहारकं, दापयेत् ।

ध्वजेत्यादि । ध्वजमूलोपस्थितस्य शुल्कशालाङ्गणगतस्य पण्यस्य, प्रमाणम् इयत्ताम्, अर्घं च, वैदेहकाः वणिजः, ब्रूयुः, एतत्प्रमाणेनेत्यादिविधया । त्रिरुद्घोषितं यथोक्तप्रकारेण वारत्रयघोषणया श्रावितं, पण्यम्, अर्थिभ्यः क्रेतृभ्यः, दद्यात्, तेनैव वैदेहकनिर्दिष्टेनार्घेण । क्रेतृसंघर्षे क्रेतृणाम् अर्घवर्धनहेतुभूतपरस्परस्पर्धासम्भवे, मूल्यवृद्धिः वणिङ्निर्दिष्टप्रमाणादधिकं मूल्यस्य प्रमाणम्, इष्यत इति शेषः । किन्तु सशुल्का शुल्कसहिता सा मूल्यवृद्धिः, कोशं गच्छेत् राजभाण्डागारं प्राप्नुयाद् निर्दिष्टमूल्यमात्रमेव तु वैदेहकानित्यर्थः । सशुल्कमित्यपि पाठः ।

शुल्केत्यादि । शुल्कभयात्, पण्यप्रमाणं भाण्डेयत्तां, मूल्यं वा पण्यार्घं वा, हीनम् अवरं, ब्रुवतः, तदतिरिक्तं तदुक्तातिरिक्तं प्रमाणं मूल्यं चोपलभ्यमानं, राजा हरेत् । इति तद्दण्डविधिः । तद्विकल्पमाह — शुल्कमष्टगुणं वा दद्याद्, वणिक् ।

तदेवेति । तदेव तदुक्तातिरिक्तं शुल्काष्टगुणं वा, निविष्टपण्यस्य पण्यपूरितस्य, भाण्डस्य, हीनप्रतिवर्णकेन निकृष्टप्रतिवर्णकप्रदर्शनेन, अर्घापकर्षणे मूल्यपातने, सारभाण्डस्य फल्गुभाण्डेन प्रतिच्छादने च महार्घस्य पण्यस्य मणिमुक्तादेरल्पार्घकार्पासतूलादिनावच्छादने च, कुर्यात् ।

प्रतिक्रेतृभयादिति । प्रतिक्रेतृपुरुषविशेषक्रयणशङ्कया, पण्यमूल्या-

तदेवाष्टगुणमध्यक्षस्यच्छादयतः ।

तस्माद् विक्रयः पण्यानां धृतो मितो गणितो वा कार्यः, तर्कः फल्गुभाण्डानामानुग्राहिकाणां च ।

ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्डः। पथिकोत्पथिकास्तद् विद्युः ।

वैवाहिकमन्वायनमौपायनिकं यज्ञकृत्यप्रसवनैमित्तिकं देवेज्याचौलोपनयनगोदानव्रतदीक्षणादिषु क्रियाविशेषेषु भाण्डमुच्छुल्कं गच्छेत् ।

न्याय्याद् , उपरि, मूल्यं वर्धयतः क्रेतुः, तन्मूल्यवृद्धिं राजा हरेत् । द्विगुणं वा शुल्कं कुर्यादिति दण्डविकल्पः ।

तदिति । तदेव वैदेहकानां तत्तदपराधे यद् देयं विहितं तदेव, अष्टगुणम् , अध्यक्षस्य, छादयतः वैदेहकापराधं मैत्रीलञ्चग्रहणादिना गोपयतः, कुर्याद् राजा ।

तस्मादिति । यथोक्तानृतव्यवहारसम्भवात् , विक्रयः, पण्यानां तोलनीयपरिमेयगणनीयानां, धृतः तुलातोलितः, मितः प्रस्थादिपरिमितः, गणितो वा, कार्यः । तर्कः इदमियत् स्यादिति मानार्घसम्भावनात्मा, कार्यः, फल्गुभाण्डानाम् अङ्गाराद्यल्पपण्यानाम् , आनुग्रहिकाणां लवणादीनां च ।

ध्वजमूलमतिक्रान्तानामित्यादि । अकृत एव शुल्के शुल्कशालामतिक्रम्य गतानां विषये, शुल्कादष्टगुणो दण्डः । पथिकेत्यादि । पथिकोत्पथिकाः पथिकाः पथि वाणिज्यच्छलचारिणः उत्पथिकाः अनुज्ञातोत्पथगतागतास्तृणेन्धनहारकाः पशुपालकाश्च प्रणिहिताः, तद् अकृतशुल्कवणिगतिक्रमणं, विद्युः, अत एव साक्षिणश्च स्युर्विवादे ।

अशुल्कनेयं भाण्डमाह — वैवाहिकमिति । वैवाहिकं विवाहप्रयोजनकम् , अन्वायनं परिणीतायाः पतिगृहं गच्छन्त्याः पितृगृहान्नीयमानम्, औपायनिकम् उपायनमन्नसत्राद्यर्थं उपहारः तत्प्रयोजनकं, यज्ञकृत्यप्रसवनैमित्तिकं यज्ञकृत्यनैमित्तिकं पयोदधिघृतादिकं प्रसवनैमित्तिकं जातकर्मसूतिकाभैषजाद्यर्थं च, देवेज्यादिषु क्रियाविशेषेषु देवेज्या देवानां देवालयगतानाम् इज्या नित्यनैमित्तिकपूजोत्सवादिः चौलोपनयनगोदानानि संस्कारविशेषाः प्रसिद्धाः व्रतदीक्षणं दानविशेषादिलक्षणव्रतपरिग्रहः एवम्प्रकारेषु धर्म्यकार्येषु, भाण्डम् , उच्छुल्कम् अशुल्कं , गच्छेत् ।

अन्यथावादिनः स्तेयदण्डः ।

कृतशुल्केनाकृतशुल्कं निर्वाहयतो द्वितीयमेकमुद्रया भित्त्वा पुटमपहरतो वैदेहकस्य तच्च तावच्च दण्डः ।

शुल्कस्थानाद् गोमयपलालं प्रमाणं कृत्वापहरत उत्तमः साहसदण्डः ।

शस्त्रवर्मकवचलोहरथरत्नधान्यपशूनामन्यतमानिर्वाह्यं निर्वाहयतो यथावघुषितो दण्डः पण्यनाशश्च ।

तेषामन्यतमस्यानयने बहिरेवोच्छुल्को विक्रयः ।

अन्यथावादिन इति । अवैवाहिकादिकमेव भाण्डं वैवाहिकादिकमिति मिथ्या ब्रुवतो वणिजः, स्तेयदण्डः चौर्यस्य यो दण्डो धर्मस्थीयविहितः स कार्यः ।

कृतेत्यादि । कृतशुल्केन दत्तशुल्केन पण्यवासनेन सह, अकृतशुल्कम् अदत्तशुल्कं, निर्वाहयतः संकुले निष्क्रामयतः, इत्येकोऽपराधः, **द्वितीयमेकमुद्रये**ति एकस्य पण्यवासनस्य मुद्राप्रदर्शनेन तत्तुल्यरूपमपरं पण्यवासनं निर्वाहयत इत्यपरः, **भित्त्वा पुटमपहरत** इति पुटं पण्यवासनं कृतशुल्कं भित्त्वा तस्मिन् पण्यमकृतशुल्कं निवेश्य नयत इति तृतीयः। एवमेवमपराधिनो वैदेहकस्य, तच्च तावच्च यदेव पण्यं यत्परिमाणमपहृतं तदेव तत्परिमाणमेव, दण्डः ।

शुल्कस्थानादिति । ध्वजमूलात्, गोमयपलालं प्रमाणं कृत्वापहरतः गोपुरीषं धान्यस्तम्बं चात्यन्तानिस्सारद्रव्यं विश्वासपदमपदिश्य तन्निगूहितं सारद्रव्यं नयतः, उत्तमः साहसदण्डः पणसाहस्ररूपो दण्डः ।

शस्त्रेत्यादि । शस्त्रादीनामष्टानाम्, अन्यतमानिर्वाह्यम् अन्यतमम् अनिर्वाह्यत्वेन कस्मिंश्चिन्निमित्ते राज्ञा प्रख्यापितं, निर्वाहयतः, यथावघुषितः प्रख्यापितप्रकारो, दण्डः, पण्यनाशश्च निर्वाह्यमानशस्त्रादिपण्यहानिश्च । तत्र वर्म आवरणसामान्यं, कवचं बाहुकादियुक्तस्तद्विशेषः । शेषं प्रतीतम् ।

तेषामिति । अनिर्वाह्यानाम् अन्यतमस्यानयने, बहिरेव दुर्गबाह्यदेश एव, उच्छुल्को विक्रयः अशुल्कस्तस्य विक्रयः ।

अन्तपालः सपादपणिकां वर्तनीं गृह्णीयात् पण्यवहनस्य, पणिकामेकखुरस्य, पशूनामर्धपणिकां, क्षुद्रपशूनां पादिकाम्, अंसभारस्य माषिकाम्। नष्टापहृतं च प्रतिविदध्यात्।

वैदेश्यं सार्थं कृतसारफल्गुभाण्डविचयनमभिज्ञानं मुद्रां च दत्वा प्रेषयेदध्यक्षस्य।

वैदेहकव्यञ्जनो वा सार्थप्रमाणं राज्ञः प्रेषयेत्। तेन प्रदेशेन राजा शुल्काध्यक्षस्य सार्थप्रमाणमुपदिशेत् सर्वज्ञत्वख्यापनार्थम्। ततः सार्थमध्यक्षोऽभिगम्य ब्रूयात्—इदममुष्यामुष्य च सारभाण्डं फल्गुभाण्डं च न निगूहितव्यम्, एष राज्ञः प्रभावः इति।

विषयान्तरक्षाधिकारिणो भृतिमाह—**अन्तेत्यादि**। **अन्तपालः**, सपादपणिकां पादाधिकपणरूपां, **वर्तनीं** तत्संज्ञां मार्गरक्षाभृतिं, **गृह्णीयात्**, **पण्यवहनस्य** पण्यवाहिनः शकटादेः। पणिकाम् **एकखुरस्य** एकपणात्मिकां वर्तनीं खरादेर्गृह्णीयात्। **पशूनामर्धपणिकां** गवादीनाम् अर्धपणात्मिकां, **क्षुद्रपशूनां पादिकां** मेषादीनां पादपणरूपाम्, **अंसभारस्य माषिकां** स्कन्धभारवाहिनस्ताम्रमाषात्मिकां च, वर्तनीं गृह्णीयात्। **नष्टापहृतमिति**। मुष्टनष्टं च, **प्रतिविदध्यात्** तस्करात् प्रत्यानीय वा तस्करानुपलम्भे स्वहस्ताद् वा दद्याद् अन्तपालः।

वैदेश्यमिति। वैदेश्यं विदेशागतं, **सार्थं** वणिक्सङ्घं, **कृतसारफल्गुभाण्डविचयनम्** अमुकस्यैतावन्ति सारभाण्डानि एतावन्ति फल्गुभाण्डानीति स्वेन कृतं सारफल्गुभाण्डानां विचयनमन्वेषणं यस्य तं तथाभूतम्, **अध्यक्षस्य** शुल्काध्यक्षस्य, **प्रेषयेत्**। किं कृत्वा, **अभिज्ञानं** स्वहस्तलेखाङ्कं, **मुद्रां च** पण्यवासनकरणीयां, **दत्त्वा**। एष शुल्काध्यक्षहरणस्य निषेधोपायः।

सर्वनियुक्तपुरुषहरणनिषेधोपायमाह—**वैदेहकेत्यादि**। **वैदेहकव्यञ्जनो वा** वणिक्छद्मचारी वा गूढपुरुषो राजनियुक्तः, **सार्थप्रमाणं** पण्यवहनादिसंख्यां, **राज्ञः प्रेषयेत्** रहसि निवेदयेत्। इत्थमवगतसार्थप्रमाणस्य प्रतिपत्तिमाह—**तेनेति**। **तेन प्रदेशेन** गूढपुरुषोपदेशेन, **राजा, शुल्काध्यक्षस्य, सार्थप्रमाणं** स्वविदितम्, **उपदिशेत्** ज्ञापयेत, **सर्वज्ञत्वख्यापनार्थं** 'सर्वज्ञो राजा परोक्षमपि सार्थवाहप्रमाणं दिव्यदृष्ट्या जानातीति ख्यापनार्थम्। **तत इति**। ततः उपदेशानन्तरं, **सार्थम्, अध्यक्षः अभिगम्य ब्रूयात्**, किमिति—**इदममुष्यामुष्य च, सारभाण्डं, फल्गुभाण्डं च, न निगूहितव्यम्**।

निगूहतः फल्गुभाण्डं शुल्काष्टगुणो दण्डः, सारभाण्डं सर्वापहारः।

राष्ट्रपीडाकरं भाण्डमुच्छिन्द्यादफलं च यत्।
महोपकारमुच्छुल्कं कुर्याद् बीजं तु दुर्लभम्॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः,
आदितो द्विचत्वारिंशः॥

कस्मात्, एष राज्ञः प्रभावः ईदृशो राज्ञो महिमोपलभ्यते — यत् परोक्षस्यापि भवदीयसारफल्गुभाण्डजातस्येयत्तां दिव्यदृष्ट्यावगम्यास्मभ्यमुपदिशति, इति।

निगूहत इति। निगूहतः राजप्रभावकथनेऽप्यवच्छादयतः, फल्गुभाण्डं कार्पासादिकं, शुल्काष्टगुणो दण्डः। सारभाण्डं मणिमुक्ताप्रवालादिकं, निगूहतः, सर्वापहारः गूहितसर्वसारापहरणं दण्डः।

अध्यायान्ते श्लोकमाह — राष्ट्रेत्यादि। राष्ट्रपीडाकरं भाण्डं गरलमदिरादिपण्यम्, उच्छिन्द्याद् वारयेद् अत्यन्ताय वा नाशयेत्। अफलमल्पफलं यद् भाण्डं वार्ताकोर्वारुकादि, तच्च उच्छिन्द्यात् देशान्तरान्नानाययेत्। महोपकारं, दुर्लभं स्वविषये, बीजम् अभ्यवहार्यं व्रीह्यादिधान्यं भैषज्यार्थं च मरिचहरीतक्यादि, उच्छुल्कं शुल्करहितं कुर्यात्। तुशब्दो विशेषार्थः। बीजं चेति पाठे चशब्दस्तुशब्दस्यार्थे॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकविंशोऽध्यायः शुल्काध्यक्षः,
आदितो द्विचत्वारिंशः॥

३९. प्रक. शुल्काध्यक्षः — शुल्कव्यवहारः ।

शुल्कव्यवहारः ।

बाह्यमाभ्यन्तरं चातिथ्यं, निष्क्राम्यं प्रवेश्यं च शुल्कम् ।

प्रवेश्यानां मूल्यपञ्चभागः ।

पुष्पफलशाकमूलकन्दवल्लिक्यबीजशुष्कमत्स्यमांसानां षड्भागं गृह्णीयात् ।

शङ्खवज्रमणिमुक्ताप्रवालहाराणां तज्जातपुरुषैः कारयेत् कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः ।

क्षौमदुकूलक्रिमितानकङ्कटहरितालमनश्शिलाहिङ्गुलुकलोहवर्ण-

शुल्कव्यवहार इति । अमुकपण्यस्यैतावच्छुल्कमिति व्यवस्थाकरणं शुल्कव्यवहारः । स इहोच्यते ।

शुल्कमादौ त्रिधा पुनर्द्विधा च विभजते—**बाह्यमित्यादि** । चः प्रथमो भिन्नक्रमः । शुल्कं, बाह्यमाभ्यन्तरमातिथ्यं च इति त्रिधा भवतीत्यर्थः । तत्र स्वजनपदोत्पन्नपण्यसम्बन्धि बाह्यं, दुर्गस्थानीयाद्यभ्यन्तरभूमिप्रभवपण्यसम्बन्धि आभ्यन्तरं, विदेशागतपण्यसम्बन्धि आतिथ्यम् । त्रिविधमपि तत् नैष्क्राम्यं निष्क्राम्यपण्यनिष्क्रमणनिमित्तं, प्रावेश्यं च प्रवेशनीयपण्यप्रवेशननिमित्तं च इति पुनः प्रत्येकं द्विविधम् । वृद्धपाठोऽयं व्याख्याभाषयोरुपलब्धः । अवृद्धपाठे तु संबन्धि लक्ष्यम् ।

प्रवेश्यानामिति । प्रवेश्यानां परदेशात् स्वदेशं स्वदेशेऽपि स्थानीयं प्रवेशयितव्यानां पण्यानां मूल्यपञ्चभागः, शुल्कं भवति । एष सामान्यविधिः ।

तदपवादं त्वाह — **पुष्पफलेत्यादि** । पुष्पं कुसुम्भादि फलं पनसादि शाकं वास्तुकादि मूलं बालुकादि कन्दः सूरणादिः वल्लिक्यं वल्लिजं कूश्माण्डादि बीजं धान्यादि एतेषां शुष्कमत्स्यमांसयोश्च, षड्भागं मूल्यषड्भागं शुल्कं, गृह्णीयात् ।

शङ्खेत्यादि । शङ्खादीनां षण्णां, तज्जातपुरुषैः तल्लक्षणविचक्षणैः, कारयेत् विधापयेत्, शुल्कम् । कीदृशैः, कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कृताः स्वानुभवावगताः कर्मप्रमाणकालवेतनफलनिष्पत्तयो यैस्तथाविधैः । पदमिदमायुधागाराध्यक्षेऽपि व्याख्यातम् ।

क्षौमेत्यादि । क्षौमादीनां क्षौमं स्थूलवल्कजं दुकूलं सूक्ष्मवल्कजं क्रिमि-

धातूनां चन्दनागुरुकटुककिण्वावराणां सुरादन्ताजिनक्षौमदुकूलनिकरास्तरणप्रावरणक्रिमिजातानामजैलकस्य च दशभागः, पञ्चदशभागो वा।

वस्त्रचतुष्पदद्विपदसूत्रकार्पासगन्धभैषज्यकाष्ठवेणुवल्कलचर्ममृद्भाण्डानां धान्यस्नेहक्षारलवणमद्यपक्वान्नादीनां च विंशतिभागः पञ्चविंशतिभागो वा।

द्वारादेयं शुल्कपञ्चभागः। आनुग्राहिकं वा यथादेशोपकारं स्थापयेत्।

जातिभूमिषु च पण्यानामविक्रयः।

खनिभ्यो धातुपण्यादाने षट्छतमत्ययः।

तानश्चीनपट्टः कङ्कटः सूत्रसन्नाहः हरितालमनश्शिलाहिङ्गुलुका व्याख्याताः अञ्जनं सौवीरकादि, इदं व्याख्यायामेव पठ्यते, लोहवर्णो लोहजातिः धातुर्गैरिकादिः इत्येतेषां, चन्दनादीनां चन्दनागुरुणी प्रसिद्धे कटुकं पिप्पल्यादि किण्वावरं किण्वं मद्यबीजं तदन्तं तैलजातीयं द्रवजातम् इत्येतेषां, सुरादीनां सुरा मद्यभेदः दन्तो गजदन्तः अजिनं कृष्णचर्म क्षौमदुकूलनिकरः क्षौमनिष्पादनार्था दुकूलनिष्पादनार्थाश्च तन्तुनिकराः आस्तरणं शयनोपवेशनसाधनं प्रावरणं प्रावारः क्रिमिजातं कौशेयम् इत्येतेषाम्, अजैलकस्य च अजैलकालोमजस्य च, दशभागः पञ्चदशभागो वा शुल्कं भवति।

वस्त्रचतुष्पदेत्यादि। वस्त्रादयो धान्यादयश्च प्रसिद्धाः तेषां, विंशतिभागः पञ्चविंशतिभागो वा शुल्कम्। अयं पूर्वोक्तश्च विकल्पो यथादेशकालं द्रष्टव्यः।

द्वारादेयमिति। द्वाराध्यक्षग्राह्यं, शुल्कपञ्चभागः यस्य यच्छुल्कमुपदिष्टं तस्य तच्छुल्कपञ्चभागः भवति। आनुग्राहिकम् अनुग्रहानीतपण्यविषयं शुल्कं द्वारादेयं वा, यथादेशोपकारं स्वदेशानुग्रहानुगुण्येन, स्थापयेत् कल्पयेत्।

जातीत्यादि। जातिभूमिषु च उत्पत्तिदेशेषु च, पण्यानाम्, अविक्रयः विक्रयो न कर्तव्य इत्यर्थः।

निषेधातिक्रमे दण्डमाह—खनिभ्य इति। लोहलवणाद्याकरेभ्यः, धातुपण्यादाने धातुपण्यस्य कारणरूपस्य कार्यरूपस्य वा ग्रहणे, षट्छतम् अत्ययः षट्पणशतानि दण्डो भवति, अर्थाद् आदातुर्विक्रेतुश्च।

पुष्पफलवाटेभ्यः पुष्पफलादाने चतुष्पञ्चाशत्पणो दण्डः ।

षण्डेभ्यः शाकमूलकन्दादाने पादोनं द्विपञ्चाशत्पणो दण्डः ।

क्षेत्रेभ्यः सर्वसस्यादाने त्रिपञ्चाशत्पणः, पणोऽध्यर्धपणश्च सीतात्ययः ।

अतो नवपुराणानां देशजातिचरित्रतः ।
पण्यानां स्थापयेच्छुल्कमत्ययं चापकारतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः शुल्कव्यवहारः,
आदितस्त्रिचत्वारिंशः ॥

पुष्पफलवाटेभ्य इत्यादि । सुगमम् ।

षण्डेभ्य इत्यादि । षण्डेभ्यः शाकाद्युद्भिजक्षेत्रेभ्यः । स्पष्टमन्यत् ।

क्षेत्रेभ्य इति । क्षेत्रेभ्यः धान्यकेदारेभ्यः, सर्वसस्यादाने, त्रिपञ्चाशत्पणो, दण्डः । पणः अध्यर्धपणश्च क्रेतृविक्रेत्रोर्यथाक्रमं, सीतात्ययः धान्यदण्डः । अयं च दण्डस्त्रिपञ्चाशत्पणेन समुच्चीयते ।

अध्यायान्ते श्लोकमाह — **अत** इति । अत उक्तशुल्कदण्डप्रकारातिरेकेण, नवपुराणानां, पण्यानां, देशजातिचरित्रतः देशाचारजात्याचारानुसारात्, शुल्कं, स्थापयेत । अपकारतः अपकारानुसाराद् , अत्ययं च दण्डं च, स्थापयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
द्वाविंशोऽध्यायः शुल्काध्यक्षे शुल्कव्यवहारः,
आदितस्त्रिचत्वारिंशः ॥

४०. प्रक. सूत्राध्यक्षः ।

सूत्राध्यक्षः सूत्रवर्मवस्त्ररज्जुव्यवहारं तज्जातपुरुषैः कारयेत् ।

ऊर्णावल्ककार्पासतूलशणक्षौमाणि च विधवान्यङ्गाकन्याप्रव्रजितादण्डप्रतिकारिणीभी रूपाजीवामातृकाभिर्वृद्धराजदासीभिर्व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत् ।

श्लक्ष्णस्थूलमध्यतां च सूत्रस्य विदित्वा वेतनं कल्पयेत् । बहुल्पतां च । सूत्रप्रमाणं ज्ञात्वा तैलामलकोद्वर्तनैरेता अनुगृह्णीयात् ।

तिथिषु प्रतिपादनमानैश्च कर्म कारयितव्याः । सूत्रह्रासे वेतनह्रासो द्रव्यसारात् ।

सूत्राध्यक्ष इति सूत्रम् । सूत्रम् ऊर्णादिजो गुणः तस्य अध्यक्षः कर्तनवानादिकारयिता । तद्व्यापारोऽभिधीयत इति सूत्रार्थः । 'कार्पासक्षौमाणां पञ्चपले पलसूत्रम्' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चानुक्त इहोच्यते ।

सूत्राध्यक्ष इति । सूत्राध्यक्षः, सूत्रवर्मवस्त्ररज्जुव्यवहारं सूत्रादीनां कर्तनवानादिकं, तज्जातपुरुषैः तच्छिल्पिकुलजैस्तत्कर्मकुशलैश्च पुरुषैः, कारयेत् ।

ऊर्णेत्यादि । ऊर्णा मेषादिलोम वल्को मूर्वादित्वसरः कार्पासः प्रसिद्धः तूलं शाल्मल्यादि शणः क्षुपभेदजं क्षौममतसीजम् एतानि च, विधवाभिः पञ्चभिः तत्र न्यङ्गा अङ्गविकला दण्डप्रतिकारिणी कर्मणा दण्डनिष्क्रयकारिणी शेषाः प्रसिद्धाः, रूपाजीवामातृकाभिः गणिकाधात्रीभिः, वृद्धराजदासीभिः वृद्धाभिर्नृपतिपरिचारिकाभिः, व्युपरतोपस्थानदेवदासीभिश्च उपस्थानं देवालयेषु नृत्तगीतादिना देवसभाजनकर्म तद् व्युपरतम् अनर्हतया निवृत्तं यासां ताभिस्तथाभूताभिर्देवदासीभिर्देवालयपरिचारिकाभिश्च, कर्तयेत् सूत्रयेत् ।

श्लक्ष्णेत्यादि । श्लक्ष्णतां स्थूलतां मध्यतां च सूत्रस्य विदित्वा भृतिं कल्पयेत् । **बहुल्पतां चेति** । तुल्ये काले कर्तनस्य बहुत्वमल्पत्वं च, विदित्वा वेतनं कल्पयेदित्यनुषज्यते । **सूत्रप्रमाणमिति** । सूत्रस्य श्लक्ष्णतातिशयं बहुत्वं च, ज्ञात्वा, तैलामलकोद्वर्तनैः तैलाभ्यञ्जनस्नपनैरूष्मशमनार्थैः, एताः दृष्टगुणाः, अनुगृह्णीयात् उपकुर्यात् तत्प्रीतये तदन्यप्रोत्साहनाय च ।

तिथिष्विति । तिथिषु कर्मदिवसेषु, प्रतिपादनमानैश्च प्रतिपादनं वेतनदानं दीयमानवेतनं वा तस्य मानैः एतावतः कर्मण एतावद् वेतनमित्येवं-

कृतकर्मप्रमाणकालवेतनफलनिष्पत्तिभिः कारुभिश्च कर्म कारयेत्, प्रतिसंसर्गं च गच्छेत् ।

क्षौमदुकूलक्रिमितानराङ्कवकार्पाससूत्रवानकर्मान्तांश्च प्रयुञ्जानो गन्धमाल्यदानैरन्यैश्चौपग्राहिकैराराधयेत् । वस्त्रास्तरणप्रावरणविकल्पानुत्थापयेत् ।

कङ्कटकर्मान्तांश्च तज्जातकारुशिल्पिभिः कारयेत् ।

याश्चानिष्कासिन्यः प्रोषितविधवा न्यङ्गाः कन्यका वात्मानं बिभृयुस्ताः स्वदासीभिरनुसार्य सोपग्रहं कर्म कारयितव्याः ।

स्वयमागच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत् । सूत्रपरीक्षार्थमात्रः प्रदीपः ।

रूपैः परिच्छेदैश्च, कर्म कारयितव्याः । अथवा तिथिषु दिवसविशेषेषु पर्वादिषु अशनदानसत्कारैश्च कर्म कारयितव्याः । सूत्रह्रासे सूत्रस्य न्याय्यप्रमाणतो न्यूनत्वे, वेतनह्रासः, द्रव्यसारात् द्रव्यार्घमपेक्ष्य, कर्तव्य इति शेषः ।

कृतकर्मेत्यादि । इदं पदमन्यत्र व्याख्यातम् । एवम्भूतैः कारुभिश्च तन्तुवायादिभिश्च, कर्म कारयेत । प्रतिसंसर्गं सख्यं च, गच्छेत् तत्कर्मसम्भावितच्छलप्रयोगज्ञानार्थम् ।

क्षौमेत्यादि । राङ्कवं रङ्कुलोमजं क्षौमादिचतुष्कमन्यत्र व्याख्यातम् । क्षौमादीनां पञ्चानां सूत्रवानकर्मान्तान्, प्रयुञ्जानः कारयन् अध्यक्षः, गन्धमाल्यदानैः, अन्यैश्च, औपग्राहिकैः आनुकूल्यसम्पत्तिफलैः, आराधयेत् उपचरेत् तत्कारून् । तदाराधनफलमाह — **वस्त्रे**त्यादि । वस्त्रास्तरणप्रावरणानां विकल्पान् प्रकारभेदान्, उत्थापयेत् अपूर्वानुल्लेख्य निर्मापयेत् ।

कङ्कटेत्यादि । कङ्कटकर्मान्तांश्च सूत्रसन्नाहकर्माणि, तज्जातकारुशिल्पिभिः तत्कर्मनिपुणैः कारुभिः शिल्पिभिश्च, कारयेत् ।

याश्चेति । याश्च, अनिष्कासिन्यः प्रोषितविधवाः भर्तृप्रवासनिमित्तवियुक्तभर्तृकाः परित्यक्तबहिर्निष्क्रमणाः, न्यङ्गाः अङ्गविकलाः, कन्यका वा, आत्मानं बिभृयुः स्वपरिश्रमार्जितग्रासादिना देहयात्रां कुर्युः, ताः, स्वदासीभिः, अनुसार्य अनुवर्त्य, सोपग्रहं सप्रीतिबहुमानं यथा भवति तथा, कर्म सूत्रकर्तनादि, कारयितव्याः ।

स्वयमिति । स्वयमागच्छन्तीनां, वाशब्दात् स्वदासीसमानीतानां

स्त्रिया मुखसन्दर्शनेऽन्यकार्यसंभाषायां वा पूर्वः साहसदण्डः । वेतनकालातिपातने मध्यमः, अकृतकर्मवेतनप्रदाने च ।

गृहीत्वा वेतनं कर्माकुर्वत्याः अङ्गुष्ठसन्दंशं दापयेत् । भक्षितापहृतावस्कन्दितानां च । वेतनेषु च कर्मकराणामपराधतो दण्डः ।

रज्जुवर्तकैश्चर्मकारैश्च स्वयं संसृज्येत । भाण्डानि च वरत्रादीनि वर्तयेत् ।

वा, सूत्रशालां, प्रत्युषसि ईषत्तमसि दिनमुखे, भाण्डवेतनविनिमयं तद्गृहकर्तितभाण्डग्रहणपूर्वकवेतनार्पणं, कारयेत् । **सूत्रपरीक्षार्थमात्रः प्रदीप** इति, सूत्रगुणपरीक्षणप्रयोजना तदन्यप्रयोजनाक्षमा मात्रा प्रकाशपरिमाणं यस्य स तथाभूतः दीपः कार्यस्तत्काल इति शेषः ।

स्त्रिया इत्यादि । स्त्रियाः, मुखसन्दर्शने मुखनिर्वर्णने, अन्यकार्यसम्भाषायां प्रकृतकार्यातिरिक्तकार्यप्रश्नादौ वा, पूर्वः साहसदण्डः । वेतनकालातिपातने भृतिदानकालातिक्रमे, मध्यमः साहसदण्डः । अकृतकर्मवेतनप्रदाने च अकृतकर्मणामुत्कोचग्रहणेन वेतनस्य दाने च, मध्यम इत्यनुषज्यते ।

गृहीत्वेति । गृहीत्वा पूर्वमादाय, वेतनं, कर्माकुर्वत्याः, अङ्गुष्ठसन्दंशं दक्षिणाङ्गुष्ठतन्मध्यमाङ्गुल्यग्रयोश्छेदोऽङ्गुष्ठसन्दंशः तं, दापयेत् । भक्षितापहृतावस्कन्दितानां भक्षणापहरणपलायनानां च अर्थाद् भक्षयित्वापहृत्य वा पलायितानां च, अङ्गुष्ठसन्दंशं दापयेदित्येव । उक्त एव विषये दण्डविकल्पमाह — **वेतनेष्विति** । कर्मकराणां तन्तुवायादीनाम्, अपराधतः अपराधानुसारेण, वेतनेषु च दण्डः नावश्यं देहदण्डो यथोक्तः किन्तु तत्स्थाने यथापराधं वेतनदण्डोऽपि केवल इष्यत इत्यभिप्रायः । एवञ्च विकल्पपर्यवसित इह चकारो द्रष्टव्यः ।

रज्ज्वित्यादि । रज्जुवर्तकैः रज्जुकल्पनजीविभिः, चर्मकारैश्च चर्ममयाश्वोपकरणादिकारिभिश्च, वर्मकारैरिति पाठे सूत्रकङ्कटादिकारिभिः, स्वयं संसृज्येत सख्यं कुर्यात् रज्ज्वादिपालनार्थं तत्कर्मानुष्ठापनार्थं च । भाण्डानि च उपकरणानि च, वरत्रादीनि गवादिबन्धनीप्रभृतीनि, वर्तयेत् कारयेत् । भाण्डादीनीति तु पाठो न सुष्ठु ।

सूत्रवल्कमयी रज्जूर्वरत्रा वैत्रवैणवीः ।
सान्नाह्या बन्धनीयाश्च यानयुग्यस्य कारयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः,
आदितश्चतुश्चत्वारिंशः ॥

अध्यायान्ते श्लोकमाह — **सूत्रे**त्यादि । सूत्रवल्कमयीः कार्पासादितन्तुमयीः शणादिवल्कमयीश्च , रज्जूः, वैत्रवैणवीर्वरत्राः वेत्रमयीर्वेणुमयीश्च वरत्राः, कीदृशीः, सान्नाह्याः सन्नाहोपयोगिनीः, यानयुग्यस्य बन्धनीयाश्च रथादेरश्वादेश्च बन्धनयोग्याश्च, कारयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रयोविंशोऽध्यायः सूत्राध्यक्षः,
आदितश्चतुश्चत्वारिंशः ॥

४१. प्रक. सीताध्यक्षः ।

सीताध्यक्षः कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञस्तज्ज्ञसखो वा सर्वधान्यपुष्पफलशाककन्दमूलवाल्लिक्यक्षौमकार्पासबीजानि यथाकालं गृह्णीयात् ।

बहुहलपरिकृष्टायां स्वभूमौ दासकर्मकरदण्डप्रतिकर्तृभिर्वापयेत् ।

कर्षणयन्त्रोपकरणबलीवर्दैश्चैषामसङ्गं कारयेत् । कारुभिश्च मारकुट्टाकमेदकरज्जुवर्तकसर्पग्राहादिभिश्च ।

तेषां कर्मफलविनिपाते तत्फलहानं दण्डः ।

षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमध्यर्धमानूपानाम् । देशवा-

सीताध्यक्ष इति सूत्रम् । कृषिकर्माध्यक्ष इति सूत्रार्थः । 'सीताध्यक्षोपनीतः सस्यवर्णः सीता' इत्युक्तं कोष्ठागाराध्यक्षे । तदध्यक्षस्तद्व्यापारश्चाधुनोच्यते ।

सीताध्यक्ष इति । सीताध्यक्षः, कृषितन्त्रशुल्बवृक्षायुर्वेदज्ञः कृषितन्त्रं वृद्धपराशरादिप्रणीतं शुल्बशास्त्रं भूमिसिराज्ञानशास्त्रं वृक्षायुर्वेद आग्निवेश्यादिप्रणीतः तज्ज्ञः, तज्ज्ञसखो वा, सर्वधान्यादीनि धान्यादीनि सर्वविधस्वस्वावान्तरभेदयुक्तानि, यथाकालं संगृह्णीयात् । तत्र वाल्लिक्यं कूश्माण्डादिवल्लीफलम् । शेषं प्रसिद्धम् ।

बहुहलपरिकृष्टायामिति । बहुसीरविलिखितायां, स्वभूमौ तत्तद्धान्याद्यनुगुणायां भूमौ, दासादिभिः वापयेत्, दास उदरदासक्रीतदासादिः कर्मकरः वेतनार्थकर्मकारी दण्डप्रतिकर्ता कर्मणा दण्डनिष्क्रेता ।

कर्षणेत्यादि । कर्षणयन्त्राणि हलदण्डयुगादीनि उपकरणानि रज्जुदात्रादीनि परिकर्मकरा जनाश्च बलीवर्दाः प्रसिद्धाः एतैर्निर्दिष्टैः, एषां दासादीनाम्, असङ्गं क्रियानुपरोधं, कारयेत् । कारुभिश्च, कर्मारादिभिः, असङ्गं कारयेत्, तत्र कर्मारोऽयस्कारः कुट्टाकस्तक्षा मेदकः खनकः हिंसकत्वात्, भेदकपाठो वा, रज्जुवर्तकः रज्जुकल्पकः सर्पग्राहः व्यालग्राही ।

तेषामिति । कारूणां, कर्मफलविनिपाते तद्दोषजनिते कृषिफलविनाशे, तत्फलहानं दण्डः हापितफलपरिमाणो दण्डः ।

भूमिविशेषेषु सस्यनिष्पत्तिनिमित्तं वृष्टिप्रमाणमाह — **षोडशद्रोणं जाङ्गलानां वर्षप्रमाणमि**ति । हस्तप्रमाणमुखयुक्ते वृष्टिमानार्थमिर्मिते कुण्डे

पानाम् । अर्धत्रयोदशाश्मकानां, त्रयोविंशतिरवन्तीनाम्, अमितमपरान्तानां, हैमन्यानां च कुल्यावापानां च कालतः ।

वर्षत्रिभागः पूर्वपश्चिममासयोः, द्वौ त्रिभागौ मध्यमयोः सुषमारूपम् ।

तस्योपलब्धिर्बृहस्पतेः स्थानगमनगर्भाधानेभ्यः शुक्रोदयास्तमयचारेभ्यः सूर्यस्य प्रकृतिवैकृताच्च ।

मेघाभिवृष्टोदकासारपरिपूरिते यदि तद्गतं जलं षोडशद्रोणात्मकमुपलभ्येत, तदा तावद् वर्षप्रमाणं मरुप्रायाणां भूभागानां सस्यनिष्पादनपर्याप्तं भवतीत्यर्थः । अध्यर्धं चतुर्विंशतिद्रोणम्, आनूपानां जलप्रायाणाम् । इदं जाङ्गलानूपभेदेन वर्षप्रमाणमुक्तम् । देशभेदेन तदाह — **देशवापानामिति** । वर्षप्रमाणं वक्ष्यत इति शेषः । अर्धत्रयोदश अर्धाधिकास्त्रयोदश वर्षप्रमाणद्रोणानि, अश्मकानाम् आरट्टानाम् ! त्रयोविंशतिः द्रोणानि, अवन्तीनां मालवानाम् । अमितम् असंख्यातं वर्षप्रमाणम्, अपरान्तानां पाश्चात्यदेशस्य । हैमन्यानां च हिमाम्बुनिष्पाद्यसस्यानां हिमवत्प्रदेशानां च, हैम्यानामिति पाठेऽप्ययमेवार्थः, कुल्यावापानां च कुल्योपनेयजलमातृकप्रदेशानां च, कालतः स्वस्वकालानुसारेण सस्यसम्पत्तिः, न तु वर्षप्रमाणापेक्षेत्यर्थः ।

शोभनसंवत्सरस्य रूपमाह — **वर्षत्रिभाग** इत्यादि । वर्षत्रिभागः वर्षस्य तत्तद्देशोक्तवृष्टिप्रमाणस्य त्रिधा विभक्तस्य एकस्त्रिभागः, पूर्वपश्चिममासयोः श्रावणप्रोष्ठपदाश्वयुजकार्त्तिकाख्यमासचतुष्टये प्रथमचरमयोः श्रावणकार्त्तिकयोः भवति । शेषौ द्वौ त्रिभागौ, मध्यमयोः प्रोष्ठपदाश्वयुजयोः, भवतः । सुषमारूपं सुषमायाः शोभनस्य संवत्सरस्य रूपं भवति, अर्थाद् यथोक्तं भागशो वर्षणम् ।

भविष्यतः सुषमारूपस्य ज्ञापकमाह — **तस्येत्यादि** । तस्य सुषमारूपस्य, उपलब्धिरनुमितिः, बृहस्पतेः स्थानादित्रिकात् शुक्रोदयादित्रिकात् सूर्यस्य प्रकृतिवैकृताच्च भवति । तत्र स्थानं मेषादिराशिस्थितिः । गमनं मेषादेर्वृषभादिसंक्रमः । तयोर्वृष्ट्यादिफलहेतुत्वं ज्योतिश्शास्त्रप्रसिद्धम् । गर्भाधानं मार्गशीर्षादिषु षट्सु मासेषु तुषारादिदर्शनम् । तदुक्तं —

"मार्गशिराः सतुषारः सहिमः पौषः समारुतो माघः ।
साभ्रः फाल्गुनमासः सपवनवृष्टिश्च यदि चैत्रः ॥

सूर्याद् बीजसिद्धिः। बृहस्पतेः सस्यानां स्तम्बकरिता। शुक्राद् वृष्टिरिति।

त्रयः सप्ताहिका मेघा अशीतिः कणशीकराः।
षष्टिरातपमेघानामेषा वृष्टिः समा हिता॥
वातमातपयोगं च विभजन् यत्र वर्षति।
त्रीन् कर्षकांश्च जनयंस्तत्र सस्यागमो ध्रुवः॥

ततः प्रभूतोदकमल्पोदकं वा सस्यं वापयेत्।

तडिदभ्रानिलविद्युज्जलवृषितो भवति यदि च वैशाखः।
सम्यग् वर्षति मघवान् धारणदिवसेषु वर्षति चेत्॥"

धारणदिवसा वैशाखकृष्णप्रतिपदादयश्चत्वार इति व्याख्यातारः। शुक्रस्योदयास्तमयौ प्रसिद्धौ। चारः आषाढमासपञ्चम्यादिपु नवसु तिथिपु संचारः। सूर्यस्य प्रकृतिवैकृतं स्वभावान्यथाभावः सपरिवेषत्वादि। इत्थं सुषमारूपोपलब्धिकरणं ग्रहत्रयचरितमुक्तम्।

तत्र विशेषमाह — **सूर्यादिति**। सूर्यात् प्रकृतिस्थाद् विकृताद् वा, बीजसिद्धिः बीजस्य सस्यफलस्य सिद्धिर्निष्पत्तिः, अनुमीयते भवति नवेति। बृहस्पतेः स्थानादियुक्तात्, सस्यानां स्तम्बकरिता स्तम्बपरिबृंहणम्, अनुमीयते भवति नवेति। शुक्राद् उदयादियुक्ताद्, वृष्टिः अनुमीयते भवति नवेति।

शोभनवृष्टिक्रमं श्लोकाभ्यामाह— **त्रय** इत्यादि। त्रयो मेघाः, सप्ताहिकाः सप्ताहोरात्राविच्छिन्नवृष्टिकारिणः। अशीतिर्मेघाः, कणशीकराः सान्द्रबिन्दुवर्षिणः। आतपमेघानाम् आतपयुक्तानां मेघानां, षष्टिः। एषा इत्थं परिसंख्यातमेघा, वृष्टिः, समा अन्यूनानतिरिक्ता, अत एव हिता लोकश्रेयस्करी च॥

वातमिति। वातम् आतपयोगं च विभजन् तदुभयासंकरेण तिष्ठन्, त्रीन् कर्षकान् जनयन् तिसृभिर्वृष्टिभिर्ज्यैष्ठादिवापकालेषु तिस्रः कृषीः प्रवर्तयंश्च, त्रीन् करीषान् जनयन्निति पाठे दोहलार्थानां शुष्कगोमयानां त्रीन् संग्रहावसरान् विच्छिन्नवर्षणेनोत्पादयन्नित्यर्थः, अर्थात् पर्जन्यः, यत्र देशे, वर्षति, तत्र सस्यागमो ध्रुवः सस्यनिष्पत्तौ सन्देहो नास्ति॥

तत इति। ततः यथोक्तवृष्टिप्रमाणादिपरिज्ञानानन्तरं, प्रभूतोदकं प्रचुरजलनिष्पाद्यम्, अल्पोदकं वा अल्पजलनिष्पाद्यं वा, सस्यं वापयेत्, अर्थात् प्रभूतवृष्टावल्पवृष्टौ वा देशे यथाक्रमम्।

शालिव्रीहिकोद्रवतिलप्रियङ्गुदारकवरकाः पूर्ववापाः । मुद्गमाषशैम्ब्या मध्यवापाः । कुसुम्भमसूरकुलुत्थयवगोधूमकलायातसीसर्षपाः पश्चाद्वापाः ।

यथर्तुवशेन वा बीजवापाः ।

वापातिरिक्तमर्धसीतिकाः कुर्युः । स्ववीर्योपजीविनो वा चतुर्थपञ्चभागिकाः । यथेष्टमनवसितभागं दद्युरन्यत्र कृच्छ्रेभ्यः ।

स्वसेतुभ्यः हस्तप्रावर्तिममुदकभागं पञ्चमं दद्युः । स्कन्धप्रावर्तिमं चतुर्थम् । स्रोतोयन्त्रप्रावर्तिमं च तृतीयम् ।

सस्येषु विशेषमाह — **शालीत्यादि** । शाल्यादयः सप्त, पूर्ववापाः पूर्वमेव वपनीयाः । मुद्गमाषशैम्ब्याः मध्यवापा. । कुसुम्भादयोऽष्टौ, पश्चाद्वापाः पश्चिमकालवपनीयाः ।

यथर्तुवशेन वा बीजवापा इति । य एते शाल्यादिबीजवापा उक्ताः अनुक्ताश्चान्ये, ते सर्वे तत्तद्बीजसम्यङ्‌निष्पत्तियोग्यकालानुरोधेन कर्तव्याः ।

वापातिरिक्तमिति । कृतवापक्षेत्रातिरिक्तं क्षेत्रम्, अर्धसीतिकाः कृषिफलार्धभागस्वीकरणसंविदा कृषन्तः बीजबलीवर्दादिसम्पन्ना ग्राम्यकुटुम्बिनः, कुर्युः साधयेयुः कर्षणबीजवपनादिना । **स्ववीर्येत्यादि** । स्ववीर्योपजीविनो वा बीजादिषु स्वामिसम्बन्धिषु सत्सु स्वकायायासमात्रं क्षेत्रे कुर्वाणा वा कर्मकराः, चतुर्थपञ्चमभागिकाः निष्पन्नस्य फलस्य चतुर्थभागं पञ्चमभागं वा लभन्ते । **यथेष्टमिति** । अनवसितभागम् अनवसितस्य अभ्युपेत्याकृष्टस्य क्षेत्रस्य सस्यभागं, यथेष्टं स्वामीच्छानतिक्रमेण, दद्युः, अर्धादर्धसीतिकादयः । तत्रापवादः — **अन्यत्र कृच्छ्रेभ्य** इति । कर्षणविघातकविपदुपनिपातव्यतिरेके ।

स्वसेतुभ्य इति । स्वसेतुभ्यः स्वदेहायासस्वद्रव्यव्ययनिष्पादितेभ्यस्तटाकादिभ्यः, हस्तप्रावर्तिमं कुम्भादिजलपायनरूपहस्तप्रवृत्तिसाधितम्, उदकभागम् उदकार्थं फलभागं, पञ्चमं, दद्युः राज्ञेऽर्पयेयुः, कृषीवलाः । स्कन्धप्रावर्तिमं स्कन्धवहप्रवर्तितयन्त्रपायितजलनिष्पन्नम् उदकभागं, चतुर्थं दद्युः । स्रोतोयन्त्रप्रावर्तिमं सारणीपायितजलनिष्पन्नं च उदकभागं, तृतीयं दद्युः । उदककरश्चायं भूमिकरवद् द्रष्टव्यः, यतो राजा भूम्युदकयोरविशेषात् स्वामी । तदुक्तं —

चतुर्थं नदीसरस्तटाककूपोद्धाटम् ।

कर्मोदकप्रमाणेन कैदारं हैमनं ग्रैष्मिकं वा सस्यं स्थापयेत् ।

शाल्यादि ज्येष्ठम् । षण्डो मध्यमः । इक्षुः प्रत्यवरः । इक्षवो हि बह्वाबाधा व्ययग्राहिणश्च ।

फेनाघातो वल्लीफलानां, परीवाहान्ताः पिप्पलीमृद्वीकेक्षूणां, कूपपर्यन्ताः शाकमूलानां, हरणिपर्यन्ता हरितकानां, पाल्यो लवानां गन्धभैषज्योशीरह्रीबेरपिण्डालुकादीनाम् । यथास्वं भूमिषु च स्थल्याश्चानूप्याश्चौषधीः स्थापयेत् ।

"राजा भूमेः पतिर्दृष्टः शास्त्रज्ञैरुदकस्य च ।
ताभ्यामन्यत्तु यद् द्रव्यं तत्र स्वाम्यं कुटुम्बिनाम् ॥" इति ।

स्वसेतुभ्योऽन्यत्र देयमाह—**चतुर्थ**मिति । नदीसरस्तटाककूपोद्धाटम् **उद्धाट्य**ते निस्सार्यते जलमनेनेत्युद्धाटोऽरघट्टकादियन्त्रं लक्षणया त्विह तज्जनितग्रहणम् । नद्यादिचतुष्टयाद् यन्त्रविशेषपायितजलनिष्पन्नं, चतुर्थं भागं, दद्युः ।

कर्मोदकप्रमाणेनेति । कृष्यपेक्षितजलप्राचुर्याल्पत्वानुरोधेन, कैदारं शाल्यादिक्षेत्रवाप्यं, हैमनं हेमन्तकालवाप्यं, ग्रैष्मिकं ग्रीष्मकालवाप्यं वा, सस्यं, स्थापयेत् वापयेत् ।

शाल्यादीत्यादि । शाल्यादिधान्यं, ज्येष्ठं श्रेष्ठं प्रधानाहारद्रव्यत्वादल्पव्ययायाससाध्यानल्पफलत्वाच्च । षण्डः कदल्यादिः, मध्यमः अल्पव्ययायाससाध्यफलत्वात् । इक्षुः प्रत्यवरः शाल्याद्यपेक्षया निकृष्टः । कुतः, हि यतः, इक्षवः, बह्वाबाधाः मनुष्यमूषिकाद्युपद्रवबहुलाः, व्ययग्राहिणश्च छेदनपीडनपचनादिबहुकर्मकरसापेक्षत्वात् ।

अथ वापयोग्यभूमीराह—**फेनाघात** इति । फेनेनाहन्यत इति फेनाघातो जलपर्यन्तदेशः, वल्लीफलानां कूश्माण्डादीनाम् । परीवाहान्ताः जलोच्छ्वासपरिसरदेशाः, पिप्पलीमृद्वीकेक्षूणाम् । कूपपर्यन्ताः कूपपरिसरदेशाः, शाकमूलानाम् । हरणिपर्यन्ताः हरणिः कुल्या, सरस्तटाकादे रिक्तीभूत आर्द्रप्रदेश इति स्वामी, तस्याः पर्यन्ताः, हरितकानां यवसादीनाम् । पाल्यः क्षेत्रमध्यकृताः सेतवः, लवानां छिन्नानां गन्धादिपञ्चकप्रभृतीनां गन्धो मांसीग्रन्थिपर्णकादिः भैषज्यं लशुनशतपुष्पादि उशीरं लामज्जं ह्रीबेरं बालाख्यं पिण्डालुकः रोमकन्दः इत्येतदादीनाम् । वापदेश इति सर्वत्र शेषः । **यथास्वमिति** । यथास्वं भूमिषु च स्वस्वयोग्यभूमिषु जलभूमिष्वनूपभूमिषु चेत्यर्थः,

तुषारपायनमुष्णशोषणं चा सप्तरात्रादिति धान्यबीजानां, त्रिरात्रं पञ्चरात्रं वा कोशीधान्यानां, मधुघृतसूकरवसाभिः शकृद्युक्ताभिः काण्डबीजानां छेदलेपो, मधुघृतेन कन्दानाम् । अस्थिबीजानां शकृदालेपः । शाखिनां गर्तदाहो गोस्थिशकृद्भिः काले दौहृदं च ।

प्ररूढांश्चाशुष्ककटुमत्स्यांश्च स्नुहिक्षीरेण पाययेत् ।
कार्पाससारं निर्मोकं सर्पस्य च समाहरेत् ।
न सर्पास्तत्र तिष्ठन्ति धूमो यत्रैष तिष्ठति ॥

सर्वबीजानां तु प्रथमवापे सुवर्णोदकसंप्लुतां पूर्वमुष्टिं वापयेत् अमुं च मन्त्रं ब्रूयात्——

स्थल्याश्च स्थलप्ररोहिणीश्च, अनूप्याश्च जलप्रायदेशप्ररोहिणीश्च, ओषधीः, स्थापयेत् ।

बीजसंस्कारमाह—**तुषारे**त्यादि। तुषारपायनं रात्रौ तुषारे निवेशनम्, उष्णशोषणम् आतपे दिवा निवेशनं च, आ सप्तरात्रात् सप्तरात्रमभिव्याप्य, कर्तव्यमिति शेषः। इति एष प्रकारो, धान्यबीजानाम्। त्रिरात्रं पञ्चरात्रं वा, कोशीधान्यानां मुद्गमाषादीनां तुषारपायनमुष्णशोषणं च । मधुघृतसूकरवसाभिः शकृद्युक्ताभिः माध्वीकसर्पिर्वराहकायस्नेहैर्गोमययुक्तैः, काण्डबीजानाम् इक्षुप्रभृतीनां, छेदलेपः छिन्नप्रदेशलेपनम्। मधुघृतेन, कन्दानां सूरणादीनां, छेदलेपः। अस्थिबीजानां कार्पासादिबीजानां, शकृदालेपः । शाखिनाम् आम्रपनसादिवृक्षाणां, गर्तदाहः तन्निवेशगर्ते तृणादिदहनं, गोस्थिशकृद्भिः गवास्थिपुरीषैः, काले दौहृदं च पुष्पफलप्रसवार्हवयःप्राप्तौ दोहलं च, कर्तव्यमिति शेषः ।

कृमिकीटाद्युपघातप्रतीकारमाह — **प्ररूढांश्चे**ति । प्ररूढांश्च अङ्कुरितत्रिपत्रितमात्रांश्च पूर्वोक्तान् शाखिपर्यन्तान्, अशुष्ककटुमत्स्यान् स्नुहिक्षीरेण पाययेत् आर्द्रक्षुद्रमत्स्यैः समन्तदुग्धाख्यौषधिक्षीरयुक्तैः सेचयेत्। चः समुच्चये ।

सर्पप्रतीकारं श्लोकेनाह—**कार्पासे**त्यादि। कार्पाससारं कार्पासबीजस्य सारं, सर्पस्य, निर्मोकं च कञ्चुकं च, समाहरेत् संमेल्य धूपयेत्। एष धूमः मिलितोभयधूपनजनितो धूमः, यत्र तिष्ठति, तत्र सर्पाः न तिष्ठन्ति ॥

प्रथमवापे विशेषमाह — **सर्वबीजानामि**ति । तुशब्दो विशेषे । सर्वबीजानां प्रथमवापे, सुवर्णोदकसंप्लुतां स्वर्णयुक्तजलकृतसंप्लवां पूर्वमुष्टिं

प्रजापतये काश्यपाय देवाय नमः सदा ।
सीता मे ऋध्यतां देवी बीजेषु च धनेषु च ॥

षण्डवाटगोपालकदासकर्मकरेभ्यो यथापुरुषपरिवापं भक्तं कुर्यात् । सपादपणिकं मासं दद्यात् । कर्मानुरूपं कारुभ्यो भक्तवेतनम् ।

प्रशीर्णं च पुष्पफलं देवकार्यार्थं व्रीहियवमाग्रयणार्थं श्रोत्रियास्तपस्विनश्चाहरेयुः । राशिमूलमुञ्छवृत्तयः ।

यथाकालं च सस्यादि जातं जातं प्रवेशयेत् ।
न क्षेत्रे स्थापयेत् किञ्चित् पलालमपि पण्डितः ॥

प्रथमां बीजमुष्टिं, वापयेत् । अमुं वक्ष्यमाणं च, मन्त्रं मन्त्रश्लोकं, ब्रूयात् वापयन्नुच्चारयेत् ।

प्रजापतय इत्यादि । देवाय पर्जन्याय । ऋध्यतां वर्धताम् । ऋध्यतेरात्मनेपदमार्षम् । आद्ययोः श्लोकपादयोर्विसन्धानमपि मन्त्रत्वकृतम् । 'प्रजापतेः काश्यपाय देवलाय नमः सदा' इति भाषापाठः । तत्र तु नम इत्येतदनव्ययं परिकल्प्य प्रजापतेरिति षष्ठी सम्बन्धे समर्थनीया, 'नमःस्वस्ती'ति सूत्रे स्वस्त्यादिसाहचर्येणाव्ययस्यैव नमःशब्दस्य ग्रहणात् ।

षण्डवाटेत्यादि । षण्डवाटपालकेभ्यो गोपालकेभ्यो दासेभ्यः कर्मकरेभ्यश्च, **यथापुरुषपरिवापं** पुरुषपरिश्रमानुरूप्येण, भक्तं भोजनं, कुर्यात् कल्पयेत् । सपादपणिकं मासं पादाधिकपणयुक्तं मासजीवितं, दद्यात् । कर्मानुरूपं, कारुभ्यस्तक्षादिभ्यः, भक्तवेतनं भोजनं वेतनं च, दद्यादित्यनुकर्षः ।

प्रशीर्णं चेति । प्रशीर्णं वृक्षादेः स्वयं पतितं, पुष्पफलं पुष्पाणि फलानि च, **देवकार्यार्थं** देवपूजार्थं, व्रीहियवं स्वयं पतितान् व्रीहीन् यवांश्च, आग्रयणार्थं **नवसस्यार्थं**, श्रोत्रियाः छन्दोध्यायिनः, तपस्विनः तापसाश्च, आहरेयुः गृह्णीयुः । राशिमूलं खलनिवेशितधान्यराश्यन्तिकगतं कणिशादि, उञ्छवृत्तयः धान्यकणादानजीविनः, आहरेयुरित्यनुषङ्गः ।

अध्यायान्ते श्लोकानाह — **यथाकालमि**ति । यथाकालं प्रवेशनार्हकालानतिक्रमेण, **सस्यादि**, जातं जातं निष्पन्नमखिलं, **प्रवेशयेत्** । क्षेत्रे किञ्चित् पलालमपि, न स्थापयेत्, पण्डितः अर्थसञ्चयविधानाभिज्ञः । यदाहुः —

"यस्य विघ्नान् न कुर्वन्ति शीतमुष्णं रतिर्भयम् ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥" इति ॥

प्रकराणां समुच्छ्रायान् वलभीर्वा तथाविधाः ।
न संहतानि कुर्वीत न तुच्छानि शिरांसि च ॥
खलस्य प्रकरान् कुर्यान्मण्डलान्ते समाश्रितान् ।
अनग्निकाः सोदकाश्च खले स्युः परिकर्मिणः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः,
आदितः पञ्चचत्वारिंशः ॥

प्रकराणामिति । प्रकराणां धान्यनिवेशस्थानानां, समुच्छ्रायान् उन्नतसन्निवेशान्, कुर्वीत । वलभीर्वा तथाविधाः उच्छ्रितानि कूटागाराणि वा कुर्वीत । शिरांसि च तेषां, न संहतानि कुर्वीत अन्योन्योपश्लिष्टानि न कुर्वीत, न तुच्छानि रिक्तकानि न कुर्वीत किन्तु चण्डवाताद्यपहारनिषेधार्थं लोहपाषाणादिगुरुद्रव्यगर्भाणि कुर्वीत ॥

खलस्येति । प्रकरान्, खलस्य, मण्डलान्ते स्तम्बधान्यविश्लेषणाय यत्र बलीवर्दपङ्क्तिर्मण्डलभ्रमणं कार्यते स प्रदेशो मण्डलं तस्यान्ते समीपे, समाश्रितान् कुर्यात् । खले, परिकर्मिणः परिकर्मकारिणः, अनग्निकाः धान्यदाहभयादग्निरहिताः, सोदकाश्च याद्दच्छिकाग्निदीपनप्रशमार्थं सन्निहितजलाश्च, स्युः ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुर्विंशोऽध्यायः सीताध्यक्षः,
आदितः पञ्चचत्वारिंशः ॥

४२. प्रक. सुराध्यक्षः ।

सुराध्यक्षः सुराकिण्वव्यवहारान् दुर्गे जनपदे स्कन्धावारे वा तज्जातसुराकिण्वव्यवहारिभिः कारयेदेकमुखमनेकमुखं वा विक्रयक्रयवशेन वा। षट्छतमत्ययमन्यत्र कर्तृक्रेतृविक्रेतृणां स्थापयेत्। ग्रामादनिर्णयनमसम्पातं च सुरायाः, प्रमादभयात् कर्मसु निर्दिष्टानां, मर्यादातिक्रमभयादार्याणाम्, उत्साहभयाच्च तीक्ष्णानाम् ।

लक्षितमल्पं वा चतुर्भागमर्धकुडुबं कुडुबमर्धप्रस्थं प्रस्थं वेति ज्ञातशौचा निर्हरेयुः ।

सुराध्यक्ष इति सूत्रम् । सुरा गौडी माध्वी पैष्टीत्येवं त्रिविधा तस्या अध्यक्षस्तत्सन्धानाद्यधिकृतः । स इहोच्यत इति सूत्रार्थः ।

समाहर्तृप्रत्यवेक्षणीये दुर्गे सुरा निर्दिष्टा। तदध्यक्षस्तद्व्यापारो वानभिहित इदानीमभिधीयते ।

सुराध्यक्ष इत्यादि । सः, सुराकिण्वव्यवहारान् सुरातद्बीजसम्बद्धान् तत्सन्धानविक्रयादिव्यवहारान्, तज्जातसुराकिण्वव्यवहारिभिः तत्कर्मकुलोत्पन्ननिपुणतद्व्यवहारिभिः, कारयेत् । कथमित्याह—एकमुखम् एकस्थानकम्, अनेकमुखं वा अनेकस्थानकं वा, विक्रयक्रयवशेन वा क्रयविक्रयप्रियाप्रियत्वानुरोधेन वा । षट्छतमत्ययं षट्छतपणात्मकं दण्डम्, अन्यत्र कर्तृक्रेतृविक्रेतृणां व्यवस्थितस्थानेतरस्थानेषु सन्धानक्रयविक्रयकारिणां, स्थापयेत् । **ग्रामादिति** । सुराया मद्यस्य उपलक्षणया तत्पानमदवतां च, ग्रामाद्, अनिर्णयनं बहिरनिस्सरणम्, असम्पातम् अगमनं च गृहाद् गृहान्तरे जनाकीर्णे वा, स्थापयेदित्यनुषङ्गः । तत्र कारणमाह — प्रमादभयात् कर्मसु निर्दिष्टानां तत्तत्कर्मनियुक्तानामध्यक्षादीनां स्वकर्मस्ववधानभङ्गभयात्, मर्यादातिक्रमभयाद् आर्याणां साधूनां स्वधर्मातिलङ्घनभयात्, उत्साहभयाच्च तीक्ष्णानां शूराणाम् अस्थानशस्त्रप्रयोगभयाच्च ।

निर्णयनाभ्यनुज्ञानपक्षमाह — **लक्षितमिति** । वाशब्दः पक्षान्तरे । लक्षितम् अभिज्ञानमुद्राचिह्नितम्, अल्पम् अल्पपरिमाणम् । अल्पत्वस्यैव व्याख्यानं **चतुर्भागमित्यादिना**। चतुर्भागं पादकुडुबम्, अर्धकुडुबं, कुडुबम्, अर्धप्रस्थं, प्रस्थं वा परमावधिपरिमाणम्, इति एवम्प्रकारं सुरापरिमाणं, ज्ञातशौचाः प्रतीतवृत्ताव्यभिचाराः, निर्हरेयुः निर्णयेयुः ।

पानागारेषु वा पिबेयुरसञ्चारिणः ।

निक्षेपोपनिधिप्रयोगापहृतादीनामनिष्टोपगतानां च द्रव्याणां ज्ञानार्थमस्वामिकं कुप्यं हिरण्यं चोपलभ्य निक्षेप्तारमन्यत्र व्यपदेशेन ग्राहयेत् । अतिव्ययकर्तारमनायतिव्ययं च ।

न चानर्घेण कालिकां वा सुरां दद्यादन्यत्र दुष्टसुरायाः । तामन्यत्र विक्रापयेत् । दासकर्मकरेभ्यो वा वेतनं दद्यात् । वाहनप्रतिपानं सूकरपोषणं वा दद्यात् ।

सामान्यविधिमाह— **पानागारेष्वि**त्यादि । वेति वाक्यपूरणे । असञ्चारिणः मदकालवर्जितसम्पाताः ।

एवं गर्ह्योऽपि सुराव्यवहारश्चोरसाहसिकाद्युपलम्भसाधनत्वान्महाफल इत्यभिप्रायेणाह— **निक्षेपे**त्यादि । निक्षेपो भाण्डघटनाय दत्तम्, उपनिधिः न्यासः, प्रयोगः आधिः, अपहृतं चोरितम्, आदिशब्दाद् याचितकादि गृह्यते, एषां निक्षेपादीनाम्, अनिष्टोपगतानां साहसहृतानां च, द्रव्याणां, ज्ञानार्थं तत्त्वावगमार्थम्, अस्वामिकम् अविदितस्वामिकं, कुप्यं खड्गादिकं, हिरण्यं च मद्यपायिना पानायाहितम्, उपलभ्य, निक्षेप्तारं कुप्यहिरण्याधातारं पुरुषम्, अन्यत्र पानागारादन्यस्मिन् प्रदेशे, व्यपदेशेन वाक्पारुष्यादिच्छलेन, ग्राहयेत् नगराध्यक्षेण । पानागार एव तद्ग्रहणे व्यपदेशाकरणे चान्ये चोरादयः पानशौण्डा यथोक्तकुप्यादिकमविश्वासात् तत्र नानयेयुरित्यत उक्तम् 'अन्यत्रे'ति 'व्यपदेशेने'ति च । अतिव्ययकर्तारम् आयाधिकव्ययकारिणम्, अनायतिव्ययम् आयतिं विना व्ययकारिणं च, ग्राहयेदित्यनुषङ्गः ।

न चानर्घेणेति । अनर्घेण अल्पेन मूल्येन, कालिकां वा सवृद्धिकमूल्यदानकालावधिमतीं वा कालान्तरदेयमूल्येन वेति यावत्, सुरां, न च दद्यात् क्रेतृभ्यः, अन्यत्र दुष्टसुरायाः दुष्टसुराव्यतिरेकेण । दुष्टसुरामपि प्रशस्तसुराविक्रयस्थानादन्यत्र नीत्वा धारणकक्रेतृभ्यो दापयेदित्याह — **तामन्यत्र विक्रापयेदि**ति । **दासे**त्यादि । दासकर्मकरेभ्यो वा, वेतनं दद्यात् वेतनस्थाने दुष्टसुरां दद्यात् । तच्च वेतनं क्षुद्रकर्मविषयमित्यभिप्रायेणाह— **वाहने**त्यादि । वाहनप्रतिपानम् उष्ट्रबलीवर्दादिप्रतिपालनविषयं, **सूकरपोषणं** वा वराहपोषणविषयं वा, दद्याद् अर्थाद् वेतनम् । वाहनप्रतिपानमित्यस्य उष्ट्रादिव्यापारणभृतिनिष्क्रयार्था सुरामिति वार्थः सुवचः ।

पानागाराण्यनेककक्ष्याणि विभक्तशयनासनवन्ति पानोद्देशानि गन्धमाल्योदकवन्ति ऋतुसुखानि कारयेत् ।

तत्रस्थाः प्रकृत्यौत्पत्तिकौ व्ययौ गूढा विद्युरागन्तूंश्च ।

क्रेतॄणां मत्तसुप्तानामलङ्काराच्छादनहिरण्यानि च विद्युः । तन्नाशे वणिजस्तच्च तावच्च दण्डं दद्युः ।

वणिजस्तु संवृतेषु कक्ष्याविभागेषु स्वदासीभिः पेशलरूपाभिरागन्तूनां वास्तव्यानां च आर्यरूपाणां मत्तसुप्तानां भावं विद्युः ।

मेदकप्रसन्नासवारिष्टमैरेयमधूनाम् ।

उदकद्रोणं तण्डुलानामर्धाढकं त्रयः प्रस्थाः किण्वस्येति मेदकयोगः ।

पानागाराणीत्यादि । पानोद्देशानि पानयोग्योत्कृष्टप्रदेशोपेतानि । ऋतुसुखानि ऋतुषु सर्वेषु सुखानि तत्तदुचितभोग्यवस्तुसमृद्धतया सुखकराणि । शेषं सुगमम् ।

तत्रस्था इति । तत्रस्थाः पानागारस्थाः, प्रकृत्यौत्पत्तिकौ प्रकृतिसिद्धः प्रकृतिर्नित्यः अपूर्वोपजन उत्पत्तिस्तत्सिद्ध औत्पत्तिकः तथाविधौ, व्ययौ मद्यपायिनां, गूढाः पानागारकर्मकरादिव्यञ्जनाः, विद्युः । आगन्तून् विदेशागतांश्च पातॄन् विद्युः ।

क्रेतॄणामिति । मद्यपायिनां, मत्तसुप्तानाम्, अलङ्काराच्छादनहिरण्यानि च देहगतानि, विद्युः, गूढा इत्येव । तन्नाशे तेषामलङ्कारादीनां चोरादिनापहारे, वणिजः मद्यविक्रयिणः, तच्च तावच्च दण्डं नष्टसदृशरूपपरिमाणं दण्डं, दद्युः ।

वणिग्विषयं प्रस्तावान्तरमाह— **वणिजस्त्वि**ति । मद्यविक्रयिणः, संवृतेषु विविक्तेषु, कक्ष्याविभागेषु, स्वदासीभिः आप्तप्रेष्याभिः, पेशलरूपाभिः रुचिराकृतिभिः, आगन्तूनां विदेशागतानां, वास्तव्यानां च स्वदेशगतानां च, आर्यरूपाणाम् आर्यवत् प्रतिभासमानानां, मत्तसुप्तानां, भावं विद्युः अभिप्रायं गृह्णीयुः । चोरत्वपरप्रयुक्तत्वादिपरीक्षार्थम् ।

मेदकादियोगविधिं प्रतिजानीते — **मेदके**त्यादि । मेदकादीनां षण्णां, योगविधिरुच्यत इति शेषः ।

मेदकयोगमाह — **उदकद्रोण**मित्यादि । द्रोणपरिमितं जलम् अर्धाढकपरिमितास्तण्डुलाः त्रिप्रस्थपरिमितं मद्यबीजमित्यनेन मिश्रणप्रकारेण मेदकयोगो भवति ।

द्वादशाढकं पिष्टस्य पञ्च प्रस्थाः किण्वस्य पुत्रकत्वक्फलयुक्तो वा जातिसम्भारः प्रसन्नायोगः ।

कपित्थतुला फाणितं पञ्चतौलिकं प्रस्थो मधुन इत्यासवयोगः । पादाधिको ज्येष्ठः पादहीनः कनिष्ठः ।

चिकित्सकप्रमाणाः प्रत्येकशो विकाराणामरिष्टाः ।

मेषशृङ्गीत्वक्काथाभिषुतो गुलप्रतीवापः पिप्पलीमरिचसम्भारस्त्रिफलायुक्तो वा मैरेयः । गुलयुक्तानां वा सर्वेषां त्रिफलासम्भारः ।

मृद्वीकारसो मधु । तस्य स्वदेशो व्याख्यानं कापिशायनं हारहूरकमिति ।

प्रसन्नायोगमाह — **द्वादशाढकमित्यादि** । पुत्रकत्वक्फलयुक्तः कामरूपजनपदप्रसिद्धपुत्रकाख्यवृक्षविशेषत्वक्फलसहितः । जातिसम्भारः 'पाठालोध्रे'त्यादिनानुपदं वक्ष्यमाणः पाठादिप्रयोगः । शेषं सुगमम् । पूर्वत्र तण्डुलोक्तदिशा जलप्रमाणमप्यत्र पिष्टाष्टगुणमूहनीयम् ।

आसवयोगमाह — **कपित्थेत्यादि** । कपित्थतुला शतपलः कपित्थफलसारः, फाणितं, पञ्चतौलिकं तुलापञ्चकपरिमाणं, मधुनः प्रस्थः प्रस्थपरिमाणं माध्वीकम्, इत्येवम्प्रकार आसवयोगः । एष एव कपित्थादिप्रमाणचतुर्भागाधिको ज्येष्ठः, तच्चतुर्भागन्यूनस्तु कनिष्ठ इत्युच्यत इत्याह — **पादाधिक** इत्यादि । अर्थात् पूर्वोक्तो मध्यमः ।

तत्तद्रोगाणां यथास्वं चिकित्सोपयोगिनोऽत एव भिषगुपदिष्टयोज्यद्रव्यप्रमाणाः अरिष्टयोगा इत्याह— **चिकित्सकप्रमाणा** इत्यादि । विकाराणां वातादिविकाररूपाणां रोगाणाम् । अरिष्टा अभयारिष्टादयो वैद्यप्रसिद्धाः ।

मैरेयमाह — **मेषशृङ्गीत्यादि** । मेषशृङ्गीत्वक्काथाभिषुतः मेषशृङ्गीसंज्ञकवृक्षत्वक्कषायसंहितः, गुलप्रतीवापः गुलोपचारयुक्तः, पिप्पलीमरिचसम्भारः पिप्पलीमरिचचूर्णमिश्रः, त्रिफलायुक्तो वा त्रिफलाचूर्णयुक्तो वा, मैरेयः । वाशब्दः सम्भारविकल्पने । गुलप्रतिवापिनां मद्यानां सर्वेषामपि त्रिफलासम्भारः साधारण इति कश्चित् पक्षमाह — **गुलयुक्तानामित्यादि** ।

मधुविधिमाह — **मृद्वीकारस** इति । द्राक्षारसः पक्वद्राक्षाफलरसः, मधु भवति । तस्य मधुनः, स्वदेशो व्याख्यानं स्वोत्पत्तिदेशसम्बन्धनिमित्तकं विविधमर्थाद् द्विविधमाख्यानं संज्ञा, कापिशायनमिति हारहूरकमिति च । कपि-

माषकलनीद्रोणमामं सिद्धं वा त्रिभागाधिकतण्डुलं मोरटादीनां कार्षिकभागयुक्तं किण्वाबन्धः ।

पाठालोध्रतेजोवत्येलावालुकमधुकमधुरसाप्रियङ्गुदारुहरिद्रामरिचपिप्पलीनां च पञ्चकर्षिकः सम्भारयोगो मेदकस्य प्रसन्नायाश्च । मधुकनिर्यूहयुक्ता कटशर्करा वर्णप्रसादनी च ।

चोचचित्रकविलङ्गगजपिप्पलीनां च कार्षिकः क्रमुकमधुकमुस्तालोध्राणां द्विकार्षिकश्चासवसम्भारः । दशभागश्चैषां बीजबन्धः ।

प्रसन्नायोगः श्वेतसुरायाः ।

शेति नदी तत्तीरगतं नगरं च तत्र भवं कापिशायनम् । हरहूरं तदेव नगरं तत्र भवं हारहूरकम् । द्याख्यानमिति टीकाभाषयोः स्वरसप्रतीते पाठे आख्यानद्वयमित्यर्थः, क्लीबत्वं त्रिभुवनवत् ।

किण्वविधिमाह — **माषकलनीत्यादि** । माषकलनीद्रोणं माषकल्कभावितमुदकद्रोणम्, आमं सिद्धं वा अक्कथितं क्कथितं वा, त्रिभागाधिकतण्डुलं त्रिभागाधिकद्रोणपरिमाणतण्डुलपिष्टयुक्तं, मोरटादीनां वक्ष्यमाणानां, कार्षिकभागयुक्तं प्रत्येकपादपलभागयुक्तं, किण्वाबन्धः किण्वयोगः ।

मेदकप्रसन्नयोः सम्भारयोगमाह—**पाठालोध्रेत्यादि** । पाठा अम्बष्ठाख्या, लोध्रः तिरीटकल्कः, तेजोवती इभपिप्पली, एला प्रसिद्धा, वालुकं हरिवालुकं, मधुकं मधुयष्टिः, मधुरसा दूर्वा, प्रियङ्गु कुङ्कुमं, दारुहरिद्रा दार्वीसंज्ञा, दार्विति भिन्नं वा पदं तत्र पीतदारुसंज्ञं, हरिद्रा तु प्रसिद्धा, मरिचं कोलं, पिप्पली प्रसिद्धा । पाठादीनां पञ्चकर्षिकः प्रत्येकं चूर्णपञ्चकर्षप्रमाणः, सम्भारयोगः, मेदकस्य प्रसन्नायाश्च । मधुकनिर्यूहयुक्ता यष्टिमधुककषाययुक्ता, कटशर्करा गङ्गेष्टिः, वर्णप्रसादनी च मेदकप्रसन्नयोर्वर्णप्रसादहेतुश्च ।

आसवसम्भारमाह—**चोचेत्यादि** । चोचं त्वचसंज्ञं चित्रकोऽग्निसंज्ञः विलङ्गम् अमोघा गजपिप्पली प्रसिद्धा एतासां चतसृणां च, कार्षिकः प्रत्येकं कर्षप्रमाणः, टीकाभाषयोरनुमिते 'षट्कार्षिक' इति पाठे सार्धपलप्रमाण इत्यर्थः, क्रमुकमधुकमुस्तालोध्राणां क्रमुको घोण्टा मधुकं श्यामकङ्गुः मुस्ता कुरुविन्दः लोध्रस्तिरीटः एतेषां, द्विकार्षिकश्च कर्षद्वयप्रमाणश्च, आसवसम्भारः । दशभागश्चैषां चोचादीनां दशभागः, बीजबन्धः आसवकरणद्रव्येषु योज्यः ।

प्रसन्नायोगः श्वेतसुराया इति । प्रसन्नाया योगो य उक्तः स एव

सहकारसुरा, रसोत्तरा, बीजोत्तरा वा महासुरा, सम्भारिकी वा।

तासां मोरटापलाशपत्तूरमेषशृङ्गीकरञ्जक्षीरवृक्षकषायभावितं दग्धकटशर्कराचूर्णं लोध्रचित्रकविलङ्गपाठामुस्ताकलिङ्गयवदारुहरिद्रेन्दीवरशतपुष्पापामार्गसप्तपर्णनिम्बास्फोतकल्कार्धयुक्तमन्तर्नखो मुष्टिः कुम्भीं राजपेयां प्रसादयति। फाणितः पञ्चपलिकश्चात्र रसवृद्धिर्देयः।

कुटुम्बिनः कृत्येषु श्वेतसुरामौषधार्थं वारिष्टमन्यद् वा कर्तुं लभेरन्।

उत्सवसमाजयात्रासु चतुरहः सौरिको देयः। तेष्वननुज्ञातानां प्रहवणान्तं दैवसिकमत्ययं गृह्णीयात्।

श्वेतसुराया अपि योगो भवति। किन्तु स सम्भाररहितः समकिण्वाबन्धश्चेत्याह स्वामी। सम्भारबीजबन्धावुभावपि नेत्याह भाषा।

अथ सुराभेदाः—**सहकारसुरेति**। सुरैव सहकारतैलयुक्ता सहकारसुरा। गुडप्रतिवापयुक्ता सुरा रसोत्तराख्या या शीधु इत्युच्यते। बीजोत्तरा बीजद्रव्यमात्राधिका महासुरा। सम्भारमात्राधिका सुरा सम्भारिकी।

सुराप्रसादनविधिमाह—**तासामिति**। तासां सर्वासां सुराणां, मोरटादिषट्ककषायभावितं मोरटा मूलपुष्पिकाख्यो वल्लीभेदः पलाशः किंशुकः पत्तूरो लोहमारकः मेषशृङ्गी विषाणी करञ्जो नक्तमालः क्षीरवृक्षो वटादिः एतेषां निर्यूहेन भावितं, दग्धकटशर्कराचूर्णं, लोध्रादिकल्कार्धयुक्तं कलिङ्गयवः देशविशेषभवो यवः शतपुष्पा सितच्छत्राख्या अपामार्गः खरमञ्जरी आस्फोतः ब्रह्मवृक्षः शेषं प्रसिद्धम् एषां लोध्रादीनां कल्कस्य अर्धेन कटशर्कराचूर्णार्धप्रमाणेन युक्तम्, अन्तर्नखो मुष्टिः अदृश्यनखमुष्टिमेयं, प्राक्षिप्तमिति शेषः, कुम्भीं खारीमितां सुरां, राजपेयां प्रसादयति राजपानयोग्या यथा भवेत् तथा स्वच्छां करोति। फाणितः, पञ्चपलिकश्च पलपञ्चकप्रमाणश्च, अत्र प्रसादितसुरायां, रसवृद्धिर्देयः रसवृद्धिप्रयोजनः क्षेप्तव्यः।

कुटुम्बिन इति। कुटुम्बिनः पौरजानपदाः, कृत्येषु विवाहादिकार्येषु, श्वेतसुराम्, औषधार्थं वारिष्टम् औषधार्थं भिषगुपदिष्टमरिष्टं वा, अन्यद्वा मेदकादि वा, कर्तुं सन्धातुं, लभेरन्।

उत्सवेत्यादि। उत्सवसमाजयात्रासु वसन्ताद्युत्सवेषु बन्धुजनमेलनेषु इष्टदेवतापूजासु च, चतुरहः सौरिको देयः चत्वारो दिवसाः सुरापानार्था अनुज्ञातव्याः, सुराध्यक्षेण। तेषु उत्सवादिषु, अननुज्ञातानाम् अनुज्ञां विनैव

*सुराकिण्वविचयं स्त्रियो बालाश्च कुर्युः ।

अराजपण्याः पञ्चकं शतं शुल्कं दद्युः सुरकामेदकारिष्टमधुफलाम्लाम्लशीधूनां च ।

अह्नश्च विक्रयं व्याजीं ज्ञात्वा मानहिरण्ययोः ।
तथा वैधरणं कुर्यादुचितं चानुवर्तयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चविंशोऽध्यायः सुराध्यक्षः,
आदितः षट्चत्वारिंशः ॥

पिबतां, प्रहवणान्तं प्रहवणं तुष्टिभोजनं तेनोत्सवादिसमाप्तिकालो लक्ष्यते, तदवधिकमित्यर्थः, दैवसिकमत्ययं गृह्णीयात् प्रात्यहिकं दण्डं गृह्णीयात् सुराध्यक्षः । अननुज्ञातपानजनितमददिवसेषु कर्महानिनिमित्तं दण्डं कर्मकरेभ्यो गृह्णीयादिति केचिद् व्याचक्षते ।

सुरेत्यादि । सुराकिण्वविचयं सुराया विचयं श्रपणादिरूपं कर्म किण्वस्य विचयं शोषणादिरूपं च, स्त्रियो बालाश्च कुर्युः, तद्रसानभिज्ञाः ।

अराजपण्या इति । स्वोत्पादितमद्यविक्रयिणः, शुल्कं राजभागं, दद्युः । कथं दद्युः, पञ्चकं शतम् इतिशब्द इहाध्याहर्तव्यः पञ्चकं शतमिति पञ्च शुल्कोऽस्मिञ्छते दीयत इत्यनेन क्रमेण दद्युरित्यर्थः । केषां पण्यानामित्याकाङ्क्षायामाह — **सुरके**त्यादि । तत्र सुरैव सुरका, मेदकारिष्टमधूनि प्रतीतानि, फलाम्ला तालनालिकेरादिमद्यम् , अम्लशीधु उदश्वु प्रतीतमिति स्वामी । चकारः किण्वादिग्रहणार्थः ।

उक्तशुल्कातिरेकेण व्याज्या अपि करणमध्यायान्तश्लोकेनाह—**अह्न-श्चे**ति । अह्नश्च विक्रयं दिनकृतं विक्रयं, तथा वैधरणं मानावश्यम्भाविनं पण्यच्छेदं च, ज्ञात्वा इयत्तया निर्धार्य, मानहिरण्ययोर्व्याजीं षोडशभागरूपां मानव्याजीं विंशतिभागरूपां हिरण्यव्याजीं च, कुर्यात् कल्पयेत्, सुराध्यक्षः । करणं च न यथाकामं भवति, किन्तु समुदाचारसिद्धमेवानुसर्तव्यमित्याह— **उचितं चानुवर्तये**दिति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
पञ्चविंशोऽध्यायः सुराध्यक्षः,
आदितः षट्चत्वारिंशः ॥

४३. प्रक॰ सूनाध्यक्षः ।

सूनाध्यक्षः प्रदिष्टाभयानामभयवनवासिनां च मृगपशुपक्षिमत्स्यानां बन्धवधहिंसायामुत्तमं दण्डं कारयेत् । कुटुम्बिनामभयवनपरिग्रहेषु मध्यमम् ।

अप्रवृत्तवधानां मत्स्यपक्षिणां बन्धवधहिंसायां पादोनसप्तविंशतिपणमत्ययं कुर्यात्, मृगपशूनां द्विगुणम् ।

प्रवृत्तहिंसानामपरिगृहीतानां षड्भागं गृह्णीयात् । मत्स्यपक्षिणां दशभागं वाधिकं, मृगपशूनां शुल्कं वाधिकम् ।

पक्षिमृगाणां जीवत्षड्भागमभयवनेषु प्रमुञ्चेत् ।

सूनाध्यक्ष इति सूत्रम् । सूना भक्ष्यप्राणिवधस्थानं तदध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः । उत्तममध्यमाधमेषु कर्मसु तदनुरूपा अध्यक्षाः कार्या इत्युक्तमधस्तात् । तत्र समाहर्तृसन्निधातृप्रभृतय उत्तमाः पौतवाध्यक्षादयो मध्यमाश्चाभिहिताः । इदानीमधमकर्माध्यक्षा अभिधीयन्त इति सम्बन्धः ।

तदाह — **सूनाध्यक्ष** इति सूनाध्यक्षः, प्रदिष्टाभयानां प्रख्यापितहिंसानाम्, अभयवनवासिनां च ब्रह्मसोमारण्यसर्वातिथिमृगवनादिवासिनां च, मृगपशुपक्षिमत्स्यानां मृगाणां कुरङ्गादीनां पशूनां खड्गमाहिषादीनां पक्षिणां मयूरादीनां मत्स्यानां च, बन्धवधहिंसायां बन्धनप्रहारमारणेषु, उत्तमम् उत्तमसाहसं, दण्डं कारयेत् । कुटुम्बिनाम्, अभयवनपरिग्रहेषु अभयवनवासिमृगादिविषये वधादौ, मध्यमं साहसं, कारयेत् ।

अप्रवृत्तेत्यादि । अप्रवृत्तवधानां चिरानुष्ठीयमानवधाः प्रवृत्तवधाः तथा न भवन्तीत्यप्रवृत्तवधाः तेषां, मत्स्यपक्षिणां बन्धवधहिंसायां, पादोनसप्तविंशतिपणम्, अत्ययं दण्डं, कुर्यात् । मृगपशूनां तथाविधानां, द्विगुणम् अर्धोनचतुष्पञ्चाशत्पणं दण्डं कुर्यात् ।

प्रवृत्तेत्यादि । प्रवृत्तहिंसानाम्, अपरिगृहीतानाम् अस्वामिकारक्षितवनगतानां वधादौ, षड्भागं गृह्णीयात् । मत्स्यपक्षिणां, दशभागं वाधिकं दशमांशं ततोऽधिकं वा, गृह्णीयात् । मृगपशूनां, शुल्कं वाधिकं राजादेयं मृगपशुमूल्यस्य दशभागं ततोऽधिकं वा, गृह्णीयात् ।

पक्षीत्यादि । पक्षिमृगाणां वनगृहीतानां, जीवत्षड्भागं जीवतां षड्भागम्, अभयवनेषु, प्रमुञ्चेत् ।

सामुद्रहस्त्यश्वपुरुषवृषगर्दभाकृतयो मत्स्याः सारसा नादेयास्तटाककुल्योद्भवा वा, क्रौञ्चोत्क्रोशकदात्यूहहंसचक्रवाकजीवञ्जीवकभृङ्गराजचकोरमत्तकोकिलमयूरशुकमदनशारिका विहारपक्षिणो मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगा हिंसाबाधेभ्यो रक्ष्याः । रक्षातिक्रमे पूर्वः साहसदण्डः ।

मृगपशूनामनस्थि मांसं सद्योहतं विक्रीणीरन् । अस्थिमतः प्रतिपातं दद्युः । तुलाहीने हीनाष्टगुणम् ।

वत्सो वृषो धेनुश्चैषामवध्याः । घ्नतः पञ्चाशत्को दण्डः । क्लिष्टघातं घातयतश्च ।

रक्ष्यप्राणिन आह—**सामुद्रे**त्यादि । सामुद्राः समुद्रभवाः हस्त्यश्वाद्याकृतयश्चेति विग्रहः तथाभूताः, मत्स्याः जलचरविशेषाः, तथा सारसाः सरश्चराः, नादेयाः नदीचराः, तटाककुल्योद्भवा वा तटाकभवाः कुल्याभवाश्च मत्स्याः, तथा क्रौञ्चोत्क्रोशकादयस्त्रयोदश पक्षिणः, तत्र क्रौञ्चः क्रुङ्नामा उत्क्रोशकः कुररः दात्यूहः कालकण्ठकः जीवञ्जीवकः पक्षिभेदः भृङ्गराजो धूम्याटः चकोरश्चन्द्रिकाप्रियः मदनशारिके पक्षिजातिभेदौ शेषाः प्रसिद्धाः, विहारपक्षिणः क्रीडार्थाः कुक्कुटादयः, मङ्गल्याश्चान्येऽपि प्राणिनः पक्षिमृगाः मङ्गलार्थाश्च गरुडभरद्वाजादय इतरेऽपि प्राणिनः पक्षिणो मृगाश्च, हिंसाबाधेभ्यः मारणपीडनेभ्यो, रक्ष्याः । रक्षातिक्रमे तद्रक्षणानास्थायां, पूर्वः साहसदण्डः, सूनाध्यक्षस्य ।

मांसविक्रयविधिमाह—**मृगे**त्यादि । मृगपशूनाम्, अनस्थि अस्थिविनाकृतं, मांसं, सद्योहतम् अयातयामम् अभिनवं, विक्रीणीरन् । अस्थिमतः अस्थियुक्तस्य मांसस्य, प्रतिपातं दद्युः पातो हानिः तत्प्रतिनिधिः प्रतिपातः हीनप्रतीकारः तं दद्युः अस्थियोगहापितमांसमात्राप्रतिपूरणार्थमधिकमांसमात्रां दद्युरित्यर्थः । तुलाहीने हीनाष्टगुणं तुलोन्मानच्छद्मनिमित्तहानियोगिनि मांसे हीनमांसादष्टगुणं मांसं, दद्युः । तत्र चाष्टगुणेऽष्टभाग एव हापितपूरणार्थः केतुः, अवशिष्टास्तु अष्टभागाः सप्त सूनाध्यक्षस्येत्याह स्वामी ।

वत्स इति । वत्सः स्तनन्धयः, वृषः रेतस्सेचनक्षमः, धेनुश्च प्रसवधर्मिणी गौश्च, एषां मृगपशूनाम् अनुज्ञातवधानामपि मध्ये, अवध्याः । घ्नतः वत्सादिमारयितुः, पञ्चाशत्कः पञ्चाशत्पणिकः, दण्डः । क्लिष्टघातं घातयतश्च

परिसूनमशिरःपादास्थि विगन्धं स्वयंमृतं च न विक्रीणीरन् । अन्यथा द्वादशपणो दण्डः ।

दुष्टाः पशुमृगव्याला मत्स्याश्चाभयचारिणः ।
अन्यत्र गुप्तिस्थानेभ्यो वधबन्धमवाप्नुयुः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः,
आदितः सप्तचत्वारिंशः ॥

विचित्रव्यथोत्पादनदारुणो वधो यथा भवेत् तथा वधं कारयतश्च उक्त एव दण्डः ।

अविक्रेयमांसान्याह — **परिसूनमिति** । परिसूनं सूना मांसपरिनिष्पादनस्थानं तत् परिवर्जितं यस्य तत् तथाभूतम् अर्थात् सूनातिरिक्तस्थलनिहतप्राणिदेहोद्धृतं मांसं, तथा अशिरःपादास्थि शिरःपादास्थिशून्यं वनहतखादितावशिष्टमृगाङ्गसम्बन्धि मांसं, तथा विगन्धं दुर्गन्धि मांसं, स्वयंमृतं च रोगमृतमांसं च, न विक्रीणीरन् । अन्यथा परिसूनादिविक्रये, द्वादशपणो दण्डः ।

अध्यायप्रान्ते श्लोकमाह — **दुष्टा** इति । अभयचारिणः अभयवनेषु रक्ष्यमाणाः, दुष्टाः हिंस्राः, पशुमृगव्यालाः पशवो गवयादयः मृगाः शुनकादयः व्याला व्याघ्रादयश्च, मत्स्याश्च शिंशुमारादयः, गुप्तिस्थानेभ्योऽन्यत्र अभयवनेभ्योऽन्यस्मिन् स्थाने, समागता इति शेषः, वधबन्धम् अवाप्नुयुः । स एषोऽभयवनस्थपशुमृगादिवधस्य प्राक्प्रतिषिद्धस्य प्रतिप्रसवः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
षड्विंशोऽध्यायः सूनाध्यक्षः,
आदितः सप्तचत्वारिंशः ॥

४४. प्रक. गणिकाध्यक्षः ।

गणिकाध्यक्षो गणिकान्वयामगणिकान्वयां वा रूपयौवनशिल्पसम्पन्नां सहस्रेण गणिकां कारयेत् । कुटुम्बार्धेन प्रतिगणिकाम् ।

निष्पतिताप्रेतयोर्दुहिता भगिनी वा कुटुम्बं भरेत । तन्माता वा प्रतिगणिकां स्थापयेत् । तासामभावे राजा हरेत् ।

सौभाग्यालङ्कारवृद्ध्या सहस्रेण वारं कनिष्ठं मध्यममुत्तमं वारो-

---

गणिकाध्यक्ष इति सूत्रम् । गणिका रूपाजीवाः तासामध्यक्षः, अर्थात् तद्व्यापार उच्यत इति सूत्रार्थः । 'रूपाजीवाः स्नानशुद्धशरीराः परिवर्तितवस्त्रालङ्काराः पश्येदि'त्युक्तम् । तदध्यक्षस्त्वनुक्त इदानीमभिधीयते ।

गणिकाध्यक्ष इति । सः, गणिकान्वयां गणिकावंशभवाम्, अगणिकान्वयां वा, वाशब्देन गणिकात्वं प्रति वंशस्याप्रयोजकत्वे सूचिते गणिकात्वप्रयोजकं धर्ममाह—रूपयौवनशिल्पसम्पन्नां सौन्दर्यतरुणिमकलाकौशलशालिनीं स्त्रियं, सहस्रेण गणिकां कारयेत् नवकुटुम्बस्थापनार्थरूप्यसहस्रदानेन गणिकास्थाने स्थापयेत्, वक्ष्यमाणनियोगानुष्ठानाय । अयमेकगणिकास्थापनपक्षः । अनेकगणिकास्थापनपक्षमाह — **कुटुम्बार्धेने**ति । कुटुम्बं गणिकाकुटुम्बकर्म राजपरिचर्यालक्षणं तस्यार्धेन अर्धमेकमनयानुष्ठेयमपरमन्ययेत्यर्धशो विभजनेन, अथवा कुटुम्बस्थापनार्थदेयद्रव्यं कुटुम्बं तस्यार्धेन अर्धशो दानेन, प्रतिगणिकां द्वितीयामपि कारयेत । कुटुम्बार्धोक्त्या पूर्वोक्तस्य सहस्रस्याप्यर्धशो विभज्य दानं गणिकाप्रतिगणिकयोरुक्तप्रायम् ।

निष्पतितेत्यादि । निष्पतिताप्रेतयोः प्रोषिताप्रमीतयोर्गणिकयोः, दुहिता, भगिनी वा, कुटुम्बं गणिकातन्त्रं, भरेत वहेत । अर्थात् तद्धनं च हरेत । तन्माता वा प्रतिगणिकां स्थापयेत् दुहितृभगिन्योरभावे तन्मातैव तत्स्थानेऽन्यामादिश्य तत्कार्यं कारयेत् । तासां दुहितृभगिनीप्रतिगणिकामातॄणाम्, अभावे, राजा, हरेद् गणिकाधनम् ।

सौभाग्यालङ्कारवृद्ध्येति । सौभाग्यालङ्कारवृद्ध्यानुगुण्येन, सहस्रेण उपदापणसहस्रग्रहणेन, वारं नियोगं, कनिष्ठम् अधमम्, मध्यमम्, उत्तमं वा, आरोपयेद् दद्यात् । तत्र कनिष्ठस्य सहस्रग्रहणे मध्यमस्य द्विसहस्रग्रहणम्

पयेत् । छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थम् ।

सौभाग्यभङ्गे मातृकां कुर्यात् ।

निष्क्रयश्चतुर्विंशतिसाहस्रो गणिकायाः । द्वादशसाहस्रो गणिकापुत्रस्य । अष्टवर्षात् प्रभृति राज्ञः कुशीलवकर्म कुर्यात् ।

गणिकादासी भग्नभोगा कोष्ठागारे महानसे वा कर्म कुर्यात् । अविशन्ती सपादपणमवरुद्धा मासवेतनं दद्यात् ।

भोगं दायमायं व्ययमायतिं च गणिकाया निबन्धयेत् । अतिव्ययकर्म च वारयेत् ।

उत्तमस्य त्रिसहस्रग्रहणमिति बोद्धव्यम् । किमर्थं कनिष्ठादिमारोपयेदित्यत्राह— **छत्रभृङ्गारव्यजनशिबिकापीठिकारथेषु च विशेषार्थमिति** । छत्रादिग्रहणादिकर्मसु अनुष्ठानप्रतिनियमार्थं, यद्वा तेषु यथायोगमनुष्ठीयमानेषु शोभोत्कर्षार्थम् । तत्रच्छत्रादिषु षट्सु मध्ये प्रथमद्विकं नियोगस्य कनिष्ठस्य द्वितीयद्विकं मध्यमस्य तृतीयद्विकमुत्तमस्येति क्रम औचित्यादवसेयः ।

सौभाग्यभङ्ग इति । रूपयौवनापगमे वार्धकनिमित्ते, मातृकां कुर्यात् तावत्कालभुक्तां मातृस्थानीयां कुर्यात्, अर्थाद् भोग्यगणिकायाः ।

गणिकात्वनिर्मोक्षविधिमाह— **निष्क्रय** इति । निष्क्रयः राजदास्यनिर्मोक्षमूल्यं, चतुर्विंशतिसाहस्रः चतुर्विंशतिसहस्रपणः, गणिकायाः । द्वादशसाहस्रो द्वादशसहस्रपणो निष्क्रयः, गणिकापुत्रस्य । निष्क्रयाभावे त्वाह — **अष्टवर्षादिति** । अष्टवर्षात् प्रभृति, राज्ञः, कुशीलवकर्म चारणकर्म, कुर्याद् गणिकापुत्रः ।

गणिकादासीति । गणिकायाः परिचारिका, भग्नभोगा भोगार्हवयोऽतिक्रान्ता, कोष्ठागारे, महानसे वा, कर्म व्रीह्यवघातादिकं पाकपात्रमार्जनादिकं वा, कुर्यात् । अविशन्ती कर्माकुर्वती, सपादपणं, मासवेतनं दद्याद् गणिकायै । का दद्यात्, अवरुद्धा पुरुषेण केनचिद् गृहेऽवरुध्यात्मैकभोग्यतां नीता गणिकादासी ।

भोगमिति । भोगं भोक्तृपुरुषदत्तं धनं, दायं मातृक्रमागतं धनम्, आयं भोगातिरिक्तलाभम्, व्ययम्, आयतिं च प्रभावं च, गणिकायाः, निबन्धयेत पुस्तके लेखयेद्, गणिकाध्यक्षः । अतिव्ययकर्म च, वारयेत् प्रतिषेधयेत् ।

मातृहस्तादन्यत्राभरणन्यासे सपादचतुष्पणो दण्डः। स्वापतेयं विक्रयमाधानं नयन्त्याः सपादपञ्चाशत्पणो दण्डः।

चतुर्विंशतिपणो वाक्पारुष्ये। द्विगुणो दण्डपारुष्ये। सपादपञ्चाशत्पणः पणोऽर्धपणश्च कर्णच्छेदने।

अकामायाः कुमार्या वा साहसे उत्तमो दण्डः। सकामायाः पूर्वः साहसदण्डः।

गणिकामकामां रुन्धतो निष्पातयतो वा व्रणविदारणेन वा रूपमुपघ्नतः सहस्रदण्डः। स्थानविशेषेण वा दण्डवृद्धिरा निष्क्रयद्विगुणात्। पणसहस्रं वा दण्डः।

मातृहस्तादिति। मातृहस्तादन्यत्र प्रियविटादिहस्ते, आभरणन्यासे आभरणानां रक्षार्थेऽर्पणे, सपादचतुष्पणो दण्डः, गणिकायाः। स्वापतेयं स्वं वस्त्रभाजनादि, विक्रयम्, आधानं वा, नयन्त्याः, सपादपञ्चाशत्पणो दण्डः।

चतुरित्यादि। चतुर्विंशतिपणः तावन्मानो दण्डः, वाक्पारुष्ये वाचा पराक्रोशे। द्विगुणः अष्टचत्वारिंशत्पणः, दण्डपारुष्ये करपादलगुडताडनादौ। सपादपञ्चाशत्पणः, पणोऽर्धपणश्च सार्धपण इत्यर्थः, कर्णच्छेदने दण्डः। तत्राद्यो राज्ञे देयः, द्वितीयस्तु गणिकाध्यक्षाय। त एते गणिकादण्डाः।

अथ तत्कामुकपुरुषदण्डमाह— **अकामाया** इति। अकामाया इच्छारहितायाः, कुमार्याः, वाशब्दः प्रस्तावान्तरद्योतनार्थः, साहसे बलात्करणे, उत्तमो दण्डः उत्तमसाहसः। सकामायाः इच्छन्त्याः कुमार्याः, साहसे, पूर्वः साहसदण्डः।

गणिकामिति। गणिकाम्, अकामां, रुन्धतः स्वगृहे अवरुध्य वासनाः, निष्पातयतो वा निष्पतनं निर्मोक्षणं कारयतो वा, व्रणविदारणेन वा रूपम् उपघ्नतः व्रणहेतुना दन्तनखादिक्षतेन रूपं विकारयतो वा, सहस्रदण्डः। **स्थाने**त्यादि। स्थानविशेषेण वा शरीरगततत्तत्स्थानविशेषानुरूप्येण वा, दण्डवृद्धिः उक्तस्य सहस्रदण्डस्य वृद्धिः गुणनिका कल्पनीया। आ कुत एषा वृद्धिकल्पनेत्याह — आ निष्क्रयद्विगुणात् निष्क्रयश्चतुर्विंशतिसाहस्रो य उक्तस्तस्य द्विगुणम् अष्टाचत्वारिंशत्साहस्रमभिव्याप्य। तदुपरि शरीरावयवोपघातनिमित्ता दण्डवृद्धिर्नास्तीत्यर्थः। स्वामी तु स्थानविशेषेण वेति प्रतीकमुपादाय व्याचष्टे — "उत्तमादिवारप्राधान्येन दण्डवृद्धिः कल्पनीया। आ

प्राप्ताधिकारां गणिकां घातयतो निष्क्रयत्रिगुणो दण्डः। मातृकादुहितृकारूपदासीनां घात उत्तमः साहसदण्डः।

सर्वत्र प्रथमेऽपराधे प्रथमः, द्वितीये द्विगुणः, तृतीये त्रिगुणः, चतुर्थे यथाकामी स्यात्।

राजाज्ञया पुरुषमनभिगच्छन्ती गणिका शिफासहस्रं लभेत। पञ्चसहस्रं वा दण्डः।

भोगं गृहीत्वा द्विषत्या भोगद्विगुणो दण्डः। वसतिभोगापहारे भोगमष्टगुणं दद्याद् अन्यत्र व्याधिपुरुषदोषेभ्यः।

कुत इत्याह — **आ निष्क्रयाद्द्विगुणादिति** । निष्क्रयश्चतुर्विंशतिसाहस्रः तद्द्विगुणोऽष्टाचत्वारिंशत्साहस्रः'' इति । आ निष्क्रयद्विगुणादित्येतदनन्तरं 'पणसहस्रं वा दण्डः' इति वाक्यम् अर्थशास्त्रादर्शेषु पठ्यते। तत्तु स्वामिटीका-भाषयोरननुसंहितत्वात् पूर्वोत्तरग्रन्थानाकाङ्क्षितत्वाच्च प्रक्षिप्तं मन्यमानैर्न व्याख्यातमस्माभिः ।

प्राप्ताधिकारामिति । लब्धच्छत्रभृङ्गारादिनियोगां, गणिकां, घातयतः, निष्क्रयत्रिगुणः द्वासप्ततिसाहस्रपणो, दण्डः । मातृकादुहितृकारूपदासीनां घाते कुट्टन्याः कुमार्याः प्रतिकर्मदास्या वा ताडने, उत्तमः साहसदण्डः।

सर्वत्रेति। सर्वस्मिन्, प्रथमेऽपराधे यो य उक्तस्तस्मिंस्तस्मिन्निदम्प्रथमकृतेऽपराधे, प्रथमः यो य उक्तो दण्डः स स प्रथम इत्यर्थः । द्वितीये तस्मिंस्तस्मिन्नपराधे पुनरारब्धे, द्विगुणः स स दण्डः कार्य इति शेषः। तृतीये, त्रिगुणः। चतुर्थेऽपराधे, यथाकामी स्यात् चतुर्गुण-सर्वस्वहरण-प्रवासनादिरूपं दण्डं स्वेच्छानुरोधेन विदध्यादित्यर्थः ।

राजाज्ञयेति। राजाज्ञानुरोधेन, पुरुषमनभिगच्छन्ती, गणिका, शिफासहस्रं कशाघातसहस्रं, दण्डं लभेत। पञ्चसहस्रं वा दण्डः शिफासहस्राभावपक्षे पञ्चसहस्रपणात्मको दण्डः ।

भोगमिति। भोगं सम्भोगवेतनं, गृहीत्वा, द्विषत्याः भोगदं पुरुषमरोचयमानायाः, भोगद्विगुणो दण्डः। **वसतीत्यादि**। वसतिभोगापहारे वसतिभोगस्य रात्रिसम्भोगस्य अपहारे कथादिव्याजेन कालयापने, भोगं सम्भोगवेतनं गृहीतम्, अष्टगुणं दद्यात्। तत्रापवादः—**अन्यत्र व्याधिपुरुषदोषेभ्य इति**। व्याधयः कुष्ठादयः पुरुषदोषा अरागत्वादयः तद्व्यतिरेकेण ।

पुरुषं घ्नत्याश्चिताप्रतापोऽप्सु प्रवेशनं वा।

गणिकाभरणमर्थं भोगं वापहरतोऽष्टगुणो दण्डः। गणिका भोगमायतिं पुरुषं च निवेदयेत्।

एतेन नटनर्तकगायकवादकवाग्जीवनकुशीलवप्लवकसौभिकचारणस्त्रीव्यवहारिणां स्त्रियो गूढाजीवाश्च व्याख्याताः।

तेषां तूर्यमागन्तुकं पञ्चपणं प्रेक्षावेतनं दद्यात्।

रूपाजीवा भोगद्वयगुणं मासं दद्युः।

गीतवाद्यपाठ्यनृत्तनाट्याक्षरचित्रवीणावेणुमृदङ्गपरचित्तज्ञानगन्धमाल्यसंयूहनसम्पादनसंवाहनवैशिककलाज्ञानानि गणिका दासीरङ्गोपजीविनीश्च ग्राहयतो राजमण्डलादाजीवं कुर्यात्।

पुरुषमिति। पुरुषं घ्नत्याः मारयन्त्याः, चिताप्रतापः तेनैव सह चितायामारोप्य दहनम्, अप्सु प्रवेशनं वा गलमहाशिलाबन्धेन जलनिमज्जनं वा कर्तव्यम्।

गणिकाभरणमिति। गणिकाया आभरणम्, अर्थं तदन्यद् वा वस्तु, भोगं वा सम्भोगवेतनं वा, अपहरतः, अष्टगुणः अपहृतद्रव्याष्टगुणः, दण्डः। गणिकेति। सा, भोगम् आयतिं तन्मूलमायं, पुरुषं च कृतवासं, निवेदयेत्।

एतेनेति। उक्तेन गणिकाकल्पेन, नटादीनां दशानां, स्त्रियः, गूढाजीवाश्च प्रच्छन्नव्यभिचारजीविन्यश्च, व्याख्याताः उक्ताः, त एते गणिकाविधय एव यथासम्भवमासु योजनीया इत्यर्थः। तत्र नटा अर्थाभिनयजीविनः, नर्तकाः गात्रविक्षेपमात्रकारिणः, गायकाः कण्ठगायिनः, वादकाः वैणिकादयः, वाग्जीवनाः कथकाः, कुशीलवाः नर्तकीप्रधानाः, प्लवकाः रज्ज्वारोहकाः, सौभिका 'ऐन्द्रजालिकाः छायाग्राहका इत्यपरे' इति स्वामी, चारणाः विटमल्लादयः, स्त्रीव्यवहारिणो बन्धकीकुटुम्बिनः। चारणानां स्त्रीव्यवहारिणामिति व्यस्तपाठोऽपि।

तेषामिति। तेषां, तूर्यं नटनर्तकादिमेलकम्, आगन्तुकं विदेशादागतं, पञ्चपणं प्रेक्षावेतनं स्वकलाप्रकाशनार्थं वेतनं, दद्याद् राज्ञे।

रूपाजीवा इति। गणिकाः, भोगद्वयगुणं दिवसद्वयलाभं, मासं मासद्वयं, दद्युः।

गीतवाद्येत्यादि। गीतादीनां कलान्तानां षोडशानां ज्ञानानि, गणिकाः

गणिकापुत्रान् रङ्गोपजीविनश्च मुख्यान् निष्पादयेयुः सर्वतालावचराणां च ।

संज्ञाभाषान्तरज्ञाश्च स्त्रियस्तेषामनात्मसु ।
चारघातप्रमादार्थं प्रयोज्या बन्धुवाहनाः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः,
आदितोऽष्टाचत्वारिंशः ॥

पूर्वोक्ताः, दासीरङ्गोपजीविनीश्च दासीर्गणिकातिरिक्तवेश्याः रङ्गोपजीविनीर्नटादिस्त्रियश्च, ग्राहयतः शिक्षयत आचार्यस्य, राजमण्डलाद् राज्ञो यन्मण्डलं नगरग्रामादिसमूहोत्थमायजातं तत्सकाशाद्, आजीवं वृत्तिं, कुर्यात् कल्पयेद् राजा । तत्र गीतवाद्ये प्रसिद्धे, पाठ्यमाख्यायिकादि, नृत्तं पदार्थाभिनयः, नाट्यं वाक्यार्थाभिनयः, अक्षरं लिपिः, चित्रम् आलेख्यकर्म, वीणा वेणुमृदङ्गाश्च प्रसिद्धाः, परचित्तज्ञानं परेङ्गिताकारवेदनं, गन्धमाल्यसंयूहनसम्पादने गन्धसंयूहनं गन्धयुक्तिः माल्यसम्पादनं माल्यगुम्फनं, संवाहनमङ्गमर्दनं, वैशिकं दत्तकाचार्यादितन्त्रं, कलाः उक्तातिरिक्ताश्चतुष्षष्ट्यन्तर्गताः कलाविद्याः ।

गणिकेत्यादि । गणिकापुत्रान् , रङ्गोपजीविनश्च, मुख्यान् निष्पादयेयुः प्रधानान् आचार्यादिस्थानीयान् कुर्युः । केषां, सर्वतालावचराणां च सर्वेषामपि रङ्गोपजीविनाम् ।

प्रान्ते श्लोकमाह—**संज्ञे**त्यादि । संज्ञाभाषान्तरज्ञाः सङ्केतविशेषज्ञाः भाषाविशेषज्ञाश्च, तेषां तालावचराणां, स्त्रियः, अनात्मसु अजितेन्द्रियेषु दूष्येषु, चारघातप्रमादार्थं चाराणां परप्रयुक्तगूढपुरुषाणां घातार्थं रहोविस्रम्भवधार्थं प्रमादार्थं च विषयासक्तिजननेन स्वकर्तव्योपेक्षोत्पादनार्थं च, प्रयोज्याः विधेयीकृत्य प्रयोक्तव्याः राज्ञा । विधेयत्वार्थमाह — **बन्धुवाहना** इति । बन्धुभिरर्थदानवशीकृतैर्वाह्यमाना यथाराजादेशं नीयमानाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
सप्तविंशोऽध्यायः गणिकाध्यक्षः,
आदितोऽष्टाचत्वारिंशः ॥

४५. प्रक. नावध्यक्षः ।

नावध्यक्षः समुद्रसंयाननदीमुखतरप्रचारान् देवसरोविसरोनदीतरांश्च स्थानीयादिष्ववेक्षेत ।

तद्वेलाकूलग्रामाः क्लृप्तं दद्युः ।

मत्स्यबन्धका नौकाभाटकं षड्भागं दद्युः । पत्तनानुवृत्तं शुल्कभागं वणिजो दद्युः । यात्रावेतनं राजनौभिः सम्पतन्तः । शङ्खमुक्ताग्राहिणो नौभाटकं दद्युः, स्वनौभिर्वा तरेयुः ।

अध्यक्षश्चैषां खन्यध्यक्षेण व्याख्यातः ।

नावध्यक्ष इति सूत्रम् । नावां यानपात्राणाम् अध्यक्ष आदेयभागाधिकृत इत्यर्थः । समाहर्तृकर्मण्यात्मरक्षितके च नावोऽभिहिताः । तदध्यक्षस्त्वनुक्त इहाभिधीयते ।

नावध्यक्ष इति । सः, समुद्रसंयाननदीमुखतरप्रचारान् समुद्रकूलसमीपयानस्य नदीसमुद्रसङ्गमतरणस्य च मार्गान्, देवसरोविसरोनदीतरांश्च देवसरः सदाजलसमृद्धं महासरः विसरः शोष्यसरः नदी प्रसिद्धा एषां तरणमार्गांश्च, स्थानीयादिषु स्थानीयद्रोणमुखखार्वटिकसंग्रहग्रामेषु, अवेक्षेत ।

तद्वेलेत्यादि । तद्वेलाकूलग्रामाः समुद्रतटमहासरःप्रभृतितीरवर्तिग्रामवासिनः, क्लृप्तं कल्पितं किमपि तरणार्थं राजादेयं, दद्युः नौव्यापारसततोपयोगात् । तदभावान्नान्ये जानपदास्तद् दद्युः ।

मत्स्येत्यादि । मत्स्यबन्धका दाशाः, नौकाभाटकं राजकीयाया नौकाया अवक्रयं, षड्भागं मत्स्यषष्ठभागं, दद्युः । पत्तनानुवृत्तं पण्यपत्तनासिद्धं, शुल्कभागं शुल्कार्थं भागं पण्यमूल्यस्य पञ्चमभागं षष्ठभागं वा, वणिजः, दद्युः । शुल्काध्यक्षग्राह्य एवायं शुल्कभाग इहोक्तः तदतिरिक्तप्रार्थना नावध्यक्षेण मा कारीत्येतदर्थम् । यात्रावेतनं, राजनौभिः, संपतन्तः गतागतं कुर्वन्तः, दद्युर्यथाप्रसिद्धम् । शङ्खमुक्ताग्राहिणः नौभाटकं दद्युः, विशेषाकथनाद् उक्तमत्स्यबन्धकवत् षड्भागम् । स्वनौभिर्वा तरेयुः । एषां स्वनौतरणाभ्यनुज्ञानान्मत्स्यबन्धानां स्वनौतरणप्रतिषेधो गम्यते । नौहाटकमित्यपपाठः । नौविभागकमिति तु व्याख्यापाठः ।

अध्यक्षश्चेति । नावध्यक्षश्च, एषां शङ्खादीनां विषये, खन्यध्यक्षेण व्याख्यातः खन्यध्यक्षवद् भाटकलब्धशङ्खादीनां कर्मान्तान् पण्यव्यवहारं च नावध्यक्षः कारयेदित्यर्थः ।

पत्तनाध्यक्षनिबन्धं पण्यपत्तनचारित्रं नावध्यक्षः पालयेत् ।

मूढवाताहतां तां पितेवानुगृह्णीयात् । उदकप्राप्तं पण्यमशुल्कमर्धशुल्कं वा कुर्यात् ।

यथानिर्दिष्टाश्चैताः पण्यपत्तनयात्राकालेषु प्रेषयेत् । संयान्तीर्नावः क्षेत्रानुगताः शुल्कं याचेत । हिंस्रिका निर्घातयेद्, अमित्रविषयातिगाः पण्यपत्तनचारित्रोपघातिकाश्च ।

शासकनियामकदात्ररश्मिग्राहकोत्सेचकाधिष्ठिताश्च महानावो हेमन्तग्रीष्मतार्यासु महानदीषु प्रयोजयेत् । क्षुद्रिकाः क्षुद्रिकासु वर्षास्राविणीषु ।

बद्धतीर्थाश्चैताः कार्याः राजद्विष्टकारिणां तरणभयात् ।

पत्तनेत्यादि । पत्तनाध्यक्षनिबन्धं पत्तनाध्यक्षप्रतिष्ठापितं, पण्यपत्तनचारित्रं पण्यपत्तनाचारं, नावध्यक्षः, पालयेत् नातिवर्तेत ।

मूढवाताहतामिति । मूढां दिङ्मोहापयातां वाताहतां विपरीतवाताकुलितां च, तां नावं, पितेव, अनुगृह्णीयात् तारयेत् । उदकप्राप्तं जलदूषितं, पण्यम्, अशुल्कम्, अर्धशुल्कं वा, कुर्यात् तच्छेदानुरूप्येण ।

यथानिर्दिष्टाश्चेति । अशुल्का अर्धशुल्का वा, एता नावः, पण्यपत्तनयात्राकालेषु, प्रेषयेद् असङ्गं विसृजेत् । संयान्तीर्गच्छन्तीः, नावः, क्षेत्रानुगताः शुल्कस्थानगताः, शुल्कं याचेत । इह शुल्कस्य याचनं न वक्तव्यं सिद्धत्वात्, तदिहोच्यते शुल्कतोऽधिकं मा याचीत्युपदेशार्थम् । हिंस्रिकाः हिंस्राश्चोरादयः तद्वतीः, नावः, निर्घातयेत् । अमित्रविषयातिगाः शत्रुदेशयायिनीः, पण्यपत्तनचारित्रोपघातिकाश्च नावः, निर्घातयेत् ।

शासकेत्यादि । शासकादिपञ्चकाधिष्ठिताश्च शासको निदेष्टा नियामकः पोतवाहः दात्रग्राहको लवित्रग्राही रश्मिग्राहकः प्रग्रहग्राही उत्सेचकः प्रविशज्जलापनेता एतैरपायप्रतिविधायिभिरध्यासिताश्च, महानावः, हेमन्तग्रीष्मतार्यासु अवर्षाकालेऽपि नौतरणीयासु, महानदीषु सिन्धुसरयूप्रभृतिषु, प्रयोजयेत् । क्षुद्रिकाः क्षुद्रनावः, क्षुद्रिकासु वर्षास्राविणीषु वर्षाकालमात्रतरणीयजलासु कुनदीषु, प्रयोजयेदिति वर्तते ।

बद्धेत्यादि । बद्धतीर्थाश्च बद्धाः संयताः सनियन्त्रणाः कृतारक्षा इति यावत् तीर्था अवतारा यासां तास्तथाभूताः, एताः नावः, कार्याः । कुतः, राजद्विष्टकारिणां शत्रुप्रयुक्ततीक्ष्णरसदादीनां, तरणभयात् ।

अकालेऽतीर्थे च तरतः पूर्वः साहसदण्डः । काले तीर्थे चानिसृष्टतारिणः पादोनसप्तविंशतिपणस्तरात्ययः ।

कैवर्तकाष्ठतृणभारपुष्पफलवाटषण्डगोपालकानामनत्ययः सम्भाव्यदूतानुपातिनां च सेनाभाण्डचारप्रयोगाणां च । स्वतरणैस्तरतां, बीजभक्तद्रव्योपस्करांश्चानूपग्रामाणां तारयताम् ।

ब्राह्मणप्रव्रजितबालवृद्धव्याधितशासनहरगर्भिण्यो नावध्यक्षमुद्राभिस्तरेयुः ।

कृतप्रवेशाः पारविषयिकाः सार्थप्रमाणा वा विशेयुः ।

परस्य भार्यां कन्यां वित्तं वापहरन्तं शङ्कितमाविग्नमुद्भाण्डीकृतं

नियन्त्रणविधिमाह — **अकाल** इति । अकाले निशीथादौ, अतीर्थे अघट्टे च, तरतः पूर्वः साहसदण्डः । काले, तीर्थे च, अनिसृष्टतारिणः अननुज्ञातस्य तरतः, पादोनसप्तविंशतिपणः, तरात्ययः तरणदण्डः ।

तरणदण्डापवादमाह — **कैवर्तेत्यादि** । कैवर्तादीनां कैवर्तानां धीवराणां काष्ठवाहिनां तृणवाहिनां पुष्पवाटपालकानां फलवाटपालकानां षण्डपालकानां गोपालकानां च, अनत्ययः अदण्डः । सम्भाव्यदूतानुपातिनां च सम्भाव्यम् अनुपतनीयतया शङ्कितं चोरादिमनुपततां दूतं राजदूतं कार्यशेषार्थमनुपततां च, अनत्यय इत्यनुषज्यते । सेनाभाण्डचारप्रयोगाणां च सेनोपकरणगूढपुरुषप्रयोगाणां च, अनत्ययः । स्वतरणैः स्वकीयैस्तरणसाधनैः बाहुलाबूभस्त्रादिभिः, तरतां, बीजभक्तद्रव्योपस्करांश्च बीजं वापार्थं भक्तं कर्मकराशनं द्रव्यं पुष्पफलशाकादि उपस्करः वेशवारः इत्येतांश्च, आनूपग्रामाणां जलप्रचुरदेशसन्निविष्टग्रामवासिनां, तारयताम्, अनत्ययः ।

आतरप्रदानेन नावध्यक्षमुद्रामात्रं गृहीत्वा ये तरणार्हा जनास्तानाह — **ब्राह्मणेत्यादि** । सुगमम् ।

कृतप्रवेशा इति । कृतप्रवेशा अभ्यनुज्ञातप्रवेशाः, पारविषयिकाः परदेशागताः, सार्थप्रमाणा वा अननुज्ञातप्रवेशत्वेऽपि अनुज्ञातसार्थाधिष्ठातृका वा, विशेयुः, नृपस्य देशम् ।

परस्येति । परस्य भार्यां कन्यां वित्तं वा अपहरन्तम्, उपग्राहयेत् शङ्कितत्वादिलिङ्गैर्वक्ष्यमाणैरनुमाय बन्धयेत् । तत्र शङ्कितं चकितचारिणम्,

महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं सद्योगृहीतलिङ्गिनम् अलिङ्गिनं वा प्रव्रजितमलक्ष्यव्याधितं भयविकारिणं गूढसारभाण्डशासनशस्त्राग्नियोगं विषहस्तं दीर्घपथिकममुद्रं चोपग्राहयेत् ।

क्षुद्रपशुर्मनुष्यश्च सभारो माषकं दद्यात् । शिरोभारः कायभारो गवाश्वं च द्वौ । उष्ट्रमहिषं चतुरः । पञ्च लघुयानम् । षड् गोलिङ्गम् । सप्त शकटम् । पण्यभारः पादम् ।

तेन भाण्डभारो व्याख्यातः । द्विगुणो महानदीषु तरः ।

क्लृप्तमानूपग्रामा भक्तवेतनं दद्युः ।

आविग्नं सम्भ्रान्तम् उद्भाण्डीकृतं समधिकभाण्डभारवाहिनं, **महाभाण्डेन मूर्ध्नि भारेणावच्छादयन्तं** बृहदाकृतिना पलालादिभारेण शिरसि कृतेनावृतप्रायमुखं, **सद्योगृहीतलिङ्गिनं प्रव्रजितं** तत्कालकलितपरिव्राजकचिह्नम्, **अलिङ्गिनं वा प्रव्रजितं** सद्यःपरित्यक्तपरिव्राजकचिह्नं वा, **अलक्ष्यव्याधितं** व्याधितव्यपदेशिनमदृष्टव्याधिचिह्नं, **भयविकारिणं** वदनश्वेतीभावादिभयाचिह्नयुक्तं, **गूढसारभाण्डशासनशस्त्राग्नियोगं** गूढसारभाण्डं गूढरत्नादिद्रव्यं गूढशासनं गूढलेखं गूढशस्त्रं गूढायुधं गूढाग्नियोगं गूढोऽग्नियोगः औपनिषदवक्ष्यमाणनिष्प्रतीकाराद्यग्नियोगद्रव्यं यस्य तं तथाभूतं च, **विषहस्तं, दीर्घपथिकं** दूराध्वगमनश्रान्तम् , **अमुद्रम्** अन्तपालमुद्रारहितं च, **उपग्राहयेत्** ।

तरवेतनविधिमाह— **क्षुद्रेत्यादि** । **क्षुद्रपशुः** अजादिः, **मनुष्यश्च सभारः** करगृहीतभारः, **माषकं दद्यात्** । **शिरोभारः** शिरोधार्यो भारः, **कायभारः** स्कन्धधार्यः, **गवाश्वं च** गौश्चाश्वश्च, **द्वौ** माषौ, दद्यादिति सम्बध्यते । **उष्ट्रमहिषम्** उष्ट्रश्च महिषश्च, **चतुरः** माषकान्, दद्यात् । **पञ्च लघुयानं** लघुगन्त्री **पञ्च** माषकान् दद्यात् । **षड् गोलिङ्गं** मध्यमगन्त्री षट् माषान्, दद्यात् । **सप्त शकटं** दद्यात् । **पण्यभारः** पण्यानां तुलाविंशतिः, **पादं** पणचतुर्भागं, दद्यात् ।

तेनेति । **तेन** पण्यभारवेतनकथनेन, **भाण्डभारो** महिषोष्ट्रादिवाह्यो, **व्याख्यातः** उक्तः, एकैकस्य भारस्यैकं माषकं दद्यादिति । त एत आतरा लघुनदीविषयाः । अत एवाह — **द्विगुणो महानदीषु तर इति** । **तरः** तरणवेतनम् ।

क्लृप्तमिति । **क्लृप्तं** यत्किञ्चिद् , **आनूपग्रामाः, भक्तवेतनं** राजभाव्यातिरिक्तं, **दद्युः** नाविकस्य ।

प्रत्यन्तेषु तराः शुल्कमातिवाहिकं वर्तनीं च गृह्णीयुः । निर्गच्छतश्चामुद्रस्य भाण्डं हरेयुः । अतिभारेणावेलायामतीर्थे तरतश्च ।

पुरुषोपकरणहीनायामसंस्कृतायां वा नावि विपन्नायां नावध्यक्षो नष्टं विनष्टं वाभ्यावहेत् ।

सप्ताहवृत्तामाषाढीं कार्त्तिकीं चान्तरा तरः ।
कार्मिकप्रत्ययं दद्यान्नित्यं चाह्निकमावहेत् ॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः नावध्यक्षः,
आदित एकोनपञ्चाशः ॥

प्रत्यन्तेष्विति । विषयसीमसु, तराः तारकाः, शुल्कम्, आतिवाहिकम् अतिवाहननिमित्तं राजभाव्यं, वर्तनीं च अन्तपालदेयं च, गृह्णीयुः सार्थात् । निर्गच्छतश्चामुद्रस्य सार्थस्य, भाण्डं हरेयुः । **अतिभारेणेति** । अतिभारेण पुरुषद्वयवहनीयेन भारेण युक्तस्य, अवेलायाम् अकाले, अतीर्थे अघट्टे, तरतश्च, भाण्डं हरेयुरिति वर्तते ।

पुरुषेत्यादि । पुरुषैः शासकनियामकादिभिः उपकरणैश्चारित्रसेचनादिभिर्हीनायाम्, असंस्कृतायाम् वा सीवनादिसंस्काररहितायां वा, नावि, विपन्नायां सत्यां, नावध्यक्षः, नष्टं जलप्रलीनं लवणजातीयं, विनष्टं जलयोगदूषितरूपादिकं वा, पण्यद्रव्यम्, अभ्यावहेद् दद्यात् ।

तरवेतनकालं श्लोकेनाह -- **सप्ताहेत्यादि** । सप्ताहः वृत्तो यस्या ऊर्ध्वं सा सप्ताहवृत्ता तादृशीम्, आषाढीम् आषाढपौर्णमासीं, कार्त्तिकीं कार्त्तिकपौर्णमासीं तथाविधाम्, अन्तरा आषाढबहुलसप्तम्याः कार्त्तिकबहुलसप्तम्याश्च मध्ये इत्यर्थः, तरः आतरः, ग्राह्य इति शेषः, निर्दिष्टस्य कालस्य वर्षात्वाद् वर्षातार्यासु नदीषु । सर्वर्तुतार्यासु तु नित्यं ग्राह्य इत्यर्थात् सिद्धम् । कार्मिकप्रत्ययम् अयमयं कर्मदिवस इति कर्मदिवसज्ञानं, दद्याद् नावध्यक्षाय । नित्यं च, आह्निकं दिने दिनेऽधिगतमातरम्, आवहेत् दद्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
अष्टाविंशोऽध्यायः नावध्यक्षः,
आदित एकोनपञ्चाशः ॥

४६. प्रक. गोध्यक्षः ।

गोध्यक्षो वेतनोपग्राहिकं करप्रतिकरं भग्नोत्सृष्टकं भागानुप्रविष्टकं व्रजपर्यग्रं नष्टं विनष्टं क्षीरघृतसञ्जातं चोपलभेत ।

गोपालकपिण्डारकदोहकमन्थकलुब्धकाः शतं शतं धेनूनां हिरण्यभृताः पालयेयुः । क्षीरघृतभृता हि वत्सानुपहन्युरिति वेतनोपग्राहिकम् ।

जरद्गुधेनुगर्भिणीपष्ठौहीवत्सतरीणां समविभागं रूपशतमेकः पालयेत् । घृतस्याष्टौ वारकान् पणिकं पुच्छम् अङ्कचर्म च वार्षिकं दद्यादिति करप्रतिकरः ।

गोध्यक्ष इति सूत्रम् । गवाम् उपलक्षणया महिषादीनां गोमहिषाद्याजीवानां चाध्यक्षो गोध्यक्षः तत्कर्माभिधीयत इत्यर्थः । स्वपक्षपरपक्षवशीकरणसाधनभूतासु वार्तापदार्थेषु कृषिपाशुपाल्यवणिज्यासु कृषिवणिज्ये सीताध्यक्षपण्याध्यक्षयोरुपपादिते । पाशुपाल्यं त्वनुक्तमिहाभिधीयत इति सङ्गतिः ।

गोध्यक्ष इति । गोध्यक्षः, वेतनोपग्राहिकादीन्यष्टौ, उपलभेत अध्यक्षयेत् ।

तानि क्रमशो व्याचष्टे — **गोपालके**त्यादि । गोपालकादयः पञ्च गोपालकः प्रसिद्धः पिण्डारको महिषपालः दोहकः क्षीरदोग्धा मन्थको दधिमथनकर्मा लुब्धको व्यालभयपरिहर्ता इत्येते, शतं शतं धेनूनां गवां, पालयेयुः । किंवेतनास्ते, हिरण्यभृताः हिरण्येन धनधान्यरूपेण वेतनेन भृताः पुष्टाः, न तु तदन्येन क्षीरेण घृतेन वेत्यर्थः । कुतः क्षीरघृतभृता न कर्तव्यास्तत्राह — **क्षीरघृतभृता ही**ति । तद्वेतना हि, वत्सान् स्तनन्धयान् , उपहन्युः क्षीरलोभनिमित्तादतिदोहनात् कर्शयेयुः । इति एतद्, वेतनोपग्राहिकं वेतनोपग्राहनिमित्तत्वात् तत्संज्ञम् ।

जरदित्यादि । जरद्गुर्जरद्गवी गोर्ह्रस्वत्वमार्षम् । धेनुर्दोग्ध्री गार्भिणी प्रसिद्धा पष्ठौही वृषगवेषिणी वत्सतरी अतीतस्तनन्धयभावा इत्येतासां पञ्चानां, समविभागं प्रत्येकं विंशतिक्रमेण तुल्यविभागयुक्तं, रूपशतं शतात्मकं जरद्गव्यादिभेदमेलकम् , एकः पालनवृत्तिः, पालयेत् । **घृतस्ये**ति । **घृतस्य, अष्टौ वारकान्** चतुरशीतिकुडुबान् , **पणिकं** पुच्छं पुच्छगणनया देयः **कर**ः

व्याधितान्यङ्गानन्यदोहीदुर्दोहापुत्रघ्नीनां च समविभागं रूपशतं पालयन्तस्तज्जातिकं भागं दद्युरिति भग्नोत्सृष्टकम् ।

परचक्राटवीभयादनुप्रविष्टानां पशूनां पालनधर्मेण दशभागं दद्युरिति भागानुप्रविष्टकम् ।

वत्सा वत्सतरा दम्या वहिनो वृषा उक्षाणश्च पुङ्गवाः । युगवाहनशकटवहा वृषभाः सूनामहिषाः पृष्ठस्कन्धवाहिनश्च महिषाः । वत्सिका वत्सतरी पष्ठौही गर्भिणी धेनुश्चाप्रजाता वन्ध्याश्च गावो महिष्यश्च । मासद्विमासजातास्तासामुपजा वत्सा वत्सिकाश्च । मासद्विमास-

---

पुच्छः तमेकैकस्य पशोरेकैकपणात्मकम्, अङ्कचर्म च राजमुद्रायुक्तं मृतचर्म च, वार्षिकं वर्षदेयं, दद्यात स्वामिने । इति करप्रतिकरः एष प्रकारः करप्रतिकरसंज्ञः ।

व्याधितेत्यादि । व्याधितादीनां पञ्चानां व्याधिता रुग्णा न्यङ्गा अङ्गविकला अनन्यदोही एकेनैव दोहनीया न त्वन्येन दोहनीया दुर्दोहा पादवन्धनादिकृच्छ्रदोह्या पुत्रघ्नी स्रवद्गर्भा म्रियमाणवत्सा च इत्येतासां च, समविभागं रूपशतं पूर्वोक्तप्रत्येकविंशतिप्रकारं, पालयन्तः, तज्जातिकं भागं पूर्वोक्तस्यार्धं त्रिभागं वा तदनुरूपं घृतादिराजभागं, दद्युः । इति भग्नोत्सृष्टकं तदाख्यम् ।

भागानुप्रविष्टकमाह — परचक्रेत्यादि । परचक्राटवीभयात् शत्रुच्छलनभयात् वनचरापहारभयाच्च, अनुप्रविष्टानां राजव्रजप्रवेशितानां, पशूनां, पालनधर्मेण पालनस्य सवेतनत्वनियमेन, दशभागं, दद्युः पशुस्वामिनो राज्ञे । इत्येतद्, भागानुप्रविष्टकं तदाख्यम् ।

व्रजपर्यग्रमाह — वत्सा इत्यादि । वत्साः स्तनन्धयाः, वत्सतराः परित्यक्तस्तनपानाः, दम्याः दमनयोग्याः, वहिनः वोढारः, वृषाः सेक्तारः, उक्षाणश्च जरद्गवाश्च, पुङ्गवाः इत्येते षड्विधाः पुमांसो गावः । युगवाहनशकटवहाः, वृषभाः सेक्तारः, सूनामहिषाः मांसमात्रोपयोगिनो महिषाः, पृष्ठस्कन्धवाहिनश्च, महिषाः इत्येते चतुर्विधा महिषाः । स्त्रीगवीनां महिषीणां च साधारणान् भेदानाह — वत्सिकेत्यादि । तत्र धेनुर्दोग्ध्री । अप्रजाता विजननार्हवयोऽनधिरूढा । वन्ध्या वशा । शेषाः प्रसिद्धाः । इत्थं सप्तविधा गावो

जातानङ्कयेत् । मासद्विमासपर्युषितमङ्कयेत् । अङ्कं चिह्नं वर्णं शृङ्गान्तरं च लक्षणम्, एवमुपजा निबन्धयेदिति व्रजपर्यग्रम् ।

चोरहृतमन्ययूथप्रविष्टमवलीनं वा नष्टम् ।

पङ्कविषमव्याधिजरातोयाहारावसन्नं वृक्षातटकाष्ठशिलाभिहतमीशानव्यालसर्पग्राहदावाग्निविपन्नं विनष्टम् । प्रमादादभ्यावहेयुः ।

एवं रूपाग्रं विद्यात् ।

स्वयं हन्ता घातयिता हर्ता हारयिता च वध्यः ।

महिष्यश्च । **मासेत्यादि** । मासद्विमासजाताः मासजाताः द्विमासजाताश्च, तासां गोमहिषीणां, वत्साः स्तनन्धयाः, वत्सिकाः स्तनन्धय्यश्च, उपजाः उपजासंज्ञिताः । तासु मासद्विमासजातान्, **अङ्कयेत्** तप्तमुद्रया योजयेत् । भागानुप्रविष्टकादिविषयमङ्कनमाह — **मासद्विमासपर्युषितमङ्कयेदिति** । ज्ञातस्वामिकस्याज्ञातस्वामिकस्य वा राजव्रजप्रविष्टस्यैकमासपरिवासे द्विमासपरिवासे वा जाते तमप्यङ्कयेद् गोध्यक्ष इत्यर्थः । चतुर्विधं लक्षणमाह — **अङ्कमिति** । अङ्कं स्वस्तिकादिसन्निवेशं तप्तमुद्राकृतं कृत्रिमं, चिह्नं पुच्छश्वेतिमकालिमादि सहजं, वर्णं शुक्लकृष्णादिं, शृङ्गान्तरं च शृङ्गगतं विशेषं च, लक्षणं, निबन्धयेत् पुस्तके लेखयेत् । एवम् अनेन प्रकारेण उक्तचतुर्लक्षणीयोगेन, उपजाः, निबन्धयेत् । इति एतत् सप्तदशविधं व्रजपर्यग्रं तदाख्यम् ।

त्रिविधं नष्टमाह — **चोरेत्यादि** । चोरहृतम्, अन्ययूथप्रविष्टम्, अवलीनं वा वने स्वयूथाद् भ्रष्टं वा, नष्टं नष्टाख्यम् ।

विनष्टमाह — **पङ्केत्यादि** । पङ्कादिभिः षड्भिः पङ्केन कर्दममज्जनेन विषमेण गर्तादिपतनेन व्याधिना रोगेण जरया वयोवृद्धतया तोयेन महारयजलप्रवाहाकृष्टया आहारेण इत्येतैरवसन्नं विपन्नं, वृक्षादिभिश्चतुर्भिः वृक्ष-[illegible]रभिहतम्, ईशानादिपञ्चकविपन्नम् ईशानेन विद्युज्ज्यो[illegible] हिं[illegible]वनवह्निभिश्च प्रणीतं विनष्टं तदाख्यं भवति । **प्रमादादिति** । पालकानवधानदोषाद्, विनष्टमिति वर्तते, अभ्यावहेयुः दद्युः, अर्थात् पालकादयः ।

एवमिति । उक्तेन प्रकारेण, रूपाग्रं गवादिप्रमाणं, विद्यात् ।

स्वयमेव गवादिहननहरणकर्तुस्तत्प्रयोजयितुश्च गोपालकस्य वधो दण्ड इत्याह — **स्वयं हन्तेत्यादि** ।

परपशूनां राजाङ्केन परिवर्तयिता रूपस्य पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानां चोरहृतं प्रत्यानीय पणिकं रूपं हरेत्। परदेशीयानां मोक्षयितार्धं हरेत्।

बालवृद्धव्याधितानां गोपालकाः प्रतिकुर्युः।

लुब्धकश्वगणिभिरपास्तस्तेनव्यालपरबाधभयमृतुविभक्तमरण्यं चारयेयुः।

सर्पव्यालत्रासनार्थं गोचरानुपातज्ञानार्थं च त्रस्नूनां घण्टातूर्यं च बध्नीयुः।

समव्यूढतीर्थमकर्दमग्राहमुदकमवतारयेयुः पालयेयुश्च।

परपशूनामिति। अराजपशूनां, राजाङ्केन रूपस्य परिवर्तयिता राजकीयाङ्कदानेन रूपभेदयिता, पूर्वं साहसदण्डं दद्यात्।

स्वदेशीयानामिति। तेषां, चोरहृतं, प्रत्यानीय प्रत्यर्प्य, पणिकं रूपं हरेत् रूपसंख्यानग्राह्यो दण्ड इह रूपमित्युच्यते एकैकस्य रूपस्यैकपणप्रमाणं रूपदण्डं गृह्णीयात्। परदेशीयानां परदेशपशूनामुपगतानां, मोक्षयिता तत्स्वामी, अर्धं हरेत् तन्मूल्यस्यार्धं गृह्णीयात्, अर्थादर्धं दण्डं दद्यात्।

बालवृद्धेत्यादि। सुगमम्।

लुब्धकश्वगणिभिरित्यादि। व्याधैः श्वगणपोषकैश्च, अपास्तस्तेनव्यालपरबाधभयं परिहृतचोरहिंस्रमृगशत्रूपद्रवभयम्, ऋतुविभक्तम् ऋतुविभक्तम् अस्मिन्नस्मिन् ऋताविदमिदं तृणजलादिसमृद्ध्या समुचितमिति विभज्य व्यवस्थितम्, अरण्यं, चारयेयुः।

सर्पेत्यादि। सर्पव्यालत्रासनार्थं सर्पव्यालानां भयजननार्थं, गोचरानुपातज्ञानार्थं देशममुकमनुसञ्चरन्ति गाव इति घण्टातूर्यशब्दतोऽनुमानार्थं च, त्रस्नूनां शब्दत्रासिनां पशूनामत्रासार्थपरिचेतव्यशब्दानां, घण्टातूर्यं लोहघण्टारूपं तूर्यं, बध्नीयुः, कण्ठे।

समेत्यादि। समव्यूढतीर्थम् अविषमविस्तीर्णावतारम्, अकर्दमग्राहम् अपङ्कनक्रम्, उदकम्, अवतारयेयुः स्नानपानार्थं, पालयेयुश्च यावत्स्नानपानकालमप्रमत्ता जलजन्यभयाद् रक्षेयुश्च पशुयूथम्।

स्तेनव्यालसर्पग्राहगृहीतं व्याधिजरावसन्नं च आवेदयेयुरन्यथा रूपमूल्यं भजेरन् ।

कारणमृतस्याङ्कचर्म गोमहिषस्य, कर्णलक्षणमजाविकानां, पुच्छमङ्कचर्म चाश्वखरोष्ट्राणां, वालचर्मबस्तिपित्तस्नायुदन्तखुरशृङ्गास्थीनि चाहरेयुः ।

मांसमाममार्द्रं शुष्कं वा विक्रीणीयुः ।

उदश्वित् श्ववराहेभ्यो दद्युः ।

कूर्चिकां सेनाभक्तार्थमाहरेयुः ।

किलाटो घाणपिण्याकक्लेदार्थः ।

पशुविक्रेता पादिकं रूपं दद्यात् ।

वर्षाशरद्धेमन्तानुभयतः कालं दुह्युः । शिशिरवसन्तग्रीष्मानेककालम् ।

चोराद्यपहृतं रोगवार्धकप्रमीतं पशुमध्यक्षाय काले निवेदयेयुरनिवेदने मूल्यमेकैकस्य रूपस्य दद्युरित्याह—**स्तेने**त्यादि ।

कारणेत्यादि । कारणमृतस्य व्याधिजरादिमृतस्य, **अङ्कचर्म** अङ्कयुक्तं चर्म, गोमहिषस्य, आहरेयुः आहृत्य दर्शयेयुः प्रत्ययार्थम् । **कर्णलक्षणं** कर्णकृतं चिह्नम्, अजाविकानां बस्तोरभ्राणाम्, आहरेयुः । **पुच्छम् अङ्कचर्म** च अश्वखरोष्ट्राणाम्, आहरेयुः । वालादीनि च नव, आहरेयुः कुप्यार्थम् । तत्र बस्तिर्मूत्राशयः, पित्तं मायुः, स्नायुः स्नावः । शेषं प्रसिद्धम् ।

मांसमिति । मांसम्, आमम् अपक्वम्, आर्द्रं, शुष्कं वा, विक्रीणीयुः ।

उदश्विदिति । उदश्वित् तक्रं, श्ववराहेभ्यो, दद्युः पोषणार्थम् ।

कूर्चिकामिति । तक्रयुक्तक्षीरविकृतिं, शुष्कघनीकृततक्रविकारमिति स्वामी । सेनाभक्तार्थम्, आहरेयुः ।

किलाट इति । किलाटः क्षीरविकृतिः, घाणपिण्याकक्लेदार्थः किञ्चित्सावशेषतैलः पिण्याको घाणपिण्याकः तस्य गोमहिषादिभक्ष्यस्य क्लेदार्थः क्लेदनरूपे संस्कारे विनियोक्तव्यः ।

पशुविक्रेतेति । सः, पादिकं रूपम् एकैकस्य रूपस्य विक्रीयमाणस्य पादपणं, दद्यात्, अध्यक्षाय ।

वर्षेत्यादि । वर्षाशरद्धेमन्तान् ऋतून्, उभयतःकालं सायं प्रातश्च, दुह्युः, गोमहिषीः । शिशिरवसन्तग्रीष्मान्, एककालं रात्रावेव, दुह्युः ।

द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्डः । दोहकालमतिक्रामतस्तत्फलहानं दण्डः ।

एतेन नस्यदम्ययुगपिङ्गनवर्तनकाला व्याख्याताः ।

क्षीरद्रोणे गवां घृतप्रस्थः । पञ्चभागाधिको महिषीणाम् । द्विभागाधिकोऽजावीनाम् । मन्थो वा सर्वेषां प्रमाणं, भूमितृणोदकविशेषाद्धि क्षीरघृतवृद्धिर्भवति ।

यूथवृषं वृषेणावपातयतः पूर्वः साहसदण्डः, घातयत उत्तमः ।

वर्णावरोधेन दशतीरक्षा ।

द्वितीयेत्यादि । द्वितीयकालदोग्धुरङ्गुष्ठच्छेदो दण्ड इति अयं च कालनियमो देशव्यवस्थया द्रष्टव्यः, क्वचिद् देशे ग्रीष्मेऽपि त्रिकालदोहदर्शनादित्याह स्वामी । **दोहकाल**मिति । तं प्रातः सायं च यथोक्तम्, अतिक्रामतः, तत्फलहानं तद्दिवसवेतनहानिः, दण्डः ।

एतेनेति । दोहकालातिपातनेन, नस्यदम्ययुगपिङ्गनवर्तनकालाः नस्यकालो नासावेधनकालः दम्यकालो दमनार्हकालः युगपिङ्गनकालः अदान्तस्य दान्तेन सह युगे योजनकालः वर्तनकालो मेथिबन्धनप्रचारणकालः इत्येते, व्याख्याताः तानप्यतिक्रामतस्तत्फलहानं दण्ड इत्यर्थः ।

क्षीरेत्यादि । क्षीरद्रोणे, गवां घृतप्रस्थः प्रस्थमितं घृतं जायते । पञ्चभागाधिकः प्रस्थपञ्चमभागयुक्तो घृतप्रस्थः, महिषीणां, क्षीरद्रोणे भवति । द्विभागाधिकः अर्धकुडुबाधिको घृतप्रस्थः, अजावीनां, क्षीरद्रोणे भवति । इदं च घृतप्रमाणं प्रायिकम् । अत एवाह —**मन्थो वे**ति । मथनमेव, सर्वेषां घृतपरिमाणानां, प्रमाणं निश्चायकम् । तत्र हेतुकथनं—**भूमितृणोदकविशेषाद्धी**त्यादिना । क्षीरघृतवृद्धिः क्षीरघृतयोर्वृद्धिः क्षीरे घृतस्य वृद्धिर्वा ।

यूथेत्यादि । यूथवृषं सेक्तारं, वृषेण तथाविधेन सह, अवपातयतः योधयतः, पूर्वः साहसदण्डः । घातयतः उत्तमः साहसदण्डः ।

वर्णेत्यादि । वर्णावरोधेन दशतीरक्षा वर्णनियमेन दशकवर्गाणां रक्षा शुक्लवर्ण एको दशकवर्गः लोहितवर्णोऽन्य इत्येवं नियतैकैकवर्णयोगिनां दशानां दशतां रक्षणं, कर्तव्यम् । दशतीशब्दस्य स्त्रीत्वमत एव पाठात् कल्प्यं, दशतामिति वा पाठः ।

उपनिवेशदिग्विभागो गोप्रचाराद् बलान्वयतो वा गवां रक्षासामर्थ्याच्च

अजादीनां षाण्मासिकीमूर्णां ग्राहयेत् ।

तेनाश्वखरोष्ट्रवराहव्रजा व्याख्याताः ।

बलीवर्दानां नस्याश्वभद्रगतिवाहिनां यवसस्यार्धभारः, तृणस्य द्विगुणं, तुला घाणपिण्याकस्य, दशाढकं कणकुण्डकस्य, पञ्चपलिकं मुखलवणं, तैलकुडुबो नस्यं, प्रस्थः पानम् । मांसतुला, दध्नश्चाढकं, यवद्रोणं, माषाणां वा पुलाकः । क्षीरद्रोणमर्धाढकं वा सुरायाः, स्नेहप्रस्थः, क्षारदशपलं शृङ्गिबेरपलं च प्रतिपानम् ।

उपनिवेशेत्यादि । उपनिवेशदिग्विभागः गवाद्युपनिवेशदिग्व्यवस्था, गोप्रचाराद् गोप्रचारदेशमनुसृत्य, बलान्वयतो वा गवां गोबलयोगमनुसृत्य च, रक्षासामर्थ्याच्च चोरादिभयरहितत्वनिमित्तकं रक्षणसौकर्यमनुसृत्य च, भवति ।

अजादीनामिति । अजाविप्रभृतीनां, षाण्मासिकीं षण्मासप्रवृद्धाम्, ऊर्णां, ग्राहयेत् ।

तेनेति । उक्तेन गवादिकल्पेन, अश्वखरोष्ट्रवराहव्रजाः, व्याख्याताः वेतनोपग्राहिकादिनियमादिषु तेष्वपि यथासम्भवं योज्यानीत्यर्थः ।

अशनादि[illegible]—बलीवर्दानामिति । तेषां मध्ये, नस्याश्वभद्रगतिवाहिनां नस्यानां [illegible]नाम् अश्वभद्रगतिवाहिनां च अश्वास्तेजस्सत्त्वयुक्ता अश्वभद्राः [illegible]हिनां रथव्यायोगार्हाणां गवां, यवसस्य घासस्य, अर्धभारः दश तुलाः, अशनं भवतीति शेषः । तृणस्य सामान्यस्य, द्विगुणं विंशतितुलाः । तुला घाणपिण्याकस्य । दशाढकं चत्वारिंशत् प्रस्थाः कणकुण्डकस्य सूक्ष्मतण्डुलांशयुक्तस्य तण्डुलमलस्य । पञ्चपलिकं, मुखलवणं सिन्धूद्भवं लवणम् । तैलकुडुबो नस्यं कुडुबमितं तैलं नासापुटनिषेच्यमौषधम् । प्रस्थः प्रस्थपरिमाणं तैलं घृतं वा, पानम् । मांसतुला शतपलप्रमाणं मांसम् । दध्नश्चाढकम् । यवद्रोणं यवानां द्रोणं, माषाणां वा पुलाकः अर्धपक्वः सिक्थो वा, द्रोणपरिमाणः । यवमाषपुलाकयोश्चायं विकल्पः । क्षीरद्रोणमिति । द्रोणमितं क्षीरम् , अर्धाढकं वा सुरायाः क्षीराभावे अर्धाढकमिता सुरा । स्नेहप्रस्थः तैलघृतान्यतरस्य प्रस्थः, क्षारदशपलं गुडपलदशकं, शृङ्गिबेरपलं शुण्ठ्याः पलं च, इत्येतच्चतुष्टयं मिलितं, प्रतिपानम् अग्निदीपनार्थं पानं, भवति ।

पादोनमश्वतरगोखराणां, द्विगुणं महिषोष्ट्राणां कर्मकरबलीवर्दानाम् । पायनार्थं च धेनूनाम् । कर्मकालतः फलतश्च विधानम् । सर्वेषां तृणोदकप्राकाम्यम् । इति गोमण्डलं व्याख्यातम् ।

पञ्चर्षभं खराश्वानामजावीनां दशर्षभम् ।
शत्यं गोमहिषोष्ट्राणां यूथं कुर्याच्चतुर्वृषम् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः,
आदितः पञ्चाशः ॥

पादोनमिति । पादन्यूनं पूर्वोक्तं भद्रगतिबलीवर्दविधानमेव, अश्वतरगोखराणां वेसरपुङ्गवान्तरगर्दभानां, भवति । **द्विगुणमिति** । द्विगुणं भद्रगत्युक्तद्विगुणं महिषोष्ट्राणां, कर्मकरबलीवर्दानां शकटाद्युपयोगिनां पुङ्गवानां च । **पायनार्थं च धेनूनामिति** । पायनप्रयोजनकं भद्र विधानमुक्तं तच्च चकाराद् भक्षणार्थं च, द्विगुणमिति वर्तते । कर्मकरबलीवर्दविषये धेनुविषये च विधानद्वैगुण्यवचनेनाप्यपरितुष्यन् विधानमारमुपदिशति — **कर्मकालतः फलतश्च विधानमिति** । कर्मकालपरिमाणाद्यनुसारेण कर्मकरबलीवर्दानां दुग्धबाहुल्यादिफलप्राप्त्यनुसारेण च धेनूनामशनपानविधानं द्विगुणं ततोऽप्यधिकं वा निश्चेतव्यमित्यभिप्रायः । **सर्वेषामिति** । सर्वपशूनां, तृणोदकप्राकाम्यं तृणस्य उदकस्य च प्राकाम्यं पर्याप्तत्वं, कार्यम् । तृणोदकं प्रकाम्यमिति पाठे तृणं च उदकं च प्रकर्षेण काम्यं दुग्धवृद्ध्यनुरूपमपेक्षणीयं, यद्वा कामः पश्वभिलाषस्तत्पूरणानुरूपमित्यर्थः । इति गोमण्डलं तत्सम्बद्धं विधाजातं, व्याख्यातं वितत्य प्रतिपादितम् ।

यूथकल्पनां श्लोकेनाह — **पञ्चर्षभमिति** । शत्यं व्यक्तिशतप्रमाणं, यूथं, खराश्वानां, पञ्चर्षभं पञ्च ऋषभाः सेक्तारो यस्मिंस्तत् तथाभूतं, कुर्यात् । अजावीनां, यूथं, दशर्षभं दशसेक्त्रधिष्ठितं, कुर्यात् । गोमहिषोष्ट्राणां, यूथं, चतुर्वृषं सेक्तृचतुष्टयाधिष्ठितं, कुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
एकोनत्रिंशोऽध्यायः गोध्यक्षः,
आदितः पञ्चाशः ॥

४७. प्रक. अश्वाध्यक्षः ।

अश्वाध्यक्षः पण्यागारिकं क्रयोपागतमाहवलब्धमाजातं साहाय्यागतकं पणस्थितं यावत्कालिकं वाश्वपर्यग्रं कुलवयोवर्णचिह्नकर्मवर्गागमैर्लेखयेत् ।

अप्रशस्तन्यङ्गव्याधितांश्चावेदयेत् ।

कोशकोष्ठागाराभ्यां च गृहीत्वा मासलाभमश्ववाहश्चिन्तयेत् ।

अश्वविभवेनायतामश्वायामद्विगुणविस्तारां चतुर्द्वारोपावर्तनमध्यां

अश्वाध्यक्ष इति सूत्रम् । अश्वाध्यक्षः सर्वाश्वनायकः अर्थात् तद्व्यापारोऽभिधीयत इति सूत्रार्थः । स्वाम्यादिप्रकृत्यभिधानानन्तरं दण्डप्रकृतिं प्राप्तावसरां वक्तुमुपक्रमः । तत्राश्वानां प्राधान्यात् प्रथमं तदध्यक्षाभिधानम् ।

अश्वाध्यक्ष इत्यादि । अश्वपतिः, पण्यागारिकं प्राभृतोपनीतं पण्यागारगतं, क्रयोपागतं क्रीतम्, आहवलब्धं युद्धाहृतम्, आजातं निजाश्वोत्पन्नं, साहाय्यागतकं साहाय्यदानेन लब्धं, पणस्थितम् आधित्वेन स्थितं, यावत्कालिकं यावान् प्रयोजनकालस्तावते कालायान्यस्मादानीतं, वाशब्दश्चार्थे, इत्थं सप्तप्रकारम्, अश्वपर्यग्रम् अश्वानां प्रमाणं, कुलवयोवर्णचिह्नकर्मवर्गागमैः कुलेन पारसीककाम्बोजारट्टवनायुप्रभृतिना वयसा द्विवर्षत्रिवर्षचतुर्वर्षादिना वर्णेन शुक्लकृष्णादिना चिह्नेन धवलवालफालप्रोथादिना कर्मणा सान्नाय्यादिना वर्गेण पारसीकादिभिरियद्भिरियानयं वर्ग इति वर्गीकरणेन आगमेन प्राप्तिस्थानेन च, इत्येवं सप्तभिर्विशेषैर्युक्तं, लेखयेत् ।

अप्रशस्तेत्यादि । अप्रशस्तान् शृङ्गस्थानमांसबुद्बुदत्वान्यप्रभैकाङ्घ्रित्वादिदोषयुक्तान् न्यङ्गान् अङ्गविकलान् व्याधितांश्च, आवेदयेत्, यथाकालं परिवर्तनार्थं चिकित्सार्थं च ।

कोशकोष्ठागाराभ्यां चेति । कोशात् कोष्ठागाराच्च, गृहीत्वा मासलाभं मासपरिव्ययक्लृप्तं हिरण्यमश्वभोज्यं चादाय, अश्ववाहः, चिन्तयेत् तत्कार्यम् ।

शालाविधिमाह — अश्वविभवेनेति । अश्वविभवेनायताम् अश्वपर्यग्रानुरूप्येण दीर्घाम्, अश्वायामाद्द्विगुणविस्ताराम् अश्वायाममनुपदं वक्ष्यति, तद्द्विगुणविस्तारां, चतुर्द्वारोपावर्तनमध्यां चतुर्द्वारं सुखप्रवेशनिर्गमार्थमग्न्यादि-

सप्रग्रीवां प्रद्वारासनफलकयुक्तां वानरमयूरपृषतनकुलचकोरशुकशारिकाभिराकीर्णां शालां निवेशयेत्।

अश्वायामचतुरश्रश्लक्ष्णफलकास्तारं सखादनकोष्ठकं समूत्रपुरीषोत्सर्गमेकैकशः प्राङ्मुखमुदङ्मुखं वा स्थानं निवेशयेत्। शालावशेन वा दिग्विभागं कल्पयेत्। बडवावृषकिशोराणाम् एकान्तेषु।

बडवायाः प्रजातायास्त्रिरात्रं घृतप्रस्थपानम्, अत ऊर्ध्वं सक्तुप्रस्थः स्नेहभैषज्यप्रतिपानं दशरात्रं, ततः पुलाको यवसमार्तवश्चाहारः।

भये निष्क्रमणद्वाराणां सर्वतः सौलभ्यार्थं च परिकल्पितद्वारचतुष्टयम् उपावर्तनं प्रलुठनस्थानं मध्ये यस्यास्तां तथाभूतां, सप्रग्रीवां प्रग्रीवेण मुखप्रासादेन सहितां, प्रद्वारासनफलकयुक्तां प्रद्वाराभ्यां द्वारोभयपार्श्वगताभ्याम् आसनफलकाभ्यां युक्तां, वानरमयूरादिभिः सत्तभिर्विषप्रतीकारप्रयोजनाभिराकीर्णां, शालां मन्दुरां, निवेशयेत् निर्मापयेत्।

अश्वायामेत्यादि। अश्वायामचतुरश्रश्लक्ष्णफलकास्तारम् अश्वदैर्घ्यानुगुण्येन चतुरश्रनिर्मितं श्लक्ष्णं च फलकम् आस्तार आस्तरणं यस्मिंस्तत् तथाभूतं, सखादनकोष्ठकं खादनकोष्ठैर्यवसादिविकरणाधारभूतैस्तद्रक्षणकोष्ठैः सहितं, समूत्रपुरीषोत्सर्गं मूत्रपुरीषानवरोधसंविधानसहितम् अर्थात् किञ्चिदग्रतः समुन्नतम्, एकैकशः प्रत्यश्वं, प्राङ्मुखम् उदङ्मुखं वा स्थानं निवेशयेत। **शालावशेन वा दिग्विभागं कल्पयेदिति।** राजभवनस्य य उत्तरपूर्वो दिग्विभागोऽश्वशालार्थ उक्तः 'उत्तरपूर्वं भागं कोशो गवाश्वं च' इति, स चेदश्वानां बाहुल्यादपर्याप्तः, तदा निर्मातव्यशालामहत्त्वानुगुण्येन दिग्विभागोऽन्यः स्वीकरणीय इत्यर्थः। **बडवेत्यादि।** बडवानां प्रसविनीनां वृषाणां सेक्तॄणां **किशोराणां** षण्मासादूर्ध्वम् आ त्रिवर्षात् किशोराः तेषां च, **एकान्तेषु** तदन्याश्वानां तेषां चान्योन्यदृष्टयगोचरेषु स्थलेषु, स्थानं कल्पयेदिति वर्तते।

बडवाया इति। तस्याः, प्रजातायाः प्रसूतायाः, त्रिरात्रं, घृतप्रस्थपानं प्रथमदिवसादूर्ध्वं प्रातः प्रातरिति स्वामी। **अत ऊर्ध्वं**, सक्तुप्रस्थः अपराह्णभोजनं, **तदनन्तरं स्नेहभैषज्यप्रतिपानं** स्नेहयुक्तमूलकाथादिप्रतिपानं, **दशरात्रम्। तत इति।** तदनन्तरं, पुलाकः अर्धसिद्धयवादिः, यवसं घासः, आर्तवश्चाहारः ऋतुयोग्यश्चाहारः सस्यलक्षणः।

दशरात्रादूर्ध्वं किशोरस्य घृतचतुर्भागः सक्तुकुडुबः, क्षीरप्रस्थश्चाहार आ षण्मासादिति। ततः परं मासोत्तरमर्धवृद्धिर्यवप्रस्थ आ त्रिवर्षाद्, द्रोण आ चतुर्वर्षादिति। अत ऊर्ध्वं चतुर्वर्षः पञ्चवर्षो वा कर्मण्यः पूर्णप्रमाणः।

द्वात्रिंशदङ्गुलं मुखमुत्तमाश्वस्य, पञ्च मुखान्यायामः, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः। त्र्यङ्गुलावरं मध्यमावरयोः। शताङ्गुलः परिणाहः। पञ्चभागावरं मध्यमावरयोः।

उत्तमाश्वस्य द्विद्रोणं शालिव्रीहियवप्रियङ्गूणामर्धशुष्कमर्धसिद्धं वा, मुद्गमाषाणां वा पुलाकः। स्नेहप्रस्थश्च। पञ्चपलं लवणस्य। मांसं

दशरात्रादिति। दशरात्रादूर्ध्वं, किशोरस्य, घृतचतुर्भागः पादकुडुबघृतयुक्तः सक्तुकुडुबः, क्षीरप्रस्थश्च, आहारः। आ षण्मासादिति। आमासषट्कम् एवं कर्तव्यम्। ततः परमिति। षण्मासादूर्ध्वं, मासोत्तरमर्धवृद्धिः प्रतिमासं वर्धमानार्धप्रस्थः, यवप्रस्थः। आ कुतोऽयं यवप्रस्थो वर्धेत इत्याह — आ त्रिवर्षादिति। द्रोण इति। यवद्रोणः त्रिवर्षादूर्ध्वम्, आ चतुर्वर्षाद्, आहारः। अत ऊर्ध्वं, चतुर्वर्षः, पञ्चवर्षो वा अश्वः, कर्मण्यः सान्नाह्यादिकर्मार्हः, पूर्णप्रमाणः पूर्णं प्रमाणं वक्ष्यमाणं यस्य स तथाभूतो भवति।

तदेव प्रमाणं व्याचष्टे—द्वात्रिंशदित्यादि। उत्तमाश्वस्य, द्वात्रिंशदङ्गुलं मुखं, पञ्च मुखानि आयामः षष्ट्यधिकशताङ्गुलं दैर्घ्यं, विंशत्यङ्गुला जङ्घा, चतुर्जङ्घ उत्सेधः अशीत्यङ्गुलमौन्नत्यम्। त्र्यङ्गुलावरं मध्यमावरयोः यदुक्तमुत्तमस्य मुखादिप्रमाणं तद् मध्यमस्य त्र्यङ्गुलावरं त्र्यङ्गुलन्यूनम् अवरस्य अधमस्य ततोऽपि त्र्यङ्गुलन्यूनम्। टीकाभाषयोः द्व्यङ्गुलावरमिति पाठ उपात्तः। अथ परिणाहस्य प्रमाणमाह—शताङ्गुल इति। अङ्गुलशतप्रमाणः, परिणाहः परिक्षेपः, अर्थादुत्तमाश्वस्य। पञ्चभागावरं मध्यमावरयोः उत्तमाश्वपरिणाहप्रमाणात् पञ्चभागन्यूनम् अर्थादशीत्यङ्गुलं मध्यमाश्वस्य षष्ट्यङ्गुलमवराश्वस्य परिणाहप्रमाणम्।

आहारविधानमाह — उत्तमाश्वस्येति। तस्य, द्विद्रोणं शालिव्रीहियवप्रियङ्गूणां शाल्याद्यन्यतमस्य द्रोणद्वयम्, अर्धशुष्कम् अर्धसिद्धं वा, भोजनामिति शेषः। मुद्गमाषाणां वा, पुलाकः भक्तसिक्थकः, उक्तपरिमाणः। स्नेहप्रस्थश्च घृतस्य तैलस्य वा प्रस्थश्च पानार्थः। पञ्चपलं लवणस्य। मांसं,

पञ्चाशत्पलिकम् । रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थम् । क्षारपञ्चपलिकः सुरायाः प्रस्थः पयसो वा द्विगुणः प्रतिपानम् । दीर्घपथभारक्लान्तानां च खादनार्थं स्नेहप्रस्थोऽनुवासनम् । कुडुबो नस्यकर्मणः । यवसस्यार्धभारः, तृणस्य द्विगुणः, षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा ।

पादावरमेतन्मध्यमावरयोः । उत्तमसमो रथ्यो वृषश्च मध्यमः । मध्यमसमश्चावरः । पादहीनं बडबानां पारशमानां च । अतोऽर्धं किशोराणां च । इति विधायोगः ।

पञ्चाशत्पलिकं पञ्चाशत्पलप्रमाणम् । रसस्य मांससंस्कृतस्य, आढकं, द्विगुणं वा दध्नः दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपुलाकक्लेदनार्थम् । **क्षारपञ्चपलिकः** गुलादिपञ्चपलयुक्तः सुरायाः प्रस्थः, पयसो वा, द्विगुणः प्रस्थद्वयं, **प्रतिपानम्** अपराह्णदेयम् । दीर्घपथभारक्लान्तानां च दीर्घाध्वलङ्घनभारवहनपरिश्रान्तानां च, खादनार्थम् अग्निदीपनद्वारेण सम्यगाहारग्रहणार्थं, स्नेहप्रस्थः, अनुवासनम् अनुवासनाख्यवस्तिचिकित्सादानं, भवति । यदुक्तं —

"वस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परः ।
यः स्नेहैर्दीयते स स्यादनुवासननामकः ॥
कषायक्षीरतैलैर्यो निरूहः स निगद्यते ।"

इति । **कुडुबः** स्नेहस्य प्रस्थचतुर्भागः, नस्यकर्मणः नासिकासेचनस्य । **यवसस्य** हरितसस्यादेः, अर्धभारः दश तुलाः । तृणस्य शुष्कस्य, द्विगुणः विंशतितुलाः, यवसाभावे । षडरत्निपरिक्षेपः पुञ्जीलग्रहो वा हस्तषट्कपरिणाहः **पुञ्जीलानां तृणस्तम्बानां** ग्रहो वा अर्थाद् भुजद्वयालिङ्गनग्राह्यस्तृणस्तम्बसङ्घातो वा ।

पादावरमेतन्मध्यमावरयोरिति । उत्तमस्याश्वस्योक्तं द्विद्रोणादिकं **सर्वं चतुर्भागन्यूनं** मध्यमस्य ततोऽपि चतुर्भागन्यूनमधमस्य । **उत्तमसम** इति । **उत्तमाश्वविधासमानविधः, रथ्यो वृषश्च** मध्यमः रथवाही मध्यमाश्वः सेक्ता **च मध्यमाश्वः** । मध्यमसमश्चावरः अधमाश्वो रथवाही अधमाश्वः सेक्ता च **मध्यमाश्वविधासमानविधः** । पादहीनं चतुर्भागहीनम् अर्थात् त्रिविधमपि **विधाविधानं, बडबानां,** पारशमानां च अश्वतराणां च । **इह** पारशमानामिति

विधापाचकसूत्रग्राहकचिकित्सकाः प्रतिस्वादभाजः।

युद्धव्याधिजराकर्मक्षीणाः पिण्डगोचरिकाः स्युः । असमरप्रयोग्याः पौरजानपदानामर्थेन वृषा बडवास्वायोज्याः।

प्रयोग्यानामुत्तमाः काम्बोजकसैन्धवारट्टजवानायुजाः। मध्यमा बाह्लीकपापेयकसौवीरकतैतलाः। शेषाः प्रत्यवराः।

तेषां तीक्ष्णभद्रमन्दवशेन सान्नाह्यमौपवाह्यकं वा कर्म प्रयोजयेत्।

चतुरश्रं कर्माश्वस्य सान्नाह्यम् ।

माकारयुक्तपाठलेखनं कोशेषु चिन्त्यम् । पारशवानामिति तु वाकारयुक्तं पठितव्यं, तदा हि पारशवशब्दः सङ्करजातिमनुष्यवचनः सङ्करजेऽश्वे वेगसराख्ये भक्त्या प्रयुक्त इति शक्यते वक्तुम् । अतोऽर्धं बडबाविधाया अर्धं, किशोराणां च । इति एवं, विधायोगः उक्तः ।

विधापाचकसूत्रग्राहकचिकित्सका इति। अश्वाहारपक्तारोऽश्वपरिचारका अश्ववैद्याश्च, प्रतिस्वादभाजः विधाभागिनः, अतो विधायास्तद्भुजनीया मात्रापि अश्वभोज्यमात्राभिः सह संविधेयेत्यभिप्रायः ।

युद्धव्याधिजराकर्मक्षीणा इति । युद्धादित्रयक्षीणाः सान्नाह्यादिकर्मक्षीणाश्च, पिण्डगोचरिकाः अप्रशस्तः पिण्डः कुक्षिपूरणमात्रार्थं आहारो गोचर एषामिति तथाभूताः, स्युः। **असमरप्रयोग्या** इति। युद्धानर्हाः, पौरजानपदानाम्, अर्थेन प्रसूतिरूपप्रयोजनेन, वृषाः सेक्तारो भवन्तः, बडवासु आयोज्याः ।

प्रयोग्यानामिति । प्रगतचर्याशिक्षाणां युद्धयोग्यानामश्वानां मध्ये, उत्तमाः, काम्बोजकादयः कम्बोजादिदेशचतुष्टयोत्पन्नाः । मध्यमा बाह्लीकादिदेशचतुष्टयोत्पन्नाः शेषाः उक्तेतरसौराष्ट्रादिदेशभवाः, प्रत्यवराः अधमाः।

अश्वानां द्विविधं कर्माह—**तेषामिति**। उत्तमादीनां, तीक्ष्णभद्रमन्दवशेन तीक्ष्णोऽतिमात्रतेजस्सत्त्वः आघातलेशस्याप्यसोढा भद्रस्तेजस्सत्त्वयुक्तः आघातसत्त्वानुरूपचेष्टो मन्दो निस्तेजस्सत्त्वो महाघातोत्पादनीयकर्मप्रतिपत्तिः त्रिविधैतत्स्वभावानुगुण्येन, सान्नाह्यं साङ्ग्रामिकम्, औपवाह्यकं वा क्रीडायात्राध्वयानादिप्रयोजनकं वा, कर्म, प्रयोजयेत् ।

चतुरश्रमिति । चतुरश्रं सौष्ठवयुक्तं, कर्म शालिहोत्रादिप्रपाञ्चितविशेषं साङ्ग्रामिककर्म, सान्नाह्यं, भवति ।

वल्गनो नीचैर्गतो लङ्घनो धोरणो नारोह्यश्चौपवाह्याः ।

तत्रौपवेणुको वर्धमानको यमक आलीढप्लुतः (पृथ? पूर्व)गस्त्रि-कचाली च वल्गनः ।

स एव शिरःकर्णविशुद्धो नीचैर्गतः, षोडशमार्गो वा । प्रकीर्णकः प्रकीर्णोत्तरो निषण्णः पार्श्वानुवृत्त ऊर्मिमार्गः शरभक्रीडितः शरभप्लुतः त्रितालो बाह्यानुवृत्तः पञ्चपाणिः सिंहायतः स्वाधूतः क्लिष्टः श्लिङ्गितो बृंहितः पुष्पाभिकीर्णश्चेति नीचैर्गतमार्गाः ।

कपिप्लुतो भेकप्लुत एणप्लुत एकपादप्लुतः कोकिलसंचार्युरस्यो बकचारी च लङ्घनः ।

औपवाह्यं पञ्चधा विभजते—**वल्गन** इत्यादिना । औपवाह्याः औपवाह्यमार्गाः ।

वल्गनमार्गं विवृणोति—**तत्रे**त्यादि । तत्र वल्गनादिषु पञ्चसु मार्गेषु मध्ये, औपवेणुकः हस्तमात्रमण्डल इति स्वामी, वर्धमानकस्तावन्मात्रमण्डलपङ्क्तिपरिपाटीवल्गनः, यमको युगपदुभयमण्डलवल्गनः, आलीढप्लुतः एकपादसङ्कोचापरपादप्रसारणपूर्वप्लुतियुक्तः, पूर्वगः पूर्वार्धवल्गनः, त्रिकचाली त्रिकं पृष्ठवंशाधरः तेन पश्चार्धलक्षणात् पश्चार्धवल्गनः ।

स एवेति । वल्गनमार्ग एव, शिरःकर्णविशुद्धः शिरसा कर्णाभ्यां चाविकृतः, नीचैर्गतः तदाख्यः । षोडशमार्गो वा वक्ष्यमाणषोडशविधश्च सः । के ते प्रकारा इत्याह — **प्रकीर्णक** इत्यादि । प्रकीर्णकः सर्वगतिसङ्करयुक्तः, प्रकीर्णोत्तरः प्रकीर्ण एवैकगतिप्रधानः, निषण्णो निष्कम्पपृष्ठगतिः, पार्श्वानुवृत्तस्तिर्यग्गतिः, ऊर्मिमार्गः उन्नतानतगतिः, शरभक्रीडितः शरभगतिः, शरभप्लुतः शरभतुल्योत्पतनः, त्रितालः त्रिपदगामी, बाह्यानुवृत्तः सव्यापसव्यवल्गनगतिः, पञ्चपाणिः चरणत्रयं सकृदवस्थाप्य एकं द्विरवस्थापयति, सिंहायतः सिंहतुल्यगतिः, स्वाधूतः अतिदीर्घगतिः, क्लिष्टो विवहनविस्रब्धगतिः, श्लिङ्गितोऽवनताग्रयायी, बृंहित उन्नताग्रयायी, पुष्पाभिकीर्णो गोमूत्रिकागतिः । इति एते, नीचैर्गतमार्गाः ।

लङ्घनमाह—**कपिप्लुत** इत्यादि । वानरमण्डूकहरिणप्लुतैः सदृशप्लुतत्वात् कपिप्लुतो भेकप्लुत एणप्लुतश्च, एकपादप्लुतः संकोच्य पादत्रयमेकेन पादेन प्लुतं यस्य सः, कोकिलसञ्चारी पिकवत्सञ्चारः, उरस्यः संकोच्य सर्वान् पादान् उरसैव प्रमाथः, बकचारी च बकवत्सञ्चारश्च, लङ्घनः ।

काङ्को वारिकाङ्को मायूरोऽर्धमायूरो नाकुलोऽर्धनाकुलो वाराहोऽर्धवाराहश्चेति धोरणः ।

संज्ञाप्रतिकारो नारोष्ट्र इति ।

षण्णव द्वादशेति योजनान्यध्वा रथ्यानाम् । पञ्च योजनान्यर्धाष्टमानि दशेति पृष्ठवाह्यानामश्वानामध्वा ।

विक्रमो भद्राश्वासो भारवाह्य इति मार्गाः ।

विक्रमो वल्गितमुपकण्ठमुपजवो जवश्च धाराः ।

तेषां बन्धनोपकरणं योग्याचार्याः प्रतिदिशेयुः । साङ्ग्रामिकं रथाश्वालङ्कारं च सूताः । अश्वानां चिकित्सकाः शरीरह्रासवृद्धिप्रतीकारमृतुविभक्तं चाहारम् ।

धोरणमाह — काङ्क इत्यादि । कङ्कसमानगतिः काङ्कः, वारिकाङ्कः हंसादिसमानगतिः । एवं मायूरादिर्व्याख्येयः । इति एवमष्टविधो धोरणः ।

नारोष्ट्रमाह — संज्ञाप्रतिकार इति । शिक्षितसङ्केतानुरूपचेष्टितः, नारोष्ट्राख्यः । इतिशब्द औपवाह्यनिरूपणसमाप्तौ ।

गन्तव्याध्वमानमाह — षण्णवद्वादशेत्यादि । रथ्यानां रथवाहिनामुत्तममध्यमाधमानाम् अश्वानाम्, अध्वा, षट् नव द्वादशेति क्रमात् षड्योजनो नवयोजनो द्वादशयोजनश्च भवति । तथा पञ्च योजनानि, अर्धाष्टमानि सार्धानि सप्त योजनानि, दश योजनानि, इति क्रमेण पृष्ठभारवाहिनाम् अश्वानां त्रिविधानाम् अध्वा ।

त्रिविधं गतिक्रममाह — विक्रम इति । विक्रमः शनैर्गमनं, भद्राश्वासो मध्यमः, भारवाह्यो द्रुतगमनम्, इति मार्गाः ।

धारा आह — विक्रमो वल्गितमिति । विक्रमः शनैर्गमनं, वल्गितं प्रेङ्खितम्, उपकण्ठमुत्प्लुत्योत्प्लुत्य गमनम्, उपजवः प्रथमवेगः, जवश्चरमवेगः, इति धाराः ।

तेषामिति । रथ्यानां पृष्ठवाह्यानां चाश्वानां, बन्धनोपकरणं बन्धनान्युपकरणानि च मुखकण्ठपृष्ठपादादियोजनीयानि कवियपर्याणादीनि, योग्याचार्याः प्रतिदिशेयुः अश्वशिक्षाचार्याः उपदिशेयुः । सांग्रामिकं रथाश्वालङ्कारं च, सूताः सारथयः प्रतिदिशेयुः । अश्वानां चिकित्सकाः अश्ववैद्याः, शरीरह्रासवृद्धिप्रतीकारं देहबलहानिप्रतिक्रियां मेदोवृद्धिप्रतिक्रियां च, ऋतुविभक्तं चाहारं तत्तदृतुयोग्यतया व्यवस्थितम् आहारं च, प्रतिदिशेयुः ।

सूत्रग्राहकाश्वबन्धकयावसिकविधापाचकस्थानपालकेशकारजाङ्गलीविदश्च स्वकर्मभिरश्वानाराधयेयुः ।

कर्मातिक्रमे चैषां दिवसवेतनच्छेदनं कुर्यात् । नीराजनोपरुद्धं वाहयतश्चिकित्सकोपरुद्धं वा द्वादशपणो दण्डः । क्रियाभैषज्यसङ्गेन व्याधिवृद्धौ प्रतीकारद्विगुणो दण्डः । तदपराधेन वैलोम्ये पत्रमूल्यं दण्डः ।

तेन गोमण्डलं खरोष्ट्रमहिषमजाविकं च व्याख्यातम् ।
द्विरह्नः स्नानमश्वानां गन्धमाल्यं च दापयेत् ।
कृष्णसन्धिषु भूतेज्याः शुक्लेषु स्वस्तिवाचनम् ॥

सूत्रेत्यादि । सूत्रग्राहकादयः सप्त, स्वकर्मभिः, अश्वान्, आराधयेयुरुपचरेयुः । तत्र सूत्रग्राहकः सूत्रग्रहणाधिकृतः वेल्लनपायनोद्वर्तनादिकर्ता, अश्वबन्धकः खलीनपर्याणाद्युपकरणबन्धनाधिकृतः, यावसिकः ऋत्वनुगुणयवसप्राशयिता, विधापाचकः शालिमुद्गमाषादिपक्ता, स्थानपालः अश्वावस्थानदेशशोधकः, केशकारः कालिककेशकल्पकः, जाङ्गलीविद् विषविद्याकोविदः ।

कर्मातिक्रमे चेति । स्वस्वकर्मणामननुष्ठानेऽन्यथानुष्ठाने वा, एषां सूत्रग्राहकादीनां, दिवसवेतनच्छेदनं कुर्यात् । नीराजनोपरुद्धं नीराजना शान्त्युदकपुष्पदीपादिना सत्कारो दुरितशान्तये बलवृद्धये च क्रियमाणः तदर्थमुपरुद्धं, चिकित्सकोपरुद्धं वा चिकित्सार्थं, वाहयतः, द्वादशपणो दण्डः । क्रियाभैषज्यसङ्गेन क्रियायाश्चिकित्सनस्य भैषज्यस्य औषधस्य च यथाकालाकरणेन, व्याधिवृद्धौ, प्रतीकारद्विगुणः प्रतिक्रियार्थव्ययद्विगुणः, दण्डः, अश्वाध्यक्षस्य । तदपराधेन क्रियाभैषज्यदोषेण, वैलोम्ये अश्वस्य विपत्तौ, पत्रमूल्यं विपन्नवाहमूल्यं, दण्डः ।

तेनेति । तेन अश्वाराधनादिविधिनोक्तेन, गोमण्डलं खरोष्ट्रमहिषम् अजाविकं च व्याख्यातं गोमण्डलादिविधिरप्युक्तप्रायः । अश्ववदेव गोमण्डलादेरप्याराधनादिकं कर्तव्यं, तदकरणे गवाध्यक्षस्य दण्डश्च भवतीत्यर्थः ।

अथायान्ते श्लोकावाह — द्विरह्नः स्नानमश्वानामित्यादि । दिने-दिने वारद्वयम् अश्वानां स्नानं, शरद्ग्रीष्मयोः, दापयेत् । गन्धमाल्यं च दापयेत्, नित्यम् । कृष्णसन्धिषु भूतेज्याः कृष्णपर्वसु अमावास्यासु भूतबलीन्, दापयेत् । शुक्लेषु शुक्लसन्धिषु स्वस्तिवाचनं ब्राह्मणाशीर्वादनं, दापयेत् ।

नीराजनामाश्वयुजे कारयेन्नवमेऽहनि ।
यात्रादाववसाने वा व्याधौ वा शान्तिके रतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रिंशोऽध्यायः अश्वाध्यक्षः,
आदित एकपञ्चाशः ॥

नीराजनाम् आरात्रिकाम्, आश्वयुजे मासि, कारयेत्, नवमेऽहनि नवम्याम्, यात्रादौ अवसाने वा उद्योगस्यारम्भे समाप्तौ च, व्याधौ वा अश्वमारके च, शान्तिके रतः शान्तिप्रयोजनके कर्मण्यासक्तः ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे
त्रिंशोऽध्यायः अश्वाध्यक्षः,
आदित एकपञ्चाशः ॥

४८. प्रक. हस्त्यध्यक्षः।

हस्त्यध्यक्षो हस्तिवनरक्षां दम्यकर्मक्षान्तानां हस्तिहस्तिनीकलभानां शालास्थानशय्याकर्मविधायवसप्रमाणं कर्मस्वायोगं बन्धनोपकरणं साङ्ग्रामिकमलङ्कारं चिकित्सकानीकस्थोपस्थायुकवर्गं चानुतिष्ठेत्।

हस्त्यायामद्विगुणोत्सेधविष्कम्भायामां हस्तिनीस्थानाधिकां सप्रग्रीवां कुमारीसङ्ग्रहां प्राङ्मुखीमुदङ्मुखीं वा शालां निवेशयेत्।

हस्त्यायामचतुरश्रश्लक्ष्णालानस्तम्भफलकान्तरकं मूत्रपुरीषोत्सर्गस्थानं निवेशयेत्। स्थानसमशय्यामर्धापाश्रयां दुर्गे साम्नाह्योपवाह्यानां बहिर्दम्यव्यालानाम्।

हस्त्यध्यक्ष इति सूत्रम्। हस्त्यध्यक्षव्यापारोऽभिधीयत इति सूत्रार्थः। सङ्गतिस्त्वश्वाध्यक्षवद् द्रष्टव्या। इदं च प्रकरणमध्यायद्वयेन वितन्यते।

हस्त्यध्यक्ष इति। सः, हस्तिवनरक्षां गजवनप्रवेशनिषेधादिरूपां, दम्यकर्मक्षान्तानां शिक्षाग्रहणदान्तानां, हस्तिहस्तिनीकलभानां, शालादिषट्कप्रमाणं शाला कुटी स्थानम् आलानप्रदेशः शय्या संवेशस्थानं कर्म साम्नाह्यादिकं विधा आहारः यवसं हरितसस्यादि एतेषां प्रमाणं, कर्मसु आयोगं दम्यादिकर्मसु वक्ष्यमाणेषु आसक्तिं, बन्धनोपकरणं बन्धनमालानग्रैवेयकादि उपकरणम् अङ्कुशवेणुयन्त्रादि च, साङ्ग्रामिकं वर्मतोमरादिकम्, अलङ्कारं वैजयन्तीक्षुरप्रमालादिकं, चिकित्सकादिवर्गं च चिकित्सका गजवैद्याः अनीकस्थाः गजशिक्षाविचक्षणाः उपस्थायुकाः कर्मकराः तेषां वर्गं च, अनुतिष्ठेत् अवेक्षेत।

शालानिवेशमाह — हस्त्यायामेत्यादि। नवहस्तो हस्त्यायामः तद्द्विगुणः अष्टादशहस्त उत्सेध उच्छ्रयः विष्कम्भो विस्तारः आयामो दैर्घ्यं च यस्यास्तां तथाभूतां, हस्तिनीस्थानाधिकां हस्तिनीस्थानं षडरत्नि तेनाधिकाम् अर्धाश्चतुर्विंशतिहस्तदीर्घां, सप्रग्रीवां प्रग्रीवेण मुखशालयोपेतां, कुमारीसंग्रहां कुमारी आलानस्तम्भोपरिनिवेशिता तुला सुखबन्धनार्था तत्सङ्ग्रहवतीं, प्राङ्मुखीम् उदङ्मुखीं वा शालां, निवेशयेत् निर्मापयेत्।

स्थाननिवेशमाह — हस्त्यायामेत्यादि। हस्त्यायामो नवहस्तः तच्चतुरश्रं तदनुरूपमवृत्ताद्याकारं श्लक्ष्णो मसृण आलानस्तम्भः फलकान्तरं फलकरूपं स्थलच्छादकं च यस्य तत् तथाभूतं च, मूत्रपुरीषोत्सर्गस्थानं तदुत्स-

प्रथमसप्तमावष्टमभागावह्नः स्नानकालौ, तदनन्तरं विधायाः । पूर्वाह्णे व्यायामकालः, पश्चाह्नः प्रतिपानकालः । रात्रिभागौ द्वौ स्वप्नकालौ, त्रिभागः संवेशनोत्थानिकः ।

ग्रीष्मे ग्रहणकालः । विंशतिवर्षो ग्राह्यः ।

विक्को मूढो मत्कुणो व्याधितो गर्भिणी धेनुका हस्तिनी चाग्राह्याः ।

सप्तारत्निरुत्सेधो नवायामो दशपरिणाहः प्रमाणतश्चत्वारिंशद्वर्षो भवत्युत्तमः । त्रिंशद्वर्षो मध्यमः । पञ्चविंशतिवर्षोऽवरः ।

गानुगुणं किञ्चिदग्रोन्नतं स्थानं, निवेशयेत । स्थानसमशय्यां स्थानसमां शय्याम्, अर्धापाश्रयाम् अर्धम् अर्धपञ्चमहस्तः तावन्मात्रोऽपाश्रय उन्नतस्थानं यस्यां तादृशीं, दुर्गे दुर्गान्तः, सान्नाह्यौपवाह्यानां, बहिर्दम्यव्यालानां दुर्गबहिर्देशे दमनीयानां हिंस्राणां च, निवेशयेत् ।

कालविनियोगमाह — **प्रथमे**त्यादि । अह्नः, प्रथमसप्तमौ, अष्टमभागौ, स्नानकालौ । एतेन द्विः स्नानमुक्तम् । तदनन्तरं विधायाः द्वितीयोऽष्टभागो भोजनस्य कालः । पूर्वाह्णे, व्यायामस्य कर्माभ्यासस्य कालः । पश्चाह्नः अपराह्णः, प्रतिपानकालः । इहापरशब्दस्याह्नशब्दपरकस्य पश्चभावकरणमार्षम् । **रात्रिभागावि**ति । रात्रेर्द्वौ त्रिभागौ, स्वप्नकालौ । त्रिभागः संवेशनोत्थानिकः अवशिष्टस्तृतीयभागो दशघटिकात्मकः संवेशनोत्थानविनियोज्यः । तत्र पञ्च घटिकाः संवेशनस्य, परा उत्थानस्येति द्रष्टव्यम् ।

गजग्रहणकालमाह — **ग्रीष्मे ग्रहणकाल** इति । तदा हि गजास्तापातिरेकात् प्रक्षीणबला भूत्वा सुग्रहा भवन्तीति । विंशतिवर्षोऽतिक्रान्तविंशतिवयस्कः तदधिकवयस्को वा, ग्राह्यः ग्रहणार्हः ।

अग्राह्यानाह — **विक्क** इति । विक्कः स्तनन्धयः, मूढः हस्तिनीसमानदन्तः, मत्कुणो दन्तरहितः, व्याधितः रोगी, गर्भिणी प्रसिद्धा, धेनुका स्तनपानदायिनी, हस्तिनी च, अग्राह्याः ।

प्रमाणमाह — **सप्तारत्निरुत्सेध** इति । सप्तहस्तोच्छ्रायवान्, नवायामो नवहस्तदैर्घ्यः, दशपरिणाहः दशहस्तपरिक्षेपः, **प्रमाणतः** प्रमाणेन यथोक्तेन युक्तः, चत्वारिंशद्वर्षः, उत्तमो भवति । **त्रिंशद्वर्षः** तावद्वयस्को वक्ष्यमाणषडरत्निप्रमाणो, मध्यमः । **पञ्चविंशतिवर्षोऽवरः** तावद्वयस्को वक्ष्यमाणप्रमाणोऽधमः ।

तयोः पादावरो विधाविधिः ।

अरत्नौ तण्डुलद्रोणः । अर्धाढकं तैलस्य । सर्पिषस्त्रयः प्रस्थाः । दशपलं लवणस्य । मांसं पञ्चाशत्पलिकम् । रसस्याढकं द्विगुणं वा दध्नः पिण्डक्लेदनार्थम् । क्षारं दशपालिकम् । मद्यस्य आढकं द्विगुणं वा पयसः प्रतिपानम् । गात्रावसेकस्तैलप्रस्थः शिरसोऽष्टभागः प्रादीपिकश्च । यवसस्य द्वौ भारौ सपादौ शष्पस्य शुष्कस्यार्धतृतीयो भारः । कडङ्गरस्यानियमः ।

सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यरालः ।

यथाहस्तमवशेषः षडरत्निः पञ्चारत्निश्च ।

विधाविधिमाह — तयोः पादावरो विधाविधिरिति । वक्ष्यमाणोत्तमविधाविध्यपेक्षया चतुर्भागन्यूनो विधाविधिर्मध्यमस्य, मध्यमविधापेक्षया चतुर्भागन्यूनश्चाधमस्य ।

उत्तमस्य विधाप्रमाणमाह — अरत्नौ तण्डुलद्रोण इति । एकस्योत्सेधारत्नेः प्रमाणस्य एकस्तण्डुलद्रोणः । अर्धाढकं तैलस्येत्यादि सुगमम् । रसस्य मांससंस्कृतस्य आढकं, द्विगुणं वा दध्नः रसाभावे दध्याढकद्वयं वा, पिण्डक्लेदनार्थं भुक्तपिण्डसेचनार्थम् । क्षारं दशपलिकं गुडादि दशपलप्रमाणम् । मद्यस्याढकं, द्विगुणम् आढकद्वयं वा, पयसः क्षीरस्य, प्रतिपानम् अपराह्णदेयम् । गात्रावसेकः शरीराभ्यङ्गः, तैलप्रस्थः । शिरसः, अष्टभागः तैलार्धकुडुबः । प्रादीपिकश्च प्रदीपार्थश्च, अष्टभागः । यवसस्य हरितसस्यादेः, द्वौ भारौ चत्वारिंशत् तुलाः । शष्पस्य बालतृणस्य हरितस्य, सपादौ द्वौ भारौ । शुष्कस्य यवसस्य शष्पस्य च, अर्धतृतीयो भारः सार्धं भारद्वयम् । कडङ्गरस्य शाखाबुसस्य सल्लकीपल्लवादेः, अनियमः यावत्तृप्ति दानमित्यर्थः । अनया चैकारत्न्युत्सेधोक्तया प्रक्रियया सप्तारत्न्युत्सेधस्योत्तमहस्तिनस्तण्डुलादिकडङ्गरान्तं विधाजातं सप्तगुणितं द्रष्टव्यम् ।

अष्टारत्न्युत्सेधस्यात्यरालाख्यस्यानेन प्रकारेण विधाधिक्यप्राप्तावपवादमाह — सप्तारत्निना तुल्यभोजन इत्यादि ।

यथाहस्तमिति । षडरत्नेस्तण्डुलद्रोणषट्कं पञ्चारत्नेस्तण्डुलद्रोणपञ्चकमित्येवम् उत्सेधहस्तमानानुरोधेन, अवशेषः सप्तारत्न्यष्टारत्न्यतिरिक्तः, षड-

क्षीरयावसिको विक्कः क्रीडार्थं ग्राह्यः ।

सञ्जातलोहिता प्रतिच्छन्ना संलिप्तपक्षा समकक्ष्या व्यतिकीर्णमांसा समतल्पतला जातद्रोणिकेति शोभाः ।

शोभावशेन व्यायामं भद्रं मन्दं च कारयेत् ।
मृगसङ्कीर्णलिङ्गं च कर्मस्वृतुवशेन वा ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्यायः हस्त्यध्यक्षः,
आदितो द्विपञ्चाशः ॥

रत्निः सप्तारत्न्युत्सेधापेक्षयैकारत्निन्यूनोत्सेधो मध्यमगणनीयः, पञ्चारत्निश्च मध्यमापेक्षयैकारत्निन्यूनोत्सेधोऽधमगणनीयश्च, विधापरिमाणयोगीति शेषः। तत्र मध्यमाधमयोरुत्सेधवदायामे परिणाहे चैकैकारत्निह्रासो द्रष्टव्यः।

क्षीरयावसिक इत्यादि। क्रीडार्थं न तु कर्मार्थं ग्राह्यो विक्को यदि कौतुकाद् गृहीतः, तदा स क्षीरयवसाभ्यां यथातृप्तिदत्ताभ्यां पोषणीय इत्यर्थः।

सप्तविधाः शोभा आह — **सञ्जातलोहितेति**। त्वगस्थिमात्रयुक्तस्य हस्तिन उपजातरुधिरा प्रथमावस्था तत्कृता शोभा सञ्जातलोहिता नाम, प्रतिच्छन्ना किञ्चिन्मांसोपजनच्छन्नास्थिका, संलिप्तपक्षा मांसलेपमसृणपार्श्वा, समकक्ष्या अन्यूनानतिरिक्तमांसावयवा, व्यतिकीर्णमांसा क्वचिदुन्नतं क्वचिदवनतमित्येवं व्यामिश्रं मांसं यस्यां सा तथाभूता, समतल्पतला समं पृष्ठवंशसमोत्पन्नमांसं तल्पतलं पृष्ठवंशपार्श्वे यस्यां सा तथा, जातद्रोणिका द्रोणीव द्रोणिका द्रोणीसमाना पृष्ठस्याकृतिः सा वंशस्य निम्नीभावात् तत्पार्श्वोन्नतिकृताज्जाता यस्यां सा तथा। इति शोभाः, सप्त सप्तावस्थाकृताः।

अध्यायान्ते श्लोकमाह — **शोभावशेनेत्यादि**। उक्तावस्थानुगुण्येन, व्यायामं शिक्षां, कारयेत्। कं, भद्रम् उत्तमं, मन्दं मध्यमं, चकारात् मृगमवरं च हस्तिनम्। मृगसङ्कीर्णलिङ्गं च मृगं भद्रादिसङ्करजं च भद्रमन्दभद्रमृगादिनवप्रकारं हस्तिनम्। कर्मसु सान्नाह्योपवाह्येषु, व्यायामं परिश्रमं कारयेत्। ऋतुवशेन वा शरदाद्यनुष्णकालानुसारेण च, कर्मसु व्यायामं कारयेत्॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
एकत्रिंशोऽध्यायः हस्त्यध्यक्षः,
आदितः द्विपञ्चाशः॥

४८. प्रक. हस्त्यध्यक्षः—हस्तिप्रचारः ।

कर्मस्कन्धाः चत्वारः दम्यः साम्नाह्य औपवाह्यो व्यालश्च ।

तत्र दम्यः पञ्चविधः— स्कन्धगतः स्तम्भगतो वारिगतोऽवपातगतो यूथगतश्चेति । तस्योपविचारो विक्ककर्म ।

साम्नाह्यः सप्तक्रियापथः—उपस्थानं संवर्तनं संयानं वधावधो हस्तियुद्धं नागरायणं साङ्ग्रामिकं च । तस्योपविचारः कक्ष्याकर्म ग्रैवेयकर्म यूथकर्म च ।

औपवाह्योऽष्टविधः — आचरणः, कुञ्जरौपवाह्यः, धोरणः,

कर्मस्कन्धा इत्यादि । कर्मस्कन्धाः क्रियासमूहाः, चत्वारः चतूरूपाः । रूपाण्याह — **दम्य** इत्यादि ।

तत्रेति । तेषु चतुर्षु मध्ये, दम्यः पञ्चविधः । ता एव विधा आह— स्कन्धगतः स्कन्धारोहप्रवणः, स्तम्भगतः आलानबन्धनसहः, वारिगतः वारिर्गजग्रहणभूमिस्तत्प्रविष्टः, अवपातगतः अवपातनार्थं कल्पितं तृणादिच्छन्नं गर्तं गतः, यूथगतो दान्तहस्तिनीसहविहारव्यसनी, चः समुच्चये । तस्य दम्यस्य, उपविचारः उपचरणं, विक्ककर्म विक्कस्योपचरणमिव भवति । तच्च क्षीरयवसेक्षुकाण्डादिदानम् ।

सान्नाह्यमाह — **साम्नाह्य** इत्यादि । सः, सप्तक्रियापथः उपस्थानादिसप्तविधक्रियामार्गः । तत्र उपस्थानं पूर्वापरावयवानां नमनोन्नमनादिकं ध्वजोल्कावेणुरज्ज्वादिलङ्घनं च,संवर्तनं शयनोपवेशनरेखागर्तविषमलङ्घनादिकं भूमिकर्म, संयानम् ऋजुवक्रगोमूत्रिकामण्डललाघवादिगतिविशेषः, वधावधः .हस्तदन्तगात्रैरश्वनररथादेस्तत्प्रतिनिषेधैर्वा घातो ग्रहणं वा, हस्तियुद्धं हस्तिभिर्हीनतुल्यसमैः सह वरण्डकाद्यामिषमन्तरतः कृत्वा युद्धं 'प्रसिद्धलालापिण्डिकाख्यमि'ति स्वामी । नागरायणं गोपुराट्टालकपरिघादिभञ्जनं, साङ्ग्रामिकं प्रकाशयुद्धसौप्तिकादिकम् । **तस्योपविचार** इति । सान्नाह्यस्योपचरणं, कक्ष्याकर्म वरत्राबन्धनशिल्पं, ग्रैवेयकर्म कलापकादिकण्ठबन्धनकौशलं, यूथकर्म च पूर्वकायोन्नतत्वापरकायोन्नतत्वसमकायत्वादिचिह्नैर्हस्तिशास्त्रोक्तैर्गिरिचरादियूथान्तर्गतत्वं विज्ञाय तत्तद्यूथानुगुणकर्मसु नियोजनं च ।

औपवाह्यमाह—**औपवाह्योऽष्टविध** इत्यादि । तत्र आचरणः पूर्वकायोन्नतावनतापरकायोन्नतावनतादिसर्वविधगजगत्यनुसारी, कुञ्जरौपवाह्यः

आधानगतिकः, यष्ट्युपवाह्यः तोत्रोपवाह्यः, शुद्धोपवाह्यः, मार्गायुकश्चेति । तस्योपविचारः—शारदकर्म हीनकर्म नारोष्ट्रकर्म च ।

व्याल एकक्रियापथः । तस्योपविचार आयम्यैकरक्षः कर्मशङ्कितोऽवरुद्धो विषमः प्रभिन्नः प्रभिन्नविनिश्चयो मदहेतुविनिश्चयश्च ।

क्रियाविपन्नो व्यालः । शुद्धः सुव्रती विषमः सर्वदोषप्रदुष्टश्च ।

तेषां बन्धनोपकरणमनीकस्थप्रमाणम् । आलानग्रैवेयकक्ष्या-

कुञ्जरान्तरेण सहौपवाह्यादिकर्ता, धोरण एकेनैव पक्षेण सर्वकर्मकरः, आधानगतिकः द्वित्रिविधगतियायी सर्वगतिकुशलश्च, यष्ट्युपवाह्यः यष्ट्यैव केवलया क्रियाकारी, तोत्रोपवाह्यः सकण्टकयष्ट्या क्रियाकारी, शुद्धोपवाह्यः यष्टितोत्रनैरपेक्ष्येण पदाघातादिसंज्ञयैव केवलया सर्वकर्मकरः, मार्गायुकश्च मृगयुकर्मशिक्षितश्च, इति । मार्गयुक इति ह्रस्वद्वितीयाच्कपाठो युक्तः । तस्य औपवाह्यस्य, उपविचारः उपचरणम् । तदेवाह — शारदकर्म शारदस्याप्रतिभस्य अनुरूपं कर्म । शारदश्च चतुर्विधः स्थूलकृशलोहितप्राकृतभेदात् । तेन स्थूलस्य कृशीकरणं कृशस्य स्थूलीकरणं लोहितस्य मन्दाग्नेरग्निदीपनं प्राकृतस्य प्रकृतिस्थस्य स्वास्थ्यरक्षणमिति चतुष्प्रकारं शारदकर्म । हीनो निर्व्यायामस्तस्य व्यायामयोजनं हीनकर्म, नारोष्ट्रकर्म च संज्ञाशिक्षणं च ।

व्याल इति । सः, एकक्रियापथः एककर्ममार्गः । तस्योपविचारः उच्यत इति शेषः । आयम्यैकरक्षः नियम्यैकेन रक्षणीयः अथवा आयम्यो दण्डस्तेनैवैकेन रक्षणीयः सः । तस्य विशेषानाह — **कर्मशङ्कितः** शिक्षाकाले विसंवादी, अवरुद्धः कर्मानुपयोगोपेक्षितः, विषमः यदृच्छानुष्ठायी, प्रभिन्नो मददोषदुष्टः, प्रभिन्नविनिश्चयः मदाद् विषादिदोषाच्च व्याकुलीभूतः, मदहेतुविनिश्चयश्च सदामदत्वादविज्ञातमदहेतुश्च ।

व्यालसामान्यलक्षणमाह — **क्रियाविपन्न** इति । दुष्टकर्मदूषितः, व्यालः । **शुद्ध** इत्यादि तद्विशेषकथनम् । तत्र शुद्धः केवलघातुकोऽष्टादशदोषयुक्तः, सुव्रतः केवलचालकः पञ्चदशदोषयुक्तः, विषमः घातनचालनोभयकारी शुद्धसुव्रतोभयदोषैर्युक्तः, सर्वदोषप्रदुष्टः उक्तैस्त्रयस्त्रिंशद्दोषैः स्वकीयैश्चैकोनविंशतिदोषैर्युक्तः । शुद्धादीनां तद्दोषाणां च लक्षणं हस्तिशास्त्रतोऽवगन्तव्यम् ।

तेषामिति । गजानां, बन्धनोपकरणं बन्धनमुपकरणं च, अनीकस्थप्रमाणम् अनीकस्थो हस्तिशिक्षाविचक्षणस्तत्प्रमाणकं तदुपदिष्टं, करणीयम् ।

परायणपरिक्षेपोत्तरादिकं बन्धनम् । अङ्कुशवेणुयन्त्रादिकमुपकरणम् । वैजयन्तीक्षुरप्रमालास्तरणकुथादिकं भूषणम् । वर्मतोमरशरावापयन्त्रादिकः साङ्ग्रामिकालङ्कारः ।

चिकित्सकानीकस्थारोहकाधोरणहस्तिपकौपचारिकविधापाचकयावसिकपादपाशिककुटीरक्षकौपशायिकादिरौपस्थायिकवर्गः ।

चिकित्सककुटीरक्षविधापाचकाः प्रस्थौदनं स्नेहप्रसृतिं क्षारलवणयोश्च द्विपलिकं हरेयुः । दशपलं मांसस्यान्यत्र चिकित्सकेभ्यः ।

पथिव्याधिकर्ममदजराभितप्तानां चिकित्सकाः प्रतिकुर्युः ।

आलानेत्यादि । आलानादिकं बन्धनं तत्र आलानं स्तम्भः ग्रैवेयं कलापकः कण्ठबन्धः कक्ष्या वरत्रा परायणम् आरोहणालम्बरज्जुः परिक्षेपः पादपाशादिः उत्तरं द्वितीयं कलापादिकम्, आदिशब्दात् त्रिपद्यादिग्रहणम् । **अङ्कुशे**त्यादि । अङ्कुशादिकम् उपकरणम् । तत्र अङ्कुशः सृणिः वेणुर्दण्डः यन्त्रम् आयुधागाराध्यक्षोक्तं पाञ्चालिकादि । भूषणमाह — **वैजयन्तीत्यादि** । वैजयन्ती गजपताका क्षुरप्रमाला नक्षत्रमाला आस्तरणं नमतं कुथः वर्णकम्बलः आदिपदाच्छत्रादिग्रहणम् । साङ्ग्रामिकालङ्कारमाह — **वर्मे**त्यादि । वर्म कवचं तोमरश्चतुर्हस्तादिरायुधागाराध्यक्षोक्तः शरावापस्तूणी यन्त्रं नानारूपमायुधाध्यक्षोक्तम् एतदादिकः, साङ्ग्रामिकः युद्धार्थः अलङ्कारः ।

हस्तिकर्मकरवर्गमाह — **चिकित्सके**त्यादि । चिकित्सको गजवैद्यः अनीकस्थः प्रतीतः आरोहकः शास्त्रज्ञो गजारोहः आधोरणः शास्त्राभिज्ञः कर्मकुशलः हस्तिपको हस्तिरक्षी औपचारिकश्चारणोद्वर्तनाभ्यञ्जनादिकर्ता विधापाचकः आहारपक्ता यावसिकः यवसप्रवेशकः पादपाशिकः पादबन्धकः कुटीरक्षकः शालापालनशुचीकरणाद्यधिकृतः औपशायिकः शयनशालाधिकृतः एतदादिः, औपस्थायिकवर्गः कर्मकरवर्गः ।

चिकित्सककुटीत्यादि । चिकित्सकादयस्त्रयः, प्रस्थौदनं प्रस्थप्रमाणमन्नं, स्नेहप्रसृतिं तैलघृतादेरर्धाञ्जलिं, क्षारलवणयोश्च, द्विपलिकं पलद्वयप्रमाणं, हरेयुः हस्त्याहाराल्लभेरन्, प्रत्येकमात्मार्थे । दशपलं मांसस्य, अन्यत्र चिकित्सकेभ्यः चिकित्सकान् वर्जयित्वा, हरेयुः कुटीरक्षा विधापाचकाश्च ।

पथीत्यादि । पथ्याद्यादिपञ्चकाभितप्तानां हस्तिनां, चिकित्सकाः, प्रतिकुर्युः पथिगमनादिजन्याभितापप्रतीकारं कुर्युः ।

स्थानस्याशुद्धिर्यवसस्याग्रहणं स्थले शायनमभागे घातः परारोहणमकाले यानमभूमावतीर्थेऽवतारणं तरुषण्ड इत्यत्ययस्थानानि। तम् एषां भक्तवेतनादाददीत।

तिस्रो नीराजनाः कार्याश्चातुर्मास्यृतुसन्धिषु।
भूतानां कृष्णसन्धीज्याः सेनान्यः शुक्लसन्धिषु॥
दन्तमूलपरीणाहद्विगुणं प्रोज्झ्य कल्पयेत्।
अब्दे द्व्यर्धे नदीजानां पञ्चाब्दे पर्वतौकसाम्॥

इति कौटलीयार्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्तिप्रचारः,
आदितः त्रिपञ्चाशः॥

दण्डहेतूनाह — **स्थानस्येत्यादि**। स्थानस्य अशुद्धिः अमार्जनं, यवसस्य अग्रहणम् आशनाभावः, स्थले स्थण्डिले शायनम्, अभागे घातः ताडनानर्हे मर्मादौ ताडनं, परारोहणम् आरोहणानधिकृतस्यारोहणम्, अकाले यानम् अनियते काले चारणम्, अभूमौ विषमदेशे यानम्, अतीर्थे नद्यादेरघट्टे अवतारणं, तरुषण्डे तरुगहने अवतारणम्, इति एवञ्जातीयानि, अत्ययस्थानानि दण्डस्य कारणानि, अर्थाद् औपस्थायिकवर्गस्याध्यक्षस्य च। तं दण्डम्, एषां, भक्तवेतनाद्, आददीत गृह्णीयात्।

विधिशेषं श्लोकद्वयेनाह — **तिस्र इति**। तिस्रो नीराजनाः बलवृद्धिदुरितशान्तिप्रयोजना आरात्रिकाः, कार्याः। कदा कदा, चातुर्मास्यृतुसन्धिषु चातुर्मास्यश्चर्तुषु मासेषु भवाः पौर्णमास्यः तासु, ऋतुसन्धिषु पूर्वापरऋतुसन्धिस्थासु अर्थात् कार्त्तिकीफाल्गुन्याषाढीषु, भूतानां, कृष्णसन्धीज्याः अमावास्यासु बलयः, कार्याः। सेनान्यः स्कन्दस्य, शुक्लसन्धिषु पूर्णिमासु, इज्याः कार्या इति शेषः॥

दन्तेत्यादि। दन्तमूलपरीणाहद्विगुणं विषाणमूलपरिक्षेपमानाद्द्विगुणमानं भागं, प्रोज्झ्य परिहाय, कल्पयेत् छित्त्वा गृह्णीयात्, प्रोज्झितातिरिक्तं दन्तभागमित्यार्थम्। छेदकालमाह — अब्दे द्व्यर्धे सार्धे वर्षद्वये अतीते, नदीजानां नदीचारिणां हस्तिनां, पञ्चाब्दे अतीते, पर्वतौकसां गिरिचराणाम्॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
द्वात्रिंशोऽध्यायः हस्त्यध्यक्षे हस्तिप्रचारः,
आदितस्त्रिपञ्चाशः॥

४९.—५१. प्रक॰ रथाध्यक्षः, पत्त्यध्यक्षः, सेनापतिप्रचारः।

अश्वाध्यक्षेण रथाध्यक्षो व्याख्यातः।

स रथकर्मान्तान् कारयेत्।

दशपुरुषो द्वादशान्तरो रथः। तस्मादेकान्तरावरा आ षडन्तरादिति सप्त रथाः।

देवरथपुष्यरथसाङ्ग्रामिकपारियाणिकपरपुराभियानिकवैनयिकांश्च रथान् कारयेत्।

रथाध्यक्ष इति सूत्रम्। रथानाम् अध्यक्षः घटनसंस्करणाद्यधिकृतो रथाध्यक्षः अर्थात् तत्कर्माभिधीयत इति सूत्रार्थः।

अश्वाध्यक्षेणेति। अश्वाध्यक्षविधानेन, रथाध्यक्षः व्याख्यातः रथाध्यक्षविधानं व्याख्यातं रथ्यानां शालानिवेशनं विधादानं कर्मायोजनं गन्तव्याध्वपरिकल्पनं बन्धनोपकरणघटनं कर्मकरनियोजनं नीराजनमित्येवञ्जातीयमश्वाध्यक्षोक्तं कर्म रथाध्यक्षेणाप्यनुष्ठेयमित्यर्थः।

अधिकं त्वाह—**स** इत्यादि। रथाध्यक्षः, रथकर्मान्तान् घटनसंस्करणरूपान्, कारयेत्।

रथस्य प्रमाणमाह—**दशपुरुष** इति। 'द्वादशाङ्गुलो वितस्तिश्छायापौरुषं चे'ति द्वादशाङ्गुलो यः पुरुष उक्तः तेन पुरुषप्रमाणेन दशपुरुषः दशवितस्तिः अर्थादुत्सेधे पञ्चहस्तः, द्वादशान्तरः हस्तषट्कविस्तारः, रथः। अयमुत्तमः। इतो न्यूनप्रमाणान् रथानाह—**तस्मादि**ति। दशपुरुषरथाद्, एकान्तरावराः आ षडन्तरात् आ षड्वितस्तिविस्तारादेकैकवितस्तिविस्तारन्यूनाः, अर्थाद् विस्तारन्यूनतानुगुणोत्सेधन्यूनतायुक्ताश्च, रथा भवन्तीति शेषः। इति अनेन प्रकारेण, सप्त रथाः दशपुरुषेणादिमेन सह।

विनियोगभेदनिबन्धनांस्तत्संज्ञाभेदानाह—**देवरथे**त्यादि। देवरथो यात्रोत्सवेषु देवप्रतिमासञ्चारणार्थो रथः, पुष्यरथः विवाहादिमङ्गलावसरारोहणार्थः, साङ्ग्रामिकः युद्धार्थः, पारियाणिकः अध्वसञ्चारार्थः, परपुराभियानिकः शत्रुदुर्गभञ्जनावसरोपयोज्यः, वैनयिकः विनयश्चर्याशिक्षणं तदर्थः, एवंसंज्ञान् रथान् कारयेत्।

इष्वस्त्रप्रहरणावरणोपकरणकल्पनाः सारथिरथिकरथ्यानां च कर्मस्वायोगं विद्यात् । आ कर्मभ्यश्च भक्तवेतनं भृतानामभृतानां च योग्यारक्षानुष्ठानमर्थमानकर्म च ।

एतेन पत्त्यध्यक्षो व्याख्यातः । स मौलभृतश्रेणिमित्रामित्राटवीबलानां सारफल्गुतां विद्यात् । निम्नस्थलप्रकाशकूटखनकाकाशदिवारात्रियुद्धव्यायामं च विद्यात् । आयोगमयोगं च कर्मसु ।

इष्वस्त्रेत्यादि । इष्वादिकल्पनाः इषूणां बाणानां सतूणीराणाम् अस्त्राणां धनुषां प्रहरणानां तोमरादीनाम् आवरणानां पल्याणादीनाम् उपकरणानां वल्गादीनां च कल्पना रचनाः, सारथिरथिकरथ्यानां कर्मसु आयोगं च यन्तॄणां रथयोक्तॄणां रथवाहानां च स्वस्वकर्मसु अभियोगातिशयं च, विद्यात् । **आ कर्मभ्यश्चे**ति । आ कर्मणां परिसमाप्तेः, भक्तवेतनं, भृतानां नित्यनियुक्तशिल्पिनाम्, अभृतानाम् आगन्तुशिल्पिनां च सपरिकर्मिणां, योग्यारक्षानुष्ठानं योग्यानां स्वकर्मण्यतिनिपुणानां शिल्पिनां यद्वा अश्वहृदयरथचर्यादिशिक्षारूपयोग्योपदेशाचार्याणाम् आरक्षा परोपजापाद् रक्षणम् अनुष्ठानं व्यापारसौष्ठवासौष्ठवमात्रां च, अर्थमानकर्म च अर्थकर्म प्रभूतधनदानं मानकर्म पारितोषिकवलयवस्त्रादिदानसत्कारं च, विद्याद् आकलयेत् ।

इति रथाध्यक्षप्रकरणं समाप्तम् ।

पत्त्यध्यक्ष इति सूत्रम् । पदात्यधिकृतव्यापारोऽभिधीयत इति सूत्रार्थः ।

एतेनेति । उक्तेन रथाध्यक्षव्यापारेण, पत्त्यध्यक्षो व्याख्यातः पदात्यध्यक्ष इष्वस्त्रप्रहरणादिकल्पनाः कर्मस्वायोगं भक्तवेतनं योग्यारक्षानुष्ठानमर्थमानकर्म चेत्येतत् सर्वं पदातिविषयं चिन्तयेदित्यर्थः । अधिकविधिमाह— **स** इत्यादि । पत्त्यध्यक्षः, मौलभृतश्रेणिमित्रामित्राटवीबलानां मौलं मूले स्थानीये भवं सैन्यं भृतं वेतनपरिगृहीतं बलं श्रेणिर्जनपदवर्त्यायुधीयगणः मित्रबलममित्रबलमटवीपालबलम् इति षड्विधानां बलानां, सारफल्गुतां, विद्यात् स्थानविनियोगाय जानीयात् । निम्नादियुद्धव्यायामं च निम्नयुद्धाद्यष्टविधयुद्धशिक्षां च, विद्यात् । तत्र निम्नयुद्धं सतृणजलमध्यदेशयुद्धं स्थलयुद्धं निरुदकस्तम्बदेशयुद्धं प्रकाशयुद्धं प्रतीतं कूटयुद्धं साङ्ग्रामिकाधिकरणविकल्पितं कपटयुद्धं खनकयुद्धं भूमिं खात्वा तत्र स्थित्वा क्रियमाणं युद्धम् आका-

तदेव सेनापतिः सर्वयुद्धप्रहरणविद्याविनीतो हस्त्यश्वरथचर्या-संघुष्टश्चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानं विद्यात् ।

स्वभूमिं युद्धकालं प्रत्यनीकमभिन्नभेदनं भिन्नसन्धानं संहत-भेदनं भिन्नवधं दुर्गवधं यात्राकालं च पश्येत् ।

शयुद्धं प्राकारादिकमारुह्य क्रियमाणं युद्धं दिवायुद्धरात्रियुद्धे प्रतीते । **आयोगमयोगं च कर्मस्विति** । पत्तीनां स्वकर्मसु 'सर्वदेशकालशस्त्रवहनं व्यायामश्चेति पदातिकर्माणि' इति साङ्ग्रामिकाधिकरणे वक्ष्यमाणेषु तत्परत्वमव्यापारं च विद्यात् ।

इति पत्त्यध्यक्षप्रकरणं समाप्तम् ।

सेनापतिप्रचार इति सूत्रम् । हस्त्यश्वरथपदातिरूपचतुरङ्गसमुदायात्मकं मौलभृतादिषट्प्रकारोपेतं बलं सेना तस्य पतिर्नायकः सेनापतिः तस्य प्रचारो व्यापारोऽभिधीयत इति सूत्रार्थः । एकैकाङ्गाध्यक्षकथनानन्तरं सर्वाङ्गसमुदायाध्यक्षस्य क्रमप्राप्तत्वाद् वचनम् ।

तदेवेत्यादि । अश्वाध्यक्षादीनां पत्त्यध्यक्षान्तानां चतुर्णामङ्गाध्यक्षाणां यत् कर्मजातमभिहितं तदेव, सेनापतिः, विद्यात् । स कथम्भूतः, सर्वयुद्धप्रहरणविद्याविनीतः सर्वेषु युद्धेषु निम्नयुद्धादिषु सर्वेषु प्रहरणेषु धनुर्वर्गादिषु विद्यासु आन्वीक्षिकीप्रभृतिषु च कृतशिक्षः, हस्त्यश्वरथचर्यासङ्घुष्टः गजाद्यारोहणयोधनादिकर्मसु प्रख्यातः । तदेवेत्येतद् विशिनष्टि—**चतुरङ्गस्य बलस्यानुष्ठानाधिष्ठानमिति** । हस्त्यश्वरथपदात्यात्मिकायाः सेनायाः यान्यनुष्ठानानि 'हस्त्यश्वरथपत्तिकर्माणी'ति साङ्ग्रामिकाधिकरणे वक्ष्यमाणानि कर्माणि तदधिष्ठानं तदाश्रयम् अश्वाध्यक्षादिकर्मणामश्वादिकर्मानुरूपकरणीयत्वात् ।

अतिदिष्टकर्मातिरिक्तं कर्माह—**स्वभूमिमित्यादि** । स्वभूमिं सेनाव्यायामार्हं देशं, युद्धकालं प्रकाशादियुद्धयोग्यं कालं, प्रत्यनीकं शत्रुबलम्, अभिन्नभेदनम् अभिन्नस्य परव्यूहस्य भेदनं विश्लेषणं, भिन्नसन्धानं भिन्नस्य विश्लिष्टस्य स्वबलस्य संश्लेषणं, संहतभेदनं परस्पररक्षार्थसङ्घटितानां विघटनं, भिन्नवधं विघटितानां वधं, दुर्गवधं परपुरस्थानीयादिविध्वंसनं, यात्राकालं च अभिषेणनकालं च, पश्येत् विद्यात् ।

तूर्यध्वजपताकाभिर्व्यूहसंज्ञाः प्रकल्पयेत् ।
स्थाने याने प्रहरणे सैन्यानां विनये रतः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः
रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
आदितः चतुष्पञ्चाशः ॥

विधिशेषं श्लोकेनाह— **तूर्येत्यादि** । स्थाने गमननिवृत्तौ, याने गमने, प्रहरणे पराभिहनने च विषये, तूर्यध्वजपताकाभिः वाद्यैः शङ्खचक्रादिचिह्नैः वैजयन्तीभिश्च, व्यूहसंज्ञाः युद्धव्यूहितस्वसैन्यस्य सङ्केतान् पराविज्ञेयान्, प्रकल्पयेद् उल्लिखेत् । उल्लिखितसङ्केताविसंवादेन स्वसैन्या वाद्यविशेषश्रवण-ध्वजपताकाविशेषदर्शनैः स्थानयानाद्यनुष्ठानं यथा कुर्युस्तथा तान् शिक्षयेच्चे-त्यभिप्रायकमध्यक्षादिशेषणमाह— **सैन्यानां विनये रत** इति ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे त्रयस्त्रिंशोऽध्यायः
रथाध्यक्षः पत्त्यध्यक्षः सेनापतिप्रचारश्च,
आदितश्चतुष्पञ्चाशः ॥

५२, ५३. प्रक. मुद्राध्यक्षः, विवीताध्यक्षः ।

मुद्राध्यक्षो मुद्रां माषकेण दद्यात् ।

समुद्रो जनपदं प्रवेष्टुं निष्क्रमितुं वा लभेत ।

द्वादशपणममुद्रो जानपदो दद्यात् । कूटमुद्रायां पूर्वः साहसदण्डः । तिरोजनपदस्योत्तमः ।

विवीताध्यक्षो मुद्रां पश्येत् ।

मुद्राध्यक्ष इति सूत्रम् । मुद्रा नाम पण्यलेख्यादिषु करणीयो राजकीयश्चिह्नविशेषः शुल्काध्यक्षे प्रस्तुतः तस्या अध्यक्षो मुद्राध्यक्षः । स तद्व्यापारश्च तत्रानुक्त इहाभिधीयत इत्यर्थः ।

मुद्राध्यक्ष इति । सः, मुद्रां नायं चोरः शत्रुचारो वेति प्रत्ययजननार्थां, माषकेण दद्यात् माषकं राजकोशवृद्ध्यर्थं गृहीत्वा दद्यात्, प्रवेष्ट्रे निष्क्रमित्रे च ।

मुद्राग्रहणस्य फलमाह — **समुद्र** इति । गृहीतमुद्र एव जनः, जनपदं विजिगीषुदेशं, प्रवेष्टुं, निष्क्रमितुं तस्मान्निर्गन्तुं च, लभेत अधिकारं प्राप्नुयादित्यर्थः ।

अगृहीतमुद्रस्य प्रविशतो निर्गच्छतश्च दण्डमाह — **द्वादशपणमि**त्यादि । द्वादशपणं दण्डम्, अमुद्रः अगृहीतमुद्रः, जानपदः विजिगीषुजनपदभवः, दद्यात् । अन्यजनपदभवस्य तु अमुद्रस्य कूटमुद्राकरणवक्ष्यमाणदण्डवृद्धिन्यायेन दण्डवृद्धिः काचित् स्थापनीया । कूटमुद्रायां कृत्रिममुद्रायां प्रदर्श्यमानायां, पूर्वः साहसदण्डः, अर्थाद् विजिगीषुजनपदभवस्यैव । तिरोजनपदस्य अन्यजनपदभवस्य कूटमुद्राप्रदर्शयितुः, उत्तमः साहसः ।

इति मुद्राध्यक्षप्रकरणं समाप्तम् ।

विवीताध्यक्ष इति सूत्रम् । विवीतं गोप्रचरणार्हस्तृणादिमान् प्रदेशः तस्याध्यक्षस्तद्व्यापारोऽभिधीयत इति सूत्रार्थः । य एते मुद्राध्यक्षदण्डनीया उक्ता अमुद्रकूटमुद्राः, ते महापथमृजुमपहाय विमार्गेणैव विवीतगतेन प्रायश्चरन्तो विवीताध्यक्षेणैव स्वयं स्वपुरुषद्वारेण वा गृहीत्वा मुद्राध्यक्षायार्पणीया इत्यतो मुद्राध्यक्षानन्तरं विवीताध्यक्षकथनसङ्गतिः ।

विवीताध्यक्ष इति । सः, मुद्रां पश्येत् प्रतिविवीतपथिकं मुद्रास्ति नवेति परीक्षेत ।

भयान्तरेषु च विवीतं स्थापयेत् । चोरव्यालभयान्निम्नारण्यानि शोधयेत् ।

अनुदके कूपसेतुबन्धोत्सान् स्थापयेत्, पुष्पफलवाटांश्च ।

लुब्धकश्वगणिनः परिव्रजेयुररण्यानि । तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दमग्राह्याः कुर्युः शैलवृक्षाधिरूढा वा शीघ्रवाहना वा ।

अमित्राटवीसञ्चारं च राज्ञो गृहकपोतैर्मुद्रायुक्तैर्हारयेयुः धूमाग्निपरम्परया वा ।

मुद्राविचयस्य व्याप्त्यर्थमाह — **भयान्तरेषु** चेति । भयं चोरपरापसर्पचारशङ्का तद्गोचरेषु भूप्रदेशेषु कृष्येष्वकृष्येषु वा सर्वविधेषु, विवीतं स्थापयेत् । एतेन 'अकृष्यायां भूमौ पशुभ्यो विवीतानि प्रयच्छेद्' इति भूमिच्छिद्रविधानप्रकरणोक्त्या कृष्यभूमौ विवीताभावात् तत्पथचारिषु मुद्राविचयाभावप्रसङ्ग इति शङ्का निरस्ता । चोरव्यालभयात्, निम्नारण्यानि निम्नानि गभीराणि भूच्छिद्राणि अरण्यानि च, शोधयेत् तस्करा हिंस्रमृगाश्च तत्र निलीय वसन्ति नवेति मुहुः परीक्षेत ।

अनुदक इति । निर्जले प्रदेशे, कूपसेतुबन्धोत्सान् कूपान् उदपानान् सेतुबन्धान् जलावरोधबन्धान् उत्सान् तात्कालिकान् क्षुद्रकूपांश्च, स्थापयेत् । पुष्पफलवाटान्, चकारात् प्रपादिकं च, स्थापयेत् ।

लुब्धकश्वगणिन इति । लुब्धकाश्च श्वगणिनश्च, परिव्रजेयुररण्यानि वनानि परितश्चरेयुः, अर्थाच्चोरामित्रादीनां प्रवेशपरिहाराय प्रविष्टपरिज्ञानाय च । चोराद्यागमस्यान्तपालादीन् प्रति निवेदनार्थमाह — **तस्करे**त्यादि । तस्करामित्राभ्यागमे शङ्खदुन्दुभिशब्दम्, अग्राह्याः तस्करामित्राणां ग्रहणागोचराः सन्तः, कुर्युः । अग्राह्यत्वप्रकारमाह—**शैलवृक्षाधिरूढा** वेत्यादि । स्पष्टार्थम् ।

अमित्रेत्यादि । अमित्राटवीसञ्चारं च अमित्राणां शत्रूणाम् अटवीसञ्चारं मृगयाद्यर्थं वनसञ्चारवृत्तान्तं, राज्ञः स्थानीयस्थितस्य, गृहकपोतैर्मुद्रायुक्तैः लेखयुक्तैर्गृह्यकपारावतैः, हारयेयुः नयेयुः । धूमाग्निपरम्परया वा हारयेयुः दिवा धूमपरम्परया नक्तमग्निपरम्परया वा नयेयुः । परम्परा तु— आ वनाद् आ-स्थानीयं विवीताध्यक्षपुरुषाः कृतसङ्केताः क्रोशान्तरेषु स्थिताः वनगतपुरुषप्रथमप्रदर्शितधूमाग्निदर्शनात् तदुत्तरक्रोशान्तरस्थितेन स्वोत्तरं क्रोशान्तरस्थितं प्रति धूमाग्निप्रदर्शनं, तेन स्वोत्तरं प्रति तेन स्वोत्तरं प्रतीत्येवंरूपा द्रष्टव्या ।

द्रव्यहस्तिवनाजीवं वर्तनीं चोररक्षणम् ।
सार्थातिवाह्यं गोरक्ष्यं व्यवहारं च कारयेत् ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे
चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षः,
आदितः पञ्चपञ्चाशः ॥

व्यापारशेषं श्लोकेनाह — **द्रव्येत्यादि** । द्रव्यहस्तिवनाजीवं द्रव्यवने हस्तिवने च विद्यमानो य आजीवः उपजीव्यपदार्थः कुप्याध्यक्षहस्त्यध्यक्षोपादेयव्यतिरिक्तः यवसेन्धनाङ्गारादिः तं, वर्तनीं दुर्गमार्गसन्तारणभृतिं, चोररक्षणं तद्भृतिं, सार्थातिवाह्यं भयस्थानेषु वणिक्सङ्घस्यातिवाहनवेतनं, गोरक्ष्यं गोरक्षानिमित्तमादेयं, व्यवहारं यथोक्तपदार्थक्रयविक्रयव्यवहारं च, कारयेत अनुष्ठापयेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायामध्यक्षप्रचारे द्वितीयाधिकरणे
चतुस्त्रिंशोऽध्यायः मुद्राध्यक्षो विवीताध्यक्षश्च,
आदितः पञ्चपञ्चाशः ॥

५४, ५५. प्रक. **समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयः।**

समाहर्ता चतुर्धा जनपदं विभज्य ज्येष्ठमध्यमकनिष्ठविभागेन ग्रामाग्रं परिहारकमायुधीयं धान्यपशुहिरण्यकुप्यविष्टिप्रतिकरमिदमेतावदिति निबन्धयेत्।

समाहर्तृप्रचार इति सूत्रम्। सर्वेभ्य आयस्थानेभ्यो दुर्गराष्ट्रखनिसेतुवनव्रजवणिक्पथलक्षणेभ्यो राजार्थानां सम्यगाहर्ता समाहर्ता तस्य प्रचारो व्यापारः सर्वजनपदचिन्तनरूपोऽभिधीयत इति सूत्रार्थः। एकैकार्थाध्यक्षाणां प्रतिपादनानन्तरं सर्वार्थाध्यक्षस्य प्राप्तावसरत्वात् कथनम्।

समाहर्तेत्यादि। समाहर्ता, चतुर्धा जनपदं विभज्य चतुर्भिरंशैः जनपदं पृथक्कृत्य, ज्येष्ठमध्यमकनिष्ठविभागेन चतुर्ष्वप्यंशेषु प्रत्येकं ज्येष्ठो मध्यमः कनिष्ठ इति विभागं कुलसंख्याप्रयुक्तं ग्रामाणां सारफल्गुत्वप्रयुक्तं च विभागं कृत्वा, ग्रामाग्रं निबन्धयेत् ग्रामाणां प्रातिस्विकं सामूहिकं च परिमाणं लेखयेत्। कथं निबन्धयेदित्याह — **इदमेतावदितीति**। एतच्च ग्रामाग्रादौ सर्वत्र सम्बध्यते। अमुकग्राम ईदृग्रूप एतत्परिमाणः अमुकग्रामसमुदाय ईदृग्रूप एतत्परिमाणश्चेत्यनेन प्रकारेण। तथा परिहारकं परिहारः महादानादिनिमित्तः करमोक्षस्तद्युक्तं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामाः करमोक्षिता इति लेखयेत्। आयुधीयं दण्डकरदायकं ग्रामाग्रम्, इदमेतावदिति निबन्धयेत् एत एतावन्तो ग्रामाः एतावत आयुधीयान् प्रयच्छन्तीति लेखयेत्। धान्यादिपञ्चकप्रतिकरम् इदमेतावदिति निबन्धयेत्। प्रतिनियतः करः प्रतिकरः, स धान्यादिषु प्रत्येकं सम्बध्यते, धान्यप्रतिकरं पशुप्रतिकरं हिरण्यप्रतिकरं कुप्यप्रतिकरं विष्टिप्रतिकरं च, इदमेतावदिति निबन्धयेत् एष्वेषु ग्रामेषु अमुकामुकधान्येभ्य एतावद्भ्य एतावांस्तत्तद्धान्यप्रतिकरः प्रतिवत्सरम् उपसम्पद्यत इति लेखयेत्। एतावान् पशुप्रतिकरोऽमुकामुकजातीयान् वाहदोहलोमाद्युपकर्तॄन् एतावतः पशून् उपनयतीति लेखयेत्। एष एतावान् हिरण्यप्रतिकरः कोशप्रवेश्यं हेमरूप्यं रूप्यरूपं ताम्ररूपं चैतावत् प्रयच्छतीति लेखयेत्। कुप्यप्रतिकर एष एतावान् एतान्येतावन्ति कुप्यद्रव्याणि वितरतीति लेखयेत्। विष्टिप्रतिकर एष एतावानेतावतां कर्मकरपुरुषाणामर्पणेनोपकरोतीति लेखयेत्।

तत्प्रदिष्टः पञ्चग्रामीं दशग्रामीं वा गोपश्चिन्तयेत् ।

सीमावरोधेन ग्रामाग्रं कृष्टाकृष्टस्थलकेदारारामषण्डवाटवनवास्तुचैत्यदेवगृहसेतुबन्धश्मशानसत्रप्रपापुण्यस्थानविवीतपथिसङ्ख्यानेन क्षेत्राग्रं, तेन सीम्नां क्षेत्राणां च मर्यादारण्यपथिप्रमाणसम्प्रदानविक्रयानुग्रहपरिहारनिबन्धान् कारयेत् । गृहाणां च करदाकरदसङ्ख्यानेन ।

इत्थं कृतनिबन्धस्य जनपदस्य चतुर्भागमेकैकमेकैकः स्थानिकश्चिन्तयेदिति वक्ष्यति । चतुर्भागेऽपि ग्रामान् पञ्चशो दशशो वा विभज्य एकैकस्मिन् ग्रामविभागे स्थानिकनियम्यमवान्तरचिन्तकं गोपसंज्ञमेकैकं कुर्यादित्याह — **तत्प्रदिष्ट** इति । तेन समाहर्त्रा प्रदिष्टो नियुक्तः पुरुषः, पञ्चग्रामीं दशग्रामीं वा ग्रामाणामुत्तमत्वे तत्पञ्चकम् अधमत्वे तद्दशकम् अर्थान्मध्यमत्वे तत्षट्कादिकं च यथोचितं, गोपश्चिन्तयेत् गोपसंज्ञः सन् चिन्तयेत्, यश्चिन्तयति स गोपसंज्ञयोच्यत इत्यर्थः ।

कथं चिन्तयेदित्याह — **सीमावरोधेने**ति । नदीशैलादिसीमपरिच्छेदेन, ग्रामाग्रं ग्रामपरिमाणं, कारयेत् निबन्धयेत् । कृष्टाकृष्टाद्यष्टादशसंख्यानेन, क्षेत्राग्रं क्षेत्रपरिमाणं, कारयेत् एतावत् कृष्टमेतावदकृष्टमित्येवं कृष्टादिक्षेत्रं परिच्छिद्य निबन्धयेत् । तत्र कृष्टं कृष्टपच्यव्रीह्याद्युत्पत्तिक्षेत्रम्, अकृष्टम् अकृष्टपच्यनीवाराद्युत्पत्तिक्षेत्रं, स्थलम् उज्जटदेशः, केदारः शालेयादिक्षेत्रम्, आरामः उपवनं, षण्डः कदल्यादिक्षेत्रं, वाटः इक्ष्वादिभूमिः, वनं ग्रामवास्युपजीव्यवृक्षबृन्दस्थानं, वास्तु ग्रामभूमिः, चैत्यः उद्देशवृक्षः, देवगृहादित्रयं प्रसिद्धं, सत्रम् अन्नदानशाला, प्रपा पानीयशाला, पुण्यस्थानं तीर्थादि, विवीतं गोप्रचारप्रदेशः, पन्थाः रथशकटपद्गगतागतमार्गः । **तेने**ति । तेन संख्यानेन, सीम्नां नदीशैलादीनां, क्षेत्राणां च, मर्यादादिनिबन्धान् कारयेत् मर्यादादिपुस्तकानि लेखयेत् । तत्र मर्यादा परस्परावधिः, अरण्यमनुपजीव्यवनं, पन्थाः कृष्टादिपरस्परप्रवेशनिर्गममार्गः, प्रमाणं स्वस्वपरिमाणं, संप्रदानम् अमुकेनामुकस्य दत्तमितीदृशं, विक्रयः प्रसिद्धः, अनुग्रहः धान्याद्यृणदानेन कर्षकाणामुपकारः, परिहारः करमोक्षः । गृहाणां च करदाकरदसंख्यानेन, निबन्धान् कारयेदिति वर्तते एतावन्ति गृहाणि करदायकैर्जनैरध्युषितानि एतावन्ति चाकरदायकैरित्येवं संख्याय पुस्तकेषु लेखयेत् ।

तेषु चैतावच्चातुर्वर्ण्यमेतावन्तः कर्षकगोरक्षकवैदेहककारुकर्मकरदासाश्चैतावच्च द्विपदचतुष्पदमिदं च हिरण्यविष्टिशुल्कदण्डं समुत्तिष्ठतीति ।

कुलानां च स्त्रीपुरुषाणां बालवृद्धकर्मचरित्राजीवव्ययपरिमाणं विद्यात् ।

एवञ्च जनपदचतुर्भागं स्थानिकः चिन्तयेत् ।

गोपस्थानिकस्थानेषु प्रदेष्टारः कार्यकरणं बलिप्रग्रहं च कुर्युः ।

तेषु चेति । तेषु च गृहेषु, एतावत् चातुर्वर्ण्यम् एतावन्तोऽमुकामुकवर्णभवा जनाः, एतावन्तः कर्षकादयः षड्वर्गाश्च, एतावच्च द्विपदचतुष्पदमिदं च पिण्डेनैतावन्तो मनुष्याश्च पशवश्चैते, वसन्तीति सर्वत्र शेषः । इदं च हिरण्यविष्टिशुल्कदण्डं हिरण्यं स्वर्णरूप्यादि विष्टिः कर्मकरः शुल्कः वड्ढदेयं दण्डः सैन्यः इत्येतच्चतुष्टयं वार्षिकं, समुत्तिष्ठति उत्पद्यते राजार्थम्, इति अनेन प्रकारेण, निबन्धान् कारयेदिति वर्तते ।

कुलानामिति । कुलानां च स्त्रीपुरुषाणां कुटुम्बसम्बन्धिनां च स्त्रीणां पुरुषाणां च, बालादिपरिमाणं बालवृद्धपरिमाणम् एतावद्वयस्काः स्त्रियः पुरुषाश्चेत्येवं वयःपरिच्छेदं कर्माणि वर्णजातिप्रसिद्धानि तत्परिमाणं चरित्रं देशजात्याद्याचारस्तत्परिमाणम् आजीवो वृत्तिः अर्थात् तन्निमित्त आयस्तत्परिमाणं व्ययः कुटुम्बभरणार्थधनविनियोगस्तत्परिमाणं च, विद्यात्, गोपः ।

एवञ्चेति । अनेन प्रकारेण, जनपदचतुर्भागं, स्थानिकः स्थानिकपदव्यपदेश्यश्चतुर्भागनायकः, चिन्तयेत् ।

गोपेत्यादि । गोपस्थानिकस्थानेषु गोपानां स्थानिकानां च स्वव्यापारानुष्ठानप्रदेशेषु, प्रदेष्टारः कण्टकशोधनाधिकारिणः, कार्यकरणं कण्टकोद्धरणलक्षणकार्यानुष्ठानं, बलिप्रग्रहं च बलीनां गोपस्थानिकनिबन्धारूढानां राजार्थानां प्रसभग्रहणं च अर्थात् स्वयमदायकेभ्यः, अथवा बलिप्रग्रहं बलिनां राष्ट्रमुख्यानां राजार्थोत्थापनविघ्नकारिणां प्रग्रहं गोपस्थानिकविधेयास्ते यथा स्युस्तथा दमनं, कुर्युः ।

इति समाहर्तृप्रचारः समाप्तः ।

समाहर्तृप्रदिष्टाश्च गृहपतिकव्यञ्जना येषु ग्रामेषु प्रणिहितास्तेषां ग्रामाणां क्षेत्रगृहकुलाग्रं विद्युः । मानसञ्जाताभ्यां क्षेत्राणि भोगपरिहाराभ्यां गृहाणि वर्णकर्मभ्यां कुलानि च । तेषां जङ्घाग्रमायव्ययौ च विद्युः । प्रस्थितागतानां च प्रवासावासकारणमनर्थ्यानां च स्त्रीपुरुषाणां चारप्रचारं च विद्युः ।

गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधय इति सूत्रम् । गृहपतिकव्यञ्जना वैदेहकव्यञ्जनास्तापसव्यञ्जनाश्च संस्थाविशेषा गूढपुरुषोत्पत्तिप्रकरणोक्ताः, प्रणिधयः गूढपुरुषाः लक्षणया तेषां प्रणिधानानि ग्रामेषु जनपदेषु च नियोजनानि अभिधीयन्त इति सूत्रार्थः । गृहपतिकवैदेहकतापसव्यञ्जनप्रणिधय इति समस्तपाठे गृहपतिव्यञ्जनादीनां त्रयाणां संस्थाविशेषाणां प्रणिधयः प्रणिधानानि नियोजनानीति स्पष्ट एवार्थः । संस्थापञ्चके तिसृणां प्राधान्याद् ग्रहणमन्ययोरप्यभ्युपायत्वाविशेषादुपलक्षणम् । तेन कापटिकोदास्थितसंस्थयोरपि प्रणिधानं संगृहीतं द्रष्टव्यम् । संस्थाप्रणिधानं च ग्रामजनपदवृत्तान्तज्ञानस्य गोपस्थानिकप्रचारपरीक्षणस्य च समाहर्त्रवश्यापेक्षणीयस्याभ्युपायभूतं समाहर्तृप्रचारस्यैवाङ्गमिति तस्येहाभिधानसङ्गतिः ।

तत्र गृहपतिव्यञ्जनप्रणिधानं तावदाह — **समाहर्तृप्रदिष्टाश्चे**ति । समाहर्त्रा नियुक्ताः, गृहपतिकव्यञ्जनाः, येषु ग्रामेषु, प्रणिहिताः नियोजिताः, तेषां ग्रामाणां, क्षेत्रगृहकुलाग्रं क्षेत्रसंख्यां गृहसंख्यां कुलसंख्यां च, विद्युः । कानि कानि कथं विद्युरित्याह — **मानसञ्जाताभ्यां क्षेत्राणी**ति । मानेनायामविस्तारादिपरिच्छेदेन उत्पन्नसस्यपिण्डेन च क्षेत्राग्रं विद्युः । भोगपरिहाराभ्यां **गृहाणि** करकरमोक्षाभ्यां गृहवास्तव्यान्, विद्युः । वर्णकर्मभ्यां कुलानि च ब्राह्मणादिजात्या तथा यजनकृष्यादिकर्मणा कुटुम्बानि च, विद्युः । **तेषा**मिति । कुलानां, जङ्घाग्रं जङ्घाशब्देन पादचारिणो लक्ष्यन्ते कुलसम्बन्धिनां पादचारिणां द्विपदचतुष्पदानामग्रम् इयत्ताम्, आयव्ययौ च धनोत्पत्तिविनियोगौ च, विद्युः । **प्रस्थिते**त्यादि । प्रस्थितागतानामिति व्यस्तसमस्तविपर्यस्तग्रहणं प्रस्थितानां निजाधिवासस्थलादन्यत्र वस्तुं गच्छताम्, आगतानां वस्तुमन्यप्रदेशादागतानां, प्रस्थितागतानां वस्तुमन्यत्र गत्वा पुनः प्रत्यागतानाम्, आगतप्रस्थितानां क्वचिद् वस्तुमागत्य ततोऽन्यत्र वस्तुं प्रस्थितानां चेत्यर्थः । प्रवासावासकारणं प्रवासे अध्युष्यमाणस्थलवासपरित्यागे आवासे

एवं वैदेहकव्यञ्जनाः स्वभूमिजानां राजपण्यानां खनिसेतुवनकर्मान्तक्षेत्रजानां परिमाणमर्घं च विद्युः । परभूमिजातानां वारिस्थलपथोपयातानां सारफल्गुपण्यानां कर्मसु च । शुल्कवर्तन्यातिवाहिकगुल्मतरदेयभागभक्तपण्यागारप्रमाणं विद्युः ।

एवं समाहर्तृप्रदिष्टास्तापसव्यञ्जनाः कर्षकगोरक्षकवैदेहकानामध्यक्षाणां च शौचाशौचं विद्युः । पुराणचोरव्यञ्जनाश्चान्तेवासिनश्चैत्यचतुष्पथशून्यपदोदपाननदीनिपानतीर्थायतनाश्रमारण्यशैलवनगहनेषु स्तेनामित्रप्रवीरपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनान्युपलभेरन् ।

तदन्यस्थलवासपरिग्रहे च कारणं, विद्युः । अनर्थ्यानां च स्त्रीपुरुषाणाम् अनाशंसनीयानां नर्तकीबन्धक्यादीनां स्त्रीणां विटकितवादीनां पुरुषाणां च, प्रवासावासकारणं विद्युः । चारप्रचारं च परप्रयुक्तापसर्पप्रवृत्तिं च, विद्युः ।

वैदेहकव्यञ्जनप्रणिधानमाह — **एवमिति** । एवं यथा गृहपतिव्यञ्जनास्तथा वैदेहकव्यञ्जनाः, स्वभूमिजानां राजपण्यानां पण्याध्यक्षप्रतिपादितानां, खनिसेतुवनकर्मान्तक्षेत्रजानां खनिजानां खन्यध्यक्षोक्तानां शङ्खवज्रादीनां सेतुजानां मत्स्यप्लवादीनां वनजानां कुप्याध्यक्षोक्तानां द्रव्यवनभवानां कर्मान्तजानां खातवप्रादिकर्मान्तभूम्युत्पन्नानां क्षेत्रजानां व्रीह्यादीनां सीताध्यक्षोक्तानां च, परिमाणम् इयत्ताम्, अर्घं मूल्यं च, विद्युः । परभूमिजातानां देशान्तरजातानां, वारिस्थलपथोपयातानां जलमार्गेण स्थलमार्गेण च स्वदेशमुपगतानां, सारफल्गुपण्यानां साराणां रत्नादीनां फल्गूनां शाकादीनां च पण्यानां, कर्मसु च क्रयविक्रयादिषु च, परिमाणमर्घं च विद्युरिति वर्तते । तथा शुल्काद्यष्टकप्रमाणं शुल्कस्य शुल्काध्यक्षोक्तस्य वर्तन्या अन्तपालादेयस्य आतिवाहिकस्य सार्थातिवाहनार्थस्य विवीताध्यक्षग्राह्यस्य गुल्मदेयस्य रक्षिसङ्घदेयस्य तरदेयस्य नावध्यक्षदेयस्य भागस्य सहव्यवहारिविभाज्यांशस्य भक्तस्य व्यवहर्तृपुरुषबलीवर्दादिभोजनव्ययस्य पण्यागारस्य पण्यगृहभाटकादेश्च प्रमाणम् इयत्तां, विद्युः ।

तापसव्यञ्जनप्रणिधानमाह — **एवमिति** । अनेन प्रकारेण, समाहर्तृप्रदिष्टाः समाहर्तृनियुक्ताः, तापसव्यञ्जनाः, कर्षकगोरक्षकवैदेहकानाम्, अध्यक्षाणां च गोपादीनां च, शौचाशौचं विद्युः । **पुराणचोरव्यञ्जनाश्चेति** ।

समाहर्ता जनपदं चिन्तयेदेवमुत्थितः ।
चिन्तयेयुश्च संस्थास्ताः संस्थाश्चान्याः स्वयोनयः ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः
समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनप्रणिधयश्च,
आदितः षट्पञ्चाशः ॥

सन्धिच्छेदादिना परद्रव्यापहारिणश्चोराः ते चिराभ्यस्ततत्कर्माणः पुराणचोराः तद्व्यञ्जनास्तद्वेषाः, अन्तेवासिनः तापसव्यञ्जनशिष्याः, चैत्यादिष्वेकादशसु स्थानेषु, तत्र चैत्यं देवालयः चतुष्पथं शृङ्गाटकं शून्यपदं निर्जनस्थानम् उद-पानः स्रोतःप्रापितावरुद्धजलो जलाधारः नदी प्रसिद्धा निपानम् उपकूपजला-शयः तीर्थायतनं पुण्योदकप्रदेशः आश्रमो मुनिगृहम् अरण्यं ब्रह्मसोमारण्यं शैलगहनवनगहने प्रसिद्धे एतेषु । स्थित्वेति शेषः । स्तेनामित्रप्रवीरपुरुषाणां च स्तेनानां चोराणाम् अमित्रपुरुषाणां शत्रुप्रयुक्तानां तीक्ष्णरसदादीनां प्रवीर-पुरुषाणाम् अल्पनिमित्तपरमारणसाहसिकानां च, चकारादनर्थ्यस्त्रीपुरुषाणां च प्रवेशनस्थानगमनप्रयोजनानि अमुष्मिन् देशे अमुष्मिन् काले प्रवेशः स्थिति-र्निर्गमनमित्येतानि प्रयोजनं च, उपलभेरन् जानीयुः ।

अध्यायान्ते श्लोकमाह—**समाहर्ते**ति। एवम् उक्तेन प्रकारेण, उत्थित उद्युक्तः, समाहर्ता जनपदं चिन्तयेत्, अर्थाद् गोपस्थानिकसहायः । ताश्च संस्थाः समाहर्तृप्रदिष्टाः पूर्वोक्ताः गृहपतिकव्यञ्जनादयः संस्थाविशेषाः, जनपदं चिन्तयेयुः, चकाराद् गोपस्थानिकौ च । संस्थाश्च तांश्च तत्तद्व्यञ्जनयोनीन् संस्थाविशेषान्, अन्याः स्वयोनयः तत्तद्योनिसमानयोनयः संस्थाः, चिन्तयेयुः परीक्षेरन् । संस्थापरीक्षार्थस्य चेदं संस्थान्तरप्रणिधानस्य वचनं न तात्पर्यतो विध्यर्थं, किन्तु कर्मकराः प्रायोऽर्थलोभाद् राजार्थं वा हापयन्ति प्रजा वा परिपीडयन्तीत्यवश्यं तत्कर्मशोधने समाहर्त्रा नित्यं प्रतिजागरितव्यमित्युपदे-शार्थम् । तेन संस्थाचिन्तनाय संस्थान्तरकल्पने संस्थानवस्थाप्रसङ्ग इति न चोदनीयम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे पञ्चत्रिंशोऽध्यायः
समाहर्तृप्रचारः गृहपतिवैदेहकतापसव्यञ्जनाः प्रणिधयश्च,
आदितः षट्पञ्चाशः ॥

५६. प्रक. नागरिकप्रणिधिः।

समाहर्तृवन्नागरिको नगरं चिन्तयेत्। दशकुलीं गोपो, विंशतिकुलीं चत्वारिंशत्कुलीं वा। स तस्यां स्त्रीपुरुषाणां जातिगोत्रनामकर्मभिः जङ्घाग्रमायव्ययौ च विद्यात्।

एवं दुर्गचतुर्भागं स्थानिकश्चिन्तयेत्।

धर्मावसथिनः पाषण्डपथिकानावेद्य वासयेयुः। स्वप्रत्ययाश्च तपस्विनः श्रोत्रियांश्च।

नागरिकप्रणिधिरिति सूत्रम्। नगरे स्थानीये नियुक्तो नागरिकः तस्य प्रणिधिः प्रणिधानं व्यापारे नियोजनम् अभिधीयत इति सूत्रार्थः। सर्वसमुदयानां यथोक्तरूपाणां रक्षणीयत्वाद् तद्रक्षणस्य तदाश्रयस्थानरक्षणाधीनत्वात् स्थानीयस्य तदाश्रयस्थानत्वात् तद्रक्षणस्येहाभिधानसङ्गतिः।

समाहर्तृवदिति। नागरिकः, नगरं स्थानीयं, समाहर्तृवत् चिन्तयेत् यथा समाहर्ता जनपदं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत् तथा स्थानीयं चतुर्धा विभज्य गोपस्थानिकसहायश्चिन्तयेत्। तत्र गोपस्य चिन्तनीयं विषयमाह—**दशकुलीमि**ति। दशकुलीं दशकुलानि उत्तमानि, गोपः, चिन्तयेदिति सम्बध्यते। तथा विंशतिकुलीं विंशतिं कुलानि मध्यमानि, चत्वारिंशत्कुलीं वा चत्वारिंशतं कुलानि वाधमानि, चिन्तयेत्। स गोपः, तस्यां दशकुल्यां विंशतिकुल्यां चत्वारिंशत्कुल्यां वा स्वचिन्ताविषयभूतायां, स्त्रीपुरुषाणां स्त्रीणां पुरुषाणां च, जातिगोत्रनामकर्मभिः, जङ्घाग्रं जङ्घाशब्देन पादचारिजनो लक्ष्यते तेन जनसंख्यामित्यर्थः, आयव्ययौ च, विद्यात्।

स्थानिकस्य चिन्तनीयमाह—**एवमि**ति। एवं यथा गोपो दशकुलीप्रभृतिं तद्गतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं चिन्तयेत् तद्वत्, दुर्गचतुर्भागं स्थानिकः चिन्तयेद् दुर्गचतुर्भागगतस्त्रीपुरुषजङ्घाग्रायव्ययज्ञानपूर्वं तन्त्रयेत्, दुर्गचतुर्भागचिन्तकश्चायं स्थानिकाख्यः।

धर्मावसथिन इति। धर्मावसथाः धर्मशालाः तदधिकारिणो धर्मावसथिनः, पाषण्डपथिकान् पाशुपतशाक्यभिक्षुकादीन् अध्वगान्, आवेद्य गोपाय निवेद्य, वासयेयुः धर्मावसथेषु। स्वप्रत्ययाश्च स्वकृतः स्वयं विचार्य कृतः प्रत्ययः तपस्विश्रोत्रियविश्वासो येषां ते तथाभूताः सन्तः, तपस्विनस्तापसान्, श्रोत्रियान्,

कारुशिल्पिनः स्वकर्मस्थानेषु स्वजनं वासयेयुः। वैदेहकाश्चान्योन्यं स्वकर्मस्थानेषु। पण्यानामदेशकालविक्रेतारमस्वकरणं च निवेदयेयुः।

शौण्डिकपाकमांसिकौदनिकरूपाजीवाः परिज्ञातमावासयेयुः। अतिव्ययकर्तारमत्याहितकर्माणं च निवेदयेयुः।

चिकित्सकः प्रच्छन्नव्रणप्रतीकारकारयितारमपथ्यकारिणं च गृहस्वामी च निवेद्य गोपस्थानिकयोर्मुच्यते। अन्यथा तुल्यदोषः स्यात्।

छान्दसांश्च, वासयेयुरिति वर्तते। स्वप्रत्ययत्ववचनं तद्वासननिमित्तस्य दोषस्य स्वगामित्वद्योतनार्थम्।

कारुशिल्पिन इति। कारवः शिल्पिनश्च, स्वकर्मस्थानेषु स्वजनं वासयेयुः, स्वप्रत्ययाः। वैदेहकाश्च वणिजश्च, स्वप्रत्ययाः, अन्योन्यं स्वकर्मस्थानेषु तत्पण्यवणिक् तत्पण्यवणिजमिति न्यायमनपहाय पण्यव्यवहारस्थानेषु, वासयेयुः। पण्यानाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकर्तारम् आगन्तुकं, निवेदयेयुः, नागरिकाय। अस्वकरणं च अस्वीयस्य पण्यस्य व्यवहरणं च, निवेदयेयुः।

शौण्डिकेत्यादि। शौण्डिकाः मद्यविक्रयिणः पाकमांसिकाः पक्वमांसविक्रयिणः औदनिका अन्नविक्रयिणः रूपाजीवाः वेश्याश्च, परिज्ञातं समानशीलादिद्वारेण विदितं, आवासयेयुः। पुनः किं कुर्युः, अतिव्ययकर्तारम्, अतिव्ययस्य विज्ञातायत्यभ्यधिकस्याविज्ञातायतिकस्य वा व्ययस्य कर्तारम्, अत्याहितकर्माणं च अतिमात्रारब्धमद्यपानादिकर्माणं च निवेदयेयुः, गोपस्थानिकेभ्यः।

चिकित्सक इति। भिषक्, प्रच्छन्नव्रणप्रतीकारकारयितारं प्रच्छन्नं स्वकृतापराधोद्भेदभयादन्याविदितं यथा भवति तथा व्रणानां शस्त्राद्युत्पादितानां प्रतीकारस्य चिकित्सायाः कारयितारम्, अपथ्यकारिणं च अपथ्यानि रोगमरणोत्पादकानि द्रव्याणि करोति सम्पादयत्यन्विष्यति वेत्यपथ्यकारी तं च, **निवेद्य गोपस्थानिकयोः, मुच्येत** शुध्येत्। **अन्यथा** अनिवेदने, **तुल्यदोषः स्याद्** अपराधिभ्यां समानदोषो गण्येतेत्यर्थः। तथा गृहस्वामी च यस्मिन् गृहे व्रणप्रतीकारयित्रपथ्यकारिणोरनुष्ठानं तद्गृहपतिश्च, निवेद्य गोपस्थानिकयोर्मुच्येतान्यथा तुल्यदोषः स्यात्।

प्रस्थितागतौ च निवेदयेत्। अन्यथा रात्रिदोषं भजेत। क्षेमरात्रिषु त्रिपणं दद्यात्।

पथिकोत्पथिकाश्च बहिरन्तश्च नगरस्य देवगृहपुण्यस्थानवनश्मशानेषु सव्रणमनिष्टोपकरणमुद्भाण्डीकृतमाविग्नमतिस्वप्नमध्वक्लान्तमपूर्वं वा गृह्णीयुः।

एवमभ्यन्तरे शून्यनिवेशावेशनशौण्डिकौदनिकपाकमांसिकद्यूतपाषण्डावासेषु विचयं कुर्युः।

अग्निप्रतीकारं च ग्रीष्मे मध्यमयोरह्नश्चतुर्भागयोः। अष्टभागोऽग्निदण्डः। बहिरधिश्रयणं वा कुर्युः।

प्रस्थितागतौ चेति। प्रस्थितः स्वगृहात् कार्यान्तरेण देशान्तरं प्रस्थितः आगतः देशान्तरात् कार्यान्तरेण स्वगृहं प्राप्तः तौ च, निवेदयेत् प्रस्थानागमनकालप्रयोजनाद्याख्यानपूर्वमावेदयेत्, अर्थाद् गृहस्वामी। अन्यथा निवेदनाभावे, रात्रिदोषं भजेत रात्रौ ताभ्यां कृतस्य चौर्यादिलक्षणस्य दोषस्य भागी भवेत्। क्षेमरात्रिषु क्षेमयुक्तासु अनुपजातचौर्यासु अनिवेदनरात्रिषु, त्रिपणं पणत्रयात्मकमनिवेदनापराधदण्डं, दद्यात्। क्षेमेऽपि दण्डविधानं निवेदनानुष्ठानस्य कदाप्यव्यभिचारार्थम्।

पथिकेत्यादि। पथिकोत्पथिकाश्च पथिका महामार्गचारिणो वैदेहकादिव्यञ्जनाः उत्पथिका विवीतपथचारिणः काष्ठतृणादिहारकगोपालकादिव्यञ्जनाः त उभये सञ्चाराः, बहिरन्तश्च नगरस्य विद्यमानेषु, देवगृहादिषु चतुर्षु स्थानेषु, सव्रणं शस्त्राद्युत्पादितव्रणम्, अनिष्टोपकरणम् अनिष्टानि वर्जनीयान्युपकरणानि काकल्यादीनि चोरादिसाधनानि यस्य तम्, उद्भाण्डीकृतं समधिकभाण्डभारवाहिनम्, आविग्नं भीतम्, अतिस्वप्नं रात्रिव्यायामजागरवशादतिमात्रनिद्रापन्नम्, अध्वक्लान्तं दीर्घाध्वसञ्चारश्रान्तम्, अपूर्वं वा अज्ञातपूर्वं वा, गृह्णीयुः, अर्थान्नागरिकाय चार्पयेयुः।

एवमिति। अनेन प्रकारेण, अभ्यन्तरे स्थानीयान्तराले, शून्यनिवेशादिषु शून्यनिवेशे शून्यालये आवेशने शिल्पशालायां शौण्डिकावासे औदनिकावासे पाकमांसिकावासे द्यूतावासे पाषण्डावासे चेत्येवं सप्तसु, विचयं सव्रणाद्यन्वेषणं कुर्युः, अर्थाद् गूढपुरुषा नागरिकादिसम्बन्धिनः।

अग्नीत्यादि। कुर्युरित्यनुवर्तते। अग्निप्रतिषेधं च अग्निकार्याणां महताम्

पादः पञ्चघटीनाम् । कुम्भद्रोणीनिःश्रेणीपरशुशूर्पाङ्कुशकचग्रहणीदृतीनां चाकरणे ।

तृणकटच्छन्नान्यपनयेत् । अग्निजीविन एकस्थान् वासयेत् । स्वगृहप्रद्वारेषु गृहस्वामिनो वसेयुरसम्पातिनो रात्रौ । रथ्यासु कुटव्रजाः सहस्रं तिष्ठेयुः, चतुष्पथद्वारराजपरिग्रहेषु च ।

अग्न्यतिप्रज्वलनबहुलस्फुलिङ्गोद्गतिहेतूनां वारणं च कुर्युः । कदा, ग्रीष्मे ग्रीष्मर्तौ, तत्रापि न सर्वदा किन्तु मध्यमयोरह्नश्चतुर्भागयोः दिवससम्बन्धिनोः द्वितीयतृतीययामयोः । तृणपर्णादिमयपटलावृतगृहविषयश्चायं प्रतिषेधः । निषिद्धकारिणां दण्डमाह—**अष्टभाग** इति । पणाष्टभागः, अग्निदण्डः निषिद्धकालाग्निकार्यकरणनिमित्तो दण्डः । अग्निकार्यस्य पाकार्थस्थाल्यधिश्रयणस्य तदानीमवर्जनीयत्वे त्वाह — **बहिरि**ति । बहिरधिश्रयणं वा पटलानावृतावकाशाधिश्रयणं वा, कुर्युः ।

अग्निकार्यकरणस्य घटिकाविशेषसम्बन्धे दण्डविशेषमाह — **पाद** इति । पादः पणचतुर्भागदण्डः, पञ्चघटीनां द्वितीयतृतीययाममध्यमपञ्चघटिकानां सार्धद्वादशघटिकात ऊर्ध्वम् आ सार्धसप्तदशघटिकात इत्यर्थः । कुम्भद्रोण्यादीनां चाकरणे कुम्भो घटो जलपूर्णः द्रोणी दारुमयो जलाधारो जलपूर्णः निःश्रेणी अधिरोहणी उच्चदेशारोहणार्था परशुः कुठारो दार्वादिच्छेदनार्थः शूर्पं प्रस्फोटनं प्रतिमुखधूमप्रसरवारणार्थम् अङ्कुशं सृणिर्दह्यमानवस्त्वाकर्षणार्थः कचग्रहणी शालापटलतृणहरणसाधनं दृतिश्चर्ममयमुदकपात्रम् इत्येतेषामग्निनिर्वापणसाधनानां ग्रीष्मकाले गृहद्वारेष्वनिवेशने, पाद इत्यनुवर्तते पणचतुर्भागो दण्डः ।

तृणकटच्छन्नान्यपनयेदिति । तृणकटमयच्छदींषि गृहाणि, अपनयेद् निरस्येद् ग्रीष्मे । अग्निजीविनः अयस्कारताम्रतक्षादीन्, एकस्थान् वासयेत् एकस्मिन् महति चतुश्शाले कृताग्निभयप्रतिविधाने वासयित्वा कर्म कारयेत् । **स्वगृहेत्यादि** । स्वगृहप्रद्वारेषु स्वगृहमुखद्वारेषु, गृहस्वामिनो वसेयुः । कथम्भूताः, असम्पातिनो रात्रौ निशायामन्यत्र सञ्चारं वर्जयन्तः । रथ्यासु विशिखासु, कुटव्रजाः सजलाः कुम्भपङ्क्तयः, सहस्रं तिष्ठेयुः । चतुष्पथद्वारराजपरिग्रहेषु च चतुष्पथेषु शृङ्गाटकेषु द्वारेषु नगरादिद्वारेषु राजपरिग्रहेषु कोशगृहकुप्यगृहकोष्ठागारपण्यगृहगजाश्वशालादिषु च, कुटव्रजास्तिष्ठेयुः ।

प्रदीप्तमनभिधावतो गृहस्वामिनो द्वादशपणो दण्डः । षट्पणोऽवक्रयिणः । प्रमादाद् दीप्तेषु चतुष्पञ्चाशत्पणो दण्डः ।

प्रादीपिकोऽग्निना वध्यः ।

पांसुन्यासे रथ्यायामष्टभागो दण्डः । पङ्कोदकसन्निरोधे पादः । राजमार्गे द्विगुणः ।

पुण्यस्थानोदकस्थानदेवगृहराजपरिग्रहेषु पणोत्तरा विष्ठादण्डाः । मूत्रेष्वर्धदण्डाः ।

भैषज्यव्याधिभयनिमित्तमदण्ड्याः ।

प्रदीप्तमिति । प्रदीप्तम् अनभिधावतः प्रज्वलिताग्निकं किमपि गृहं दृष्ट्वाप्यनभिद्रवतः, गृहस्वामिनः, द्वादशपणो दण्डः भवति । षट्पणोऽवक्रयिणः भाटकेन गृहे वसतोऽनभिधावतो गृहस्वाम्युक्तदण्डार्धदण्डः । **प्रमादादिति** । प्रमादाद् अनवधानाद्, दीप्तेषु सत्सु अर्थात् स्वगृहेष्वपि, चतुष्पञ्चाशत्पणो दण्डः । स गृहारक्षकस्येत्येके ।

प्रादीपिक इति । प्रदीपिका वह्निना गृहसन्दीपनं तत्कर्ता, अग्निना तद्दीपितेनैव, वध्यः तदैव गृहीतश्चेत् । कालान्तरगृहीतस्याप्यग्निदाहः कण्टकशोधने वक्ष्यते — 'विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपकमग्निना दाहयेदि'ति ।

पांस्वित्यादि । रथ्यायां रथशकटादिसञ्चारमार्गे, पांसुन्यासे पांसूनां धूलीनां तज्जातीयानामवकराणां च निक्षेपे, अष्टभागः पणाष्टमांशः, दण्डः । तत्रैव पङ्कोदकसन्निरोधे पङ्कमिश्रजलावरोधने, पादः पादपणदण्डः । राजमार्गे महामार्गे, द्विगुणः पांसुन्यासे पङ्कोदकसन्निरोधे च रथ्योक्तद्विगुणः पादपणात्मकोऽर्धपणात्मकश्च क्रमेण दण्डः ।

पुण्येत्यादि । राजमार्ग इत्यनुवर्तते तत्र, पुण्यस्थानादिषु चतुर्षु च, पणोत्तरा उत्तरोत्तरैकैकपणाधिकाः राजमार्गे एकपणः पुण्यस्थाने द्विपणः उदकस्थाने तटाकादौ त्रिपणः देवगृहे चतुष्पणः राजपरिग्रहे राजगृहकोशागारादौ पञ्चपण इत्येवमात्मकाः, विष्ठादण्डाः । मूत्रेषु उक्तेष्वेव प्रदेशेषु मूत्रविसर्जने, अर्धदण्डाः क्रमाद् अर्धपणैकपणसार्धपणद्विपणार्धतृतीयपणात्मका दण्डाः ।

भैषज्यव्याधिभयनिमित्तमदण्ड्या इति । भैषज्यं विरेचनद्रव्यसेवनं व्याधिरतिसारप्रमेहादि भयं प्रसिद्धम् एतन्निमित्तकं चेद् विष्ठामूत्रकरणं राजमार्गादौ, तर्हि दण्ड्या न भवन्ति ।

मार्जारश्वनकुलसर्पप्रेतानां नगरस्यान्तरुत्सर्गे त्रिपणो दण्डः खरोष्ट्राश्वतराश्वपशुप्रेतानां षट्पणः। मनुष्यप्रेतानां पञ्चाशत्पणः।

मार्गविपर्यासे शवद्वारादन्यतः शवनिर्णयने पूर्वः साहसदण्डः। द्वाःस्थानां द्विशतम्। श्मशानादन्यत्र न्यासे दहने च द्वादशपणो दण्डः।

विषण्णालिकमुभयतोरात्रं यामतूर्यम्। तूर्यशब्दे राज्ञो गृहाभ्याशे सपादपणमक्षणताडनम् प्रथमपश्चिमयामिकम्। मध्यमयामिकं द्विगुणम्। बहिश्चतुर्गुणम्।

मार्जारेत्यादिवाक्यत्रयमतिरोहितार्थम्।

मार्गेत्यादि। मार्गविपर्यासे प्रसिद्धमार्गादन्येन मार्गेण शवानां नयने, शवद्वारादन्यतः शवनिर्णयने व्यवस्थितप्रेतनिर्हरणद्वारातिरिक्तद्वारेण प्रेतनिर्हरणे, पूर्वः साहसदण्डः। द्वाःस्थानां द्वाररक्षिणां द्वारान्तरनिर्णयनमप्रतिषेधतां, द्विशतं पणद्विशतदण्डः। श्मशानादित्यादि। न्यासे स्थापने, स च बालानाथादीनाम्। शेषं स्पष्टम्।

विषण्णालिकमिति। यामतूर्यं यामे यन्त्रणीयजनसञ्चारे प्रहरे भवं तूर्यं तत्सञ्चारनिरोधसूचकं वाद्यघोषणं यामतूर्यं, तत्, उभयतोरात्रं रात्रेरुभयोः पार्श्वयोः, अर्थात् प्रथमपश्चिमयामयोः कर्तव्यमिति शेषः। तत्रापि घटिकानियमार्थमाह — विषण्णालिकं विवर्जिताः षट् नालिकाः रात्रिपूर्वपश्चिमभागसंबन्धिन्यो यस्मिंस्तद् यथा भवति तथा, रात्रेरादितः षट्सु घटिकास्वतीतासु अन्ततश्च षट्सु घटिकास्ववशिष्टास्वित्यर्थः। इह उभयतोरात्रमिति रात्रिमुभयत इत्यर्थेऽव्ययीभावः समासान्तश्चार्षः। तूर्यशब्द इति। श्रूयमाणे, राज्ञो, गृहाभ्याशे गृहसमीपे सञ्चरतामिति शेषः, सपादपणम् अक्षणताडनं पादाधिकपणोऽकालसञ्चारदण्डः भवति। तच्चाक्षणसञ्चारदण्डनं किं सर्वरात्रियामविषयं, नेत्याह—प्रथमपश्चिमयामिकं प्रथमयामशेषसञ्चारविषयं पश्चिमयामशेषसञ्चारविषयं चेत्यर्थः। द्वितीयतृतीययामसञ्चारविषयमाह—मध्यमेत्यादि। मध्यमयामिकम् अक्षणताडनं, द्विगुणम् अर्धतृतीयपणम्। इदं सर्वं नगरान्तःसञ्चारविषयं, नगरबहिर्देशसञ्चारविषयमाह — बहिरिति। बहिर्नगराद् बहिर्नगरपरिसरदेशे, चतुर्गुणं राजगृहाभ्याशसञ्चारोक्तदण्डचतुर्गुणम् अर्थात् पञ्चपणात्मकम् अक्षणताडनं भवति।

शङ्कनीये देशे लिङ्गे पूर्वापदाने च गृहीतमनुयुञ्जीत ।

राजपरिग्रहोपगमने नगररक्षारोहणे च मध्यमः साहसदण्डः ।

सूतिकाचिकित्सकप्रेतप्रदीपयाननागरिकतूर्यप्रेक्षाग्निनिमित्तं मुद्राभिश्चाग्राह्याः ।

चाररात्रिषु प्रच्छन्नविपरीतवेषाः प्रव्राजिता दण्डशस्त्रहस्ताश्च मनुष्या दोषतो दण्ड्याः ।

शङ्कनीय इति । शङ्क्यतेऽस्मिन् स्थितं पुरुषं चोरजारादित्वेनेति शङ्कनीयः तथाभूते सति, देशे निष्कुटादौ, शङ्कनीये लिङ्गे अवगुण्ठनकुड्यच्छायानिलयनादिके सति, पूर्वापदाने च पूर्वकृते चौर्यादिवृत्ते च प्रतीते सति, गृहीतम् अनुयुञ्जीत तद्देशस्थं तल्लिङ्गिनं तदपदानकं च जनं दृष्टं गृहीत्वा पृच्छेत् — कस्त्वं कुतः कस्य किमर्थमिहागतोऽसीति ।

राजपरिग्रहोपगमन इति । राजकीयावसथोद्यानादिष्वननुमतस्य प्रवेशने, नगररक्षारोहणे च नगररक्षाणां प्राकाराट्टालकादीनामारोहणे च, मध्यमः साहसदण्डः ।

सूतिकेत्यादि । सूतिकादिसप्तकनिमित्तं सूतिका प्रसूता तत्पदेन तच्छुश्रूषणं लक्ष्यते । सूतिकानिमित्तं सूतिकाशुश्रूषणे निमित्ते चिकित्सकनिमित्तं चिकित्सकपरिचरणे निमित्ते प्रेतनिमित्तं शवनिर्हरणे निमित्ते प्रदीपयाननिमित्तं दीपेनात्मानं प्रकाश्य गमने निमित्ते नागरिकतूर्यनिमित्तं नागरजनसमूहनचिह्नतूर्यवादने निमित्ते प्रेक्षानिमित्तं राजानुज्ञातनाटकादिप्रयोगदर्शने निमित्ते अग्निनिमित्तं च स्वपरगृहाद्यग्निदीपने निमित्ते च अग्निग्रहणस्योपलक्षणार्थत्वादन्यस्मिन्नपि भयहेतौ निमित्ते, अग्राह्याः अक्षणसञ्चारिणो न ग्राह्याः । किन्तु निमित्तं परीक्ष्य मोक्तव्या इत्यर्थः । तथा मुद्राभिश्चाग्राह्याः मन्त्रिनागरिकादिमुद्रोपेताश्चाक्षणचारिणो न ग्राह्याः ।

चाररात्रिष्विति । चारः सर्वसञ्चारः तत्सम्बन्धिनीषु रात्रिषु अनुमतसर्वसञ्चारासु महोत्सवादिरात्रिष्वित्यर्थः, प्रच्छन्नविपरीतवेषाः प्रच्छन्ना अवगुण्ठनादिसंवृतस्वरूपाः विपरीतवेषाः पुंवेषाः स्त्रियः स्त्रीवेषाः पुरुषाश्च राजाज्ञानिष्कासिताः, प्रव्राजिताः परिव्राजकाः, दण्डशस्त्रहस्ताश्च दण्डपाणयः शस्त्रपाणयश्च, मनुष्याः, दोषतो दण्ड्याः परीक्ष्य यथादोषोपलम्भं दण्डनीयाः ।

रक्षिणामवार्यं वारयतां वार्यं चावारयतामक्षणद्विगुणो दण्डः । स्त्रियं दासीमधिमेहयतां पूर्वः साहसदण्डः, अदासीं मध्यमः, कृतावरोधामुत्तमः, कुलस्त्रियं वधः ।

चेतनाचेतनिकं रात्रिदोषमशंसतो नागरिकस्य दोषानुरूपो दण्डः, प्रमादस्थाने च ।

नित्यमुदकस्थानमार्गभूमिच्छन्नपथवप्रप्राकाररक्षावेक्षणं, नष्टप्रस्मृतापसृतानां च रक्षणम् ।

बन्धनागारे च बालवृद्धव्याधितानाथानां जातनक्षत्रपौर्णमासीषु विसर्गः । पुण्यशीलाः समयानुबद्धा वा दोषनिष्क्रयं दद्युः ।

रक्षिणामिति । अवार्यम् अभ्यनुज्ञाताक्षणसञ्चारं सूतिकाशुश्रूषुप्रभृतिं, वारयतां, वार्यं च सामान्यजनम्, अवारयतां, रक्षिणां नागरिकपुरुषाणाम्, अक्षणद्विगुणः अक्षणसञ्चारविहितदण्डाद्विगुणः सार्धपणद्वयात्मकः, दण्डः । स्त्रियं दासीम् अन्यदीयाम्, अधिमेहयतां बलाद् गच्छतां रक्षिणां, पूर्वः साहसदण्डः । अदासीं गणिकाम् अधिमेहयतां, मध्यमः साहसदण्डः । कृतावरोधां दासीमदासीं वा केनचिद् भार्यात्वेन परिगृहीताम्, अधिमेहयताम्, उत्तमः साहसदण्डः । कुलस्त्रियम्, अधिमेहयतां, वधः प्राणवियोजनं दण्डः ।

चेतनाचेतनिकमिति । चेतनभवमचेतनभवं च, रात्रिदोषं रात्रिदृष्टममङ्गलम्, अशंसतः अनिवेदयतः, नागरिकस्य पौरस्य, दोषानुरूपो दण्डः कल्प्यः । प्रमादस्थाने च प्रमादो रक्षिपुरुषाणां रक्षाव्यापारशैथिल्यं तस्य स्थाने, हेतुभूते मद्यपानादौ च, दोषानुरूपो दण्डः ।

नित्यमिति । उदकस्थानानि नदीकूपतटाकादीनि, मार्गाः प्रवेशनिर्गमद्वाराणि, भूमयः स्थलानि, छन्नपथाः सुरुङ्गादिमार्गाः, वप्राः प्राकाराधाराः, प्राकारा वरणाः, रक्षाः अट्टालकपरिखादयः, एषामुदकस्थानादीनां सप्तपदार्थानामवेक्षणं परीक्षणं, नित्यं प्रतिदिवसानुष्ठेयं कर्म भवति नागरिकस्य । नष्टप्रस्मृतापसृतानां च नष्टानां स्वामिप्रमादगलितानां भूषणादीनां प्रस्मृतानां स्वामिविस्मृतानाम् अपसृतानां स्वयमपगतानां द्विपदचतुष्पदानां च, रक्षणं, नित्यं नियतानुष्ठेयम् आ स्वामिदर्शनात् ।

बन्धनागारे चेति । कारागृहे च स्थितानां, बालादीनां चतुर्णां, जातनक्षत्रपौर्णमासीषु राज्ञो वार्षिकजन्मर्क्षोत्सवेषु पूर्णिमासु च, विसर्गः बन्धनगृहाद् मोक्षणं, कर्तव्यमिति शेषः । पुण्येत्यादि । पुण्यशीलाः धर्माचरणस्व-

दिवसे पञ्चरात्रे वा बन्धनस्थान् विशोधयेत् ।
कर्मणा कायदण्डेन हिरण्यानुग्रहेण वा ॥
अपूर्वदेशाधिगमे युवराजाभिषेचने ।
पुत्रजन्मनि वा मोक्षो बन्धनस्य विधीयते ॥

इति कौटलीयार्थशास्त्रे अध्यक्षप्रचारे द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः
नागरिकप्रणिधिः । आदितः सप्तपञ्चाशः ॥
एतावता कौटलीयस्यार्थशास्त्रस्याध्यक्षप्रचारो
द्वितीयमधिकरणं समाप्तम् ॥

भावाः कुतोऽपि यादृच्छिकाद् वृत्तव्यतिक्रमात् प्रसक्तकारागृहप्रवेशा इत्यार्थे, समयानुबद्धा दोषनिष्क्रयं दद्युः समयेन आयतिविशुद्धिप्रातिभाव्यसंविदा प्रतिबद्धाः कृतदोषानुरूपं हिरण्यदण्डं दद्युः, बन्धनगृहे प्रवेशाभावाय। तदिदं बन्धनगृहप्रवेशनपक्षप्रतिक्षेपकं पक्षान्तरं वाशब्दो द्योतयति ।

अध्यायान्ते श्लोकावाह—**दिवस** इति । दिवसे प्रतिदिवसं, पञ्चरात्रे वा प्रतिपञ्चरात्रं वा, बन्धनस्थान्, विशोधयेत् विशोधनं दण्डग्रहणेन दोषनिष्क्रयं कारयेत् । कथं, कर्मणा भारवहनशकटाकर्षणादिना दण्डदानासामर्थ्ये, कायदण्डेन शरीरताडनादिना कर्मकरणासौकर्ये, हिरण्यानुग्रहेण वा हिरण्यग्रहणरूपेणानुग्रहेण वा बन्धनस्थगुणित्वे । इह केचिद् 'विशोधयेदि'-त्यस्यावृत्त्या 'बन्धनगतान् विशोधयेत् सुस्था दुःस्था वेति परीक्षेते'त्यर्थान्तरमपि संगृह्णन्ति ॥

बद्धमोक्षनिमित्तान्याह — **अपूर्वे**त्यादि। अपूर्वदेशाधिगमे शत्रुजयनिमित्ते नूतनदेशलाभे । शेषं सुगमम् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
आध्यक्ष्याख्याधिकरणं द्वैतीयीकमपूर्यत ॥

इति श्री**यज्ञिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्री**रामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु कौटलीयार्थशास्त्रव्याख्यायां **श्रीमूला**ख्यायाम् अध्यक्षप्रचारे द्वितीयाधिकरणे षट्त्रिंशोऽध्यायः नागरिकप्रणिधिः ।
अध्यक्षप्रचारो द्वितीयमधिकरणं समाप्तम् ॥

प्रथमसम्पुटः समाप्तः ।

शुभं भूयात् ।

शुद्धिपत्रम् ।

पृष्ठम्.	पङ्क्तिः.	अशुद्धम्.	शुद्धम्.
१७	२४	च	वा
५६	२०	वन्तिभ	भवन्ति
६६	१८	ण	णे
,,	१५	या	यो
३१३	२७	त्र धे	त्र पष्ठौही भारवहनसम
३३०	२५	नी, ह	नी ह
३५८	८	मप्ताम्	माप्तम्

TRIVANDRUM SANSKRIT SERIES

No. LXXX.

THE

ARTHASÂSTRA

OF

KAUṬALYA

with the commentary Srîmûla of

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÂSTRI.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland,

[illegible]

EDITED BY THE COMMENTATOR.

Part II—3, 4, 5, 6 & 7 Adhikaranas.

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1924

Inland Price Rs. 8.] [Foreign 16 s.

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८०.

कौटलीयम्

अर्थशास्त्रं

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
लण्डनपुरस्थराजकीयैष्याखण्डीयविद्यासेवकसमाजपूज्यसभ्यपदभाजा

महामहोपाध्यायेन

त. गणपतिशास्त्रिणा

विरचितया श्रीमूलाख्यया व्याख्यया
समुपेतं
तेनैव संशोधितम् ।

द्वितीयः सम्पुटः—तृतीयचतुर्थपञ्चमषष्ठसप्तमाधिकरणानि ।

तच्च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितम् ।

कोलम्बाब्दाः १०९९, क्रैस्ताब्दाः १९२४.

PREFACE.

This is the second part of the Arthaśāstra of Kauṭalya, in which are included the next five Adhikaraṇas only, in order that it may be equal in size to the first.

When this volume was about to be published, a copy of Dr. Jolly's edition of the Arthaśāstra published at Lahore, came to hand, the readings of which, as well as of the Mysore edition, as compared with those of the Trivandrum edition, will be given as an appendix to the third part.

Dr. Jolly's introduction deals with many questions connected with the work. We shall consider some of his arguments in support of his theories, as also of others referred to therein.

From the closing verse of the first chapter,

सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥

and from the closing verse of the tenth chapter of the second Adhikarana,

सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः ॥

and from the two stanzas at the end of the work,

येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम् ।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च ॥

as well as from the fact that quotations cited under the name of Kauṭalya or Kauṭalīya are all found in the work, it is quite proper that it should be regarded as the production of Chāṇakya alias Vishṇugupta, a contemporary of Chandragupta Maurya. But Drs. Winternitz, Jolly and Keith, hold that the Arthaśāstra was not the production of a person named Kauṭalya, a contemporary of Chandragupta Maurya, on the following grounds:—

(i) no reference is made in the work to the great empire of Chandragupta, which is said to have been built up by Chāṇakya (Dr. Winternitz), nor is the name Pāṭaliputra, the capital of the empire, mentioned, (Dr. Jolly.);

(ii) the theories propounded refer rather to the governance of a number of small independent states than of a great empire like that of Chandragupta, (Dr. Winternitz);

(iii) no great person named Kauṭalya did exist during the time of Chandragupta Maurya, as he is not mentioned by Megasthenes, (Dr. Jolly);

(iv) the person referred to frequently, as Kauṭalya, is not the author, because, the opinion of Kauṭalya in the course of the discussion of ministerial usurpation, dealt with in the sixth chapter of the Yogavritta Adhikaraṇa is criticised by Bhāradvāja; and, it is impossible, if Kauṭalya was the author of the work, that his opinion would be criticised by a previous Āchārya, (Dr. Keith);

(v) the word Kauṭilya meaning as it does falsehood and hypocrisy could not possibly have been adopted as the name of the famous minister of Chandragupta (Drs. Keith and Winternitz).

Let us now consider these arguments.

With regard to the first, it may be said that the author could have referred to the empire of his own making, either (*a*) in the course of the work, as an illustration, or (*b*) at the beginning or end of the work, when he makes himself known. Of these two positions, the first is not possible; for, in a general treatise on the science of polity, it is but proper for an author to quote as authority the government of ancient kings well known to Itihāsas, instead of the one of his own making, lest he should be deemed as praising himself. As for the second, the author can be said to refer to the empire of Chandragupta, when he says at the end of the work in the sloka,

'येन शस्त्रं च शास्त्रं च नन्दराजगता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥'

that that person is the author of the work, who pulled down the empire of the Nandas. From this it may be inferred that reference is also made to the place where he lived, viz. Pāṭaliputra. It will be noted here that the author never fails to make mention of towns and cities, whenever he finds necessity to do so, as when he speaks of Magadha, Mathura, etc., as the sources of silk, cotton and other goods. If Pāṭaliputra is not mentioned in the course of the work, it is because there is no context for it.

The second argument is not conclusive. The theories of government described are as much applicable to a great empire as to small and independent states. Besides, the author dwells especially on the mutual duties of emperor and subject kings in the fifteenth and sixteenth chapters of the seventh Adhikaraṇa.

The third argument cannot be accepted. How can the record of Megasthenes which is admittedly a mixture of real and imaginary statements, be an authority on a subject which itself is not mentioned therein? Granting that Megasthenes knew of Kauṭalya, it does not necessarily follow that he should have mentioned that name in his records. It is possible that Megasthenes came to India many years after the death of Kauṭalya when Chandragupta was in full liberty and when the events connected with the name of Kauṭalya began to fade away from the memory of the subjects. Again, he might have heard of Kauṭalya from mere hearsay and because he did not know much of him he might not have cared to say anything regarding him.

Thus the probabilities being more for not mentioning the name of Kauṭalya by Megasthenes, how can it be said that the mighty Kauṭalya who is known to fame for thousands of years and whose exploits are recorded in the Vishṇu, Vāyu and other authoritative Purāṇas did not exist during the time of Chandragupta? Dr. Jolly's argument so far as it based on the accounts of Magasthenes is tantamount to saying that, in solving problems concerning Indian antiquities, even the silence of Megasthenes is to be regarded as a piece of evidence. It further implies an utter disregard of such eminent authorities as the Vishṇu Purāṇa, Vāyu Purāna, KāmandakIya NItisāra etc.

The fourth argument is not correct. For Kauṭalya is not criticised here by Bhāradvāja as said by Dr. Keith. It is usual for writers either to state first the views of others and the reasons therefor and then to criticise and establish their own views, or to state their own views first, and then criticise the views of others. It is the latter method that is resorted to here by the author. The purport of the passages beginning from 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' and ending with 'प्रकृतिक्रोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः' is this:" My opinion is that the minister shall make the prince assume the powers of sovereignty, while Bhāradvāja, an ancient Āchārya, thinks quite the contrary (that is, the minister shall take upon himself the powers of sovereignty) which is full

of evils as it excites the anger of the people and is unrighteous and uncertain of success" (Vide Sanskrit introduction for a fuller discussion).

The fifth argument is not convincing. The name Kauṭilya though a bad one might have been derived like the name Kautsa as stated by Prof. K. V. Rangasvami Iyengar in his additional notes on "Considerations on some aspects of Ancient Indian Polity". In fact, the word Kauṭilya (इकारमध्य) is a mistake handed down to us by scribes and readers. All the ancient manuscripts of the text and the commentaries of the Arthaśāstra, available here, read throughout as Kauṭalya (अकारमध्य), and not as Kauṭilya. Kuṭala is the name of a Rishi who founded the Kuṭala Gotra and any descendant of that Gotra may be called Kauṭalya. This is the reason why the author of Jayamangalā, a commentary on the Nītisāra of Kāmandaka observes that Kauṭalya is the name given to the author of the Arthaśāstra after his Gotra, Kuṭala. A few other details regarding the name are given in the introduction to the first volume

Thus are refuted the contentions that at the time of Chandragupta Maurya a great man named Kauṭalya never existed and that the extant Arthaśāstra could not have been written by a contemporary of Chandragupta. We have now arrived at the conclusion that the Arthasāstra was written by a contemporary of Chandragupta Maurya, which also makes definite the date claimed for it, viz., 4th century B. C.

We shall now turn to a few minor points which in the opinion of Dr. Jolly and others are regarded as inconsistent with the early date assigned to it;

1. The number of chemical substances mentioned in the Arthaśāstra being larger than that in Suśruta and other works of the kind points to a later stage of the development of the science of chemistry at the time of Kauṭalya than at the time of Suśruta and thus testifies to the posteriority of the Arthaśāstra (Winternitz). But this is an unwarranted inference. It is quite possible that at the time the science had attained an advanced stage, Suśruta dealt with only a small number of chemicals, because his was a purely medical work, admitting mention of such substances only as were relevant to the subject. But the Arthaśāstra is not limited in scope. It concerns itself with a variety of subjects such as the manufacture of gold and other precious metals, the preparation

of poison etc., and consequently it refers to a good number of chemical substances. But in the Dhātukautalīya* and similar other works on chemistry one might expect an exhaustive treatment of chemicals. What follows from this is, the extent of the mentioning of chemical substances wherever necessary in a work that deals primarily with other subjects cannot by itself be made the basis for fixing the age of that work.

2. The Arthaśāstra of Kauṭalya, says Dr. Jolly, has largely borrowed from the Yājnavalkyasmriti, and as the date of the latter is later than the 3rd century A. D., the Arthaśāstra should have come after it. This is not correct. For there is no evidence to show that the Yājnavalkyasmriti is later than the third century A. D. On the contrary, the date of Kautalya having been fixed as 4th century B. C. it naturally follows that Yājṇavalkya, from whom Kauṭalya has borrowed, should be anterior to the latter. What is logically true cannot be contradicted by an apparent argument. Besides, the word Yajṇavalka is mentioned in the Gargādigaṇa (गर्गादिगण) under the sūtra "गर्गादिभ्यो यञ्" of Pāṇini. It is clear from this that Pāṇini knew of a Yājnavalkya born of the Yajṇavalka Gotra. Probably the same Yājnavalkya was the author of the Smriti and therefore earlier than Pāṇini.

3. Dr. Keith is of opinion that the use of correct Trishtup stanzas in regular metre as found in the Arthaśāstra is not in favour of its early date and that the language of the work is not sufficiently archaic. It may be asked which is unsuitable to the antiquity—the use of mere Trishtup stanzas or the correctness and regularity of the four lines? Whatever it is, there is no sort of restriction in the case of a non-vedic work. Though to Dr. Keith, the language does not look archaic, to me it does look decidedly archaic, more archaic than the Mahābhāshya of Patanjali and similar other works. The matter may well be left to the judgment of Sahridayas.

4. Another scholar thinks that the Arthasāstra, covering as it does, several branches of human knowledge could not possibly be the production of a single author, but a composition by several authors. The following statement of Kāmandaka at the beginning of his Nītisāra,

वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥

* Vide introduction to the first part p. 10.

जातवेदा इवार्चिष्मान् वेदान् वेदविदां वर: ।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजस: ।
पपातामूलत: श्रीमान् सुपर्वा नन्दपर्वत: ॥
एकाकी मन्त्रशक्त्या य: शक्त्या शक्तिधरोपम: ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधे: ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥

leaves no room for doubt on this matter. Here Kamandaka ascribes the work to Vishnugupta after likening him to God Brahman in respect of his being a seer and an author of various sciences. The date of Kāmandaka is said to be the 1st century B. C., and he can certainly be credited with more accurate and reliable knowledge about Kautalya than we of the present day. Whatever may be the date of Kāmandaka, it is certain that he was far anterior to the poet Bhavabhūti. It is legitimate to surmise from the Mālatīmādhava that Bhavabhūti was conversant with the Nītitsāra of Kāmandaka as he thought it fit to give the name Kāmandaka —the traditional sense of which is restricted to the author of Nītisāra—to a female ascetic in his Mālatīmādhava who is described as proficient in the art of diplomacy. Nor is "Kamandakī" an accidental and unmeaning name given by the poet without any reference to the characteristics of the author of the Nītisāra, as Dr. Jolly thinks, for, all the characters in the Mālatīmādhava are given significant and appropriate names. The names Mālatī and Mādhava which are excitants of Sringārarasa are quite suitable to the heroine and hero. Aghoraghaṇṭa and Kapālakuṇḍalā stand for the terrible worshippers of Chāmundī, while Buddharakshitā and Avalokitā represent the disciples of the Buddhist nun. Thus when all the names of the characters are significant, it is not reasonable to regard the name Kāmandaka alone as unmeaning and accidental like Dittha (डित्थ). Further no one need doubt whether a mastery in so many fields of knowledge could ever be met with in one individual, because, when it is quite possible that a person gifted with an intellect of a very high order may become सर्वज्ञकल्प, it is not at all a wonder if he attains mastery over a number of subjects such as Kautalya is credited with.

What we have said above disproves the observation of Dr. Jolly, that the "whole work is likely to have been

composed by a single person, probably a Pandit belonging to a school of polity and law, who to render a dry subject interesting, introduced debates in which the Pūrvapaksha is put in the mouth of eminent sages or of deities whose names he got from the Mahābhārata or from tradition, while the Uttarapaksha or Siddhānta is reserved for Kautalya", in as much as the evidences furnished by Kāmandaka and other eminent writers in support of the ascription of the authorship of the Arthasāstra to Kautalya are still extant. Dr. Jolly seems to think that there were really no works composed by the ancient Āchāryas Bhāradvāja, Parāsara, Visālāksha, Brihaspati, etc., which can be regarded as the sources of the several Pakshas ascribed to them in the Arthasāstra. But we have seen in the commentary on the Yājnavalkyasmriti by Visvarūpachārya, the illustrious predecessor of Vijnānesvara long extracts from the Arthasāstra of Brihaspati and Visalāksha (T. S. Series No. 74, pp. 184, 188 and 190), and it is clear therefore that the Arthasāstra of Brihaspati and Visālāksha must have existed during the time of Visvarupachārya. In like manner, it can be inferred that the works of Bhāradvāja and other Āchāryas, who are mentioned in the Arthasāstra along with Brihaspati and Visālāksha must have once existed but disappeared subsequently.

So far we have considered in detail the chief opinions of Dr. Jolly and others. One more statement of Dr. Jolly has to be examined. It is that for the Arthasāstra there was a surname 'Samāna Tantra' (समानतन्त्र) which was hitherto unknown. Medhātithi in his commentary on the 191st sloka in the seventh chapter of the Manusmriti quotes the verse 'द्वे शते धनुषाम्' which is found in the fifth chapter of the tenth Adhikarana of the Arthasāstra of Kautalya and introduces the quotation by saying 'समानतन्त्रेणोक्तम्'. Similarly on the 205th sloka in the same chapter, he quotes 'दैवं . . . . मानुषं कर्म लोकं पालयति' which is an adaptation of the sentence 'दैवमानुषं हि कर्म लोकं यापयति' found in the second chapter of the sixth Adhikarana, and introduces this quotation by saying 'समानतन्त्रेऽपि'. From this Dr. Jolly concludes that the Arthasāstra was surnamed Samānatantra, and also says that since the phrases 'इति समानं पूर्वेण' 'इति समानम्' are found to occur in the first chapter of the fifth Adhikarana and in many other places this name is quite appropriate to the work. But this is obviously wrong. Samāntantra is a Karmadhāraya compound word which should be split as समानं च तत् तन्त्रं च and

means another Sāstra on the same subject. What is conveyed in **समानतन्त्रेणोक्तम्** is that the topic under reference is also dealt with in another sastra on the same subject. That sastra is, in fact, the Arthasāstra of Kautalya. The word **समानतन्त्र** is found not only in the Bhāshya of Medhātithi, but also in the Nyāyasūtra of Gautama **'समानतन्त्रसिद्ध: परतन्त्रासिद्ध: प्रतितन्त्रसिद्धान्त:'.** It is an expression commonly used in commentaries on sastras when another sastra is cited as authority. On no ground can it be said that Arthasāstra is meant by that word. It may here be noted that in the sastraic works the transference of a statement from one place to another (**अतिदेश**) is indicated by various phrases such as **'समानं पूवण' 'समानम्' 'पूर्ववत्' 'प्रागवत्' 'एतेन व्याख्यातम्'.** All these phrases are synonymous and the use of any of them is common to all works.

Trivandrum,
17th May 1924.

T. GAṆAPATI SĀSTRI.

उपोद्घातः ।

अयं **कौटलीयार्थशास्त्रस्य** द्वितीयः सम्पुटः । अत्र **धर्मस्थीयं कण्टकशोधनं योगवृत्तं मण्डलयोनिः षाड्गुण्यमिति** पञ्चाधिकरणानि निवेशितानि । तद्गतानां प्रमेयानामनुक्रमणी चात्र योजिता । पूर्वस्मात् सम्पुटादेतस्य परिमाणाधिकत्वं परिहर्तुमुत्तराधिकरणमिह न योजितम् ।

यावत् सम्पुटोऽयं प्रकाशनाय सज्जीकृतः, तावत् **कौटलीयार्थशास्त्रस्यैकं** नूतनं संस्करणं जर्मनिदेशीयपण्डित**जालि**कृतमिति पाञ्चनदाल्लवपुराद् बहिरवतीर्णं **दृष्टं**, यदीयान् पाठविशेषान् **मैसूरपुस्तकगतैरस्मदीयपुस्तकगतैश्च** पाठविशेषैः सहान्योन्यव्यतिरेकावगमार्थमस्मदीयतृतीयसम्पुटस्य परिशिष्टे प्रदर्शयिष्यामः । अस्य तु **लवपुरी**यस्य पुस्तकस्योपोद्घाते **जालिना कौटलीयमर्थ**शास्त्रमधिकृत्य बहु प्रपञ्चितम् । तत्र **दृष्टान्** कांश्चित् प्रमाणविकलांस्तदीयान् परकीयांश्चाभिप्रायान् इह विचारयामः ।

"सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम् ।
कौटल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम् ॥"

इति प्रथमाध्यायान्तिमश्लोकात्,

"सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च ।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः ॥"

इति द्वितीयाधिकरणदशमान्तिमश्लोकात्,

"येन शस्त्रं च शास्त्रं च **नन्दराज**गता च भूः ।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम् ॥

दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम् ।
स्वयमेव **विष्णुगुप्त**श्चकार सूत्रं च भाष्यं च ॥"

इति ग्रन्थशेषश्लोकाभ्यां, कौटलीयनाम्ना कौटल्यनाम्ना च ग्रन्थान्तरेषु प्रमाणतयोपात्तानां वाक्यानां ग्रन्थेऽस्मिन्नुपलम्भाच्चास्य प्रणेता स एव **चन्द्रगुप्तोप**जीवितो **विष्णुगुप्ता**परनामा साक्षाच्चाणक्य इति हि न्याय्या लोकस्य प्रतीतिः ।

अत्राप्याश्चर्यं द्वित्रा विप्रतिपन्ना उपलभ्यन्ते । तेष्वेक **आस्त्रिया**देशीयः पण्डितो **विण्टरनिट्स्**नामा, अन्यो **जर्मनि**देशीयो **जालि**नामा, अपरः **कीथ्**संज्ञ आङ्गलेयपण्डितः । ते ह्येककण्ठ्यादूहन्ते —

चन्द्रगुप्तकालिकः **कौटल्यो** नाम कश्चिद् अस्यार्थशास्त्रस्य कर्ता नासीदिति । ऊहहेतूंश्चोल्लिखन्ति —

१. **चन्द्रगुप्त**साम्राज्यं स्वाधिष्ठितं ग्रन्थे क्वापि न सूचितं, चन्द्रगुप्तस्य स्थानीयं **पाटलीपुत्रं** च न स्मृतमिति,

२. क्षुद्रक्षुद्रस्वतन्त्रराज्यतन्त्रणरीतेरुपदेशेऽपि साम्राज्यतन्त्रणरीतिस्तत्र नोपदिष्टेति,

३. चन्द्रगुप्तकाले **कौटल्य**नामा यथाप्रतीतमाहात्म्यशाली कश्चित् पुरुषविशेष एव तावन्न स्थितः **मेगास्तनीश**नाम्ना यवनेन **चन्द्रगुप्त**संस्तविना लिखिते चरितनिबन्धे तन्नामाग्रहणादिति,

४. **कौटल्यः कौटल्य** इति ग्रन्थे योऽसकृन्नाम्ना निर्दिश्यते स ग्रन्थकाराद् भिन्न एव योगवृत्तषष्ठाध्याये 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्युपक्षिप्तस्य कौटल्यमतस्य 'नैवमिति भारद्वाजः' इति भारद्वाजेन प्रतिक्षेपणात्, कौटल्यस्य प्रकृतार्थशास्त्रकर्तृत्वे पूर्वाचार्येण भारद्वाजेन तन्मतप्रतिक्षेपणायोगादिति,

५. **कौटिल्य** इति नामधेयमेव तावत् गर्हार्थत्वाद् ग्रन्थकर्ता स्वीयत्वेन नोपाददीतेति च ।

त एतेऽत्यन्तनिःसारा मे प्रतिभान्ति । तथाहि —

न तावत् प्रथमो हेतुः शक्यशङ्कः, **चन्द्रगुप्तसाम्राज्यं स्वाधिष्ठितं कौटल्येन** किं ग्रन्थमध्येऽर्थवादप्रसङ्गात् स्मर्तव्यम् आहोस्विद् ग्रन्थस्यादावन्ते वा स्वात्मनिवेदनप्रसङ्गात् स्मर्तव्यम् ऊहको मन्यते । नाद्यः पक्षः, सर्वराजसाधारणराज्यतन्त्रोपदेशपरे शास्त्रेऽस्मिन्नितिहासप्रसिद्धान्येव राजवृत्तान्यार्थवादिकतयोदाहर्तुमुचितानि, न तु स्वाधिष्ठितस्य साम्राज्यस्य वृत्तम् । तद्धि वर्ण्यमानं प्रत्युत विकत्थनतामेव वर्णयितुः प्रत्याययेत् । द्वितीयपक्षे तु 'येन

शस्त्रं च शास्त्रं च' इति ग्रन्थान्तश्लोके नन्दराज्योन्मूलयितृत्वमात्मनो वदता ग्रन्थकृता स्वाधिष्ठितं चन्द्रगुप्तसाम्राज्यं सूचितमेव । एतेन पाटलीपुत्रास्मरणमपि समाहितं, नन्दराज्योन्मूलनकर्तृत्वकथनेन स्वाधिष्ठितदेशनगरादेरप्युक्तप्रायत्वात् । ग्रन्थमध्ये तु प्रसङ्गाभावात् पाटलीपुत्रं न स्मृतम् । मगधमथुरादिकं हि पत्त्रोर्णाकार्पासादिद्रव्यविशेषोत्पत्तिस्थानत्वात् कोशप्रवेश्यरत्नपरीक्षाप्रकरणादौ द्रव्यविशेषोत्पत्तिस्थानप्रस्तावे स्मृतम्; पाटलीपुत्रं तु तदभावात् क्व स्मर्तव्यम् ।

द्वितीयो हेतुः शशशृङ्गायितः, यतः शास्त्रेऽस्मिन्नुपदिष्टास्तन्त्रणरीतयः क्षुद्रराज्यमहाराज्यसाम्राज्यानां सर्वेषां साधारणा एव । विशेषेण च षाड्गुण्याधिकरणस्य पञ्चदशषोडशाध्याययोर्दण्डोपनमितानां राज्ञामुपनमयितरि वृत्तिम् उपनमयितुस्तेषु वृत्तिं च प्रपञ्चयता सम्राजां तदधश्वराणां राज्ञां च परस्परतन्त्रणमुपदिष्टमेव ।

न तृतीयो हेतुः साधुः । मेगास्तनीसलिखितो हि चरितनिबन्धो भूताभूतार्थसङ्कीर्णः परिलुप्तबहुंशश्च; स कथं स्वानुक्तेऽप्यर्थे निर्णायको भवितुमर्हेत् । किञ्च जानतापि कौटल्यं मेगास्तनीसेन स्वग्रन्थे तदस्मरणं न्याय्यं संभाव्यते । मेगास्तनीसो हि कौटल्यस्वर्गप्राप्तेः परतः बहुषु वर्षेष्वतीतेषु कौटल्यपरतन्त्रत्वव्यपगमनिकामाविष्कृतनिजप्रभावपरमोर्जिते चन्द्रगुप्तस्य शासने वर्तमाने चन्द्रगुप्तगुणातिशयपरितृप्ताभिस्तन्नेतृचाणक्यगुणेषु प्रकृतिभिरनतिस्मर्यमाणेषु पश्चादेव नूनं भारतमागतः, चन्द्रगुप्तं च राजानमुपाश्रितः । तस्य चन्द्रगुप्तपरमैश्वर्यसाक्षात्कारविस्मितस्य वैदेशिकस्य पूर्ववृत्तजिज्ञासाविरहितस्य किंवदन्तीवशात् सामान्यतः श्रुतमपि कौटल्यवृत्तमनिर्ज्ञातविशेषतया न श्रद्धाया विषयो बभूव; अतस्तत् स्वनिबन्धे स नूनं न लिलेख । अविदितमेव वा सर्वात्मना मेगास्तनीसस्य चन्द्रगुप्तसंस्तवपरायणस्य कौटल्यवृत्तं सम्भाव्यते, पौरजानपदसंस्तवाल्पत्वात् । एवञ्जातीयेषु मेगास्तनीसनिबन्धे कौटल्यनामानाख्यानस्य निमित्तेषु सम्भावयितुं शक्येषु तत् कौटल्यस्य अनेकसहस्रवर्षजगद्गीयमानकीर्तेः विष्णुवायुपुराणाद्युपश्लोकितमाहात्म्यस्यासत्तां चन्द्रगुप्तकाले गमयतीति कः खलु वक्तुं व्यवस्येत् । तथा वदता नाम जालिनार्थादिदमेवोक्तं भवति — 'भरतखण्डपुरावृत्तविशेषनिर्णयविषये वस्तुतत्त्वाज्ञानावज्ञानादिनिमित्तो मेगस्तनीसस्य मूकिमापि प्रमाणं, प्रमाणमेव न

केवलं किन्तु भारतीयैः प्रमाणतया परिगृहीतस्योपपन्नार्थप्रतिपादकस्य विष्णुवायुपुराणादिपुरातनग्रन्थजातस्य प्रामाण्यमप्युपहन्ति' इति । अत्र वयमुच्चैश्चित्रीयामहे ।

न चतुर्थो हेतुः सङ्गतः, भारद्वाजेन कौटल्यमतस्यात्राप्रतिक्षेपात् । ग्रन्थकारा नाम परमतं ससाधकं प्रथममुपन्यस्य तत्खण्डनपूर्वं स्वमतं स्थापयन्ति, स्वमतं वा प्रथमं निर्दिश्य पश्चात् तद्विरुद्धं परमतमनूद्य दूषयन्ति । अनयोरुभयविषयोः समुदाचारयोर्द्वितीयः प्रकार इह ग्रन्थकारेणाश्रितः । 'एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यादिना 'प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः' इत्यन्तेन ग्रन्थेनैतदेव हि प्रतिपाद्यते — "अमात्य एकैश्वर्यं कारयेदिति मम मतं, भारद्वाजस्य तु पूर्वाचार्यस्य मतं मन्मतविरुद्धमीदृग्रूपं, तच्च प्रकृतिद्वेषजनकत्वात् पापिष्ठत्वादनियतसिद्धिकत्वाच्च बहुदोषम् इति, अर्थाच्च मन्मतं प्रकृतितोषकत्वाद् धर्मिष्ठत्वाद् नियतसिद्धिकत्वाच्चादोषं बहुगुणम्" इति च ।

अत्र हीदमवधेयम् — इह खल्वनेकाचार्यनामग्राहप्रवर्तितेष्वर्थविमर्शेषु सर्वत्र अनुपपन्नाचार्यमतखण्डनपूर्वमन्ते किमपि मतमुपपन्नं कौटल्यसम्बन्धितया नियमेन स्थाप्यते । कौटल्यश्च वस्तुतो ग्रन्थकार इति कृत्वा 'इति कौटल्यः' इत्युक्तीनां सर्वासाम् 'एवमहं मन्ये' इत्येवार्थः प्रतिपत्तव्यः । 'इत्यहमि'त्यहम्पदेनात्मनि परामर्शनीये कौटल्यपदेन परामर्शः स्वाहङ्कारपरिहारार्थ आचार्यसमुदाचारसिद्धो महाभाष्याकारादीनां महाभाष्यादौ 'गोनर्दीयस्त्वाह' इति गोनर्दीयादिपदेन परामर्शवत् । तथा च 'प्रकृते एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः' इत्यस्यायं फलितोऽर्थः—'राजव्यसनवशात् स्वायत्तीकर्तव्यतया प्राप्तमपि अखण्डं राज्यममात्यः स्वयमनपहरन् बालं राजकुमारमेवैकैश्वर्येण योजयेदित्यहं मन्ये' इति । 'एवममात्यः कारयेदित्यहं मन्ये' इत्युक्त्या सूचितम् 'एवममात्यो न कारयेदित्यन्यो मन्यते' इत्यमुमर्थम् अन्यनामग्रहणपूर्वं स्पष्टयति — 'नैवमिति भारद्वाजः' इति । केन प्रकारेण तर्ह्यमात्यः कारयेदिति भारद्वाजो मन्यत इत्याकाङ्क्षायामाह — 'प्रम्रियमाणे' इत्यादिना 'कालः कर्म चिकीर्षतः' इत्यन्तेन । एतावता भारद्वाजमतस्य स्वरूपं तत्साधकं च भारद्वाजोक्तं दर्शितं, न तु कौटल्यमतं भारद्वाजेन खण्डितं दर्शितं, साधकयुक्त्युपस्कृतस्य कौटल्यमतस्य कौटल्यप्राचीनेन भारद्वाजेनापरिज्ञाततया खण्डनायोगादिति बोद्धव्यम् । यदिदं भारद्वाजमतं ससा-

धकमुपदर्शितं, तद् भारद्वाजार्वाचीनः कौटल्यः खण्डयति — 'प्रकृतिकोपकमि'त्यादिना। अमात्येन क्रियमाणं स्वयं राज्यहरणं प्रकृतिद्वेषजनकं पापिष्ठम् अनिश्चितसिद्धिकं चेत्यतः कारणाद् भारद्वाजमतं हेयमिति कौटल्योऽभिप्रैतीत्यर्थः। एतेन कुमारराज्याभिषेचनस्य स्वाभिमतस्य प्रकृतिरञ्जकत्वधर्मिष्ठत्वैकान्तिकत्वरूपगुणयोग उपादेयत्वप्रयोजक उक्तप्रायः। एवञ्चात्र भारद्वाजस्य सम्प्रतिपन्नपूर्वाचार्यभावस्य कौटल्यमतखण्डयितृताया लेशतोऽप्यप्रतीतेः प्रत्युत कौटल्यस्यैव भारद्वाजखण्डयितृतायाः संप्रत्ययाच्च कौटल्यस्य प्रकृतग्रन्थकर्तृत्वविघटकं न किञ्चिदस्तीति स्पष्टमेव।

न पञ्चमोऽपि हेतुः समञ्जसः। यतो वक्रिमार्थतया कुत्सितापि कौटिल्यसंज्ञा कौत्सादिसंज्ञावदुपपद्यत इति प्रवक्तृरङ्गस्वाम्यार्येण समाधानमुक्तमेव। वस्तुतस्तु कौटिल्य इतीकारमध्योऽपपाठ एव पठितृलेखकप्रमादकृतः, सर्वेषु प्राचीनमूलादर्शग्रन्थेषु तद्विवरणादिषु च कौटल्य इत्यकारमध्यस्यैवैकरूप्येण पाठात्। कुटलो नाम गोत्रप्रवर्तक ऋषिविशेषः। तस्य गोत्रापत्यं कौटल्य इति। अत एव कामन्दकनीतिसारव्याख्यायां जयमङ्गलायां 'कौटल्य इति गोत्रनिबन्धना विष्णुगुप्तस्य संज्ञा' इत्युक्तम्। अधिकम् अर्थशास्त्रप्रथमसम्पुटोपोद्घाते द्रष्टव्यम्।

तदित्थं 'मौर्यचन्द्रगुप्तकाले कौटल्यनामा कश्चिद् महापुरुषो नासीदि'ति वादः, 'चन्द्रगुप्तसहचरेण नेदमर्थशास्त्रं प्रणीतं भवितुमर्हती'ति वादश्च दूरतो निरस्तः। चन्द्रगुप्तसहजीविप्रणीतत्वनिर्णयेन चार्थशास्त्रस्य कालोऽपि निर्धारितः क्रैस्तप्राचीनचतुर्थशताब्दीलक्षणः।

यत्तु ग्रन्थस्य तावत्प्राचीनतायां बाधकमिव किमपि किमपि जालिप्रभृतिभिरुपन्यस्तं, तदिदानीमालोचनीयम्। तत्र —

(१) सुश्रुताद्यपेक्षया धातुरसवादप्रकाराणामर्थशास्त्रेऽधिकतया कथनदर्शनेनास्य धातुरसवादविद्याप्रकर्षकालप्रभवत्वप्रतीत्या धातुरसवादविद्याशिशुभावावस्थाविर्भूतसुश्रुताद्युत्तरकालोत्पन्नतावगम्यत इति सुश्रुतात् क्रैस्तप्राचीनप्रथमशताब्दीभवादर्वाचीनमर्थशास्त्रमिति विण्टरनिट्सः। इदमयुक्तं — कामं सुश्रुताद्यपेक्षया धातुरसवादानामधिकाः प्रकाराः अर्थशास्त्रे प्रतिपाद्यन्ताम्। किन्तु तावता धातुरसवादशास्त्रस्य सुश्रुतादिकाले बालभावः अर्थशास्त्रकाले तरुणिमेति विभागो न कल्पयितुं शक्यः। तरुणिमदशायामेव सत्यां सुश्रुतादौ

धातुरसवादप्रकाराणामल्पानाम्, अर्थशास्त्रे बहूनां च कथनौचित्यसम्भवात्। सुश्रुतादितन्त्रं हि नाम चिकित्साशास्त्रम्। तत्र भेषजसाधनोपयोगितया यावद् धातुरसवादप्रमेयमपेक्षितं तावदेवाभिधानीयमित्यल्पमभिहितं स्यात्। अर्थशास्त्रे तु राज्यतन्त्रप्रधाने सुवर्णरजतादिसाधनाय शत्रुनिग्रहार्थौषधविशेषसाधनाय च यावदपेक्षितं तावदभिधानीयमिति पूर्वतः किञ्चिदधिकमभिहितं स्यात्। धातुरसवादप्रधाने तु शास्त्रे **धातुकौटलीया**दौ तत्सम्बद्धं प्रमेयजातं सर्वमभिधानीयमिति तत् कात्स्न्र्येनाभिहितं स्यात्। तस्माद् धातुरसवादानां प्रमेयान्तरप्रधानेषु तन्त्रेषु मनागमनाग् वा यथापेक्षमानुषङ्गिकतयाभिधानमभिधातृकालानुमानादावाकिञ्चित्करम्।

(२) याज्ञवल्कीयं धर्मशास्त्रमुपजीव्यतेऽर्थशास्त्रेण। तत्तु धर्मशास्त्रं क्रैस्ताब्दीयतृतीयशतकोत्तरकालभवमिति तदर्वाचीनतैव प्रकृतस्यार्थशास्त्रस्येति जालिः। इदं चायुक्तम्। तस्य धर्मशास्त्रस्य क्रैस्ताब्दीयतृतीयशतकोत्तरकालिकत्वे प्रमाणाभावात्। प्रत्युत कौटलीयार्थशास्त्रस्य प्रपञ्चितचरयुक्तिभिः क्रैस्तप्राचीनचतुर्थशताब्दीभवताया निर्णीततया तदुपजीव्यायाः स्मृतेस्तत्पूर्वकालिकत्वस्यैव न्यायतः प्राप्तत्वात्, न्यायप्राप्तस्य च प्रमाणाभासैर्बाधितुमशक्यत्वात्। किञ्च 'गर्गादिभ्यो यञ्' इति सूत्रे गर्गादिगणे यज्ञवल्कशब्दस्य पाठदर्शनेन पाणिनिर्यज्ञवल्कगोत्रापत्यं याज्ञवल्क्यं विदितवानिति प्रतीत्या तद्विदितस्यैव याज्ञवल्क्यस्य धर्मशास्त्रकारतायाः सम्भावितत्वेन पाणिनितोऽपि धर्मशास्त्रस्य प्रचीनत्वसम्भवाच्च।

(३) यदपि तृष्टुप्छन्दसि वाक्यशैल्यां चार्थशास्त्रस्य प्राचीनत्वं न भासत इति कीत्संज्ञो महाशय आह, तदपि न साधु। किं तृष्टुप्छन्दसः परिग्रह एव प्राचीनत्वानुगुणः आहोस्वित् तत्र पादचतुष्टयेऽपि तुल्यलक्षणयोगः? वेदादन्यत्रच्छन्दोविशेषपरिग्रहे प्राचीनार्वाचीनयोः कामचारान्नाद्यः पक्षः। पादचतुष्टये तुल्यलक्षणयोगायोगावपि प्रयोक्तुरैच्छिकावव्यवस्थिताव व्यवस्थापकौ च। वाक्यशैल्यां प्राचीनत्वं तु कीत्महाशयं प्रति न भासते, मां प्रति तु महाभाष्याद्यतिशायि प्राचीनत्वं स्फुटं भासते। तत्र निर्णयः सहृदयेष्वायत्तः।

यत् पुनः प्रकृतार्थशास्त्रप्रतिपाद्यमानयावत्प्रमेयोपद्रष्टृत्वमेकस्य कर्तुर्न सम्भवतीति मन्यमानः कश्चिदाह — इदमर्थशास्त्रं बहुभिः सम्भूय प्रकरणशः प्रणीतं पश्चादेकीकृतमिति, तदपि नोपादेयं,

"वंशे विशालवंशानामृषीणामिव भूयसाम् ।
अप्रतिग्राहकाणां यो बभूव भुवि विश्रुतः ॥
जातवेदा इवार्चिष्मान् वेदान् वेदविदां वरः ।
योऽधीतवान् सुचतुरश्चतुरोऽप्येकवेदवत् ॥
यस्याभिचारवज्रेण वज्रज्वलनतेजसः ।
पपातामूलतः श्रीमान् सुपर्वा नन्दपर्वतः ॥
एकाकी मन्त्रशक्त्या यः शक्त्या शक्तिधरोपमः ।
आजहार नृचन्द्राय चन्द्रगुप्ताय मेदिनीम् ॥
नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः ।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे ॥"

इति कामन्दकेन विष्णुगुप्तस्य बहुप्रमेयद्रष्टृतया बहुशास्त्रप्रणेतृतया च वेधस्तुल्यत्वाख्यानपूर्वं प्रकृतमहाशास्त्रकर्तृतायाः संकीर्तनात् । कामन्दको हि क्रैस्तप्राचीनप्रथमशताब्दीस्थितत्वाद् विष्णुगुप्तासन्नकालो विष्णुगुप्तचरितानां याथात्म्येऽस्मदाद्यपेक्षयाभिज्ञतमः । तस्य क्रैस्तप्राचीनप्रथमशताब्दीभवत्वविवादे वा क्रैस्ताब्दीयसप्तमशतकस्थितभवभूत्यपेक्षया प्राचीनत्वे विवादस्य नावकाशः, यतो नीतिसारकर्तरि निरूढेन कामन्दकशब्देन नीतिप्रयोगनिपुणां काञ्चित् परिव्राजिकां मालतीमाधवे व्यपदिशन् भवभूतिर्नीतिशास्त्रनिष्णातत्वसाम्यकृतं तस्यां तत्पदव्यपदेशौचित्यं पश्यतीति युक्तिमती कल्पना । न च तस्यां कामन्दकशब्दो निरर्थक एव यदृच्छया निवेशितः कविना न तु प्रसिद्धकामन्दकधर्मारोपेणेति जाल्युक्तं युक्तम्, मालतीमाधवे पात्रेष्वनर्थकसंज्ञानिवेशनस्यादर्शनात् । माधवमालत्यादयो हि शब्दाः शृङ्गारोद्दीपकवचनाः शृङ्गारिनायकनायिकादिष्वानुगुण्यमभिसमीक्ष्य संकेतिताः, अघोरघण्ट-कपालकुण्डलादयश्चामुण्डचुपासकानुगुण्यं बुद्धरक्षितादयश्च बौद्धभिक्षुकीशिष्यतानुगुण्यम् । एवं सर्वासु संज्ञासु अर्थवतीषु कामन्दकीशब्दः परं डित्थादिनामवन्निर्निमित्तं भिक्षुक्यां संकेतित इत्युक्तिः कथं नाम सङ्गता स्यात् । इत्यादिकं विचारणीयं विद्वद्भिः । किञ्च बहुप्रमेयद्रष्टा कौटल्य एको इव इति नासूया कर्तव्या । नहि पुरुषविशेषे कस्मिंश्चिल्लोकोत्तरप्रज्ञादिगुणयोगिनि सर्वज्ञकल्पत्वमपि वा द्रष्टुमशक्यं, किमुतैवञ्जातीयं बहुज्ञत्वम् ।

एतेन, जाली यदवोचत् — केनापि पण्डितेन महाभारतादिग्रन्थप्रसिद्धमहर्ष्यादिनामधेयैः कांश्चित् पूर्वाचार्यान् कल्पयित्वा तदीयत्वेन पूर्वपक्षाणां कौटल्यसम्बन्धित्वेन सिद्धान्तपक्षाणां च कल्पनभङ्ग्यार्थशास्त्रमिदं रचितमिति, तदपि परास्तं, कौटल्यकर्तृत्वस्थापकानां पूर्वोक्तकामन्दकादिवाक्यानां प्रामाण्यस्यानपन्हवनीयत्वात्। किञ्च, तथा वदतो जालेः कौटलीयार्थशास्त्रोद्भावितानां तत्तत्पक्षाणामाकरग्रन्थाः भारद्वाजादिभिः परमार्थतो न प्रणीता इति खल्वभिप्रायो गम्यते। सोऽत्यन्तायुक्तः, यतो याज्ञवल्क्यस्मृतिव्याख्यायां **विज्ञानेश्वरो**पजीव्यै**र्विश्वरूपाचार्यैः** प्रणीतायां बहूनां **बृहस्पत्य**र्थशास्त्रवाक्यानां **विशालाक्षार्थ**शास्त्रवाक्यानां च प्रमाणतयोदाहरणदर्शनेन **बृहस्पतिविशालाक्षार्थ**शास्त्रग्रन्थयो**र्विश्वरूपाचार्य**काले सत्तावधारणात् तुल्यन्यायेन तत्सहपठित**भारद्वाजाद्या**चार्यग्रन्थानामपि स्थितलुप्तत्वानुमानात्।

इत्थमुच्चावचोहैकजीवितेषु जालिमहाशयाद्यभिप्रायेषु प्रधानभूताः **कौटलीय**सम्बद्धा अभिप्राया विचारिताः; असम्यक्त्वं च तेषां विस्तरेण निरूपितम्। न चेहेतोऽधिकमवश्यविचारणीयं पश्यामः। अत इममेकमनन्योट्टङ्कितं जालिमहाशयस्यार्थविशेषाभ्यूहं लेशतो विचार्य प्रकृतमुपसंहरामः। स हि आह —'अस्ति समानतन्त्रमिति **कौटलीयार्थशास्त्र**स्य पर्यायवाचकं पदमद्ययावदविज्ञातमि'ति। स किल तं तत्पर्यायपदविशेषं मे**धातिथी**याद् **मनुस्मृति**भाष्यादूहितवान्। मनुस्मृतिसप्तमाध्यायगतस्य १९१तमश्लोकस्य भाष्ये हि 'समानतन्त्रेणोक्तम्' इति प्रतिज्ञाय 'द्वे शते धनुषाम्' इति कौटलीयार्थशास्त्र (१०अधि. ५. अध्या) श्लोकः प्रदर्शितः। २०५ तमश्लोकभाष्ये च 'समानतन्त्रेऽपि' इत्युक्त्वा 'दैवं.... ....मानुषं कर्म लोकं पालयति', इति वाक्यं कौटलीयार्थशास्त्रषष्ठाधिकरणद्वितीयाध्यायस्थस्य 'दैवमानुषं हि कर्म लोकं यापयति' इति वाक्यस्य कथञ्चिदर्थानुवादकमुदाहृतम्। तेन लिङ्गेन **कौटलीयमर्थ**शास्त्रं समानतन्त्रापरपर्यायमित्यूह्यत इति। अपि च स आह — युक्तश्च तस्मिन् समानतन्त्रशब्दव्यपदेशः 'इति समानं पूर्वेण' 'इति समानम्' इति च पञ्चमाधिकरणप्रथमाध्यायादिषु असकृदुक्तेस्तत्र दर्शनादिति। तदेतदखिलमत्यन्तमनुपपन्नम्। समानतन्त्रशब्दो ह्ययं यौगिकः कर्मधारयसमासनिष्पन्नः — समानं च तत् तन्त्रं चेति। समानतन्त्रं प्रमेयतस्तुल्यं शास्त्रान्तरं, 'समानतन्त्रेणोक्तम्' इत्यस्य प्रकृतं प्रमेयं तत्प्रतिपादकेन शास्त्रा-

न्तरेण वर्णितमित्यर्थः । तच्च शास्त्रान्तरं प्रकृते **कौटलीयं** भवति, तदीयतयोदाहृताया वाक्यानुपूर्व्याः कौटलीये समुपलम्भात् । न चायं समानतन्त्रशब्दप्रयोगो **मेधातिथि**भाष्य एवापूर्वो दृष्टः, 'समानतन्त्रसिद्धः परतन्त्रासिद्धः प्रतितन्त्रसिद्धान्त' इति न्यायदर्शनसूत्रेऽपि तद्दर्शनात् । एवं शास्त्रव्याख्यानादिग्रन्थेष्वपि शास्त्रान्तरप्रमाणीकरणावसरे समानतन्त्रशब्दप्रयोगो बहुलो दृष्टः । न हि तत्र समानतन्त्रपदं कौटलीयबोधकम् । एतेन **कौटलीय**स्य समानतन्त्रव्यपदेशौचित्यसमर्थनं जालिकृतं प्रत्युक्तम् । किञ्च, शास्त्रग्रन्थेषु क्वचिदुक्तस्यान्यत्रातिदेशो बहुभिः प्रकारैः क्रियते- क्वचित् 'समानं पूर्वेणे'ति, क्वचित् 'समानम्' इति, क्वचित् 'पूर्ववदि'ति, क्वचित् 'प्राग्वदि'ति, क्वचिद् 'एतेन व्याख्यातमि'त्येवमादिभिः । सर्वे चैते प्रकाराः समानार्थाः; तत्रान्यतमस्यासकृदाश्रयणमप्यविशिष्टमेव सर्वग्रन्थेषु ॥

संग्रहश्लोकाश्चात्रैते —

आदिमध्यान्तिमाध्यायश्लोकप्रामाण्ययोगतः ।
कौटल्यनाम्ना वाक्यानां स्मृतानामाकरत्वतः ॥
वाक्यशैलीसमुन्नेयपुराणत्वानुगुण्यतः ।
कामन्दकोपजीव्यत्वात् तद्गीतमहिमत्वतः ॥
यश्चन्द्रगुप्तसचिवो विष्णुवाग्वादिविश्रुतः ।
सोऽस्य कर्ताऽर्थशास्त्रस्य **कौटल्य** इति निर्णयः ॥

अनन्तशयनम् । **त. गणपतिशास्त्री.**
१७-५-१९२४

द्वितीयसम्पुटस्य विषयानुक्रमणी ।

धर्मस्थीयं तृतीयमधिकरणम् ।

कण्टकशोधनं चतुर्थमधिकरणम्

योगवृत्तं पञ्चममधिकरणम् ।

मण्डलयोनिः षष्ठमधिकरणम् ।

षाड्गुण्यं सप्तममधिकरणम् ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

कौटलीयम्

अर्थशास्त्रं

महामहोपाध्यायगणपतिशास्त्रिरचितव्याख्योपेतम् ।

(द्वितीयः सम्पुटः ।)

धर्मस्थीयं—तृतीयमधिकरणम् ।

५७, ५८. प्रक. व्यवहारस्थापना, विवादपदनिबन्धः ।

धर्मस्थास्त्रयस्त्रयोऽमात्या जनपदसन्धिसङ्ग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान् कुर्युः ।

अथ धर्मस्थीयं नाम तृतीयमधिकरणम् । धर्मेषु वर्णाश्रमजातिसम्बन्धिषु तिष्ठन्ति तान् विदन्ति अनुवर्तन्ते चेति धर्मस्थाः तानधिकृत्य प्रवृत्तं धर्मस्थीयम् । 'धर्मोपधाशुद्धान् धर्मस्थीयकण्टकशोधनेषु स्थापयेदि'ति प्रथमाधिकरणस्य दशमाध्याये, 'द्वितीये भागे पौरजानपदानां कार्याणि पश्येद्' इति एकोनविंशाध्याये चोक्तम् । के कति वा कार्यद्रष्टारः कुत्र स्थित्वा कार्यं पश्येयुरित्यादिकं वक्तुमिदमधिकरणमारभ्यते ।

तत्र **व्यवहारस्थापना** इति प्रथमं सूत्रम् । **विवादपदनिबन्धः** इति द्वितीयम् । तदुभयमेकस्मिन्नध्याये प्रतिपाद्यते । व्यवहारा नाम विवाहसंयुक्तं दायभागः इत्यादयो द्वादश वक्ष्यमाणाः, तेषां स्थापना ग्राह्याग्राह्यत्वनिरूपणमिति पूर्वसूत्रस्यार्थः । विवादपदानां पूर्ववाद्युत्तरवादिवचनानां निबन्धः व्युष्टदेशजात्यादिक्रमेण पत्रलेखनमित्युत्तरसूत्रस्य ।

प्रथमसूत्रं व्याचष्टे—**धर्मस्था** इत्यादि । धर्मस्थास्त्रयस्त्रयः, अमात्याः सहावस्थिताः, जनपदसन्ध्यादिषु जनपदसन्धावन्तपालदुर्गे संग्रहणे दशग्रामीप्रधानाधिष्ठाने चतुश्शतग्रामीप्रधाने द्रोणमुखेऽष्टशतग्रामीप्रधानाधिष्ठाने स्थानीये चेत्येतेषु, व्यावहारिकान्, अर्थान् कार्याणि, कुर्युः ।

G. P. T. 3559. 1000. 22-11-98. B

तिरोहितान्तरगारनक्तारण्योपध्युपह्वरकृतांश्च व्यवहारान् प्रतिषेधयेयुः। कर्तुः कारयितुश्च पूर्वः साहसदण्डः। श्रोतॄणामेकैकं प्रत्यर्धदण्डाः। श्रद्धेयानां तु द्रव्यव्यपनयः।

परोक्षेणाधिकर्णग्रहणमवक्तव्यकरा वा तिरोहिताः सिध्येयुः।

दायनिक्षेपोपनिधिविवाहसंयुक्ताः स्त्रीणामनिष्कासिनीनां व्याधितानां चामूढसंज्ञानामन्तरगारकृताः सिध्येयुः।

अग्राह्यव्यवहारानाह — **तिरोहितेत्यादि**। तिरोहितादीन् षड् व्यवहारान् आरप्स्यमानान् आरब्धांश्च, प्रतिषेधयेयुः। तत्र तिरोहितः प्रच्छन्नदत्तविषयः प्रच्छन्नात्तविषयश्च। स च स्वामिदेशकालक्रियाद्रव्यादिभेदेन बहुविधः। तत्र स्वामितिरोहितः स्वाम्यनुज्ञां विनैवान्येन तद्धनं यद् विनियुज्यते, देशतिरोहितः परोक्षिसाक्षिकः, कालतिरोहितः शतवर्षोपेक्षितऋणादिविषयः, क्रियातिरोहितः देशान्तरस्थे प्रमाणलेख्ये ऋणार्थनाविषयः, द्रव्यतिरोहितः द्विपाच्चतुष्पात्स्थावरेषु दृष्टचगोचरेषु तद्विक्रयः। अन्तरगारकृतः गर्भागारकृतः, नक्तकृतः रात्रिकृतः, अरण्यकृतः, उपधिकृतः छद्मकृतः, उपह्वरकृतः रहस्यकृतो दातृप्रतिग्रहीतृमात्रविदितः। कर्तुः प्रतिषिद्धव्यवहारप्रयोक्तुः, कारयितुस्तत्प्रयोजकस्य च, पूर्वः साहसदण्डः। श्रोतॄणां धर्मस्थानाम्, एकैकं प्रति प्रत्येकम्, अर्धदण्डाः पूर्वसाहसस्यार्धानि। श्रद्धेयानां तु निष्कपटानां तु प्रतिषिद्धव्यवहारस्पर्शिनां, द्रव्यव्यपनयः साध्यद्रव्यहानिः, न तु दण्ड इत्यर्थः।

प्रतिषिद्धापवादमाह—**परोक्षेणेति**। परोक्षेण आधिकर्णग्रहणम् अप्रत्यक्षं गृहारामादिकमाधिं कृत्वा ऋणग्रहणं, सिध्येत् तिरोहितमपि। अवक्तव्यकरा वा अमुकधनममुकेन व्यवह्रियमाणं न दुष्यतीति लोकसम्प्रतिपन्ना व्यवहारा वा, तिरोहिताः स्वामितिरोहिता अपि, सिध्येयुः।

अन्तरगारकृतानुपादेयानाह—**दायेत्यादि**। दायो दायविभागस्तत्सम्बद्धः, निक्षेपः आभरणाद्यर्थं स्वर्णाद्यर्पणम् अथवा अन्तस्स्थद्रव्यरूपसंख्याप्रदर्शनपूर्वं वासनस्यार्पणं तत्सम्बद्धः, उपनिधिः अनाख्यातवस्तुगर्भसमुद्रवासनोपनिधानसम्बद्धः, विवाहसंयुक्तः स्त्रीधनविषयः इत्येतेऽन्तरगारकृताः, स्त्रीणाम्, अनिष्कासिनीनां गृहबहिरनिर्गन्त्रीणां, व्याधितानां चामूढसंज्ञानां रोगिणां चानष्टचेतनानाम्, अन्तरगारकृताः सिध्येयुः।

साहसानुप्रवेशकलहविवाहराजनियोगयुक्ताः पूर्वरात्रव्यवहारिणां च रात्रिकृताः सिध्येयुः।

सार्थव्रजाश्रमव्याधचारणमध्येष्वरण्यचराणामरण्यकृताः सिध्येयुः।

गूढाजीविषु चोपधिकृताः सिध्येयुः।

मिथस्समवाये चोपह्वरकृताः सिध्येयुः।

अतोऽन्यथा न सिध्येयुः। अपाश्रयवद्भिश्च कृताः, पितृमता पुत्रेण, पित्रा पुत्रवता, निष्कुलेन भ्रात्रा, कनिष्ठेनाविभक्तांशेन, पतिमत्या पुत्रवत्या च स्त्रिया, दासाहितकाभ्याम्, अप्राप्तातीतव्यवहाराभ्याम्,

---

रात्रिकृतव्यवहारेष्वदुष्टानाह— साहसेत्यादि। साहसयुक्तः परधनप्रसभलुण्टनसम्बद्धः अनुप्रवेशयुक्तः परधनस्वगृहानुप्रवेशनविषयः कलहयुक्तः वाक्पारुष्यादिसम्बद्धः विवाहयुक्तः प्रसिद्धः राजनियोगयुक्तः राजनियोगो राजाज्ञाप्रयुक्तो नगररक्षाधिकृतव्यापारः तद्युक्तस्तत्सम्बद्धः इति पञ्चैते व्यवहाराः, पूर्वरात्रव्यवहारिणां च वेश्याशौण्डिकादीनां च व्यवहाराः, रात्रिकृताः सिध्येयुः।

अरण्यकृतव्यवहारेष्वदुष्टानाह — सार्थेत्यादि। सार्थो वणिक्सङ्घः व्रजा गोष्ठवृत्तयो गोपालाः आश्रमो वनकुटुम्बिनः व्याधाः किराताः चारणाः लङ्घनप्लवनादिजीविनः इत्येषां मध्येषु, अरण्यचराणां वनचराणां, व्यवहाराः, अरण्यकृताः सिध्येयुः।

उपधिकृतव्यवहारानुपादेयानाह—गूढाजीविषु चेति। कूटहिरण्यादिव्यवहारिषु च, उपधिकृताः छलकृता व्यवहाराः सिध्येयु.।

उपह्वरकृतव्यवहारान् उपादेयानाह — मिथःसमवाये चेति। रहःसंप्रयोगे स्त्रीपुंसयोर्गान्धर्वविवाहनिमित्ते, उपह्वरकृताः सिध्येयुः।

अतोऽन्यथा न सिध्येयुरिति। उक्तातिरिक्तप्रकारास्तिरोहितादयो नोपादेयाः। अपाश्रयवद्भिश्चेति। अपाश्रयवन्तः परतन्त्राः तैश्च, कृताः व्यवहाराः, न सिध्येयुः। परतन्त्रान् प्रपञ्चयति — पितृमता पुत्रेण पितरि व्यवहारनिपुणे विद्यमाने पुत्रेण कृताः, पित्रा पुत्रवता पुत्रे कुटुम्बभरणक्षमे विद्यमाने पित्रा निवृत्तव्यवहारेण कृताः, निष्कुलेन भ्रात्रा कुलनिष्पतितेन भ्रात्रा कृताः, कनिष्ठेनाविभक्तांशेन कनिष्ठेन दायभागात् प्राक् कृताः, पतिमत्या पुत्रवत्या च स्त्रिया भर्तरि पुत्रे च कुटुम्बभरणक्षमे विद्यमाने स्त्रिया कृताः, दासाहितकाभ्यां दासेन स्वाम्यधीनेन आहितकेन आधीकृतेन चाधि-

अभिशस्तप्रव्रजितव्यङ्गव्यसनिभिश्चान्यत्र निसृष्टव्यवहारेभ्यः ।

तत्रापि क्रुद्धेनार्तेन मत्तेनोन्मत्तेनावगृहीतेन वा कृता व्यवहारा न सिध्येयुः । कर्तृकारयितृश्रोतॄणां पृथग् यथोक्ता दण्डाः ।

स्वे स्वे तु वर्गे देशे काले च स्वकरणकृताः सम्पूर्णचाराः शुद्धदेशा दृष्टरूपलक्षणप्रमाणगुणाः सर्वव्यवहाराः सिध्येयुः ।

ग्राहकाधीनेन कृताः, अप्राप्तातीतव्यवहाराभ्याम् अप्राप्तव्यवहारेण ऊनषोडशवयस्केन अतीतव्यवहारेण अतिक्रान्तसप्ततिवयस्केन च कृताः, अभिशस्तादिभिश्चतुर्भिश्च अभिशस्तैर्महापातकदूषितैः प्रव्रजितैः संन्यासिभिः व्यङ्गैः मूकबधिरादिभिः व्यसनिभिः स्त्रीद्यूतपानासक्तैश्च कृताः । तत्रापवादमाह — **अन्यत्र निसृष्टव्यवहारेभ्य** इति । निसृष्टव्यवहारव्यतिरेकेण, ते चेत् पितृमत्पुत्र-पुत्रवत्पित्रादयः प्रधानैरर्पितव्यवहाराधिकारास्तदा तत्कृता व्यवहाराः सिध्येयुरेवेत्यर्थः ।

निसृष्टव्यवहारेष्वपि तेषु विशेषमाह — **तत्रापीति** । निसृष्टव्यवहारेष्वपि मध्ये, क्रुद्धेन जिघांसुना, आर्तेन दुःखिना, मत्तेन हर्षवता, उन्मत्तेन विभ्रान्तचित्तेन, अवगृहीतेन वा दण्डितेन वा, कृताः व्यवहाराः न सिध्येयुः । **कर्तृकारयितृश्रोतॄणां पृथग् यथोक्ता दण्डा** इति । ये प्रतिषिद्धान् व्यवहारान् कुर्वन्ति कारयन्ति शृण्वन्तश्च साक्षीभवन्ति, तेषां प्रत्येकं यथाविहिताः दण्डा भवन्ति ।

सर्वापवादमाह — **स्वे स्वे** इति । स्वे स्वे वर्गे स्वकरणकृताः स्वस्वजातौ स्वक्रियाक्रमकृताः, स्वे स्वे देशे अरण्यादौ अरण्यादिचरैः स्वकरणकृताः, स्वे स्वे काले च रात्रौ रात्रिव्यवहारिभिः दिवा दिवाव्यवहारिभिश्च स्वकरणकृताश्च, सर्वव्यवहाराः सिध्येयुः । संपूर्णचाराः राजमार्गो दिवा अर्थिप्रत्यर्थिसान्निध्यमित्येवमाद्यपेक्षितदेशकालादिसमुदाचारश्चारः, क्वचिदाचार इत्येव पाठः । स संपूर्णः अविकलनिर्वृत्तः येषु ते तथाभूताः, व्यवहाराः, शुद्धदेशाः दिशन्ति उपदिशन्ति स्वोपलब्धमर्थं प्राड्विवाकाय ज्ञापयन्तीति देशाः साक्षिणः ते शुद्धाः परोक्षित्वादिदोषरहिताः येषु ते तथाभूताः, दृष्टरूपलक्षणप्रमाणगुणाः दृष्टं साक्षात्कृतं रूपमाकृतिः लक्षणं व्यावृत्तिचिह्नं प्रमाणं माषगुञ्जादि आढकद्रोणादि वितस्तिहस्तादि च गुणः शुक्लनीलभ्राजिष्णुत्वादिश्च येषु ते तथाविधाः, सर्वव्यवहाराः, सिध्येयुः ।

पश्चिमं चैषां करणमादेशाधिवर्जं श्रद्धेयम् ।

संवत्सरमृतुं मासं पक्षं दिवसं करणमधिकरणमृणं वेदकावेदकयोः कृतसमर्थावस्थयोर्देशग्रामजातिगोत्रनामकर्माणि चाभिलिख्य वादिप्रतिवादिप्रश्नानर्थानुपूर्व्या निवेशयेत् । निविष्टांश्चावेक्षेत ।

त एते व्यवहारा उपादेया लेख्यप्रमाणकाः प्रवर्तन्ते । तच्च लेख्यं पूर्वकालकृतमेकमुत्तरकालकृतं चापरमित्येवं द्वयोरेकार्थगोचरयोर्लेख्यकरणयोः पूर्वोत्तरकालजन्मनोर्यदि कदाचिदुपलब्धिस्तदा किं प्रतिपत्तव्यमित्याह —**पश्चिमं चैषां करणमिति** । एतत्सम्बन्धि उत्तरकालकृतं लेख्यकरणं, श्रद्धेयं विश्वसनीयं पूर्वकरणपरीक्षापुरस्सरप्रवृत्तिकत्वादुत्तरकरणस्येत्यभिप्रायः । **आदेशाधिवर्जमि**त्यपवादः । आदेशं बन्धं च वर्जयित्वा, आदेशः आदानम् अर्थस्य स्वत्वेन स्वीकरणं क्रयः प्रतिग्रहो वेति यावत् आधिस्तु बन्धो भोग्यरूपः । आदेशाध्योस्तु विषये पूर्वकरणमेव श्रद्धेयं, यतोऽर्थस्य परसंस्थत्वेन तद्भुक्त्युपोद्बलितस्य पूर्वलेख्यस्य प्राधान्यं न हीयते । तथाच याज्ञवल्क्यः —

"सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया ।
आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा ॥" इति ॥

इति व्यवहारस्थापना समाप्ता ।

अथ **विवादपदनिबन्ध** इति सूत्रम् । तदर्थादिकं तु वर्णितं प्रागेव ।

संवत्सरमित्यादि । संवत्सरं राजवर्षोपलक्षितं कलिशकादिवर्षम्, **ऋतुं** वसन्तादिं, मासं चैत्रादिं, पक्षं मासार्धं, दिवसं तिथिं, करणं बवादिकं तिथ्यर्धम्, अधिकरणं स्थानीयद्रोणमुखादि, ऋणं वृद्ध्यर्थप्रयुक्तं धनं, वेदकावेदकयोः वेदकः परोत्पादितपीडानुभवितृत्वात् तन्निवेदयितृत्वाद्वा अभियोक्ता अवेदको वेदकविपरीतोऽभियोज्यः तयोः, कीदृशयोः, कृतसमर्थावस्थयोः समर्थावस्था सम्बद्धावस्था अधमर्णोत्तमर्णभावलक्षणः सम्बन्धः स कृतो याभ्यां तथाभूतयोः समर्था क्षमा उत्तमाधमर्णभावावस्था कृता याभ्यां तथाभूतयोर्वा, कृतसमस्थावस्थयोरिति पाठे समस्थशब्दस्य समानस्थितिकार्थतया कृतसमानस्थितिकसम्बन्धयोरित्यर्थः । देशग्रामादीनि षट् च, अभिलिख्य, वादिप्रतिवादिप्रश्नान् अभियोक्त्रभियोज्यविषयाणि चोद्यानि अर्थानुपूर्व्या अर्थगुरुलघुभावक्रमेण, **निवेशयेत्** अभिलिखेत् । **निविष्टांश्च, अवेक्षेत** शोधयेद् अधिकोद्धापार्थं न्यूनप्रतिपूरणार्थं च ।

निबद्धं पादमुत्सृज्यान्यं पादं सङ्क्रामति। पूर्वोक्तं पश्चिमेनार्थेन नाभिसन्धत्ते। परवाक्यमनभिग्राह्यमभिग्राह्यावतिष्ठते। प्रतिज्ञाय देशं निर्दिशेत्युक्ते न निर्दिशति। हीनदेशमदेशं वा निर्दिशति। निर्दिष्टाद् देशादन्यं देशमुपस्थापयति। उपस्थिते देशेऽर्थवचने नैवम् इत्यपव्ययत। साक्षिभिरवधृतं नेच्छति। असम्भाष्ये देशे साक्षिभिर्मिथः सम्भाषते। इति परोक्तहेतवः।

परोक्तदण्डः पञ्चबन्धः। स्वयंवादिदण्डो दशबन्धः। पुरुष-

पराजयहेतूनाह — **निबद्धमित्यादि**। निबद्धं पूर्वलिखितं पादमुत्सृज्यान्यं पादं संक्रामति। तद्यथा — वाक्पारुष्यमिति पूर्वं विलिख्य पश्चाद् दण्डपारुष्यं वक्ति। **पूर्वोक्तं पश्चिमेनार्थेन नाभिसन्धत्ते** इति। यथा —पूर्वं पशुहिरण्यधान्यानि देयान्युक्त्वा पश्चाद् हिरण्यमात्रं देयमिति वक्ति, न तु सर्वं निर्दिशति। **परवाक्यमिति**। प्रत्यर्थ्युक्तम्, अनभिग्राह्यम् अदूषणीयमेव, अभिग्राह्य दूषयित्वा, अवतिष्ठते तूष्णीमास्ते दुष्टत्वं न समर्थयते। **प्रतिज्ञाय देशमित्यादि**। त्रयो मे साक्षिणः सन्तीत्येवमादिना संख्याविशेषेण साक्षिणं प्रतिश्रुत्य, निर्दिशेत्युक्ते न निर्दिशति तान् नामादितो निर्दिशेति कथिते नोद्दिशति। हीनदेशम् अदेशं वा निर्दिशति प्रतिज्ञातसंख्यान्यूनसंख्यान् साक्षिण उद्दिशति स्यालमातुलादीन् वा साक्षित्वानर्हान् उद्दिशति। **निर्दिष्टाद् देशादि**ति। नामत उद्दिष्टात् साक्षिणः, अन्यं, देशं साक्षिणम्, उपस्थापयति संनिधापयति। **उपस्थिते देश** इति। संनिहिते साक्षिणि, अर्थवचने स्वदृष्टमर्थं ब्रुवाणे, नैवमिति अपव्ययते नैवंविधोऽर्थ इति वदन्नपसरति। अपपूर्वो व्ययतिरनभ्युपगमार्थक आत्मनेपदी मृग्यः। **साक्षिभिरि**ति। साक्षिवाक्यैः, अवधृतं नेच्छति निर्णीतं नानुमन्यते। **असम्भाष्य देश** इति। सम्भाषणानर्हे देशे, साक्षिभिः सह, मिथः सम्भाषते रहसि मन्त्रयते। इति एवम् एतेऽन्यपादसंक्रमादयः साक्षिमिथस्सम्भाषान्ताः, परोक्तहेतवः उक्तं वचनं समर्थनं तद्विपरीतं परोक्तम् असमर्थनं तेन च तन्मूलः पराजय इह लक्ष्यते पराजयस्य हेतव इत्यर्थः। पराशब्दोपसृष्टस्य वचेः पराजिवत् स्वार्थविपरीते वृत्तिरिह द्रष्टव्या।

पराजितदण्डमाह—**परोक्तदण्डः पञ्चबन्ध** इति। साक्षिनिमित्तस्वपक्षासिद्धिमूलस्य पराजयस्य दण्डः पराजितदेयस्यार्थस्य पञ्चमांशो भवति।

भृतिरष्टांशः । पथिभक्तमर्घविशेषतः । तदुभयं नियम्यो दद्यात् ।

अभियुक्तो न प्रत्यभियुञ्जीत, अन्यत्र कलहसाहससार्थसम**वायेभ्यः । न चाभियुक्तेऽभियोगोऽस्ति ।**

अभियोक्ता चेत् प्रत्युक्तस्तदहरेव न प्रतिब्रूयात्, परोक्तः स्यात् । कृतकार्यविनिश्चयो ह्यभियोक्ता, नाभियुक्तः ।

तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति । अत ऊर्ध्वं त्रिपणा**स्वयंवादिदण्डो दशबन्ध इति** । विनैव साक्षिभ्यः स्ववादं कृतवतः पराजितस्य दण्डः पराजितदेयस्य दशभागः । पुरुषभृतिरष्टांशः व्यवहारद्रष्टृकर्मकरपुरुषवेतनमष्टभागः, स च सामर्थ्यात् कार्षापणस्यैव ग्राह्यः । **पथिभक्तमिति** । साक्ष्यानेतॄणां मार्गगतागतभोजनार्थदेयम् अर्घविशेषतः तण्डुलादिमूल्यभेदमनुसृत्य, कल्पनीयमिति शेषः । **तदुभयमिति** । पुरुषभृतिं पथिभक्तं च, नियम्यः पराजितः, दद्यात् ।

अभियुक्त इति । केनचित् कृताभियोगः, न प्रत्यभियुञ्जीत अर्थादभियोक्तारम् अनिस्तीर्णे स्वाभियोगे । तत्रापवादः — **अन्यत्र कलहसाहससार्थसमवायेभ्य** इति । कलहसाहसादिषु तु विषये प्रत्यभियुञ्जीतैव । अभियुक्तमपि केनचित् तदन्यो नाभियुञ्जीतेत्याह — **न चाभियुक्त** इत्यादि । यदाह योगीश्वरः —

> "अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ।
>
> न चाभियुक्तमन्येन नोक्तं विप्रकृतिं नयेत् ॥" इति ।

अभियोक्तेति । सः, प्रत्युक्तः अभियुक्तदत्तोत्तरः, तदहरेव न प्रतिब्रूयाच्चेत् यस्मिन् दिने प्रत्युक्तस्तस्मिन्नेव दिने प्रत्युत्तरमभियुक्तोक्त्युपमर्देन स्वपक्षसमर्थनक्षमं न दद्याच्चेत्, परोक्तः स्यात् सद्यः प्रतिवचनाभावमात्रेण स पराजितो मन्तव्य इत्यर्थः । कुत इत्याह — **कृतकार्यविनिश्चयो ह्यभियोक्ता नाभियुक्त** इति । इदमीदृशमेवं साधनीयमिति प्रागेव संप्रधार्य कार्ये प्रवृत्त इत्याभियोक्ता सपदिप्रत्युत्तरदानप्रतिबद्धः, अन्यस्तु संप्रधारणीयकार्यगतित्वान्न तथेत्यर्थः ।

अभियुक्तप्रतिवचनकालावधिमाह — **तस्याप्रतिब्रुवतस्त्रिरात्रं सप्तरात्रमिति** । तस्य अभियुक्तस्य श्रुतार्थस्य प्रतिवचनदानकालावधिस्त्रिरात्रात् प्रभृति आ सप्तरात्राद् अनुमन्तव्यः । **अत ऊर्ध्वमिति** । सप्तरात्रात् परतः,

वराध्यं द्वादशपणपरं दण्डं कुर्यात् । त्रिपक्षादूर्ध्वमप्रतिब्रुवतः परोक्तदण्डं कृत्वा यान्यस्य द्रव्याणि स्युस्ततोऽभियोक्तारं प्रतिपादयेदन्यत्र वृत्त्युपकरणेभ्यः । तदेव निष्पततोऽभियुक्तस्य कुर्यात् । अभियोक्तुर्निष्पातसमकालः परोक्तभावः । प्रेतस्य व्यसनिनो वा साक्षिवचनाः सारम् । अभियोक्ता दण्डं दत्त्वा कर्म कारयेत् । आधिं वा स कामं प्रवेशयेत् । रक्षोघ्नरक्षितं वा कर्मणा प्रतिपादयेद् अन्यत्र ब्राह्मणादिति ।

त्रिपणावराध्यं त्रिपणोऽवराध्यः अवरो यस्मिंस्तं तथाभूतं, द्वादशपणपरं द्वादशपणोत्तमं, दण्डं कुर्यात् । त्रिपक्षात् पक्षत्रयाद्, ऊर्ध्वम्, अप्रतिब्रुवतः अभियुक्तस्य, परोक्तदण्डं पराजितदण्डं पञ्चबन्धरूपं, कृत्वा, यानि अस्य अभियुक्तस्य, द्रव्याणि धान्यहिरण्यलोहदारुभाण्डादीनि स्युः, ततः तैर्द्रव्यैस्तदुद्धृतद्रव्यैर्वा, अभियोक्तारं प्रतिपादयेत् यथाप्रार्थितधनभाजं कुर्यादित्यर्थः । किं सर्वैरेवाभियुक्तद्रव्यैः, नेत्याह—**अन्यत्र वृत्त्युपकरणेभ्य** इति । कृष्यादिजीविकार्थानि हलखनित्रकुद्दालानि वर्जयित्वा । **तदेवेति** । अप्रतिब्रुवतोऽभियुक्तस्य यदुक्तं विधानं तदेव, निष्पततोऽभियोक्तृसन्निधानेऽपसरतः अभियुक्तस्य, कुर्यात् । अभियोक्तुः, निष्पातसमकालः निष्पातोऽभियुक्तसन्निधानेऽपसरणं तत्समानकालः, परोक्तभावः पराजितत्वं मन्तव्यम् । **प्रेतस्य व्यसनिनो वा साक्षिवचनाः सारमिति** । प्रमीतस्य विपद्गतस्य वाभियोक्तुरथवाभियुक्तस्य धनं साक्षिभिर्विभाव्यमानाः तत्पुत्रादयो दद्युर्गृह्णीयुर्वा । अभियुक्ते पराजिते निरुपाये किमभियोक्ता कुर्यादित्यत्राह — **अभियोक्तेति** । सः, दण्डं पराजयदण्डं, दत्त्वा स्वयं राज्ञे, कर्म कारयेत्, अर्थादभियुक्तम् । **आधिं वा स कामं प्रवेशयेदिति** । अथवा, सः अभियोक्ता अभियुक्तबन्धवन्यतममाधित्वेन कर्मकरणार्थं गृह्णीयाद् यथेच्छम् । **रक्षोघ्नेत्यादि** । वाशब्दश्चार्थे । रक्षोघ्नरक्षितम् अकुशलपरिहारार्थः शिरसि सितसर्षपप्रक्षेपो रक्षोघ्नरक्षा तद्युक्तं यथा भवति तथा, कर्मणा प्रतिपादयेत् योजयेत्, अर्थात् पराजितं तदर्पितमाधिपुरुषं वा । एतेन, कर्म कारयितुरात्मरक्षणे प्रयत्नः कर्तव्यतयोपदिष्टो द्रष्टव्यः । इतरथा हि पराजित आधिपुरुषो वा कर्म कुर्वन्नवेतनकर्मकरणनिर्बन्धमात्मनोऽसहमानः कारयितारं कदाचिज्जिघांसेदिति । 'कर्म कारयेदि'त्यस्य विधेः संकोचमाह— **अन्यत्र ब्राह्मणादितीति** । इतिशब्दात् क्षत्रियादिरपि तपस्वी ब्राह्मणप्रकारो ग्राह्यः ।

चतुर्वर्णाश्रमस्यायं लोकस्याचाररक्षणात् ।
नश्यतां सर्वधर्माणां राजधर्मः प्रवर्तकः ॥
धर्मश्च व्यवहारश्च चरित्रं राजशासनम् ।
विवादार्थश्चतुष्पादः पश्चिमः पूर्वबाधकः ॥
अत्र सत्ये स्थितो धर्मो व्यवहारस्तु साक्षिषु ।
चरित्रं सङ्ग्रहे पुंसां राज्ञामाज्ञा तु शासनम् ॥
राज्ञः स्वधर्मः स्वर्गाय प्रजा धर्मेण रक्षितुः ।
अरक्षितुर्वा क्षेप्तुर्वा मिथ्यादण्डमतोऽन्यथा ॥
दण्डो हि केवलो लोकं परं चेमं च रक्षति ।
राज्ञा पुत्रे च शत्रौ च यथादोषं समं धृतः ॥

सम्यग्व्यवहारदर्शनस्य सर्वलोकयोगक्षेमसाधकतां श्लोकैराह—**चतुर्वर्णे**त्यादि । अयं राजधर्मः सम्यग्व्यवहारदर्शनरूपः, चतुर्वर्णाश्रमस्य चत्वारो वर्णा ब्राह्मणादयः आश्रमाश्च ब्रह्मचर्यादयो यस्मिंस्तथाभूतस्य, लोकस्य, आचाररक्षणात् स्वस्वसमुदाचारपरिरक्षणाद्धेतोः, नश्यतां सर्वधर्माणां स्वतः क्षीयमाणानां सर्वेषां धर्माणां, प्रवर्तकः प्रोज्जीवकः ॥

व्यवहारस्तावच्चतुष्पादः । तत्पादानां स्वरूपं बलाबलं चाह—**धर्मश्चे**ति । धर्मो व्यवहारः चरित्रं राजशासनमिति चतुर्भिः पादैर्युक्तो, विवादार्थः विवादविषयोऽर्थः । पश्चिमः एषु पादेषु पाश्चिमः चरमः पादः, पूर्वबाधकः पूर्वान् पादान् बाधते सर्वपादापेक्षया प्रबल इत्यर्थः ॥

धर्मादीनां स्वरूपमाह—**अत्रे**ति । अत्र धर्मादिषु मध्ये, सत्ये स्थितः प्रतिष्ठितः धर्मः अर्थयाथात्म्यं धर्मपदार्थ इत्यर्थः। व्यवहारस्तु साक्षिषु स्थितः साक्षिवाक्यविभावनीयो व्यवहारपदार्थ इत्यर्थः । चरित्रं लोकाचारः, संग्रहे ग्रामसमूहे दशग्राम्यादौ, पुंसां प्रतिष्ठितम् । राज्ञाम् आज्ञा तु इदमित्थमेवेति न्यायोपपत्तियुक्तो यथार्हदण्डप्रणयनादिर्नियोगस्तु, शासनं राजशासनपदार्थः ॥

राज्ञ इति । राज्ञः, स्वधर्मः शस्त्राजीवो भूतरक्षणं च, स्वर्गाय भवति । कथम्भूतस्य, प्रजा धर्मेण रक्षितुः । अरक्षितुर्वा अरक्षकस्य वा, क्षेप्तुर्वा मिथ्यादण्डम् अयथार्हदण्डं प्रणेतुर्वा, राज्ञः, अतोऽन्यथा उक्तादन्यः प्रकारः अर्थान्तरकः भवति । एवमदृष्टसाधकता सम्यग्व्यवहारदर्शनस्य दर्शिता ॥

दण्डं प्रशंसति—**दण्डो ही**ति । दण्डो हि, केवल एकोऽनितरसहायः,

अनुशासद्धि धर्मेण व्यवहारेण संस्थया ।
न्यायेन च चतुर्थेन चतुरन्तां महीं जयेत् ॥
संस्थया धर्मशास्त्रेण शास्त्रं वा व्यावहारिकम् ।
यस्मिन्नर्थे विरुध्येत धर्मेणार्थं विनिर्णयेत् ॥
शास्त्रं विप्रतिपद्येत धर्मन्यायेन केनचित् ।
न्यायस्तत्र प्रमाणं स्यात् तत्र पाठो हि नश्यति ॥

लोकं परं च इमं च रक्षति उभयलोकसुखभोगसौभाग्यं प्रयोक्तुः प्रयच्छति । कथम्भूतोऽसौ, राज्ञा प्रयोक्त्रा, पुत्रे च शत्रौ च, यथादोषम् अपराधानुरूप्येण, समं धृतः अविशेषेण प्रयुक्तः ॥

सम्यग्व्यवहारदर्शनस्य परमं दृष्टफलमाह—**अनुशासद्धी**ति । अनुशासत् लोकं न्याय्ये पथि स्थापयन्, कथं, धर्मेण धर्मानुसारेण, व्यवहारेण साक्षिवाक्यानुसारेण, संस्थया लोकाचारेण, न्यायेन च चतुर्थेन न्यायोपपन्न-राजकीयनिर्णयलक्षणेन चतुर्थपादरूपेण, चतुरन्तां चतुस्सागरपर्यन्तां, महीं जयेत् । यथोक्तप्रकारानुशासनमहिम्ना सार्वभौमत्वं राजा प्राप्नुयादित्यर्थः ॥

धर्मादिषु 'पश्चिमः पूर्वबाधकः' इति यत् पूर्वमुक्तं, तस्यापवाद-माह—**संस्थये**ति । संस्थया महाजनाचारेण, धर्मशास्त्रेण मानवादिना च सह, शास्त्रं वा व्यावहारिकं शास्त्रं राजशासनं वा व्यावहारिकं साक्षिवचनं वा, यस्मिन्नर्थे विरुध्येत, यच्छब्देन तच्छब्दाक्षेपात् तमर्थं, धर्मेण विनिर्णयेत् धर्मशास्त्रानुसारेण विनिश्चिनुयात् । न तु तथाविधे विषये राजवचनसाक्षिवचनयोः प्रामाण्यमित्यर्थः ॥

क्वचिद् धर्मशास्त्रमपि न्यायेन बाध्यत इत्याह—**शास्त्रमि**ति । शास्त्रं मानवादिधर्मशास्त्रं, केनचिद् धर्मन्यायेन सर्वप्रकारोपपन्नेन धर्मयुक्तेन लोकाचारेण, विप्रतिपद्येत अत्यन्तबाधितार्थविषयतया विरुध्येत, यत्रेति शेषः । तत्र, न्यायः, प्रमाणम् अर्थनिर्णयहेतुः स्यात् । कुतः, तत्र पाठो हि नश्यति यस्मात् तादृशे विषये धर्मशास्त्रवचनम् अदर्शनं प्राप्नोति, न प्रवर्तत इत्यर्थः ।

"कुद्दालपाणिर्विज्ञेयः सेतुभेत्ता समीपगः ।"

इति सत्यपि स्मृतिवचने सेतोर्भिन्नस्य समीपे कुद्दालहस्तं कमपि शिशुं तिष्ठन्तं दृष्ट्वा न कोऽप्यध्यवस्यति—अनेन शिशुना सेतुर्भिन्न इति ॥

दृष्टदोषः स्वयंवादः स्वपक्षपरपक्षयोः।
अनुयोगार्जवं हेतुः शपथश्चार्थसाधकः॥
पूर्वोत्तरार्थव्याघाते साक्षिवक्तव्यकारणे।
चारहस्ताच्च निष्पाते प्रदेष्टव्यः पराजयः॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
प्रथमोऽध्यायः विवादपदनिबन्धः,
आदितोऽष्टपञ्चाशः॥

उक्तसाक्ष्याद्यतिरेकेण पञ्च व्यवहारसाधनान्याह—**दृष्टेत्यादि**। **दृष्टदोषोऽर्थसाधकः** दृष्टदोषः उपलब्धापराधचिह्नः दह्यमाने गृहे ज्वलितालातपाणिस्तदन्तस्तिष्ठन् जनः स्वाग्निदत्वानुमापकः, कायगतनवव्रणक्षरत्क्षतजोक्ष्यमाणभूमेर्वा कस्यचिद् रुधिरार्द्रशस्त्रपाणिः पार्श्वे तिष्ठन् स्वात्मनस्तच्छेत्तृत्वानुमापकः। **स्वयंवादः** मयैवेदं कृतमिति वादः, अर्थसाधकः अर्थनिर्णायकः। **स्वपक्षपरपक्षयोरनुयोगार्जवं** वादिप्रतिवादिनोरजिह्मप्रश्नोत्तरकरणम्, अर्थसाधकम्। यथा—पथि शकटचक्रारोपणेन पादो मे भग्नः शाकटिकेनेति तं प्रति कस्यचिदभियोगे 'कुत एवं कृतवानसी'ति धर्मस्थेन पृष्टं शाकटिकं भयवशात् क्षणं तूष्णीम्भूतं दृष्ट्वा 'किमयं मूक' इति शङ्कमाने प्राड्विवाके 'बहुवारमेव मां शकटमिकटादपसरेति शृण्वत्सु शकटगजनेषु तदोक्तवान्, इदानीं तु मूक इव लक्ष्यते' इत्यभियोक्तुः प्रश्नोत्तरवचनमृजुभावेन प्रवृत्तम् अभियोज्यनिरपराधत्वसमर्थकं सद् व्यवहारनिर्णयाय कल्पत इत्येवञ्जातीयं द्रष्टव्यम्। हेतुरर्थसाधकः उपपन्नकारणप्रदर्शनमर्थनिर्णायकं, यथा—पारदारिकत्वविषयेऽभियोगेऽभियुक्तेनात्मनः क्लीबत्वनिवेदनम्। शपथः पुत्रादिभिः शपनम् उपलक्षणाद् दिव्यक्रिया च, सोऽर्थसाधकः॥

पराजयनिमित्तान्याह—**पूर्वोत्तरेत्यादि**। पूर्वोत्तरार्थव्याघाते चोरोऽयमिति शङ्क्यमानस्य 'क भुक्तं क शयितं त्वये'त्यादि पृष्टस्य प्रत्युक्तौ पूर्वोत्तरविरोधे, साक्षिवक्तव्यकारणे साक्षिणां वक्तव्यस्याप्रामाण्यदोषस्य कारणे बन्धुत्वोपकार्यत्वादिरूपे निमित्ते, चारहस्ताच्च निष्पाते बन्धनागारिकहस्तात् प्रच्छन्नपलायने च सति, पराजयः, प्रदेष्टव्यः स्थापयितव्यः॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
प्रथमोऽध्यायः विवादपदनिबन्धः,
आदितोऽष्टपञ्चाशः॥

५९. प्रक. विवाहसंयुक्तं — विवाहधर्मः स्त्रीधनकल्प आधिवेदनिकम्।

विवाहपूर्वो व्यवहारः।

कन्यादानं कन्यामलङ्कृत्य ब्राह्मो विवाहः।

सहधर्मचर्या प्राजापत्यः।

गोमिथुनादानादार्षः।

विवाहसंयुक्तमिति सूत्रम्। विवाहा अष्टविधाः ब्राह्मप्राजापत्यार्षदैवगान्धर्वासुरराक्षसपैशाचाख्याः तत्संयुक्तं तत्सम्बद्धं स्त्रीधनकल्पादि, तदिहाभिधीयत इति सूत्रार्थः। व्यावहारिकाणामर्थानामनुष्ठानप्रकार उक्तः, व्यवहाराणां प्रतिपादनमधुना प्रस्तूयते। तेषु च ऋणादानादिषु कतमः पूर्वनिरूपणार्ह इति चिन्तायाम्, ऋणादानपूर्वो व्यवहार इति मनुः। वास्तुकपूर्वो व्यवहार इति भार्गवः। निक्षेपपूर्वो व्यवहार इति बृहस्पतिः। कौटल्यस्तु—गृहस्थस्यैव व्यवहारेष्वधिकाराद् गार्हस्थ्यं प्रति च विवाहस्यैव हेतुत्वाद् विवाहसंयुक्तव्यवहार एव व्यवहारेषु मुख्य इति विवाहसंयुक्तप्रकरणमेवादौ निरूपणीयं मन्यते। यदाहुः—

"ऋणमादौ मनुर्ब्रूते वास्तुकं भार्गवो मुनिः।
बृहस्पतिस्तु निक्षेपं विवाहं कुटलान्वयः॥" इति।

इदं प्रकरणं त्रिभिरध्यायैर्वितन्यते। तत्रादिमे विवाहधर्मः स्त्रीधनकल्पः आधिवेदनिकमिति त्रिकं प्रतिपाद्यते, द्वितीये शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाः, तृतीये निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो दीर्घप्रवासश्चेति।

विवाहसंयुक्तस्य प्रथमं निरूपणे हेतुं निर्दिशति—**विवाहपूर्वो व्यवहार** इति। व्यवहार इति जातावेकवचनं, सर्वे व्यवहाराः विवाहमूलाः। विवाहपूर्वत्वं चोपपादितम्।

विवाहभेदांस्तल्लक्षणप्रदर्शनपूर्वमाह— **कन्यादानमिति**। कन्यामलङ्कृत्य यत् तस्याः प्रदानं, स विवाहो ब्राह्म इत्युच्यते।

सहधर्मचर्येति। 'सहधर्मश्चर्यताम्' इत्येतावदुक्त्वा समन्त्रकं यत् कन्या दीयते, स प्राजापत्याख्यः।

गोमिथुनादानादिति। वरसकाशाद् गोद्वयं गृहीत्वा यत् कन्या दीयते, स आर्षः।

अन्तर्वेद्यामृत्विजे दानाद् दैवः ।

मिथस्समवायाद् गान्धर्वः ।

शुल्कादानादासुरः ।

प्रसह्यादानाद् राक्षसः ।

सुप्तादानात् पैशाचः ।

पितृप्रमाणाश्चत्वारः पूर्वे धर्म्याः । मातापितृप्रमाणाः शेषाः । तौ हि शुल्कहरौ दुहितुः । अन्यतराभावेऽन्यतरो वा ।

द्वितीयं शुल्कं स्त्री हरेत । सर्वेषां प्रीत्यारोपणमप्रतिषिद्धम् ।

अन्तर्वेद्यामिति । यज्ञवेदिमध्ये स्थिताय ऋत्विजे यद् दीयते, स दैवः ।

मिथस्समवायादिति । कन्यावरयोर्निजेच्छयान्योन्यसंयोगाद् गान्धर्वो विवाहो भवति ।

शुल्कादानादिति । आत्मार्थे कन्यार्थे च वराच्छुल्कं गृहीत्वा यत् कन्यादानं, स आसुराख्यः ।

प्रसह्यादानादिति । बलात्कारेण कन्याहरणाद् राक्षसविवाहो भवति ।

सुप्तादानादिति । सुप्ताया हरणात् पैशाचाख्यो विवाहः ।

पितृप्रमाणा इति । एतेष्वष्टसु विवाहेषु पूर्वे ब्राह्मादयश्चत्वारः, पितृप्रमाणाः धर्म्याः पितृप्रमाणत्वाद् धर्मयुक्ताः । अन्ये त्वधर्म्या इत्यर्थसिद्धम् । **मातापितृप्रमाणा** इति । माता पिता चेत्युभौ प्रमाणभूतौ येषां, ते तथाभूताः, शेषाः गान्धर्वादयः । कस्मान्मातापितृप्रमाणकत्वमित्याह — **तौ हीत्यादि** । मातापितरौ हि, शुल्कहरौ दुहितुः कन्याशुल्कं गृह्णीतः । अन्यतराभावे अन्यतरो वा माता पिता वा शुल्कं हरति । एवं विवाहधर्म उक्तः ।

स्त्रीधनं प्रस्तौति — **द्वितीयमिति** । द्वितीयं शुल्कं वरसकाशाद्ब्राह्मपरिभाषितशुल्कव्यतिरिक्तं शुल्कं प्रीतिवशाद् दत्तं, स्त्री कन्यैव हरेत, न तु पितरौ । **सर्वेषां प्रीत्यारोपणमप्रतिषिद्धमिति** । वरेण न केवलं वरबन्ध्वादिभिः सर्वैरपि कन्याया देहे भूषणादिनिवेशनम् अप्रतिषिद्धम् अनिवारितम् । अर्थात् तदपि कन्यैव हरेत ।

वृत्तिराबन्ध्यं वा स्त्रीधनम् । परद्विसाहस्रा स्थाप्या वृत्तिः । आबन्ध्यानियमः ।

तदात्मपुत्रस्नुषाभर्मणि प्रवासाप्रतिविधाने च भार्याया भोक्तुमदोषः । प्रतिरोधकव्याधिदुर्भिक्षभयप्रतीकारे धर्मकार्ये च पत्युः । सम्भूय वा दम्पत्योर्मिथुनं प्रजातयोस्त्रिवर्षोपभुक्तं च धर्मिष्ठेषु विवाहेषु नानुयुञ्जीत । गान्धर्वासुरोपभुक्तं सवृद्धिकमुभयं दाप्येत । राक्षसपैशाचोपभुक्तं स्तेयं दद्यात् ।

इति विवाहधर्मः ।

मृते भर्तरि धर्मकामा तदानीमेवास्थाप्याभरणं शुल्कशेषं च

तदिदं कन्याहरणीयं स्त्रीधनशब्दितं द्विरूपमित्याह — **वृत्तिराबन्ध्यं वा स्त्रीधनमिति** । वृत्तिर्भूमिहिरण्यादिर्जीविकार्था, आबन्ध्यं भूषणादि । परद्विसाहस्रा कार्षापणसहस्रद्वयपरमावधिः, वृत्तिः, स्थाप्या कल्पयितुमर्हा । आबन्ध्यानियमः आभरणस्य सङ्ख्यानियमाभावः ।

तदिति । तत् स्त्रीधनम्, आत्मपुत्रस्नुषाभर्मणि स्वस्य पुत्राणां तद्भार्यायाश्च पोषणे, प्रवासाप्रतिविधाने च भर्तृविदेशगमननिमित्ते जीविकोपायविरहसंकटे च, भार्याया, भोक्तुम्, अदोषः दोषाभावः । **प्रतिरोधके**त्यादि । 'साम्प्रतमेवादत्त्वा मा याही'त्येवं रोधेन हरणं प्रतिरोधकं तत्प्रतीकारे व्याधिप्रतीकारे दुर्भिक्षप्रतीकारे भयप्रतीकारे च, धर्मकार्ये च विषये, पत्युः स्त्रीधनव्ययकारिणः, अदोष इत्यनुवर्तते । इतोऽपि स्त्रीधनस्य व्ययाद् भर्तुरदोष इत्याह —**सम्भूय वेति** । दम्पत्योः, मिथुनं प्रजातयोः अपत्यद्वयं यद्वा पुमपत्यमेकं स्त्र्यपत्यं चैकं जनितवतोः, सम्भूय मिलित्वा, त्रिवर्षोपभुक्तं च स्त्रीधनं, धर्मिष्ठेषु विवाहेषु ब्राह्मादिषु चतुर्षु, नानुयुञ्जीत नार्थयेत प्रत्यर्पयेति । **गान्धर्वे**त्यादि । गान्धर्वासुरोपभुक्तम् , उभयं धर्मकार्यादिविनियुक्तं सम्भूयत्रिवर्षोपभुक्तं च समनन्तरोक्तं द्विरूपं स्त्रीधनं, सवृद्धिकं, दाप्येत निर्यात्येत । **राक्षसे**त्यादि । राक्षसपैशाचोपभुक्तं स्त्रीधनं, स्तेयं दद्यात् स्तेयं चौर्यं चोरितद्रव्यं तदिव दद्यात् चोरदण्डयुक्तं दद्यादित्यर्थः ।

इति विवाहधर्म इति । व्याख्यात इति शेषः ।

स्त्रीधनकल्पमाह — मृत इति । मृते भर्तरि, धर्मकामा भर्तुरात्मनश्च परलोकहितं धर्मं कामयमाना, तदानीमेव सद्य एव, आस्थाप्याभरणं देहकृतं

लभेत । लब्ध्वा वा विन्दमाना सवृद्धिकमुभयं दाप्येत । कुटुम्बकामा तु श्वशुरपतिदत्तं निवेशकाले लभेत । निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः ।

श्वशुरप्रातिलोम्येन वा निविष्टा श्वशुरपतिदत्तं जीयेत । ज्ञातिहस्तादभिमृष्टाया ज्ञातयो यथागृहीतं दद्युः ।

न्यायोपगतायाः प्रतिपत्ता स्त्रीधनं गोपायेत् ।

पतिदायं विन्दमाना जीयेत । धर्मकामा भुञ्जीत ।

पुत्रवती विन्दमाना स्त्रीधनं जीयेत । तत्तु स्त्रीधनं पुत्रा हरेयुः ।

पुत्रभरणार्थं वा विन्दमाना पुत्रार्थं स्फातीकुर्यात् ।

भूषणमवतार्य, शुल्कशेषं च सहभुक्तावशिष्टं शुल्कं चकारादाभरणं च, लभेत। **लब्ध्वा** वेति । आभरणं शुल्कशेषं चाधिगम्य, विन्दमाना भर्त्रन्तरं परिगृह्णती, सवृद्धिकम्, उभयं दाप्येत । कुटुम्बकामा तु सन्तानकामनया देवरं भजमाना तु, श्वशुरपतिदत्तं स्त्रीधनं, निवेशकाले लभेत । कोऽसौ निवेशकालः तत्राह—**निवेशकालं** हीत्यादि । दीर्घप्रवासे उत्तरतराध्यायव्युत्पादिते ।

श्वशुरप्रातिलोम्येन वेति । श्वशुरशासनातिक्रमेण, निविष्टा भर्त्रन्तरं गता, श्वशुरपतिदत्तं जीयेत श्वशुरेण पत्या च दत्तं दाप्येत । **ज्ञातिहस्तादभिमृष्टाया** इति । विद्यमान एव पत्यौ पत्यन्तरपरिगृहीतायाः, ज्ञातयः नवपतयः, यथागृहीतं गृहीतान्यूनं श्वशुरपतिदत्तं, दद्युः अर्थाच्छ्वशुराय पत्ये च ।

न्यायोपगताया इति । न्यायेन देवरादिमुपगतायाः, प्रतिपत्ता परिग्रहीता, स्त्रीधनं गोपायेत् रक्षेत् न तु स्वयमुपयुञ्जीत ।

पतिदायमिति । पत्या दत्तं वस्त्राभरणादिकं, विन्दमाना भर्त्रन्तरपरिग्राहिणी, जीयेत दाप्येत, श्वशुरकुलाय । **धर्मकामा भुञ्जीते**ति । अविन्दमाना संयता चेत् पतिदायं भुञ्जीत ।

पुत्रवतीति । पुत्रयुक्ता, भर्त्रन्तरगामिनी, जीयेत दाप्येत स्त्रीधनं न स्वयं भुञ्जीतेत्यर्थः । के तद्भोक्तारः, तत्राह — **तत्तु स्त्रीधनमि**त्यादि ।

पुत्रभरणार्थं वेति । पुत्रपोषणार्थं, विन्दमाना, पुत्रार्थं पुत्रनिमित्ते, स्फातीकुर्यात् वर्धयेत् स्त्रीधनम् ।

बहुपुरुषप्रजानां पुत्राणां यथापितृदत्तं स्त्रीधनमवस्थापयेत् ।

कामकारणीयमपि स्त्रीधनं विन्दमाना पुत्रसंस्थं कुर्यात् ।

अपुत्रा पतिशयनं पालयन्ती गुरुसमीपे स्त्रीधनम् आ आयुःक्षयाद् भुञ्जीत, आपदर्थं हि स्त्रीधनम् । ऊर्ध्वं दायादं गच्छेत् ।

जीवति भर्तरि मृतायाः पुत्रा दुहितरश्च स्त्रीधनं विभजेरन् । अपुत्रायाः दुहितरः । तदभावे भर्ता ।

शुल्कमन्वाधेयमन्यद् वा बन्धुभिर्दत्तं बान्धवा हरेयुः ।

इति स्त्रीधनकल्पः ।

वर्षाण्यष्टावप्रजायमानामपुत्रां वन्ध्यां चाकाङ्क्षेत, दश विन्दुं, द्वादश कन्याप्रसविनीम् ।

बहुपुरुषप्रजानामित्यादि । यासां बहवो भर्तारः पुत्राश्च तासां, स्त्रीधनं, यथापितृदत्तं पुत्राणामवस्थापयेत् तत्तद्भर्तृदत्तं तत्तद्भर्तृजनितपुत्रार्थं दद्यात् ।

कामकारणीयमपीति । यथेच्छविनियोज्यमपि, स्त्रीधनं, विन्दमाना भर्त्रन्तरगामिनी, पुत्रसंस्थं कुर्यात् पुत्राय दद्यात् ।

अपुत्रेति । पुत्रहीना, पतिशयनं पालयन्ती पतिव्रता, गुरुसमीपे, स्त्रीधनम्, आ आयुःक्षयाद् यावज्जीवं, भुञ्जीत मूलमविनाशयन्ती वृद्ध्यादिकं संजातमात्रमुपयुञ्जीतेत्यर्थः । कुतः, आपदर्थं हि स्त्रीधनं वृत्तिकृच्छ्रपरिहारमात्रविनियोज्यं हि स्त्रीधनं नाम न पुनः कामचारव्ययार्थम् । **ऊर्ध्वं दायादं गच्छेदि**ति । तया तथा रक्षितं स्त्रीधनं तस्यामुपरतायां भर्तृसापिण्डं गच्छेत् ।

म्रियमाणे पत्यौ प्रमीतायाः स्त्रीधनं पुत्रा दुहितरश्चाविशेषाद् विभजेयुः, पुत्राभावे दुहितरः तदुभयाभावे तु पतिर्गृह्णीयादित्याह—**जीवती**त्यादि ।

आसुराद्यधर्म्यविवाहविषये तु स्त्रीधनं न भर्तृगामि, किन्तु स्त्रीबन्धुगामीत्याह—**शुल्क**मित्यादि । शुल्कं प्रतीतम्, अन्वाधेयं पितृगृहानीतम्, अन्यद् वा, बन्धुभिर्भ्रात्रादिभिः, दत्तं स्त्रीधनं, बान्धवाः पित्रादयः, हरेयुः ।

इति स्त्रीधनकल्प इति । अनेन प्रकारेण स्त्रीधनविनियोगविधिर्व्याख्यातः ।

अथाधिवेदनिकमाह — **वर्षाणी**ति । अप्रजायमानां सकृत् प्रसूय पुनर्गर्भमगृह्णतीम्, अपुत्रां व्याध्यादिवशात् पुत्ररहितां, वन्ध्यां च गर्भधरणा-

ततः पुत्रार्थी द्वितीयां विन्देत । तस्यातिक्रमे शुल्कं स्त्रीधनमर्धं चाधिवेदनिकं दद्यात् । चतुर्विंशतिपणपरं च दण्डम् ।

शुल्कं स्त्रीधनमशुल्कस्त्रीधनायास्तत्प्रमाणमाधिवेदनिकमनुरूपां च वृत्तिं दत्त्वा बह्वीरपि विन्देत । पुत्रार्था हि स्त्रियः ।

तीर्थसमवाये चासां यथाविवाहं पूर्वोढां जीवत्पुत्रां वा पूर्वं गच्छेत् ।

तीर्थगूहनागमने षण्णवतिर्दण्डः । पुत्रवतीं धर्मकामां वन्ध्यां विन्दुं नीरजस्कां वा नाकामामुपेयात्, न चाकामः पुरुषः । कुष्ठिनीमुन्मत्तां वा न गच्छेत् । स्त्री तु पुत्रार्थमेवंभूतं वोपगच्छेत् ।

योग्यां च, अष्टौ वर्षाणि, आकाङ्क्षेत प्रतिपालयेत् पुत्रं प्रसूते नवेति परीक्षार्थम् । दश बिन्दुं दश वर्षाणि नश्यत्प्रसूतिं, प्रतिपालयेत् । द्वादश कन्याप्रसविनीं स्त्र्यपत्यप्रसवशीलां द्वादश वर्षाणि आकाङ्क्षेत । काङ्क्षेतेरात्मनेपदमार्षम् ।

तत इति । यथोक्तकालप्रतीक्षानन्तरं पुत्रप्रसवाभावे, पुत्रार्थी पुत्रकामश्चेद्, द्वितीयां विन्देत अन्यामुद्वहेत् । तस्येति । यथोक्तकालनियमस्य, अतिक्रमे अननुवर्तने, शुल्कं, स्त्रीधनम्, अर्धं चाधिवेदनिकं परिणीताया उपरि अन्यस्याः परिणयनमधिवेदनं तन्निमित्तं यद् द्रव्यं गतं तस्यार्धं च, दद्याद् अधिविन्नायै । चतुर्विंशतिपणपरं च दण्डमिति । चतुर्विंशतिपणोत्तमं नियमातिक्रमदण्डं च, राज्ञे दद्यात् ।

नवं शुल्कं स्त्रीधनम् आधिवेदनिकतुल्यमानं द्रव्यं तत्तद्विवाहोचितशरीरयात्रोपायं च प्रतिपाद्य बह्वीनामप्यधिवेदनं न दुष्यतीत्याह — शुल्कमित्यादि । तत्र हेतुवचनं — पुत्रार्था हि स्त्रिय इति । अनेन पूर्वपरिणीतानाम् अपुत्रवतीनां निष्फलजन्मत्वादुपेक्षणं न्याय्यमिति दर्शयति ।

बह्वीनाम् ऋतुयौगपद्येऽभिगमनविधिमाह — तीर्थसमवाये चासामिति । तीर्थं स्त्रीपुष्पं तत्समवाये बह्वीनां पत्नीनां युगपदृतुप्राप्तौ, यथाविवाहं ब्राह्मादिविवाहक्रममनपहाय, पूर्वं गच्छेत् । विवाहतुल्यतायामाह — पूर्वोढां पूर्वकालपरिणीतां, जीवत्पुत्रां वा अपूर्वोढामपि, पूर्वं गच्छेत् ।

तीर्थेत्यादि । तीर्थगूहनागमने तीर्थस्याप्रकाशने भर्त्रनभिगमने च, षण्णवतिः षण्णवतिपणः, दण्डः । पुत्रवतीमिति । पुत्रवतीं, धर्मकामां वन्ध्यां

नीचत्वं परदेशं वा प्रस्थितो राजकिल्बिषी ।
प्राणाभिहन्ता पतितस्त्याज्यः क्लीबोऽपि वा पतिः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे द्वितीयोऽध्यायः
विवाहसंयुक्ते विवाहधर्मः स्त्रीधनकल्प आधिवेदनिकम्,
आदित एकोनषष्टितमः ॥

पुत्रार्थव्रतोपवासिनी वन्ध्यां, बिन्दुं नश्यत्प्रसूतिं, नीरजस्कां वा निवृत्तार्तवां वा, अकामाम् अनिच्छन्तीं, नोपेयात् न गच्छेत्, अर्थात् पुरुषः सकामोऽपि । न चाकामः पुरुषः, उपेयात्, अर्थात् सकामामपि । कुष्ठिनीम्, उन्मत्तां वा, न गच्छेत्, पुरुषः । स्त्री तु, पुत्रार्थं पुत्रोत्पत्त्यर्थम्, एवम्भूतं वा कुष्ठिनमुन्मत्तं वा, उपगच्छेत् ।

अध्यायप्रान्ते श्लोकमाह — **नीचत्वमित्यादि । नीचत्वं परदेशं** वा प्रस्थितः नीचत्वं गतो वा विदेशं गतो वा, राजकिल्बिषी राजदुष्पुरोहितो राजदुष्प्रतिग्रही राजयक्ष्मवांश्च इति त्रिरूपः, प्राणाभिहन्ता नरमारकः, पतितः महापातकदूषितः, क्लीबोऽपि वा षण्डो वा, पतिः, त्याज्यः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे द्वितीयोऽध्यायः
विवाहसंयुक्ते विवाहधर्मः स्त्रीधनकल्पः आधिवेदनिकम्,
आदित एकोनषष्टितमः ॥

---

५९. प्रक. विवाहसंयुक्तं—शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकारव्यवहारप्रतिषेधाश्च।

द्वादशवर्षा स्त्री प्राप्तव्यवहारा भवति षोडशवर्षः पुमान् । अत ऊर्ध्वमशुश्रूषायां द्वादशपणः स्त्रिया दण्डः पुंसो द्विगुणः ।

भर्मण्यायामनिर्दिष्टकालायां ग्रासाच्छादनं वाधिकं यथापुरुषपरिवापं सविशेषं दद्यात् । निर्दिष्टकालायां तदेव सङ्ख्याय । बन्धं च दद्यात् । शुल्कस्त्रीधनाधिवेदनिकानामनादाने च ।

श्वशुरकुलप्रविष्टायां विभक्तायां वा नाभियोज्यः पतिः । इति भर्म ।

पूर्वाध्याये विवाहधर्मादिकमुक्तम् । इह तु शुश्रूषादय उच्यन्ते । तत्र शुश्रूषा परिचरणं, भर्म कुटुम्बभरणनियोगः, पारुष्यं वाक्पारुष्यं दण्डपारुष्यं च, द्वेषः अप्रीतिः, अतिचारः प्रतिषिद्धाचरणम्, उपकारव्यवहारप्रतिषेधः जनविशेषविषयोपकाराचरणनिषेधः ।

द्वादशवर्षेति । अतिक्रान्तद्वादशवयस्का स्त्री, प्राप्तव्यवहारा व्यवहारयोग्या परिचरणकर्मनियोजनार्हा भवति । षोडशवर्षः पुमान्, प्राप्तव्यवहारः भवति । अत ऊर्ध्वम्, अशुश्रूषायाम् अपरिचर्यायां, द्वादशपणः स्त्रियाः दण्डः, पुंसो द्विगुणः चतुर्विंशतिपणो दण्डः ।

भर्मण्यायामिति । गृहभरणनियुक्तायाम्, अनिर्दिष्टकालायाम् अद्यैतावद् गृहीतमेतावद् विनियुक्तमित्यकृतकालनिर्देशायां, ग्रासाच्छादनं वाधिकं ग्रासमाच्छादनं च पर्याप्तं किञ्चिदधिकं वा, यथापुरुषपरिवापं गृहभरणीयजनोपकरणानतिक्रमणेन, सविशेषं सातिशयं दद्याद् असंख्यायैव । निर्दिष्टकालायां, तदेव ग्रासाच्छादनमेव न तु ततोऽधिकं, संख्याय एकस्याहोरात्रस्यैतावदितीयत्तामाकलय्य, दद्यादित्यनुषज्यते । बन्धं च दद्यात् विवदमानायां तस्यां साध्यद्रव्यस्य पञ्चभागं दशभागं च दद्यात् । शुल्कादीनामनादाने च शुल्कस्त्रीधने प्रतीते आधिवेदनिकम् अधिवेदननिमित्तं पत्या दत्तम् एतेषामग्रहणेऽपि, बन्धं दद्यात्, ग्रहणे तु का कथेत्यर्थः ।

श्वशुरेत्यादि । श्वशुरकुलप्रविष्टायां विभक्तायां वा श्वशुरगृहप्राप्तायां वा भर्तृकृतविभागायां वा स्त्रियां, नाभियोज्यः पतिः भर्ता तया अभियोक्तुं न योग्यो ग्रासाच्छादनार्थे । इति भर्मेति । व्याख्यातमिति शेषः ।

नग्ने ! विनग्ने ! न्यङ्गे ! अपितृके ! अमातृके ! इत्यनिर्देशेन विनयग्राहणम् । वेणुदलरज्जुहस्तानामन्यतमेन वा पृष्ठे त्रिराघातः । तस्यातिक्रमे वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः ।

तदेव स्त्रिया भर्तरि प्रसिद्धमदोषाया ईर्ष्याया बाह्यविहारेषु द्वारेषु । अत्ययो यथानिर्दिष्टः । इति पारुष्यम् ।

भर्तारं द्विषती स्त्री सप्तार्तवान्यमण्डयमाना तदानीमेव स्थाप्याभरणं निधाय भर्तारम् अन्यया सह शयानमनुशयीत ।

पारुष्यमाह — नग्ने इत्यादि । नग्ने ! असंस्कृतबुद्धित्वात् कोट्टवीतुल्ये !, विनग्ने ! विशेषेण नग्ने ! । नष्टे ! विनष्टे ! इति पाठे स्फुट एवार्थः । न्यङ्गे ! निन्द्ये! अङ्गहीने! वा, अपितृके! अमातृके! कुत्सितपितृके! कुत्सितमातृके !, इत्यनिर्देशेन एवम्प्रकारेण साक्रोशसम्बोधनेन, विनयग्राहणं सदाचारस्योपदेशना कर्तव्या । अनिर्देशेन विनयासिद्धावाह — वेणुदलेत्यादि । वेणुदलादीनां त्रयाणाम् अन्यतमेन वा, पृष्ठे, त्रिराघातः त्रीणि ताडनानि, कर्तव्यानि । तस्यातिक्रमे उक्तस्य द्विविधस्य पारुष्यस्य अतिक्रमे विहितविजातीयारुन्तुदाक्रोशकरणे अवेण्वादिना अपृष्ठे सकृदपि वाघाते वेण्वाद्यन्यतमेन पृष्ठ एव चतुराघाते चेत्यर्थः, वाग्दण्डपारुष्यदण्डाभ्यामर्धदण्डाः वाक्पारुष्यदण्डाद् दण्डपारुष्यदण्डाच्च वक्ष्यमाणादर्धदण्डाः, भवन्ति ।

गणिकाद्यासक्तिनिमित्तकेर्ष्यावशाद् भर्तरि विषये स्त्रियाः पतिव्रतायाः पारुष्यस्य प्रसक्तस्य मात्रामाह — तदेवेत्यादि । तदेव भर्तुर्यादृशमुक्तं तादृशमेव । द्वारेषु पारुष्यप्रयोगस्थानेषु । अत्ययो यथानिर्दिष्ट इति, उक्तविध्यतिक्रमनिमित्तः स्त्रियाः दण्डः वाक्पारुष्यदण्डपारुष्योक्त एव न त्वर्धदण्डः पुंस इव । इति पारुष्यं, व्याख्यातम् ।

द्वेषमाह — भर्तारमिति । भर्तारं द्विषती अरोचयमाना, स्त्री, सप्तार्तवानि सप्त ऋतुकालान् अमण्डयमाना शयनार्थमनुपतिष्ठमाना प्रतीक्ष्येतेति शेषः । ततो मण्डयमाना किं कुर्यादित्याह — तदानीमेव सद्य एव, स्थाप्याभरणं निधाय स्थाप्यशब्दो न्यासवाची स्वीयं भूषणम् अपुनर्ग्रहणप्रत्ययार्थे भर्तुर्न्यासं कृत्वा, अन्यया सह शयानं भर्तारम् अनुशयीत सपत्न्याश्चापि समुपतिष्ठेत । स्त्रियाः स एष भर्तृद्वेषदण्डो बोद्धव्यः ।

भिक्षुक्यन्वाधिज्ञातिकुलानामन्यतमे वा भर्ता द्विषन् स्त्रियमेकामनुशयीत ।

दृष्टलिङ्गे मैथुनापहारे सवर्णापसर्पोपगमे वा मिथ्यावादी द्वादशपणं दद्यात् ।

अमोक्ष्या भर्तुरकामस्य द्विषती भार्या भार्यायाश्च भर्ता । परस्परं द्वेषान्मोक्षः ।

स्त्रीविप्रकाराद् वा पुरुषश्चेन्मोक्षमिच्छेद् यथागृहीतमस्यै दद्यात् । पुरुषविप्रकाराद् वा स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् । अमोक्षो धर्मविवाहानाम् । इति द्वेषः ।

स्त्रियं द्विषतो भर्तुर्विधिमाह— **भिक्षुकी**त्यादि । भर्ता, द्विषन् स्त्रियं, भिक्षुक्यादिकुलानां भिक्षुकी शान्तशुद्धव्यवहारिणी श्रमणी अन्वाधिः स्त्रीधनाधिष्ठाता ज्ञातिर्बन्धुः एषां कुलानि गृहाणि तेषाम्, अन्यतमे न त्वन्यकुले वसन्तीमिति शेषः, एकां पुरुषान्तरमस्पृशन्तीं ताम्, अनुशयीत अनुतपन् स्वयमुपतिष्ठेत । एकामित्युक्त्या पुरुषान्तरसहशयने स्त्रियास्त्यागः सूचितः । पुरुषस्य तु अन्यसहशयनेऽप्यदोषः प्रागुक्तः ।

दृष्टेत्यादि । दृष्टलिङ्गे साक्षादुपलब्धेऽन्यस्त्रीमैथुनचिह्ने सति, मैथुनापहारे मैथुनस्यापलापे, द्वादशपणं दण्डं, दद्याद्, अपलपिता । सवर्णापसर्पोपगमे वा मिथ्यावादी सवर्णा सखी तद्रूपापसर्पसङ्गमे सति वा तदपलापकर्ता, द्वादशपणं दद्यात् ।

दम्पत्योरन्यतरद्वेषात् तदन्यमोक्षो न भवति, किन्तु परस्परं द्वेषान्मोक्ष इत्याह— **अमोक्ष्ये**ति । अकामस्य मोक्षमनिच्छतः । भार्यायाश्च अकामाया इति लिङ्गविपरिणामेनात्र सम्बन्धः ।

स्त्रीविप्रकाराद्वेति । स्त्रिया अपराधात्, पुरुषश्चेद्, मोक्षमिच्छेद् यथागृहीतम् अस्यै दद्यात् स्त्रीसकाशाद् गृहीतं सर्वविधं द्रव्यं स्त्रियै दत्त्वा मुच्येत । **पुरुषविप्रकाराद्वे**ति । पुरुषापराधात्, स्त्री चेन्मोक्षमिच्छेत्, नास्यै यथागृहीतं दद्यात् अदत्त्वैव स्त्रियै स्त्रीधनं तत्सकाशात् मुच्येत । स एष स्त्रीपुंसान्योन्यमोक्षविधिरधर्म्यविवाहानामासुरादीनाम् । ब्राह्मादीनां तु मोक्षणं नास्तीत्याह — **अमोक्षो धर्मविवाहाना**मिति । इति द्वेषो व्याख्यातः ।

प्रतिषिद्धा स्त्री दर्पमद्यक्रीडायां त्रिपणं दण्डं दद्यात् । दिवा स्त्रीप्रेक्षाविहारगमने षट्पणो दण्डः । पुरुषप्रेक्षाविहारगमने द्वादशपणः । रात्रौ द्विगुणः ।

सुप्तमत्तप्रव्रजने भर्तुरदाने च द्वारस्य द्वादशपणः । रात्रौ निष्कासने द्विगुणः ।

स्त्रीपुंसयोर्मैथुनार्थेऽनङ्गविचेष्टायां रहोऽश्लीलसम्भाषायां वा चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसो द्विगुणः ।

केशनीवीदन्तनखावलम्बनेषु पूर्वः साहसदण्डः, पुंसो द्विगुणः ।

शङ्कितस्थाने सम्भाषायां च पणस्थाने शिफादण्डः । स्त्रीणां ग्राममध्ये चण्डालः पक्षान्तरे पञ्चशिफा दद्यात् । पणिकं वा प्रहारं मोक्षयेत् । इत्यतिचारः ।

अतिचारविधिमाह — **प्रतिषिद्धे**त्यादि । प्रतिषिद्धा भर्त्रा वारिता, स्त्री, दर्पमद्यक्रीडायां दर्पक्रीडायां मद्यक्रीडायां च प्रवर्तमानेति शेषः, त्रिपणं दण्डं दद्यात् । **दिवे**ति । अह्नि, स्त्रीप्रेक्षाविहारगमने स्त्रीप्रयुज्यमाननाट्यदर्शनार्थम् उद्यानक्रीडार्थं च गमने, षट्पणो दण्डः, अर्थात् स्त्रियाः प्रतिषिद्धायाः । पुरुषप्रेक्षाविहारगमने पुरुषप्रयुज्यमानप्रेक्षाविहारगमने, द्वादशपणः । रात्रौ द्विगुणः स्त्रैणप्रेक्षाविषये द्वादशपणः पौंस्नप्रेक्षाविषये चतुर्विंशतिपणः ।

सुप्तेत्यादि । सुप्तमत्तप्रव्रजने सुप्ते मत्ते च भर्तरि स्वगृहं विहाय गमने, भर्तुरदाने च द्वारस्य आगतस्य भर्तुर्गृहद्वारकवाटानुद्घाटने च, द्वादशपणः दण्डः । रात्रौ निष्कासने गृहाद् बहिर्भर्तुर्निरसने, द्विगुणः चतुर्विंशतिपणः ।

स्त्रीपुंसयोरिति । तयोः, मैथुनार्थे अनङ्गविचेष्टायां मैथुनमावां गमिष्याव इत्याकूतसूचककामचेष्टितकरणे, रहोऽश्लीलसम्भाषायां वा रहसि असभ्यवृत्तसम्भाषणे च, चतुर्विंशतिपणः स्त्रिया दण्डः, पुंसः द्विगुणः अष्टाचत्वारिंशत्पणः ।

केशेत्यादि । केशग्रहणे नीवीग्रहणे दन्तक्षतकरणे नखक्षतकरणे च, पूर्वः प्रथमः, साहसदण्डः स्त्रियाः, पुंसः द्विगुणः पञ्चशतपणात्मको मध्यमसाहसदण्डः ।

शङ्कितेत्यादि । शङ्कितस्थाने सम्भाषायां च शङ्कास्पदे प्रदेशे सम्भाषणमात्रेऽपि कृते, पणस्थाने शिफादण्डः एकैकस्य पणस्य स्थाने एकैकशिफा-

प्रतिषिद्धयोः स्त्रीपुंसयोरन्योन्योपकारे क्षुद्रकद्रव्याणां द्वादशपणो दण्डः, स्थूलकद्रव्याणां चतुर्विंशतिपणः, हिरण्यसुवर्णयोश्चतुष्पञ्चाशत्पणः स्त्रियाः। दण्डः पुंसो द्विगुणः। त एवागम्ययोरर्धदण्डाः। तथा प्रतिषिद्धपुरुषव्यवहारेषु च। इति प्रतिषेधः।

राजद्विष्टातिचाराभ्यामात्मापक्रमणेन च।
स्त्रीधनानीतशुल्कानामस्वाम्यं जायते स्त्रियाः॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे तृतीयोऽध्यायः
विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकार-
व्यवहारप्रतिषेधाश्च,
आदितः षष्टितमः॥

ताडनं दण्डः। **स्त्रीणामिति**। तासां, ग्राममध्ये पश्यत्सु ग्रामजनेषु, चण्डालः वधताडननियुक्तः पुरुषः, पक्षान्तरे एकैकपार्श्वावकाशे, पञ्चशिफाः पञ्च शिफाप्रहारान्, दद्यात्। पणिकं वा पणोऽस्य शुल्को दीयते पणिकः तथाभूतं वा प्रहारं मोक्षयेत् एकैकस्य प्रहारस्यैकैकं पणं निष्क्रयं दत्त्वा प्रहारदण्डं मोचयेदित्यर्थः। इत्यतिचारः, व्याख्यातः।

अथ प्रतिषेधमाह — **प्रतिषिद्धयोरिति**। वारितपरस्परव्यवहारयोः, स्त्रीपुंसयोः, अन्योन्योपकारे क्षुद्रकद्रव्याणां स्रक्चन्दनाद्यल्पद्रव्याणां परस्परदानेनोपकारे, द्वादशपणो दण्डः, स्त्रियाः। स्थूलकद्रव्याणां वस्त्राभरणादीनाम्, अन्योन्योपकारे चतुर्विंशतिपणः। हिरण्यसुवर्णयोः, अन्योन्योपकारे, चतुष्पञ्चाशत्पणः। पुंसो विशेषमाह — **दण्ड** इति। उक्तो द्वादशपणादिः सर्वो दण्डः, पुंसो द्विगुणः। **त एवेति**। उक्ता एव दण्डाः, अगम्ययोः अर्धदण्डाः भ्रातृभगिन्यादिरूपयोः स्त्रीपुंसयोर्विषये अर्धहीना भवन्ति। ननु च भ्रातृभगिन्यादीनामन्योन्योपकारो निसर्गसिद्धवात्सल्यप्रयुक्तो न त्वन्येषां स्त्रीपुंसानामिव सम्भावितदुरभिसन्धिप्रयुक्तः इति कथमसौ दण्डार्ह इति चेत्, सत्यं, किन्तु ऋजुबुद्ध्यारब्धोऽसावनुष्ठानप्रबन्धवशात् क्रमेण दुरभिसन्धिं जनयेदिति दण्डार्ह एवासौ।

य एते स्त्रीपुंसयोः प्रतिषिद्धव्यवहारयोः परस्परोपकारे दण्डास्त एव पुरुषयोरपि प्रतिषिद्धव्यवहारयोरित्याह — **तथेत्यादि**। **इति प्रतिषेध इति**। एवम् उपकारव्यवहारप्रतिषेधो व्याख्यातः।

राजद्विष्टातिचाराभ्यामिति । राजद्विष्टकथनेन दर्पमद्यक्रीडादिगमनेन च, आत्मापक्रमणेन च स्वयं भर्तृसकाशान्निष्पतनेन च, स्त्रीधनानीतशुल्कानाम् अस्वाम्यं स्त्रिया जायते स्त्रीधने पितृगृहोपाहृते शुल्के च स्त्रियाः स्वामित्वं हीयते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे तृतीयोऽध्यायः
विवाहसंयुक्ते शुश्रूषाभर्मपारुष्यद्वेषातिचारोपकार-
व्यवहारप्रतिषेधाः,
आदितः षष्टितमः ॥

५९ प्रक. विवाहसंयुक्तं निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासः दीर्घप्रवासश्च।

पतिकुलान्निष्पतितायाः स्त्रियाः षट्पणो दण्डोऽन्यत्र विप्रकारात्। प्रतिषिद्धायां द्वादशपणः । प्रतिवेशगृहातिगतायाः षट्पणः ।

प्रातिवेशिकभिक्षुकवैदेहकानामवकाशभिक्षापण्यादाने द्वादशपणो दण्डः, प्रतिषिद्धानां पूर्वः साहसदण्डः । परगृहातिगतायाश्चतुर्विंशतिपणः ।

परभार्यावकाशदाने शत्यो दण्डोऽन्यत्रापद्भ्यः । वारणाज्ञानयोर्निर्दोषः ।

पतिविप्रकारात् पतिज्ञातिसुखावस्थग्रामिकान्वाधिभिक्षुकीज्ञातिकुलानामन्यतममपुरुषं गन्तुमदोष इत्याचार्याः ।

पूर्वाध्यायशेषोक्तमपक्रमणं 'निवेशकालं हि दीर्घप्रवासे व्याख्यास्यामः' इत्युक्तं निवेशकालं च वर्णयितुमयमध्याय आरभ्यते ।

पतिकुलादिति । पतिगृहात्, निष्पतितायाः निर्गतायाः, स्त्रियाः प्राप्तव्यवहारायाः, षट्पणो दण्डः, अन्यत्र विप्रकाराद् पुरुषकृतापराधाभावे । प्रतिषिद्धायां 'मा कुरु निष्पतनमि'ति वारितायां सत्यां तस्या निष्पतने, द्वादशपणः । प्रतिवेशगृहातिगतायाः इतीदं वाक्यं क्वचिन्न पठ्यते ।

प्रातिवेशिकभिक्षुकवैदेहकानामिति । प्रातिवेशिकः प्रतिगृही भिक्षुको वृत्तच्युतः पाषण्डादिः वैदेहकः कुवणिक् इत्येतेषाम्, अवकाशभिक्षापण्यादाने अवकाशभिक्षाशब्दौ तद्दानपरौ अवकाशदाने भिक्षादाने पण्यग्रहणे च, द्वादशपणो दण्डः । प्रतिषिद्धानां, पूर्वः प्रथमः, साहसदण्डः पञ्चाशदुत्तरद्विशतपणात्मकः । परगृहातिगतायाः भर्तृगृहसमनन्तरगृहमतिक्रम्य व्यवहितं गृहं गतायाः, चतुर्विंशतिपणः दण्डः ।

परेत्यादि । परभार्यावकाशदाने परभार्याया वासभूमिदाने, शत्यो दण्डः पणशतपरिमाणो दण्डः । अपवादमाह — **अन्यत्रापद्भ्य** इति । आपत्सु तु न दोषः । **वारणाज्ञानयोर्निर्दोष** इति, 'मा मम गृहं प्रविशे'ति वार्यमाणापि वा अज्ञायमानैव वा यदि प्रविशेत्, तदा निरपराधः, कः, अर्थाद् गृहस्वामी ।

पतिधिक्कारवशादन्यत्रापसरणस्यावश्यं प्राप्तौ साध्वीजनः कमाश्रयं गच्छेदित्याकाङ्क्षायामाह—**पतिविप्रकारादि**ति । भर्तृकृतधिक्कारदोषात्, पतिज्ञात्यादिकुलानां पतिज्ञातिर्भर्तृबान्धवः सुखावस्थः विवाहस्थेयः ग्रामिको ग्राम-

सपुरुषं वा ज्ञातिकुलम् । कुतो हि साध्वीजनस्यच्छलं, सुख-मेतदवबोद्धुम् इति कौटल्यः ।

प्रेतव्याधिव्यसनगर्भनिमित्तमप्रतिषिद्धमेव ज्ञातिकुलगमनम् ।

तन्निमित्तं वारयतो द्वादशपणो दण्डः । तत्रापि गूहमाना स्त्रीधनं जीयेत, ज्ञातयो वा छादयन्तः शुल्कशेषम् । इति निष्पतनम् ।

पतिकुलान्निष्पत्य ग्रामान्तरगमने द्वादशपणो दण्डः स्थाप्याभरणलोपश्च । गम्येन वा पुंसा सहप्रस्थाने चतुर्विंशतिपणः, सर्वधर्मलोप-

---

महत्तरः अन्वाधिः स्त्रीधनस्थेयः भिक्षुकी तापस्विनी भैक्षजीविनी ज्ञातिः स्व-बान्धवः एतत्सम्बन्धिनां गृहाणाम् . अन्यतमम् . अपुरुषम् अविद्यमानपुरुषं, गन्तुं गत्वाधिवस्तुम्, अदोषः दोषाभावः स्त्रियाः । इत्याचार्याः मन्यन्त इति शेषः ।

आचार्यमतमभ्युपगम्यैव ज्ञातिकुले विशेषं स्वमतेनाह—**सपुरुषं** वेति विद्यमानपुरुषमपि वा, ज्ञातिकुलं पतिबन्धुगृहं स्वबन्धुगृहं च, गन्तुमदोष इति वर्तते । तत्र हेतुमाह— कुतो हि साध्वीजनस्य, छलं व्यभिचरणं, नि-ष्कल्मषहृदयतया न कुतोऽपि भवतीत्यर्थः । प्रकाशभयाच्च छलं न जायत इत्याह — **सुखमेतदवबोद्धुमि**ति । छलं स्त्रीकृतं भर्तुरन्यस्य वा सद्यः सुज्ञानं न तु गोपयितुं शक्यमित्यर्थः ।

पतिकुलादन्यत्रगमनं यत् सामान्यतः प्रतिषिद्धं तस्यापवादमाह — **प्रेतव्याधी**त्यादि । सुबोधम् ।

तन्निमित्तमिति । उक्तनिमित्तकं ज्ञातिकुलगमनं, वारयतः पुरुषस्य, द्वादशपणो दण्डः । तत्रापीति ज्ञातिकुलेऽपि, गूहमाना केनापि छलेन गूढं वसन्ती, स्त्रीधनं, जीयेत हाप्येत अर्थाद् भर्ता स्वयं हरता । ज्ञातयो वा छा-दयन्तः स्त्रियं छलेन गूढं स्वगृहे वासयन्तः, शुल्कशेषं, जीयेरन्निति विपरि-णामानुषङ्गः । इति निष्पतनमिति । व्याख्यातमिति शेषः ।

अथ पत्यनुसरणमाह—**पतिकुलादि**ति । पतिगृहात्, निष्पत्य पत्य-ननुज्ञया निर्गम्य, ग्रामान्तरगमने, द्वादशपणो दण्डः, स्थाप्याभरणलोपश्च अपुनर्गमनप्रत्ययार्थन्यस्तभूषणहानिश्च, भवति । गम्येन वा पुंसा, सहप्रस्थाने प्रस्थाय ग्रामान्तरगमने, चतुर्विंशतिपणो दण्डः, सर्वधर्मलोपश्च भर्त्रनुष्ठीयमान-

श्चान्यत्र भर्मदानतीर्थगमनाभ्याम् । पुंसः पूर्वः साहसदण्डः तुल्यश्रेयसः, पापीयसो मध्यमः । बन्धुरदण्ड्यः । प्रतिषेधेऽर्धदण्डः ।

पथि व्यन्तरे गूढदेशाभिगमने मैथुनार्थेन शङ्कितप्रतिषिद्धाभ्यां वा पथ्यनुसारेण सङ्ग्रहणं विद्यात् ।

तालावचरचारणमत्स्यबन्धकलुब्धकगोपालकशौण्डिकानामन्येषां च प्रसृष्टस्त्रीकाणां पथ्यनुसरणमदोषः । प्रतिषिद्धे वा नयतः पुंसः स्त्रिया वा गच्छन्त्यास्त एवार्धदण्डाः । इति पथ्यनुसरणम् ।

यज्ञादिसर्वधर्मसहचरणहानिश्च । तत्रापवादः — अन्यत्र भर्मदानतीर्थगमनाभ्यामिति । भर्मदानं गृहभरणं तदर्थं वा तीर्थगमनम् ऋतुगमनं तदर्थं वा भर्त्रन्तिकगमने न दोष इत्यर्थः । पुंसो दण्डमाह — पुंस इति । स्त्रियं ग्रामान्तरं नेतुः पुरुषस्य, पूर्वः साहसदण्डः पञ्चाशदधिकद्विशतपणात्मकः, कीदृशस्य, तुल्यश्रेयसः स्त्रीसमानजातिश्रेष्ठस्य । पापीयसो मध्यमः स्त्रीनिहीनजातीयस्य मध्यमः साहसदण्डः पञ्चशतपणात्मकः । बन्धुरदण्ड्यः बन्धुर्नेता दण्डार्हो न भवति । प्रतिषेधेऽर्धदण्ड इति । बन्धोरपि भर्त्रा प्रतिषिद्धस्य नेतुरुक्तसमांशो दण्डः ।

पथीति । मार्गेऽपि, व्यन्तरे मार्गविदूरावकाशे, गूढदेशाभिगमने छन्नप्रदेशगमने च सति, मैथुनार्थेन विद्यात् मैथुनमभिसन्धाय तद् गमनमिति जानीयात् । शङ्कितप्रतिषिद्धाभ्यां वेति । मैथुनार्थित्वशङ्काविषयीभूतेन, भर्तृप्रतिषिद्धेन चेत्याभ्यां सह, पथ्यनुसारेण पथ्यनुगमनेन, संग्रहणं विद्यात् स्त्रीसंग्रहणोक्तो दण्डविधिः स्त्रीपुंसयोर्वेदितव्य इत्यर्थः । स तूत्तराधिकरणे कन्याप्रकर्माणि वक्ष्यते ।

तालावचरेत्यादि । तालावचरो नटः चारणः कुशीलवः मत्स्यबन्धको बलिशजीवी लुब्धको व्याधः गोपालक आभीरः शौण्डिकः सुरासन्धानजीवी इत्येतेषाम्, अन्येषां च प्रसृष्टस्त्रीकाणां तदितरेषां चानुज्ञातस्त्रीकाणां ताम्बूलिकमालाकारादीनां, पथ्यनुसरणं प्रकरणात् स्त्रियाः पथि पुरुषान्तरानुगमनम्, अदोषः दोषो न भवति । तालावचरादिस्त्रियमपि भर्तृप्रतिषिद्धां पथि नयतः पुरुषस्य नीयमानायाश्च पूर्वोक्तदण्डार्धदण्डा भवन्तीत्याह — प्रतिषिद्धे वेत्यादि । इति पथ्यनुसरणं व्याख्यातम् ।

ह्रस्वप्रवासिनां शूद्रवैश्यक्षत्रियब्राह्मणानां भार्याः संवत्सरोत्तरं कालमाकाङ्क्षेरन् अप्रजाताः, संवत्सराधिकं प्रजाताः, प्रतिविहिताः द्विगुणं कालम् । अप्रतिविहिताः सुखावस्था बिभृयुः, परं चत्वारि वर्षाण्यष्टौ वा ज्ञातयः । ततो यथादत्तमादाय प्रमुञ्चेयुः ।

ब्राह्मणमधीयानं दश वर्षाण्यप्रजाता, द्वादश प्रजाता । राजपुरुषम् आ आयुःक्षयादाकाङ्क्षेत । सवर्णतश्च प्रजाता नापवादं लभेत । कुटुम्बर्द्धिलोपे वा सुखावस्थैर्विमुक्ता यथेष्टं विन्देत जीवितार्थमापद्गता वा ।

धर्मविवाहात् कुमारी परिग्रहीतारमनाख्याय प्रोषितमश्रूयमाणं

ह्रस्वप्रवासमाह — **ह्रस्वप्रवासिनामिति** । क्षिप्रं प्रत्यागमिष्यामीत्युक्त्वा देशान्तरं गतानां, शूद्रवैश्यक्षत्रियब्राह्मणानां, भार्याः, संवत्सरोत्तरं कालम् आकाङ्क्षेरन् एकं वत्सरं शूद्री द्वौ वैश्यी त्रीन् क्षत्रियी चतुरो ब्राह्मणीत्येवं क्रमेण प्रत्यागमनकालम् अतिक्रान्तावधेर्भर्तुः प्रतीक्षेरन्, कथम्भूताः, अप्रजाताः अनुपजातप्रसवाः । संवत्सराधिकं प्रजाताः उपजातप्रसवाः अधिकमेकं संवत्सरम्, आकाङ्क्षेरन् । प्रतिविहिताः भर्तृसुविहितवृत्तिव्ययाः स्त्रियो, द्विगुणं कालं शूद्र्याद्युक्तक्रमेण द्विवर्षचतुर्वर्षषड्वर्षाष्टवर्षात्मकम्, आकाङ्क्षेरन् । अप्रतिविहिताः स्त्रीः, सुखावस्था बिभृयुः विवाहव्यवस्थास्थेयपुरुषाः पोषयेयुः । परं द्विगुणकालादूर्ध्वं, चत्वारि वर्षाणि, अष्टौ वा वर्षाणि, ज्ञातयः पतिबान्धवाः, बिभृयुः । ततः तदूर्ध्वं, भर्तुरनागमने, यथादत्तम् आदाय, प्रमुञ्चेयुः स्त्रीज्ञातिगृहं प्रति विसृजेयुः, तासामिच्छा चेदित्यर्थम् ।

ब्राह्मणमिति । ब्राह्मणम्, अधीयानं विद्याध्ययनाय देशान्तरं गतं, दश वर्षाणि, अप्रजाता अप्रसूतिः स्त्री, आकाङ्क्षेत । द्वादश वर्षाणि, प्रजाता प्रसूता, आकाङ्क्षेत । राजपुरुषं प्रोषितम्, आ आयुःक्षयाद् आकाङ्क्षेत । **सवर्णत इति** । यथोक्तप्रतीक्षाकालादूर्ध्वं समानवर्णात्, चकारात् स्वोत्कृष्टवर्णादपि प्रजाता प्राप्तगर्भा स्त्री, नापवादं लभेत दण्डनीया न भवेत् । **कुटुम्बर्द्धिलोपे वेति** । बन्धुकुटुम्बे दारिद्र्यादात्मभरणासमर्थे सति, सुखावस्थैर्विमुक्ता विवाहव्यवस्थास्थेयैर्यथोचितकालं भृत्वा विसृष्टा स्त्री, यथेष्टं विन्देत ईप्सितमन्यं पुरुषं वरयेत्, जीवितार्थं देहयात्रार्थम् । आपद्गता वा आपन्निवारणार्थं वा ।

धर्मविवाहादिति । ब्राह्मादि धर्मविवाहमधिगम्य स्थिता, कुमारी अक्षतयोनिः, परिग्रहीतारम्, अनाख्याय प्रोषितम् अनापृच्छ्य देशान्तरगतम्,

सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं श्रूयमाणम् । आख्याय प्रोषितमश्रूयमाणं पञ्च तीर्थान्याकाङ्क्षेत, दश श्रूयमाणम् । एकदेशदत्तशुल्कं त्रीणि तीर्थान्यश्रूयमाणं, श्रूयमाणं सप्त तीर्थान्याकाङ्क्षेत । दत्तशुल्कं पञ्च तीर्थान्यश्रूयमाणं, दश श्रूयमाणम् । ततः परं धर्मस्थैर्विसृष्टा यथेष्टं विन्देत । तीर्थोपरोधो हि धर्मवध इति कौटल्यः ।

दीर्घप्रवासिनः प्रव्रजितस्य प्रेतस्य वा भार्या सप्त तीर्थान्याकाङ्क्षेत, संवत्सरं प्रजाता । ततः पतिसोदर्यं गच्छेत् । बहुषु प्रत्यासन्नं धार्मिकं भर्मसमर्थं कनिष्ठमभार्यं वा । तदभावेऽप्यसोदर्यं सपिण्डं कुल्यं वा । आसन्नमेतेषाम् । एष एव क्रमः ।

अश्रूयमाणम् अज्ञायमानवृत्तान्तं, सप्त तीर्थानि, आर्तवानि, आकाङ्क्षेत । श्रूयमाणं तं, संवत्सरम् आकाङ्क्षेत । **आख्याय प्रोषित**मित्यादि । एकदेशदत्तशुल्कम् सावशेषार्पितशुल्कम् । दत्तशुल्कं निरवशेषार्पितशुल्कम् । शेषं सुबोधम् । **ततः पर**मिति । यथोक्तकालादूर्ध्वं, धर्मस्थैः विसृष्टा पत्यन्तरवरणायाभ्यनुज्ञाता, यथेष्टं विन्देत यथाकामितं पतिं परिगृह्णीयात् । तत्र हेतुमाह— **तीर्थोपरोधो ही**ति । तीर्थस्य ऋतुकालस्य प्रजननयोग्यस्य उपरोधः पुरुषानभिगमनेन विफलीकरणं, धर्मवधः धर्मस्य पुत्रोत्पत्तिलभ्यस्य सुकृतस्य वधो घातः, भवति । इति कौटल्यः मन्यत इति शेषः । यत् स्मर्यते —

"पुत्रेण लोकाञ् जयति पौत्रेणानन्त्यमश्नुते ।
अथ पुत्रस्य पौत्रेण नाकपृष्ठे महीयते ॥" इति ।

दीर्घप्रवासिन इति । महाप्रस्थानं गतस्य, प्रव्रजितस्य सन्न्यस्तस्य, प्रेतस्य वा, भार्या, सप्त तीर्थानि आकाङ्क्षेत, अप्रजाता । संवत्सरं प्रजाता सा, आकाङ्क्षेत । ततः, पतिसोदर्यं पत्युर्भ्रातरं, गच्छेद् उपतिष्ठेत पुत्रार्थम् । बहुषु अनेकेषु पतिसोदर्येषु सत्सु, प्रत्यासन्नं समनन्तरं, गच्छेत् । स यद्यधार्मिकः तदा धार्मिकं गच्छेत् । सर्वेषु धार्मिकेषु भर्मसमर्थं भरणशक्तं गच्छेत् । सर्वेषु भरणसमर्थेषु कनिष्ठं गच्छेत् , अभार्यं वा गच्छेत् । **तदभावेऽपी**ति । पतिसोदर्याभावेऽपि, असोदर्यं वैमात्रेयं गच्छेत् । तदभावे सपिण्डं गच्छेत् । कुल्यं वा सपिण्डाभावे पतिकुलोत्पन्नं, गच्छेत् । **आसन्नमेतेषा**मिति । कुल्यानां बहूनां मध्ये पुरुषगणनायामासन्नं गच्छेत् । एष एव क्रमः यथोक्त एव पुरुषपरिग्रहविषयो न्यायः ।

एतानुत्क्रम्य दायादान् वेदने जारकर्मणि ।
जारस्त्रीदातृवेत्तारः संप्राप्ताः सङ्ग्रहात्ययम् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे चतुर्थोऽध्यायः
विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासः
दीर्घप्रवासश्च । विवाहसंयुक्तं समाप्तम् ।
आदित एकषष्टितमः ॥

एतानिति । एतान् दायादान् पतिसोदर्यादीन्, उत्क्रम्य, वेदने पुरुषान्तरपरिणयने , जारकर्मणि जारपुरुषगमने वा, जारस्त्रीदातृवेत्तारः जारः स्त्रीभोक्ता स्त्री व्यभिचारिणी दाता स्त्रीदायकः स्त्रीधनस्थेयश्च वेत्ता स्त्रियं विन्दमानः इत्येते, संग्रहात्ययं संप्राप्ताः स्त्रीसंग्रहणविहितेन दण्डेन दण्डनीयाः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे चतुर्थोऽध्यायः
विवाहसंयुक्ते निष्पतनं पथ्यनुसरणं ह्रस्वप्रवासो
दीर्घप्रवासश्च । विवाहसंयुक्तं समाप्तम् ।
आदित एकषष्टितमोऽध्यायः ॥

६०. प्रकः दायविभागः—दायक्रमः ।

अनीश्वराः पितृमन्तः स्थितपितृमातृकाः पुत्राः । तेषाम् ऊर्ध्वं पितृतो दायविभागः पितृद्रव्याणाम् । स्वयमार्जितमविभाज्यम् अन्यत्र पितृद्रव्यादुत्थितेभ्यः ।

पितृद्रव्यादविभक्तोपगतानां पुत्राः पौत्रा वा आ चतुर्थादित्यंशभाजः । तावदविच्छिन्नः पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे समं विभजेरन् ।

अपितृद्रव्या विभक्तपितृद्रव्या वा सहजीवन्तः पुनर्विभजेरन् । यतश्चोत्तिष्ठेत स द्व्यंशं लभेत ।

दायविभाग इति सूत्रम् । दायः कुलसाधारणं द्रव्यं तस्य विभाग उच्यत इति सूत्रार्थः । पूर्वाध्यायान्ते 'एतानुत्क्रम्य दायादान्' इत्यासूत्रितो दायः कैः कथं विभाज्य इत्येतदस्मिन् प्रकरणेऽभिधीयते । त्रिभिश्चाध्यायैरिदं वितन्यते । तत्र प्रथमे दायक्रमः, द्वितीयेंऽशविभागः, तृतीये पुत्रविभाग इति ।

अनीश्वरा इति । पितृमन्तः प्रशस्तमातापितृकाः, स्थितपितृमातृकाः जीवन्मातापितृकाः, पुत्राः, अनीश्वराः कुलधने स्वामिनो न भवन्ति । तेषां पुत्राणाम्, ऊर्ध्वं पितृतः पित्रोरनन्तरं, दायविभागः, पितृद्रव्याणां पित्रुपार्जितद्रव्याणां, कर्तव्यः । स्वयमार्जितम्, अविभाज्यं भ्रातृविभागानर्हं भवति । तत्रापवादः — **अन्यत्र पितृद्रव्यादुत्थितेभ्य** इति । पितृद्रव्योपाश्रयार्जितद्रव्यव्यतिरेकेण । पितृद्रव्योत्थितानि तु पितृद्रव्यवद् विभाज्यान्येव ।

पितृद्रव्यादविभक्तोपगतानामिति । अविभज्य पितृद्रव्यमुपरतानां, पुत्राः पौत्रा वा, आ चतुर्थादिति अनेन प्रकारेण आ चतुर्थपुरुषावधेः, अंशभाजः पितृक्रमप्रकृतविषमांशभाजो भवन्ति । तत्र हेतुः— तावत् चतुर्थपुरुषान्तरं यावत्, अविच्छिन्नः पिण्डो भवति । विच्छिन्नपिण्डाः सर्वे चतुर्थपुरुषात् परतो ये तत्कालजीविनस्ते सर्वे, समं विभजेरन् ।

अपितृद्रव्या इति । अविद्यमानपितृद्रव्याः, विभक्तपितृद्रव्या वा, सहजीवन्तः संसृज्य जीवन्तः, पुनर्विभजेरन् पुनरपि विभागं कुर्युः । तत्र विशेषमाह— **यतश्चे**ति । यत्प्रयत्नाद्, उत्तिष्ठेत धनं वर्धेत, सः, द्व्यंशं द्विरावृत्तमंशं, लभेत । अन्ये तु व्याचक्षते— धनपिण्डस्यैकमर्धमुत्थापको लभेत, अन्यदर्धमितरे सर्वे विभजेरन्निति ।

द्रव्यमपुत्रस्य सोदर्या भ्रातरः सहजीविनो वा हरेयुः कन्याश्च ।

रिक्थं पुत्रवतः पुत्रा दुहितरो वा धर्मिष्ठेषु विवाहेषु जाताः । तदभावे पिता धरमाणः, पित्रभावे भ्रातरो भ्रातृपुत्राश्च ।

अपितृका बहवोऽपि च भ्रातरो भ्रातृपुत्राश्च पितुरेकमंशं हरेयुः ।

सोदर्याणामनेकपितृकाणां पितृतो दायविभागः ।

द्रव्यमिति । अपुत्रस्य प्रमीतस्य द्रव्यं, सोदर्या भ्रातरः सहजीविनः एकोदरजा भ्रातरः संसृष्टिनः, हरेयुः । वेति वाक्यभूषणम् । कन्यानामपि सत्त्वे प्रतिपत्तिमाह— **कन्याश्चे**ति । तास्तु विवाहाद्यपेक्षितं द्रव्यं हरेयुः ।

रिक्थमिति । रिक्थं दायं, पुत्रवतः प्रमीतस्य, पुत्राः, हरेयुरिति वर्तते । दुहितरो वा, धर्मिष्ठेषु ब्राह्मादिषु चतुर्षु विवाहेषु जाताः, हरेयुः पुत्राभावे । तदभावे दुहित्रभावे, पिता, धरमाणो जीवन्, हरेत् । पित्रभावे भ्रातरः, भ्रातृपुत्राश्च भ्रात्रभावे, हरेयुः ।

अपितृका इति । अपितृकाः प्रमीतपितृकाः, ते च बहवः, तेऽपि च भ्रातरः सोदर्यभ्रातरोऽसोदर्यभ्रातरश्च, सर्वे ते भ्रातृपुत्राश्च भ्रातृणां पुत्राश्च, एवम्भूताः, पितुरेकमंशं हरेयुः । अयमर्थः— त्रयो भ्रातरः प्रमीता अविभक्ताः । तेषु ज्येष्ठस्य त्रयः पुत्राः मध्यमस्य द्वौ पुत्रौ कनिष्ठस्यैकः पुत्रः इत्याहत्य षण्णां सोदर्यासोदर्यभ्रातृणां विभागे करणीये पिण्डधनस्य न षोढा विभागः किन्तु तत्तत्पितृतस्त्रेधा विभागं कृत्वा एकं त्रिभागं ज्येष्ठस्य पुत्रास्त्रयो गृह्णीयुः, द्वितीयं त्रिभागं मध्यमस्य द्वौ पुत्रौ गृह्णीयातां, तृतीयं त्रिभागं कनिष्ठस्य य एकः पुत्रः स गृह्णीयादिति । अथवा भ्रातर इत्येतदन्तस्यैव खण्डस्य यथोक्तोऽर्थ उदाहरणं च । भ्रातृपुत्राश्चेति त्वन्यविषयं— **भ्रातृपुत्राश्च पितुरेकमंशं हरेयुरि**ति । तद्यथा —द्वयोर्भ्रात्रोरविभक्तयोरन्यतरस्य मृतस्य पुत्रास्त्रयोऽवशिष्टश्चैको भ्रातेति चतुर्णां विभागप्रसङ्गे पिण्डधनं द्व्यंशीकृत्यैकं द्व्यंशं भ्राता गृह्णीयादपरं द्व्यंशं भ्रातृपुत्रा विभज्य गृह्णीयुरिति ।

यदि समानोदरा भ्रातरो बहवः तेषां पितरस्तु भिन्नाः, तदा कीदृशी दायव्यवस्थेत्यपेक्षायामाह —**सोदर्याणामि**त्यादि । पितृतो दायविभागः तत्तत्पुत्राः स्वस्वपितृधनं गृह्णीयुः ।

पितृभ्रातृपुत्राणां पूर्वे विद्यमाने नापरमवलम्बन्ते, ज्येष्ठे च कनिष्ठमर्थग्राहिणः ।

जीवद्विभागे पिता नैकं विशेषयेत् । न चैकमकारणान्निर्विभजेत । पितुरसत्यर्थे ज्येष्ठाः कनिष्ठाननुगृह्णीयुः, अन्यत्र मिथ्यावृत्तेभ्यः ।

प्राप्तव्यवहाराणां विभागः । अप्राप्तव्यवहाराणां देयविशुद्धं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुर्व्यवहारप्रापणात् । प्रोषितस्य वा ।

सन्निविष्टसममसन्निविष्टेभ्यो नैवेशनिकं दद्युः । कन्याभ्यश्च प्रादानिकम् ।

पितरि तत्पुत्रेषु च सहजीविषु पुत्रान्यतमो बहुपुत्रः कुटुम्बार्थे यदि ऋणं कृत्वा म्रियेत, तदा ऋणदातॄणां प्रतिपत्तिमाह — **पितृभ्रातृपुत्राणा-मित्यादि** । अयमर्थः — अर्थग्राहिणः ऋणकर्तुः पितृभ्रातृपुत्राणां मध्ये पितरि विद्यमाने भ्रात्रादीन् ऋणदातारो नाभियुञ्जीरन् किन्तु पितरमेवाभियुञ्जीरन्, पित्रभावे भ्रातॄन् । भ्रातृषु विद्यमानेषु पुत्रं नाभियुञ्जीरन् किन्तु भ्रातॄनेवाभि-युञ्जीरन् भ्रात्रभावे पुत्रम् । पुत्रे च ज्येष्ठे विद्यमाने न कनिष्ठमभियुञ्जीरन् किन्तु ज्येष्ठमिति । इहार्थग्राहिणमित्यपपाठः प्रतिभाति ।

'तेषामूर्ध्वं पितृतो दायविभाग' इत्युक्तम् । जीवति पितरि दायविभा-गमाह — **जीवद्विभाग** इति । जीवद्विभागविषये, पिता, नैकं विशेषयेत् पुत्रेष्वेकतममधिकांशेन वा न्यूनांशेन वा न योजयेत्, किन्तु समेनैवांशेन सर्वान् योजयेत् । एकं पुत्रम्, अकारणात् विना निमित्तं, न निर्विभजेत निरंशं न कुर्यात् । पितुरसत्यर्थे पितृधनाभावे, ज्येष्ठाः पुत्राः, कनिष्ठान्, अनु-गृह्णीयुः बिभृयुः, अन्यत्र मिथ्यावृत्तेभ्यः कनिष्ठाश्चेन्मिथ्यावृत्ता न भवन्ति ।

प्राप्तव्यवहाराणां विभाग इति । अतीतषोडशवर्षाः स्वयं विभागं भजन्ते । अप्राप्तव्यवहाराणां देयविशुद्धम् ऋणादिदेयव्ययविशोधितं भागम्, मातृबन्धुषु मातुलादिषु, ग्रामवृद्धेषु वा, स्थापयेयुः न्यस्येयुः । आ कुतः, व्यव-हारप्रापणात् व्यवहारप्रापकं षोडशं वयोऽभिव्याप्य । **प्रोषितस्य** वेति । देशा-न्तरगतस्य च भागं मातृबन्धुषु ग्रामवृद्धेषु वा स्थापयेयुरिति वर्तते ।

सन्निविष्टेत्यादि । असन्निविष्टेभ्यः अनुरूपस्त्रीपरिणयेन प्राप्तगार्ह-स्थ्याः सन्निविष्टाः अतथाभूता असन्निविष्टा अविवाहिताः तेभ्यः, **नैवेशनिकं** निवेशनं परिणयनं तत्प्रयोजनकं द्रव्यं, सन्निविष्टसमं सन्निविष्टभ्रात्रर्थे यावद्

ऋणरिक्थयोः समो विभागः ।

उदपात्राण्यपि निष्किञ्चना विभजेरन् इत्याचार्याः । छलमेतदिति कौटल्यः । सतोऽर्थस्य विभागो नासतः ।

एतावानर्थः सामान्यस्तस्यैतावान् प्रत्यंशः इत्यनुभाष्य ब्रुवन् साक्षिषु विभागं कारयेत् । दुर्विभक्तमन्योन्यापहृतमन्तर्हितमविज्ञातोत्पन्नं वा पुनर्विभजेरन् ।

अदायादकं राजा हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जमन्यत्र श्रोत्रियद्रव्यात् । तत् त्रैविद्येभ्यः प्रयच्छेत् ।

व्यायितं विवाहार्थं तत्तुल्यप्रमाणं, दद्युः । कन्याभ्यश्च, प्रादानिकं प्रदानं विवाहः तत्पर्याप्तं द्रव्यं, दद्युः ।

ऋणरिक्थयोः समो विभाग इति । ऋणं 'सवृद्धिकं प्रत्यर्पयामी'ति परिभाष्योत्तमर्णाद् गृहीतं रिक्थम् अधमर्णाय वृद्ध्यर्थं प्रयुक्तं तयोरुभयोः पितृकृतयोस्तुल्यो विभागः कार्यः ।

उदपात्राण्यपीति । जलाहरणार्थानि पात्राण्यपि, निष्किञ्चनाः अर्थहीनाः विभजेरन् । इत्याचार्याः आहुरिति शेषः । इदमाचार्यवचनं छलदुष्टमित्याह — **छलमेतदिति कौटल्य** इति । तदुपपादयति — **सतोऽर्थस्य विभागो नासत** इति । यद्युदपात्ररूपैरर्थैर्विभागयोग्यैरुपेताः न तर्हि ते निष्किञ्चनव्यपदेशमर्हन्ति, यदि निष्किञ्चनास्तदा न सोदपात्रा भवितुमर्हन्ति । निष्किञ्चनाश्च सोदपात्राश्चेति व्याहतमित्यर्थः । एवञ्च वदतः आचार्यकौटल्यस्यायमभिप्रायः — सारस्य फल्गुनो वार्थमात्रस्य विभागे न्यायप्राप्ते उदपात्राणामविभाज्यत्वशङ्कैव कुतस्त्येति व्यर्थस्तद्विभागोपदेशः, प्रत्युत महाधनान् प्रति तद्विभागस्य तदिच्छया प्राप्नुवतोऽशक्यप्रतिषेधस्य प्रतिषेधोऽपि ततः प्रतीयत इत्यनिष्टं चेति ।

अपुत्रादिकधनस्य दायादविभागमाह — **एतावानित्यादि** । एतावद् धनं सामान्यमस्ति तत्रैतावत् प्रतिव्यक्ति अंश उत्पद्यत इति अनुभाष्यानूद्य ब्रुवन् प्रकटं कीर्तयन्, साक्षिसन्निधौ विभागं कारयेत् । **दुर्विभक्तमिति** । विषमविभक्तम्, अन्योन्यापहृतं परस्परगुप्तम्, अन्तर्हितं देशकालान्तरितम्, अविज्ञातोत्पन्नं वा धनं, पुनर्विभजेरन् ।

दायादस्याप्यभावे धनस्य गतिमाह — **अदायादकमिति** । दायादरहितं धनं, राजा हरेत्, कथं हरेत् स्त्रीवृत्तिप्रेतकार्यवर्जं स्त्रीदेहयात्रार्थं प्रमी-

पतितः पतितारज्जातः क्लीबश्चानंशाः । जडोन्मत्तान्धकुष्ठिनश्च । सति भार्यार्थे तेषामपत्यमतद्विधं भागं हरेत् । ग्रासाच्छादनमितरे पतितवर्जाः ।

तेषां च कृतदाराणां लुप्ते प्रजनने सति ।
सृजेयुर्बान्धवाः पुत्रांस्तेषामंशान् प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
पञ्चमोऽध्यायः दायविभागे दायक्रमः,
आदितो द्विषष्टितमः ॥

तौर्ध्वदैहिकार्थं च धनमपेक्षितं वर्जयित्वा । तत्रापवादमाह — **अन्यत्र श्रोत्रियद्रव्यादिति** । छन्दोध्यायिधनं तु न हरेत् । क्व तर्हि तद् विनियुञ्जीतेत्याह — **तत् त्रैविद्येभ्यः प्रयच्छेदिति** । तिस्रो विद्या अधीयते त्रैविद्यास्तेभ्यो, दद्यात् ।

निरंशानाह — **पतित इत्यादि** । सुबोधम् । **सतीति** । तेषां जडादीनां, भार्यार्थे विवाहे सति, अतद्विधम् अजडमनुन्मत्तमनन्धमकुष्ठि च, अपत्यं, भागं हरेत् । इतरे अजडापत्याद्यतिरिक्ताः, पतितवर्जाः, ग्रासाच्छादनं, हरेयुरिति विपरिणतानुषङ्गः ।

अध्यायप्रान्ते श्लोकमाह — **तेषां चेति** । जडोन्मत्तादीनां, कृतदाराणां, प्रजनने लुप्ते बीजशक्तिविरहे, बान्धवाः पुत्रान् सृजेयुः अर्थाज्जडादीनां क्षेत्रेषु । तेषां पुत्राणाम्, अंशान् प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चमोऽध्यायः दायविभागे दायक्रमः,
आदितो द्विषष्टितमः ॥

६०. प्रक. दायविभागः—अंशविभागः ।

एकस्त्रीपुत्राणां ज्येष्ठांशः ब्राह्मणानामजाः, क्षत्रियाणामश्वाः, वैश्यानां गावः, शूद्राणामवयः ।

काणलिङ्गास्तेषां मध्यमांशः, भिन्नवर्णाः कनिष्ठांशः ।

चतुष्पदाभावे रत्नवर्जानां दशानां भागं द्रव्याणामेकं ज्येष्ठो हरेत् । प्रतिमुक्तस्वधापाशो हि भवति इत्यौशनसो विभागः ।

पितुः परिवापाद् यानमाभरणं च ज्येष्ठांशः, शयनासनं भुक्त-कांस्यं च मध्यमांशः, कृष्णधान्यायसं गृहपरिवापो गोशकटं च कनि-ष्ठांशः । शेषद्रव्याणामेकद्रव्यस्य वा समो विभागः ।

अथ ज्येष्ठांशादिक्रमोऽस्मिन्नध्यायेऽभिधीयते । तत्र ज्येष्ठांशमाह — **एकस्त्रीपुत्राणामि**ति । एकस्याः स्त्रियाः पुत्राणां बहूनां मध्ये, ब्राह्मणानाम्, अजाः ज्येष्ठांशः ज्येष्ठांशत्वेन कल्पनीया भवन्ति, यज्ञार्थत्वेनोत्कृष्टत्वात् । क्षत्रियाणाम् अश्वाः ज्येष्ठांशः युद्धार्थत्वेन तथात्वात् । वैश्यानां गावः ज्येष्ठांशः वाणिज्यार्थत्वेन तत्त्वात् । शूद्राणाम् अवयो मेषाः ज्येष्ठांशः कृष्याद्यर्थत्वेन तथात्वात् ।

काणलिङ्गा इति । काण एकदृक् तल्लिङ्गास्तज्जातीयाः पङ्ग्वादयः अजा अश्वा गावोऽवयश्च, तेषां ब्राह्मणादीनां चतुर्णां यथाक्रमं, मध्यमांशः । भिन्नवर्णा अनेकवर्णा अजादयः, तेषां कनिष्ठांशः ।

चतुष्पदेत्यादि । चतुष्पदाभावे, रत्नवर्जानां, द्रव्याणाम्, एकं दशानां भागं दशभागमेकं, ज्येष्ठो हरेत् । कुतो ज्येष्ठोऽधिकमंशं हरेदित्याह—**प्रति-मुक्तस्वधापाशो हि भवती**ति । यस्माद् ज्येष्ठः कण्ठनिवेशितपितृकर्मपाशो भवति तस्मादित्यर्थः । **इति औशनसो विभाग** इति । यथोक्तप्रकारो वि-भाग उशनसा विहितः । अप्रतिषेधाचायं कौटल्यस्याभिमतो द्रष्टव्यः ।

प्रकारान्तरमाह—**पितुरि**ति । पितुः, परिवापात् परिच्छदात्, यानम् आभरणं च ज्येष्ठांशः । शयनासनं, भुक्तकांस्यं भोजनस्थालं च, मध्यमांशः । कृष्णधान्यायसं कृष्णधान्यं तिलवरकादि आयसम् अयोविकारश्च, गृहपरि-वापो मुसलादिर्गृहपरिच्छदः, गोशकटं च गोयुक्तं शकटं च, कनिष्ठांशः । शेषद्रव्याणाम् उक्तातिरिक्तद्रव्याणाम्, एकद्रव्यस्य वा द्रव्यस्यैकस्यापि वा, समः सर्वपुत्रसाधारणो विभागः ।

अदायादा भगिन्यः । मातुः परिवापाद् भुक्तकांस्याभरणभागिन्यः ।

मानुषहीनो ज्येष्ठस्तृतीयमंशं ज्येष्ठांशाल्लभेत । चतुर्थमन्यायवृत्तिर्निवृत्तधर्मकार्यो वा । कामाचारः सर्वं जीयेत ।

तेन मध्यमकनिष्ठौ व्याख्यातौ । तयोर्मानुषोपेतो ज्येष्ठांशादर्धं लभेत ।

नानास्त्रीपुत्राणां तु संस्कृतासंस्कृतयोः कन्याकृतक्रिययोरभावे च, एकस्याः पुत्रयोर्यमयोर्वा पूर्वजन्मना ज्येष्ठभावः ।

भगिन्यो दायहीनाः, किन्तु मातृपरिच्छदेभ्यो भुक्तकांस्याभरणानि हरेयुरित्याह — **अदायादा** इत्यादि ।

मानुषहीन इति । मानुषशब्देन मनुष्यसामान्यस्यापेक्षितः पुरुषकारगुणो गृह्यते तद्रहितो, ज्येष्ठः ज्येष्ठांशात् तृतीयमंशं लभेत, न तु कृत्स्नं ज्येष्ठांशम् । अन्यायवृत्तिः, निवृत्तधर्मकार्यो वा, चतुर्थं ज्येष्ठांशचतुर्भागं लभेत । कामाचारः इत्वरः, सर्वं जीयेत ज्येष्ठांशमखिलं हाप्येत ।

तेन मध्यमकनिष्ठौ व्याख्याताविति । तयोरप्येष न्यायः सञ्चारयितव्य इत्यर्थः । तयोः मध्यमकनिष्ठयोः, मानुषोपेतः पुरुषकारयुक्तो मध्यमः कनिष्ठो वा, ज्येष्ठांशादर्धं लभेत यथाप्राप्तस्वांशानपहानेन । इत्थमेकस्त्रीपुत्रविभागोऽभिहितः ।

नानास्त्रीपुत्राणामिति । एकस्य पुरुषस्य बह्व्यो याः स्त्रियः तासां पुत्राणां, पूर्वजन्मना ज्येष्ठभावः, व्यवस्थाप्य इति शेषः, कदा, संस्कृतासंस्कृतयोरभावे संस्कृता ब्राह्मादिविधिपरिगृहीता असंस्कृता गान्धर्वादिविवाहपरिगृहीता तयोरभावे तथाभूतमातृभेदाभावे, कन्याकृतक्रिययोरभावे च कन्या विवाहात् पूर्वमक्षतयोनिः कृतक्रिया विवाहात् पूर्वं क्षतयोनिः तयोरभावे च तथाभूतमातृभेदाभावे च । उक्तविधयोर्मातृभेदयोः सत्त्वे पूर्वजन्मना न ज्येष्ठभावः किन्तु मातृवशादेव व्यवस्थाप्यः । तद्यथा — संस्कृतापुत्र उत्तरकालजातोऽप्यसंस्कृतापुत्रापेक्षया ज्येष्ठः, कन्यापुत्रश्च तथाविधः क्षतयोनिपुत्रापेक्षया ज्येष्ठ इति । एकस्याः पुत्रयोर्यमयोर्वा युग्मजातयोर्वा, पूर्वजन्मना ज्येष्ठभावः ।

सूतमागधव्रात्यरथकाराणामैश्वर्यतो विभागः शेषास्तमुपजीवेयुः । अनीश्वराः समविभागा इति ।

चातुर्वर्ण्यपुत्राणां ब्राह्मणीपुत्रश्चतुरोंऽशान् हरेत्, क्षत्रियापुत्रस्त्रीनंशान्, वैश्यापुत्रो द्वावंशौ, एकं शूद्रापुत्रः ।

तेन त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोर्व्याख्यातः ।

ब्राह्मणस्यानन्तरापुत्रस्तुल्यांशः । क्षत्रियवैश्ययोरर्धांशः । तुल्यांशो वा मानुषोपेतः ।

सूतमागधव्रात्यरथकाराणामिति । सूतो ब्राह्मण्यां क्षत्रियादुत्पन्नः मागधः क्षत्रियायां वैश्यादुत्पन्नः व्रात्योऽनुपनीतविवाहिताद् ब्राह्मणात् सवर्णायां जातः रथकारो वास्तुवृत्तिरिज्याधानोपनीतिमान् वैण्यभेदः एतेषां, नानास्त्रीपुत्राणामिति वर्तते, नानास्त्रीषु जातानां पुत्राणाम्, ऐश्वर्यतो विभागः प्रभविष्णुत्वानुसारेण विभागः तेष्वेक एव चेदैश्वर्यवान् स एव कृत्स्नं पितृधनं हरेत्। शेषाः पुत्राः, तम् ईश्वरम्, उपजीवेयुः। अनीश्वराः समविभागाः तेष्वेकश्चेदीश्वरो न भवेत् सर्वे समं विभजेरन्। इतिशब्दः प्रकारार्थः । अनेन प्रकारेण सङ्करजातीयस्यान्यस्यापि नानास्त्रीपुत्राणां यथोचितं विभाग उन्नेय इत्यर्थः ।

चातुर्वर्ण्यपुत्राणामित्यादि । अयमर्थः—ब्राह्मणस्य चतुर्ष्वपि वर्णेषु यदि पुत्राः स्युः, तदा पितृधनं ज्येष्ठांशवर्जं शिष्टं दशधा विभज्य तेषां मध्ये ब्राह्मणीपुत्रः चतुरोंऽशान् हरेत्, क्षत्रियापुत्रः त्रीन् अंशान्, वैश्यापुत्रो द्वावंशौ, शूद्रापुत्र एकमंशमिति ।

तेनेति । तेन ब्राह्मणविषयोक्तचतुर्वर्णपुत्रविभागविधिना, त्रिवर्णद्विवर्णपुत्रविभागः क्षत्रियवैश्ययोः, व्याख्यातः उक्तप्रायः । तद् यथा — क्षत्रियस्य क्षत्रियावैश्याशूद्रापुत्रेषु त्रिषु विद्यमानेषु ज्येष्ठांशवर्जं पितृधनं षोढा विभज्य त्रीनंशान् क्षत्रियापुत्रो हरेत्, द्वावपरौ वैश्यापुत्रः, एकमंशं शूद्रापुत्रः । तथा वैश्यस्य वैश्याशूद्रापुत्रयोर्विद्यमानयोर्ज्येष्ठांशवर्जं पितृधनं त्रेधा विभज्य द्वावंशौ वैश्यापुत्रो हरेद्, एकमंशं शूद्रापुत्र इति ।

ब्राह्मणस्यानन्तरापुत्रस्तुल्यांश इत्यादि । अयमर्थः — ब्राह्मणस्य सवर्णायां क्षत्रियायां चैकैकः पुत्रोऽस्ति, वैश्याशूद्रयोस्तु पुत्राभावः, तदा क्षत्रियापुत्रो ज्येष्ठांशवर्जं ब्राह्मणीपुत्रतुल्यं भागं भजेत । क्षत्रियस्य सवर्णायां वैश्यायां चैकैकः पुत्रः शूद्रायां पुत्राभावः, तदा वैश्यापुत्रो ज्येष्ठांशवर्जं क्षत्रि-

तुल्यातुल्ययोरेकपुत्रः सर्वं हरेद् बन्धूंश्च बिभृयात् ।

ब्राह्मणानां तु पारशवस्तृतीयमंशं लभेत । द्वावंशौ सपिण्डः कुल्यो वासन्नः स्वधादानहेतोः । तदभावे पितुराचार्योऽन्तेवासी वा ।

क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतम् ।
मातृबन्धुः सगोत्रो वा तस्मै तत् प्रदिशेद् धनम् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
षष्ठोऽध्यायः दायविभागेंऽशविभागः,
आदितस्त्रिषष्टितमः ॥

यापुत्रभागस्यार्धं भजेत । तथा वैश्यस्य सवर्णायामेकः पुत्रः शूद्रायामेकः पुत्रः तदा शूद्रापुत्रो ज्येष्ठांशवर्जं वैश्यापुत्रभागस्यार्धं भजेत । यदुक्तं क्षत्रियवैश्ययोरर्धांश इति, तस्यापवादमाह — **तुल्यांशो वा मानुषोपेत** इति । वैश्यापुत्रः पुरुषगुणोपेतः क्षत्रियापुत्रतुल्यभागः स्यात् । शूद्रापुत्रः पुरुषगुणोपेतो वैश्यापुत्रतुल्यभागः स्यादित्यर्थः ।

तुल्यातुल्ययोरिति । सवर्णासवर्णयोः स्त्रियोः, एकपुत्रः एक एव अद्वितीय एव यः पुत्रः सः, सर्वं पितृधनं हरेत्, बन्धूंश्च पितृभरणीयान्, बिभृयात् ।

असवर्णापुत्रस्यैकाकिनो यत् सर्वधनभाक्त्वमुक्तं, तस्यापवादमाह — **ब्राह्मणानां त्विति** । विप्राणां, पारशवः शूद्रायामुत्पन्नः पुत्रस्तु, तृतीयमंशं लभेत एकाकी सन्नपि, न तु सर्वं पितृधनम् । अवशिष्टयोस्तृतीयांशयोः क्व विनियोगस्तत्राह — **द्वावंशाविति** । अवशिष्टौ त्र्यंशौ, सपिण्डः पितृसपिण्डः, तदभावे **कुल्यो** वा पितृकुलोत्पन्नः समानोदको वा, आसन्नः अन्तरङ्गः, लभेत । कुतः, स्वधादानहेतोः सपिण्डकुल्यौ हि पितृनिवापकरणसमर्थौ, न तु शूद्रापुत्र इति कृत्वा । **तदभाव इति** । सपिण्डकुल्ययोरभावे, पितुराचार्यः, लभेत, तौ द्वावंशौ । पितुः, अन्तेवासी वा शिष्यो वा, लभेत ।

सर्वस्याप्यभावे आह — **क्षेत्रे वेति** । अस्य क्षेत्रे वा पितुः सवर्णक्षेत्रे वा, नियुक्तः नियोगविधिना प्रयुक्तः, मातृबन्धुः सगोत्रो वा, क्षेत्रजं सुतं जनयेत् । तस्मै क्षेत्रजाय, तद् धनं, प्रदिशेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
षष्ठोऽध्यायः दायविभागेंऽशविभागः,
आदितस्त्रिषष्टितमः ॥

६०. प्रक. दायविभागः— पुत्रविभागः।

परपरिग्रहे बीजमुत्सृष्टं क्षेत्रिण इत्याचार्याः ।

माता भस्त्रा यस्य रेतस्तस्यापत्यम् इत्यपरे ।

विद्यमानमुभयम् इति कौटल्यः ।

स्वयंजातः कृतक्रियायामौरसः । तेन तुल्यः पुत्रिकापुत्रः । सगोत्रेणान्यगोत्रेण वा नियुक्तेन क्षेत्रजातः क्षेत्रजः पुत्रः । जनयितुरसत्यन्यस्मिन् पुत्रे स एव द्विपितृको द्विगोत्रो वा द्वयोरपि स्वधारिक्थभाग्

दायस्यांशक्रम उक्तः । दायादविशेषपरिज्ञानार्थं पुत्रभेदोऽभिधीयते । अथवा पूर्वाध्यायान्ते 'क्षेत्रे वा जनयेदस्य नियुक्तः क्षेत्रजं सुतमि'ति क्षेत्रजः पुत्रः प्रस्तुतः । तत्प्रसङ्गात् पुत्राणां भेदास्तेषु मुख्यामुख्यभावश्चास्मिन्नध्याये प्रतिपाद्यन्ते ।

परपरिग्रह इति । अन्यस्य स्त्रियां, बीजमुत्सृष्टम् अन्येन रेत उत्सृज्योत्पादितः पुत्रः, क्षेत्रिणः तस्या भर्तुरेव पुत्रः न तु बीजोत्स्रष्टुः । इत्याचार्या आहुः ।

माता चर्मप्रसेविकावद् बीजाधारमात्रमप्रधानमिति तत्सम्बन्धस्याकिञ्चित्करत्वाद् बीजोत्पन्नो न तत्परिणेतुरपत्यं भवितुमर्हति, किन्तु बीजिन एवेत्यन्येषां मतमित्याह — **माता भस्त्रे**त्यादि ।

बीजं क्षेत्रं चोभयं समवेतं विद्यमानं कार्यायेति क्षेत्रजो बीजक्षेत्रिणोरुभयोरपि पुत्र इत्यात्मनो मतमित्याह — **विद्यमानमित्यादि** ।

पुत्रभेदानाह — **स्वयंजातः कृतक्रियायामित्यादि** । परिणीतायां स्वयमुत्पादितः पुत्रः औरसाख्यः । तेन औरसेन तुल्यः पुत्रिकापुत्रः 'अस्यां यो जायते गर्भः स मे पुत्रो भविष्यति' इति परिभाष्य वराय दत्ता कन्या पुत्रिका तस्याः पुत्रः । **सगोत्रेणे**त्यादि । सुबोधम् । **जनयितुरि**ति । रेतस्सेक्तुः, असत्यन्यस्मिन् पुत्रे, अविद्यमाने औरसपुत्रे, स एव क्षेत्रज एव, द्विपितृकः बीजिक्षेत्र्युभयपितृकः, द्विगोत्रो वा बीजिक्षेत्र्युभयगोत्रकश्च भवन्, द्वयोरपि स्वधारिक्थभाक् स्वधादायी दायहरश्च, भवति । तथा चाहुः —

"क्षेत्रीयानुमतं बीजं यस्य क्षेत्रे प्ररोहति ।
तदपत्यं तयोरेव बीजक्षेत्रीययोर्मतम् ॥"

भवति । तत्सधर्मा बन्धूनां गृहे गूढजातस्तु गूढजः । बन्धुनोत्सृष्टोऽपविद्धः संस्कर्तुः पुत्रः । कन्यागर्भः कानीनः । सगर्भोढायाः सहोढः । पुनर्भूतायाः पौनर्भवः ।

स्वयंजातः पितृबन्धूनां च दायादः । परजातः संस्कर्तुरेव न बन्धूनाम् ।

तत्सधर्मा मातापितृभ्यामद्भिर्दत्तो दत्तः ।

स्वयं बन्धुभिर्वा पुत्रभावोपगत उपगतः ।

पुत्रत्वेऽधिकृतः कृतकः । परिक्रीतः क्रीत इति ।

इति । **तत्सधर्मेति** । बन्धूनां गृहे, गूढजातस्तु भर्तृनियोगं विनैव गूढमन्यस्योत्पन्नः, गूढजः । सः, तत्सधर्मा क्षेत्रजतुल्यः । **बन्धुनेति** । बन्धुनोत्सृष्टः मातापितृभ्यां परित्यक्तः, अपविद्धः तदाख्यः, संस्कर्तुः पुत्रः येन स संस्कृतस्तस्य पुत्रः । **कन्यागर्भ** इति । कन्याभावे प्रसूतः, कानीनः । **सगर्भोढाया** इति । गर्भेण सहितैव या व्यूढा सा सगर्भोढा तस्याः, पुत्रः, सहोढः तदाख्यः । **पुनर्भूतायाः पौनर्भव** इति । पुनर्विवाहितायाः दिधिषूशब्दितायाः पुत्रः पौनर्भवाख्यः । स च त्रिविधो मातृत्रैविध्यात्—या ह्यक्षतयोनिरेव सती भर्तृमरणादन्यस्मै ससंस्कारं दत्ता सैका पुनर्भूः, स्वभर्तारमुपेक्ष्यैवान्यमाश्रिता द्वितीया, मृते भर्तरि भर्तृबन्ध्वभावात् सपिण्डाय सवर्णाय वा दत्ता तृतीयेति ।

स्वयञ्जातः पितृबन्धूनामिति । स्वयञ्जात औरसः पुत्रः, सः पितृबन्धूनां च दायादः पितुः संस्कर्तुस्तद्बन्धूनां च दायहारी भवेत् । परजातः क्षेत्रजातादिः परोत्पन्नः, संस्कर्तुरेव दायादः, न बन्धूनां न पितृबन्धूनां दायादः ।

तत्सधर्मेति । स्वयञ्जाततुल्यः, मातापितृभ्याम् अद्भिर्दत्तः समन्त्रकोदकपूर्वं दत्तः, दत्तः तत्संज्ञः ।

'अयमहं युवयोः पुत्र' इति यः स्वयमात्मानं पुत्रत्वेनार्पयति स एकः उपगताख्यः । बन्धुभिर्वा 'युवयोरयं पुत्र' इति दत्तोऽपर उपगताख्य इत्याह — **स्वयं बन्धुभिर्वेत्यादि** ।

पुत्रत्वेऽधिकृतः कृतकः परिक्रीतः क्रीत इति । त्वमावयोः पुत्र इति पुत्रत्वे कल्पितः कृतकाख्यः । मूल्यं दत्त्वा मातापितृसकाशात् पुत्रत्वेन गृहीतः क्रीताख्यः । इतिशब्दः पुत्रविभागसमाप्तौ ।

औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः। असवर्णा ग्रासाच्छादनभागिनः।

ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णाः, एकान्तरा असवर्णाः।

ब्राह्मणस्य वैश्यायामम्बष्ठः, शूद्रायां निषादः पारशवो वा। क्षत्रियस्य शूद्रायामुग्रः।

शूद्र एव वैश्यस्य।

सवर्णासु चैषामचरितव्रतेभ्यो जाता व्रात्याः। इत्यनुलोमाः।

शूद्रादायोगवक्षत्तचण्डालाः।

वैश्यान्मागधवैदेहकौ।

क्षत्रियात् सूतः।

उक्तविधेषु पुत्रेषु विद्यमानेषु पश्चादौरसस्योत्पत्तौ तेषां का प्रतिपत्तिरित्याकाङ्क्षायां पितृधनं त्रेधा विभज्य तत्र एकं त्रिभागं सवर्णाः गृह्णीयुः अन्यौ द्वौ त्रिभागावौरसो गृह्णीयात्, असवर्णास्तु ग्रासाच्छादनमात्रं लभेरन्नित्याह — **औरसे तूत्पन्न** इत्यादि।

सवर्णासवर्णविषयमाह — **ब्राह्मणक्षत्रिययोरनन्तरापुत्राः सवर्णा** इति। ब्राह्मणस्य क्षत्रियापुत्राः सवर्णाः क्षत्रियस्य वैश्यापुत्राः सवर्णाः। **एकान्तरा असवर्णा** इति। ब्राह्मणस्य वैश्यापुत्रा असवर्णाः, क्षत्रियस्य शूद्रापुत्रा असवर्णाः।

अनुलोमानाह— **ब्राह्मणस्य वैश्यायामित्यादि**। सुबोधम्।

शूद्र एव वैश्यस्येति। वैश्यस्य शूद्रायामुत्पन्नः शूद्र एव, न जात्यन्तरम्।

सवर्णासु चेति। एषां ब्राह्मणक्षत्रियवैश्यानाम्, अचरितव्रतेभ्यः अनुपनीय कृतविवाहेभ्यः सवर्णासु जाताः, व्रात्याः व्रात्यसंज्ञाः। **इत्यनुलोमाः** जातयो व्याख्याता इति शेषः।

प्रतिलोमानाह — **शूद्रादित्यादि**। शूद्राद् वैश्यायामुत्पन्न आयोगवो नाम, क्षत्रियायां क्षत्तः, ब्राह्मण्यां चण्डालः। क्षत्तशब्द इहाकारान्तः प्रयुक्तः, अत एव स्त्रियाम् आकारान्तोऽनुपदं प्रयोक्ष्यते।

वैश्यान्मागधवैदेहकाविति। वैश्यात् क्षत्रियायां जातो मागधः, ब्राह्मण्यां वैदेहकः।

क्षत्रियात् सूत इति। क्षत्रियाद् ब्राह्मण्यां जातः सूतः।

पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः।
त एते प्रतिलोमाः स्वधर्मातिक्रमाद् राज्ञः सम्भवन्ति।

पृथुचक्रवर्तियज्ञभूम्युत्पन्नस्य पौराणिकस्य सूताख्यस्य मागधाख्यस्य च पृथुस्तोत्रविधायिनः प्रतिलोमजत्वशङ्काप्राप्तिं मनसि कुर्वंस्तां परिहरति—**पौराणिकस्त्वन्यः सूतो मागधश्च ब्रह्मक्षत्राद् विशेषतः** इति। अस्यार्थः—पुराणप्रवक्ता रोमहर्षणापरनामा यः सूतः सः, अन्यः उक्तात् प्रतिलोमजसूताद् भिन्नः, यस्तत्सहपठितः पुराणेषु मागधो नाम स च प्रतिलोमजमागधाद् भिन्नः। ब्रह्मक्षत्राद् विशेषतः विशेषेण युक्तः सूतो ब्राह्मणाद् विशिष्ट उत्कृष्टः मागधः क्षत्रियाद् विशिष्ट इति। एतच्च तथ्यम्। यतः,

"हस्ते तु दक्षिणे तस्य दृष्ट्वा चक्रं पितामहः।
विष्णोरंशं पृथुं मत्वा परितोषं परं ययौ॥
तस्यैव जातमात्रस्य यज्ञे पैतामहे शुभे।
सूतः सूत्यां (यज्ञाभिषवभूमौ) समुत्पन्नः सौत्येऽहनि महामतिः॥
तस्मिन्नेव महायज्ञे जज्ञे प्राज्ञोऽथ मागधः॥"

इति विष्णुपुराणप्रथमांशतृतीयाध्याये,

"ब्रह्मणः पौष्करे यज्ञे सुत्याहे वितते सति।
पृषदाज्यात् समुत्पन्नः सूतः पौराणिको द्विजः॥
वक्ता वेदादिशास्त्राणां त्रिकालामलधर्मवित्॥"

इत्यग्निपुराणप्रथमाध्याये,

"त्वया सूत! महाबुद्धे! भगवान् ब्रह्मवित्तमः।
इतिहासपुराणार्थं व्यासः सम्यगुपासितः॥
त्वं हि स्वायम्भुवे यज्ञे सुत्याहे वितते सति।
सम्भूतः संहितां वक्तुं स्वांशेन पुरुषोत्तमः॥"

इति कौर्मपुराणप्रथमाध्याये च व्यासशिष्यपौराणिकसूतस्यायोनित एवोत्पत्तिः प्रतिलोमसूतविलक्षणा कथ्यते, तथा द्विजत्वं विष्णवंशसम्भूतत्वं च। तथैव मागधस्यापि तत्सहपठितस्यायोनिजत्वम्।

त एते इति। त एते पूर्वोक्ता आयोगवादयः, प्रतिलोमाः, राज्ञः स्वधर्मातिक्रमात् सम्भवन्ति स्वधर्मो वर्णाश्रमरक्षा तस्यातिक्रमाद् यथावदकरणदोषात् जायन्ते।

उग्रान्नैषाद्यां कुक्कुटकः, विपर्यये पुल्कसः। वैदेहिकायामम्बष्ठाद् वैणः, विपर्यये कुशीलवः। क्षत्तायामुग्राच्छ्वपाकः। इत्येतेऽन्ये चान्तरालाः। कर्मणा वैण्यो रथकारः।

तेषां स्वयोनौ विवाहः। पूर्वावरगामित्वं वृत्तानुवृत्तं च स्वधर्मान् स्थापयेत्। शूद्रसधर्माणो वा अन्यत्र चण्डालेभ्यः।

केवलमेवं वर्तमानः स्वर्गमाप्नोति राजा नरकमन्यथा।

सर्वेषामन्तरालानां समो विभागः।

अथान्तरालानाह—**उग्रादिति**। उग्रात् क्षत्रियशूद्रापुत्रात्, नैषाद्यां ब्राह्मणशूद्रापुत्र्यां, जातः, कुक्कुटकः तदाख्यः। **विपर्यये पुल्कस इति**। निषादादुग्रकन्यायां जातः पुल्कसाख्यः। वैदेहिकायां वैदेहकन्यायाम्, अम्बष्ठात्, जातः, वैणः तदाख्यः। विपर्यये कुशीलवः अम्बष्ठ्यां वैदेहकाज्जातः कुशीलवाख्यः। क्षत्तायाम् उग्राद्, जातः, श्वपाकः तदाख्यः। इति एते उक्ताः, अन्ये च एवञ्जातीयाः सङ्करजाश्च, अन्तरालाः वर्णजात्यन्तरालभवाः विज्ञेयाः। **कर्मणेति**। वैण्यः वेणजातिरेव, कर्मणा लङ्घनप्लवनादिस्ववृत्तित्यागपूर्वकवास्तुवृत्तिस्वीकारेण, रथकारः तदाख्ययोच्यते, न तु रथकारो नामान्तरालोऽन्य इत्यर्थः।

तेषामिति। तेषाम् अन्तरालानां, स्वयोनौ विवाहः अम्बष्ठस्याम्बष्ठीविवाहो निषादस्य निषादीविवाह इत्येवं समानजातीयविवाहः कार्यः। पूर्वावरगामित्वं पूर्वस्याम्बष्ठादेरुत्कृष्टस्य अवरगामित्वम् अपकृष्टनिषाद्यादिगामित्वं न तु निषादादेरम्बष्ठ्यादिगामित्वं, वृत्तानुवृत्तं च पूर्वाचारानुवृत्तिं च, स्वधर्मान् स्थापयेत् स्वधर्मतया कल्पयेत्। **शूद्रसधर्माणो** वेति। तेषामित्यनुवर्त्य प्रथमान्ततया विपरिणमयितव्यम्, अन्तरालाः शूद्रधर्मेण वा धर्मवन्तः कर्तव्याः। ते च न सर्वे किन्तु चण्डालवर्जा इत्याह — **अन्यत्र चण्डालेभ्य** इति।

केवलमिति। केवलमेवं वर्तमानः उक्तप्रकाराव्यभिचारेण व्याप्रियमाणः, राजा स्वर्गम् आप्नोति। अन्यथा उक्तप्रकारव्यभिचारेण वर्तमानः, नरकम् आप्नोति।

सर्वेषामिति। अन्तरालानां, समो ज्येष्ठांशरहितः, विभागः। स च सर्वेषां स्त्रीणां पुरुषाणां चाविशेषेण भवति।

देशस्य जात्याः सङ्घस्य धर्मो ग्रामस्य वापि यः ।
उचितस्तस्य तेनैव दायधर्मं प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे सप्तमोऽध्यायः
दायविभागे पुत्रविभागः, दायविभागः समाप्तः ।
आदितः चतुष्षष्टितमोऽध्यायः ॥

प्रान्ते श्लोकमाह — **देशस्येति** । देशस्य जनपदादेः, जात्याः ब्राह्मणादेः, सङ्घस्य समुदायस्य, ग्रामस्यापि वा, यो धर्मः उचितः पारम्पर्यसिद्धः, तस्य ग्रामादेः, तेनैव तद्धर्मानुसारेणैव, दायधर्मं दायभागं, प्रकल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे सप्तमोऽध्यायः
दायविभागे पुत्रविभागः, दायविभागः समाप्तः ।
आदितश्चतुष्षष्टितमोऽध्यायः ॥

६१. प्रक. वास्तुकं---गृहवास्तुकम् ।

सामन्तप्रत्यया वास्तुविवादाः ।

गृहं क्षेत्रमारामः सेतुबन्धस्तटाकमाधारो वा वास्तुः ।

कर्णकीलायससम्बन्धोऽनुगृहं सेतुः । यथासेतुभोगं वेश्म कारयेत् ।

अभूतं वा परकुड्यादपक्रम्य द्वावरत्नी त्रिपदीं पादे बन्धं कारयेत् ।

अवस्करं भ्रममुदपानं वा न गृहोचितमन्यत्र अन्यत्र सूतिकाकूपादा निर्दशाहादिति । तस्यातिक्रमे पूर्वः साहसदण्डः ।

वास्तुकमिति सूत्रम् । गृहारामक्षेत्रादि स्थावरजातं वास्तु तत्सम्बद्धं वास्तुकम् । तदुच्यत इति सूत्रार्थः । गृहारामक्षेत्रादीनां विभक्तानामपि नित्यसमुपश्लिष्टावस्थायित्वात् तत्र विवादाः सम्भवन्तीति तन्निर्णयार्थमिदं प्रकरणमध्यायैस्त्रिभिर्वितन्यते । तत्र प्रथमे गृहवास्तुकं, द्वितीये वास्तुविक्रयः, तृतीये विवीतक्षेत्रपथहिंसा ।

सामन्तप्रत्यया वास्तुविवादा इति । वास्तुर्गृहारामादिर्वक्ष्यमाणः तद्विवादाः, सामन्तप्रत्ययाः सामन्तोऽनन्तरवास्तुः तत्प्रमाणकाः ।

वास्तुपदार्थमाह --- **गृहमिति** । गृहं, क्षेत्रं केदारादि, आराम उपवनं, सेतुबन्धः सीमाबन्धः पुष्पफलवाटषण्डमूलवापादिर्वा, तटाकं पद्माकरः, आधारो वा उदकबन्धो वा, वास्तुः ।

कर्णेत्यादि । कर्णेषु कोटिषु कीलाः निखाताः स्थूणाः कर्णकीलास्तेषु आयससम्बन्धः आयसानाम् अयोमयसूत्राणां सम्बन्धः सम्यगाबन्धनं कर्णकीलायससम्बन्धः तल्लक्षणः, अनुगृहं, सेतुः सीमाबन्धः, स्थायिद्रव्यान्तपालैः कार्य इति शेषः । यथासेतुभोगं सेत्वन्तर्गतभूविस्तारानतिक्रमेण, वेश्म सद्म, कारयेत् ।

पूर्वकृततथाविधसेत्वभावे आह --- **अभूतं वेति** । अपूर्वं, परकुड्यात्, परकीयगृहकुड्याद्, अपक्रम्य अपसृत्य, द्वौ अरत्नी त्रिपदीं वा पादे बन्धं कारयेत् द्विहस्तमानं पदत्रयमानं वा कुड्यमूले नेमिबन्धं कारयेत्, स्वभूमौ ।

अवस्करमिति । मलमूत्रविसर्गस्थानं, भ्रमं जलनिर्गमद्वारम्, उदपानं वा कूपं वा, गृहोचितम्, अन्यत्र तद्योग्यप्रदेशादन्यस्मिन् प्रदेशे परगृह-

तेनेन्धनावघातनकृतं कल्याणकृत्येष्वाचामोदकमार्गाश्च व्याख्याताः ।

त्रिपदीप्रतिक्रान्तमध्यर्धमरत्निं वा प्रवेश्य गाढप्रसृतमुदकमार्गं प्रस्रवणप्रपातं वा कारयेत् । तस्यातिक्रमे चतुष्पञ्चाशत्पणो दण्डः ।

एकपदीप्रतिक्रान्तमरत्निं वा चक्रिचतुष्पदस्थानमग्निष्ठम् उदञ्जरस्थानं रोचनीं कुट्टनीं वा कारयेत् । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः ।

सर्ववास्तुकयोः प्राक्षिप्तकयोर्वा शालयोः किष्कुरन्तरिका त्रि-

बाधोत्पादहेतौ, न कारयेत् । तत्रापवादः—अन्यत्र सूतिकाकूपात्, सूतिकास्नानोदकपतनार्थो गर्तः सूतिकाकूपः तं तु यथेष्टे देशे कारयेदित्यर्थः आ कुतः, आ निर्दशाहाद् आ दशाहातिक्रमात् । तदनन्तरं तं शोधयित्वा शुद्धमृदा पूरयेत् । **तस्यातिक्रम** इति । उक्तावस्करादिविध्युल्लङ्घने, पूर्वः साहसदण्डः ।

तेनेति । तेन सूतिकोक्तकल्पेन, कल्याणकृत्येषु उपनयनविवाहादिमङ्गलकार्येषु, इन्धनावघातनकृतम्, एधःकाष्ठविदारणप्रयुक्तं विधानम्, आचामोदकमार्गाश्च निस्स्रावजलमार्गाश्च, व्याख्याता उक्तप्रायाः । आकल्याणकृत्यसमाप्ति यथेष्टे देशे तेषां करणमनुमतमित्यर्थः ।

भ्रमविधिमाह — **त्रिपदी**त्यादि । त्रिपदीप्रतिक्रान्तं परकीयकुड्यात् पदत्रयदूरापक्रान्तम्, अध्यर्धमरत्निं वा प्रवेश्य सार्धहस्तं वा परकुड्यादपक्रम्य स्वभूम्यन्तःप्रवेशितं, गाढप्रसृतं निरर्गलमलोदकप्रसरम्, उदकमार्गं दीर्घिकाकारं, कारयेत् । प्रस्रवणप्रपातं वा कारयेत् सर्वमलिनजलप्रवाहपतनस्थानं च तथाभूतं कारयेत् । **तस्यातिक्रम** इति । उक्तविधिलङ्घने चतुष्पञ्चाशत्पणो दण्डः ।

एकपदीत्यादि । एकपदीप्रतिक्रान्तं परकुड्यादेकपददूरापक्रान्तम्, अरत्निं वा एकहस्तदूरं वा प्रतिक्रान्तमित्यार्थं, चक्रिचतुष्पदस्थानं चक्रिस्थानम् अजबलीवर्दस्थानं चतुष्पदस्थानं गजादिस्थानं च, अग्निष्ठं चुल्लीम्, उदञ्जरस्थानम् उदञ्जरं महज्जलपात्रं तन्निवेशस्थानं, रोचनीं रोचनकर्मयन्त्रं, कुट्टनीं वा उलूखलं च, कारयेत् । तस्य चक्रिस्थानादिविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः ।

सर्ववास्तुकयोरिति । उक्तेषु सर्वेषु वास्तुषु गृहचक्रिचतुष्पदस्थानादिषु मध्ये वास्तुकयोर्द्वयोः शालयोः, प्राक्षिप्तकयोः परस्परसन्निकृष्टयोः प्रासयोः,

पदी वा । तयोश्चतुरङ्गुलं नीप्रान्तरं समारूढकं वा । किष्कुमात्रमाणिद्वारमन्तरिकायां खण्डफुल्लार्थमसम्पातं कारयेत् । प्रकाशार्थमल्पमूर्ध्वं वातायनं कारयेत् । सम्भूय वा गृहस्वामिनो यथेष्टं कारयेयुरनिष्टं वारयेयुः ।

वानलट्याश्चोर्ध्वमावार्यभागं कटप्रच्छन्नमवमर्शभित्तिं वा कारयेद् वर्षबाधभयात् । तस्यातिक्रमे पूर्वः साहसदण्डः ।

प्रतिलोमद्वारवातायनबाधायां च, अन्यत्र राजमार्गरथ्याभ्यः ।

खातसोपानप्रणालीनिश्रेण्यवस्करभागैर्बहिर्बाधायां भोगनिग्रहे च ।

किष्कुस्त्रिपदी वा अन्तरिका साष्टाङ्गुलहस्तमानं पदत्रयमानं वा अन्तरालं कर्तव्यम् । तयोः शालयोः, चतुरङ्गुलं, नीप्रान्तरं पटलप्रान्तान्तरालं, कार्यम् । समारूढकं वा परस्परोपर्यारूढं वा तत् कार्यं गृहपत्योरनुज्ञायाम् । **किष्कुमात्रमिति** । साष्टाङ्गुलहस्तपरिमाणम्, आणिद्वारं क्षुद्रद्वारम्, अन्तरिकायां कारयेत्, किमर्थं, खण्डफुल्लार्थं स्फुटितसंस्कारार्थं, कथम्भूतम्, असम्पातम् असुकरजनगतागतम् । **प्रकाशार्थमिति** । प्रकाशलाभाय, अल्पम्, ऊर्ध्वं, वातायनं गवाक्षं, कारयेत् । **सम्भूय वेति** । समानच्छन्दीभूय वा, गृहस्वामिनः, **यथेष्टं** स्वाभिरुचितप्रकारं, कारयेयुः, अर्थाद् अन्तरिकादिवातायनान्तमुक्तमनुक्तं च यत्किञ्चित् । अनिष्टम् अनभिमतं, वारयेयुः ।

वानलट्याश्चोर्ध्वमिति । वानलटी गृहवरण्डकः तस्या ऊर्ध्वम्, आवार्यभागम् अवच्छादनीयं भागं, कटप्रच्छन्नं कटैस्तृणविशेषैराच्छादितं, कारयेत् । अवमर्शभित्तिं वा अल्पभित्तिं च, कटप्रच्छन्नां कारयेत् । कस्मात्, वर्षबाधभयात् वृष्टिपीडापरिहारार्थम् । तस्यातिक्रमे उक्तविधेरननुष्ठाने, पूर्वः साहसदण्डः ।

प्रतिलोमद्वारवातायनबाधायां चेति । प्रतिलोमेन द्वारेण परगृहजनप्रतिकूलेन द्वारेण वातायनेन च परोपद्रवोत्पादने, पूर्वः साहसदण्ड इति वर्तते । तत्रापवादः — **अन्यत्र राजमार्गरथ्याभ्य इति** । राजमार्गरथ्याभिमुख्येन द्वारवातायनयोः करणे तु सत्यामपि परबाधायां न दोष इत्यर्थः ।

खातेत्यादि । खातं गर्तादि, सोपानम् आरोहणं, प्रणाली जलनिर्गमपथः, निश्रेणिरधिरोहणी, अवस्करः मलमूत्रविसर्गस्थानम् एतेषां भागैः एतत्करणार्थमपहृतैः भूमिभागैः, बहिर्बाधायां बहिर्जनपीडने, भोगनिग्रहे च परस्य भूम्युपभोगप्रतिबन्धे च, पूर्वः साहसदण्ड इत्येव ।

परकुड्यमुदकेनोपघ्नतो द्वादशपणो दण्डः । मूत्रपुरीषोपघाते द्विगुणः ।

प्रणालीमोक्षो वर्षति, अन्यथा द्वादशपणो दण्डः ।

प्रतिषिद्धस्य च वसतः । निरस्यतश्चावक्रयणम्, अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्यः । स्वयमभिप्रस्थितो वर्षावक्रयशेषं दद्यात् ।

सामान्ये वेश्मनि साहाय्यमप्रयच्छतः सामान्यमुपरुन्धतो भोगं च गृहे द्वादशपणो दण्डः । विनाशयतस्तद्द्विगुणः ।

कोष्ठकाङ्गणवर्जानामग्निकुट्टनशालयोः ।
विवृतानां च सर्वेषां सामान्यो भोग इष्यते ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
अष्टमोऽध्यायः वास्तुके गृहवास्तुकम् ।
आदितः पञ्चषष्टितमोऽध्यायः ॥

परकुड्यमिति । परकीयां भित्तिम्, उदकेन जलावसेकेन, उपघ्नतः, द्वादशपणो दण्डः । मूत्रपुरीषोपघाते परकुड्यस्य मूत्रपुरीषाभ्यामुपघाते, द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रणालीमोक्षो वर्षतीति । पर्जन्ये वर्षति सति प्रणालीद्वारेणोदकमोक्षः कर्तव्यः । अन्यथा अमोक्षणे अवृष्टिषु प्रणालीमोक्षणे वा, द्वादशपणो दण्डः ।

अवक्रीतविषयमाह --**प्रतिषिद्धस्य च वसत इति** । 'इयन्तं कालं त्वया शुश्रूषमाणेन मदन्तिके वस्तव्यमि'ति स्वामिपरिभाषिते कालेऽतीते सति 'इत ऊर्ध्वं मा वसे'ति निषिद्धस्यापि वासममुञ्चतोऽवक्रीतस्य, द्वादशपणो दण्ड इति वर्तते । **निरस्यतश्चावक्रयणमिति** । मूल्यदानपूर्वं शुश्रूषुस्वीकरणं यावत्परिभाषितकालाननुवर्तनेन मध्ये त्यजतोऽवक्रेतुश्च, द्वादशपणो दण्डः । तत्रापवादः -- **अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणमिथ्याभोगेभ्य इति** । पारुष्यं वाग्दण्डपारुष्यं, स्तेयं चौर्यं, साहसं प्रसभकर्म, सङ्ग्रहणं स्त्रीसङ्ग्रहणं, मिथ्याभोगः देहसंस्काराद्यकरणम् एषां सम्भवे क्लृप्तकालपूर्तेः प्राक् त्यजतो न दोष इत्यर्थः । **स्वयमभिप्रस्थित इति** । क्लृप्तकालमखिलमनुषित्वा यथेच्छमपसृतोऽवक्रीतः, वर्षावक्रयशेषं क्लृप्तवत्सरशेषमूल्यं, दद्यात् ।

सामान्य इति । उभयसाधारणे, वेश्मनि, साहाय्यम्, अप्रयच्छतः अकुर्वतः, सामान्यं, गृहे भोगम्, उपभोगम् उपरुन्धतो निगृह्णतश्च, द्वादशपणो दण्डः । विनाशयतः, तद्द्विगुणः चतुर्विंशतिपणो दण्डः ।

प्रान्ते श्लोकमाह — **कोष्ठकाङ्गणवर्जानामिति** । कोष्ठकं गृहद्वारम्, अङ्गणम् अजिरं, वर्जम् अवस्करस्थानं, वर्चानामिति क्वचित् पाठः इत्येतेषाम्, अग्निकुट्टनशालयोः अग्निशाला महानसः कुट्टनशाला उलूखलशाला तयोः, सर्वेषां च, विवृतानाम् अनावृतदेशानां, भोगः, सामान्यः साधारणः, इष्यते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
अष्टमोऽध्यायः वास्तुके गृहवास्तुकम् ।
आदितः पञ्चपञ्चाशत्तमोऽध्यायः ॥

६१. प्रक. वास्तुकं — वास्तुविक्रयः ।

ज्ञातिसामन्तधनिकाः क्रमेण भूमिपरिग्रहान् क्रेतुमभ्याभवेयुः । ततोऽन्ये बाह्याः ।

सामन्तचत्वारिंशत्कुल्या गृहप्रतिमुखे वेश्म श्रावयेयुः । सामन्तग्रामवृद्धेषु क्षेत्रमारामं सेतुबन्धं तटाकमाधारं वा मर्यादासु यथासेतुभोगम् । 'अनेनार्घेण कः क्रेता' इति त्रिराघुषितमव्याहतं क्रेता क्रेतुं लभेत ।

स्पर्धया वा मूल्यवर्धने मूल्यवृद्धिः सशुल्का कोशं गच्छेत् । विक्रयप्रतिक्रोष्टा शुल्कं दद्यात् ।

गताध्याये वास्तोः षट् प्रकारा उक्ताः । तत्र प्राधान्येन नेमिबन्धप्रस्रवणप्रपातपरस्परान्तरालानि चक्रिचतुष्पदस्थानादिकं चाभिहितम् । गृहादीनां विक्रयादिकं त्वस्मिन्नध्यायेऽभिधीयते ।

ज्ञातीत्यादि । ज्ञातिसामन्तधनिकाः ज्ञातिर्दायादः सामन्तो निकटगृहवासी धनिकः ऋणप्रयोक्ता एते, क्रमेण पूर्वाभावे पर इति परिपाट्या, भूमिपरिग्रहान् गृहादीन्, क्रेतुम्, अभ्याभवेयुः अर्हेयुः, अभ्यावहेयुरिति वा पाठः लभेरन्नित्यर्थः । ततः तेषामभावे, अन्ये बाह्याः, अभ्याभवेयुः ।

सामन्तेत्यादि । सामन्तचत्वारिंशत्कुल्याः नैकटिकैश्चत्वारिंशता गृहिभिः समेताः, गृहप्रतिमुखे गृहस्याग्रे, वेश्म श्रावयेयुः 'विक्रेष्यामहे' इति प्रतिक्रोशेयुः । **सामन्तग्रामवृद्धेष्विति** । तेषु शृण्वत्सु, क्षेत्रम्, आरामं, सेतुबन्धं, तटाकम्, आधारं वा अल्पसरश्च, मर्यादासु तत्तत्सीमासु स्थित्वा, यथासेतुभोगम् 'इमेऽस्य सीमाबन्धाः एतावान् भोग' इति च यथास्थितसेतुभोगनिर्देशयुक्तं, श्रावयेयुरित्यनुषज्यते । **अनेनेति** । 'अनेनार्घेण कः क्रेता' इति, त्रिः वारत्रयम्, आघुषितम् उद्घुष्य श्रावितं, गृहादिकम्, अव्याहतं ज्ञात्याद्यप्रतिषिद्धं, क्रेता, क्रेतुं लभेत मूल्यदानेन स्वीकर्तुमर्हेत् ।

स्पर्धया वा मूल्यवर्धन इति । क्रेतृसङ्घर्षेण निमित्तेन मूल्यस्य विक्रेतृनिर्दिष्टापेक्षयाधिक्यसम्भवे, मूल्यवृद्धिः सशुल्का कोशं गच्छेत् मूल्यवृद्ध्यंशः शुल्कसहितः राजभाण्डागारं प्राप्नुयात् । विक्रयप्रतिक्रोष्टा विक्रये मूल्यवर्धयिता, शुल्कं दद्यात् ।

अस्वामिप्रतिक्रोशे चतुर्विंशतिपणो दण्डः। सप्तरात्रादूर्ध्वमनभिसरतः प्रतिक्रुष्टो विक्रीणीत। प्रतिक्रुष्टातिक्रमे वास्तुनि द्विशतो दण्डः अन्यत्र चतुर्विंशतिपणो दण्डः। इति वास्तुविक्रयः।

सीमविवादं ग्रामयोरुभयोः सामन्ता पञ्चग्रामी दशग्रामी वा सेतुभिः स्थावरैः कृत्रिमैर्वा कुर्यात्।

कर्षकगोपालवृद्धकाः पूर्वभुक्तिका वा, अबाह्याः सेतूनामभिज्ञा बहव एको वा निर्दिश्य सीमसेतून् विपरीतवेषाः सीमानं नयेयुः। उद्दिष्टानां सेतूनामदर्शने सहस्रदण्डः। तदेव नीते सीमापहारिणां सेतुच्छिदां च कुर्यात्।

अस्वामिप्रतिक्रोश इत्यादि। भूम्यनधिकारिणः प्रतिक्रोशतश्चतुर्विंशतिपणो दण्डः। **सप्तरात्रादूर्ध्वमि**ति। प्रतिक्रुश्य क्रयव्यवहारशुद्ध्यर्थं व्यवहारस्थानमनभिगच्छन् प्रतिक्रोष्टा आसप्तरात्रं प्रतीक्षणीयः। तत ऊर्ध्वं, **प्रतिक्रुष्टो** विक्रीणीत, अन्यस्मै। प्रतिक्रुष्टातिक्रमे प्रतिक्रुष्टकृतेऽतिक्रमे प्रतिक्रोष्टारमनादृत्य तदन्यस्मै विक्रये क्रियमाणे इति यावत्, वास्तुनि द्विशतः वास्तुविषये द्विशतपणः, दण्डः। अन्यत्र चतुष्पदादिविषये, **चतुर्विंशतिपणो दण्डः**। इति वास्तुविक्रयः व्याख्यात इति शेषः।

सीमाविवादमाह — **सीमविवादमि**त्यादि। द्वयोर्ग्रामयोः सीमात्यतिक्रमविवादे प्रसक्ते, सामन्ता समीपवर्तिनो, पञ्चग्रामी दशग्रामी वा अर्थात् तत्स्था व्यवहारज्ञाः समुदेत्य गिरिनदीविपिनादिभिः स्थावरैः सेतुभिस्तुषाङ्गारभस्मादिभिश्च कृत्रिमैः कुर्यात् निर्णयेत्।

कर्षकगोपालवृद्धका इत्यादि। सामन्तग्रामाभावे कृषिकर्मिणो वृद्धगोपालकाः, पूर्वभोक्तारो वा सीमानं निर्णयेयुः। अबाह्यास्तदन्तर्देशवासिनः नष्टसीमासेतुविषयाविसंवादिज्ञानशालिनो बहवो लुब्धकादयः तेष्वेक एव वा, सीमासेतून् निर्दिश्य अमुकप्रदेशः पूर्वसीमेत्यङ्गुल्यापदिश्य सीमानं नयेयुः समर्थयेयुः दर्शयेयुः। विपरीतवेषा इत्यबाह्यानां विशेषणं, सीमानयनकाले विपरीतं वेषं रक्तवस्त्रमाल्यादिधारणरूपं स्त्र्यादिवेषं ते धारयेयुरित्यर्थः। सीमाख्यातॄणां स्त्र्यादिवेषधारणं तत्समुदाचारसिद्धं द्रष्टव्यम्। **उद्दिष्टानामि**ति। निर्दिष्टानां सेतूनाम्, अदर्शने प्रदर्शनाभावे, सहस्रदण्डः सहस्रपणो दण्डः, निर्देष्टुः। **तदेवे**ति। नीते सेतौ यथानिर्दिष्टे प्रदर्शनेन निर्णीते सति, सीमाप-

प्रनष्टसेतुभोगं वा सीमानं राजा यथोपकारं विभजेत् ।

क्षेत्रविवादं सामन्तग्रामवृद्धाः कुर्युः । तेषां द्वैधीभावे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः । मध्यं वा गृह्णीयुः । तदुभयं परोक्तं वास्तु राजा हरेत् प्रनष्टस्वामिकं च । यथोपकारं वा विभजेत् ।

प्रसह्यादाने वास्तुनि स्तेयदण्डः । कारणादाने प्रयासमाजीवं च परिसङ्ख्याय बन्धं दद्यात् । मर्यादापहरणे पूर्वः साहसदण्डः । मर्यादाभेदे चतुर्विंशतिपणः ।

तेन तपोवनविवीतमहापथश्मशानदेवकुलयजनपुण्यस्थानविवादा व्याख्याताः । इति मर्यादास्थापनम् ।

हारिणां, सेतुच्छिदां च सीमास्थितवृक्षभञ्जकानां च, तदेव दण्डविधानं सह-क्षपणलक्षणं कुर्यात् ।

प्रनष्टसेतुभोगं वेत्यादि । अत्यन्ताविज्ञातसेतुम् अत्यन्ताविज्ञातभुक्तिं च, सीमानं क्षेत्रादिप्रदेशं, राजा, यथोपकारम् उपकारानुगुण्येन, विभजेत् ।

क्षेत्रविवादमाह — क्षेत्रेत्यादि । क्षेत्रविवादं, सामन्तग्रामवृद्धाः, कुर्युः निर्णयेयुः । तेषां द्वैधीभावे पक्षभेदे सति, यतो बहवः शुचयोऽनुमता वा यस्मिन् पक्षे बहवः प्रविष्टास्ते च बाह्याभ्यन्तरशौचसम्पन्नाः लोकसंमताश्च, ततो नियच्छेयुः तेन पक्षेण निर्णयेयुः । मध्यं वा गृह्णीयुः समं पक्षं वा गृहीत्वा विभज्य निर्णयेयुः । **तदुभयं परोक्तमिति** । चेदित्यध्याहर्तव्यं बहुपक्षानुसारनिर्णयः समपक्षानुसारनिर्णयश्चेत्युभयं विवादिभ्यां प्रतिषिद्धं चेत्, वास्तु विवादविषयभूतं क्षेत्रं, राजा हरेत् स्वयं गृह्णीयात् । प्रनष्टस्वामिकं च अपगतस्वामिकं च वास्तु राजा हरेत् । यथोपकारं वा, विभजेत् अपगतस्वामिदायग्रहणार्हेभ्यो विभज्य वा दद्यात् ।

प्रसह्यादान इति । बलाद् गृहीते सति वास्तुनि, स्तेयदण्डः चौर्यविहितो दण्डो ग्रहीतुः । **कारणादाने प्रयासमि**त्यादि । ऋणादिकारणवशाद् गृहीते वास्तुनि क्षेत्रसंस्कारार्थे प्रयुक्तं कायाद्यायासं क्षेत्रसमुत्थं फलं च मूल्यतः परिगणय्य, बन्धं दद्यात् तद्धने ऋणधनादुद्रिच्यमाने दृष्टे तमधिकमंशं भूस्वामिने प्रयच्छेत् । मर्यादापहरणे उभयभूम्योः सीमापहारे, पूर्वः साहसदण्डः । मर्यादाभेदे सीमाया एकदेशापहारेण भेदकरणे, चतुर्विंशतिपणः ।

उक्तं गृहादिसीमाविवादविधानं तपोवनादिसप्तकविषयेष्वपि विवादेषु योजनीयमित्याह — **तेनेत्यादि** । **इति मर्यादास्थापनमिति** । व्याख्यातम् ।

सर्व एव विवादाः सामन्तप्रत्ययाः। विवीतस्थलकेदारषण्डखल-वेश्मवाहनकोष्ठानां पूर्वं पूर्वमाबाधं सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जाः स्थलप्रदेशाः।

आधारपरिवाहकेदारोपभोगैः परक्षेत्रकृष्टबीजहिंसायां यथोपघातं मूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां हिंसाद्विगुणो दण्डः।

पश्चान्निविष्टमधरतटाकं नोपरितटाकस्य केदारमुदकेनाप्लावयेत्। उपरि निविष्टं नाधरतटाकस्य पूरास्रावं वारयेद् अन्यत्र त्रिवर्षोपरतकर्मणः। तस्यातिक्रमे पूर्वः साहसदण्डस्तटाकवामनं च।

सर्व एवेति। सर्व एव विवादाः, सामन्तप्रत्ययाः अनन्तरवास्तुनिमित्ताः। तत्त्वं च वास्तुषु परस्परेण परस्परस्य यदा पीडोत्पादस्तदैव तन्निवारणाय विवादानां प्रवर्तनात्। तत्र द्वयोरन्यतरस्यावश्यपीडनीयत्वप्राप्तौ नियममाह — **विवीतस्थले**त्यादि। विवीतं प्रवृद्धतृणस्तम्बो गवादिप्रचारदेशः स्थलं लूनापनीततृणस्तम्बा परिष्कृता भूमिः केदारः क्षेत्रं षण्डः कदल्यादिवनं खलं धान्यपवनस्थानं वेश्म प्रसिद्धं वाहनकोष्ठः गवाश्वादिस्थानम् एषां सप्तानां मध्ये, पूर्वं पूर्वं कर्तृ, आबाधम् उत्तरोत्तरनिमित्तां पीडां, सहेत।

ब्रह्मसोमारण्यदेवयजनपुण्यस्थानवर्जा इति। ब्रह्मारण्यं सोमारण्यं देवस्थानं यजनस्थानं पुण्यस्थानं च वर्जयित्वा सर्वे भूभागाः स्थलप्रदेशाः क्षेत्रयोग्याः प्रदेशाः वेदितव्याः।

आधारपरिवाहकेदारोपभोगैरित्यादि। जलाधारखातेन ततो जलपरिवहनदीर्घिकारचनया स्थलीकेदारीकरणेन च परकीयकेदारोप्तधान्यबीजोपघाते उपघातानुसारेण धान्यमूल्यं दद्युः। केदारारामसेतुबन्धानां परस्परहिंसायां, हिंसाद्विगुण उपहतफलद्विगुणः, दण्डः।

पश्चान्निविष्टमिति। उत्तरकालोत्पन्नम् अधरतटाकम्, उपरितटाकस्य पूर्वोत्पन्नस्य, केदारम्, उदकेन नाप्लावयेत् नापूरयेत्। **उपरिनिविष्टमिति।** उपरितटाकं पश्चान्निविष्टम् अधरतटाकस्य पूर्वसिद्धस्य, पूरास्रावं प्रवाहस्रुतिं, न वारयेत्। **अन्यत्र त्रिवर्षोपरतकर्मण इति।** तच्चेदधरतटाकं वर्षत्रयपरित्यक्तजलपायनसाध्यकृषिकर्मं भवेत्, तदा पूरास्रावावारणे न दोष इत्यर्थः। तस्यातिक्रमे उक्तविधेर्लङ्घने, पूर्वः साहसदण्डः, तटाकवामनं च जलनिर्गमनेन तटाकशून्यीकरणं च दण्डः।

पञ्चवर्षोपरतकर्मणः सेतुबन्धस्य स्वाम्यं लुप्येतान्यत्रापद्भ्यः ।

तटाकसेतुबन्धानां नवप्रवर्तने पाञ्चवर्षिकः परिहारः । भग्नोत्सृष्टानां चातुर्वर्षिकः । समुपारूढानां त्रैवार्षिकः । स्थलस्य द्वैवर्षिकः। स्वात्माधाने विक्रये च ।

खातप्रावृत्तिमनदीनिबन्धायतनतटाककेदारारामषण्डवापानां सस्यवर्णभागोत्तरिकम्, अन्येभ्यो वा यथोपकारं दद्युः ।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तारश्चैषां प्रतिकुर्युः । अप्रतीकारे हीनद्विगुणो दण्डः ।

पञ्चवर्षोपरतकर्मण इति । पञ्चवर्षोपेक्षितस्य, सेतुबन्धस्य, स्वाम्यं स्वामित्वं, स्वामिनो लुप्येत नश्येत्, **अन्यत्रापद्भ्य** इति । परचक्राद्यापत्सु तूपेक्षितस्य स्वामित्वं न हीयेत ।

तटाकसेतुबन्धानामिति । तेषां, नवप्रवर्तने नूतननिर्माणे, पाञ्चवर्षिकः पञ्चवर्षव्यापी, परिहारः करमोक्षः, कार्यः । **भग्नोत्सृष्टानामिति** । महाजलप्रवाहाद्युपहतोपरतकर्मणां, नवप्रवर्तने नूतनकृषिप्रवर्तने, चातुर्वर्षिकः परिहारः । **समुपारूढानामिति** । तृणस्तम्बवनादिच्छेदनोन्मूलनादिना नवक्षेत्रीकृतानां स्थलानां नवप्रवर्तने, त्रैवर्षिकः परिहारः । **स्थलस्येति** । स्वत एव तृणस्तम्बादिशून्यतया सुकरसंस्कारस्य भूप्रदेशस्य, नवप्रवर्तने, द्वैवर्षिकः, परिहारः । **स्वात्माधाने विक्रये चेति** । आधीकरणे विक्रयणे चैषां स्वात्मा नवप्रवर्तक एव, प्रभुरिति शेषः । स्वाम्याधान इति वा पाठः ।

खातप्रावृत्तिमेत्यादि । खातप्रावृत्तिमं खनननिर्वृत्तकूपपेयजलम्, नद्यायतनं नद्याश्रयं नदीपेयजलं, निबन्धायतनं नदीसेतुबन्धाश्रयं तत्प्रवर्तितकुल्योपनेयजलं, तटाकं लक्षणया तटाकोपनेयजलं, केदारारामौ प्रतीतौ, षण्डवापः कदल्यादिवापस्थानम् इत्येतेषां मध्ये, अन्यतममिति शेषः, सस्यवर्णभागोत्तरिकं दद्युः सस्यवर्णोत्तरिकं सस्यवर्णाधिक्ययुक्तं भागोत्तरिकं भागाधिक्ययुक्तं च यथा भवति तथा दद्युः, अर्थात् अधिकसस्यवर्णनिष्पादकायाधिकभागदायकाय च कृष्यर्थे । अन्येभ्यो वा अव्यसनिभ्यः कर्मण्येभ्यः, यथोपकारं दद्युः यथाफलोदयभागदानपरिभाषया दद्युः ।

प्रक्रयावक्रयाधिभागभोगनिसृष्टोपभोक्तार इति । प्रक्रयोपभोक्तारः क्षेत्रादिकं क्रीत्वा भोक्तारः, अवक्रयोपभोक्तारः 'फलितेऽफलिते वा क्षेत्रादौ

सेतुभ्यो मुञ्चतस्तोयमवारे षट्पणो दमः ।
वारे वा तोयमन्येषां प्रमादेनोपरुन्धतः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे नवमोऽध्यायः
वास्तुके वास्तुविक्रयः सीमाविवादः क्षेत्रविवादः
मर्यादास्थापनं बाधाबाधिकम् ।
आदितः षट्षष्टितमोऽध्यायः ॥

फलमेतावत् प्रतिनियतं स्वामिने दास्यामी'ति संविदा क्षेत्रादिस्वीकारोऽवक्रयस्तदुपभोक्तारः, आध्युपभोक्तारः पणयगृहीतभोक्तारः, भागभोगोपभोक्तारः उपलब्धस्य फलस्यैतावान् भागो देय इति संविदा भोक्तारः, निसृष्टोपभोक्तारः यथादत्तभागग्रहणपरिभाषयोपभोक्तारश्च, एषां तटाकादीनां, प्रतिकुर्युः उपघातप्रतिविधानं कुर्युः । अप्रतीकारे प्रतीकाराकरणे, हीनद्विगुणो दण्डः ।

अध्यायप्रान्ते श्लोकमाह — **सेतुभ्य** इति । अवारे आत्मनोऽपर्याये, सेतुभ्यस्तटाकादिभ्यः, तोयं मुञ्चतः क्षेत्रादिकं पाययतः, षट्पणो दमः दण्डः। अन्येषां वारे पर्याये, प्रमादेन अज्ञानेन, तोयम् उपरुन्धतो वा अन्यक्षेत्रजलपायनं प्रतिबध्नतश्च, षट्पणो दमः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे नवमोऽध्यायः
वास्तुके वास्तुविक्रयः सीमाविवादः क्षेत्रविवादः
मर्यादास्थापनं बाधाबाधिकम् ।
आदितः षट्षष्टितमोऽध्यायः ॥

६१, ६२. प्रक. वास्तुकं— विवीतक्षेत्रपथहिंसा समयस्यानपाकर्म च।

कर्मोदकमार्गमुचितं रुन्धतः कुर्वतोऽनुचितं वा पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि च परभूमौ निवेशयतः पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा मध्यमः साहसदण्डः श्रोतृणामुत्तमः अन्यत्र भग्नोत्सृष्टात्।

स्वाम्यभावे ग्रामाः पुण्यशीला वा प्रतिकुर्युः।

पथिप्रमाणं दुर्गनिवेशे व्याख्यातम्। क्षुद्रपशुमनुष्यपथं रुन्धतो द्वादशपणो दण्डः। महापशुपथं चतुर्विंशतिपणः। हस्तिक्षेत्रपथं चतुष्पञ्चाशत्पणः। सेतुवनपथं षट्छतः। श्मशानग्रामपथं द्विशतः। द्रोणमुखपथं पञ्चशतः। स्थानीयराष्ट्रविवीतपथं साहस्रः। अतिकर्षणे चैषां दण्डचतुर्थो दण्डाः। कर्षणे पूर्वोक्ताः।

अथ वास्तुकस्य तृतीयाध्याय आरभ्यते। पूर्वाध्याये सीमादिनिर्णयः क्षेत्रादीनामुक्तः। उदकमार्गनिरोधे सस्यादिहिंसने च दण्डविधिरिहोच्यते।

कर्मोदकमार्गमिति। कृष्यर्थजलमार्गम्, उचितं पूर्वानुवृत्तं, रुन्धतः, अनुचितं कुर्वतो वा नवं प्रवर्तयतो वा, पूर्वः साहसदण्डः।

सेतुकूपपुण्यस्थानचैत्यदेवायतनानि चेति। सेत्वादीनि पञ्च, परभूमौ, निवेशयतः सृजतः, पूर्वानुवृत्तं धर्मसेतुमाधानं विक्रयं वा नयतो नाययतो वा पूर्वपुरुषैर्धर्मार्थे विसृष्टं सेतुकूपतटाकादिकम् आधीकुर्वतो विक्रीणानस्य तत्पुत्रादेस्तत्प्रयोजकस्य वा, मध्यमः साहसदण्डः। श्रोतॄणां तत्साक्षिणाम् उत्तमः साहसः। तत्रापवादः—अन्यत्र भग्नोत्सृष्टात्, उपहतासंस्कृतोपेक्षितसेत्वादिव्यतिरेकेण।

स्वाम्यभाव इति। प्रवर्तकतत्पुत्राद्यभावे, ग्रामाः ग्रामवास्तव्याः, पुण्यशीला वा ग्रामावास्तव्या अपि, प्रतिकुर्युः संस्कुर्युः, अर्थाद् भग्नं सेत्वादिकम्।

पथिहिंसां वक्तुं तत्प्रमाणं दुर्गनिवेशोक्तं स्मारयति—**पथिप्रमाणमित्यादि**। **क्षुद्रपशुमनुष्यपथमिति**। क्षुद्रपशुमार्गं मनुष्यमार्गं च दुर्गनिवेशोक्तं, रुन्धतः, द्वादशपणो दण्डः। महापशुपथं गवाश्वादिमार्गं, रुन्धतः, चतुर्विंशतिपणः। हस्तिक्षेत्रपथं रुन्धतः चतुष्पञ्चाशत्पणः। सेतुवनपथं रुन्धतः षट्छतः। श्मशानग्रामपथं रुन्धतो द्विशतः। द्रोणमुखपथं रुन्धतः पञ्चशतः।

क्षेत्रिकस्याक्षिपतः क्षेत्रमुपवासस्य वा त्यजतो बीजकाले द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः ।

करदाः करदेष्वाधानं विक्रयं वा कुर्युः, ब्रह्मदेयिका ब्रह्मदेयिकेषु । अन्यथा पूर्वः साहसदण्डः, करदस्य वाकरदग्रामं प्रविशतः ।

करदं तु प्रविशतः सर्वद्रव्येषु प्राकाम्यं स्यात्, अन्यत्रागारात् । तदप्यस्मै दद्यात् ।

अनादेयमकृषतोऽन्यः पञ्चवर्षाण्युपभुज्य प्रयासनिष्क्रयेण दद्यात् ।

स्थानीयराष्ट्रविवीतपथं स्थानीयं प्रसिद्धं राष्ट्रविवीते समाहर्तृसमुदयप्रस्थापनोक्ते तेषां पथानं, रुन्धतः, साहसः । अतिकर्षणे चैषामिति । अतिकर्षणमपकर्षणं न्यूनीकरणम् उक्तानां पथामेकदेशापहरणेन प्रमाणतो न्यूनीकरणे, दण्डचतुर्थाः पूर्वोक्तदण्डचतुर्भागाः, दण्डाः । कर्षणे पथिषु कृषिकरणे, पूर्वोक्ताः दण्डाः ।

क्षेत्रिकस्येति । बीजकाले, क्षेत्रम् अक्षिपतः कर्षकायानर्पयतः, क्षेत्रिकस्य क्षेत्रस्वामिनः, त्यजत उपवासस्य वा कृषिमभ्युपेत्य बीजवापकाले क्षेत्रं मुञ्चतः कर्षकस्य वा, द्वादशपणो दण्डः । **अन्यत्र दोषोपनिपाताविषह्येभ्य** इति । दोषः क्षेत्रदोषः उपनिपातो राजचोराद्युपद्रवः अविषह्यं महारोगादि एतेषु निमित्तेषु क्षेत्रत्यागो न दोषाय ।

करदा इति । करदायकाः, करदेषु आधानं विक्रयं वा कुर्युः, न त्वकरदेष्वित्यर्थः । ब्रह्मदेयिकाः, ब्रह्मदायिका इत्यपि पाठः, ब्रह्मदेयं ब्रह्मदायो वा करमोक्षितं ब्राह्मणभोग्यं क्षेत्रादिकमुच्यते तथाविधभूमिस्वामिनः, ब्रह्मदेयिकेषु आधानं विक्रयं वा कुर्युः, न त्वतथाभूतेषु । अन्यथा उक्तविध्यतिक्रमेणाधानविक्रयकरणे, पूर्वः साहसदण्डः । आहितविक्रीतक्षेत्रस्वीकर्तुर्दण्डमाह — **करदस्य वे**त्यादि ।

करदं त्विति । करदं ग्रामं, प्रविशतः करदस्य, सर्वद्रव्येषु धान्यचतुष्पदादिषु, प्राकाम्यं स्वाच्छन्द्यं स्वामित्वं, स्यात्, अन्यत्रागारात् विक्रेतृगृहवर्जम् । तदपि अस्मै दद्यात् क्षेत्रविक्रेता यदि गृहमपि विक्रेतुमिच्छेत् तदा क्षेत्रक्रेत्रे एव तद् विक्रीणीयात् ।

अनादेयमिति । संस्कृतं भाविफलत्वादादेयं तद्विपरीतमनादेयमसंस्कृतं क्षेत्रम्, अकृषतः संस्करणाशक्तत्वादकर्षयतः स्वामिनः, अन्यः स्वामिनि-

अकरदाः परत्र वसन्तो भोगमुपजीवयेयुः ।

ग्रामार्थेन ग्रामिकं व्रजन्तम् उपवासाः पर्यायेणानुगच्छेयुः । अननुगच्छन्तः पणार्धपणिकं योजनं दद्युः ।

ग्रामिकस्य ग्रामादस्तेनपारदारिकं निरस्यतश्चतुर्विंशतिपणो दण्डः ग्रामस्योत्तमः ।

निरस्तस्य प्रवेशो ह्यधिगमेन व्याख्यातः ।

स्तम्भैः समन्ततो ग्रामाद् धनुश्शतापकृष्टमुपसालं कारयेत् ।

पशुप्रचारार्थं विवीतमालवनेनोपजीवयेयुः ।

युक्तः, पञ्चवर्षाणि उपभुज्य, प्रयासनिष्क्रयेण दद्यात् कूपतटाकादिखननार्थं व्ययमात्मकृतं गृहीत्वा प्रत्यर्पयेत् क्षेत्रम् ।

अकरदा इति । अकरदा ब्रह्मदेयिकादयः, परत्र ग्रामान्तरे, वसन्तः भोगम् उपजीवेयुः क्षेत्रभोगमात्रं गृह्णीयुः, हिरण्यकरदण्डं तु राजा गृह्णीयादिति भाषाटीका ।

ग्रामार्थेनेति । ग्रामकार्यवशेन, ग्रामिकं ग्राममुख्यं, व्रजन्तं देशान्तरं गच्छन्तम्, उपवासाः उपजीव्य ग्रामं वसन्तः कर्षकाः, पर्यायेण वारव्यवस्थया, अनुगच्छेयुः । अननुगच्छन्तः, पणार्धपणिकं योजनं दद्युः एकैकस्य गन्तव्याध्वयोजनस्यैतावदिति व्यवस्थया देयं द्रव्यमिह योजनं तत् सार्धपणात्मकं ग्रामिकाय दद्युः ।

ग्रामिकस्येति । ग्राममुख्यस्य, ग्रामाद्, अस्तेनपारदारिकं स्तेयेन परदाररतत्वेन वा दोषेणायुक्तं, निरस्यतः बहिष्कुर्वतः, चतुर्विंशतिपणो दण्डः । ग्रामस्य ग्रामवासिसमुदायस्यं बहिष्कुर्वतः, उत्तमः साहसदण्डः ।

निरस्तस्येति । ग्रामान्निष्कासितस्य, चोरपारदारिकादेः, प्रवेशः पुनर्ग्रामाभिगमनं, हिशब्दस्तुशब्दार्थे, अधिगमेन व्याख्यातः परगृहाभिगमनोक्तेन दण्डेन समानदण्ड इत्यर्थः ।

स्तम्भैरिति । स्तम्भैः शिलामयैर्दारुमयैर्वा, समन्ततः समन्तात्, ग्रामात्, समन्तग्रामादिति पाठे ग्रामपर्यन्तदेशादित्यर्थः, धनुश्शतापकृष्टं धनुश्शतविप्रकृष्टम्, उपसालम् उपप्राकारं, कारयेत् ।

पश्वित्यादि । पशुप्रचारार्थं, पशुसञ्चारखादनार्थं, विवीतमालवनेन विवीतं तृणस्तम्बजलयुक्तं स्थलं मालमुन्नतभूतलं वनं प्रसिद्धम् एतैर्विसृष्टैः, उपजीवयेयुः अर्थाद् ग्रामजनान् ।

विवीतं भक्षयित्वापसृतानामुष्ट्रमहिषाणां पादिकं रूपं गृह्णीयुः। गवाश्वखराणां चार्धपादिकम्। क्षुद्रपशूनां षोडशभागिकम्।

भक्षयित्वा निषण्णानामेत एव द्विगुणा दण्डाः। परिवसतां चतुर्गुणाः। ग्रामदेववृषा वा अनिर्दशाहा वा धेनुरुक्षाणो गोवृषाश्चादण्ड्याः।

सस्यभक्षणे सस्योपघातं निष्पत्तितः परिसङ्ख्याय द्विगुणं दापयेत्।

स्वामिनश्चानिवेद्य चारयतो द्वादशपणो दण्डः। प्रमुञ्चतश्चतुर्विंशतिपणः। पालिनामर्धदण्डः। तदेव षण्डभक्षणे कुर्यात्। वाटभेदे

विवीतमिति। तद् भक्षयित्वा अपसृतानाम् उष्ट्रमहिषाणां, पादिकं रूपं पादपणं, गृह्णीयुः विवीताध्यक्षाः। गवाश्वखराणां च, अर्धपादिकं रूपं पणाष्टांशं, गृह्णीयुः। क्षुद्रपशूनां, षोडशभागिकं रूपं पणषोडशभागं, गृह्णीयुः।

भक्षयित्वा निषण्णानामिति। भक्षयित्वा अनपसृत्य विवीत एवोपविष्टानाम् उष्ट्रादीनाम्, एत एव द्विगुणा दण्डाः यथोक्ता एव पादपणादयो द्विगुणीभूता दण्डाः भवन्ति। परिवसतां रात्रौ तत्रैव संविशतां, चतुर्गुणाः दण्डाः। भक्षणादौ केषाञ्चित् पशूनामदण्डमाह— **ग्रामदेववृषा वेति**। ग्रामवृषभाः देववृषभाश्च, अनिर्दशाहा धेनुर्वा अनतिक्रान्तदशाहा प्रसूता गौश्च, उक्षाणः वृद्धवृषभाः, गोवृषाश्च सेक्तारश्च, अदण्ड्याः।

सस्यभक्षण इत्यादि। उष्ट्रमहिषादिभिः सस्ये भक्षिते सति, सस्योपघातं भक्षितक्षेत्रैकदेशसञ्जातं सस्यविनाशं, निष्पत्तितः परिसंख्याय कृत्स्नक्षेत्रनिष्पद्यमानफलपर्यालोचनया परिच्छेद्य, द्विगुणं तद्द्विगुणं दण्डं, दापयेत् स्वामिने।

स्वामिनश्चानिवेद्य चारयत इति। विवीताध्यक्षमविज्ञाप्य पशून् विवीते चारयतः तत्स्वामिनः, द्वादशपणो दण्डः। अथवा अविज्ञाप्यैव स्वामिने प्रचारणं पशून् उपक्षेत्रं नियन्त्र्य चारयतः, द्वादशपणो दण्डः नाशितसस्यफलद्विगुणदण्डातिरेकेण। प्रमुञ्चतः निर्यन्त्रणं पशून् विसृज्य चारयतः, चतुर्विंशतिपणः दण्डः भक्षितद्विगुणदण्डातिरेकेण। पालिनां क्षेत्रपालकानाम्, अर्धदण्डः प्रमोक्तृदण्डस्यार्धं दण्डो भवति। 'उष्ट्रमहिषादीनां बालत्वे' इति भाष्येत्यनुरोधे तु बालानामिति पठनीयम्। **तदेव षण्डभक्षणे कुर्यादिति**। सस्यभक्षणोक्तमेव दण्डविधानं कदलीवार्ताकोर्वारुकादिवनभक्षणेऽनुतिष्ठेत्। **वाटभेदे द्विगुण** इति। वृतिं भित्त्वा क्षेत्रादिप्रवेशे पूर्वोक्तद्विगुणो दण्डः।

द्विगुणः। वेश्मखलवलयगतानां च धान्यानां भक्षणे। हिंसाप्रतीकारं कुर्यात्।

अभयवनमृगाः परिगृहीता वा भक्षयन्तः स्वामिनो निवेद्य यथावध्यास्तथा प्रतिषेद्धव्याः।

पशवो रश्मिप्रतोदाभ्यां वारयितव्याः। तेषामन्यथा हिंसायां दण्डपारुष्यदण्डाः। प्रार्थयमाना दृष्टापराधा वा सर्वोपायैर्नियन्तव्याः। इति क्षेत्रपथहिंसा।

कर्षकस्य ग्राममभ्युपेत्याकुर्वतो ग्राम एवात्ययं हरेत्। कर्माकरणे कर्मवेतनाद् द्विगुणं, हिरण्यादाने प्रत्यंशद्विगुणं, भक्ष्यपेयादाने च प्रहवणेषु द्विगुणमंशं दद्यात्।

वेश्मेत्यादि। वेश्मखलवलयगतानां. वेश्म गृहं खलं धान्यपवनस्थानं वलयं राशिः तद्गतानां, धान्यानां, भक्षणे च, द्विगुणो दण्डः। हिंसाप्रतीकारं कुर्यादिति। भक्षणनिमित्तस्य धान्यादिनाशस्य निष्क्रयं, कुर्यात्, सर्वत्र।

अभयवनमृगाः परिगृहीता वेत्यादि। अभयवनचारिणो मृगाः, गृह्यमृगाश्च, भक्षयन्तः स्वामिनो निवेद्य, यथा अवध्यास्तथा प्रतिषेद्धव्याः अवधेन वारणीया इत्यर्थः।

पशव इति। ते, रश्मिप्रतोदाभ्यां वारयितव्याः रज्जुतोत्त्राभ्यां देहे ताडनेन प्रतिषेद्धव्याः। तेषां पशूनाम्, अन्यथा प्रकारान्तरेण, हिंसायां, दण्डपारुष्यदण्डाः दण्डपारुष्यस्य ये दण्डा वक्ष्यन्ते त एव दण्डा भवन्ति। प्रार्थयमानाः वारकं प्रतियुध्यमानाः, दृष्टापराधा वा पूर्वहिंसितजना वा, पशवः, सर्वोपायैः बन्धनावरोधनादिभिः, नियन्तव्याः दमयित्वा वारयितव्याः। इति क्षेत्रपथहिंसेति। व्याख्यातेति शेषः। तदेवं वास्तुकं परिसमापितम्॥

समयस्यानपाकर्मेति सूत्रम्। बहुभिः सम्भूय कल्प्यमाना व्यवस्था समयः तस्य अनपाकर्म अत्यागः तदिहोच्यत इति सूत्रार्थः। उद्देशक्रमेणास्य प्रकरणस्य व्याख्यानसङ्गतिः।

कर्षकस्येति। कृषीवलस्य, ग्राममभ्युपेत्याकुर्वतः ग्रामजनसमुदायकार्यमङ्गीकृत्याननुतिष्ठतः, ग्राम एव, अत्ययं दण्डं, हरेत्, नतु राजा। दण्डविधिमाह — कर्माकरण इति। कर्मणः समुदायकार्यस्य अकरणे, कर्मवेतनाद् आत्मलभ्याद् वेतनभागाद्, द्विगुणं दण्डं, दद्यात्। हिरण्यादाने समुदाय-

प्रेक्षायामनंशदः सस्वजनो न प्रेक्षेत। प्रच्छन्नश्रवणेक्षणे च सर्वहिते च कर्मणि निग्रहेण द्विगुणमंशं दद्यात्।

सर्वहितमेकस्य ब्रुवतः कुर्युराज्ञाम्। अकरणे द्वादशपणो दण्डः। तं चेत् सम्भूय वा हन्युः पृथगेषामपराधद्विगुणो दण्डः। उपहन्तृषु विशिष्टः।

ब्राह्मणतश्चैषां ज्यैष्ठ्यं नियम्येत। प्रवहणेषु चैषां ब्राह्मणे नाकामाः कुर्युः। अंशं च लभेरन्।

तेन देशजातिकुलसङ्घानां समयस्यानपाकर्म व्याख्यातम्।

कार्यार्थे सर्वैर्हिरण्ये दीयमाने सति स्वयं हिरण्यस्य अदाने, प्रत्यंशाद्द्विगुणम् एकैकदेयस्य हिरण्यांशस्य द्विगुणं दण्डं, दद्यात्। भक्ष्यपेयादाने च प्रवहणेषु गोष्ठीभोजनादिषु भक्ष्यपेययोरात्मदेययोरदाने च, द्विगुणमंशं दण्डं, दद्यात्।

प्रेक्षायामिति। कुशीलवनटनर्तकादिकर्मणि, अनंशदः स्वदेयमंशमददानः, सस्वजनो न प्रेक्षेत स्वयं नेक्षेत स्वजनमपि नेक्षयेत्। प्रच्छन्नश्रवणेक्षणे च प्रच्छन्नं स्थित्वा गीताद्याकर्णने वाद्याद्यवलोकने च, द्विगुणमंशं स्वदेयांशद्विगुणं दण्डं, दद्यात्। सर्वहिते च कर्मणि, निग्रहेण प्रतिबन्धाचरणेन, द्विगुणमंशं स्वदेयांशद्विगुणं दण्डं, दद्यात्।

सर्वहितमिति। सर्वजनानुकूलं, ब्रुवतः, एकस्य आज्ञाम् एकस्यापि नियोगवचनं, कुर्युः अनुतिष्ठेयुः अर्थादन्ये सामयिकाः। अकरणे द्वादशपणो दण्डः। तं चेदिति। वेति पक्षान्तरे। तं सर्वहितवक्तारं, सम्भूय हन्युश्चेद्, मत्सरवशादन्ये सामयिका इत्यर्थम्। पृथक् प्रत्येकम्, एषां हन्तॄणाम् अपराधद्विगुणः अकरणापराधोक्तदण्डद्विगुणश्चतुर्विंशतिपणात्मकः, दण्डः। उपहन्तृषु विशिष्टः साक्षाद् घातकेषु पूर्वोक्त एव दण्डः सातिशयः।

ब्राह्मणतश्चेति। एषां सामयिकानां, ब्राह्मणतो ब्राह्मणात् प्रभृति, ज्यैष्ठ्यं नियम्येत अलङ्घ्यवचनत्वलक्षणं ज्येष्ठत्वं व्यवस्थाप्येत। प्रवहणेष्विति। प्रीतिभोजनादिषु, एषां सामयिकानां मध्ये, ब्राह्मणे विषये, नाकामाः कुर्युः अंशं च लभेरन् अविज्ञाततदभिप्राया अंशं न कल्पयेयुः अंशं च लभेरन् सत्यां तदिच्छायामित्यर्थः।

तेनेति। तेन यथोक्तेन समयानपाकर्मन्यायेन, देशजातिकुलसङ्घानां देशीयजनसङ्घस्य जातीयजनसङ्घस्य कुलीयजनसङ्घस्य चेत्येतेषां, समयस्यानपाकर्म, व्याख्यातम् उक्तप्रायम्।

राजा देशहितान् सेतून् कुर्वतां पथि सङ्क्रमान् ।
ग्रामशोभाश्च रक्षाश्च तेषां प्रियहितं चरेत् ॥

इति कौटलीयेऽर्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे दशमोऽध्यायः

वास्तुके विवीतक्षेत्रपथहिंसा, वास्तुकं समाप्तं समयस्यानपाकर्म च ।

आदितः सप्तषष्टितमोऽध्यायः ॥

अध्यायान्ते श्लोकमाह — राजेति । नृपतिः, देशहितान्, सेतून् सीमबन्धान्, पथि मार्गे, संक्रमान् दुर्गसञ्चरान्, ग्रामशोभाश्च रक्षाश्च कुर्वतां, तेषां साम्यिकानां, प्रियहितं चरेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे दशमोऽध्यायः

वास्तुके विवीतक्षेत्रपथहिंसा, वास्तुकं समाप्तं समयस्यानपाकर्म च ।

आदितः सप्तषष्टितमोऽध्यायः ॥

६३. प्रक. ऋणादानम्।

सपादपणा धर्म्या मासवृद्धिः पणशतस्य। पञ्चपणा व्यावहारिकी। दशपणा कान्तारगाणाम्। विंशतिपणा सामुद्राणाम्।

ततः परं कर्तुः कारयितुश्च पूर्वः साहसदण्डः। श्रोतॄणामेकैकं प्रत्यर्धदण्डः।

राजन्ययोगक्षेमवहे तु धनिकधारणिकयोश्चरित्रमवेक्षेत।

धान्यवृद्धिः सस्यनिष्पत्तावुपार्धा, परं मूल्यकृता वर्धेत। प्रक्षेपवृद्धिरुदयादर्धम्। सन्निधानसन्ना वार्षिकी देया।

ऋणादानमिति सूत्रम। ऋणं वृद्ध्यर्थं प्रयुक्तं धनं तस्य आदानं ग्रहणमिति सूत्रार्थः। 'ऋणरिक्थयोः समो विभागः' इति दायविभागप्रकरणे ऋणं प्रस्तुतम्। तत् कियता कालेन कियद् वर्धत इत्येतत् तु अनुक्तमिहाभिधीयते।

सपादेत्यादि। पणशतस्य, सपादपणा पादाधिकपणात्मिका, धर्म्या धर्मानपेता, मासवृद्धिः। सेयं बन्धकाधानपूर्वा। बन्धकरहितामाह—**पञ्चपणे**ति। पणशतस्य पञ्चपणात्मिका मासवृद्धिर्व्यावहारिकी पण्यक्रयविक्रयव्यवहारप्रयोजना। दशपणा, मासवृद्धिः, कान्तारगाणां दुर्गममार्गपण्यवाहिनां वणिजाम्। विंशतिपणा मासवृद्धिः, सामुद्राणां समुद्रवणिजां सम्भावितसर्वपण्यापायानाम्।

तत इति। ततः परं पणविंशतेरूर्ध्वं, कर्तुः कारयितुश्च वृद्धिं कुर्वतः कारयतश्च, पूर्वः साहसदण्डः। श्रोतॄणां साक्षिणां मध्ये, एकैकं प्रति, अर्धदण्डः प्रथमसाहसस्यार्धं दण्डः।

राजनीति। तु किन्तु, राजनि धनिकधारणिकयोरुत्तमर्णाधमर्णयोः, अयोगक्षेमवहे सति व्यसनपरचक्राद्युपद्रववशाद् योगक्षेमौ अवहमाने सति। अदण्डक्षेमवह इति क्वचित् पाठः। चरित्रमवेक्षेत परस्परवृत्तमवेक्ष्य ऋणव्यवहारं कुर्यात्, अर्थाद् धनिको धारणिकश्च।

अथ धान्यवृद्धिमाह — **धान्ये**त्यादि। धान्यवृद्धिः वृद्ध्यर्थं प्रयुक्तं धान्यं, सस्यनिष्पत्तौ सस्यफलनिष्पत्तिकाले, उपार्धा अध्यर्धगुणा, वर्धेत। परं तत ऊर्ध्वं, मूल्यकृता वर्धेत। अयमर्थः — वृद्ध्यर्थं प्रयुक्तं धान्यम् आ सस्यनिष्पत्तिकालात् सार्धगुणं वर्धेत। ततोऽप्यधिकवृद्ध्यपेक्षायां तावत्पर्यन्तवृद्धियुक्तस्य तस्य मूलधान्यस्य सार्धगुणितस्य मूल्यं हिरण्यं किमपि परिकल्प्य

चिरप्रवासः संस्तम्भप्रविष्टो वा मूल्यद्विगुणं दद्यात्। अकृत्वा वृद्धिं साधयतो वर्धयतो वा मूल्यं वा वृद्धिमारोप्य श्रावयतो बन्धचतुर्गुणो दण्डः। तुच्छश्रावणायामभूतचतुर्गुणः। तस्य त्रिभागमादाता दद्यात्, शेषं प्रदाता।

दीर्घसत्रव्याधिगुरुकुलोपरुद्धं बालमसारं वा नर्णमनु वर्धेत। मुच्यमानमृणमप्रतिगृह्णतो द्वादशपणो दण्डः। कारणापदेशेन निवृत्तवृद्धिकमन्यत्र तिष्ठेत्।

तस्य वृद्धिरेतावतीति व्यवस्थापयेत्, न तु धान्यस्य स्वरूपतो भूयोवृद्धिरिति। तत्रापि विशेषमाह — **प्रक्षेपे**त्यादि। प्रक्षेपवृद्धिः येयं मूलधान्यमूल्येन सह प्रक्षिप्ता वृद्धिः, अर्थाद् वृद्धिधान्यमूल्यं सापि, उदयाद् मूलधान्यमूल्यवृद्ध्यपेक्षया, अर्धं वर्धेत, न तु तत्समम्। **सन्निधाने**त्यादि। सन्निधानसन्ना ग्रहणयोग्येऽपि काले तूष्णींस्थापनेनानुपयुक्ता, अर्थाद् धान्यवृद्धिः, वार्षिकी देया एकवर्षभवैव दातव्या, बहुवर्षपूगापगमेऽपीत्यार्थम्।

चिरप्रवास इति। चिरप्रोषितः, संस्तम्भप्रविष्टो वा संस्तम्भो जडीभावः तं गतो वा, मूल्यद्विगुणं धान्यमूल्यस्य द्विगुणमेव दद्यात्, बहुवर्षात्ययेऽपि द्वैगुण्यप्राप्तेः परतो वृद्ध्यभावादित्यभिप्रायः। **अकृत्वा वृद्धिमि**त्यादि। वृद्धिमपरिभाष्यैव पूर्वं पश्चात् तां, साधयतो वा, अल्पां वृद्धिं पूर्वं परिभाषितां पश्चाद् वर्धयतो वा अधिकां वदतो वा, मूल्यं, वृद्धिमपरिभाषितामेव सतीम् आरोप्य, श्रावयतो वा अर्थात् साक्षिणः, बन्धचतुर्गुणः मूलधनचतुर्गुणो दण्डः। **तुच्छश्रावणायामि**त्यादि। अल्पं दत्त्वा बहु दत्तमिति साक्षिषु श्राव्यमाणेषु, अभूतचतुर्गुणः श्राव्यमाणधनचतुर्गुणो दण्डः। तस्य दण्डस्य, त्रिभागम्, आदाता ऋणग्राही, दद्यात्, शेषं त्रिभागद्वयं, प्रदाता धनिकः, दद्यात्।

दीर्घसत्रेत्यादि। दीर्घसत्रव्याधिगुरुकुलोपरुद्धं दीर्घसत्रेण द्वादशवार्षिकादिना यज्ञविशेषेण व्याधिना गुरुकुलवासेन चोपरुद्धं, बालम् अप्राप्तव्यवहारम्, असारं वा अबालमप्यशिक्षितलोकयात्रं वा जनम्, अनु, ऋणं न वर्धेत। **मुच्यमानमि**ति। मोक्ष्यमाणम् ऋणम्, अप्रतिगृह्णतः धनिकस्य, द्वादशपणो दण्डः। **कारणापदेशेने**त्यादि। यदि कारणं युक्तमपदिश्य धनिको न प्रतिगृह्णीयाद् ऋणं, तदा निवृत्तवृद्धिकं वृद्धिहीनम्, अन्यत्र स्थेयपुरुषे, तिष्ठेद्, ऋणम्।

दशवर्षोपेक्षितमृणमप्रतिग्राह्यमन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः ।

प्रेतस्य पुत्राः कुसीदं दद्युः । दायादा वा रिक्थहराः सहग्राहिणः प्रतिभुवो वा । न प्रातिभाव्यमन्यत् । असारं बालप्रातिभाव्यम् । असङ्ख्यातदेशकालं तु पुत्राः पौत्रा दायादा वा रिक्थं हरमाणा दद्युः ।

जीवितविवाहभूमिप्रातिभाव्यमसङ्ख्यातदेशकालं तु पुत्राः पौत्रा वा वहेयुः ।

नानर्णसमवाये तु नैकं द्वौ युगपदभिवदेयाताम् अन्यत्र प्रतिष्ठमानात् । तत्रापि गृहीतानुपूर्व्या राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत् ।

दशवर्षेत्यादि । दशवर्षोपेक्षितम् ऋणम्, अप्रतिग्राह्यं धनिकेन । तत्रापवादः — **अन्यत्रेत्यादि** । बाल्यवृद्धभावव्याधितत्वादिभिः सप्तभिर्निमित्तैर्दशवर्षोपेक्षितं तु ऋणं प्रतिग्राह्यं भवत्येवेत्यर्थः ।

प्रेतस्येति । मृतस्य, पुत्राः, कुसीदम् ऋणं, दद्युः । दायादा वा रिक्थहराः मृतधनग्राहिणः, ऋणं दद्युः । सहग्राहिणः सहर्णग्राहिणः, प्रतिभुवो वा धनप्रतिभुवो वा, ऋणं दद्युः । **न प्रातिभाव्यमन्यदिति** । धनप्रातिभाव्यातिरिक्तं दर्शनादिप्रातिभाव्यं कर्तृ, न ऋणं दद्यादिति सम्बन्धनीयम् । असारम् अकिञ्चित्करं, बालप्रातिभाव्यम् । पुत्रपौत्रदायादा रिक्थहारिणः सर्वत्र सर्वदा ऋणं रिक्थिनो मृतस्य दद्युरित्याह— **असंख्यातदेशकालमित्यादि** ।

जीवितविवाहभूमिप्रातिभाव्यमित्यादि । जीवितप्रातिभाव्यं जीवितविषयं प्रातिभाव्यं विवाहप्रातिभाव्यं स्त्रीधनादिप्रातिभाव्यं भूमिप्रातिभाव्यं भूक्रयणादिविषयं प्रातिभाव्यम् इत्येतानि प्रातिभाव्यानि पित्राङ्गीकृतानि तस्मिन्नतीते पुत्राः पौत्रा वा सर्वत्र सर्वदा परिरक्षेयुः ।

नानर्णसमवाये त्वित्यादि । नानाभूतानामृणानां समवाये, एकं धारणिकं, द्वौ धनिकौ, युगपत् एककाले, नाभिवदेयातां नाभियुञ्जीयातां, धारणिकश्चेत् स्वदेशमपहाय विदेशं न प्रतिष्ठते । **तत्रापीति** । बहुऋणसमवायेऽपि, गृहीतर्णक्रमेण प्रतिपादयेद् ऋणमृणिकः । राजश्रोत्रियद्रव्यं वा पूर्वं प्रतिपादयेत् पश्चाद्गृहीतमपि ।

दम्पत्योः पितापुत्रयोः भ्रातॄणां चाविभक्तानां परस्परकृतमृणमसाध्यम् ।

अग्राह्याः कर्मकालेषु कर्षका राजपुरुषाश्च । स्त्री वाप्रतिश्राविणी पतिकृतम् ऋणम् अन्यत्र गोपालकार्धसीतिकेभ्यः ।

पतिस्तु ग्राह्यः स्त्रीकृतम् ऋणमप्रतिविधाय प्रोषित इति ।

सम्प्रतिपत्तावुत्तमः । असम्प्रतिपत्तौ तु साक्षिणः प्रमाणं प्रात्ययिकाः शुचयोऽनुमता वा त्रयोऽवरार्ध्याः । पक्षानुमतौ वा द्वौ ऋणं प्रति, न त्वेवैकः ।

प्रतिषिद्धाः स्यालसहायान्वर्थिधनिकधारणिकवैरिन्यङ्गधृत-

दम्पत्योरिति । जायापत्योः, परस्परकृतम् ऋणम्, असाध्यं व्यवहारेण साधयितुं न योग्यम् । तथा पितापुत्रयोः अविभक्तानां भ्रातॄणां च, परस्परकृतमृणमसाध्यम् ।

धनिकैरभियुक्तानाम् ऋणिनां ग्रहणे विशेषमाह — **अग्राह्या इति** । कर्षकाः राजपुरुषाश्च, कर्मकालेषु स्वस्वकर्मानुष्ठानकालेषु, अग्राह्याः । **स्त्री वेति** । स्त्री च, अग्राह्या, कीदृशी, पतिकृतम् ऋणम् अप्रतिश्राविणी अहं दास्यामीत्यनङ्गीकारिणी । अङ्गीकारिणी तु ग्राह्यैव । तत्रापवादः — **अन्यत्र गोपालकार्धसीतिकेभ्य इति** । गोपालकाः प्रसिद्धाः अर्धसीतिकाः कृषिकर्मसिद्धसीताफलार्धभागिनः तेषां स्त्रीप्रधानानां स्त्रियं विना । सा तु अप्रतिश्राविण्यपि ग्राह्यैवेत्यर्थः

पतिस्त्विति । पतिः पुनः अप्रतिश्राव्यपि ग्राह्य एव, स्त्रीकृतमृणमप्रतिविधाय प्रोषित इति कृत्वा ।

ऋणसाधनप्रकारमाह—**संप्रतिपत्ताविति** । धनिकनिवेद्यमानार्थाभ्युपगमे ऋणिकेन क्रियमाणे, उत्तमः निर्णयोपायः सिद्ध इत्यर्थः । असम्प्रतिपत्तौ तु, साक्षिणः, प्रमाणं विवादनिर्णयसाधनम् । साक्षिण इति लिखितस्याप्युपलक्षणम् । कथम्भूताः साक्षिणः कार्याः, प्रात्ययिकाः विश्वासार्हाः, शुचयः बाह्याभ्यन्तरशौचयुक्ताः, अनुमता वा वादिप्रतिवादिसंमताश्च, ते च त्रयोऽवरार्ध्याः त्र्यवराः । पक्षानुमतौ वा द्वौ उभयपक्षसंमतौ द्वौ वा साक्षिणौ, ऋणं प्रति ऋणविषये, न त्वेवैकः एकस्तु साक्षी नैव कार्यः ।

साक्षिभावानर्हानाह — **प्रतिषिद्धा इति** । स्यालादयोऽष्टौ साक्षिभावे प्रतिषिद्धाः । तत्र अन्वर्थी अर्थिनमनुगतस्तदनुजीवी, न्यङ्गो निहीनाङ्गः, धृत-

दण्डाः । पूर्वे चाव्यवहार्याः राजश्रोत्रियग्रामभृतककुष्ठिव्रणिनः पतित-चण्डालकुत्सितकर्माणोऽन्धबधिरमूकाहंवादिनः स्त्रीराजपुरुषाश्च । अ-न्यत्र स्ववर्गेभ्यः ।

पारुष्यस्तेयसङ्ग्रहणेषु तु वैरिस्यालसहायवर्जाः । रहस्यव्यव-हारेष्वेका स्त्री पुरुष उपश्रोता उपद्रष्टा वा साक्षी स्याद् राजतापस-वर्जम् ।

स्वामिनो भृत्यानामृत्विगाचार्याः शिष्याणां मातापितरौ पुत्राणां चानिग्रहेण साक्ष्यं कुर्युः । तेषामितरे वा । परस्पराभियोगे चैषामु-त्तमाः परोक्ता दशबन्धं दद्युरवराः पञ्चबन्धम् । इति साक्ष्यधिकारः ।

ब्राह्मणोदकुम्भाग्निसकाशे साक्षिणः परिगृह्णीयात् । तत्र ब्राह्मणं

दण्डः राजदण्डितः । शेषाः प्रतीताः । **पूर्वे चाव्यवहार्या** इत्यादि । पूर्वे अव्यवहार्याः पितापुत्राविभक्तभ्रात्रादयो व्यवहारानर्हाः पूर्वोक्ताः । अहंवादी साक्षी भवामीति स्वयमागतः । शेषाः प्रतीताः । सर्वे एते साक्षित्वे निषिद्धाः । **अन्यत्र स्ववर्गेभ्य** इति । स्वस्ववर्ग्यातिरिक्ताः प्रतिषिद्धातिरेकिणः सामा-न्यतः साक्षिणो भवेयुः ।

पारुष्यस्तेयसंग्रहणेष्वित्यादि । तुशब्दो विशेषे । पारुष्यादिषु, वैरि-स्यालसहायवर्जाः, सर्वे साक्षिणः स्युः । रहस्यव्यवहारेषु, एका स्त्री, एकः पुरुषः, एक उपश्रोता साक्षादश्रावितोऽपि समीपस्थितिवशात् श्रुतार्थः, उप-द्रष्टा वा समीपस्थितिवशाद् यदृच्छादृष्टार्थो वा, साक्षी स्यात्, राजतापसवर्जं राजानं तापसं च वर्जयित्वा

स्वामिन इति । ते, भृत्यानाम्, ऋत्विगाचार्याः शिष्याणां, मातापि-तरौ पुत्राणां च, अनिग्रहेण अबलात्कारेण आत्मेच्छयेत्यर्थः, साक्ष्यं साक्षि-कर्म कुर्युः । **तेषामितरे वे**ति । तेषां स्वामिनाम् ऋत्विगाचार्याणां मातापि-त्रोश्च, इतरे भृत्याः शिष्याः पुत्राश्च, अनिग्रहेण साक्ष्यं कुर्युः । **परस्परे**त्यादि । एषां स्वामिभृत्यादीनां परस्पराभियोगे, उत्तमाः परोक्ताः स्वामिऋत्विगादयः पराजिताश्चेद्, दशबन्धं पराजितधनदशभागं, दद्युः, अवरेभ्यः । अवराः भृ-त्यादयः, परोक्ताः, पञ्चबन्धं पराजितधनपञ्चभागं, दद्युः, उत्तमेभ्यः । **इति साक्ष्यधिकार** इति । व्याख्यात इति शेषः ।

अथ साक्ष्यनुयोगविधिमाह — **ब्राह्मणोदकुम्भाग्निसकाश** इति । ब्राह्मणान् उदकुम्भम् अग्निं चाग्रे कृत्वा, साक्षिणः, परिगृह्णीयाद् विभावयेत्

ब्रूयात्—सत्यं ब्रूहीति। राजन्यं वैश्यं वा—मा तवेष्टापूर्तफलं, कपालहस्तः शत्रुकुलं भिक्षार्थी गच्छेरिति। शूद्रं—जन्ममरणान्तरे यद् वः पुण्यफलं तद् राजानं गच्छेत्। राज्ञश्च किल्बिषं युष्मान् अन्यथावादे। दण्डश्चानुबन्धः। पश्चादपि ज्ञायेत यथादृष्टश्रुतम्। एकमन्त्राः सत्यमवहरतेति।

अनवहरतां सप्तरात्रादूर्ध्वं द्वादशपणो दण्डः त्रिपक्षादूर्ध्वमभियोगं दद्युः।

साक्षिभेदे यतो बहवः शुचयोऽनुमता वा ततो नियच्छेयुः। मध्यं वा गृह्णीयुः। तद् वा द्रव्यं राजा हरेत्। साक्षिणश्चेदभियोगा-

---

ब्राह्मणानुयोगमाह—तत्र ब्राह्मणमित्यादि। राजन्यं वैश्यं वेति। ब्रूयादिति सम्बध्यते। वचनप्रकारः—मा तवेष्टापूर्तफलमिति। तव यज्ञफलं खातादिकर्मफलं च न सिध्येत्। कपालहस्तः भिक्षापात्रपाणिः, शत्रुकुलं शत्रुगृहं, भिक्षार्थी सन्, गच्छेः, यद्यनृतं ब्रूया इति शेषः। शूद्रानुयोगमाह—शूद्रमिति। ब्रूयादितीहापि सम्बध्यते। वचनप्रकारः—जन्ममरणान्तर इति। जन्ममरणयोर्मध्ये, यद् वः, पुण्यफलं कृतानां पुण्यकर्मणां फलं, तद् राजानं गच्छेत्, राज्ञश्च, यद् जन्ममरणान्तरे किल्बिषं पापं, तद् युष्मान् गच्छेत्, अन्यथावादे असत्यकथने। दण्डश्च अन्यथावादनिमित्तः, अनुबन्धः अनुयायी कालान्तरभावी। न चान्यथावादनिश्चयो निरुपाय इत्याह—पश्चादपीति। यथादृष्टश्रुतं सत्यं तदात्वे गूहितं, पश्चादपि कालान्तरेऽपि, ज्ञायेत अस्मद्यत्नादिति शेषः। एकमन्त्राः यूयं सर्वे सम्भूय कृतसंमन्त्रणाः भूत्वा, सत्यं परमार्थम्, अवहरत उपनयत इति।

अनवहरतामित्यादि। सत्यावहरणार्थं सप्तरात्रावधिर्देयः। तत ऊर्ध्वम् अनवहरतां, द्वादशपणो दण्डः अर्थादेकैकदिवसस्य। त्रिपक्षादूर्ध्वम्, अभियोगम् अभियोगद्रव्यं, दद्युः, अर्थाद् दण्डसहितम्। इदं च विधानं मानान्तरेण परमार्थे विज्ञाते सति द्रष्टव्यम्।

साक्षिभेद इति। साक्षिणामन्योन्यवचनविसंवादे, यतः यस्मिन् पक्षे, बहवः शुचयः अनुमता वा, तिष्ठन्तीति शेषः, ततो नियच्छेयुः तं पक्षमाश्रित्य व्यवहारं निर्णयेयुः। मध्यं वा गृह्णीयुः उभयोः पक्षयोः साक्षिगुणसाम्ये उभयसमं कमपि प्रकारं गृह्णीयुः। तदसम्भवे विसंवादितमर्थं राजा गृह्णीयादि-

दूनं ब्रूयुरतिरिक्तस्याभियोक्ता बन्धं दद्यात्। अतिरिक्तं वा ब्रूयुस्तदतिरिक्तं राजा हरेत्। बालिश्यादभियोक्तुर्वा दुःश्रुतं दुर्लिखितं प्रेताभिनिवेशं वा समीक्ष्य साक्षिप्रत्ययमेव स्यात्।

साक्षिबालिश्येष्वेव पृथगनुयोगे देशकालकार्याणां पूर्वमध्यमोत्तमा दण्डा इत्यौशनसाः।

कूटसाक्षिणो यमर्थमभूतं वा कुर्युर्भूतं वा नाशयेयुस्तद्दशगुणं दण्डं दद्युरिति मानवाः।

बालिश्याद् वा विसंवादयतां चित्रो घात इति बार्हस्पत्याः।

नेति कौटल्यः। ध्रुवा हि साक्षिणः श्रोतव्याः। अशृण्वतां चतुर्विंशतिपणो दण्डः, ततोऽर्धमब्रुवाणाम्।

त्याह — तद्वा द्रव्यं राजा हरेदिति। साक्षिण इति। ते चेदभियुक्तद्रव्याद् ऊनं ब्रूयुः, तर्हि अभियोक्ता, अतिरिक्तस्य स्वार्थितस्य, बन्धं पञ्चभागं, दद्याद्, राज्ञे। अतिरिक्तं वा ब्रूयुः अभियोक्रर्थितादधिकं वा साक्षिणश्चेद् ब्रूयुः, तर्हि, तद् अतिरिक्तं राजा हरेत्। अत्रापवादमाह — बालिश्यादभियोक्तुर्वेति। अभियोक्तृमौर्ख्याद् वा, दुःश्रुतं लेखकेनान्यथाश्रुतं, दुर्लिखितम् अन्यथा लिखितं च, समीक्ष्य पर्यालोच्य, प्रेताभिनिवेशं वा बन्धुमरणशोकनिमित्तं लेखकचित्तविक्षेपं च, समीक्ष्य, साक्षिप्रत्ययमेव स्यात् साक्षिवाक्यातिनिर्णयमेव ऋणादानं स्यात्।

साक्षिबालिश्येष्वेव पृथगनुयोग इति। प्रत्येकं प्रश्ने साक्षिणां मौर्ख्यकृतेषु वचनविसंवादेषु, देशकालकार्याणां विसंवादे इति शेषः, पूर्वमध्यमोत्तमा दण्डाः यथासंख्यं पूर्वादिसाहसदण्डाः। इति औशनसाः।

कूटसाक्षिण इति। कपटसाक्षिणः, यमर्थम्, अभूतं वा कुर्युः असत्यमेव कल्पयित्वा ब्रूयुः, भूतं वा नाशयेयुः यमर्थं सत्यमेव हीनं कथयेयुः, तद्दशगुणं कल्पितनाशितदशगुणं, दण्डं दद्युः। इति मानवाः।

बालिश्याद्वेति। मौर्ख्याद्, विसंवादयतां विसंवादं कथयतां, चित्रो, घातः वधः। इति बार्हस्पत्याः।

नेति कौटल्य इति। एतच्च विशेषपरं न तु प्रतिषेधपरम्। विशेषश्चायं — यद् ध्रुवसाक्षिण एव साक्षिपदे कर्तव्या इति। तदाह — ध्रुवा हि साक्षिणः श्रोतव्या इति। अशृण्वतां श्रवणार्थमाहूतानामनागतानां ध्रुवाणां,

देशकालाविदूरस्थान् साक्षिणः प्रतिपादयेत् ।
दूरस्थानप्रसारान् वा स्वामिवाक्येन साधयेत् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
एकादशोऽध्यायः ऋणादानम्,
आदितोऽष्टषष्टितमः ॥

चतुर्विंशतिपणो दण्डः । ततोऽर्धं द्वादशपणः, अध्रुवाणाम् । तत्र ध्रुवाश्चत्वारिंशत्कुलिकाः, तदनन्तर्गता अध्रुवाः ।

अध्यायान्ते श्लोकमाह — **देशकालाविदूरस्थान्** इति । देशतः कालतश्चादूरस्थितान्, साक्षिणः, प्रतिपादयेद् अर्थी स्वयमेवानीय वादयेत् । **दूरस्थान्**, **अप्रसारान्** वा समीपस्थानेवाहूतानागतान् वा, स्वामिवाक्येन प्राड्विवाकाज्ञया, **साधयेत्** आनाययेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
एकादशोऽध्यायः ऋणादानम,
आदितोऽष्टषष्टितमः ॥

६४. प्रक. औपनिधिकम्।

उपनिधिः ऋणेन व्याख्यातः। परचक्राटविकाभ्यां दुर्गराष्ट्रविलोपे वा, प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे, चक्रयुक्ते नाशे वा, ग्राममध्याग्न्युदकाबाधे वा, किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये वा, ज्वालावेगोपरुद्धे वा, नावि निमग्नायां मुषितायां वा स्वयमुपरूढो नोपनिधिमभ्याभवेत्।

औपनिधिकमिति सूत्रम्। उपनिधिर्न्यासो निक्षेप इति पर्यायाः। तत्संबद्धमभिधीयते इति सूत्रार्थः। उपनिधिर्विप्रतिपत्तावृणवद् व्यवहार्य इत्यतस्तदनन्तरमस्याभिधानसङ्गतिः।

उपनिधिर्ऋणेन व्याख्यात इति। ऋणं यथाधमर्णेन तत्पुत्रादिना च प्रत्यर्पणीयं, विप्रतिपत्तौ तु साक्ष्यनुयोगादिना विभावनीयं, तथैवोपनिधिरित्यतिदेशार्थः। उपनिधिरिति च आध्यादेशान्वाधीनामप्युपलक्षणम्। प्रत्यर्पणापवादमाह — **परचक्राटविकाभ्यामिति**। शत्रुसैन्येनाटविकेन च, दुर्गराष्ट्रविलोपे वा नोपनिधिमभ्यावहेत् उपनिधिं न प्रत्यर्पयेत्। प्रतिरोधकैर्वा ग्रामसार्थव्रजविलोपे चोरैर्ग्रामस्य सार्थस्य वणिक्सङ्घस्य व्रजस्य गवाश्वादिस्थानस्य च विलोपे, नोपनिधिमभ्यावहेत्। चक्रयुक्ते नाशे वा चक्रं छद्मविशेषः तत्प्रयुक्ते, नाशे वा, नोपनिधिमभ्यावहेत्। ग्राममध्याग्न्युदकाबाधे वा ग्राममध्येऽग्निदाहजलप्रवाहबाधायां वा, नोपनिधिमभ्यावहेत्। **किञ्चिदमोक्षयमाणे कुप्यमनिर्हार्यवर्जमेकदेशमुक्तद्रव्ये** वेति। अयमर्थः — अग्न्युदकबाधे कुप्यद्रव्यं निर्हार्यमेकदेशतो मोचयित्वा किञ्चिदवशिष्टं कुप्यांशममोचयमानः कुप्यं नाभ्यावहेत्। अनिर्हार्यवर्जमिति च निर्हार्यद्रव्य एवैकदेशतो विमोक्षणस्य सम्भवो न त्वनिर्हार्यद्रव्य इति वस्तुस्थितिमात्रं कथ्यते। तेनानिर्हार्यकुप्यविषये तूष्णीमवस्थानमप्यग्न्युदकबाधे नापराधायेत्युक्तप्रायम्। **ज्वालावेगोपरुद्धे** वेति। ज्वालावेगोपरोधवशादुपनिधिमोचनासमर्थे वा सति, नोपनिधिमभ्यावहेत्। नावि निमग्नायां, मुषितायां वा चोरितायां वा सत्यां, स्वयमुपरूढः कृतात्मत्राणः, नोपनिधिमभ्यावहेत्। इह चोत्तरत्र च 'अभ्याभवेदि'ति मातृकासु पाठो दृश्यते, स तु 'अभ्यावहेद्' इत्यस्मिन्नेव पदे केरलीयलिपिलिखिते हकारे भकारभ्रान्तिं कृत्वा वकारस्य तदुत्तरस्थानस्थितियोग्यतां मन्यमानेन लेखकेन कल्पितो नूनम्। अभ्याङ्पूर्वस्य भवतेर्वा प्रत्यर्पणार्थत्वमदृष्टश्रुतस्यापि लिपिलेखनप्रामाण्याभिमाने कल्पनीयम्।

उपनिधिभोक्ता देशकालानुरूपं भोगवेतनं दद्यात् । द्वादशपणं च दण्डम् । उपभोगनिमित्तं नष्टं विनष्टं वाभ्यावहेत्, चतुर्विंशतिपणश्च दण्डः। अन्यथा वा निष्पतने । प्रेतं व्यसनगतं वा नोपनिधिमभ्यावहेत् ।

आधानविक्रयापव्ययनेषु चास्य चतुर्गुणपञ्चबन्धो दण्डः। परिवर्तने निष्पातने वा मूल्यसमः ।

तेन आधिप्रणाशोपभोगविक्रयाधानापहारा व्याख्याताः ।

नाधिः सोपकारः सीदेत् । न चास्य मूल्यं वर्धेत । निरुपकारः सीदेन्मूल्यं चास्य वर्धेतान्यत्र निसर्गात् ।

उपनिधिभोक्तेति । विना स्वाम्यनुज्ञामुपनिधिं भुञ्जानः, देशकालानुरूपं भोगवेतनं, दद्यात् स्वामिने । द्वादशपणं दण्डं च दद्याद् राज्ञे । उपभोगनिमित्तम् उपभोगाय गृहीतं द्रव्यं, नष्टम् अन्यापहृतं, विनष्टं वा स्वरूपहानिं प्राप्तं वा अभ्यावहेत् प्रतिदद्यात् । चतुर्विंशतिपणश्च दण्डः नाशकस्य । अन्यथा वा निष्पतने उपभोगं विनैवोपनिधेरन्यत्र गमने च, चतुर्विंशतिपणो दण्ड इति वर्तते । प्रेतं, व्यसनगतं वा उपनिधिग्राहिणम्, उपनिधिं, नाभ्यावहेत् न दापयेत् ।

आधानेत्यादि । अस्य उपनिधेः, आधानविक्रयापव्ययनेषु च आधीकरणपरस्वीकरणापलापेषु च, चतुर्गुणपञ्चबन्धो दण्डः उपनिहितं चतुर्गुणं देयम् उपनिधात्रे चतुर्गुणस्य पञ्चभागो दण्डश्च राज्ञे । **परिवर्तन** इति । उपनिहितविनिमये, निष्पातने वा अन्यत्र संक्रामणे वा, मूल्यसमः, दण्ड इति वर्तते ।

तेनेति । उक्तेन विधानेन, आधिप्रणाशोपभोगविक्रयाधानापहाराः व्याख्याताः आधिप्रणाशोपभोगादिविषयं विधानम् उपनिधिप्रणाशोपभोगादिविधानेन यथोक्तेन तुल्यमित्यर्थः ।

नाधिरिति । सोपकारः आधिः वाहदोहादियुक्तो गवादिरूपः, न सीदेत् न नश्येत्, धनं गृहीत्वा प्रत्यर्पणीयमित्यर्थः । कुत इत्याकाङ्क्षायां प्रणाशनिमित्तं धनद्वैगुण्यं प्रति हेतुभूताया वृद्धेस्तत्राभावादित्याह — **न चास्य मूल्यं वर्धेते**ति । अस्य सोपकारस्याधेः । **निरुपकार** इति । उपभोगरहितः आधिः, सीदेत्, अस्य मूल्यं च धनं च, वर्धेत । कदा, अन्यत्र निसर्गात् । निसर्गः उपभोगानुज्ञा सा चेन्न दत्ता तदा । सति तु निसर्गेऽनुपभोगो धनिकस्यैवापराध इति धनं नैव वर्धेतेत्यभिप्रायः ।

उपस्थितस्याधिमप्रयच्छतो द्वादशपणो दण्डः । प्रयोजकासान्निधाने वा ग्रामवृद्धेषु स्थापयित्वा निष्क्रयमाधिं प्रतिपद्येत । निवृत्तवृद्धिको वाधिस्तत्कालकृतमूल्यस्तत्रैवावतिष्ठेत, अनाशविनाशकरणाधिष्ठितो वा । धारणकसन्निधाने वा विनाशभयादुद्गतार्घं धर्मस्थानुज्ञातो विक्रीणीत । आधिपालप्रत्ययो वा ।

स्थावरस्तु प्रयासभोग्यः फलभोग्यो वा । प्रक्षेपवृद्धिमूल्यशुद्धमाजीवममूल्यक्षयेणोपनयेत् ।

उपस्थितस्येति । सधनस्याधिग्रहणाय गृहमुपगतस्याधमर्णस्य, आधिम्, अप्रयच्छतः अप्रत्यर्पयतो धनिकस्य, द्वादशपणो दण्डः । **प्रयोजकासान्निधाने वेति** । धनप्रयोक्तुर्देशान्तरगमनादिना सान्निध्याभावे, ग्रामवृद्धेषु निष्क्रयं देयं मूल्यं, स्थापयित्वा, आधिं, प्रतिपद्येत प्रतिगृह्णीयात् । आधिग्रहणासौकर्ये त्वाह — **निवृत्तेत्यादि** । आधिः, निवृत्तवृद्धिकः निष्क्रयस्थापनकालात् प्रभृति वृद्धिरहितः, तत्कालकृतमूल्यः कालान्तरविनाशशङ्कायां धारणकोपस्थानकाल एव व्यवस्थापितमूल्यः, तत्रैव प्रयोजककुल एव, अवतिष्ठेत । धारणकासन्निधाने विनाशशङ्कायामाह — **अनाशविनाशकरणाधिष्ठितो वेति** । अनाशस्याविनाशस्य च यत् करणं साधनं तद्युक्तो वा, कार्य इति शेषः । रक्षणाशक्तावाह — **धारणकसन्निधाने वेति** । अधमर्णस्य सन्निधाने वा, विनाशभयाद्, उद्गतार्घम् उद्रिक्तमूल्यं यथा भवति तथा, धर्मस्थानुज्ञातो विक्रीणीत । **आधिपालप्रत्ययो वेति** । आधिपाल आधिस्थेयः प्रत्ययः प्रमाणं यस्य स तथाभूतो वा भवेद्, आधिपालवचनानुरोधेन रक्षणं विक्रयणं वाधेः कुर्यादित्यर्थः ।

स्थावरास्त्विति । स्थावरः अचरः आधिर्भूमिवृक्षादिः, प्रयासभोग्यः आधिग्राहकेण स्वयं कर्षणादिना परिश्रमेण भोक्तव्य इत्येकः, **फलभोग्यः** फलम् आधातृश्रमनिष्पन्नं भोग्यम् आधिग्राहकेण भोक्तव्यं यस्य स तथाभूत इत्यपरः इत्येवं द्विप्रकारः । भोग्यत्वोक्त्या च भोगातिरेकेण स्थावरस्य वृद्ध्यभावो विक्रयाभावश्चोक्तप्रायः । **प्रक्षेपवृद्धिमूल्यशुद्धमिति** । वाणिज्याधिगतस्यैतावतो लाभस्यैतावद् देयमिति परिभाषिता वृद्धिः प्रक्षेपवृद्धिः तस्या मूल्यतः शुद्धं विशोधितं कृत्वेति शेषः, आजीवम् उपभुज्यमानमाधिम्, उपनयेत् प्रत्यर्पयेत्, कथम्, अमूल्यक्षयेण मूल्यक्षयाभावेन प्रयुक्तयावन्मूल्यग्रहणेनेत्यर्थः ।

अनिसृष्टोपभोक्ता मूल्यशुद्धमाजीवं बन्धं च दद्यात् । शेषमुपनिधिना व्याख्यातम् ।

एतेनादेशोऽन्वाधिश्च व्याख्यातौ । सार्थेनान्वाधिहस्तो वा प्रदिष्टां भूमिमप्राप्तश्चोरैर्भग्नोत्सृष्टो वा नान्वाधिमभ्यावहेत् । अन्तरे वा मृतस्य दायादोऽपि नाभ्यावहेत् । शेषमुपनिधिना व्याख्यातम् ।

याचितकमवक्रीतकं वा यथाविधं गृह्णीयुस्तथाविधमेव अर्पयेयुः । भ्रेषोपनिपाताभ्यां देशकालोपरोधि दत्तं नष्टं विनष्टं वा नाभ्याभवेयुः । शेषमुपनिधिना व्याख्यातम् ।

वैयापृत्यविक्रयस्तु — वैयापृत्यकरा यथादेशकालं विक्रीणानाः

अनिसृष्टोपभोक्तेति । अननुज्ञाताधिभोक्ता, मूल्यशुद्धं मूल्याच्छुद्धम्, आजीवं बन्धं च दद्याद् आधातुर्भोगमूल्यं राज्ञो दण्डं च दद्यात् स्वप्रयुक्तं मूल्यं भोगमूल्यदण्डतद्द्यावशिष्टमेव लभेत न तु सर्वमित्यर्थः । **शेषमुपनिधिना व्याख्यातमि**ति । अनुक्तं विधानमुपनिधिविधानेन समानमित्यर्थः ।

आधिकल्पमादेशान्वाध्योरतिदिशति — **एतेने**त्यादि । अन्यस्मै दीयतामित्युक्त्वा तदन्यस्य हस्तेऽर्पितं द्रव्यमादेश । एतावदध्वान्तरं रक्षित्वा देहीत्यर्पितमन्वाधिः । **सार्थेने**ति । अन्वाधिहस्तः अन्वाधिमध्वनि नयन्, वाशब्दो वाक्यभूषणम् । प्रदिष्टां निर्दिष्टां, भूमिम् अध्वोत्तरावधिम्, अप्राप्तः, चोरैः, सार्थेन अध्वगसङ्घेन सह, भग्नोत्सृष्टो वा मुषितविसृष्टश्च, अन्वाधिं, नाभ्यावहेत् न निष्क्रीणीयात् । अन्तरे वा अध्वमध्ये वा, मृतस्य अन्वाधिहस्तस्य, दायादोऽपि, नाभ्यावहेत् । शेषं विधानम्, उपनिधिना व्याख्यातम् उपनिधिविधानवद् द्रष्टव्यम् ।

याचितकमिति । याच्ञयोपयोगाय गृहीतम्, अवक्रीतकं वा भाटकगृहीतं वा, यथाविधं गृह्णीयुस्तथाविधमेवार्पयेयुः । **भ्रेषोपनिपाताभ्यामि**ति । भ्रेषो हस्त्यादिदुष्टसत्त्वजनितं भयम् उपनिपातश्चोरादिभयं ताभ्यां, नष्टं विनष्टं वा, देशकालोपरोधि अमुकदेशान्न प्रस्थातव्यमिति वा एतावतः कालस्य न प्रस्थातव्यमिति वा देशकालोपरोधान्नष्टं विनष्टं वा, दत्तं नाभ्यावहेयुः । **शेषमित्यादि** सुबोधम् ।

वैयापृत्यविक्रयस्त्विति । अभिधीयत इति शेषः । वैयापृत्यकराः इह पृशब्दः पठ्यते न तु वृशब्दः । व्यापृतो व्याप्रियमाणस्तस्य कर्म वैयापृत्यं

पण्यं यथाजातं मूल्यमुदयं च दद्युः। शेषमुपनिधिना व्याख्यातम्।

देशकालातिपातने वा परिहीणं सम्प्रदानकालिकेन अर्घेण मूल्यमुदयं च दद्युः।

यथासम्भाषितं वा विक्रीणाना नोभयमधिगच्छेयुः। मूल्यमेव दद्युः। अर्घपतने वा परिहीणं यथापरिहीणं मूल्यमूनं दद्युः।

सांव्यवहारिकेषु वा प्रात्ययिकेष्वराजवाच्येषु भ्रेषोपनिपाताभ्यां नष्टं विनष्टं वा मूल्यमपि न दद्युः। देशकालान्तरितानां तु पण्यानां क्षयव्ययविशुद्धं मूल्यमुदयं च दद्युः। पण्यसमवायानां च प्रत्यंशम्। शेषमुपनिधिना व्याख्यातम्। एतेन वैयापृत्यविक्रयो व्याख्यातः।

कर्मणि ष्यञ् तत्कराः कर्मकरा इत्यर्थः। वैयावृत्यकरा इति वृशब्दपाठे यथा कर्मकरार्थता, तथा व्याख्यातमधस्तात्। यथादेशकालं स्वस्वकलृप्तदेशकालानतिक्रम्य, पण्यं विक्रीणानाः, यथाजातं यथोत्पन्नं, मूल्यम्, उदयं लाभं च, दद्युः, पण्यस्वामिने। शेषमित्यादि स्पष्टम्।

देशकालातिपातने वेति। देशातिक्रमणे कालातिक्रमणे वा स्वकृते सति, परिहीणं लाभच्छेदं, सम्प्रदानकालिकेनार्घेण कलृप्तकालप्रसिद्धमूल्यकल्पनेन, मूल्यं पण्यमूल्यम्, उदयं च दद्युः।

यथासम्भाषितं वेति। अमुकेनार्घेण विक्रेतव्यमिति स्वामिपरिभाषानुसारेण, कर्मकराः विक्रीणानाश्चेद्, उभयं मूल्यं लाभं च, नाधिगच्छेयुः, अर्थात् पण्यस्वामिनः। मूल्यमेव दद्युः मूल्यं केवलं पण्यस्वामिने दद्युः कर्मकराः, लाभं तु स्वयं हरेयुरित्यर्थः। **अर्घपतने वा परिहीणमिति**। अर्घपतनवशात् किञ्चित् परिहीणं यदि भवेत्, यथापरिहीणं मूल्यमूनं दद्युः परिहीणानुरोधेन पण्यमूल्यमूनं पूरयित्वार्पयेयुः।

सांव्यवहारिकेषु वेति। परपण्यक्रयविक्रयजीविषु, प्रात्ययिकेषु प्रत्ययार्हेषु, अराजवाच्येषु राजाप्रतिषिद्धेषु सत्सु, भ्रेषोपनिपाताभ्यां, नष्टं विनष्टं वा पण्यं, यदि भवेदिति शेषः, मूल्यमपि न दद्युः अर्थात् ते। देशकालान्तरितानां देशान्तरे कालान्तरे च विक्रेतुमर्पितानां पण्यानां, क्षयव्ययविशुद्धं क्षयः कालपरिवासनिमित्तः पण्यक्षयः व्ययः कर्मकरादिभक्तपरिव्ययस्ताभ्यां परितष्टं, मूल्यम्, उदयं च लाभं च, दद्युः। **पण्यसमवायानां च प्रत्यंश-**

निक्षेपश्चोपनिधिना । तमन्येन निक्षिप्तमन्यस्यार्पयतो हीयेत । निक्षेपापहारे पूर्वापदानं निक्षेप्तारश्च प्रमाणम् । अशुचयो हि कारवः, नैषां करणपूर्वो निक्षेपधर्मः । करणहीनं निक्षेपमपव्ययमानं गूढभित्तिन्यस्तान् साक्षिणो निक्षेप्ता रहस्यप्रणिपातेन प्रज्ञापयेत्, वनान्ते वा मद्यप्रहवणविश्वासेन ।

रहसि वृद्धो व्याधितो वा वैदेहकः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्यापगच्छेत् । तस्य प्रतिदेशेन पुत्रो भ्राता वाभिगम्य निक्षेपं याचेत । दाने शुद्धिः । अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

मिति । वणिजः स्वदत्तपण्यानि देशान्तरे विक्रीय ततः समानीतानां नानापण्यान्तराणां विषये प्रतिलाभांशं सांव्यवहारिकेभ्यो दद्युः । **शेषमित्यादि** गतार्थम् । सांव्यवहारिकोक्तमेतद् विधानं वैयापृत्यविक्रयेऽप्यतिदिशति – **एतेनेत्यादि** ।

निक्षेपश्चेति । भूषणादिनिर्माणार्थं कारुषु निक्षिप्यमाणं स्वर्णादिकं निक्षेपः, सः, उपनिधिना, व्याख्यात इत्यनुवर्तते । **तमिति** । तं निक्षेपम्, अन्येन निक्षिप्तम्, अन्यस्यार्पयतः तदन्यस्मै ददानस्य कारोः, हीयेत द्रव्यहानिर्भवति साक्षान्निक्षेप्तृहस्ते स पुनर्देय एवेत्यर्थः । निक्षेपापहारे, पूर्वापदानं निक्षेप्तारश्च प्रमाणं कारुपूर्वचरितं निक्षेप्तृसुजनतां च पर्यालोच्य निर्णयः कर्तव्य इत्यर्थः । कुत एवं, तत्राह — **अशुचयो हीति** । हि यतः, **कारवः** अशुचयः सत्यहीनाः । एषां, निक्षेपधर्मः निक्षेपव्यवहारः, करणपूर्वो न साक्षिलेख्यपूर्वो न क्रियते विश्वासादेव केवलात् क्रियते । **करणहीनमिति** । साक्ष्यादिरहितं, निक्षेपम्, अपव्ययमानम् अपलपन्तं कारुं, गूढभित्तिन्यस्तान्, साक्षिणः, निक्षेप्ता, रहस्यप्रणिपातेन रहस्ये प्रार्थनपूर्वकश्रावणेन, प्रज्ञापयेत् प्रबोधयेत् । वनान्ते वा, मद्यप्रहवणविश्वासेन मद्यगोष्ठीरचनविस्रम्भेण, रहसि साक्षिणः प्रज्ञापयेदिति वर्तते । इह मद्यप्रहवणेति प्रहवणशब्द एव मातृकान्तेषु सर्वेषु पठ्यते । स च प्रपूर्वाज्जुहोतेरधिकरणे ल्युटि साध्यः । प्रकर्षेण हूयते दीयते पानभोजनादिकमस्मिन्निति प्रहवणं गोष्ठीरचनमुच्यते । प्रवहणशब्दस्य यथेदृशोऽर्थस्तथोक्तं प्राक् ।

रहसीति । विजने, वृद्धो व्याधितो वा, वैदेहको भूषणवणिक्, कश्चित् **कृतलक्षणं** चिह्नविशेषयुक्तं, द्रव्यम्, अस्य कारोः, हस्ते, निक्षिप्य, अपगच्छेत्

प्रव्रज्याभिमुखो वा श्रद्धेयः कश्चित् कृतलक्षणं द्रव्यमस्य हस्ते निक्षिप्य प्रतिष्ठेत । ततः कालान्तरागतो याचेत । दाने शुचिरन्यथा निक्षेपं स्तेयदण्डं च दद्यात् । कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनम् । बालिशजातीयो वा रात्रौ राजदायिकाङ्क्षणभीतः सारमस्य हस्ते निक्षिप्यापगच्छेत् । स एनं बन्धनागारगतो याचेत । दाने शुचिः, अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

अभिज्ञानेन चास्य गृहे जनमुभयं याचेत । अन्यतरादाने यथोक्तं पुरस्तात् ।

द्रव्यभोगानामागमं चास्यानुयुञ्जीत । तस्य चार्थस्य व्यवहारोपलिङ्गनमभियोक्तुश्चार्थसामर्थ्यम् ।

म्रियेत । तस्य, प्रतिदेशेन वचनेन, पुत्रो भ्राता वा अभिगम्य निक्षेपं याचेत, चेदिति शेषः, दाने शुद्धिः तदा तदर्पणे कारोरानृण्यं भवति । अन्यथा तदपलापे, निक्षेपं स्वामिने, स्तेयदण्डं च राज्ञे, दद्यात् ।

प्रव्रज्याभिमुख इत्यादि । सुबोधम् । **कृतलक्षणेन वा द्रव्येण प्रत्यानयेदेनमि**ति । स्वनिक्षेपद्रव्यस्य यल्लक्षणं पूर्वकृतं तद्दर्शनेन वा तदुपलम्भेन वा कारुगृहान्निक्षेपं प्रत्याहरेत् । **बालिशजातीयो** वेति । मूर्खप्रायो जनः, रात्रौ, राजदायिकाङ्क्षणभीतः राजदायिना राज्ञेऽर्पयिष्यता राजामात्यादिना यत् काङ्क्षणमभिलषणं तेन हेतुना भीतः, सारं रत्नादि प्रशस्तं वस्तु, अस्य कारोः, हस्ते निक्षिप्य अपगच्छेत् । सः निक्षेप्ता, बन्धनागारगतः राजदाय्याकाङ्क्षितसारद्रव्यानुपहरणात् कारणान्तराद् वा कारागारं प्राप्तः, एनं सारं याचेत । चेदिति शेषः । दाने तदा प्रत्यर्पणे शुचिः कारुः । अन्यथा निक्षेपं स्तेयदण्डं च दद्यात् ।

अप्रत्यर्पितनिक्षेपादिकस्य कारोर्मरणे त्वाह— **अभिज्ञानेन चे**ति । निक्षेपतद्ग्राहिकारुलक्षणाद्यभिज्ञानकथनेन, अस्य कारोः, गृहे, जनं तत्पुत्रादिम्, उभयं निक्षेपं सारं च, याचेत । अन्यतरादाने अन्यतरानर्पणे, **यथोक्तं पुरस्तात्** पूर्वं यथोक्तं तथा कुर्यात् निक्षेपं स्तेयदण्डं च दद्यादित्यर्थः ।

सत्यासत्यनिश्चयार्थं धर्मस्थकरणीयमाह— **द्रव्यभोगानामि**ति । तद्गृहोपभुज्यमानद्रव्याणाम्, आगमं च, अस्य निक्षेपाद्यपलापकस्य, अनुयुञ्जीत धर्मस्थः । तस्य चार्थस्य अनुयुक्तनिवेदितस्य चार्थस्य, व्यवहारोपलिङ्गनं व्यव-

एतेन मिथस्समवायो व्याख्यातः ।

तस्मात् साक्षिमदच्छन्नं कुर्यात् सम्यग्विभाषितम् ।
स्वे परे वा जने कार्यं देशकालाग्रवर्णतः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
द्वादशोऽध्यायः औपनिधिकम्,
आदितः एकोनसप्ततितमः ॥

हारैर्न्यायैः सत्यासत्यत्वानुमानं, कर्तव्यमिति शेषः । अभियोक्तुश्चार्थसामर्थ्यम् अमुकद्रव्यनिक्षेप्ताहमिति वदितुस्तथाविधद्रव्यनिक्षेपणयोग्यत्वं च, विभावनीयमिति शेषः ।

निक्षेपापलापोक्तविधानदिशा रहस्यऋणदानगान्धर्वविवाहाद्यपलापेष्वपि सत्यासत्यनिर्णयोपाया ऊहनीया इत्याह—**एतेने**त्यादि ।

अध्यायप्रान्ते श्लोकमाह — **तस्मा**दिति । तस्माद् वस्त्वपलापसम्भवात् सत्यासत्यनिर्णयस्य दुस्साधत्वाच्च, कार्यं, साक्षिमद्, अच्छन्नं, स्वे परे वा स्वजने परजने च, देशकालाग्रवर्णतः देशतः कालतः संख्यातो रूपतश्च, सम्यग्, विभाषितं विविच्य कथितं कुर्याद् वस्त्वपलापस्य परिहारार्थं परिज्ञानार्थं च ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
द्वादशोऽध्यायः, औपनिधिकम्,
आदितः एकोनसप्ततितमः ॥

६५. प्रक. दासकर्मकरकल्पः।

उदरदासवर्जमार्यप्राणमप्राप्तव्यवहारं शूद्रं विक्रयाधानं नयतः स्वजनस्य द्वादशपणो दण्डः। वैश्यं द्विगुणः। क्षत्रियं त्रिगुणः। ब्राह्मणं चतुर्गुणः। परजनस्य पूर्वमध्यमोत्तमवधा दण्डाः क्रेतृश्रोतॄणां च।

म्लेच्छानामदोषः प्रजां विक्रेतुमाधातुं वा। न त्वेवार्यस्य दासभावः।

अथवार्यमाधाय कुलबन्धन आर्याणामापदि निष्क्रयं चाधिगम्य बालं साहाय्यदातारं वा पूर्वं निष्क्रीणीरन्।

दासकर्मकरकल्प इति सूत्रम्। दासाः गर्भदासाः कर्मकराः कर्षकगोपालादयः तेषां कल्पः आधानविक्रयादिविधानम् उच्यत इति सूत्रार्थः। 'पतिमत्या पुत्रवत्या च स्त्रिया दासाहितकाभ्याम्' इति विवादपदनिबन्धे मनुष्याणामाधानमुक्तम्। विक्रीतक्रीतानुशये च विक्रय उक्तः। तत्र क आधातव्यो विक्रेतव्यो वेत्येतदधुनाभिधीयते।

उदरेत्यादि। उदरदासवर्जम् अशननिरुपायोऽन्नाच्छादनदानेन रक्ष्यमाण उदरदासः तद्वर्जम्, आर्यप्राणम् आर्यजीवितम्, अप्राप्तव्यवहारं, शूद्रं, विक्रयाधानं नयतः विक्रीणानस्यादधानस्य च, स्वजनस्य, द्वादशपणो दण्डः, वैश्यं द्विगुणः वैश्यं विक्रयाधानं नयतः स्वजनस्य चतुर्विंशतिपणः। क्षत्रियं त्रिगुणः क्षत्रियं विक्रयाधानं नयतः षट्त्रिंशत्पणः। ब्राह्मणं चतुर्गुणः विक्रयाधानं नयतोऽष्टाचत्वारिंशत्पणः। परजनस्य अस्वजनस्य यथोक्तं कुर्वतः, पूर्वमध्यमोत्तमवधाः यथाक्रमं प्रथमसाहसो मध्यमसाहस उत्तमसाहसो घातश्च, दण्डाः। क्रेतृश्रोतॄणां च क्रेतॄणां शूद्रादिं मूल्यदानेन स्वीकुर्वतां तत्साक्षिणां च, पूर्वमध्यमोत्तमवधा दण्डाः।

म्लेच्छानामिति। म्लेच्छाः अनार्याः कृषिशस्त्रजीविनो वन्याः तेषां विषये, अदोषः प्रजां विक्रेतुमाधातुं वा स्वीयप्रजाविक्रयाधानं न दोषाय। आर्यस्य जनस्य, दासभावः नत्वेव नैवापादनीयः।

आपत्कल्पमाह—**अथवे**ति। कुलबन्धने कुलस्य कृच्छ्रप्राप्तौ, आर्याणामापदि बहूनामार्याणां विपत्प्राप्तौ च, आर्यम् आधाय आपन्निवृत्त्यपेक्षितधनग्रहणेन धनिके आहितं कृत्वा नतु विक्रीय, निष्क्रयं चाधिगम्य, धनिकप्रत्यर्पणीये धने हस्तप्राप्ते सति, बालम् आहितपूर्वं कुमारं, साहाय्यदातारं वा स्वयमाधीभावेन कृतोपकारमबालमपि वा, पूर्वं निष्क्रीणीरन् प्रथमं धनं दत्वा प्रत्यानयेयुः शान्तविपदां तन्निष्क्रयणमेव प्रथमानुष्ठेयं कृत्यमित्यर्थः।

सकृदात्माधाता निष्पतितः सीदेत्। द्विरन्येनाहितकः। सकृदुभौ परविषयाभिमुखौ।

वित्तापहारिणो वा दासस्यार्यभावमपहरतोऽर्धदण्डः। निष्पतितप्रेतव्यसनिनामाधाता मूल्यं भजेत।

प्रेतविण्मूत्रोच्छिष्टग्राहणमाहितस्य नग्नस्नापनं दण्डप्रेषणमतिक्रमणं च स्त्रीणां मूल्यनाशकरम्। धात्रीपरिचारिकार्धसीतिकोपचारिकाणां च मोक्षकरम्। सिद्धमुपचारकस्याभिप्रजातस्य अपक्रमणम्।

धात्रीमाहितिकां वाकामां स्ववशामभिगच्छतः पूर्वः साहसदण्डः, परवशां मध्यमः। कन्यामाहितिकां वा स्वयमन्येन वा दूषयतः मूल्यनाशः शुल्कं तद्द्विगुणश्च दण्डः।

सकृदात्माधाता निष्पतितः सीदेदिति। धनग्रहणेन स्वयमेवात्मानमाधिं कृत्वा धनिकसकाशात् सकृदपसृतश्चेत् पुनर्धनिकमुपगन्तुं नार्हेत्, सद्य एव तदृणं निर्यातयेच्चेत्यर्थः। **द्विरि**ति। अन्येनाहितकः, द्विः, निष्पतितः सीदेत्। **सकृदि**ति। उभौ आत्माधातान्याहितकश्च, सकृत् परविषयाभिमुखौ परविषयगामिनौ, सीदेतामिति विपरिणतसम्बन्धः।

वित्तापहारिणो वेति। स्वामिवित्तमपहरतो, दासस्य गर्भदासस्य, आर्यभावमपहरतोऽर्धदण्डः आर्यद्रव्यहारिस्तेनदण्डस्यार्धं दण्डो भवति। आर्यद्रव्यमपहरत इति क्वचित् पाठः। निष्पतितप्रेतव्यसनिनाम् आधिग्राहकदोषान्निष्पतितस्य देशान्तरगतस्य प्रेतस्य मृतस्य व्यसनिनो मद्यद्यूतादिव्यसनप्राप्तस्य च दासस्य, मूल्यम्, आधाता भजेत।

प्रेतविण्मूत्रोच्छिष्टग्राहणमिति। आहितस्य प्रेतादिग्राहणं, स्त्रीणाम् आहितानां, नग्नस्नापनं विवस्त्रपुरुषस्नापनं, दण्डप्रेषणं लगुडताडनम्, अतिक्रमणं च उपभोगश्च, मूल्यनाशकरम्। **धात्री**त्यादि। धात्री उपमाता परिचारिका शुश्रूषिका अर्धसीतिका कर्षकस्त्री उपचारिका आस्तरणवीजनाद्युपचारकर्त्री एतासामाहितानां, च मोक्षकरम् अर्थात् प्रेतविण्मूत्रादिग्राहणादिकम्। **सिद्धमि**ति। दास्याः भक्तदायी भर्ता भवंस्तेनैव वेतनेन दासीस्वामिनः कर्म कुर्वाण उपचारकः उपचारकस्य, अभिप्रजातस्य दास्यां प्रजामुत्पादितवतः, अपक्रमणम् अपूर्णेऽपि कालेऽपसरणं सिद्धम्।

धात्रीमाहितिकां वेति। ताम्, अकामां, स्ववशाम् अभर्तृवशाम्, अधिगच्छतः, पूर्वः साहसदण्डः। परवशां भर्तृवशाम् अधिगच्छतः, मध्यमः

आत्मविक्रयिणः प्रजामार्यां विद्यात् । आत्माधिगतं स्वामिकर्माविरुद्धं लभेत, पित्र्यं च दायम् । मूल्येन चार्यत्वं गच्छेत् । तेनोदरदासाहितकौ व्याख्यातौ ।

प्रक्षेपानुरूपश्चास्य निष्क्रयः ।

दण्डप्रणीतः कर्मणा दण्डमुपनयेत् ।

आर्यप्राणो ध्वजाहृतः कर्मकालानुरूपेण मूल्यार्धेन वा विमुच्येत ।

गृहजातदायागतलब्धक्रीतानामन्यतमं दासमूनाष्टवर्षं विबन्धुमकामं नीचे कर्मणि विदेशे दासीं वा सगर्भामप्रतिविहितगर्भभर्मण्यां विक्रयाधानं नयतः पूर्वः साहसदण्डः, क्रेतृश्रोतॄणां च ।

कन्यामाहितिकां चेत्यादि । तां, स्वयमतिक्रामतोऽन्येनातिक्रामयतो वा, मूल्यं नश्यति । शुल्कं कन्यायै तेन दातव्यं भवति, शुल्कद्विगुणश्च दण्डो राज्ञे दातव्यः ।

आत्मविक्रयिण इति । तस्य, प्रजाम् आत्मविक्रयात् प्रागुत्पन्नमपत्यम्, आर्यां विद्याद् अदासीं जानीयात् । **आत्माधिगतमित्यादि** । आत्मविक्रयी स्वामिकर्माविरोधेनात्मनार्जितं धनं पितृदायं च लभेत । मूल्यदानेन दासभावमोक्षं च प्रतिपद्येत । **तेनोदरदासाहितकौ व्याख्याताविति** । तयोरप्यात्माधिगतलाभः पितृदायलाभ आर्यत्वप्रत्यापत्तिश्च भवतीत्यर्थः ।

प्रक्षेपेत्यादि । अस्य आत्मविक्रयिणः, निष्क्रयः प्रक्षेपानुरूपः आत्ममोक्षणार्थं देयद्रव्यं विक्रयकालकृतपरिभाषानुरोधि भवेत् ।

दण्डप्रणीत इति । यस्य दण्डः प्रणीतः सः, कर्मणा दण्डमुपनयेत् धनदानाशक्तौ कर्मकरणेन दण्डं निर्यातयेत् ।

आर्यप्राण इति । अभिजातः, ध्वजाहृतः युद्धप्रगृहीतः, कर्मकालानुरूपेण मूल्यार्धेन विमुच्येत कर्मणः कालस्य चानुरूप्येण मूल्यं किमपि परिकल्प्य तदर्धदानेन मोक्षं लभेत ।

गृहजातेत्यादि । गृहजातो दायागतः लब्धः क्रीत इति चतुर्णाम् अन्यतमं दासम्, ऊनाष्टवर्षम् अपूर्णाष्टवयसं, विबन्धुं बन्धुहीनम्, अकामं, **नीचे कर्मणि**, नयतो नियोजयतः, **विदेशे** विक्रयाधानं नयतश्च, **दासीं वा सगर्भाम्**, **अप्रतिविहितगर्भभर्मण्याम्** असंविहितप्रसवशुश्रूषापेक्षितद्रव्यां, विक्र-

दासमनुरूपेण निष्क्रयेणार्यमकुर्वतो द्वादशपणो दण्डः। संरोधश्चाकारणात्। दासद्रव्यस्य ज्ञातयो दायादाः। तेषाम् अभावे स्वामी।

स्वामिनः स्वस्यां दास्यां जातं समातृकम् अदासं विद्यात्। गृह्या चेत् कुटुम्बार्थचिन्तनी, माता भ्राता भगिनी चास्याः अदासाः स्युः।

दासं दासीं वा निष्क्रीय पुनर्विक्रयाधानं नयतो द्वादशपणो दण्डः अन्यत्र स्वयंवादिभ्यः। इति दासकल्पः।

कर्मकरस्य कर्मसम्बन्धमासन्ना विद्युः। यथासम्भाषितं वेतनं लभेत। कर्मकालानुरूपमसम्भाषितवेतनम्। कर्षकः सस्यानां, गोपालकः सर्पिषां, वैदेहकः पण्यानामात्मना व्यवहृतानां, दशभागमसम्भाषितवेतनो लभेत। सम्भाषितवेतनस्तु यथासम्भाषितम्।

याधानं नयतः, पूर्वः साहसदण्डः। क्रेतृश्रोतॄणां च, पूर्वः साहसदण्ड इति संबध्यते।

दासमिति। तम्, अनुरूपेण निष्क्रयेण, आर्यमकुर्वतः दास्यादमोचयतः, द्वादशपणो दण्डः। **संरोधश्चाकारणादिति**। आकारणमाह्वानं कृत्वा बन्धुभिस्तस्य सम्भूयरोधनेनोपालम्भश्च कार्यः। **दासद्रव्यस्येति**। दासधनस्य, ज्ञातयो दासबन्धवो, दायादाः दायहराः। तेषामभावे स्वामी दायहरः।

स्वामिनः स्वस्यां दास्यामित्यादि। स्वामी यदि स्वीयायां दास्यां पुत्रं जनयेत्, तर्हि स पुत्रो दासो न भवति, सा च दासी दास्यान्मुच्येत। **गृह्या चेत् कुटुम्बार्थचिन्तनीति**। सा दासी गृहासक्ता कुटुम्बभर्थं च यदि चिन्तयेद्, अस्याः माता भ्राता भगिनी च, अदासाः स्युः दास्यनिर्मुक्ताः स्युः।

दासं दासीं वा निष्क्रीयेत्यादि। सकृद् विक्रीतमाहितं वा दासं तथाविधां दासीं वा निष्क्रयदानेन प्रत्यापद्य पुनस्तौ विक्रीणानस्यादधानस्य च द्वादशपणो दण्डः। **अन्यत्र स्वयंवादिभ्य** इति। यदि निष्क्रीताः स्वात्मानं पुनर्विक्रेतव्यमाधातव्यं च स्वयं वदेयुस्तदा तद्विक्रयाधानयोर्न दोषः। **इति दासकल्प** इति। व्याख्यात इति शेषः।

कर्मकरकल्पमाह — **कर्मकरस्येति**। कर्षकगोपालकादेः कर्मकरस्य, कर्मसम्बन्धं कर्मस्वभियोगम्, आसन्ना विद्युः तदन्तिकस्था भूत्वा उपलभेरन्। यथासंभाषितं परिभाषितप्रकारं वेतनं लभेत, कर्मकरः। असंभाषितवेतनं, कर्मकालानुरूपं कर्मणः तत्कालस्य चानुगुणं, लभेत। तच्च कियदित्याकाङ्क्षाया-

कारुशिल्पिकुशीलवचिकित्सकवाग्जीवनपरिचारकादिराशाकारिकवर्गस्तु यथान्यस्तद्विधः कुर्यात्। यथा वा कुशलाः कल्पयेयुः तथा वेतनं लभेत। साक्षिप्रत्ययमेव स्यात्। साक्षिणामभावे यतः कर्म ततोऽनुयुञ्जीत।

वेतनादाने दशबन्धो दण्डः, षट्पणो वा। अपव्ययमाने द्वादशपणो दण्डः पञ्चबन्धो वा।

नदीवेगज्वालास्तेनव्यालोपरुद्धः सर्वस्वपुत्रदारात्मदानेनार्तस्त्रातारमाहूय निस्तीर्णः कुशलप्रदिष्टं वेतनं दद्यात्। तेन सर्वत्रार्तदानानुशया व्याख्याताः।

माह — कर्षक इति। असंभाषितवेतनः, कर्षकः, आत्मना, व्यवहृतानां साधितानां, सस्यानां, दशभागं, लभेत। गोपालकः सर्पिषां दशभागं, लभेत। वैदेहकः पण्यानां दशभागं लभेत। संभाषितवेतनस्तु कर्षकादिः, यथासंभाषितं दशभागान्न्यूनमधिकं वा लभेत।

कारुशिल्पीत्यादि। कार्वादयः षट् प्रतीताः तदादिः, आशाकारिकवर्गः आशया कारिका क्रिया येषां त आशाकारिकाः तेषां वर्गः, यथान्यस्तद्विधः तज्जातीयोऽपर इव कुर्यात्, कर्म। यथा वा कुशलाः तत्कर्मगुणविशेषज्ञाः कल्पयेयुः स्थापयेयुरेतावद् देयमिति, तथा वेतनं लभेत। साक्षिप्रत्ययमेव स्यादिति, अन्योन्यविप्रतिपत्तौ साक्षिप्रमाणकमेव वेतनं देयम्। साक्षिणामभावे, यतः कर्म ततोऽनुयुञ्जीत यत्र तादृशं कर्म कृतं तत्र कियद् दत्तमिति पृष्ट्वा जानीयात्।

वेतनादाने इति। वेतनस्याप्रदाने, दशबन्धः न्याय्यवेतनदशभागः, षट्पणो वा, दण्डः। अपव्ययमाने गृहीत्वा वेतनमगृहीतं वदति कर्मकरे, द्वादशपणो दण्डः, पञ्चबन्धो वा वेतनपञ्चभागो वा, दण्डः।

नदीवेगेत्यादि। नदीवेगादिभिश्चतुर्भिरापत्स्थानैरुपरुद्धः, आर्तः, सर्वस्वपुत्रदारात्मदानेन त्रातारमाहूय 'यो मां रक्षति तस्मै सर्वस्वादिकं दास्यामि' इति प्रतिज्ञया रक्षकमाहूय, निस्तीर्णः आहूतेन रक्षितः, कुशलप्रदिष्टं निपुणनिर्दिष्टं वेतनं दद्याद्, रक्षकाय। यथाप्रतिज्ञातं दाने निस्तरणोत्तरकालेऽनुशयानस्य कर्तुमनिच्छतोऽयं विधिः। एवमन्येष्वपि आर्तदानानुशयेषु विधिर्द्रष्टव्य इत्याह — तेनेत्यादि।

लभेत पुंश्चली भोगं सङ्गमस्योपलिङ्गनात् ।
अतियाच्ञा तु जीयेत दौर्मत्याविनयेन वा ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे त्रयोदशोऽध्यायः
दासकर्मकरकल्पो दासकल्पः कर्मकरकल्पे स्वाम्यधिकारः,
आदितः सप्ततितमोऽध्यायः ॥

अध्यायान्ते श्लोकमाह — लभेतेति । पुंश्चली बन्धकी, भोगं मैथुनभृतिं, लभेत, सङ्गमस्य उपलिङ्गनात् चिह्नेन विभावनात् । अतियाच्ञा तु अतिमात्रभृतिप्रार्थिनी तु पुंश्चली, जीयेत दण्ड्येत । दौर्मत्याविनयेन वा जीयेत दुर्बुद्धित्वप्रयुक्तेन पुरुषकामप्रातिकूल्याचरणेन च दण्ड्येत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे त्रयोदशोऽध्यायः
दासकर्मकरकल्पो दासकल्पः कर्मकरकल्पे स्वाम्यधिकारः,
आदितः सप्ततितमोऽध्यायः ॥

६६. प्रक. कर्मकरकल्पः, सम्भूयसमुत्थानम्।

गृहीत्वा वेतनं कर्म अकुर्वतो भृतकस्य द्वादशपणो दण्डः। संरोधश्चाकारणात्।

अशक्तः कुत्सिते कर्मणि व्याधौ व्यसने वा अनुशयं लभेत, परेण वा कारयितुम्। तस्य व्ययकर्मणा लभेत भर्ता वा कारयितुम्।

नान्यस्त्वया कारयितव्यो मया वा नान्यस्य कर्तव्यम् इत्यवरोधे भर्तुरकारयतो भृतकस्याकुर्वतो वा द्वादशपणो दण्डः। कर्मनिष्ठापने भर्तुरन्यत्र गृहीतवेतनो नासकामः कुर्यात्।

उपस्थितमकारयतः कृतमेव विद्याद् इत्याचार्याः।

अथ दासकर्मकरकल्पस्य शेषोऽस्मिन्नध्याय आदावुच्यते। भक्तवेतनमन्वहमगृहीत्वा कर्म कुर्वतो विधिरुक्तः पूर्वाध्याये। इह तु गृहीतभक्तवेतनस्य कर्माभिधीयते।

गृहीत्वेत्यादि। सुबोधम्। **संरोधश्चाकारणा**दिति। आहूय बलादुपरुध्य वा तं कर्म कारयेत्।

यत्कर्मकरणाय वेतनं गृहीतं तत्कर्मकरणासामर्थ्ये, कुत्सिते वा सति तस्मिन् कर्मणि व्याध्युद्भवे वा पुत्रविपत्त्यादिव्यसनसम्भवे वा कर्म कर्तव्यं त्यजन् परेण वा कारयन् कर्मकरो न दुष्यतीत्याह—**अशक्त** इत्यादि। **तस्ये**ति। तस्य व्ययकर्मणा अनुशयिहस्ताद् भृतिव्ययक्रियया, भर्ता वा कारयितुं लभेत परेण तत्कर्मानुष्ठापयितुमर्हेत्।

'मदन्यस्त्वया कर्म न कारयितव्यः, त्वदन्यस्य च मया कर्म न कर्तव्यम्' इति भर्तृभृतकयोः समयनिर्बन्धे सति भर्तुः कर्माकारयतो भृतकस्य चाकुर्वतो द्वादशपणो दण्ड इत्याह—**नान्यस्त्वया कारयितव्यः** इत्यादि। **कर्मे**त्यादि। कर्मनिष्ठापन इत्यपपाठः कर्मानिष्ठापन इत्येव युक्तः पाठः। गृहीतवेतनः, भर्तुः कर्मानिष्ठापने कर्मणोऽपरिसमापने, असकामोऽन्यत्र न कुर्याद् भर्त्रनिच्छयान्यत्र कर्म नानुतिष्ठेत्।

उपस्थितमिति। अवरोधानुरोधेन कर्म कर्तुमुपस्थितं कर्मकरम्, अकारयतः भर्तुः, कृतमेव विद्याद् अकृतमपि कर्म कृतं जानीयात्, कर्मार्थं पूर्वदत्तं वेतनमपैतीत्यर्थः। इत्याचार्याः वदन्तीति शेषः।

नेति कौटल्यः । कृतस्य वेतनं, नाकृतस्यास्ति । स चेदल्पमपि कारयित्वा न कारयेत्, कृतमेव अस्य विद्यात् । देशकालातिपातनेन कर्मणामन्यथाकरणे वा नासकामः कृतमनुमन्येत । सम्भाषितादधिकक्रियायां प्रयासं न मोघं कुर्यात् ।

तेन सङ्घभृता व्याख्याताः । तेषामाधिः सप्तरात्रमासीत । ततोऽन्यमुपस्थापयेत् । कर्मनिष्पाकं च । नचानिवेद्य भर्तुः सङ्घः कञ्चित् परिहरेद्, उपनयेद् वा । तस्यातिक्रमे चतुर्विंशतिपणो दण्डः । सङ्घेन परिहृतस्यार्धदण्डः । इति भृतकाधिकारः ।

स्वमतमाह — **नेति कौटल्य** इति । कृत इत्याह — **कृतस्येति** । कृतस्य वेतनमस्ति, अकृतस्य वेतनं नास्ति । सः भर्ता, अल्पमपि किञ्चिदपि कर्म कारयित्वा, न कारयेच्चेद् अर्थाच्छेषम्, अस्य भर्तुः कर्मेति शेषः, कृतमेव विद्यात् । **देशकालातिपातनेने**ति । क्लृप्तदेशकालातिक्रामणेन करणे, कर्मणाम् अन्यथाकरणे वा, असकामः अनिच्छन्, कृतं नानुमन्येत । सम्भाषितादधिकक्रियायां, प्रयासं तद्विषयं श्रमं, मोघं वन्ध्यं, न कुर्याद् यत्किञ्चिदधिकं तदर्थं वेतनं दद्यादित्यर्थः । 'प्रयासं मोघं कुर्यादि'ति पाठे तु स्पष्ट एवार्थः ।

तेनेति । उक्तेन भृतकस्य विधिना, सङ्घभृताः संहत्य भृतिग्रहणेन परकीयकर्मकारिणो भृतकाः, व्याख्याताः, तेष्वपि स एव विधिर्योज्य इत्यर्थः । **तेषामाधिरि**ति । सङ्घभृतानाम्, आधिः अधिष्ठानं बन्धो वा, सप्तरात्रम् आसीत । ततः तदनन्तरम्, अन्यं भृतकसङ्घम्, उपस्थापयेत् सन्निधापयेत् । कर्मनिष्पाकं च पूर्वसङ्घकृतकर्मपरिणामं च, उपस्थापयेद् अवगच्छेत् । **नचानिवेद्ये**ति । सङ्घः, भर्तुरनिवेद्य, कञ्चित् सङ्घावयवं, नच परिहरेत् नैव वर्जयेद् नचोपनयेद् वा । अपनयेदित्यपपाठो नूनम् । तस्य उक्तविधेः, अतिक्रमे, चतुर्विंशतिपणो दण्डः, सङ्घस्य । सङ्घेन परिहृतस्य अनिवेद्य भर्तुरितीहानुवर्तते भर्तारमनिवेद्य गतस्येत्यर्थः, अर्धदण्डः द्वादशपणो दण्डः । अथवा परिहारप्रयोजकापराधनिमित्तोऽयं दण्डो बोद्धव्यः । इति **भृतकाधिकार** इति । व्याख्यात इति शेषः ।

सम्भूयसमुत्थानामिति सूत्रम् । बहूनां सम्भूय क्वचित् कर्मणि प्रवृत्तिरिति सूत्रार्थः । तत्कर्तारश्च द्विप्रकाराः परकर्मकराः स्वकर्मकराश्चेति । तत्रोक्ताः पूर्वे । परास्त्विहाभिधीयन्ते ।

सङ्घभृताः सम्भूयसमुत्थातारो वा यथासम्भाषितं वेतनं समं वा विभजेरन् ।

कर्षकवैदेहका वा सस्यपण्यारम्भपर्यवसानान्तरे सन्नस्य यथाकृतस्य कर्मणः प्रत्यंशं दद्युः । पुरुषोपस्थाने समग्रमंशं दद्युः । संसिद्धे तूद्धृतपण्ये सन्नस्य तदानीमेव प्रत्यंशं दद्युः । सामान्या हि पथि सिद्धिश्चासिद्धिश्च ।

प्रक्रान्ते तु कर्मणि स्वस्थस्यापक्रामतो द्वादशपणो दण्डः । न च प्राकाम्यमपक्रमणे ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेद् , दद्यात् प्रत्यंशमभयं च । पुनस्स्तेये प्रवासनमन्यत्र गमने च । महापराधे तु दूष्यवदाचरेत् ।

सङ्घभृता इति । समुदेत्य कर्मकराः, सम्भूयसमुत्थातारो वा समुदेत्य वाणिज्यादिकारिणो वा, यथासम्भाषितं वेतनं, विभजेरन् , समं वा विभजेरन् , सम्भाषणाभावे ।

कर्षकवैदेहका वेति । कृषीवला वणिजश्च, सस्यपण्यारम्भपर्यवसानान्तरे सस्यानां पण्यानां च आरम्भपर्यवसानयोरन्तरे मध्यकाले, सन्नस्य व्याधितस्य सङ्घिनः, यथाकृतस्य कर्मणः प्रत्यंशं यावत् कृतं कर्म तावतः प्रविभागं, दद्युः । पुरुषोपस्थाने कर्मकरणाय व्याधितप्रतिपुरुषोपस्थितौ, समग्रं पूर्णम् , अंशं दद्युः । **संसिद्धे त्विति** । उद्धृतपण्ये संसिद्धे देशान्तरविक्रयणाय समारोपितपण्ये शकटादौ प्रस्थानसज्जे सति, सन्नस्य व्याधितस्य सम्भूयवाणिज्यकारिणामन्यतमस्य, तदानीमेव प्रत्यंशं तदीयं पण्यभागं, दद्युः । कुतः, **सामान्या हि पथि सिद्धिश्चासिद्धिश्चे**ति । मार्गे पण्यानां रक्षा चापायश्चानियतौ यतः ।

प्रक्रान्ते त्विति । कर्मणि सम्भूयसमुत्थानलक्षणे, प्रक्रान्ते सति, स्वस्थस्य, अपक्रामतः अपसरतः, द्वादशपणो दण्डः । दण्डं दत्त्वापि नापक्रमणे स्वाच्छन्द्यमित्याह — **नच प्राकाम्यमपक्रमण** इति ।

चोरं त्वभयपूर्वं कर्मणः प्रत्यंशेन ग्राहयेदिति । चोरान्तरैः सह चौर्यकर्मकरणविषये संभाषितप्रत्यंशं कमपि चोरं पूर्वदत्ताभयं कृत्वा तेनैव तत्सहचरांश्चोरान् ग्राहयेत् । **दद्यात् प्रत्यंशमभयं चे**ति । तस्य ग्राहितचोरस्य प्रतिश्रुतमभयं प्रत्यंशं च यथासंभाषितं दद्यात् । पुनःस्तेये दत्ताभयचोरेण

याजकाः स्वप्रचारद्रव्यवर्जं यथासम्भाषितं वेतनं समं विभजेरन्।

अग्निष्टोमादिषु च क्रतुषु दीक्षणादूर्ध्वं याजकः सन्नः पञ्चममंशं लभेत। सोमविक्रयादूर्ध्वं चतुर्थमंशम्। मध्यमोपसदः प्रवर्ग्योद्वासनादूर्ध्वं तृतीयमंशम्। मध्यादूर्ध्वमर्धमंशम्। सुत्ये प्रातस्सवनादूर्ध्वं पादोनमंशम्। माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत। नीता हि दक्षिणा भवन्ति। बृहस्पतिसवनवर्जं प्रतिसवनं हि दक्षिणा दीयन्ते। तेनाहर्गणदक्षिणा व्याख्याताः।

सन्नानामा दशाहोरात्राच्छेषभृताः कर्म कुर्युः। अन्ये वा स्वप्रत्ययाः।

पुनश्चौर्ये कृते, अन्यत्र गमने च देशान्तरं गत्वा चौर्यकरणे च, प्रवासनं कार्यमिति शेषः। महापराधे दूष्यवदाचरेत्, महापराधं तं दूष्यवदुपांशु हन्यात्।

याजका इति। ऋत्विजः, स्वप्रचारद्रव्यवर्जं स्वस्वव्यापारप्रातिस्विकदक्षिणाद्रव्यमपहाय, यथासंभाषितं वेतनं सामुदायिक, समं तुल्यं विभजेरन्।

ऋत्विजोऽग्निष्टोमादिक्रतुकर्मारम्भानन्तरं व्याधितस्यावान्तरंतत्कर्मानुष्ठानावधिभेदेनांशभेदमाह — **अग्निष्टोमादिषु च क्रतुष्वित्यादि।** तत्र याजको दीक्षणाद् दीक्षाकर्मणः, ऊर्ध्वं सन्नः, स्वांशस्य पञ्चममंशं लभेत। सोमविक्रयाद् ऊर्ध्वं, चतुर्थमंशं लभेत। मध्यमोपसदः प्रवर्ग्योद्वासनात् मध्योपसत्सम्बन्धिनः प्रवर्ग्योत्सादनकर्मण ऊर्ध्वं, तृतीयमंशं लभेत। प्रवर्ग्योपासनादिति मातृकयोः पाठः। मध्यात् मध्योपसदनकर्मण ऊर्ध्वम्, अर्धमंशं लभेत। द्वितीयमंशमिति पाठे द्वितीयांशोऽर्धमेव। सुत्ये सुत्याहे, प्रातस्सवनादूर्ध्वं पादोनमंशं लभेत। माध्यन्दिनात् सवनादूर्ध्वं समग्रमंशं लभेत। **नीता हि दक्षिणा भवन्तीति।** माध्यन्दिनसवनकर्मणि निर्वृत्ते हि दक्षिणाः सर्वाः प्राप्ता भवन्ति। बृहस्पतिसवनवर्जं बृहस्पतिसवनमपहाय, प्रतिसवनं सवने सवने, दक्षिणा दीयन्ते हि। **तेनाहर्गणदक्षिणा व्याख्याता** इति। उक्तरीत्या याजककार्येष्वहीनयज्ञेष्वपि दक्षिणानयनानुरोधेन याजकांशाः कल्प्याः।

सन्नानामिति। व्याधितानां भृतकानां कर्म, आ दशाहोरात्रात्, शेषभृताः अवशिष्टा भृतकाः, कुर्युः। अन्ये वा स्वप्रत्ययाः स्वाभिमताः, कुर्युः।

कर्मण्यसमाप्ते तु यजमानः सीदेत्, ऋत्विजः कर्म समापय्य दक्षिणां हरेयुः ।

असमाप्ते तु कर्मणि याज्यं याजकं वा त्यजतः पूर्वः साहसदण्डः ।

अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
सुरापो वृषलीभर्ता ब्रह्महा गुरुतल्पगः ॥
असत्प्रतिग्रहे युक्तः स्तेनः कुत्सितयाजकः ।
अदोषस्त्यक्तुमन्योन्यं कर्मसङ्करनिश्चयात् ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे चतुर्दशोऽध्यायः
दासकर्मकरकल्पे भृतकाधिकारः सम्भूयसमुत्थानम्,
आदित एकसप्ततितमः ॥

कर्मणीति । यज्ञकर्मणि, असमाप्ते तु, यजमानः सीदेद् व्याधितो भवेच्चेत्, ऋत्विजः, कर्म समापय्य, दक्षिणां तदर्थां हरेयुः ।

असमाप्ते त्विति । कर्मणि असमाप्ते, याज्यं यजमानं त्यजतः याजकस्य, याजकं त्यजतः याज्यस्य वा, पूर्वः साहसदण्डः ।

विधिशेषं श्लोकाभ्यां वदन्नध्यायमुपसंहरति -- **अनाहिताग्नि**रिति । शतं गावो यस्य स शतगुः । शतगुरनाहिताग्निः शतगवधनः सन्नप्यकृताग्न्याधानः, सहस्रगुरयज्वा च सहस्रगवधनः सन्नप्यकृतयज्ञः, सुरापः मद्यपः, वृषलीभर्ता, ब्रह्महा, गुरुतल्पगः गुरुपत्नीगामी, असत्प्रतिग्रहे युक्तः असतः पापिष्ठजनात् प्रतिषिद्धद्रव्यस्य वा प्रतिग्रहे युक्तः आसक्तः, स्तेनः, कुत्सितयाजकः निन्दितान् यो याजयति स च, त्यक्तुमदोषः त्यागे दोषानुत्पादकः संसर्गानर्ह इत्यर्थः । कस्माद्, अन्योन्यं कर्मसङ्करनिश्चयात् कर्मदोषनिश्चयात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे चतुर्दशोऽध्यायः
दासकर्मकरकल्पे भृतकाधिकारः सम्भूयसमुत्थानम्,
आदित एकसप्ततितमः ॥

६७. प्रक. विक्रीतक्रीतानुशयः।

विक्रीय पण्यमप्रयच्छतो द्वादशपणो दण्डः अन्यत्र दोषोपनिपाताविषह्येभ्यः।

पण्यदोषो दोषः। राजचोराग्न्युदकबाध उपनिपातः। बहुगुणहीनमार्तकृतं वाविषह्यम्।

वैदेहकानामेकरात्रमनुशयः। कर्षकाणां त्रिरात्रम्। गोरक्षकाणां पञ्चरात्रम्। व्यामिश्राणाम् उत्तमानां च वर्णानां वृत्तिविक्रये सप्तरात्रम्।

आतिपातिकानां पण्यानामन्यत्राविक्रेयमित्यविरोधेनानुशयो देयः। तस्यातिक्रमे चतुर्विंशतिपणो दण्डः, पण्यदशभागो वा।

क्रीत्वा पण्यमप्रतिगृह्णतो द्वादशपणो दण्डः, अन्यत्र दोषोपनिपाताविषह्येभ्यः। समानश्चानुशयः विक्रेतुरनुशयेन।

विक्रीतक्रीतानुशय इति सूत्रम्। मूल्यग्रहणेन दत्तं विक्रीतं मूल्यदानेन गृहीतं क्रीतं तयोरनुशयो विसंवादोऽभिधीयत इति सूत्रार्थः। क्रयविक्रयविधिरध्यक्षप्रचारे प्रतिपादितः। तद्विषयोऽनुशयोऽनुशयदण्डश्चानुक्ताविहाभिधीयेते।

विक्रीयेत्यादि। सुगमम्।

दोषादीन् व्याचष्टे — **पण्यदोषो दोष** इत्यादि। बहुगुणहीनं बहुगुणां मूल्यहानिं प्राप्तम्। आर्तकृतम् अस्वस्थमानसकृतम्। शेषं सुगमम्।

अनुशयकालेयत्तामाह — **वैदेहकाना**मित्यादि। वृत्तिविक्रये स्वजीविकाहेतुभूतभूमिविक्रये। शेषं सुबोधम्।

आतिपातिकानामिति। कालपरिवासासहानां सद्योविक्रेयाणां, पण्यानां पुष्पक्षीरादीनाम्, अन्यत्राविक्रेयमिति परिवासदोषात् तथाविधं पण्यमन्यत्र **विक्रेतुमर्हं न** भवेदित्येतत् पर्यालोच्य, अविरोधेन तत्तत्पण्यरक्षानुकूल्येन, अनुशयो देयः। **तस्यातिक्रम** इत्यादि सुबोधम्।

क्रीतानुशयमाह — **क्रीत्वा पण्या**मित्यादि। सुबोधम्। विक्रेत्रनुशयं क्रेतुरतिदिशति — **समानश्चे**त्यादि।

विवाहानां तु त्रयाणां पूर्वेषां वर्णानां पाणिग्रहणासिद्धमुपावर्तनम् । शूद्राणां च प्रकर्मणः । वृत्तपाणिग्रहणयोरपि दोषमौपशायिकं दृष्ट्वा सिद्धमुपावर्तनम् । न त्वेवाभिप्रजातयोः ।

कन्यादोषमौपशायिकमनाख्याय प्रयच्छतः षण्णवतिर्दण्डः शुल्कस्त्रीधनप्रतिदानं च ।

वरयितुर्वा वरदोषमनाख्याय विन्दतो द्विगुणः शुल्कस्त्रीधननाशश्च ।

द्विपदचतुष्पदानां तु कुष्ठव्याधिताशुचीनामुत्साहस्वास्थ्यशुचीनामाख्याने द्वादशपणो दण्डः ।

आ त्रिपक्षादिति चतुष्पदानामुपावर्तनम्, आ संवत्सरादिति मनुष्याणाम् । तावता हि कालेन शक्यं शौचाशौचे ज्ञातुमिति ।

विवाहानां त्विति । त्रयाणां पूर्वेषां वर्णानां ब्राह्मणक्षत्रियवैश्यानां, विवाहानां विवाहविषये, पाणिग्रहणासिद्धमुपावर्तनं पाणिग्रहणेनावरुद्धं पाणिग्रहणावधिकं कन्याप्रत्याहरणं भवति । पाणिग्रहणात् सिद्धमिति पाठे पाणिग्रहणमवधीकृत्येति ल्यब्लोपे पञ्चमी । शूद्राणां च, प्रकर्मणः योनिक्षतिमवधीकृत्य, उपावर्तनं भवति । **वृत्तपाणिग्रहणयोरपी**ति । तथाभूतयोरपि स्त्रीपुंसयोः, दोषमौपशायिकम् उपशायिकासंबद्धं दोषं योनिक्षतिक्लैब्यादिरूपं दृष्ट्वा साक्षात्कृत्य, सिद्धमुपावर्तनम् । **न त्वेवाभिप्रजातयोरि**ति । जनितप्रजयोरुपावर्तनं नास्त्येव ।

कन्यादोषमित्यादि । षण्णवतिः षण्णवतिपणः । शुल्कस्त्रीधनप्रतिदानं च शुल्कस्त्रीधनयोर्गृहीतयोः प्रत्यर्पणं च ।

वरयितुर्वेत्यादि । विन्दतः परिणयतः ।

द्विपदचतुष्पदानां त्विति । तेषां, कुष्ठव्याधिताशुचीनाम्, उत्साहस्वास्थ्यशुचीनामाख्याने उत्साहस्वस्थत्वशुचित्वकथने, द्वादशपणो दण्डः ।

आ त्रिपक्षादितीति । पक्षत्रयावधिकमित्येवं चतुष्पदानामुपावर्तनम् । आ संवत्सरादिति संवत्सरावधिकमित्येवं, मनुष्याणामुपावर्तनम् । **तावता ही**त्यादि । शौचाशौचे, दुष्टत्वमदुष्टत्वं च ।

दाता प्रतिग्रहीता च स्यातां नोपहतौ यथा ।
दाने क्रये वानुशयं तथा कुर्युः सभासदः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
पञ्चदशोऽध्यायः विक्रीतक्रीतानुशयः,
आदितो द्विसप्ततितमः ॥

अध्यायप्रान्ते श्लोकमाह — दातेत्यादि । कुर्युः व्यवस्थापयेयुः । सभासदः धर्मस्थाः । शेषं सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
पञ्चदशोऽध्यायः विक्रीतक्रीतानुशयः,
आदितो द्विसप्ततितमः ॥

६८—७०. प्रक. **दत्तस्यानपाकर्म, अस्वामिविक्रयः, स्वस्वामिसम्बन्धः।**

दत्तस्याप्रदानमृणादानेन व्याख्यातम् ।

दत्तमव्यवहार्यमेकत्रानुशये वर्तेत । सर्वस्वं पुत्रदारम् आत्मानं प्रदायानुशयिनः प्रयच्छेत् । धर्मदानमसाधुषु, कर्मसु चौपघातिकेषु वा । अर्थदानमनुपकारिषु अपकारिषु वा । कामदानमनर्हेषु च । यथा च दाता प्रतिग्रहीता च नोपहतौ स्यातां, तथानुशयं कुशलाः कल्पयेयुः ।

दण्डभयादाक्रोशभयादनर्थभयाद् वा भयदानं प्रतिगृह्णतः स्तेयदण्डः प्रयच्छतश्च । रोषदानं परहिंसायाम् । राज्ञामुपरि दर्पदानं च । तत्रोत्तमो दण्डः ।

दत्तस्यानपाकर्मेति सूत्रम् । 'तुभ्यमहं संप्रददे' इति प्रतिज्ञादिपूर्वं वाचा दत्तस्य अप्रदानमिति सूत्रार्थः । क्रयविक्रयविषयस्तावदनुशय उक्तः, धर्मादिदानविषयस्त्वधुनाभिधीयते ।

दत्तस्याप्रदानामिति । तद्, ऋणादानेन व्याख्यातम् ऋणादानवद् द्रष्टव्यम् । दत्तमनपाकृतम् ऋणमिव साक्ष्यादिभिर्विभाव्य ग्राह्यमित्यर्थः ।

अनुशयविषयं दत्तमाह— **दत्तमव्यवहार्य**मित्यादि । वाग्दत्तं व्यवहारायोग्यं चेद्, एकत्र अनुशये वर्तेत अनुशये एव केवले वर्तेत । न त्वनुशयात् कदापि मुच्येतेत्यर्थः । सर्वस्वं पुत्रदारम् आत्मानं प्रदाय, अनुशयिनः, प्रयच्छेत् पुनर्दद्यात् सर्वस्वादिकम् । **धर्मदानमसाधुष्वि**ति । अनुशये वर्तेतेत्यनुवर्तते । साधव इति बुद्ध्या धर्मदानं तेषु प्रतिज्ञातम् असाधुत्वज्ञानानन्तरमनुशये वर्तेत । **कर्मसु चौपघातिकेषु** वेति । गोरक्षादिप्रशस्तकर्मार्थं धार्मिकत्वबुद्ध्या चोरपारदारिकादिषु कृतं धर्मदानम्, अनुशये वर्तेत। **अर्थदानमनुपकारिष्वपकारिषु** वेति, उपकारित्वबुद्ध्यानुपकारिषु अपकारिषु वा कृतमर्थदानम्, अनुशये वर्तेत । **कामदानमनर्हेषु** चेति, कामनिमित्तं दानमनर्हेष्वर्हत्वबुद्ध्या कृतम् अनुशये वर्तेत । **यथा** चेत्यादि सुगमम् ।

दण्डभयादिति । ताडनभयाद्, आक्रोशभयात् निन्दनभयाद्, अनर्थभयाद् वा रोगोन्मादाद्युत्पत्तिभयाद् वा, क्रियमाणं भयदानं, प्रतिगृह्णतः कृत्याभिचारादिवृत्तेः, प्रयच्छतश्च भीरोः, स्तेयदण्डः । **रोषदानं परहिंसाया**मिति । कोपदानं परमारणार्थं, प्रतिगृह्णतः प्रयच्छतश्च स्तेयदण्डः इति संबध्यते । **राज्ञामुपरि दर्पदानं** चेति, नृत्तगीतादिकलाकुशलेभ्यो राजभिः

प्रातिभाव्यं दण्डशुल्कशेषमाक्षिकं सौरिकं कामदानं च नाकामः पुत्रो दायादो वा रिक्थहरो दद्यात् । इति दत्तस्यानपाकर्म ।

अस्वामिविक्रयस्तु । नष्टापहृतमासाद्य स्वामी धर्मस्थेन ग्राहयेत् । देशकालातिपत्तौ वा स्वयं गृहीत्वोपहरेत् । धर्मस्थश्च स्वामिनमनुयुञ्जीत — कुतस्ते लब्धमिति । स चेदाचारक्रमं दर्शयेत, न विक्रेतारं, तस्य द्रव्यस्यातिसर्गेण मुच्येत । विक्रेता चेद् दृश्येत, मूल्यं स्तेयदण्डं च । स चेदपसारमधिगच्छेदपसरेदापसारक्षयादिति । क्षये मूल्यं स्तेयदण्डं च दद्यात् ।

कृतात् पारितोषिकदानादधिकतरं पारितोषिकदानं च, कश्चित् कुर्याच्चेदिति शेषः । तत्र विषये उत्तमः उत्तमसाहसो दण्डः ।

प्रातिभाव्यमित्यादि । प्रातिभाव्यं वृथादानोपलक्षणं तद्, दण्डशुल्कशेषं दण्डशेषं शुल्कशेषं च, आक्षिकम् अक्षदेवनकृतमृणं, सौरिकं सुरापानकृतमृणं, कामदानं च नटनर्तकादिदत्तं च, रिक्थहरः पुत्रो दायादो वा, अकामो न दद्यात् । **इति दत्तस्यानपाकर्मेति** । व्याख्यातमिति शेषः ।

अस्वामिविक्रय इति सूत्रम् । अस्वामिकृतो विक्रयोऽस्वामिविक्रयः । सः तद्दण्डश्चाभिधीयत इति सूत्रार्थः ।

अस्वामिविक्रयस्त्विति । प्रतिपाद्यत इति शेषः । **नष्टापहृतमिति** । तद् द्रव्यम् आसाद्य कस्यचिद् वशे विद्यमानमुपलभ्य, स्वामी, धर्मस्थेन ग्राहयेद् अर्थाद् यस्य वशे द्रव्यं विद्यते तम् । धर्मस्थश्च, स्वामिनं सम्प्रति तद्द्रव्योपनेतारम्, अनुयुञ्जीत पृच्छेत्— कुतः ते त्वया लब्धमिति । स पृष्टो द्रव्यहस्तः, आचारक्रमं द्रव्यागमपरिपाटीं, दर्शयेत विभावयेच्चेत्, विक्रेतारं न दर्शयेत चेत्, तस्य द्रव्यस्य अतिसर्गेण स्वामिहस्तेऽर्पणेन, मुच्येत, न तु तस्य स्तेयदण्डः । **विक्रेतेति** । स चेद् दृश्येत, मूल्यं क्रेतुर्दद्यात्, स्तेयदण्डं च राज्ञे दद्यात् । **स चेदिति** । स विक्रेता अपसारमधिगच्छेच्चेत् अपराधिपदादात्मापसरणहेतुं विभावयेच्चेद् आत्मनो विक्रेतारमन्यं प्रदर्शयेच्चेदित्यर्थः, अपसरेद् अपक्रामेद् दण्डं विना । **आपसारक्षयादितीति** । अयमुत्तरोत्तरापसाराधिगमेनापसरणक्रमोऽपसारक्षयावधिकः सम्भवतीत्यर्थः । क्षये चरमोपलब्धस्य विक्रेतुरपसारानधिगमे सति, मूल्यं स्तेयदण्डं च दद्याद् अर्थात् स एव ।

नाष्टिकं च स्वकरणं कृत्वा नष्टप्रत्याहृतं लभेत । स्वकरणाभावे पञ्चबन्धो दण्डः । तच्च द्रव्यं राजधर्म्यं स्यात् ।

नष्टापहृतमनिवेद्योत्कर्षतः स्वामिनः पूर्वः साहसदण्डः ।

शुल्कस्थाने नष्टापहृतोत्पन्नं तिष्ठेत् । त्रिपक्षादूर्ध्वमनभिसारं राजा हरेत्, स्वामी वा स्वकरणेन ।

पञ्चपणिकं द्विपदरूपस्य निष्क्रयं दद्यात् । चतुष्पणिकमेकखुरस्य । द्विपणिकं गोमहिषस्य । पादिकं क्षुद्रपशूनाम् । रत्नसारफल्गुकुप्यानां पञ्चकं शतं दद्यात् ।

परचक्राटवीहृतं तु प्रत्यानीय राजा यथास्वं प्रयच्छेत् । चोरहृतमविद्यमानं स्वद्रव्येभ्यः प्रयच्छेत् प्रत्यानेतुमशक्तो वा । स्वयं ग्राहेणाहृतं प्रत्यानीय तन्निष्क्रयं वा प्रयच्छेत् ।

नाष्टिकं चेति । नाष्टिकं नष्टवस्तुविषयं, स्वकरणं स्वत्वसाधकं साक्षिलेख्यादि, कृत्वा दर्शयित्वा, नष्टप्रत्याहृतं, लभेत । स्वकरणाभावे, पञ्चबन्धः तद्द्रव्यमूल्यपञ्चभागो दण्डः । तच्च द्रव्यं राजधर्म्यं राज्ञो न्यायप्राप्तं स्यात् ।

नष्टापहृतमिति । तद् द्रव्यम्, अनिवेद्य स्वयं गृह्णतः, स्वामिनः पूर्वः साहसदण्डः ।

शुल्कस्थान इति । तस्मिन्, नष्टापहृतोत्पन्नं, तिष्ठेत् स्थापितं भवेत् । त्रिपक्षादूर्ध्वम्, अनभिसारम् अभिसारोऽनुगामी तद्रहितं, राजा हरेत् । स्वामी वा स्वकरणेन स्वत्वविभावनेन हरेत् ।

नष्टापहृतोत्पन्नस्य द्विपदादेर्मोचननिष्क्रयमाह — **पञ्चपणिकमिति** । द्विपदरूपस्य द्विपदो दासीदासादिः तद्व्यक्तेरेकस्याः, पञ्चपणिकं निष्क्रयं दद्यात् । तावन्निष्क्रयदानेन द्विपदरूपं मोचयेत् । चतुष्पणिकम्, एकखुरस्य अश्वखरोष्ट्रादेः । द्विपणिकं गोमहिषस्य । पादिकं क्षुद्रपशूनाम् । रत्नसारफल्गुकुप्यानां पञ्चकं शतं शतस्य पञ्चभागं निष्क्रयं दद्यात् ।

परचक्राटवीहृतं त्विति । परचक्रेण आटविकेन च हृतं द्विपदचतुष्पदादिकं, प्रत्यानीय राजा यथास्वं यथायथं प्रयच्छेत् । चोरहृतमविद्यमानं लुप्तं द्रव्यं, स्वद्रव्येभ्यः तज्जातीयेभ्यः, प्रयच्छेत् स्वामिने, राजा प्रत्यानेतुं चोरसकाशात् प्रत्याहर्तुम्, अशक्तो वा अशक्तश्चेत् । स्वयं ग्राहेण आत्मनिर्ब-

परविषयाद् वा विक्रमेणानीतं यथाप्रदिष्टं राज्ञा भुञ्जीतान्यत्रार्यप्राणद्रव्येभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्च । इत्यस्वामिविक्रयः ।

स्वस्वामिसम्बन्धस्तु । भोगानुवृत्तिरुच्छिन्नदेशानां यथास्वं द्रव्याणाम् ।

यत् स्वं द्रव्यमन्यैर्भुज्यमानं दश वर्षाण्युपेक्षेत, हीयेतास्य अन्यत्र बालवृद्धव्याधितव्यसनिप्रोषितदेशत्यागराज्यविभ्रमेभ्यः ।

विंशतिवर्षोपेक्षितमनुवसितं वास्तु नानुयुञ्जीत ।

ज्ञातयः श्रोत्रियाः पाषण्डा वा राज्ञामसन्निधौ परवास्तुषु विवसन्तो न भोगेन हरेयुः; उपनिधिमाधिं निधिं निक्षेपं स्त्रियं सीमानं राजश्रोत्रियद्रव्याणि च ।

ऽधेन स्तेनग्रहणविषयेण अथवा स्तेनग्रहणाधिकृतेन, आहृतं प्रत्यानीय प्रयच्छेत् । तन्निष्क्रयं वा मुष्टद्रव्यमूल्यं वा प्रयच्छेत् , पूर्वोक्तासम्भवे ।

परविषयाद्वेति । शत्रुदेशाद् , विक्रमेण आनीतं सैनिकहृतं धनं, राज्ञा, यथाप्रदिष्टं यथाज्ञप्तं, भुञ्जीत । **अन्यत्रार्यप्राणद्रव्येभ्यो देवब्राह्मणतपस्विद्रव्येभ्यश्चे**ति । आर्यजीवितानां द्रव्याणि देवादीनां द्रव्याणि च तेभ्य एव पुनर्दापयेदित्यर्थः । इत्यस्वामिविक्रयः ।

स्वस्वामिसम्बन्ध इति सूत्रम् । स्वस्वामिनोः संबन्धः न्यायाधिगमलक्षणोऽभिधीयत इति सूत्रार्थः ।

स्वस्वामिसंबन्धस्त्विति । अधिक्रियत इति शेषः । **भोगानुवृत्ति**रिति । उच्छिन्नदेशानाम् उच्छिन्नसाक्षिकाणां, द्रव्याणां, यथास्वं यथायथं, भोगानुवृत्तिः अविच्छिन्नो भोगः, स्वत्वे प्रमाणं भवतीति वाक्यशेषः ।

यदिति । यत् स्वं स्वीयं द्रव्यम् अन्यैर्भुज्यमानं, दश वर्षाणि उपेक्षेत, हीयेतास्य उपेक्षमाणस्य तद् द्रव्यं हीयेत । **अन्यत्र बाले**त्यादि । बालवृद्धव्याधितव्यसनिप्रोषितानां द्रव्यम् उपेक्षमाणानां न हीयेत, अबालादीनामपि द्रव्यं देशत्यागे राज्यविभ्रमे चोपेक्षमाणानां न हीयेत ।

विंशतिवर्षोपेक्षितमिति । तथाविधम् , अनुवसितम् अविच्छिन्नाध्युषितं, वास्तु गृहं, नानुयुञ्जीत न प्रार्थयेत । इह वसितपदे संप्रसारणाकरणमार्षम् ।

तत्रापवादमाह --- **ज्ञातय** इत्यादि । अतिरोहितार्थम् ।

आश्रमिणः पाषण्डा वा महत्यवकाशे परस्परमबाधमाना वसेयुः । अल्पां बाधां सहेरन् । पूर्वागतो वा वासपर्यायं दद्यात् । अप्रदाता निरस्येत ।

वानप्रस्थयतिब्रह्मचारिणामाचार्यशिष्यधर्मभ्रातृसमानतीर्थ्या रिक्थभाजः क्रमेण ।

विवादपदेषु चैषां यावन्तः पणा दण्डाः तावती रात्रीः क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि राज्ञश्चरेयुः । अहिरण्यसुवर्णाः पाषण्डाः साधवः । ते यथास्वमुपवासव्रतैराराधयेयुः अन्यत्र पारुष्यस्तेयसाहससङ्ग्रहणेभ्यः । तेषु यथोक्ता दण्डाः कार्याः ।

आश्रमिण इत्यादि । सुबोधम् । **अल्पां बाधां सहेरन्निति** । अमहति अवकाशे परस्परबाधमल्पं जायमानं क्षमेरन् । पूर्वागतो वा, वासपर्यायं वासवारं, दद्यात् नवागताय । अप्रदाता पूर्वागतः, निरस्येत बहिष्क्रियेत ।

वानप्रस्थयतिब्रह्मचारिणामित्यादि । तत्र धर्मभ्राता सखा, समानतीर्थ्यः समानगुरुकुलवासी । क्रमेण आचार्याभावे शिष्यः शिष्याभावे धर्मभ्रातेत्यादिक्रमेण । शेषं प्रतीतम् ।

विवादपदेषु चैषामिति । व्युत्क्रमागतानामाचार्यादीनां, विवादपदेषु रिक्थविषयेषु, यावन्तः पणाः दण्डाः पराजितानां शास्त्रोक्ताः, तावतीः तत्समानसंख्याः, रात्रीः, क्षपणाभिषेकाग्निकार्यमहाकृच्छ्रवर्धनानि क्षपणमुपवासः अभिषेकः स्नानम् अग्निकार्यं होमः महाकृच्छ्रं चान्द्रायणप्राजापत्यादिकं प्रशस्तव्रतं तैर्वर्धनानि श्रेयोयोजनानि, राज्ञश्चरेयुः राजार्थे कुर्युः, अर्थात् पराजिता आचार्यादयः । वर्तनानीति पाठे क्षपणादीनां महाकृच्छ्रान्तानां वर्तनानि अनुष्ठानानि राजार्थे कुर्युरित्यर्थः । **अहिरण्यसुवर्णा** इति । हिरण्यसुवर्णहीनाः, पाषण्डाः, साधवः धर्मशीलाः । ते कथञ्चिद् विवादपदेषु पराजयदण्डं प्राप्ता इत्यर्थं, यथास्वम् उपवासव्रतैः, आराधयेयुः धर्ममुपासीरन् राजश्रेयोर्थे । तत्रापवादमाह — **अन्यत्र पारुष्यस्तेयसाहससंग्रहणेभ्य** इति । वक्ष्यमाणवाक्पारुष्यदण्डपारुष्यस्तेयादिविवादव्यतिरेकेण । के तर्हि तेषां पारुष्यादिषु दण्डास्तत्राह — **तेष्विति** । तेषु विषये, **यथोक्ताः** पारुष्यादिप्रकरणोक्ताः, **दण्डाः**, कार्याः ।

प्रव्रज्यासु वृथाचारान् राजा दण्डेन वारयेत् ।
धर्मो ह्यधर्मोपहतः शास्तारं हन्त्युपेक्षितः ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे षोडशोऽध्यायः
दत्तस्यानपाकर्म अस्वामिविक्रयः स्वस्वामिसम्बन्धः,
आदितस्त्रिसप्ततितमः ॥

अध्यायान्ते श्लोकमाह—प्रव्रज्यास्वित्यादि । प्रव्रज्यासु वृथाचारान् चतुर्थाश्रमेषु मिथ्याचारान् । शेषं सुगमम् ।

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे षोडशोऽध्यायः
दत्तस्यानपाकर्म अस्वामिविक्रयः स्वस्वामिसंबन्धः,
आदितस्त्रिसप्ततितमः ॥

७१. प्रक. साहसम्।

साहसमन्वयवत्प्रसभकर्म । निरन्वये स्तेयमपव्ययने च ।

रत्नसारफल्गुकुप्यानां साहसे मूल्यसमो दण्ड इति मानवाः । मूल्यद्विगुण इत्यौशनसाः । यथापराध इति कौटल्यः ।

पुष्पफलशाकमूलकन्दपक्वान्नचर्मवेणुमृद्भाण्डादीनां क्षुद्रकद्रव्याणां द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः ।

कालायसकाष्ठरज्जुद्रव्यक्षुद्रपशुपटादीनां स्थूलकद्रव्याणां चतुर्विंशतिपणावरोऽष्टचत्वारिंशत्पणपरो दण्डः। ताम्रवृत्तकंसकाचदन्तभाण्डादीनां स्थूलकद्रव्याणां अष्टचत्वारिंशत्पणावरः षण्णवतिपरः पूर्वः

साहसमिति सूत्रम् । बलात् क्रियमाणं परस्वहरणादि साहसम् । यदाह नारदः—

"सहसा क्रियते कर्म यत् किञ्चिद् बलदर्पितैः ।
तत् साहसमिति प्रोक्तं सहो बलमिहोच्यते ॥" इति ।

तदुच्यत इति सूत्रार्थः । तद् गताध्याये प्रस्तुतम् । तस्य स्वरूपं दण्डश्चात्राभिधीयते ।

साहसमिति । अन्वयवत्प्रसभकर्म अन्वयः अनेकसाधारण्यं तद्वतोऽनेकसाधारणस्य द्रव्यस्य प्रसभकर्म एकेनानेकान्तर्गतेन बलादपहरणं, साहसम् । निरन्वये असाधारणद्रव्ये परकीयद्रव्य इति यावत् , स्तेयं स्तेयव्यपदेश्यम् अर्थात् प्रसभहरणं प्रच्छन्नहरणं वा । अपव्ययने च परकीयं गृहीत्वा न गृहीतमित्यपलापे च विषये, स्तेयं भवति ।

रत्नसारफल्गुकुप्यानामित्यादि । मूल्यसमः रत्नादितत्तन्मूल्यतुल्यः । यथापराधः अपराधानुरूपः । शेषं सुगमम् ।

पुष्पफलेत्यादि । पुष्पादिषट्कं प्रतीतं चर्मभाण्डं वेणुभाण्डं मृद्भाण्डं चेति त्रिकम् एतदादीनां क्षुद्रकद्रव्याणां, साहसे, द्वादशपणावरश्चतुर्विंशतिपणपरो दण्डः द्वादशपणोऽधमदण्डः चतुर्विंशतिपण उत्तमदण्डः ।

स्थूलकद्रव्याणां दण्डमाह—**कालायसेत्यादि** । **ताम्रवृत्तेत्यादि** । ताम्रभाण्डवृत्तभाण्डकंसभाण्डकाचभाण्डगजदन्तभाण्डादीनां स्थूलकद्रव्याणां, साहसे, अष्टचत्वारिंशत्पणावरः षण्णवतिपरः, दण्ड इति वर्तते, तत्र षण्ण-

साहसदण्डः । महापशुमनुष्यक्षेत्रगृहहिरण्यसुवर्णसूक्ष्मवस्त्रादीनां स्थूलकद्रव्याणां द्विशतावरः पञ्चशतपरः मध्यमः साहसदण्डः ।

स्त्रियं पुरुषं वाभिषह्य बध्नतो बन्धयतो बन्धं वा मोक्षयतः पञ्चशतावरः सहस्रपर उत्तमः साहसदण्ड इत्याचार्याः ।

यः साहसं प्रतिपत्तेति कारयति स द्विगुणं दद्यात् । यावद्धिरण्यमुपयोक्ष्यते तावद् दास्यामीति स चतुर्गुणं दण्डं दद्यात् । य एतावद्धिरण्यं दास्यामीति प्रमाणमुद्दिश्य कारयति स यथोक्तं हिरण्यं दण्डं च दद्याद् इति बार्हस्पत्याः ।

स चेत् कोपं मदं मोहं वापदिशेत्, यथोक्तवद्दण्डमेनं कुर्यादिति कौटल्यः ।

दण्डकर्मसु सर्वेषु रूपमष्टपणं शतम् ।
शतावरेषु व्याजीं च विद्यात् पञ्चपणं शतम् ॥

वतिपणदण्डः, पूर्वः साहसदण्डः पूर्वसाहसाख्यः । महापशुमनुष्येत्यादि । महापशुमनुष्यक्षेत्रप्रभृतीनां स्थूलकद्रव्याणां, साहसे, द्विशतावरः द्विशतपणाधमः पञ्चशतपरः पञ्चशतपणोत्तमः दण्डः । स च पञ्चशतपणः मध्यमः साहसदण्डः ।

स्त्रियमित्यादि । तां, पुरुषं वा, अभिषह्य प्रसह्य बध्नतः, बन्धयतः, बन्धं वा मोक्षयतः, पञ्चशतावरः पञ्चशतपणाधमः सहस्रपरः सहस्रपणोत्तमः दण्डः । स च उत्तमः साहसदण्डो नाम्ना । इत्याचार्याः मन्यन्त इति शेषः ।

य इति । यः, साहसं, प्रतिपत्तेति 'अहमभ्युपगन्ते'त्युक्त्वा, कारयति, सः द्विगुणं साहसार्थद्विगुणं दण्डं दद्यात् । 'यावत् हिरण्यमुपयोक्ष्यते साहसकरणार्थे तावद् दास्यामि' इत्युक्त्वा यः साहसं कारयति, सः चतुर्गुणं साहसार्थचतुर्गुणं, दण्डं दद्यात् । **य** इति । 'एतावद् हिरण्यं दास्यामि' इति प्रमाणं साहसार्थदेयद्रव्येयत्ताम्, उद्दिश्य निर्दिश्य, कारयति, स यथोक्तं हिरण्यं, दण्डं च दद्यात् । इति बार्हस्पत्याः ।

स्वमतमाह — **स** इति । सः कारयिता, कोपं, मदं चित्तविभ्रमं, मोहम् अज्ञानं वा, अपदिशेच्चेत् कारणायां हेतुं कथयेच्चेद्, एनं कारयितारं, यथोक्तवद्दण्डं कर्तृसमानदण्डं कुर्यात् । इति कौटल्यः ।

अध्यायप्रान्ते श्लोकावाह — **दण्डकर्मस्वि**त्यादि । सर्वेषु दण्डकर्मसु दण्डविधिषु, रूपं तत्संज्ञं दण्डादुपरि नियतग्राह्यं द्रव्यं, विद्यात् जानीयात् ।

प्रजानां दोषबाहुल्याद् राज्ञां वा भावदोषतः।
रूपव्याज्यावधर्मिष्ठे धर्म्या तु प्रकृतिः स्मृता ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
सप्तदशोऽध्यायः साहसम्,
आदितश्चतुस्सप्ततितमः ॥

रूपं कियद्, अष्टपणं शते दण्डपणशतेऽष्टपणात्मकम्। शतावरेषु शतन्यूनेषु दण्डकर्मसु, व्याजी तत्संज्ञं दण्डद्रव्यादुपरि नियतग्राह्यं द्रव्यं, विद्यात्। व्याजीं किमात्मिकां, पञ्चपणं शते शते पञ्चपणात्मिकाम्। शतमिति मान्त-पाठश्चिन्त्यः ॥

प्रजानामिति। तासां, दोषबाहुल्यान्निमित्ताद्, राज्ञां वा भावदोषतः तासामदुष्टत्वेऽपि राज्ञां धनलिप्सालक्षणचित्तवृत्तिदोषान्निमित्ताद् वा, कल्प्य-माने इति शेषः, रूपव्याज्यौ अधर्मिष्ठे धर्मिष्ठे न भवतः। अतस्तदकल्पनानुकूलं राजभिः प्रजाभिश्चाचरितव्यमित्यभिप्रायः। अत एवाह—**धर्म्या तु प्रकृतिः स्मृतेति**। यथाविहितो दण्ड एव तु धर्म्यः स्मृतिषु कथितः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
सप्तदशोऽध्यायः साहसम्,
आदितश्चतुःसप्ततितमः ॥

७२. प्रक. वाक्पारुष्यम्।

वाक्पारुष्यमुपवादः कुत्सनमभिभर्त्सनमिति ।

शरीरप्रकृतिश्रुतवृत्तिजनपदानां शरीरोपवादेन काणखञ्जादिभिः सत्ये त्रिपणो दण्डः । मिथ्योपवादे षट्पणो दण्डः ।

शोभनाक्षिदन्त इति काणखञ्जादीनां स्तुतिनिन्दायां द्वादशपणो दण्डः ।

कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां च । सत्यमिथ्यास्तुतिनिन्दासु द्वादशपणोत्तरा दण्डास्तुल्येषु । विशिष्टेषु द्विगुणः । हीनेष्वर्धदण्डः । परस्त्रीषु द्विगुणः । प्रमादमदमोहादिभिरर्धदण्डाः ।

वाक्पारुष्यमिति सूत्रम् । वक्तव्यवचनं वाक्पारुष्यम् । तच्च तद्दण्डश्चाभिधीयत इति सूत्रार्थः ।

तत् त्रिधा विभजते — **वाक्पारुष्यमित्यादि** । उपवादोऽङ्गवैकल्यादिवचनं, कुत्सनं कुष्ठोन्मादादिवचनम्, अभिभर्त्सनं घातादिभयोपदर्शनम् ।

शरीरेत्यादि । शरीरं प्रकृतिः स्त्रीपुरुषादिलक्षणा श्रुतं वृत्तिर्जनपद इति पञ्च विषया वाक्पारुष्यस्य, तेषां शरीरादीनां मध्ये, काणखञ्जादिभिः काण एकदृक् खञ्जः कोलः आदिना कुणिदन्तुरादिग्रहणम् एतैः काणखञ्जकुणिशब्दैः शरीरोपवादेन, सत्ये काणत्वादौ यथार्थे सति त्रिपणो दण्डः । मिथ्योपवादे षट्पणो दण्डः ।

शोभनाक्षिदन्त इतीति । शोभनाक्षः शोभनदन्त इति रीत्या, काणखञ्जादीनां, स्तुतिनिन्दायां स्तुतिव्याजेन निन्दायां कृतायां, द्वादशपणो दण्डः ।

कुत्सनविषयमाह—**कुष्ठोन्मादक्लैब्यादिभिः कुत्सायां चेति** । कुष्ठी उन्मत्तः क्लीब इत्यादिप्रकारेण कुत्सने च, द्वादशपणो दण्डः इति वर्तते । **सत्यमिथ्यास्तुतिनिन्दासु** कुष्ठादिसत्यत्वे तन्मिथ्यात्वे कुष्ठ्यादीन् प्रति कल्य इत्यादिरीत्या स्तुतिनिन्दायां च, **द्वादशपणोत्तराः** उत्तरोत्तरद्वादशपणाधिकाः द्वादशपणश्चतुर्विंशतिपणः षट्त्रिंशत्पणः इत्येवंरूपाः **दण्डाः** भवन्ति, **तुल्येषु** समानेषु विषये । **विशिष्टेषु** गुणाधिकेषु विषये, **द्विगुणः** दण्डः । **हीनेषु** अर्धदण्डः । **परस्त्रीषु** विषये **द्विगुणः** । **प्रमादमदमोहादिभिः** कुत्सायाम् **अर्धदण्डाः** उक्ताः सर्वे दण्डा अर्धहीनाः ।

कुष्ठोन्मादयोश्चिकित्सकाः सन्निकृष्टाः पुमांसश्च प्रमाणम् । क्लीबभावे स्त्रियः मूत्रफेनः अप्सु विष्ठानिमज्जनं च ।

प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्य त्रिपणोत्तराः दण्डाः । पूर्वेणापरस्य द्विपणाधराः । कुब्राह्मणादिभिश्च कुत्सायाम् ।

तेन श्रुतोपवादो वाग्जीवनानां, कारुकुशीलवानां वृत्त्युपवादः, प्राग्घूणकगान्धारादीनां च जनपदोपवादा व्याख्याताः ।

यः परम् "एवं त्वां करिष्यामि" इति करणेनाभिभर्त्सयेदकरणे, यस्तस्य करणे दण्डः ततोऽर्धदण्डं दद्यात् ।

कुत्सनस्य सत्यासत्यविषयत्वनिर्णयप्रमाणापेक्षायामाह — **कुष्ठोन्मादयोश्चिकित्सका** इत्यादि । क्लीबभावे, स्त्रियः, मूत्रफेनः अनुपलभ्यमानो मूत्रे फेनः, अप्सु विष्ठानिमज्जनं च, प्रमाणम् ।

प्रकृतिविषयस्योपवादस्य दण्डमाह—**प्रकृत्युपवादे ब्राह्मणक्षत्रियवैश्यशूद्रान्तावसायिनामपरेण पूर्वस्ये**त्यादि । अन्तावसायिना चण्डालेन शूद्रस्य, शूद्रेण वैश्यस्य वैश्येन क्षत्रियस्य क्षत्रियेण ब्राह्मणस्य चोपवादे, उत्तरोत्तरत्रिपणाधिकाः दण्डाः । पूर्वेण अपरस्य उपवादे द्विपणाधराः उत्तरोत्तरद्विपणावराः दण्डाः । कुब्राह्मणादिभिश्च कुत्सायां, द्विपणाधरा इत्येव ।

प्रकृत्युपवाददण्डविधानं श्रुतोपवादादिष्वतिदिशति—**तेने**ति । उक्तेन प्रकृत्युपवादेन, वाग्जीवनानां श्रुतोपवादः विद्याकुत्सनं, कारुकुशीलवानां वृत्त्युपवादः जीविकाकुत्सनं, प्राग्घूणकगान्धारादीनां हूणका नाम जनपदविशेषः कामगिर्युत्तरतोवृत्तिरुदीच्यः तस्य पूर्वावयवः प्राग्घूणकाः भाषायां तु 'चण्डा-(ल)राष्ट्रमि'त्युक्तम् । गान्धाराः प्रसिद्धाः तदादीनां जनपदोपवादाश्च जनपददोषोद्भावनेन कुत्सनानि च, व्याख्याताः । प्राग्घूणकेति चायं भाषापाठः । अर्थशास्त्रस्यादर्शे तु क्वचित् प्राकारणकारयोर्मध्ये वर्णस्यैकस्य लेखनस्थानमुत्सृष्टम् । क्वचित् प्राणकेति पाठः ।

अभिभर्त्सनविषयमाह—**य** इति । यः परम् अन्यम् , 'एवं त्वां करिष्यामि' इति 'तव पादं भङ्क्ष्यामि भुजं भङ्क्ष्यामी'त्येवं, करणेन शरीरावयवेन, अभिभर्त्सयेत् तर्जयेत्, अकरणे उक्तस्याक्रियायां, तस्य अभिभर्त्सकस्य, करणे यो दण्डः 'पाणिपाददन्तभङ्गे' इत्यादिना दण्डपारुष्ये वक्ष्यमाणः, ततोऽर्धदण्डं दद्यात् ।

अशक्तः कोपं मदं मोहं वाऽपदिशेत्, द्वादशपणं दद्यात् ।
जातवैराशयः शक्तश्चापकर्तुं यावज्जीविकावस्थं दद्यात् ।
स्वदेशग्रामयोः पूर्वं मध्यमं जातिसङ्घयोः ।
आक्रोशाद् देवचैत्यानाम् उत्तमं दण्डमर्हति ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
अष्टादशोऽध्यायः वाक्पारुष्यम्,
आदितः पञ्चसप्ततितमः ॥

अशक्त इति । उक्तपादभङ्गादिकरणाशक्तः, कोपं मदं मोहं वा, अपदिशेत् पादभङ्गादेरुक्तिकारणं वदेच्चेद्, द्वादशपणं दण्डं स दद्यात् । शक्तस्य कोपाद्यपदेशो न स्वीकार्य इत्यभिप्रायः ।

जातवैराशय इति । तथाभूतः, अपकर्तुं शक्तश्च जनः, उक्तविधमभिभर्त्सनं कुर्वन्निति शेषः, यावज्जीविकावस्थं यावज्जीवस्थेयम् आस्वमरणप्रतिभुवं, दद्याद् धर्मस्थेभ्य इत्यार्थम् ।

अध्यायान्ते श्लोकमाह — **स्वदेशग्रामयो**रिति । तयोः, आक्रोशात् निन्दनात्, पूर्वं दण्डं पूर्वसाहसम् अर्हति । जातिसङ्घयोः अर्थात् स्वीययोः, आक्रोशात् मध्यमं मध्यमसाहसं दण्डम्, अर्हति । देवचैत्यानाम् आक्रोशाद् उत्तमम् उत्तमसाहसं दण्डम्, अर्हति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिकरणे
अष्टादशोऽध्यायः वाक्पारुष्यम्,
आदितः पञ्चसप्ततितमः ॥

७३. प्रक. दण्डपारुष्यम् ।

दण्डपारुष्यं स्पर्शनमवगूर्णं प्रहतमिति ।

नाभेरधःकायं हस्तपङ्कभस्मपांसुभिरिति स्पृशतस्त्रिपणो दण्डः ।

तैरेवामेध्यैः पादष्ठीविकाभ्यां च षट्पणः । छर्दिमूत्रपुरीषादिभिर्द्वादशपणः । नाभेरुपरि द्विगुणाः । शिरसि चतुर्गुणाः समेषु ।

विशिष्टेषु द्विगुणाः । हीनेषु अर्धदण्डाः । परस्त्रीषु द्विगुणाः । प्रमादमदमोहादिभिरर्धदण्डाः ।

पादवस्त्रहस्तकेशावलम्बनेषु षट्पणोत्तरा दण्डाः ।

पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेषु पूर्वः साहसदण्डः । पातयित्वापक्रमतोऽर्धदण्डाः ।

शूद्रो येनाङ्गेन ब्राह्मणमभिहन्यात् तदस्य छेदयेत् । अवगूर्णे निष्क्रयः, स्पर्शेऽर्धदण्डः । तेन चण्डालाशुचयो व्याख्याताः ।

दण्डपारुष्यमिति सूत्रम् । दण्डग्रहणं हस्तादेरप्युपलक्षणम् । दण्डहस्तादिभिः प्रहरणमिति सूत्रार्थः ।

तस्य त्रीन् प्रकारानाह — **दण्डपारुष्यमिति** । स्पर्शनं केवलं परामर्शनम्, अवगूर्णम् उद्यमनं, प्रहतं ताडनम् ।

नाभेरित्यादि । तस्य, अधःकायं हस्तपङ्कभस्मपांसुभिः तत्प्रकारैश्च, स्पृशतः त्रिपणो दण्डः ।

तैरेवामेध्यैरिति । हस्तादिभिरेवाशुद्धैः, स्पृशतः, पादष्ठीविकाभ्यां च पादेन मुखकफादिनिरसनेन च, स्पृशतः, षट्पणः । **छर्दीत्यादि** स्पष्टम् ।

समेषु दण्डमुक्त्वा उत्कृष्टादिष्वाह — **विशिष्टेष्वित्यादि** ।

पादेत्यादि । पादादीनां ग्रहणेषु, षट्पणोत्तराः यथोत्तरं षट्पणाधिकाः पादग्रहणे षट् वस्त्रग्रहणे द्वादश हस्तग्रहणेऽष्टादश केशग्रहणे चतुर्विंशतिरिति रीत्या दण्डाः ।

पीडनावेष्टनाञ्जनप्रकर्षणाध्यासनेष्वित्यादि । अवमर्दने परिवेष्टने कज्जलादिलेपने भूप्रकर्षणे देहोपर्यारुह्योपवेशने च, पूर्वः साहसदण्डः । पातयित्वापक्रमतः भूमौ निपात्यापक्रमणाद्, अर्धदण्डः अर्धप्रथमसाहसदण्डः ।

शूद्र इत्यादि स्पष्टम् । **अवगूर्ण** इति । हस्ताद्यङ्गोद्यमने, निष्क्रयः एकाङ्गवधनिष्क्रयः कण्टकशोधने वक्ष्यमाणो दण्डः । स्पर्शे उद्यतहस्तादिना स्पर्शनमात्रे, अर्धदण्डः अर्धनिष्क्रयः । तेन उक्तविधिना, चण्डालाशुचयः

हस्तेनावगूर्णे त्रिपणावरो द्वादशपणपरो दण्डः। पादेन द्विगुणः। दुःखोत्पादनेन द्रव्येण पूर्वः साहसदण्डः। प्राणाबाधिकेन मध्यमः।

काष्ठलोष्टपाषाणलोहदण्डरज्जुद्रव्याणामन्यतमेन दुःखमशोणितमुत्पादयतश्चतुर्विंशतिपणो दण्डः। शोणितोत्पादने द्विगुणः अन्यत्र दुष्टशोणितात्।

मृतकल्पमशोणितं घ्नतो हस्तपादपाराञ्चिकं वा कुर्वतः पूर्वः साहसदण्डः। पाणिपाददन्तभङ्गे कर्णनासाच्छेदने व्रणविदारणे च अन्यत्र दुष्टव्रणेभ्यः।

सक्थिग्रीवाभञ्जने नेत्रभेदने वा वाक्यचेष्टाभोजनोपरोधेषु च मध्यमः साहसदण्डः। समुत्थानव्ययश्च। विपत्तौ कण्टकशोधनाय नीयेत।

चण्डालप्रभृतयोऽशुचयः अर्थाद् ब्राह्मणाभिहननं स्वाङ्गेन कुर्वाणाः, व्याख्याताः विहितदण्डा वेदितव्याः। अनया रीत्या तेषामपि दण्डा यथोचितमूह्या इत्यर्थः।

अवगूर्णविधिमाह— **हस्तेनेत्यादि**। करेण अवगूर्णे उद्यमने, त्रिपणावरो द्वादशपणपरो दण्डः। पादेनावगूर्णे, द्विगुणः चतुर्विंशतिपणः। दुःखोत्पादकेन द्रव्येण कण्टकादिना, अवगूर्णे, पूर्वः साहसदण्डः। प्राणाबाधिकेन प्राणबाधाकरेण सर्पादिना, अवगूर्णे, मध्यमः साहसः।

काष्ठेत्यादि। काष्ठादीनां षण्णामन्यतमेन, दुःखम् अशोणितम् अरक्तम्, उत्पादयतः, चतुर्विंशतिपणो दण्डः। शोणितोत्पादने, द्विगुणः अष्टाचत्वारिंशत्पणः। अन्यत्र दुष्टशोणिताद् दुष्टशोणितातिरिक्ते विषये, कुष्ठादिदुष्टशोणितोत्पादने तु न द्विगुणः, किन्तु अर्धमौचित्यात्।

मृतकल्पमिति। मृततुल्यत्वं यथा भवेत् तथा, अशोणितम् अरक्तं, घ्नतः, हस्तपादपाराञ्चिकां हस्तस्य पादस्य वा पराञ्चिकां पराञ्चनम् अन्यथाभावं सन्धिविघटनमिति यावत्। परोपसृष्टादञ्चेर्धात्वर्थनिर्देशे ण्वुल्। पाराञ्चिकमिति पाठे त्वर्थव्युत्पत्ती चिन्त्ये। तां वा कुर्वतः, पूर्वः साहसदण्डः। **पाणिपादेत्यादि**। पाण्यादिभङ्गे, कर्णनासाच्छेदने, दुष्टव्रणव्यतिरेकेण व्रणानामुद्भेदने च, पूर्वः साहसदण्ड इति वर्तते।

सक्थीत्यादि। ऊरुकण्ठभङ्गे नेत्रभेदने वा वचनसञ्चरणाभ्यवहरणशक्तिप्रतिबन्धेषु च मध्यमः साहसदण्डः। समुत्थानव्ययश्च यथावत्कार्यक्रियापाटवं समुत्थानं तत्प्रत्यापत्त्यर्थो व्ययश्च, अपराधिना देयः। **विपत्ताविति**। मरणे, कण्टकशोधनाय कण्टकशोधनोक्तविधानाय, नीयेत।

महाजनस्यैकं घ्नतः प्रत्येकं द्विगुणो दण्डः ।

पर्युषितः कलहोऽनुप्रवेशो वा नाभियोज्य इत्याचार्याः ।

नास्त्यपकारिणो मोक्ष इति कौटल्यः ।

कलहे पूर्वागतो जयति; अक्षममाणो हि प्रधावति । इत्याचार्याः ।

नेति कौटल्यः । पूर्वं पश्चाद् वागतस्य साक्षिणः प्रमाणम् । असाक्षिके घातः कलहोपलिङ्गनं वा ।

घाताभियोगमप्रतिब्रुवतस्तदहरेव पश्चात्कारः ।

कलहे द्रव्यमपहरतो दशपणो दण्डः ।

क्षुद्रकद्रव्यहिंसायां तच्च तावच्च दण्डः ।

महाजनस्येति । जनसमूहस्य, एकं जनं, घ्नतः, प्रत्येकं द्विगुणो दण्डः एकस्यैकं घ्नतो यो दण्डस्तद्द्विगुणो दण्डः ।

पर्युषित इति । चिरातीतः, कलहः, अनुप्रवेशो वा हृतद्रव्यायत्तीकरणं वा, नाभियोज्यः अभियोक्तुमर्हो न भवति । इत्याचार्याः ।

कलहानुप्रवेशलक्षणापराधकारिणः अपराधः पर्युषित इत्येतावता मोक्षणं न भवति, किन्तु चिरादपि सोऽभियोज्य एवेत्येवं स्वमतमाह — **नास्त्यपकारिण** इत्यादि ।

कलह इति । कलहे, पूर्वागतः पूर्वावेदकः, जयति । कुतः हि यतः, अक्षममाणः प्रधावति परकृतमाबाधमसहमानो धर्मस्थायावेदयितुं त्वरितः पूर्वं गच्छति, अर्थात् पश्चादागतः पराजयते । इत्याचार्याः ।

नेति कौटल्य इति । पूर्वागमनं पश्चादागमनं वा यत्किञ्चित्करं, किंतर्हि तत्त्वनिर्णयसाधनमित्याकाङ्क्षायामाह — **पूर्वं पश्चाद्**इत्यादि । **असाक्षिके घातः कलहोपलिङ्गनं वे**ति । साक्ष्यभावे घातदर्शनेन तत्त्वनिर्णयः घातादर्शने लिङ्गैः कलहस्याभ्यूहनम् ।

घाताभियोगमिति । घातविषयमभियोगं, तदहरेव तस्मिन्नेव दिने, अप्रतिब्रुवतः, पश्चात्कारः पराजयः ।

कलह इत्यादि । कलहायमानयोर्द्वयोर्द्रव्यमपहरतोऽन्यस्य दशपणो दण्डः । अपहृतद्रव्यप्रत्यानयनं तु सिद्धमेव । इह 'द्विशतपणो दण्डः' इति तु भाषानुसारेण पाठोऽनुमेयः ।

क्षुद्रकेत्यादि । क्षुद्रकद्रव्यहिंसायां क्षुद्रकद्रव्याणां पुष्पफलादीनां

स्थूलकद्रव्यहिंसायां तच्च द्विगुणश्च दण्डः ।

वस्त्राभरणहिरण्यसुवर्णभाण्डहिंसायां तच्च पूर्वश्च साहसदण्डः ।

परकुड्यमभिघातेन क्षोभयतस्त्रिपणो दण्डः । छेदनभेदने षट्पणः। पातनभञ्जने द्वादशपणः प्रतीकारश्च ।

दुःखोत्पादनं द्रव्यमन्यवेश्मनि प्रक्षिपतो द्वादशपणो दण्डः । प्राणाबाधिकं पूर्वः साहसदण्डः ।

क्षुद्रपशूनां काष्ठादिभिर्दुःखोत्पादने पणो द्विपणो वा दण्डः । शोणितोत्पादने द्विगुणः ।*

महापशूनामेतेष्वेव स्थानेषु द्विगुणो दण्डः, समुत्थानव्ययश्च ।

पुरोपवनवनस्पतीनां पुष्पफलच्छायावतां प्ररोहच्छेदने षट्पणः। क्षुद्रशाखाच्छेदने द्वादशपणः । पीनशाखाच्छेदने चतुर्विंशतिपणः । स्कन्धवधे पूर्वः साहसदण्डः । समुच्छित्तौ मध्यमः ।

पुष्पफलच्छायावद्गुल्मलतास्वर्धदण्डः । पुण्यस्थानतपोवनश्मशानद्रुमेषु च ।

हिंसायां कलहकारिभिरुपहनने, तच्च हिंसितं क्षुद्रद्रव्यं च स्वामिने देयमिति शेषः । तावच्च तत्परिमाणं द्रव्यं च दण्डो भवति ।

स्थूलकेत्यादि । कालायसादेस्थूलकद्रव्यहिंसायां, तच्च, द्विगुणः तद्द्रव्याद्विगुणो दण्डश्च ।

वस्त्राभरणेत्यादि शोणितोत्पादने द्विगुण इत्येतदन्तं सुबोधम् । 'पातनभञ्जने द्वादशपणः' इति क्वचिन्न पठ्यते ।

महापशूनामिति । गवादीनाम्, एतेष्वेव स्थानेषु दुःखोत्पादनादिषु क्षुद्रपशूक्तेषु विषयेषु, द्विगुणो दण्डः । समुत्थानव्ययश्च तत्स्वस्थीकरणार्थो व्ययश्च देयः ।

पुरोपवनेत्यादि । प्ररोहच्छेदने पल्लवच्छेदने, स्कन्धवधे प्रधाणभञ्जने । समुच्छित्तौ उन्मूलने । शेषं स्पष्टम् ।

पुष्पफलच्छायावद्गुल्मलतास्विति । पुष्पादिमत्सु स्तम्बेषु वल्लीषु च विषये प्ररोहच्छेदनादौ, अर्धदण्डः वनस्पत्युक्तदण्डस्यार्धम् । पुण्यस्थानतपोवनश्मशानद्रुमेषु च, अर्धदण्ड इति संबध्यते ।

---

*एतदुपरि 'व्रणविदारणे चतुर्गुणः । शाखाङ्गच्छेदनेऽष्टचत्वारिंशत्पणः ।' इत्येतावान् ग्रन्थः पठनीयो भाति भाषानुसरणे ।

सीमवृक्षेषु चैत्येषु द्रुमेष्वालक्षितेषु च ।
त एव द्विगुणा दण्डाः कार्या राजवनेषु च ॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे
एकोनविंशोऽध्यायः दण्डपारुष्यम्,
आदितष्षट्सप्ततितमः ॥

सीमवृक्षेष्वित्यादिरध्यायान्तश्लोकः सुबोधः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां धर्मस्थीये तृतीयाधिक
एकोनविंशोऽध्यायः दण्डपारुष्यम्,
आदितः षट्सप्ततितमः ॥

७४,७५. प्रक. द्यूतसमाह्वयं, प्रकीर्णकानि ।

द्यूताध्यक्षो द्यूतमेकमुखं कारयेत् । अन्यत्र दीव्यतो द्वादशपणो दण्डः गूढाजीविज्ञापनार्थम् ।

द्यूताभियोगे जेतुः पूर्वः साहसदण्डः । पराजितस्य मध्यमः । बालिशजातीयो ह्येष जेतुकामः पराजयं न क्षमत इत्याचार्याः । नेति कौटल्यः पराजितश्चेद् द्विगुणदण्डः क्रियेत न कश्चन राजानमभिसरिष्यति । प्रायशो हि कितवाः कूटदेविनः ।

द्यूतसमाह्वयमिति सूत्रम् । द्यूतम् अक्षशलाकाद्यप्राणिक्रीडा समाह्वयो मल्लमेषकुक्कुटादिप्राणिदेवनं तयोः समाहारो द्यूतसमाह्वयं, तत्संबद्धो व्यवहारो दण्डश्चाभिधीयत इति सूत्रार्थः । पारुष्यप्रसङ्गात् सर्वविधपारुष्यविसंवादादिदोषनिदानस्यास्येह कथनसङ्गतिः ।

द्यूताध्यक्ष इति । सः, द्यूतम् एकमुखम् एकमार्गम् एकस्मिन् प्रदेशे इत्यर्थः, कारयेत् । अन्यत्र प्रदेशान्तरे, दीव्यतः द्वादशपणो दण्डः । **ननु च** द्यूतमेव तावन्निन्दितं प्रतिषिद्धं च शास्त्रेषु— 'प्रकाशमेतत् तास्कर्यं यद् देवनसमाह्वयम्' इति, 'प्रच्छन्नं वा प्रकाशं वा द्यूतं राष्ट्रे निवारयेद्' इति च स्मृतौ, 'अक्षैर्मा दीव्यः' इति चाम्नाये । तत् कुतोऽस्य प्रवर्तनविधिः कुतस्तरां चैकमुखत्वनियमनमित्याशङ्कामपाकर्तुमेकमुखत्वनियमस्य प्रयोजनमाह — **गूढाजीविज्ञापनार्थमि**ति । गूढाजीविनस्तस्करसाहसिकादयो लोककण्टकाः तज्ज्ञापनार्थम् । अयमाशयः — प्रतिषेधातिक्रमेण प्रवृत्तौ श्येनादिवदयं द्यूतसमाह्वयस्य विधिः । तच्च लोककण्टकप्रायजनभूयिष्ठसेव्यं सुरापानवदधर्मरूपमप्येकमुखतया प्रवर्त्यमानं कण्टकज्ञानसाधनीभूय तदुद्धरणरूपधर्मान्तरोपायतां प्रतिपद्यत इति तदेकमुखत्वनियमोऽप्युपपद्यत इति ।

द्यूताभियोगे जेतुरित्यादि । द्यूतविषयमभियोगं द्यूतजेता कुर्वन् पूर्वसाहस दण्ड्यः, द्यूतपराजितस्तद्द्विगुणं दण्डं मध्यमसाहसम् । पराजितस्य दण्डाधिक्ये अधर्म्यजयकामुकता हेतुरित्याह — **बालिशजातीयो ही**त्यादि । बालिशजातीयो मूर्खप्रायः । **नेति कौटल्य** इत्याचार्यमतप्रतिषेधे कारणमाह— **पराजितश्चेदि**ति । स चेद् द्विगुणदण्डः क्रियेत, न कश्चन राजानमभिसरिष्यति न कोऽपि पराजितो जेतृकृतमात्मदुःखं राज्ञे निवेदयितुमागमिष्यति । माभिसरतु को दोष इति चेत् तत्राह — **प्रायशो हि कितवाः कूटदेविन**

तेषामध्यक्षाः शुद्धाः काकणीरक्षांश्च स्थापयेयुः ।

काकण्यक्षाणामन्योपधाने द्वादशपणो दण्डः । कूटकर्मणि पूर्वः साहसदण्डः, जितप्रत्यादानम् । उपधौ स्तेयदण्डश्च ।

जितद्रव्यादध्यक्षः पञ्चकं शतमाददीत, काकण्यक्षारलाशलाकावक्रयमुदकभूमिकर्मक्रयं च । द्रव्याणामाधानं विक्रयं च कुर्यात् । अक्षभूमिहस्तदोषाणां चाप्रतिषेधने द्विगुणो दण्डः ।

तेन समाह्वयो व्याख्यातः अन्यत्र विद्याशिल्पसमाह्वयादिति ।

इति । प्रायेण हि धूर्ताः कपटदेवनशीलाः । अतश्च तेभ्य एकान्तजयिभ्य आपततोऽनर्थजातात् कूटानभिज्ञतया नित्यपराजयिनामनिर्मोक्ष एवापद्येतेत्यभिप्रायः ।

तेषामिति । कितवानाम्, अध्यक्षाः द्यूतकर्मप्रत्यवेक्षकाः, शुद्धाः कूटरहिताः, काकणीः कपर्दान्, अक्षांश्च पाशकांश्च तथाविधान्, स्थापयेयुः, देवनार्थम् ।

काकण्यक्षाणामिति । तेषाम्, अन्योपधाने अन्येषां स्थापितातिरिक्तानां तज्जातीयानाम् उपधाने, द्वादशपणो दण्डः । इहान्यशब्दस्य सापेक्षत्वेऽपि समास आर्षः । **कूटकर्मणीति** । कपटाक्षादिसृष्टौ, पूर्वः साहसदण्डः, जितप्रत्यादानं जितद्रव्यापहरणं च । उपधौ स्थापितेष्वेवाक्षादिषु रेखाव्यत्ययकरणलक्षणे व्याजे मणिमन्त्रादिना बुद्धिवञ्चनायां वा, स्तेयदण्डश्च, चकारात् पूर्वोक्तं च ।

जितद्रव्यादिति । जिताद् द्रव्याद्, अध्यक्षः, पञ्चकं शतम् आददीत शते विंशतिभागं गृह्णीयात्, आत्मवृत्त्यर्थम् । काकण्यक्षारलाशलाकावक्रयं काकण्यः कपर्दाः अक्षाः पाशकाः अरलाः चर्मपट्टिकाजातीयाः साधनभेदाः शलाका दन्तादिमय्यो दीर्घचतुरश्राः काकण्यादीनां देवनसाधनानाम् अवक्रयं भाटकम्, उदकभूमिकर्मक्रयं च, आददीत, जेतृसकाशात् । द्रव्याणाम् आधानं विक्रयं च कुर्याद् द्यूतकरैराधियमानानि विक्रीयमाणानि च द्रव्याणि स्वीकुर्यात् । अक्षभूमिहस्तदोषाणां च अक्षदोषस्य भूमिदोषस्य हस्तदोषस्य च, अप्रतिषेधने प्रतिषेधाकरणे, द्विगुणः स्वादेयद्रव्यभागद्विगुणः, दण्डः, अध्यक्षस्य ।

अप्राणिद्यूतोक्तं दण्डविधानं द्विपदचतुष्पदादिप्राणिद्यूते विद्याशिल्पसमाह्वयातिरिक्तेऽतिदिशति—**तेनेत्यादि** ।

प्रकीर्णकं तु । याचितकावक्रीतकाहितकनिक्षेपकाणां यथादेशकालमदाने; यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने, गुल्मतरदेयं ब्राह्मणं साधयतः प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च द्वादशपणो दण्डः ।

सन्दिष्टमर्थमप्रयच्छतो, भ्रातृभार्यां हस्तेन लङ्घयतो, रूपाजीवामन्योपरुद्धां गच्छतः, परवक्तव्यं पण्यं क्रीणानस्य, समुद्रं गृहमुद्भिन्दतः, सामन्तचत्वारिंशत्कुल्या बाधामाचरतश्चाष्टचत्वारिंशत्पणो दण्डः ।

प्रकीर्णकानीति सूत्रम् । प्रकीर्णानि विक्षिप्तानि परिशिष्टानि च, तत्र किञ्चित् किञ्चित् विवाहसंयुक्तादिशेषं किञ्चित् किञ्चिदध्यक्षप्रचारकण्टकशोधनान्तर्गतम् । तान्युच्यन्त इति सूत्रार्थः ।

प्रकीर्णकं त्विति । प्रतिपाद्यत इति शेषः । **याचितके**त्यादि । याचितकावक्रीतकाहितकानि प्रतीतानि, निक्षेपको भूषणादिनिर्माणार्थमर्पितं सुवर्णादि, एतेषां, यथादेशकालम्, अदाने, द्वादशपणो दण्डः । यामच्छायासमुपवेशसंस्थितीनां वा देशकालातिपातने 'नक्तममुकयामे दिवामुकच्छायानालिकायां चामुकदेशे सम्भूयोपवेष्टव्यामि'त्येवं कृतसंकेतानां समुपवेशव्यवस्थानां देशकालातिक्रामणे वा द्वादशपणो दण्डः । इदं समयस्यानपाकर्मशेषम् । गुल्मतरदेयं गुल्मतारणभृतिं नदीतारणभृतिं च, ब्राह्मणं साधयतः ब्राह्मणात् प्रयत्नेन गृह्णतः, द्वादशपणो दण्डः । प्रतिवेशानुवेशयोरुपरि निमन्त्रणे च प्रतिवेशः प्रतिमुखगृहम् अनुवेशोऽनन्तरगृहं तयोर्विद्यमानं श्रोत्रियमतिक्रम्यान्यस्य निमन्त्रणे च, द्वादशपणो दण्डः ।

सन्दिष्टमिति । प्रतिश्रुतमर्थमप्रयच्छतः, भ्रातृभार्यां हस्तेन लङ्घयतः अवलम्बमानस्य, रूपाजीवां गणिकाम्, अन्योपरुद्धां गच्छतः, अष्टचत्वारिंशत्पणो दण्डः । इदं साहसशेषम् । परवक्तव्यं परपरीवादगोचरं, पण्यं क्रीणानस्य, अष्टचत्वारिंशत्पणो दण्डः । इदमस्वामिविक्रयशेषम् । समुद्रं मुद्रया युक्तं गृहम् उद्भिन्दतः, अष्टचत्वारिंशत्पणः । इदं साहसशेषम् । सामन्तचत्वारिंशत्कुल्याः सामन्तिकानां चत्वारिंशतः कुलानां बाधाम् आचरतश्च, अष्टचत्वारिंशत्पणो दण्डः । इदं वास्तुकशेषम् ।

कुलनीवीग्राहकस्यापव्ययने, विधवां छन्दवासिनीं प्रसह्याधिचरतः, चण्डालस्यार्यां स्पृशतः, प्रत्यासन्नमापद्यनभिधावतो, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः शत्यो दण्डः।

शपथवाक्यानुयोगमनिसृष्टं कुर्वतो, युक्तकर्म चायुक्तस्य, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनो, दास्या गर्भमौषधेन पातयतश्च पूर्वः साहसदण्डः।

पितापुत्रयोर्दम्पत्योर्भ्रातृभगिन्योर्मातुलभागिनेययोः शिष्याचार्ययोर्वा परस्परमपतितं त्यजतः सार्थाभिप्रयातं ग्राममध्ये वा त्यजतः पूर्वः साहसदण्डः। कान्तारे मध्यमः। तन्निमित्तं भ्रेषयत उत्तमः। सहप्रस्थायिष्वन्येष्वर्धदण्डः।

पुरुषमबन्धनीयं बध्नतो बन्धयतो बन्धं वा मोक्षयतो बालमप्राप्तव्यवहारं बध्नतो बन्धयतो वा सहस्रदण्डः। पुरुषापराधविशेषेण दण्डविशेषः कार्यः।

कुलनीवीग्राहकस्यापव्ययन इति। कुलसाधारणं धनं गृहीत्वापलपने, विधवां छन्दवासिनीं स्वच्छन्दवर्तिनीमकामां, प्रसह्याधिचरतः बलाद् गच्छतः, चण्डालस्य आर्यां स्पृशतः, प्रत्यासन्नम् अन्तिकस्थम् आपदि अनभिधावतः अभिधाव्यारक्षतः, निष्कारणमभिधावनं कुर्वतः, शाक्यजीवकादीन् शाक्यान् क्षपणकादींश्च वृषलप्रव्रजितान् देवपितृकार्येषु भोजयतः, **शत्यो दण्डः** शतपणदण्डः।

शपथवाक्यानुयोगमनिसृष्टं कुर्वत इति। आधिकरणिकाः साक्ष्याद्यनुयोगं शपथपूर्वं यमनुतिष्ठन्ति स शपथवाक्यानुयोगः तं धर्मस्थाननुज्ञातं कुर्वतः, युक्तकर्म चायुक्तस्य अनधिकृतस्याधिकृतकर्म कुर्वतश्च, क्षुद्रपशुवृषाणां पुंस्त्वोपघातिनः, दास्या गर्भम् औषधेन पातयतश्च स्रावयतश्च, पूर्वः साहसदण्डः।

पितापुत्रयोरित्यादि। सार्थाभिप्रयातं ग्राममध्ये त्यजतः सङ्घसाद्याश्रयेण प्रस्थितं रोगादिवशाद् ग्रामान्तरे त्यक्त्वा गच्छतः सार्थमुख्यस्य। शेषं सुबोधम्। **कान्तारे मध्यम** इति। दुर्गमेऽरण्ये त्यजतो मध्यमसाहसः। तन्निमित्तं भ्रेषयतः कान्तारत्यागेन निमित्तेन विगतजीवितं कुर्वतः, उत्तमसाहसः। सहप्रस्थायिषु अन्येषु सार्थान्तर्गतेषु विषये, अर्धदण्डः।

पुरुषमित्यादि। सुबोधम्।

तीर्थकरस्तपस्वी व्याधितः क्षुत्पिपासाध्वक्लान्तस्तिरोजनपदो दण्डखेदी निष्किञ्चनश्चानुग्राह्याः।

देवब्राह्मणतपस्विस्त्रीबालवृद्धव्याधितानामनाथानामनभिसरतां धर्मस्थाः कार्याणि कुर्युः। न च देशकालभोगच्छलेनातिहरेयुः।

पूज्या विद्याबुद्धिपौरुषाभिजनकर्मातिशयतश्च पुरुषाः।

एवं कार्याणि धर्मस्थाः कुर्युरच्छलदर्शिनः।
समाः सर्वेषु भावेषु विश्वास्या लोकसम्प्रियाः॥

इति कौटलीयार्थशास्त्रे धर्मस्थीये तृतीयाधिकरणे विंशोऽध्यायः
द्यूतसमाह्वयं प्रकीर्णकानि। आदितः सप्तसप्तति-
तमोऽध्यायः। एतावता कौटलीयस्यार्थ-
शास्त्रस्य धर्मस्थीयं तृतीयम-
धिकरणं समाप्तम्॥

तीर्थकर इत्यादि। तीर्थकरः दानोदकहस्तः दानशीलः। तिरोजनपदः अन्यजनपदागतः। दण्डखेदी बहुकृत्वोऽनुभूतदण्डः।

देवब्राह्मणेत्यादि। देवादीनां सप्तानाम्, अनाथानां योगक्षेमचिन्तकरहितानाम्, अनभिसरतां स्वदुःखनिवेदनाय धर्मस्थमनभिगच्छतां, **कार्याणि**, धर्मस्थाः कुर्युः। देशकालभोगच्छलेन देशादिव्याजेन, न चातिहरेयुः अनाथद्रव्यं नातीव हरेयुः।

साक्ष्यादिभावेनोपगच्छन्तः पुरुषास्तत्तद्विद्याबुद्धिपौरुषाभिजनकर्मणामतिशयानुरोधेन धर्मस्थैर्माननीया इत्याह— **पूज्या** इत्यादि।

एवं कार्याणीत्यादिः श्लोकः स्पष्टार्थः॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
धर्मस्थीयाधिकरणं तार्तीयीकमपूर्यत॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्री**रामसुब्रह्मण्या**र्यसूनोर्महामहोपाध्याय-
गणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां **श्रीमूलाख्यायां धर्मस्थीये** तृतीयाधिकरणे **विंशोऽध्यायः**
द्यूतसमाह्वयं प्रकीर्णकानि। धर्मस्थीयं
तृतीयमधिकरणं समाप्तम्॥

कण्टकशोधनं— चतुर्थमधिकरणम् ।

७६. प्रक. कारुकरक्षणम् ।

प्रदेष्टारस्त्रयस्त्रयोऽमात्याः कण्टकशोधनं कुर्युः ।

अर्थ्यप्रकाराः कारुशासितारः सन्निक्षेप्तारः स्ववित्तकारवः श्रेणीप्रमाणा निक्षेपं गृह्णीयुः । विपत्तौ श्रेणी निक्षेपं भजेत । निर्दिष्टदेशकालकार्यं च कर्म कुर्युः । अनिर्दिष्टदेशकालकार्यापदेशम् ।

अथ चतुर्थं कण्टकशोधनं नामाधिकरणमारभ्यते । कण्टकानां कण्टकाः प्रजापीडाकरत्वात् कण्टकतुल्याः कारुकवैदेहकादयः तेषां शोधनं तेभ्यः प्रजापीडा यथा न भवेत् तथा तच्छमनं कण्टकशोधनम् । तदस्मिन्नधिकरणे प्रस्तुतम् ।

तत्र प्रथमं सूत्रं — **कारुकरक्षणमिति** । नाडिन्धमतक्षायस्कारादयः कारुकाः तेभ्यः प्रजानां रक्षणमिति सूत्रार्थः ।

प्रदेष्टार इति । कण्टकशोधनाधिकृताः प्रदेष्टार इत्याख्यायन्ते । ते त्रयस्त्रयः, अमात्याः जानपदत्वाद्यमात्यगुणयुक्ताः, कण्टकशोधनं कुर्युः । इह वीप्सा कण्टकशोधनस्थानेषु सर्वेष्वपि प्रदेष्टृत्रित्वप्रतिपत्त्यर्था ।

कीदृग्गुणाः कारवः निक्षेपं ग्रहीतुमर्हन्तीत्याह—**अर्थ्येत्यादि** । अर्थ्यप्रकाराः अर्थानपेतप्रकाराः शुचिस्वभावा इत्यर्थः अर्थनीयस्वभावा वा, अप्रतीकारा इति क्वाचित्के पाठे अनाशंसनीयप्रतिकारा इत्यर्थो वाच्यः । कारुशासितारः बहूनां कारूणामधश्चराणामुपरि स्थित्वा कर्तव्योपदेष्टारः, सन्निक्षेप्तारः प्रातिवेशिकानुवेशिकसाक्षिकं निक्षेपग्रहणप्रत्यर्पणव्यवहर्तारः, स्ववित्तकारवः स्वधनेनापि भूषणशिल्पकारिणः, एतेन भक्षितनिक्षेपनिष्क्रयार्पणशक्तत्वलक्षणां धनवत्तामाह । श्रेणीप्रमाणाः श्रेणीविधेयाः, उक्तविशेषणपञ्चकयुक्ताः, निक्षेपं गृह्णीयुः । विपत्तौ ग्रहीतृमरणदीर्घप्रवासादिना निक्षेपहानिसंभवे श्रेणी निक्षेपं भजेत भागशो दद्यात् । **निर्दिष्टदेशकालकार्यं चेति** । अयं देशोऽयं काल इदं च कार्यवस्तुस्वरूपमित्येवं निर्दिष्टं व्यवस्थापितं देशादिकं यस्य तत् तथाभूतं, कर्म कुर्युः । **अनिर्दिष्टदेशकालकार्यापदेशं** कर्म कुर्युरिति वर्तते । अर्थाद् यद् बहुतरदेशकालैकसाध्यम् अनन्योल्लेख्यनानावैचित्र्ययोगकमनीयतया स्वरूपतो निर्देष्टुमशक्यं च भवति, तत् कर्म ।

कालातिपातने पादहीनं वेतनं तद्द्विगुणश्च दण्डः । अन्यत्र भ्रेषोपनिपाताभ्यां नष्टं विनष्टं वाभ्यावहेयुः । कार्यस्यान्यथाकरणे वेतननाशस्तद्द्विगुणश्च दण्डः ।

तन्तुवाया दशैकादशिकं सूत्रं वर्धयेयुः । वृद्धिच्छेदे छेदद्विगुणो दण्डः ।

सूत्रमूल्यं वानवेतनम् । क्षौमकौशेयानामध्यर्धगुणम् । पत्रोर्णाकम्बलदुकूलानां द्विगुणम् ।

मानहीने हीनावहीनं वेतनं तद्द्विगुणश्च दण्डः । तुलाहीने हीनचतुर्गुणो दण्डः । सूत्रपरिवर्तने मूल्यद्विगुणः । तेन द्विपटवानं व्याख्यातम् ।

कालातिपातन इत्यादि । निर्दिष्टकालातिक्रमे पादहीनं वेतनं, तद्द्विगुणश्च दण्डः । **अन्यत्र भ्रेषोपनिपाताभ्यामिति** । भ्रेषो व्यालकृत उपप्लवः उपनिपातो दैवाग्न्यादिकृतः तदतिरिक्तेन निमित्तेन, नष्टम् अत्यन्तनाशं गतं, विनष्टं वा एकदेशलुप्तं वा, अभ्यावहेयुः निर्यातयेयुः । कार्यस्य अन्यथाकरणे निर्दिष्टप्रकारातिरिक्तप्रकारेण करणे, वेतननाशः तद्द्विगुणश्च दण्डः ।

तन्तुवायकर्माह—**तन्तुवाया** इति । कुविन्दकाः, दशैकादशिकं सूत्रं वर्धयेयुः दशपलस्य सूत्रस्य सकाशिकमेकादशपलाधिकमुतं सूत्रं दद्युः । वृद्धिच्छेदे छेदद्विगुणो, दण्डः ।

वानवेतनमाह—**सूत्रमूल्यं वानवेतनमिति** । ऊतिकर्मणो वेतनं सूत्रमूल्यं यावत् तावद् दातव्यम् । क्षौमकौशेयानां वानवेतनम् अध्यर्धगुणं सूत्रमूल्यसार्धगुणम् । पत्रोर्णाकम्बलदुकूलानां वानवेतनं द्विगुणं सूत्रमूल्यद्विगुणम् ।

मानहीने इति । निर्दिष्टायामविस्तारहानौ, हीनावहीनं हीनस्यावहीनम् अर्थादष्टहस्तायामचोदनायां सप्तहस्तायामवानेऽष्टमांशहीनं वानवेतनं, देयम् । तद्द्विगुणश्च दण्डः अयथोक्तवानकारिणो भवति । **तुलाहीने** इति । अन्तरालसूत्रन्यूनतायां, हीनचतुर्गुणो दण्डः । सूत्रपरिवर्तने दत्तं सूत्रमपहृत्यान्यस्य सूत्रस्य प्रतिनिधाने, मूल्यद्विगुणः, दण्डः । एष एवैकसूत्रवानविधिर्द्विसूत्रवानेऽपि ज्ञेय इत्याह — **तेन द्विपटवानं** व्याख्यातमिति ।

ऊर्णातुलायाः पञ्चपलिको विहननच्छेदो रोमच्छेदश्च ।

रजकाः काष्ठफलकश्लक्ष्णशिलासु वस्त्राणि नेनिज्युः । अन्यत्र नेनिजतो वस्त्रोपघातं षट्पणं च दण्डं दद्युः ।

मुद्गराङ्कादन्यद् वासः परिदधानास्त्रिपणं दण्डं दद्युः । परवस्त्रविक्रयावक्रयाधानेषु च द्वादशपणो दण्डः । परिवर्तने मूल्यद्विगुणो वस्त्रदानं च ।

मुकुलावदातं शिलापट्टशुद्धं धौतसूत्रवर्णं प्रमृष्टश्वेतं चैकरात्रोत्तरं दद्युः ।

पञ्चरात्रिकं तनुरागं, षड्रात्रिकं नीलं, पुष्पलाक्षामञ्जिष्ठारक्तं, गुरुपरिकर्म यत्नोपचार्यं जात्यं वासः सप्तरात्रिकम् । ततः परं वेतनहानिं प्राप्नुयुः ।

ऊर्णातुलाया इति । शतपलाया ऊर्णायाः पञ्चपलो विहननच्छेदः विहननं पिञ्जनं शोधनं तन्निमित्तश्छेदः । रोमच्छेदश्च पञ्चपलः, वाननिमित्तः ।

रजककर्माह — **रजका** इत्यादि । ते, काष्ठफलकश्लक्ष्णशिलासु काष्ठफलकेषु मसृणशिलासु च, वस्त्राणि नेनिज्युः शोधयेयुः । अन्यत्र खरशिलादौ नेनिजतः नेजनं कुर्वन्तः, णिजेरभ्यस्तात्छतरि जसि रूपमिदम् । वस्त्रोपघातं, षट्पणं दण्डं च दद्युः ।

मुद्गराङ्कादित्यादि । मुद्गरायुधप्रतिमोपराञ्जितात् । शेषं सुबोधम् ।

अर्पितवस्त्रप्रत्यर्पणकालनियमं तदतिक्रमे दण्डं चाह — **मुकुलावदात**मिति । मुकुलवन्मसृणसितं, शिलापट्टशुद्धं शिलापट्टस्वच्छं, धौतसूत्रवर्णं क्षालितसूत्रधवलं, प्रमृष्टश्वेतं च अत्यन्तधवलं च, एवं चतुष्प्रकारधावल्यं वस्त्रम्, एकरात्रोत्तरं पूर्वपूर्वापेक्षया एकरात्राधिकप्रत्यर्पणकालमुत्तरोत्तरं यस्मिंस्तत् तथाभूतं दद्युः । तत्राद्यं मुकुलावदातमेकरात्रेण प्रत्यर्पणीयं द्वितीयं द्विरात्रेण तृतीयं त्रिरात्रेण चतुर्थं चतूरात्रेणेति व्यवस्था ।

रञ्जनार्थान् दिवसानाह — **पञ्चे**त्यादि । तनुरागं शोणशिलावृक्षत्वग्योगसाधितकषायरञ्जनीयं वस्त्रं, पञ्चरात्रिकं पञ्चरात्रेण देयम् । नीलं नील्या महारसया रक्तं, पुष्पलाक्षामञ्जिष्ठारक्तं पुष्पं कुङ्कुमकुसुम्भशेफालिकादि लाक्षा अलक्तः मञ्जिष्ठा अञ्जनवल्लिकाख्या आभिः रञ्जितं, षड्रात्रिकम् ।

श्रद्धेया रागविवादेषु वेतनं कुशलाः कल्पयेयुः।

पराध्यानां पणो वेतनं मध्यमानामर्धपणः, प्रत्यवराणां पादः।

स्थूलकानां माषद्विमाषकं द्विगुणं रक्तकानाम्। प्रथमनेजने चतुर्भागः क्षयः। द्वितीये पञ्चभागः। तेनोत्तरं व्याख्यातम्।

रजकैस्तुन्नवाया व्याख्याताः।

सुवर्णकाराणाम्। अशुचिहस्ताद् रूप्यं सुवर्णमनाख्याय सरूपं क्रीणतां द्वादशपणो दण्डः, विरूपं चतुर्विंशतिपणः, चोरहस्ता-

---

गुरुपरिकर्म बहुशिल्पम्, अत एव यत्नोपचार्यं यत्नसंस्कार्यं, जात्यं प्रशस्तं, वासः नेत्रादि, सप्तरात्रिकं सप्तरात्रप्रत्यर्पणीयम्। ततः परं विहितकालातिक्रमे वेतनहानिं प्राप्नुयुः।

श्रद्धेया इति। आप्ताः, कुशलाः रागगुणपरीक्षानिपुणाः, रागविवादेषु वेतनं कल्पयेयुः।

रागवेतनमाह—**पराध्यानामिति**। प्रशस्तानां रागाणां, पणो वेतनं, [मध्]यमानाम् अर्धपणः, प्रत्यवराणां अधमानां पादः पादपणः।

निर्णेजनभृतिमाह—**स्थूले**त्यादि। स्थूलकानां निर्णेजने माषद्विमाषकं माषकं द्विमाषकं वा वेतनम् अधममध्यमोत्तमानुसारेण कल्प्यम्। रक्तकानां द्विगुणं द्विमाषकचतुर्माषकादि पूर्ववत्। नेजनावृत्तिकृतमर्घक्षयमाह—**प्रथमनेजन** इति। तत्र, चतुर्भागः क्षयः क्रयणकालिकमूल्यस्य चतुर्भागो हीयते। द्वितीये नेजने, पञ्चभागः क्षयः, अर्थात् प्रथमनेजनमूल्यस्य। **तेनोत्तरं व्याख्यातमिति**। अनया रीत्या तृतीयादौ नेजने द्वितीयादिनेजनमूल्यादेः षड्भागादिः क्षयो द्रष्टव्य इत्यर्थः।

रजकैस्तुन्नवाया व्याख्याता इति। तुन्नवायाः सौचिकाः। तैरपि वस्त्राणां सप्तरात्रेण प्रत्यर्पणं, विनाशितानां प्रथमनेजनाद्यनुसारेण चतुर्भागादिहीनमूल्यदानं च रजकवत् कर्तव्यमित्यर्थः।

सुवर्णकाराणामिति। सम्बद्धमभिधीयत इति शेषः। अर्थात् तत्प्रतारणपरिहारोपायोऽभिधीयते। अशुचिहस्तादिति। अशुचयो दासकर्मकरादयः तद्द्वारेण, सरूपं भूषणाद्याकारयुक्तं, रूप्यं सुवर्णं च, अनाख्याय सौवर्णिकमनिवेद्य क्रीणतां, द्वादशपणो दण्डः। विरूपं तत् क्रीणतां चतुर्विंशति-

दष्टचत्वारिंशत्पणः । प्रच्छन्नविरूपमूल्यहीनक्रयेषु स्तेयदण्डः । कृतभाण्डोपधौ च ।

सुवर्णान्माषकमपहरतो द्विशतो दण्डः । रूप्यधरणान्माषकमपहरतो द्वादशपणः । तेनोत्तरं व्याख्यातम् ।

वर्णोत्कर्षमसाराणां योगं वा साधयतः पञ्चशतो दण्डः । तयोरपचरणे रागस्यापहारं विद्यात् ।

माषको वेतनं रूप्यधरणस्य । सुवर्णस्याष्टभागः । शिक्षाविशेषेण द्विगुणा वेतनवृद्धिः । तेनोत्तरं व्याख्यातम् ।

ताम्रवृत्तकंसवैकृन्तकारकूटानां पञ्चकं शतं वेतनम् । ताम्र-

पणः । चोरहस्तात् क्रीणताम्, अष्टचत्वारिंशत्पणो दण्डः । **प्रच्छन्नविरूपमूल्यहीनक्रयेषु स्तेयदण्ड** इति । अन्याविदितं विनाशितरूपं रूप्यसुवर्णं हीनेन मूल्येन क्रीणानस्य चोरदण्डः । **कृतभाण्डोपधौ** च निर्मितभाण्डपरिवर्तने च, स्तेयदण्ड इति वर्तते ।

सुवर्णादिति । तस्मात्, माषकं सुवर्णषोडशभागम् । अपहरतः, द्विशतो द्विशतपणो दण्डः । रूप्यधरणात् धरणप्रमाणाद् रूप्यात्, माषकमपहरतः, द्वादशपणो दण्डः । **तेनोत्तरं व्याख्यातमि**ति । अनेन प्रकारेण द्विमाषकाद्यपहारे दण्डद्वैगुण्यादिकं कल्पनीयमित्यर्थः ।

वर्णेत्यादि । वर्णोत्कर्षम्, असाराणां हीनवर्णानां, साधयतः, योगं वा सारैरसारयोगं वा साधयतः, पञ्चशतो दण्डः । **तयोरि**ति । कृत्रिमवर्णोत्कर्षस्य असारयुक्तस्य चेत्येतयोः, रागस्य वर्णस्य, अपचरणे यथाविध्यग्निप्रक्षेपेणापगमने, अपहारं विद्यात् ।

कर्मवेतनमाह — **माषको वेतनं रूप्यधरणस्ये**ति । धरणप्रमाणस्य रूप्यस्य शिल्पकरणे रूप्यमाषक एको वेतनम् । सुवर्णस्य षोडशमाषकमितस्य स्वर्णस्य शिल्पे, अष्टभागः सुवर्णमाषस्याष्टमांशः, वेतनम् । शिक्षाविशेषेण शिल्पवैचित्र्येण, द्विगुणा वा वेतनवृद्धिः । **तेनोत्तरं व्याख्यातमि**ति । अनेन प्रकारेण गुरुशिल्पकरणे वेतनवृद्धिः कल्पनीया ।

ताम्रवृत्तकंसवैकृन्तकारकूटानामिति । ताम्रादीनां पञ्चानां, पञ्चकं शतं तुलाप्रमाणस्य कर्मणि पञ्चपणं वेतनम् । कर्मणि क्षयमानमाह—**ताम्र-**

पिण्डो दशभागक्षयः। पलहीने हीनद्विगुणो दण्डः। तेनोत्तरं व्याख्यातम्।

सीसत्रपुपिण्डो विंशतिभागक्षयः। काकणी चास्य पलवेतनम्। कालायसपिण्डः पञ्चभागक्षयः। काकणीद्वयं चास्य पलवेतनम्। तेनोत्तरं व्याख्यातम्।

रूपदर्शकस्य स्थितां पणयात्रामकोप्यां कोपयतः कोप्यामकोपयतो द्वादशपणो दण्डः।

व्याजीपरिशुद्धा पणयात्रा। पणान्माषकमुपजीवतो द्वादशपणो दण्डः। तेनोत्तरं व्याख्यातम्।

कूटरूपं कारयतः प्रतिगृह्णतो निर्यापयतो वा सहस्रं दण्डः। कोशे प्रक्षिपतो वधः।

सरकपांसुधावकाः सारत्रिभागं लभेरन्। द्वौ राजा रत्नं च। रत्नापहार उत्तमो दण्डः।

पिण्ड इति। दशभागक्षयः कर्मकरणे दशभागहानिर्भवति। **पलहीन** इत्यादि। कर्मण्येकपलहानौ, हीनद्विगुणो दण्डः। एवं द्विपलादिहानौ दण्डविधिरूह्य इत्याह — **तेनोत्तरं व्याख्यात**मिति।

सीसत्रपुपिण्ड इत्यादि। सुबोधम्।

रूपदर्शकस्येति। पणपरीक्षको रूपदर्शकः तस्य, स्थितां वर्तमानां, पणयात्रामकोप्याम् अदूषणीयं पणव्यवहारं, कोपयतः दूषयतः, कोप्यामकोपयतः दूषणीयामदूषयतः, द्वादशपणो दण्डः।

व्याजीपरिशुद्धा पणयात्रेति। राजदेयं शते पञ्चभागं दत्त्वा पणयात्रां कुर्यात्। **पणादि**ति। पणात् माषकम् उपजीवतः एकस्मिन् शुद्धे पणे माषमेकं हरतः लक्षणाध्यक्षस्य, द्वादशपणो दण्डः। एवमुपजीवनबहुत्वे दण्डबहुत्वमूह्यमित्याह — **तेनोत्तर**मित्यादि।

कूटरूपमिति। कपटनाणकं, कारयतः, प्रतिगृह्णतः स्वीकुर्वतः, निर्यापयतो वा निर्गमयतो वा, सहस्रं पणसहस्रं, दण्डः। कोशे प्रक्षिपतः अकूटरूपैः सह मिश्रयतः, वधः।

सरकेत्यादि। सरकपांसुधावकाः सरकं रत्नं खनिषु रत्नसम्पृक्तपांसुधावनकर्मकराः, सारत्रिभागं तत्कर्मलब्धसारवस्तुत्रिभागं लभेरन्। द्वौ सारत्रिभागौ, रत्नं च, राजा लभेत। रत्नापहारे उत्तमो दण्डः, सरकपांसुधावकानाम्।

खनिरत्ननिधिनिवेदनेषु षष्ठमंशं निवेत्ता लभेत। द्वादशमंशं भृतकः।

शतसहस्रादूर्ध्वं राजगामी निधिः। ऊने षष्ठमंशं दद्यात्।

पौर्वपौरुषिकं निधिं जानपदः शुचिः स्वकरणेन समग्रं लभेत। स्वकरणाभावे पञ्चशतो दण्डः। प्रच्छन्नादाने सहस्रम्।

भिषजः प्राणाबाधिकमनाख्यायोपक्रममाणस्य विपत्तौ पूर्वः साहसदण्डः। कर्मापराधेन विपत्तौ मध्यमः। मर्मवेधवैगुण्यकरणे दण्डपारुष्यं विद्यात्।

कुशीलवा वर्षारात्रिमेकस्था वसेयुः। कामदानमतिमात्रमेकस्यातिवादं च वर्जयेयुः। तस्यातिक्रमे द्वादशपणो दण्डः। कामं देशजातिगोत्रचरणमैथुनापहाने नर्मयेयुः।

खनिरत्ननिधिनिवेदनेष्विति । खन्यादीनामनर्हहस्तगतानां राज्ञे निवेदनेषु, षष्ठम् अंशं, निवेत्ता निवेदयिता, लभेत । भृतकः खन्यादिनिवेदनवृत्तिः, द्वादशमंशं, लभेत ।

निधिः कियद्द्रव्यमानादूर्ध्वं राजगामीत्याह — **शतसहस्रादित्यादि** । तावत्पणमानपर्यन्तस्तूपलब्धृगामीत्यर्थः । ऊने, षष्ठम् अंशं, दद्याद् राज्ञे ।

पौर्वपौरुषिकमिति । पितृपितामहादयः पूर्वपुरुषाः तैः स्थापितं, निधिं, जानपदः, शुचिः सद्वृत्तः, स्वकरणेन साक्ष्यलेख्यादिभिः स्वत्वविभावनेन, समग्रं लभेत शतसहस्रातिगमपि । स्वकरणाभावे पञ्चशतो दण्डः । प्रच्छन्नादाने अप्रकाश्य स्वायत्तीकरणे, सहस्रं दण्डः ।

प्राणबाधाकरं रोगमनिवेद्य राज्ञे रोगिणं चिकित्सतो वैद्यस्य तद्विपत्तौ पूर्वः साहसदण्डः, चिकित्सादोषेण तद्विपत्तौ मध्यम इत्याह — **भिषज इत्यादि** । **मर्मवेधवैगुण्यकरण** इति । मर्माणि शस्त्रक्रियान्यथाकरणे, दण्डपारुष्यं विद्यात् तदाख्येन विवादपदेन भिषजमभियुञ्जीत, भिषक्क्रियादोषेण रोगिणो यदङ्गमुपहतं तद् भिषज उपहन्यादित्यर्थः ।

कुशीलवा इति । लङ्घनप्लवनगीतादिवृत्तयः, वर्षारात्रिं वर्षाकालिकरात्रीः, एकस्था वसेयुः एकं स्थानमाश्रित्य वसेयुः, न तु स्थानात् स्थानान्तरं गच्छन्तः स्ववृत्तिमनुतिष्ठेयुः, तदनुष्ठाने हि सति कर्षकाणां तदासक्तात् कृषिकर्मणो वर्षाकालकरणीयस्योपघातः स्यादिति । **कामदानमतिमात्रमिति** । प्रीतिवशात् केनचित् न्याय्यां मात्रामतिक्रम्य दीयमानं द्रव्यं, वर्जयेयु

कुशीलवैश्चारणा भिक्षुकाश्च व्याख्याताः । तेषामयश्शूलेन यावतः पणानभिवदेयुः, तावन्तः शिफाप्रहारा दण्डाः ।

शेषाणां कर्मणां निष्पत्तिवेतनं शिल्पिनां कल्पयेत् ।

एवं चोरानचोराख्यान् वणिक्कारुकुशीलवान् ।
भिक्षुकान् कुहकांश्चान्यान् वारयेद् देशपीडनात् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
प्रथमोऽध्यायः कारुकरक्षणम्,
आदितोऽष्टसप्ततितमः ॥

न स्वीकुर्युः । एकस्याभिवादं च बहुषु मध्ये एकस्यातिस्तुतिं च, वर्जयेयुः । तस्यातिक्रमे द्वादशपणो दण्डः । **काममिति** । देशजातिगोत्रचरणमैथुनापहासे चरणः शाखाध्येता शेषं प्रतीतं, देशजात्याद्यपहासादिपरिहारे सति, कामं नर्मयेयुः विनोदयेयुः प्रेक्षकान् ।

कुशीलवोक्तमेव विधानं चारणानां भिक्षुकाणां च द्रष्टव्यमित्याह — **कुशीलवैरित्यादि** । चारणाः अङ्गविक्षेपमात्रकर्तारः । तेषां निर्धनानां दण्डे विशेषमाह — **तेषामिति** । तेषाम्, अयश्शूलेन हृदयतोदकत्वाद् अयश्शूलतुल्येन परमर्मोद्घाटनेन निमित्तेन, यावतः पणान्, अभिवदेयुः दण्डत्वेन विदध्युर्धर्मस्थाः, तावन्तः विहितपणतुल्यसंख्याः, शिफाप्रहाराः दण्डाः धनदण्डप्रतिनिधयः कार्याः ।

शिल्पिनामुक्तातिरिक्तकर्मविषयं निष्पत्तिवेतनमूहनीयमुक्तदिशेत्याह — **शेषाणामित्यादि** ।

अध्यायान्ते श्लोकमाह — **एवमित्यादि** । चोरान् अचोराख्यान् चोरकर्म कुर्वाणानप्यचोरसंज्ञान् । कुहकान् ऐन्द्रजालिकान् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
प्रथमोऽध्यायः कारुकरक्षणम्,
आदितोऽष्टसप्ततितमः ॥

७७. प्रक. वैदेहकरक्षणम्।

संस्थाध्यक्षः पण्यसंस्थायां पुराणभाण्डानां स्वकरणविशुद्धानामाधानं विक्रयं वा स्थापयेत्। तुलामानभाण्डानि चावेक्षेत, पौतवापचारात्।

परिमाणीद्रोणयोरर्धपलहीनातिरिक्तमदोषः। पलहीनातिरिक्ते द्वादशपणो दण्डः। तेन पलोत्तरा दण्डवृद्धिर्व्याख्याता।

तुलायाः कर्षहीनातिरिक्तमदोषः। द्विकर्षहीनातिरिक्ते षट्पणो दण्डः। तेन कर्षोत्तरा दण्डवृद्धिर्व्याख्याता।

आढकस्यार्धकर्षहीनातिरिक्तमदोषः। कर्षहीनातिरिक्ते त्रिपणो दण्डः। तेन कर्षोत्तरा दण्डवृद्धिर्व्याख्याता।

तुलामानविशेषाणामतोऽन्येषामनुमानं कुर्यात्।

वैदेहकरक्षणमिति सूत्रम्। वैदेहकाः वणिजः कण्टकेषु प्रधानाः, तेभ्यो जनपदस्य रक्षणमभिधीयते इति सूत्रार्थः। 'वणिक्कारुकुशीलवानि'ति वणिक्प्रस्तावात् तद्रक्षणप्रकारो व्युत्पाद्यते।

संस्थाध्यक्ष इति। विपणिमार्गाध्यक्षः, पण्यसंस्थायां पण्यशालायां, पुराणभाण्डानां पुराणानां धान्यादिपण्यानां, पुराणत्वोक्तिः कालपरिवाससंभावितगुणयोगार्था, स्वकरणविशुद्धानां विभावितस्वत्वानाम्; एतच्च चोरितत्वपरिहारार्थम्। आदानं ग्रहणं प्रवेशनम्, आधानपाठे निवेशनं, विक्रयं वा, स्थापयेत्। तुलामानभाण्डानि च परिमाण्यादीनि द्रोणाढकादीनि च, अवेक्षेत परीक्षेत, पौतवापचारात् पौतवदोषं परिहर्तुम्।

परिमाणीद्रोणयोरिति। तुलादण्डधान्यमानविशेषयोः अर्धपलहीनातिरिक्तम् अर्धपलन्यूनत्वमर्धपलाधिकत्वं च, अदोषः दोषाभावः। पलहीनातिरिक्ते एकपलहानौ तदतिरेके वा, द्वादशपणो दण्डः। तेन पलोत्तरा द्विपलहान्यतिरेके चतुर्विंशतिपणो दण्ड इत्यादिरूपा, दण्डवृद्धिः व्याख्याता।

तुलाया इत्यादिस्तुलाया **आढकस्ये**त्यादिराढकस्य चार्धकर्षैककर्षन्यूनातिरिक्तविषयविधानग्रन्थः स्पष्टार्थः।

अनुक्तानां तुलाविशेषमानविशेषाणां हीनातिरिक्तविषयं विधानमुक्तदिशानुमेयमित्याह — **तुलामानविशेषाणामित्यादि**।

तुलामानाभ्यामतिरिक्ताभ्यां क्रीत्वा हीनाभ्यां विक्रीणानस्य त एव द्विगुणा दण्डाः ।

गण्यपण्येष्वष्टभागं पण्यमूल्येष्वपहरतः षण्णवतिर्दण्डः ।

काष्ठलोहमणिमयं रज्जुचर्ममृन्मयं सूत्रवल्करोममयं वा जात्यमित्यजात्यं विक्रयाधानं नयतो मूल्याष्टगुणो दण्डः ।

सारभाण्डमित्यसारभाण्डं, तज्जातमित्यतज्जातं, राढायुक्तमुपधियुक्तं समुद्गपरिवर्तिमं वा विक्रयाधानं नयतो हीनमूल्यं चतुष्पञ्चाशत्पणो दण्डः, पणमूल्यं द्विगुणः, द्विपणमूल्यं द्विशतः । तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता ।

कारुशिल्पिनां कर्मगुणापकर्षमाजीवं विक्रयक्रयोपघातं वा सम्भूय समुत्थापयतां सहस्रं दण्डः ।

तुलामानाभ्यामतिरिक्ताभ्यामिति । तुलाविशेषेण भाजन्यादिना मानविशेषेण च प्रस्थकुडुबादिनातिरिक्तेन, क्रीत्वा, हीनाभ्यां ताभ्यां, विक्रीणानस्य, त एव द्वादशपणादय एव, द्विगुणा दण्डाः ।

गण्यपण्येष्विति । तेषु विषये, पण्यमूल्येषु अष्टभागम् अपहरतः षण्णवतिर्दण्डः ।

काष्ठादिमयं पण्यं निकृष्टं श्रेष्ठव्यपदेशेन विक्रयमाधानं च कुर्वतो मूल्याष्टगुणो दण्ड इत्याह — **काष्ठेत्यादि** ।

सारेत्यादि । सारभाण्डमित्यसारभाण्डं कर्पूरादिकमकृत्रिमं सारपण्यमित्युक्त्वा तत् कृत्रिमं, हीनमूल्यं पणावरमूल्यं, विक्रयाधानं नयतः, तज्जातमित्यतज्जातं तद्देशजमित्युक्त्वा अतद्देशजं, हीनमूल्यं विक्रयाधानं नयतः, राढायुक्तं राढा शोभा तया गुणवद्रत्नलक्षणात् श्रेष्ठरत्नयुक्तम् अर्थात् कृत्रिममौक्तिकादिकं, हीनमूल्यं विक्रयाधानं नयतः, उपधियुक्तं कृत्रिमपण्यमिश्रं, हीनमूल्यं विक्रयाधानं नयतः, समुद्गपरिवर्तिमं समुद्गस्य सम्पुटस्य पूर्वदर्शितस्य परिवर्तेन कृतं कस्मिंश्चित् समुद्गे पण्यं प्रदर्श्यान्यस्मात् समुद्गाद् उद्धृतमित्यर्थः, हीनमूल्यं विक्रयाधानं नयतः, चतुष्पञ्चाशत्पणो दण्डः । पणमूल्यम् एकपणमूल्यम् असारभाण्डादिकं, विक्रयाधानं नयतः, द्विगुणः उक्तदण्डद्विगुणो दण्डः । द्विपणमूल्यं विक्रयाधानं नयतः, द्विशतः । तेन उक्तप्रकारेण, अर्घवृद्धौ त्रिपणचतुष्पणादिपण्यमूल्यवृद्धौ, दण्डवृद्धिः व्याख्याता ।

कारुशिल्पिनामिति । कारूणां शिल्पिनां च, कर्मगुणापकर्षम् 'एवङ्गुणकं भाण्डं निर्मातव्यमि'त्युक्ते 'तादृग्गुणं मा कुर्वि'ति प्रतिषेधेन कर्मगुण-

वैदेहकानां वा सम्भूय पण्यमवरुन्धतामनर्घेण विक्रीणतां क्रीणतां वा सहस्रं दण्डः।

तुलामानान्तरमर्घवर्णान्तरं वा। धरकस्य मायकस्य वा पणमूल्यादष्टभागं हस्तदोषेणाचरतो द्विशतो दण्डः। तेन द्विशतोत्तरा दण्डवृद्धिर्व्याख्याता।

धान्यस्नेहक्षारलवणगन्धभैषज्यद्रव्याणां समवर्णोपधाने द्वादशपणो दण्डः।

यन्निसृष्टमुपजीवेयुः, तदेषां दिवससञ्जातं सङ्ख्याय वणिक् स्थापयेत्। क्रेतृविक्रेत्रोरन्तरपतितमदायादन्यं भवति। तेन धान्यपण्य-

---

हानिं, सम्भूय ऐकमत्येन, समुत्थापयताम्, आजीवं लाभं, सम्भूय समुत्थापयताम् एकपणवेतनं कर्म पणद्वयवेतनं कल्पयतां, विक्रयक्रयोपघातं वा विक्रयोपघातं वा स्वपण्यविक्रये मूल्यातिरेचनेनोपघातं वा क्रयोपघातं वा परपण्यस्वीकरणे मूल्यपातनेनोपघातं वा, सम्भूय समुत्थापयतां, सहस्रं दण्डः पणसहस्रं प्रत्येकं दण्डः।

वैदेहकानां वेति। वणिजां च, सम्भूय ऐकमत्येन, पण्यम् अवरुन्धताम् अन्यत्र विक्रेतुमविसृजताम्, अनर्घेण अयुक्तेन मूल्येन, विक्रीणतां, क्रीणतां वा, सहस्रं दण्डः प्रत्येकम्।

तुलेत्यादि। तुलामानान्तरम् आयमान्यादितुलाभ्य उत्पद्यमानो लाभविशेषः प्रस्थादिमानविशेषेभ्य उत्पद्यमानो लाभविशेषश्च, अर्घवर्णान्तरं वा मूल्यभेदनिमित्तो लाभविशेषश्च, पुस्तके लेख्यम् इति वाक्यशेषः। धरकस्य तुलाधारकस्य, मायकस्य वा, पणमूल्यादष्टभागम् एकपणमूल्यस्याष्टमांशप्रमाणं तुलमानान्तरं, हस्तदोषेण, आचरतः कुर्वतः, द्विशतो दण्डः। तेन उक्तविधिना, द्विशतोत्तरा चतुर्भागाद्याहरणे द्विगुणादिका, दण्डवृद्धिः व्याख्याता।

धान्यस्नेहक्षारलवणगन्धभैषज्यद्रव्याणामिति। धान्यादीनां, समवर्णोपधाने तुल्यवर्णैर्हीनमूल्यैर्धान्यादिभिर्मिश्रणे, द्वादशपणो दण्डः।

यन्निसृष्टमिति। यत् निसृष्टम् उपजीव्यत्वेनानुमतम् उपजीवेयुः विक्रेत्रादयः। तद् एषां दिवससञ्जातं प्रतिदिनोत्पन्नं, संख्याय संख्यया परिच्छिद्य, वणिक् स्थापयेत् संस्थाध्यक्षः प्रकल्पयेत्। क्रेतृविक्रेत्रोरन्तरपतितमिति। क्रेतृविक्रेतृशब्दौ क्रयविक्रयोपलक्षकौ, क्रये विक्रये च पण्यानां संस्थाध्यक्षेण स्वयं क्रियमाणेऽन्तरापतत्यधिकं धनम्, अदायादमन्यं दायादनार्हम् अन्यैरविभाज्यं भवति केवलराजग्राह्यमेव भवतीत्यर्थः। अदायादमन्य-

निचयांश्चानुज्ञाताः कुर्युः। अन्यथानिचितमेषां पण्याध्यक्षो गृह्णीयात्। तेन धान्यपण्यविक्रये व्यवहरेतानुग्रहेण प्रजानाम्।

अनुज्ञातक्रयादुपरि चैषां स्वदेशीयानां पण्यानां पञ्चकं शतमाजीवं स्थापयेत्। परदेशीयानां दशकम्। ततः परमर्घं वर्धयतां क्रये विक्रये वा भावयतां पणशते पञ्चपणाद् द्विशतो दण्डः। तेनार्घवृद्धौ दण्डवृद्धिर्व्याख्याता।

सम्भूयक्रये चैषाम् अविक्रीते नान्यं सम्भूयक्रयं दद्यात्। पण्योपघाते चैषामनुग्रहं कुर्यात् पण्यबाहुल्यात्।

पण्याध्यक्षः सर्वपण्यान्येकमुखानि विक्रीणीत। तेष्वविक्रीतेषु नान्ये विक्रीणीरन्। तानि दिवसवेतनेन विक्रीणीरन् अनुग्रहेण प्रजानाम्।

मिति वृद्धपाठो मातृकासु चिन्त्यार्थः। अदायाद्यमित्येव वा पाठः शुद्धः सम्भाव्यते। तेनेति। धान्यपण्यनिचयांश्च, तेन संस्थाध्यक्षेण, अनुज्ञाताः कुर्युः। एषाम् अन्यथानिचितम् अननुज्ञातनिचितं, पण्याध्यक्षो गृह्णीयात्। तेनेति। तेन निचितेन, धान्यपण्यविक्रये विषये, प्रजानाम् अनुग्रहेण व्यवहरेत प्रजानामुपकारो यथा स्यात् तथा समाचरेदित्यर्थः।

किं तन्निसृष्टमित्याह—**अनुज्ञातक्रयादुपरि चेति**। स्वीकरणकालिकादर्घादुपरि, एषां वणिजां, स्वदेशीयानां स्वदेशभवानां, पण्यानां, पञ्चकं शतम् आजीवं स्थापयेत् शते पञ्चपणिकं लाभं व्यवस्थापयेत्। परदेशीयानां पण्यानां, दशकं शतं शते दशपणिकं लाभं स्थापयेत्। ततः परम् उक्तलाभादधिकम्, अर्घं मूल्यं, वर्धयतां, क्रये विक्रये वा, भावयतां लाभमुत्पादयतां, पणशते पञ्चपणात् पणपञ्चकमात्रलाभभावनादपि, द्विशतो दण्डः। तेनेति। उक्तविधिना, अर्घवृद्धौ अर्घवर्धनेन लाभवर्धने, दण्डवृद्धिः व्याख्याता पणशते दशपणभावनाच्चतुश्शतो दण्ड इत्यादिरीत्या दण्डस्य वृद्धिः व्याख्याता।

सम्भूयेत्यादि। एषां वणिजां, सम्भूयक्रये संभूयक्रीते, अविक्रीते अकृतविक्रये सति, अन्यं सम्भूयक्रयं, न दद्यात् अर्थाद् वणिगन्तरेभ्यः। पण्योपघाते च जैलाग्न्यादिजनिते पण्यदूषणे, एषां सम्भूयक्रयकारिणाम्, अनुग्रहम् उपकारं, कुर्यात्, पण्यबाहुल्यात् पण्यानां बहुत्वे सति। इदमुत्तरवाक्येन वा सम्बध्यते।

पण्याध्यक्ष इति। सः, सर्वपण्यानि, एकमुखानि विक्रीणीत एकविक्रेतृद्वारेण विक्रीणीत। तेषु सर्वपण्येषु, अविक्रीतेषु सत्सु, अन्ये पूर्वोक्ती-

देशकालान्तरितानां तु पण्यानां —

प्रक्षेपं पण्यनिष्पत्तिं शुल्कं वृद्धिमवक्रयम् ।
व्ययानन्यांश्च सङ्ख्याय स्थापयेदर्घमर्घवित् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
द्वितीयोऽध्यायः वैदेहकरक्षणम्,
आदित एकोनाशीतितमः ॥

कृतविक्रयकर्मभ्योऽतिरिक्ताः, न विक्रीणीरन् । तानि पण्यानि दिवसवेतनेन दिवसवेतनदानेन, विक्रीणीरन्, प्रजानाम्, अनुग्रहेण आनुकूल्येन ।

देशकालव्यवहितपण्यविषयमाह — **देशकालान्तरितानां तु पण्यानामिति** । इदं **प्रक्षेपमित्या**दिवक्ष्यमाणश्लोकान्वयि । देशव्यवहितानां कालव्यवहितानां च पण्यानां, **प्रक्षेपं** वस्तुमूल्यं, पण्यनिष्पत्तिम्, इदमियता कालेन निष्पद्यत इत्यमुमर्थं, शुल्कं, वृद्धिम्, अवक्रयं शकटबलीवर्दादिभाटकम्, अन्यान् व्ययांश्च, संख्याय, अर्घं, स्थापयेत् कल्पयेत्, अर्घवित् अर्घविधानाभिज्ञः संस्थाध्यक्षः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
द्वितीयोऽध्यायः वैदेहकरक्षणम्,
आदित एकोनाशीतितमः ॥

७८. प्रक. उपनिपातप्रतीकारः ।

दैवान्यष्टौ महाभयानि — अग्निरुदकं व्याधिर्दुर्भिक्षं मूषिका व्यालाः सर्पा रक्षांसीति । तेभ्यो जनपदं रक्षेत् ।

ग्रीष्मे बहिरधिश्रयणं ग्रामाः कुर्युः । दशकुलीसङ्ग्रहेणाधिष्ठिता वा । नागरिकप्रणिधावग्निप्रतिषेधो व्याख्यातः । निशान्तप्रणिधौ राजपरिग्रहे च ।

बलिहोमस्वस्तिवाचनैः पर्वसु चाग्निपूजाः कारयेत् ।

वर्षारात्रमनूपग्रामाः पूरवेलामुत्सृज्य वसेयुः । काष्ठवेणुनावश्चावगृह्णीयुः ।

उपनिपातप्रतीकार इति सूत्रम् । उपनिपाता नाम दैव्योऽग्न्यादिनिमित्ता विपदः, तेषां प्रतीकारोऽभिधीयत इति सूत्रार्थः । कण्टकास्तावद् द्विविधा मनुष्यकण्टका देवकण्टकाश्चेति । तत्र मनुष्यकण्टकाः कारुकादय उक्ताः, देवकण्टकास्त्वधुनोच्यन्ते ।

दैवान्यष्टावित्यादि । स्पष्टार्थम् ।

तेष्वष्टसु अग्नितो रक्षणप्रकारमाह — **ग्रीष्म** इति । तस्मिन्, ग्रामाः, अधिश्रयणं पाकस्थाल्याश्चुल्ल्यां निवेशनं, बहिः गृहबहिर्देशे, कुर्युः । दशकुलीसंग्रहेण दशकुलीरक्षकेण गोपनाम्ना, रक्षकेणेत्येव भाषापाठः । अधिष्ठिता वा 'इहाधिश्रयणं कर्तव्यमि'ति चोदिता वा, कुर्युः । नागरिकप्रणिधौ, अग्निप्रतिषेधः अग्निभयपरिहारविधिः, व्याख्यातः 'अग्निप्रतीकारं च ग्रीष्मे' इत्यादिनोक्तः । निशान्तप्रणिधौ राजपरिग्रहे च व्याख्यातः 'मानुषेणाग्निना त्रिरपसव्यं परिगतमन्तःपुरमग्निरन्यो न दहती'त्यादिनोपदिष्टः ।

बलीत्यादि । पर्वसु पूर्णिमादिषु, बलिहोमस्वस्तिवाचनैः भूतबलिभिः रक्षोहोमैः शान्तिकैः स्वस्तिवाचनैश्च, अग्निपूजाः कारयेत् ।

अथ जलप्रतिषेधमाह — **वर्षारात्र**मिति । वर्षाकालिकरात्रीः, अनूपग्रामाः जलप्रायप्रदेशवासिनः, पूरवेलाम् उत्सृज्य जलप्रवाहसन्निकृष्टं तटं परिहृत्य, वसेयुः । इह वर्षापूर्वपदकाद् रात्रिशब्दाद् अच्प्रत्ययोऽन्वेष्यः । रात्रिमिति वा पाठः । काष्ठवेणुनावश्च काष्ठं वेणुं नावं च जलप्रवाहतरणार्थाः, अवगृह्णीयुः संगृह्णीयुः ।

उह्यमानमलाबूदृतिप्लवगण्डिकावेणिकाभिस्तारयेयुः । अनभिसरतां द्वादशपणो दण्डः अन्यत्र प्लवहीनेभ्यः ।

पर्वसु च नदीपूजाः कारयेत् ।

मायायोगविदो वेदविदो वर्षमभिचरेयुः ।

वर्षावग्रहे शचीनाथगङ्गापर्वतमहाकच्छपूजाः कारयेत् ।

व्याधिभयमौपनिषदिकैः प्रतीकारैः प्रतिकुर्युः । औषधैश्चिकित्सकाः, शान्तिप्रायश्चित्तैर्वा सिद्धतापसाः ।

तेन मरको व्याख्यातः । तीर्थाभिषेचनं महाकच्छवर्धनं गवां श्मशानावदोहनं कबन्धदहनं देवरात्रिं च कारयेत् ।

उह्यमानमिति । प्रवाहेण नीयमानं बाहुतरणाक्षमम्, अलाबूदृतिप्लवगण्डिकावेणिकाभिः अलाबूस्तुम्बीफलं दृतिः चर्मभस्त्रा प्लव उडुपं गण्डिका तरुप्रकाण्डकं वेणिका जलतरणसाधनभेदः ताभिः, तारयेयुः । अनभिसरतां तारयितुमनभिगच्छतां, द्वादशपणो दण्डः । **अन्यत्र प्लवहीनेभ्य** इति । तरणसाधनहीनाश्चेदनभिसरन्तो नापराध्यन्तीत्यर्थः ।

पर्वसु चेति । अमावास्यादिषु, नदीपूजाः कारयेत् जलविपत्प्रशमार्थम् ।

मायायोगविद् इति । शैवादयो मान्त्रिकाः, वेदविदः अथर्ववेदनिपुणाः, वर्षम् अतिवृष्टिम्, अभिचरेयुः जपहोमादिना प्रशमयेयुः ।

वर्षावग्रह इति । वृष्टिप्रतिबन्धे सति, शचीनाथगङ्गापर्वतमहाकच्छपूजाः इन्द्रजाह्नवीशैलसमुद्रपूजाः, कारयेत् ।

अथ व्याधिभयप्रतीकारः । व्याधिस्तावद् द्विविधः कृत्रिमोऽकृत्रिमश्च । आद्य औपनिषदिकोक्तविषधूमविषाम्बवादिदोषप्रभवः, द्वितीयो धातुदोषजः । तत्र कृत्रिमव्याधिभयम् औपनिषदिकोक्तैर्विधानैः प्रतिकुर्युः, अकृत्रिमव्याधिभयं भिषज औषधैः सिद्धतापसाश्च शान्तिकर्मभिर्व्रतोपवासादिभिः प्रतिविदध्युरित्याह — **व्याधिभयमि**त्यादि ।

तेनेति । उक्तेन व्याधिशमनप्रकारेण, मरको मारीनामा महाव्याधिः, व्याख्यातः उक्तप्रतीकारः । विशेषं त्वाह— **तीर्थाभिषेचनमि**ति । गङ्गादितीर्थस्नानं, महाकच्छवर्धनं समुद्रपूजनं, गवां श्मशानावदोहनं श्मशाने दोहनं, कबन्धदहनं तण्डुलसक्तुनिर्मितस्य कबन्धस्य श्मशाने दहनं, देवरात्रिं च देवं क्वचित् स्थानेऽर्चयित्वा रात्रिजागरणं च, कारयेत् ।

पशुव्याधिमरके स्थानान्यर्थनीराजनं स्वदैवतपूजनं च कारयेत् ।

दुर्भिक्षे राजा बीजभक्तोपग्रहं कृत्वानुग्रहं कुर्यात् । दुर्गसेतुकर्म वा भक्तानुग्रहेण । भक्तसंविभागं वा । देशनिक्षेपं वा । मित्राणि वा व्यपाश्रयेत । कर्शनं वमनं वा कुर्यात् ।

निष्पन्नसस्यमन्यविषयं वा सजनपदो यायात् । समुद्रसरस्तटाकानि वा संश्रयेत । धान्यशाकमूलफलावापान् सेतुषु कुर्वीत । मृगपशुपक्षिव्यालमत्स्यारम्भान् वा ।

मूषिकभये मार्जारनकुलोत्सर्गः । तेषां ग्रहणहिंसाया द्वादशपणो दण्डः । शुनामनिग्रहे च अन्यत्रारण्यचरेभ्यः ।

पशुव्याधिमरक इति । पशूनां गजाश्वादीनां व्याधौ मरके च, स्थानानि भिन्नस्थानस्थितीः, अर्थनीराजनं नीराजनद्रव्यैर्नीराजनं, स्वदैवतपूजनं च कारयेत् । तत्र गजस्य स्वदैवतं सुब्रह्मण्यः, अश्वस्याश्विनौ, गोः पशुपतिः, महिषस्य वरुणः, वेसरस्य वायुः, अजस्याग्निरिति बोद्धव्यम् ।

दुर्भिक्षभयप्रतीकारमाह—**दुर्भिक्ष** इति । दुर्भिक्षसमये, राजा, बजिभक्तोपग्रहं प्रजानां बीजभक्ताभ्यामनुकूलाचरणं कृत्वा, अनुग्रहं कुर्यात् । दुर्गसेतुकर्म वा दुर्गकर्म सेतुनिर्माणकर्म वा, भक्तानुग्रहेण भक्तदानेन, कुर्यात् । भक्तसंविभागं वा दुर्गसेतुकर्माभावेऽपि केवलान्नदानं, कुर्यात् । देशनिक्षेपं वा अनन्तरदेशे तद्देशराजान्तिके 'प्रजा इमा मे कञ्चित् कालं रक्षित्वा प्रत्यर्पये'-त्युक्त्वा प्रजानिक्षेपणं वा, कुर्यात् । मित्राणि वा धनदानाद्युपकारक्षमाणि, व्यपाश्रयेत प्रजाभक्तार्थम् । कर्शनं निरुपयोगजनानां तत्काले देशान्तरप्रेषणेनाल्पत्वकरणं, वमनं वा सुभिक्षविदेशप्रेषणं वा, कुर्यात् ।

निष्पन्नसस्यमिति । सस्यसमृद्धम्, अन्यविषयं वा अन्यदेशं वा, सजनपदो जानपदसहितो, यायात् उपजीवनार्थम् । समुद्रसरस्तटाकानि वा संश्रयेत, मत्स्यपक्षिकूर्मादिजलचरजन्तुभक्षणेन जीवनार्थम् । धान्यशाकमूलफलावापान्, सेतुषु कुर्वीत जलाधारान् निर्माय तत्र कुर्वीत । मृगपशुपक्षिव्यालमत्स्यारम्भान् वा मृगादीनां वधारम्भान् वा, कुर्वीतेति वर्तते ।

मूषिकप्रतीकारमाह—**मूषिकभय** इति । तस्मिन्नुत्पन्ने, मार्जारनकुलोत्सर्गः मार्जाराणां नकुलानां चोत्सर्गः गृहेषु स्वैरसञ्चारघटना कर्तव्या । तेषां मार्जारनकुलानां, ग्रहणहिंसायां ग्रहणे हिंसने वा, द्वादशपणो दण्डः । शुनाम् अनिग्रहे च परोपद्रवादनिवारणे च, द्वादशपणो दण्डः । **अन्यत्रारण्यचरेभ्य** इति । वनेचराणां शुनामनिग्रहे दण्डाभावः ।

स्नुहिक्षीरलिप्तानि धान्यानि विसृजेत् । उपनिषद्योगयुक्तानि वा । मूषिककरं वा प्रयुञ्जीत । शान्तिं वा सिद्धतापसाः कुर्युः । पर्वसु च मूषिकपूजाः कारयेत् ।

तेन शलभपक्षिक्रिमिभयप्रतीकारा व्याख्याताः ।

व्यालभये मदनरसयुक्तानि पशुशवानि प्रसृजेत् । मदनकोद्रवपूर्णान्यौदर्याणि वा ।

लुब्धकाः श्वगणिनो वा कूटपञ्जरावपातैश्चरेयुः । आवरणिनः शस्त्रपाणयो व्यालानभिहन्युः । अनभिसर्तुर्द्वादशपणो दण्डः । स एव लाभो व्यालघातिनः ।

पर्वसु च पर्वतपूजाः कारयेत् । तेन मृगपक्षिसङ्घग्राहप्रतीकारा व्याख्याताः ।

स्नुहीत्यादि । स्नुहिक्षीरलिप्तानि धान्यानि, विसृजेद् विकिरेत्, तानि हि भक्षयित्वा मूषिका म्रियेरन्निति । उपनिषद्योगयुक्तानि वा उपनिषदुक्तौषधयुक्तानि वा, धान्यानि विसृजेत् । मूषिककरं वा प्रयुञ्जीत अमुकगृहे प्रतिदिनमेतावन्तो मूषिका देया इति मूषिकरूपं करं वा कल्पयेत् । शान्तिं वा मूषिकशमनार्थं जपहोमादिकर्म वा, सिद्धतापसाः कुर्युः । पर्वसु च पूर्णिमादिषु च, मूषिकपूजाः कारयेत् ।

उक्तरीत्या शलभभयपक्षिभयक्रिमिभयानां प्रतीकारा द्रष्टव्या इत्याह— तेन शलभेत्यादि ।

व्यालभयप्रतीकारमाह— व्यालभय इति । व्यालाः हिंस्रमृगाः व्याघ्रादयः तत्कृते भये, मदनरसयुक्तानि उपनिषदुक्तेन मदनरसेन युक्तानि, पशुशवानि पशूनां गोमहिषमेषादीनां तद्भक्ष्याणां शवानि कुणपान्, प्रसृजेत् तद्गोचरे क्षिपेत् । मदनकोद्रवपूर्णानि वनकोद्रवेण वरकेण च पूर्णानि, औदर्याणि वा पशुकोष्ठान् वा, प्रसृजेत् । व्याला हि तद्भक्षणान्म्रियन्ते ।

लुब्धका इति । व्याधाः, श्वगणिनो वा श्वभिर्मृगान् ये ग्राहयन्ति ते वा, कूटपञ्जरावपातैः कपटकुलायैः तृणादिच्छन्नैः पातनगर्तैश्च, चरेयुः व्यवहरेयुः । आवरणिनः सावरणाः, शस्त्रपाणयस्तीक्ष्णाः, व्यालान् अभिहन्युः । अनभिसर्तुरिति । व्यालेन दुह्यमाणं दृष्ट्वानभिगच्छतः, द्वादशपणो दण्डः । स एव लाभो व्यालघातिन इति । व्यालं हतवते द्वादशपणं पारितोषिकं देयम् ।

पर्वसु चेति । स्फुटार्थम् ।

सर्पभये मन्त्रैरोषधिभिश्च जाङ्गलीविदश्चरेयुः। सम्भूय वोपसर्पान् हन्युः। अथर्ववेदविदो वाभिचरेयुः। पर्वसु च नागपूजाः कारयेत्। तेनोदकप्राणिभयप्रतीकारा व्याख्याताः।

रक्षोभये रक्षोघ्नान्यथर्ववेदविदो मायायोगविदो वा कर्माणि कुर्युः। पर्वसु च वितर्दिच्छत्रोल्लोपिकाहस्तपताकाच्छागोपहारैः चैत्यपूजाः कारयेत्। चरुं वश्चराम इत्येवं सर्वभयेष्वहोरात्रं चरेयुः।

सर्वत्र चोपहतान् पितेवानुगृह्णीयात्।

मायायोगविदस्तस्माद् विषये सिद्धतापसाः।
वसेयुः पूजिता राज्ञा दैवापत्प्रतिकारिणः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधनं चतुर्थाधिकरणे
तृतीयोऽध्यायः उपनिपातप्रतीकारः।
आदितोऽशीतितमः॥

सर्पप्रतीकारमाह — **सर्पभय** इति। तस्मिन् सति, मन्त्रैः गारुडादिभिः, ओषधिभिश्च विषघ्नीभिः, जाङ्गलीविदः विषचिकित्सितकुशलाः; चरेयुः प्रतीकारव्यवहारं कुर्युः। सम्भूय वा, उपसर्पान् दृष्टिगोचरमुपगतान् सर्पान्, हन्युः अर्थात् पौराः। अथर्ववेदविदो वा अभिचारमन्त्राभिज्ञा वा, अभिचरेयुः मन्त्रप्रयोगैः सर्पान् हन्युः। पर्वसु च नागपूजाः सर्पपूजाः, कारयेत्। तेन उक्तप्रकारेण, उदकप्राणिभयप्रतीकाराः व्याख्याताः नक्रादिजलचरप्राणिभयस्य प्रतिविधय ऊह्याः।

रक्षःप्रतीकारमाह—**रक्षोभय** इति। तस्मिन् सति, अथर्ववेदविदो, मायायोगविदो वा, रक्षोघ्नानि रक्षोघातकराणि, कर्माणि कुर्युः। पर्वसु च कृष्णचतुर्दश्यष्टम्यादिषु च, वितर्दिच्छत्रोल्लोपिकाहस्तपताकाच्छागोपहारैः वितर्दिः वेदिका छत्रमातपत्रम् उल्लोपिका भक्ष्यभेदः हस्तपताका क्षुद्रध्वजः छागोपहारः छागबलिदानम् इत्येतैः, चैत्यपूजाः चिताङ्के रक्षःपूजाः, कारयेत्। चरुं वश्चराम इति युष्मभ्यं हविः पचाम इत्येवं वदन्तः सन्तः, सर्वभयेषु, अहोरात्रं नक्तन्दिवं, चरेयुः सञ्चरेयुः।

सर्वत्र चेति। सर्वेषु भयेषु, उपहतान् पीडितान् जनान्, पितेव अनुगृह्णीयाद्, राजा।

श्लोकमाह — **मायेत्यादि** । तस्मात् विपत्प्रतीकारकरणेन जनाः सर्वथानुग्राह्या इत्येतस्मात् कारणात् । शेषं सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
तृतीयोऽध्यायः उपनिपातप्रतीकारः,
आदितोऽशीतितमः ॥

७९. प्रक. गूढाजीविनां रक्षा ।

समाहर्तृप्रणिधौ जनपदरक्षणमुक्तम् । तस्य कण्टकशोधनं वक्ष्यामः ।

समाहर्ता जनपदे सिद्धतापसप्रव्रजितचक्रचरचारणकुहकप्रच्छन्दककार्तान्तिकनैमित्तिकमौहूर्तिकचिकित्सकोन्मत्तमूकबधिरजडान्धवैदेहककारुशिल्पिकुशीलववेशशौण्डिकापूपिकपाकमांसिकौदनिकव्यञ्जनान् प्रणिदध्यात् । ते ग्रामाणामध्यक्षाणां च शौचाशौचं विद्युः । यं चात्र गूढजीविनं शङ्केत, तं सत्रिसवर्णेनापसर्पयेत् । धर्मस्थं प्रदेष्टारं वा विश्वासोपगतं सत्री ब्रूयात् —असौ मे बन्धुरभियुक्तः, तस्यायमनर्थः प्रतिक्रियताम्, अयं चार्थः प्रतिगृह्यताम् इति । स चेत् तथा कुर्यात्, उपदाग्राहक इति प्रवास्येत ।

तेन प्रदेष्टारो व्याख्याताः ।

गूढाजीविनां रक्षेति सूत्रम् । गूढाजीविनः प्रच्छन्नलञ्चग्रहणजीवनाः कूटसाक्ष्यादयः तेषां रक्षा वारणं प्रतिक्रियाभिधीयत इति सूत्रार्थः । प्रकटकण्टकाः प्रच्छन्नकण्टका इति द्विविधेषु कण्टकेषु कार्वादिप्रकटकण्टकरक्षणं पूर्वमुक्तं प्रच्छन्नकण्टकरक्षणं त्वधुनोच्यते ।

समाहर्तृप्रचारे जनपदरक्षणस्योक्तत्वात् पुनरपि रक्षणप्रस्तावः किमर्थ इत्याशङ्क्य गूढकण्टकेभ्यो रक्षणस्यानुक्तस्याभिधानार्थ इत्यभिप्रायवानाह— **समाहर्तृप्रणिधावित्यादि** ।

गूढकण्टकपरिज्ञानार्थमपसर्पप्रणिधानमाह — **समाहर्तेत्यादि** । सिद्धतापसेत्यादिपदे चक्रचरः अश्वस्तनिकः, प्रच्छन्दकः स्वच्छन्दचरः, वेशो वेश्यावाटचरः, शेषाः प्रतीताः, । **त इत्यादि** । ते सिद्धतापसादिव्यञ्जनाः प्रणिहिताः, ग्रामाणां ग्राममुख्यानाम् , अध्यक्षाणां च, शौचाशौचं विद्युः । **यं चेति** । अत्र ग्राममुख्येषु अध्यक्षेषु च, यं गूढजीविनं शङ्केत, तं, सत्रिसवर्णेन सत्रिणा सवर्णेन, अपसर्पयेत् सापसर्पं कुर्यात् । धर्मस्थं, 'प्रदेष्टारं वे'ति प्रक्षिप्तं प्रतिभाति । विश्वासोपगतं विश्वस्तं, सत्री प्रणिहितः, ब्रूयात् । वचनप्रकारः— **असौ मे बन्धुरित्यादि** । स्पष्टार्थम् ।

तेनेति । उक्तेन धर्मस्थविधानेन, प्रदेष्टारः कण्टकशोधनाधिकृताः, व्याख्याताः उक्तविधाना बोद्धव्याः ।

ग्रामकूटमध्यक्षं वा सत्री ब्रूयात् — असौ जाल्मः प्रभूतद्रव्यः, तस्यायमनर्थः। तेनैनमाहारयस्वेति । स चेत् तथा कुर्याद्, उत्कोचकः इति प्रवास्येत ।

कृतकाभियुक्तो वा कूटसाक्षिणोऽभिज्ञातानर्थवैपुल्येन आरभेत । ते चेत् तथा कुर्युः, कूटसाक्षिण इति प्रवास्येरन् ।

तेन कूटश्रावणकारका व्याख्याताः ।

यं वा मन्त्रयोगमूलकर्मभिः श्माशानिकैर्वा संवननकारकं मन्येत, तं सत्री ब्रूयात्—अमुष्य भार्यां स्नुषां दुहितरं वा कामये । सा मां प्रतिकामयताम्, अयं चार्थः प्रतिगृह्यताम् इति। स चेत् तथा कुर्यात् संवननकारक इति प्रवास्येत ।

तेन कृत्याभिचारशीलौ व्याख्यातौ ।

यं वा रसस्य वक्तारं क्रेतारं विक्रेतारं भैषज्याहारव्यवहारिणं वा रसदं मन्येत, तं सत्री ब्रूयात्—असौ मे शत्रुस्तस्योपघातः

ग्रामकूटमिति । ग्राममुख्यम्, अध्यक्षं वा, सत्री ब्रूयात्, किमिति, असौ जाल्मोऽसमीक्ष्यकारी, प्रभूतद्रव्यः प्रचुरधनः । तस्य अयम् **अनर्थः** आपतित इति शेषः । तेन उपस्थितानर्थापदेशेन, एनं धनिकम्, आहारयस्व अर्थात् सर्वस्वम्, इति । **स चेदि**त्यादि स्पष्टम् ।

कूटसाक्षिपरीक्षणमाह— **कृतकाभियुक्तो वे**ति । मृषाभियुक्तः सत्री, कूटसाक्षिणः अभिज्ञातान् शङ्कितान्, अर्थवैपुल्येन प्रभूतधनार्पणोपधया, आरभेत प्रलोभयेत् । **ते चेदि**त्यादि स्पष्टम् ।

तेनेति । उक्तेन कूटसाक्षिविधानेन, कूटश्रावणकारकाः अगृहीत एव ऋणे 'ऋणममुकेन मत्सकाशादेतावद् गृहीतमि'त्येवं मृषार्थे प्रातिवेशिकानानुवेशिकांश्च साक्ष्यार्थे ये श्रावयन्ति त एते कूटश्रावयितारः, व्याख्याताः उक्तविधाना बोद्धव्याः ।

यं वेत्यादि । यं वा पुरुषं, मन्त्रयोगमूलकर्मभिः मन्त्रोपायैरौषधप्रयोगैश्च, श्माशानिकैर्वा श्मशानकरणीयकर्मभिर्वा, संवननकारकं वशीकरणकर्तारं मन्येत, तं सत्री ब्रूयात्, किमिति, **अमुष्य भार्यामि**त्यादि । सुबोधम् ।

तेनेत्यादि । **कृत्याभिचारशीलौ** कृत्याशीलः पिशाचावेशनकर्ता अभिचारशीलो मन्त्रप्रयोगेण मारणशीलः ।

क्रियताम् अयं चार्थः प्रतिगृह्यताम् इति । स चेत् तथा कुर्यात्, रसद इति प्रवास्येत ।

तेन मदनयोगव्यवहारी व्याख्यातः ।

यं वा नानालोहक्षाराणाम् अङ्गारभस्त्रासन्दंशमुष्टिकाधिकरणीबिम्बटङ्कमूषाणामभीक्ष्णं क्रेतारं मषीभस्मधूमदिग्धहस्तवस्त्रलिङ्गं कर्मारोपकरणसंवर्गं कूटरूपकारकं मन्येत, तं सत्री शिष्यत्वेन संव्यवहारेण चानुप्रविश्य प्रज्ञापयेत् । प्रज्ञातः कूटरूपकारक इति प्रवास्येत ।

तेन रागस्यापहर्ता कूटसुवर्णव्यवहारी च व्याख्यातः ।

आरब्धारस्तु हिंसाया गूढाजीवास्त्रयोदश ।
प्रवास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
चतुर्थोऽध्यायः गूढाजीविनां रक्षा,
आदितं एकाशीतितमः ॥

यं वा रसस्येत्यादि । रसस्य विषस्य । भैषज्याहारव्यवहारिणं भेषजाभ्यवहार्ययोर्विषोपयोजनशीलम् । शेषं सुगमम् ।

तेनेति । उक्तेन रसदविधानेन, मदनयोगव्यवहारी मदनयोगः मदजनकौषधदानोपायः तद्व्यवहारी, व्याख्यातः ।

यं वेति । यं वा, नानालोहक्षाराणां नानाजातीयानां लोहानां क्षाराणां च, अङ्गारादीनाम् अङ्गारो निर्वाणाग्निकमिन्धनं भस्त्रा ध्मानदृतिः सन्दंशः कङ्कमुखः मुष्टिका कर्मारोपकरणभेदः अधिकरणी लोहाभिघाताधारः बिम्बः प्रतिमा टङ्कः दारणः मूषा ताम्राद्यावर्तनी इत्येतासाम्, अभीक्ष्णं क्रेतारं, मषीभस्मधूमदिग्धहस्तवस्त्रलिङ्गं मष्याद्युपलिप्तहस्तवस्त्रचिह्नं, कर्मारोपकरणसंवर्गम् अयस्कारकर्मसाधनसम्पन्नं, कूटरूपकारकं मन्येत, तं सत्री शिष्यत्वेन, संव्यवहारेण च परस्परव्यवहरणेन च, अनुप्रविश्य आश्रित्य, प्रज्ञापयेत् ईदृग्व्यापारोऽयमिति राज्ञे निवेदयेत् । प्रज्ञातः तथा विदितः, कूटरूपकारक इति, प्रवास्येत ।

तेनेति । उक्तेन विधानेन, रागस्यापहर्ता स्वर्णादिवर्णकस्य हानिकर्ता, कूटसुवर्णव्यवहारी च, व्याख्यातः उक्तविधानो द्रष्टव्यः ।

आरब्धारस्त्विति । हिंसायाः लोकोपद्रवस्य, आरब्धारः कर्तारः, गूढाजीवाः त्रयोदश धर्मस्थः प्रदेष्टा ग्राममुख्यः अध्यक्षः कूटसाक्षी कूटश्रावकः संवननकर्ता कृत्याशीलः अभिचारशीलः रसदः मदनयोगव्यवहर्ता कूटरूपकर्ता कूटसुवर्णव्यवहारीत्युक्तास्त्रयोदशसंख्याः, प्रवास्याः स्वदेशान्निष्कासयितव्याः । दोषविशेषतो निष्क्रयार्थं वा दद्युः अपराधतारतम्येन दण्डं च दद्युः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
चतुर्थोऽध्यायः गूढाजीविनां रक्षा,
आदित एकाशीतितमः ॥

८० प्रक. सिद्धव्यञ्जनैर्माणवप्रकाशनम् ।

सत्त्रिप्रयोगादूर्ध्वं सिद्धव्यञ्जना माणवा माणवविद्याभिः प्रलोभयेयुः । प्रस्वापनान्तर्धानद्वारापोहमन्त्रेण प्रतिरोधकान, संवननमन्त्रेण पारतल्पिकान ।

तेषां कृतोत्साहानां महान्तं सङ्घमादाय रात्रावन्यं ग्राममुद्दिश्यान्यं ग्रामं कृतकस्त्रीपुरुषं गत्वा ब्रूयुः — इहैव विद्याप्रभावो दृश्यताम् । कृच्छ्रः परग्रामो गन्तुम् इति । ततो द्वारापोहमन्त्रेण द्वाराण्यपोह्य, 'प्रविश्यताम्' इति ब्रूयुः । अन्तर्धानमन्त्रेण जाग्रतामारक्षिणां मध्येन माणवानतिक्रामयेयुः । प्रस्वापनमन्त्रेण प्रस्वापयित्वा रक्षिणः

सिद्धव्यञ्जनैर्माणवप्रकाशनमिति सूत्रम् । सिद्धव्यञ्जनाः मुण्डजटिलादयः पूर्वोक्ताः तैः माणवानां चोरपारदारिकादीनां कुपुरुषाणां प्रकाशनमिति सूत्रार्थः । कण्टकविशेषपरिज्ञानोपायः सत्त्रिप्रयोग उक्तः, अपर इदानीमभिधीयते ।

सत्त्रिप्रयोगादिति । तत ऊर्ध्वं, सिद्धव्यञ्जना माणवाः, माणवविद्याभिः प्रस्वापनान्तर्धानादिकारिभिः कुमन्त्रैः, प्रलोभयेयुः, अर्थात् कण्टकान् । तत्र विशेषमाह — **प्रस्वापनेत्यादि** । प्रतिरोधकान् चोरान् । पारतल्पिकान् पारदारिकान् ।

तेषामित्यादि । तेषां प्रतिरोधकपारतल्पिकानाम् । कृतोत्साहानां स्वव्यापाराकुतोभयानुष्ठानमार्गप्रदर्शकसिद्धलाभजनितोत्साहानाम्, महान्तं सङ्घम् आदाय रात्रौ अन्यं ग्रामम् उद्दिश्य, प्रस्थिता इति शेषः, अन्यम् उद्दिष्टग्रामादितरं, ग्रामं, कृतकस्त्रीपुरुषं कृतकाः कृत्रिमाः स्वप्रवृत्त्यानुकूल्याय दत्तसंकेताः स्वविधेयाः स्त्रीपुरुषा यस्मिंस्तं तथाभूतं, गत्वा ब्रूयुः । किमिति, इहैव अस्मिन्नेव ग्रामे, विद्याप्रभावः प्रस्वापनादिमन्त्रमहिमा, दृश्यताम् । परग्रामो गन्तुं कृच्छ्रः श्रमवशाद् विदूरत्वाच्चाशक्यः इति । ततो द्वारापोहमन्त्रेण द्वारार्गलापोहनमन्त्रेण, द्वाराण्यपोह्य पूर्वसङ्केतापोहितार्गलेष्वेव द्वारेषु अर्गलापोहनमभिनीय, प्रविश्यतामिति ब्रूयुः । अन्तर्धानमन्त्रेण, जाग्रतां जाग्रत्त्वेऽपि संकेतवशादपश्यन्तमिवात्मानमभिनयताम्, आरक्षिणां मध्येन, माणवान् अतिक्रामयेयुः । प्रस्वापनमन्त्रेण, रक्षिणः, प्रस्वापयित्वा अस्वपत एव स्वापाभिनयं कारयित्वा, शय्याभिः रक्षिशयनीयवर्त्मना, माणवैः सञ्चारयेयुः । प्रस्वापयित्वेति

शय्याभिर्माणवैः सञ्चारयेयुः । संवननमन्त्रेण भार्याव्यञ्जनाः परेषां माणवैः संमोदयेयुः ।

उपलब्धविद्याप्रभावानां पुरश्चरणाद्यादिशेयुरभिज्ञानार्थम् ।

कृतलक्षणद्रव्येषु वा वेश्मसु कर्म कारयेयुः, अनुप्रविष्टान् वैकत्र ग्राहयेयुः ।

कृतलक्षणद्रव्यक्रयविक्रयाधानेषु योगसुरामत्तान् वा ग्राहयेयुः । गृहीतान् पूर्वापदानसहायाननुयुञ्जीत ।

पुराणचोरव्यञ्जना वा चोराननुप्रविष्टास्तथैव कर्म कारयेयुः ग्राहयेयुश्च ।

गृहीतान् समाहर्ता पौरजानपदानां दर्शयेत् — चोरग्रहणीं विद्यामधीते राजा; तस्योपदेशादिमे चोरा गृहीताः; भूयश्च ग्रहीष्यामि; वारयितव्यो वः स्वजनः पापाचारः इति ।

व्यवकरणं समासाविवक्षया । प्रतिरोधकप्रत्यायकमुक्त्वा पारतल्पिकप्रत्यायकमाह — संवननेत्यादि । संवननमन्त्रेण, परेषां भार्याव्यञ्जनाः परदारच्छलधारिणीः पूर्वदत्तसंकेता एव वनिताः, माणवैः, संमोदयेयुः वशीकरणाभिनयद्वारेण सङ्गसुखमनुभावयेयुः ।

उपलब्धविद्याप्रभावानामिति । एवं प्रत्यक्षदृष्टमन्त्रमाहिम्नां, पुरश्चरणादि पुरश्चरणप्रभृतिकं मन्त्रसिद्ध्यङ्गं कर्म, आदिशेयुः, अभिज्ञानार्थं स्मरणार्थम् ।

कृतलक्षणद्रव्येषु वेति । कृतस्वामिचिह्नद्रव्योपेतेषु, वेश्मसु, कर्म चौर्यं, कारयेयुः, पूर्वोक्तान् गृहीतमन्त्रान् माणवान् । अनुप्रविष्टान् वा अन्तः प्रविष्टांश्च, एकत्र कचिद् गृहे, ग्राहयेयुः ।

कृतलक्षणद्रव्यक्रयविक्रयाधानेष्विति । कृतलक्षणद्रव्याणां मुष्टानां क्रयणविक्रयणाधीकरणावसरेषु, योगसुरामत्तान् वा भेषजयुक्तमद्यपानमत्तान् वा, ग्राहयेयुः । गृहीतान् तथाग्रहणं प्राप्तान् माणवान् , पूर्वापदानसहायान् पूर्वकृतानि चौर्याणि चौर्यसहायांश्च, अनुयुञ्जीत पृच्छेत् ।

पुराणचोरव्यञ्जना वेति । पुरातनतस्करच्छद्मानो वा भूत्वा, चोरान् अनुप्रविष्टाः, तथैव पूर्वोक्तरीत्यैव, कर्म कारयेयुः ग्राहयेयुश्च ।

गृहीतानिति । ग्रहणं प्राप्तांश्चोरान्, समाहर्ता, पौरजानपदानां दर्शयेत् । किं कृत्वा, चोरग्रहणीं विद्यामधीते राजेत्याद्युक्त्वा ।

यं चात्रापसर्पोपदेशेन शम्याप्रतोदादीनामपहर्तारं जानीयात्, तमेषां प्रत्यादिशेद् — एष राज्ञः प्रभाव इति।

पुराणचोरगोपालकव्याधश्वगणिनश्च वनचोराटविकाननुप्रविष्टाः प्रभूतकूटहिरण्यकुप्यभाण्डेषु सार्थव्रजग्रामेष्वेनानभियोजयेयुः। अभियोगे गूढबलैर्घातयेयुः, मदनरसयुक्तेन वा पथ्यादनेन। अनुगृहीतलोप्त्रभारानायतगतपरिश्रान्तान् प्रस्वपतः प्रहवणेषु योगसुरामत्तान् वा ग्राहयेयुः।

पूर्ववच्च गृहीत्वैनान् समाहर्ता प्ररूपयेत्।
सर्वज्ञख्यापनं राज्ञः कारयन् राष्ट्रवासिषु॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
पञ्चमोऽध्यायः सिद्धव्यञ्जनैर्माणवप्रकाशनम्,
आदितो ऽशीतितमः॥

यं चात्रेति। यं च जनम्, अत्र पुरादौ, शम्याप्रतोदादीनाम् अपहर्तारं युगकीलकतोत्रादीनां चोरयितारम्, अपसर्पोपदेशेन जानीयात्, तम्, एषां पौरजानपदानां, प्रत्यादिशेत् प्रज्ञापयेत्, किं कृत्वा, एष राज्ञः प्रभाव इति अत्यल्पविषयस्यापि चौर्यस्येदं परिज्ञानं राज्ञो माहात्म्यकृतमित्युक्त्वा।

वनचोरग्रहणोपायमाह—पुराणचोरेत्यादि। पुराणचोराः गोपालकाः व्याधाः श्वगणिनश्च, राजपुरुषभूता इति शेषः, वनचोराटविकान् वनचोरान् अटवीचरान् पुलिन्दादींश्च, अनुप्रविष्टाः, प्रभूतकूटहिरण्यकुप्यभाण्डेषु प्रभूतानि प्रचुराणि कूटानि फालानि हिरण्यानि कुप्यभाण्डानि च येषु तेषु तथाभूतेषु, सार्थव्रजग्रामेषु वणिक्सङ्घगतागतमार्गेषु गोष्ठेषु ग्रामेषु च, एनान् वनचोराटविकान्, अभियोजयेयुः चौर्यायोद्योजयेयुः। अभियोगे आरब्धे सति, गूढबलैः गूढसैन्यैः, घातयेयुः। मदनरसयुक्तेन मोहजनकविषयुक्तेन, पथ्यादनेन वा पथिभोजनेन वा, घातयेयुः। अनुगृहीतलोप्त्रभारान् उपगृहीतमुष्टद्रव्यभारान्, आयतगतपरिश्रान्तान् दीर्घाध्वगमनपरिखिन्नान्, अत एव प्रस्वपतः एनान्, ग्राहयेयुः। प्रहवणेषु तुष्टिभोजनदानेषु, योगसुरामत्तान् वीर्यवन्मद्यपानमत्तान् वा, ग्राहयेयुः।

अध्यायान्ते श्लोकमाह — पूर्ववच्चेति। समाहर्ता, पूर्ववत् पूर्वोक्तपुरराष्ट्रचोरवत्, एनान् वनचोराटविकान्, गृहीत्वा, राज्ञः सर्वज्ञख्यापनं 'चोर-

ग्रहणीं विद्यामधीते राजा सर्वांश्चोरान् जानाति तत्प्रभावादिमे चोरा गृहीताः' इत्येवं सर्वज्ञत्वख्यापनं, कारयन्, राष्ट्रवासिषु, प्ररूपयेद् दर्शयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
पञ्चमोऽध्यायः सिद्धव्यञ्जनैर्माणवप्रकाशनम्.
आदितो द्व्यशीतितमः ॥

८१. प्रक. शङ्कारूपकर्माभिग्रहः ।

सिद्धप्रयोगादूर्ध्वं शङ्कारूपकर्माभिग्रहः ।

क्षीणदायकुटुम्बमल्पनिर्वेशं विपरतिदेशजातिगोत्रनामकर्मापदेशं प्रच्छन्नवृत्तिकर्माणं मांससुराभक्ष्यभोजनगन्धमाल्यवस्त्रविभूषणेषु प्रसक्तमतिव्ययकर्तारं पुंश्चलीद्यूतशौण्डिकेषु प्रसक्तमभीक्ष्णप्रवासिनमविज्ञातस्थानगमनमेकान्तारण्यनिष्कुटविकालचारिणं प्रच्छन्ने सामिषे वा देशे बहुमन्त्रसन्निपातं सद्यःक्षतव्रणानां गूढप्रतिकारयितारम् अन्तर्गृहनित्यमभ्यधिगन्तारं कान्तापरं परपरिग्रहाणां परस्त्रीद्रव्यवेश्मनामभी-

---

शङ्कारूपकर्माभिग्रह इति सूत्रम् । आत्मनः परान् प्रति परेषामात्मानं प्रति चेति शङ्का द्विरूपा रूपं लोप्त्रं कर्म सन्धिच्छेदादि एतैर्लिङ्गैरभिग्रहः चोराणां ग्रहणमभिधीयत इति सूत्रार्थः ।

गूढाजीविनां रक्षा प्रक्रान्ता । तत्र सिद्धव्यञ्जनादिभिर्ग्रहीतुं शक्यानां गूढाजीविनां ग्रहणप्रकार उक्तः, तदग्राह्याणां शङ्कारूपकर्मभिर्ग्रहणप्रकार इदानीमुच्यते ।

सिद्धप्रयोगादूर्ध्वमिति । सिद्धव्यञ्जनप्रयोगात् परतः, शङ्कारूपकर्माभिग्रहः, वक्ष्यत इति क्रियाध्याहारः ।

शङ्काभिग्रहं तावदाह — **क्षीणदायकुटुम्बमिति** । दायः कुलक्रमागतं द्रव्यं कुटुम्बं कृषिः तदुभयं क्षीणं यस्य तं तथाभूतम्, अल्पनिर्वेशं भक्तव्ययापर्याप्तभृतिं कर्माननुरूपनिहीनभृतिं वा, विपरीतदेशजातिगोत्रनामकर्मापदेशम् अन्यथाकल्पितदेशजात्यादिव्यवहारं, प्रच्छन्नवृत्तिकर्माणम् अन्याविदितवृत्त्यर्थकर्माणं, मांससुरादिष्वष्टसु, प्रसक्तं प्रकर्षेण सक्तम्, अतिव्ययकर्तारं, पुंश्चलीद्यूतशौण्डिकेषु प्रसक्तम्, अभीक्ष्णप्रवासिनं पौनःपुन्यप्रवासशीलम्, अविज्ञातस्थानगमनं क्व तिष्ठति क्व गच्छतीत्यन्याविदितस्थानगमनम्, एकान्तारण्यनिष्कुटविकालचारिणं विजने वने गृहारामे च विकाले चरणशीलं, प्रच्छन्ने सामिषे वा देशे बहुमन्त्रसन्निपातम् अन्यदर्शनागोचरे देशे सामिषे सद्रव्ये धनिकगृहनिकटदेशे वा बहुमन्त्रयन्तं बहुकृत्वो गच्छन्तं च, सद्यःक्षतव्रणानां गूढप्रतिकारयितारं व्रणकारणोद्भेदशङ्कया रहसि चिकित्सयितारम्, अन्तर्गृहनित्यं गर्भगृहनित्योपविष्टम्, अभ्यधिगन्तारम् आगच्छतोऽभिमुखं झडिति गत्वा प्रतिनिवर्तमानं, कान्तापरं स्त्रीलोलं, परपरिग्रहाणां परपरिज-

क्ष्णप्रष्टारं कुत्सितकर्मशस्त्रोपकरणसंसर्गं विरात्रे छन्नकुड्यच्छायासञ्चारिणं विरूपद्रव्याणामदेशकालविक्रेतारं जातवैराशयं हीनकर्मजातिं विगूह्यमानरूपं लिङ्गेनालिङ्गिनं लिङ्गिनं वा भिन्नाचारं पूर्वकृतापदानं स्वकर्मभिरपदिष्टं नागरिकमहामात्रदर्शने गूहमानमपसरन्तमनुच्छ्वासोपवेशिनमाविग्नं शुष्कभिन्नस्वरमुखवर्णं शस्त्रहस्तमनुष्यसम्पातत्रासिनं हिंस्रस्तेननिधिनिक्षेपापहारवरप्रयोगगूढाजीविनामन्यतमं शङ्केतेति शङ्काभिग्रहः ।

रूपाभिग्रहस्तु । नष्टापहृतमविद्यमानं तज्जातव्यवहारिषु निवेदयेत् । तच्चेन्निवेदितमासाद्य प्रच्छादयेयुः, सांचिव्यकरदोषमाप्नुयुः ।

नानां, परस्त्रीद्रव्यवेश्मनाम् अभीक्ष्णप्रष्टारं, कुत्सितकर्मशस्त्रोपकरणसंसर्गं मारणचौर्यादिगर्हितकर्मोपयोगिषु शस्त्रेषु उपकरणेषु परिचयवन्तं, शास्त्रेत्यपि पाठः । विरात्रे अर्धरात्रे, छन्नकुड्यच्छायासञ्चारिणं छन्नं यथा भवति तथा कुड्यच्छायायां सञ्चरणशीलं, विरूपद्रव्याणां विनष्टस्वरूपाणां द्रव्याणाम्, अदेशकालविक्रेतारम् अदेशे अकाले च विक्रयकारिणं, जातवैराशयं, हीनकर्मजातिं, विगूह्यमानरूपं छाद्यमानस्वरूपं, लिङ्गेनालिङ्गिनम् अनुपात्तलिङ्गिचिह्नं लिङ्गिव्रतेन युक्तं, लिङ्गिनं वा भिन्नाचारम् उपात्तलिङ्गिचिह्नं च लिङ्गिव्रतरहितं, पूर्वकृतापदानं पूर्वमन्यत्र कृतचौर्यं, स्वकर्मभिरपदिष्टं परदारग्रहणादिभिः ख्यातं, नागरिकमहामात्रदर्शने नगररक्षिपुरुषस्य महामात्रस्य च दर्शने, गूहमानमपसरन्तं स्वरूपं छादयन्तं निलीय चरन्तं च, अनुच्छ्वासोपवेशिनं तूष्णीं बहिर्भूम्यादावुपवेशनशीलम्, आविग्नं भीतं, शुष्कभिन्नस्वरमुखवर्णं शुष्कः क्षामः भिन्नः अयथाप्रकारश्च स्वरो मुखवर्णश्च यस्य तं तथाभूतं, शस्त्रहस्तमनुष्यसम्पातत्रासिनं शस्त्रपाणिपुरुषागमनभीरुकम्, एवम्भूतविशेषणैर्यथासम्भवं युक्तं जनं, हिंस्रस्तेनादीनां हिंस्रो घातुकः स्तेनश्चोरः निधिनिक्षेपापहारो निधिनिक्षेपयोरपहर्ता वरप्रयोगः वरः क्रोधस्तन्निमित्तः प्रयोगः शस्त्रप्रयोगो यस्य स तथाभूतः गूढाजीवी प्रतीतः इत्येतेषाम् अन्यतमं, शङ्केत । 'वरो ना भूपजामात्रोर्देवादेरीप्सिते क्रुधि' इति केशवः । इति शङ्काभिग्रह इति । व्याख्यात इति शेषः ।

रूपाभिग्रहस्त्विति । वक्ष्यत इति शेषः । नष्टापहृतमिति । प्रमादभ्रष्टं चोरेणापहृतं द्रव्यम्, अविद्यमानं, तज्जातव्यवहारिषु तज्जातिद्रव्यव्य-

अजानन्तोऽस्य द्रव्यस्यातिसर्गेण मुच्येरन्। न चानिवेद्य संस्थाध्यक्षस्य पुराणभाण्डानामाधानं विक्रयं वा कुर्युः।

तच्चेन्निवेदितमासाद्येत, रूपाभिगृहीतमागमं पृच्छेत्—कुतस्ते लब्धम् इति। स चेद् ब्रूयाद्—दायाद्यादवाप्तममुष्माल्लब्धं, क्रीतं कारितमाधिप्रच्छन्नम् अयमस्य देशः कालश्चोपसम्प्राप्तः, अयमस्यार्घः प्रमाणं लक्षणं मूल्यं च इति, तस्यागमसमाधौ मुच्येत।

नाष्टिकश्चेत् तदेव प्रतिसन्दध्यात्, यस्य पूर्वो दीर्घश्च परिभोगः शुचिर्वा देशस्तस्य द्रव्यमिति विद्यात्। चतुष्पदानामपि हि

वहारिषु, निवेदयेत्। निवेदितम् आसाद्य प्रच्छादयेयुश्चेत्, साचिव्यकरदोषं **चौर्यसाहाय्यकारिदण्डम्,** आप्नुयुः। अजानन्तः अमुकस्येदमित्यविदन्तः, **अस्य द्रव्यस्य,** अतिसर्गेण अर्पणेन, मुच्येरन् अपराधमुक्ताः स्युः। **न चेति।** संस्थाध्यक्षस्य पण्यसंस्थाधिकारिणः, अनिवेद्य, पुराणभाण्डानाम्, आधानं विक्रयं वा, न च कुर्युः।

तच्चेदिति। निवेदितं तद् नष्टापहृतम्, आसाद्येत चेत्, रूपाभिगृहीतं जनम्, आगमं पृच्छेत्— **कुतस्ते** लब्धमिति। स चेद् ब्रूयात्, किमिति, दायाद्यादवाप्तं दायादभावाल्लब्धम्, अमुष्माल्लब्धं, क्रीतं, कारितं नवनिर्मापितम्, अाधिप्रच्छन्नम् आधीकरणवशादियन्तं कालमप्रकाशतया स्थितम्, अयम् अस्य देशः अस्यार्थस्यायं साक्षी यद्वा अस्यायं प्रदेशः, उपसंप्राप्तः उपसम्प्राप्तिमान्, अस्यायं कालश्च उपसम्प्राप्तिमान्, अयम् अस्य अर्घो रूपमूल्यम्, इदं प्रमाणं लक्षणं मूल्यं च इदमस्य सुवर्णकर्षादिमानम् इदमस्य चिह्नम् इदमस्य प्रकृतिमूल्यम्, इति, तर्हीति शेषः, तस्य द्रव्यस्य, आगमसमाधौ आगमसमर्थने सति, मुच्येत रूपाभिगृहीतः। अन्यथा तु तस्य चोरदण्ड इत्यार्थम्।

नाष्टिकश्चेदिति। नाष्टिकोऽभियोक्ता, तदेव प्रतिसन्दध्याच्चेत् रूपाभिगृहीतप्रयुक्तमेव समाधानं यदि प्रतिसन्दधीत, यस्य रूपाभिगृहीतनाष्टिकयोरन्यतरस्य, पूर्वो, दीर्घश्च, परिभोगः अनुभवः, शुचिर्वा देशः विश्वास्यवचनश्च साक्षी, तस्य द्रव्यमिति, विद्यात् निर्णयेत्। न च तदीयत्वमसम्भावितमित्याह—**चतुष्पदानामपि हीति।** तेषामपि हि भिन्नयोन्यादिप्रसूतानां, रूपलिङ्गसामान्यम् आकृतिसादृश्यं चिह्नसादृश्यं च, भवति। एवं स्थिते इति

रूपलिङ्गसामान्यं भवति, किमङ्गपुनरेकयोनिद्रव्यकर्तृप्रसूतानां कुप्याभरणभाण्डानाम् इति ।

स चेद् ब्रूयात् — याचितकमवक्रीतकमाहितकं निक्षेपमुपनिधिं वैयापृत्यभर्म वामुष्येति, तस्यापसारप्रतिसन्धानेन मुच्येत ।

नैवम् इत्यपसारो वा ब्रूयाद्, रूपाभिगृहीतः परस्य दानकारणमात्मनः प्रतिग्रहकारणमुपलिङ्गनं वा दायकदापकनिबन्धकप्रतिग्राहकोपदेष्टृभिरुपश्रोतृभिर्वा प्रतिसमानयेत् ।

उज्झितप्रनष्टनिष्पतितोपलब्धस्य देशकाललाभोपलिङ्गनेन शुद्धिः । अशुद्धस्तच्च तावच्च दण्डं दद्यात् । अन्यथा स्तेयदण्डं भजेत इति रूपाभिग्रहः ।

शेषः, एकयोनिद्रव्यकर्तृप्रसूतानां, कुप्याभरणभाण्डानां कुप्यनिर्मितभूषणपात्राणां, किमङ्गपुनः किमु वक्तव्यं, तेषां रूपलिङ्गसामान्यं सुतरां भवतीत्यर्थः । इति अतः कारणात् ।

स चेदिति । स रूपाभिगृहीतः, याचितकं याच्ञया लब्धम्, अवक्रीतकं भाटकगृहीतम्, आहितकम् आधित्वेन गृहीतं, निक्षेपं भूषणभाण्डनिर्माणार्थं निक्षिप्तम्, उपनिधिं रक्षणाय विश्वासाद् दत्तं, वैयापृत्यभर्म वा कर्मणः कृतस्य दत्तां भृतिं वा, अमुष्येति ब्रूयाच्चेत् अमुकपुरुषसम्बन्धीत्येवं वदेच्चेत्, अर्थान्नाष्टिकार्थितं रूपं, तस्य द्रव्यस्य, अपसारप्रतिसन्धानेन मदीयमेवेदं याचितकादीत्यपसारपुरुषकृतेनाभ्युपगमेन, मुच्येत, अर्थात् सः ।

नैवमित्यपसारो वा ब्रूयादिति । न मे याचितकादीत्यपसारो यदि वदेत्, रूपाभिगृहीतः, परस्य अपसारस्य, दानकारणम्, आत्मनः प्रतिग्रहकारणम्, उपलिङ्गनं वा लिङ्गैरभिज्ञापनं च, प्रतिसमानयेत् निरूपयेत्, कैः, दायकदापकनिबन्धकप्रतिग्राहकोपदेष्टृभिः उपश्रोतृभिर्वा, वाशब्दश्चार्थे । तत्र निबन्धको लेखकः, उपदेष्टा लेखनीयवाक्यवक्ता, शेषाः प्रतीताः ।

उज्झितेत्यादि । उज्झितप्रनष्टनिष्पतितोपलब्धस्य उज्झितं विस्मृतं वस्त्राभरणादि प्रनष्टं स्वयूथच्युतं गोमहिषादि निष्पतितं छन्नापसृतं दासीदासादि तस्योपलब्धस्य, देशकाललाभोपलिङ्गनेन देशादीनां विभावनेन, शुद्धिः अभियोक्तुः । अशुद्धः अविभावितदेशादिः सः, तच्च तावच्च दण्डं दद्यात् यत् स्वीयमित्युक्तं तत्समम् अन्यच्च तत्समपरिमाणं दण्डं दद्यात्, अभियोक्ता ।

कर्माभिग्रहस्तु । मुषितवेश्मनः प्रवेशनिष्कसनमद्वारेण, द्वारस्य सन्धिना बीजेन वा वेधम्, उत्तमागारस्य जालवातायननीव्रवेधम्, आरोहणावतरणे च कुड्यस्य वेधम् उपखननं वा गूढद्रव्यनिक्षेपग्रहणोपायमुपदेशोपलभ्यम् अभ्यन्तरच्छेदोत्करपरिमर्दोपकरणमभ्यन्तरकृतं विद्यात् । विपर्यये बाह्यकृतम् । उभयत उभयकृतम् ।

अभ्यन्तरकृते पुरुषमासन्नं व्यसनिनं क्रूरसहायं तस्करोपकरणसंसर्गं स्त्रियं वा दरिद्रकुलामन्यप्रसक्तां वा परिचारकजनं वा तद्विधाचारमतिस्वप्नं निद्राक्लान्तमाधिक्लान्तमाविग्नं शुष्कभिन्नस्वरमुखवर्णमनवस्थितमतिप्रलापिनमुच्चारोहणसंरब्धगात्रं विलूननिघृष्टभिन्नपाटित-

---

अन्यथा स्तेयदण्डं भजेत देशाद्युपलिङ्गनेन स्वत्वस्याविभावने, चौर्यदण्डभाग् भवति । इति **रूपाभिग्रह** इति । व्याख्यात इति शेषः ।

कर्माभिग्रहस्त्विति । उच्यत इति शेषः । चौर्यं नाम त्रिविधम् — आभ्यन्तरकृतं बाह्यकृतम् उभयकृतमिति । तत्राभ्यन्तरचौर्यमाह — **मुषितवेश्मन** इति । चोरितगृहस्य, अद्वारेण पश्चाद्द्वारेण प्रवेशनिष्कसनं प्रवेशो निर्गमनं च, द्वारस्य सन्धिना सुरुङ्गया बीजेन वेधसाधनेन वा वेधं निर्माणम्, उत्तमागारस्य उपरिभूमिकायाः जालवातायननीव्रवेधम् आनायगवाक्षवलीकभेदनम्, आरोहणावतरणे च कुड्यस्य वेधं पदन्यासस्थानकरणं, **गूढद्रव्यनिक्षेपग्रहणोपायं** कुड्यगूहितस्य द्रव्यनिक्षेपस्य ग्रहणं प्रत्युपायभूतम्, **उपदेशोपलभ्यम्** उपदेशैकविज्ञेयम्, अभ्यन्तरच्छेदोत्करपरिमर्दोपकरणम् अन्तर्गतकुड्यच्छेदपांसूत्करपरिमर्दनसाधनम्, उपखननं वा कुड्यसमीपभूखननं वा, अभ्यन्तरकृतम् आभ्यन्तरजनकृतं, विद्याद् अभ्यूहेत् । विपर्यये उक्तलक्षणवैपरीत्ये, बाह्यकृतं विद्यात् । उभयतः उभयलक्षणसत्त्वे, उभयकृतं विद्यात् ।

अभ्यन्तरकृतत्वशङ्कायां परीक्षणमाह—**अभ्यन्तरकृत** इति । अभ्यन्तरजनकृतं चौर्यमित्यूहे सति, पुरुषम् आसन्नम् आभ्यन्तरं, परीक्षेत, कथम्भूतं परीक्षेत, व्यसनिनं द्यूतमद्यप्रसक्तं, क्रूरसहायं क्रूरास्त्यक्तात्मानस्तेषां सहायं, तस्करोपकरणसंसर्गं, स्त्रियं वा दरिद्रकुलाम्, अन्यप्रसक्तां स्त्रियं वा, परिचारकजनं वा तद्विधाचारम् अन्यस्त्रीप्रसक्तम्, अतिस्वप्नं मोषणानन्तरदिवसेऽतिमात्रनिद्रं, निद्राक्लान्तं स्वापाभावश्रान्तम्, आधिक्लान्तम्, आविग्नं भीतं, शुष्कभिन्नस्वरमुखवर्णम्, अनवस्थितम्, अतिप्रलापिनम्, उच्चारोहण-

शरीरवस्त्रं जातकिणसंरब्धहस्तपादं पांसुपूर्णकेशनखं विलूनभुग्नकेशनखं वा सम्यक्स्नातानुलिप्तं तैलप्रमृष्टगात्रं सद्योधौतहस्तपादं वा पांसुपिच्छिलेषु तुल्यपादपदनिक्षेपं प्रवेशनिष्कसनयोर्वा तुल्यमाल्यमद्यगन्धवस्त्रच्छेदविलेपनस्वेदं परीक्षेत। चोरं पारदारिकं वा विद्यात् ॥

सगोपस्थानिको बाह्यं प्रदेष्टा चोरमार्गणम् ।
कुर्यान्नागरिकश्चान्तर्दुर्गे निर्दिष्टहेतुभिः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
षष्ठोऽध्यायः शङ्कारूपकर्माभिग्रहः,
आदितस्त्र्यशीतितमः ॥

संरब्धगात्रम् उच्चारोहणपरवशवपुषं, विलूननिघृष्टभिन्नपाटितशरीरवस्त्रमित्यादि विशेषणसप्तकं स्फुटार्थम् । पांसुपिच्छिलेषु तुल्यपादपदनिक्षेपं पांसुषु पङ्किलेषु च स्वपादसदृशचरणन्यासं, प्रवेशनिष्कसनयोर्वा प्रवेशनिर्गमनयोर्वा, तुल्यमाल्यमद्यगन्धवस्त्रच्छेदविलेपनस्वेदं मुषितवेश्मगतेन माल्यमद्यगन्धेन समानगन्धं वस्त्रच्छेदेन समानवस्त्रच्छेदं विलेपनस्वेदेन तुल्यविलेपनस्वेदम् । **चोरं पारदारिकं वा विद्यादिति** । पूर्वोक्तविशेषणविशिष्टं परीक्ष्य तस्कर इति वा पारतल्पिक इति वा जानीयात् ॥

विधिशेषं श्लोकेनाह — **सगोपस्थानिक** इति । गोपो दशकुलीपञ्चकुलीरक्षकः स्थानिको दुर्गजनपदचतुर्भागरक्षी ताभ्यां सहितः, प्रदेष्टा कण्टकशोधनाधिकृतः, बाह्यं चोरमार्गणं कुर्यात् । नागरिकश्च, अन्तर्दुर्गे दुर्गान्तर्भागे, निर्दिष्टहेतुभिः, चोरमार्गणं कुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
षष्ठोऽध्यायः शङ्कारूपकर्माभिग्रहः,
आदितस्त्र्यशीतितमः ॥

८२. प्रक. आशुमृतकपरीक्षा ।

तैलाभ्यक्तमाशुमृतकं परीक्षेत ।

निष्कीर्णमूत्रपुरीषं वातपूर्णकोष्ठत्वक्कं शूनपादपाणिमुन्मीलिताक्षं सव्यञ्जनकण्ठं पीडननिरुद्धोच्छ्वासहतं विद्यात् ।

तमेव सङ्कुचितबाहुसक्थिमुद्बन्धहतं विद्यात् ।

शूनपाणिपादोदरमपगताक्षमुद्वृत्तनाभिमवरोपितं विद्यात् ।

निस्तब्धगुदाक्षं सन्दष्टजिह्वमाध्मातोदरमुदकहतं विद्यात् ।

शोणितानुसिक्तं भग्नभिन्नगात्रं काष्ठै रश्मिभिर्वा हतं विद्यात् ।

सम्भग्नस्फुटितगात्रमवक्षिप्तं विद्यात् ।

आशुमृतकपरीक्षेति सूत्रम् । अन्तरेण व्रणाभिघातादिकमकाण्डे मृत आशुमृतकः तस्य परीक्षाभिधीयत इति सूत्रार्थः । द्रव्यापहारिणः कण्टकाः प्रागुक्ताः, प्राणापहारिण इदानीमुच्यन्ते ।

तैलेत्यादि । आशुमृतकं, तैलाभ्यक्तं परीक्षेत तस्य कायमखिलं तैलेनाभ्यक्तं कृत्वा परीक्षेत । तैलाभ्यञ्जने हि कृते गूढाः प्रहारा व्यक्तीभवन्तीति तद्व्यक्तीभावानुरूपा परीक्षा प्रवर्तेत इति ।

निष्कीर्णमूत्रपुरीषमिति । निस्सृतकीर्णमूत्रपुरीषं, वातपूर्णकोष्ठत्वक्कं वातपूर्णमुदरं त्वक् च यस्य तं, शूनपादपाणिं प्रवृद्धपादपाणिम्, उन्मीलिताक्षम् अमीलितनेत्रं, सव्यञ्जनकण्ठं सचिह्नः पतितत्वरूपचिह्नयुक्तः कण्ठो यस्य तम्, इत्थम्भूतं जनं, पीडननिरुद्धोच्छ्वासहतं कण्ठपीडनकृतेनोच्छ्वासनिरोधेन हतं विद्यात् ।

तमेवेति । उक्तलक्षणमेव, संकुचितबाहुसक्थिं प्राप्तसंकोचभुजोरुम्, उद्बन्धहतम् उल्लम्बनहतं, विद्यात् ।

शूनेत्यादि । शूनपाणिपादोदरम्, अपगताक्षम् अन्तर्मग्नचक्षुषम्, उद्वृत्तनाभिम् उद्गतनाभिम्, अवरोपितं शूलारोपितं, विद्यात् ।

निस्तब्धगुदाक्षमिति । गुदमाक्षि च निर्गतं यस्य तं, सन्दष्टजिह्वम्,, आध्मातोदरं शूनोदरम्, उदकहतं विद्यात् ।

शोणितानुसिक्तमित्यादि । स्फुटार्थम् ।

संभग्नेत्यादि । अवक्षिप्तं प्रासादादिपातितम् ।

श्यावपाणिपाददन्तनखं शिथिलमांसरोमचर्माणं फेनोपदिग्ध-मुखं विषहतं विद्यात् ।

तमेव सशोणितदंशं सर्पकीटहतं विद्यात् ।

विक्षिप्तवस्त्रगात्रमतिवान्तविरिक्तं मदनयोगहतं विद्यात् ।

अतोऽन्यतमेन कारणेन हतं हत्वा वा दण्डभयादुद्बन्धनिकृत्त-कण्ठं विद्यात् ।

विषहतस्य भोजनशेषं पयोभिः परीक्षेत । हृदयादुद्धृत्याग्नौ प्रक्षिप्तं चिटचिटायदिन्द्रधनुर्वर्णं वा विषयुक्तं विद्यात् । दग्धस्य हृदयमदग्धं दृष्ट्वा वा ।

तस्य परिचारकजनं वाग्दण्डपारुष्यातिलब्धं मार्गेत । दुःखोपहतमन्यप्रसक्तं वा स्त्रीजनं, दायनिवृत्तिस्त्रीजनाभिमन्तारं वा बन्धुम् । तदेव हतोद्बद्धस्य परीक्षेत ।

श्यावपाणीत्यादि । श्यावशब्दः कपिशार्थः । विषहतं वत्सनाभादि-स्थावरविषहतम् ।

तमेवेति । श्यावपाणिपाददन्तनखत्वादियुक्तमेव ।

विक्षिप्तेत्यादि । विक्षिप्तवस्त्रगात्रं वस्त्रं गात्रं च तत इतो विसारितं येन तम् । मदनयोगहतं मदकररसदानहतं विद्यात् ।

निष्कीर्णेत्यादिनोक्तेषु कारणेषु अन्यतमदर्शनेन हतमनुमिनुयात्, हन्त्रा वा स्वदण्डभयादुल्लम्बनाच्छिन्नकण्ठमनुमिनुयादित्याह—अत इत्यादि ।

विषहतस्येत्यादि । हृदयादुद्धृत्य हृदयदेशात् खण्डमवदाय । चिटचिटायत् चिटचिटाशब्दं कुर्वत् ।

विषदपरिज्ञानोपायमाह — तस्येति । विषहतस्य, परिचारकजनं, वाग्दण्डपारुष्यातिलब्धं वाक्पारुष्यदण्डपारुष्याभ्यां पीडितं, मार्गेत अन्विष्येत्, तथाभूतो हि परिजनः स्वामिनो विषदायी सम्भाव्यत इति । दुःखोपहतमिति । तथाभूतं, स्त्रीजनम् । अन्यप्रसक्तं वा पुरुषान्तरसक्तं वा स्त्रीजनं, मार्गेतेति वर्तते । दायनिवृत्तिस्त्रीजनाभिमन्तारं वा 'अमुकेन विभक्तव्यो दायस्तस्य मरणे निवृत्तो मामभिगमिष्यती'त्यभिमानवन्तं तस्य स्त्रीजनो मद्भोग्यो भविष्यतीत्यभिमानवन्तं च वा, बन्धुं मार्गेत । तदेव यथोक्तमेव, हतोद्बद्धस्य हत्वोल्लम्बितस्य, परीक्षेत ।

स्वयमुद्बद्धस्य वा विप्रकारमयुक्तं मार्गेत ।

सर्वेषां वा स्त्रीदायाद्यदोषः कर्मस्पर्धा प्रतिपक्षद्वेषः पण्यसंस्था समवायो वा विवादपदानामन्यतमं वा रोषस्थानम् । रोषनिमित्तो घातः ।

स्वयमादिष्टपुरुषैर्वा चोरैरर्थनिमित्तं सादृश्यादन्यवैरिभिर्वा हतस्य घातमासन्नेभ्यः परीक्षेत । येनाहूतः सहस्थितः प्रस्थितो हतभूमिमानीतो वा, तमनुयुञ्जीत । ये चास्य हतभूमावासन्नचरास्तानेकैकशः पृच्छेत् — केनायमिहानीतो हतो वा कः सशस्त्रः सङ्गूहमान उद्विग्नो वा युष्माभिर्दृष्ट इति । ते यथा ब्रूयुस्तथानुयुञ्जीत ।

अनाथस्य शरीरस्थमुपभोगं परिच्छदम् ।
वस्त्रं वेषं विभूषां वा दृष्ट्वा तद्व्यवहारिणः ॥
अनुयुञ्जीत संयोगं निवासं वासकारणम् ।
कर्म च व्यवहारं च ततो मार्गणमाचरेत् ॥

स्वयमुद्बद्धस्य वेति । स्वयमुलम्बनमृतस्य, विप्रकारम् अयुक्तं मात्रातिगं पीडनं, मार्गेत केन कीदृशमुत्पादितमित्यन्विष्येत् ।

सामान्यतः परमारणनिमित्तान्याह — **सर्वेषां** वेति । जनसामान्यस्य, रोषस्थानं कोपहेतुः, स्त्रीदायाद्यदोषः स्त्रीनिमित्तो दायादत्वनिमित्तश्च दोषः, कर्मस्पर्धा राजकुलनियोगापचारादिकृतः संघर्षः, प्रतिपक्षद्वेषः शत्रुवैरं, पण्यसंस्था वाणिज्यम् अपचारादिद्वारेण, समवायो वा समूहो वा प्राधान्यभङ्गद्वारेण, विवादपदानाम् अन्यतमं वा पूर्वोक्तानां विवाहसंयुक्तादीनामेकतमं वा, भवतीति शेषः । रोषनिमित्तो, घातः वधः ।

स्वयमिति । आत्मना हतस्य, आदिष्टपुरुषैः स्वनियुक्तपुरुषैर्वा हतस्य, चोरैः अर्थनिमित्तं धनार्थं हतस्य, सादृश्यादन्यवैरिभिर्वा हतस्य हतादन्यस्मिन् वैरवद्भिः 'स एवायमि'ति सादृश्याद् मिथ्याबुद्धिं कृत्वा हतस्य, घातम्, आसन्नेभ्यः हतप्रत्यासन्नजनेभ्यः, परीक्षेत अन्विष्य जानीयात् । **येनाहूत** इत्यादि । संगूहमानः छन्नचरः । उद्विग्नः भीतः । शेषं सुबोधम् ।

अनाथस्येत्यादिश्लोकद्वयमेकान्वयम् । अनाथस्य मृतस्य, शरीरस्थम्, उपभोगं माल्यादि, परिच्छदं छत्रोपानहादि, वस्त्रं, वेषं जटिलमुण्डितत्वादि, विभूषां वा, दृष्ट्वा, तद्व्यवहारिणः माल्याद्युपभोगव्यवहर्तॄन् मालाकारादीन्,

रज्जुशस्त्रविषैर्वापि कामक्रोधवशेन यः ।
घातयेत् स्वयमात्मानं स्त्री वा पापेन मोहिता ॥
रज्जुना राजमार्गे तां चण्डालेनापकर्षयेत् ।
न श्मशानविधिस्तेषां न सम्बन्धिक्रियास्तथा ॥
बन्धुस्तेषां तु यः कुर्यात् प्रेतकार्यक्रियाविधिम् ।
तद्गतिं स चरेत् पश्चात् स्वजनाद् वा प्रमुच्यते ॥
संवत्सरेण पतति पतितेन समाचरन् ।
याजनाध्यापनाद् यौनात् तैश्चान्योऽपि समाचरन् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
सप्तमोऽध्यायः आशुमृतकपरीक्षा,
आदितश्चतुरशीतितमः ॥

अनुयुञ्जीत पृच्छेत्, किं किं, संयोगं सख्यं, निवासं, वासकारणं, कर्म च वृत्तिं च, व्यवहारं च दानादानक्रियानुष्ठानं च, अर्थाद्धतस्य । ततो मार्गणं घातकान्वेषणम्, आचरेत् ॥

रज्जुशस्त्रेत्यादि । श्लोकद्वयमेकान्वयम् । रज्जुना गुणेन, पुंस्त्वमार्षं, 'रज्ज्वा वे'ति पाठ एव वा प्रमादाद् विरूपितः । सम्बन्धिक्रियाः ज्ञातिकार्याणि निवपनानि । शेषं सुगमम् । रज्जुवस्त्रेति क्वापि पाठः ॥

बन्धुस्तेषामित्यादि । तेषाम् आत्मघातिनाम् । स पश्चात् तद्गतिं चरेत् आत्मघातिप्रेतक्रियाकर्ता देहान्ते आत्मघातिगतिं प्राप्नुयात् । स्वजनाद् वा प्रमुच्यते स्वजनपरित्यक्तश्च भवति, अर्थात् पतितत्वेन हेतुना ॥

संवत्सरेणेति । पतितेन सह, याजनाध्यापनात्, यौनाद् विवाहसम्बन्धाच्च, समाचरन् व्यवहरन्, संवत्सरेण वर्षेणैकेन, पतति । तैश्च पतितसंसर्गपतितैश्च, समाचरन् व्यवहरन्, अन्योऽपि, संवत्सरेण पतति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
सप्तमोऽध्यायः आशुमृतकपरीक्षा,
आदितश्चतुरशीतितमः ॥

८३. प्रक. वाक्यकर्मानुयोगः।

मुषितसन्निधौ बाह्यानामभ्यन्तराणां च साक्षिणमभिशस्तस्य देशजातिगोत्रनामकर्मसारसहायनिवासाननुयुञ्जीत । तांश्चापदेशैः प्रतिसमानयेत् । ततः पूर्वस्याह्नः प्रचारं रात्रौ निवासं च आ ग्रहणादिति अनुयुञ्जीत । तस्यापसारप्रतिसन्धाने शुद्धः स्यात् । अन्यथा कर्मप्राप्तः ।

त्रिरात्रादूर्ध्वमग्राह्यः शङ्कितकः, पृच्छाभावादन्यत्रोपकरणदर्शनात् ।

अचोरं चोर इत्यभिव्याहरतश्चोरसमो दण्डः, चोरं प्रच्छादयतश्च ।

वाक्यकर्मानुयोग इति सूत्रम् । वाक्येन कर्मणा च शङ्काभिगृहीतस्य अनुयोगोऽभिधीयत इति सूत्रार्थः । शङ्कादिलिङ्गानां व्यभिचारसम्भवाद् वस्तुतोऽचोरस्यापि दण्डभयादिनानृतवादित्वदर्शनाच्च चोरत्वनिर्णयाय वाक्यकर्मानुयोगः प्रस्तूयते ।

मुषितसन्निधाविति । चोरहृतधनस्य जनस्य सन्निधौ, बाह्यानाम् अभ्यन्तराणां च सन्निधौ, साक्षिणम्, अभिशस्तस्य शङ्काभिगृहीतस्य, देशं, जातिं, गोत्रं, नाम, कर्म, सारं धनं, सहायं निवासं चेत्येतान् देशादीन् अष्टौ, अनुयुञ्जीत । **तांश्चेति** । अभिशस्तदेशादीन्, अपदेशैः निमित्तैरुपपत्तिभिः, प्रतिसमानयेत् पर्यालोचयेत् सुष्ठु न वेति । तत इति । पश्चात्, पूर्वस्य अह्नः प्रचारं, रात्रौ निवासं च शयनं च, आ ग्रहणात् यावदभिशस्तग्रहणकालम्, इत्यनुयुञ्जीत अनुयोगोचितेन प्रकारेण पृच्छेद्, अभिशस्तम् । तस्य अभिशस्तस्य, अपसारप्रतिसन्धाने अपराधापसरणकारणोपलब्धौ, शुद्धः स्याद्, अभिशस्तः । अन्यथा कर्मप्राप्तः कृतापराधः ।

त्रिरात्रादूर्ध्वमिति । तिसृषु रात्रिषु अतीतासु, शङ्कितकः, अग्राह्यः ग्रहीतुं योग्यो न भवति, कस्मात्, पृच्छाभावात् मोषणदिवसपूर्वदिवसादिचरितस्य विस्मृतिसम्भवेन प्रश्नायोगात्, अन्यत्रोपकरणदर्शनात् मोषणसाधनानामचोरगृहेषूपलम्भसम्भवाच्च ।

अचोरमिति । तं, चोर इति अभिव्याहरतः प्रदेष्ट्रादेः, चोरसमो दण्डः । चोरं प्रच्छादयतश्च तम् अचोर इत्यभिव्याहरतश्च, अथवा चोरं गृहान्तरवस्थाप्याप्रकाशयतश्च, चोरसमो दण्डः ।

चोरेणाभिशस्तो वैरद्वेषाभ्यामपदिष्टकः शुद्धः स्यात् । शुद्धं परिवासयतः पूर्वः साहसदण्डः ।

शङ्कानिष्पन्नमुपकरणमन्त्रिसहायरूपवैयापृत्यकरान् निष्पादयेत् । कर्मणश्च प्रवेशद्रव्यादानांशविभागैः प्रतिसमानयेत् ।

एतेषां कारणानाम् अनभिसन्धाने विप्रलपन्तमचोरं विद्यात् । दृश्यते ह्यचोरोऽपि चोरमार्गे यदृच्छया सन्निपाते चोरवेषशस्त्रभाण्डसामान्येन गृह्यमाणो दृष्टः चोरभाण्डस्योपवासेन वा यथा हि माण्डव्यः कर्मक्लेशभयादचोरः 'चोरोऽस्मि' इति ब्रुवाणः ।

तस्माद् समाप्तकरणं नियमयेत् ।

मन्दापराधं बालं वृद्धं व्याधितं मत्तमुन्मत्तं क्षुत्पिपासाध्वक्लान्तमत्याशितमामकाशितं दुर्बलं वा न कर्म कारयेत् ।

चोरेणाभिशस्त इति । चोरेणान्यश्चोर इत्युक्तः, वैरद्वेषाभ्याम् अपदिष्टकः वैरेण द्वेषेण च निमित्तेन कृताभिशंसन इति विभावितश्चेत्, शुद्धः स्यात् । शुद्धं, परिवासयतः अमोचयतः प्रदेष्टुः, पूर्वः साहसदण्डः ।

शङ्कानिष्पन्नमिति । शङ्कागृहीतम्, उपकरणादीन् पञ्च, निष्पादयेत् पृष्ट्वा साधयेत् । तत्र रूपं लोप्त्रं, शेषं प्रतीतम् । **कर्मणश्च प्रवेशेत्यादि** । चौर्यार्थं द्रव्यरक्षागृहे केन केन प्रवेशः कृतः केन द्रव्यं गृहीतं कस्य कियानंशविभागः इति प्रवेशादिप्रश्नैस्तत्त्वं विचारयेत् ।

एतेषां कारणानामिति । उक्तानां चोरत्वसाधकानाम्, अनभिसन्धाने अपरिचिन्तने, विप्रलपन्तं भयादिना विरुद्धवाचिनमपि, अचोरं विद्यात्। किमर्थं परीक्षायत्नो महानुपदिश्यत इत्यत्राह — **दृश्यते हीत्यादि** । चोरभाण्डस्योपवासेन मुष्टद्रव्यस्य समीपस्थित्या। माण्डव्यः आणिमाण्डव्यो नाम महर्षिः । स किलाचोर एव राजपुरुषताडनादिक्लेशभीत्या चोरमात्मानं वदन् विनैव परीक्षां तं चोरं मन्यमानेन राज्ञा शूलमारोपित इति महाभारते कथानुसन्धेया ।

तस्मादिति । अदण्ड्यदण्डप्रणयनं मा प्रसाङ्क्षीदिति हेतोः, **समाप्तकरणं** सम्यग् बहुप्रकारपरीक्षावधारितापराधं, **नियमयेत्** दण्डयेत् ।

मन्दापराधमित्यादि । अल्पापराधम् । **अत्याशितम्** अतिमात्रभुक्तान्नम् । **आमकाशितम्** अजीर्णान्नम् ।

तुल्यशीलपुंश्चलीप्रावादिककथावकाशभोजनदातृभिरपसर्पयेत् । एवमतिसन्दध्यात् । यथा वा निक्षेपापहारे व्याख्यातम् ।

आप्तदोषं कर्म कारयेत् । न त्वेव स्त्रियं गर्भिणीं सूतिकां वा मासावरप्रजाताम् । स्त्रियास्त्वर्धकर्म । वाक्यानुयोगो वा ।

ब्राह्मणस्य सत्रिपरिग्रहः श्रुतवतस्तपस्विनश्च । तस्यातिक्रम उत्तमो दण्डः कर्तुः कारयितुश्च कर्मणा व्यापादनेन च ।

व्यावहारिकं कर्मचतुष्कं — षड् दण्डाः, सप्त कशाः, द्वावुपरिनिबन्धौ, उदकनालिका च ।

चोरादीन् कथं जानीयादित्याह— **तुल्यशील**ेत्यादि । तुल्यशीलादिभिः तुल्यशीलाः समानवृत्ताः पुंश्चल्यो बन्धक्यः प्रावादिकाः प्रवदनचारिणः दक्षभाषाः कथावकाशभोजनदातारः कथादातारः कथकाः अवकाशदातारो भोजनदातारश्च इत्येतैः, अपसर्पयेत् अपसर्पैः कृतैर्जानीयात्, अर्थाच्चोरादीन् । एवमतिसन्दध्यात् उक्तेन प्रकारेण तान् वञ्चयेत् । ज्ञानोपायान्तरमन्यत्रोक्तं चेहातिदिशति —**यथा**वेति । निक्षेपापहारे, यथा व्याख्यातं 'क्षीणदायकुटुम्बमि'त्यादिना निरूपितं, तथा वा जानीयादिति वाक्यशेषः ।

निश्चितापराधस्य दण्डमाह—**आप्तदोष**मिति । निश्चितापराधं, कर्म कारयेत् । गर्भिण्याः स्त्रियाः प्रसूतायाश्चानतीतमासाया न दण्ड इत्याह — **न त्वेवे**त्यादि । **स्त्रियास्त्वर्धकर्मे**ति । पुंसो यावद् दण्डकर्म विहितं तस्यार्धं स्त्रियाः । वाक्यानुयोगो वा वाचा परिभाषणं वा कर्तव्यम् अर्धस्याप्ययोगे ।

ब्राह्मणस्येति । तस्य, श्रुतवतो विदुषः, तपस्विनश्च, **सत्रिपरिग्रहः** सत्रिभिः परिग्रहणं तथा परिग्रहणेन ततइतः पर्यटनक्लेशयोजनेति यावत्, अर्थाद् दण्डः । **तस्यातिक्रम** इति । उक्तदण्डातिरिक्तदण्डकरणे, कर्तुः, कारयितुश्च, उत्तमो दण्डः उत्तमसाहसः, कर्मणा, व्यापादनेन च द्रोहचिन्तनेन च हेतुना ।

व्यावहारिकं कर्मचतुष्कमिति । लोकव्यवहारप्रसिद्धानि चतुष्प्रकाराणि दण्डकर्माणि भवन्ति । षड् दण्डाः दण्डाघाताः षडित्येकः प्रकारः, सप्त कशाः कशाप्रहाराः इति द्वितीयः, द्वौ उपरिनिबन्धौ हस्तयोः पृष्ठतः कृत्वा संश्लेषितयोर्बन्धनं तेन सह शिरसो बन्धनं चेति द्विरूपं बन्धनमिति तृतीयः, उदकनालिका च नासायां सलवणोदकनिषेचनं च इति चतुर्थः ।

परं पापकर्मणां नववेत्रलताद्वादशकं, द्वावूरुवेष्टौ, विंशतिर्नक्तमाललताः, द्वात्रिंशत् तलाः, द्वौ वृश्चिकबन्धौ, उल्लम्बने च द्वे, सूची हस्तस्य, यवागूपीतस्य, एकपर्वदहनमङ्गुल्याः, स्नेहपीतस्य प्रतापनमेकमहः, शिशिररात्रौ बल्बजाग्रशय्या चेत्यष्टादशकं कर्म ।

तस्योपकरणं प्रमाणं प्रहरणं प्रधारणमवधारणं च खरपट्टादागमयेत् ।

दिवसान्तरमेकैकं च कर्म कारयेत् ।

पूर्वकृतापदानं, प्रतिज्ञायापहरन्तम्, एकदेशदृष्टद्रव्यं, कर्मणा

अन्यत् पापकर्मणां चतुर्दशभेदं दण्डनकर्माह — **परं पापकर्मणामिति** । परम् उक्तचतुष्कातिरिक्तं, पापकर्मणां, नववेत्रलताद्वादशकं नवहस्तदीर्घवन्यलतया द्वादश प्रहाराः, द्वौ ऊरुवेष्टौ द्वाभ्यां रज्जुभ्यां पादयोर्वेष्टनं तेन सह शिरसोऽपि वेष्टनमिति द्विप्रकारावूरुवेष्टौ, विंशतिर्नक्तमाललताः विंशतिः करञ्जलताप्रहाराः, द्वात्रिंशत् तलाः चपेटाघाताः, द्वौ वृश्चिकबन्धौ वामकरस्य वामपादस्य च पृष्ठतः संयोज्य बन्धनमित्येको वृश्चिकबन्धः दक्षिणकरस्य दक्षिणपादस्य च तथा संयोज्य बन्धनमित्यपर इत्येवं द्वौ, उल्लम्बने च द्वे संयुक्तबद्धकरद्वयस्य ऋजूर्ध्वलम्बनं संयुक्तबद्धपादद्वयस्योर्ध्वलम्बनं चेति द्विप्रकारे उल्लम्बने, सूची हस्तस्य करस्य नखे सूचीप्रवेशनं, यवागूपीतस्य यवागूपानस्य कारणेति शेषः, यवागूं पाययित्वा मूत्रनिरोधनेनावस्थापनमित्यर्थः । अङ्गुल्या एकपर्वदहनं, स्नेहपीतस्य प्रतापनमेकमहरिति पायितसर्पिष आतपेऽग्नौ वैकदिनप्रतापनं, शिशिररात्रौ बल्बजाग्रशय्या च जलसिक्तबल्बजाग्रशय्याशायनं च, इत्यष्टादशकं पूर्वोक्तचतुष्केण सहाष्टादशावयवकं, कर्म ।

तस्येति । उक्तस्य कर्मणः, उपकरणं रज्ज्वादि, प्रमाणं दण्डकशायामः, प्रहरणं वेत्रनक्तमालादि, प्रधारणं दण्डनीयस्य स्थापनप्रकारः, अवधारणं च शरीरानुगुणदण्डप्रकारनिर्धारणं च, खरपट्टात् कर्तृनामप्रसिद्धाच्चौर्यशास्त्राद्, आगमयेद् अधीयीत ।

दिवसान्तरमित्यादि । दण्डितं दिवसव्यवधानेनैकैकं कर्म कृच्छ्रव्यापारं, कारयेत् । इत्युत्सर्गः ।

विशेषविधिमाह—**पूर्वेत्यादि** । पूर्वकृतापदानं पूर्वकृतचौर्यं, प्रतिज्ञायापहरन्तम् अपहरिष्यामीति प्रतिश्रुत्यापहरन्तम्, एकदेशदृष्टद्रव्यं नष्टद्रव्यैक-

रूपेण वा गृहीतं, राजकोशमवस्तृणन्तं, कर्मवध्यं वा राजवचनात् समस्तं व्यस्तमभ्यस्तं वा कर्म कारयेत् ।

सर्वापराधेष्वपीडनीयो ब्राह्मणः । तस्याभिशस्ताङ्को ललाटे स्याद् व्यवहारपतनाय । स्तेये श्वा, मनुष्यवधे कबन्धः, गुरुतल्पे भगं, सुरापाने मद्यध्वजः ॥

ब्राह्मणं पापकर्माणमुद्घुष्याङ्कृतव्रणम् ।
कुर्यान्निर्विषयं राजा वासयेदाकरेषु वा ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
अष्टमोऽध्यायः वाक्यकर्मानुयोगः,
आदितः पञ्चाशीतितमः ॥

देशयुक्ततयोपलब्धं, कर्मणा गृहीतम् अद्वारप्रवेशनिर्गमसन्धिच्छेदनादिकर्मयुक्तत्वेन दृष्टं, रूपेण वा गृहीतं लोप्त्रयुक्तं गृहीतं, राजकोशम् अवस्तृणन्तं राजधनमवच्छादयन्तं, कर्मवध्यं वा कृतमहापराधं वा, राजवचनात्, समस्तं समुदितं, व्यस्तं तद्विपरीतम्, अभ्यस्तं वा आवृत्तं वा, कर्म कारयेद् यावत्प्राणवियोगम् । स एष क्षत्रियादीनां दण्डविधिः ।

ब्राह्मणस्य विधिमाह—**सर्वापराधेष्वित्यादि** । वधताडनादिना दण्डेन न योज्यः । कस्तर्हि तस्य दण्डस्तत्राह — **तस्येति** । ब्राह्मणस्य, अभिशस्ताङ्कः, ललाटे स्यात् कर्तव्यः, किमर्थं, व्यवहारपतनाय व्यवहारात् पतनाय प्रच्युतये अज्ञानात् तेनान्यः सहव्यवहारं मा कार्षीदित्येतदर्थमित्यर्थः । अपराधभेदेनाङ्कभेदानाह —**स्तेय इति** । तत्र, श्वा आभिशस्ताङ्कः कर्तव्यः, मनुष्यवधे कबन्धः, गुरुतल्पे गुरुदारगमने, भगं योनिः, सुरापाने मद्यध्वजः ॥

श्लोकमाह — **ब्राह्मणमित्यादि** । उद्घुष्य पापकर्मामुक इति पुरग्रामादिषु सघोषणं दर्शयित्वा । निर्विषयं कुर्यात् स्वदेशान्निष्कासयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
अष्टमोऽध्यायः वाक्यकर्मानुयोगः,
आदितः पञ्चाशीतितमः ॥

८४ प्रक. सर्वाधिकरणरक्षणम् ।

समाहर्तृप्रदेष्टारः पूर्वमध्यक्षाणामध्यक्षपुरुषाणां च नियमनं कुर्युः ।

खनिसारकर्मान्तेभ्यः सारं रत्नं वापहरतः शुद्धवधः ।

फल्गुद्रव्यकर्मान्तेभ्यः फल्गु द्रव्यमुपस्करं वा पूर्वः साहसदण्डः ।

पण्यभूमिभ्यो वा राजपण्यं माषमूल्यादूर्ध्वमा पादमूल्यादित्यपहरतो द्वादशपणो दण्डः । आ द्विपादमूल्यादिति चतुर्विंशतिपणः । आ त्रिपादमूल्यादिति षट्त्रिंशत्पणः । आ पणमूल्यादित्यष्टचत्वारिंशत्पणः । आ द्विपणमूल्यादिति पूर्वः साहसदण्डः । आ चतुष्पणमूल्यादिति मध्यमः । आ अष्टपणमूल्यादित्युत्तमः । आ दशपणमूल्यादिति वधः ।

सर्वाधिकरणरक्षणमिति सूत्रम् । सर्वेषाम् अधिकरणानां धनोत्पत्तिस्थानानाम् अधिकरणस्थानां वा समाहर्त्रादीनां रक्षणं धनहरणाद् वारणं सर्वाधिकरणरक्षणं, तदुच्यत इति सूत्रार्थः । जानपदादिकण्टकशोधनमुक्तम् । राजधनापहारिशोधनमधुनाभिधीयते ।

समाहर्तृप्रदेष्टार इति । समाहर्तारः प्रदेष्टारश्च, पूर्वं कार्यारम्भात् प्राक्, अध्यक्षाणाम्, अध्यक्षपुरुषाणां च, नियमनं व्यवस्थापनं, कुर्युः ।

खनिसारकर्मान्तेभ्य इति । खनिकर्मान्तेभ्यः रत्नस्वर्णरजतादिकर्मस्थानेभ्यः सारकर्मान्तेभ्यः चन्दनागुर्वादिकर्मस्थानेभ्यः, सारं रत्नं वा, अपहरतः, शुद्धवधः धनदण्डामिश्रो घातदण्डः ।

फल्गुद्रव्यकर्मान्तेभ्य इति । कार्पासादिद्रव्यकर्मान्तेभ्यः, फल्गु द्रव्यम्, उपस्करं वा वेशवारं वा, अपहरत इति वर्तते । पूर्वः साहसदण्डः ।

पण्यभूमिभ्यो वेति । जीरकाजमोदाद्युत्पत्तिभूमिभ्यः, राजपण्यं, माषमूल्यादूर्ध्वम्, आ पादमूल्यात् पादः पणचतुर्भागश्चतुर्माषाः आ चतुर्माषमूल्यात्, इत्येवम् अपहरतः, द्वादशपणो दण्डः । **आ द्विपादमूल्यादिति** । चतुर्माषमूल्यादूर्ध्वमष्टमाषमूल्यान्तम्, अपहरतः, चतुर्विंशतिपणः । **आ त्रिपादमूल्यादिति षट्त्रिंशत्पण** इत्यादि **आ दशपणमूल्यादिति वध** इत्येतदन्तं सुबोधम् ।

कोष्ठपण्यकुप्यायुधागारेभ्यः कुप्यभाण्डोपस्करापहारेष्वर्धमूल्येष्वेत एव दण्डाः ।

कोशभाण्डागाराक्षशालाभ्यश्चतुर्भागमूल्येष्वेत एव द्विगुणा दण्डाः ।

चोराणामभिप्रधर्षणे चित्रो घातः । इति राजपरिग्रहेषु व्याख्यातम् ।

बाह्येषु तु प्रच्छन्नमहनि क्षेत्रखलवेश्मापणेभ्यः कुप्यभाण्डमुपस्करं वा माषमूल्यादूर्ध्वमा पादमूल्यादित्यपहरतस्त्रिपणो दण्डः । गोमयप्रदेहेन वा प्रलिप्यावघोषणम् । आ द्विपादमूल्यादिति षट्पणः, गोमयभस्मना वा प्रलिप्यावघोषणम् । आ त्रिपादमूल्यादिति नवपणः, गोमयभस्मना वा प्रलिप्यावघोषणं, शरावमेखलया वा । आ पणमूल्यादिति द्वादशपणः, मुण्डनं प्रव्राजनं वा । आ द्विपणमूल्यादिति चतुर्विंशतिपणः, मुण्डस्येष्टकाशकलेन प्रव्राजनं वा । आ चतुष्पणमूल्यादिति षट्त्रिंशत्पणः । आ पञ्चपणमूल्यादिति अष्टचत्वारिंशत्पणः । आ दशपणमूल्यादिति पूर्वः साहसदण्डः । आ विंशतिपणमूल्यादिति

कोष्ठपण्यकुप्यायुधागारेभ्य इति । कोष्ठागारात् पण्यागारात् कुप्यागाराद् आयुधागाराच्च, कुप्यभाण्डोपस्करापहारेषु, अर्धमूल्येषु अर्धमाषमूल्यादिद्विमाषमूल्यान्तेषु विषये, एत एव द्वादशपणादयो, दण्डाः ।

कोशभाण्डागाराक्षशालाभ्य इति । ताभ्यः, चतुर्भागमूल्येषु काकणीमूल्येषु माषमूल्यान्तेषु अपहृतेषु विषये, एत एव द्विगुणा दण्डाः चतुर्विंशतिपणाष्टाचत्वारिंशत्पणादयः ।

चोराणामभिप्रधर्षणे इति । स्वयमपहृतवतामेव राजपुरुषाणां चोरापहरणच्छलकल्पने, चित्रो घातः क्लेशवधः । इति अनेन प्रकारेण, राजपरिग्रहेषु राजकीयेषु प्रदेशेषु, व्याख्यातम् ।

बाह्येषु त्वित्यादि । बाह्येषु राजकीयातिरिक्तेषु पौरजानपदक्षेत्रादिषु । शेषं सुगमम् । चोरस्य निर्धनत्वे दण्डप्रकारमाह — **गोमयप्रदेहेन** वेति । गोशकृदुपलेपेन, प्रलिप्य देहं प्रकर्षेण लिप्त्वा, अवघोषणं पटहघोषणपुरस्सरं नगरमभितः सञ्चारणम् । **आ द्विपादमूल्यादि**त्यादि । स्पष्टम् । **शरावमेखलया** वेति । अवघोषणमिति वर्तते, शरावो मृद्भाण्डविशेषः, प्रोतशरावां रशनां कण्ठे बद्ध्वा पूर्ववन्नगरमभितः सञ्चारणं गोमयभस्माभावपक्षे दण्ड

द्विशतः । आ त्रिंशत्पणमूल्यादिति पञ्चशतः । आ चत्वारिंशत्पणमूल्यादिति साहस्रः । आ पञ्चाशत्पणमूल्यादिति वधः ।

प्रसह्य दिवा रात्रौ वान्तर्यामिकमपहरतोऽर्धमूल्येष्वेत एव द्विगुणा दण्डाः । प्रसह्य दिवा रात्रौ वा सशस्त्रस्यापहरतश्चतुर्भागमूल्येष्वेत एव दण्डाः ।

कुटुम्बिकाध्यक्षमुख्यस्वामिनां कूटशासनमुद्राकर्मसु पूर्वमध्यमोत्तमवधा दण्डाः । यथापराधं वा ।

धर्मस्थश्चेद् विवदमानं पुरुषं तर्जयति, भर्त्सयत्यपसारयति, अभिग्रसते वा, पूर्वमस्मै साहसदण्डं कुर्यात् । वाक्पारुष्ये द्विगुणम् ।

इत्यर्थः । आ पणमूल्यादिति द्वादशपण इत्यादि आ पञ्चाशत्पणमूल्यादिति वध इत्यन्तं वाक्यजातं स्पष्टार्थम् । यदत्र चतुर्विंशतिपणदण्डासामर्थ्ये मुण्डीकृत्येष्टकाखण्डप्रक्षेपेण देशाद् बहिर्निष्कासनमुक्तं, तत् षट्त्रिंशत्पणादिसहस्रपणान्तदण्डासामर्थ्ये दण्डापूपिकान्यायेन सिद्धं द्रष्टव्यम् ।

प्रसह्येति । बलात्कारेण, दिवा रात्रौ वा, अन्तर्यामिकं यामान्तरालकालरक्षाव्यापृतम्, अपहरतो मुष्णतः, अर्धमूल्येषु माषमूल्यादूर्ध्वमित्याद्युक्तमूल्यापेक्षयार्धमूल्येषु अर्थादर्धमाषमूल्यप्रभृतिषु द्विमाषमूल्यान्तेषु विषये, एत एव पूर्वोक्तास्त्रिपणादय एव वधान्ताः, द्विगुणाः अर्थात् षट्पणादयः, दण्डाः । इह द्विगुणा इति पाठो नास्तीति भाषास्वरसतो गम्यते । अन्तर्यामिकमेव दिवा रात्रौ वा प्रसह्य शस्त्रपाणेर्मुष्णतो माषचतुर्भाग(काकणी)मूल्यादि माषमूल्यान्तेषु विषयेऽपि यथोक्ता एव दण्डा इत्याह—प्रसह्य दिवा रात्रौ वा सशस्त्रस्येत्यादि ।

कुटुम्बिकाध्यक्षमुख्यस्वामिनामिति । कुटुम्बिनः सुवर्णाध्यक्षादेर्ग्राममुख्यस्य समाहर्तुश्चेत्येतेषां चतुर्णां, कूटशासनमुद्राकर्मसु कपटलेख्यकर्मसु कपटलक्षणकर्मसु च, पूर्वमध्यमोत्तमवधाः दण्डाश्चत्वारो यथाक्रमं भवन्ति । यथापराधं वा अपराधानुगुण्येन वा दण्डाः ।

धर्मस्थशोधनमाह — धर्मस्थश्चेदित्यादि । तर्जयति शिरःकम्पनतर्जनीनिर्देशादिना भीषयति । भर्त्सयति वचनेन भीषयति । अपसारयति अपसरन्तं प्रयोजयति । अभिग्रसते भक्षयति उपजीवतीत्यर्थः । पूर्वं साहसदण्डं

पृच्छयं न पृच्छति, अपृच्छयं पृच्छति, पृष्ट्वा वा विसृजति, शिक्षयति, स्मारयति, पूर्वं ददाति वेति, मध्यममस्मै साहसदण्डं कुर्यात्। देयं देशं न पृच्छति, अदेयं देशं पृच्छति, कार्यमदेशेनातिवाहयति, छलेनातिहरति, कालहरणेन श्रान्तमपवाहयति, मार्गापन्नं वाक्यमुत्क्रमयति, मतिसाहाय्यं साक्षिभ्यो ददाति, तारितानुशिष्टं कार्यं पुनरपि गृह्णाति, उत्तममस्मै साहसदण्डं कुर्यात्। पुनरपराधे द्विगुणं, स्थानाद् व्यवरोपणं च।

लेखकश्चेदुक्तं न लिखति अनुक्तं लिखति, दुरुक्तमुपलिखति, सूक्तमुल्लिखति, अर्थोत्पत्तिं वा विकल्पयतीति, पूर्वमस्मै साहसदण्डं कुर्यात्, यथापराधं वा।

प्रथमसाहसम्। **वाक्पारुष्ये द्विगुणमिति**। विवदमानं प्रति परुषवाक्प्रयोगे उक्ताद्द्विगुणं दण्डं कुर्यात्।

भूयो धर्मस्थापराधानुल्लिखति — **पृच्छ्यमिति**। पृच्छार्हं साक्षिणम्, इह दण्डादित्वाद् यत्। न पृच्छति। प्रच्छन्नमित्यपि पाठः। अपृच्छ्यं पृच्छानर्हं विवादिबन्ध्वादिकं, पृच्छति। पृष्ट्वा वा विसृजति अदत्तोत्तरमेवोपेक्षते। शिक्षयति वक्तव्यमध्यापयति। स्मारयति वक्तव्यं विस्मृतमभिज्ञापयति। पूर्वं ददाति वा वाक्यस्य वक्तव्यस्य पूर्वांशं शेषपूरणानुगुणं सूचयति वा। इति एवं, चेष्टमानायेति शेषः, अस्मै धर्मस्थाय, मध्यमं साहसदण्डं कुर्यात्। **देयं देशं न पृच्छतीति**। विभाव्यवस्तुविभावनायावश्यापेक्ष्यं साक्षिणं न पृच्छति। **अदेयं देशं** तद्विपरीतं साक्षिणं, पृच्छति। कार्यम्, अदेशेन अतिवाहयति साक्षिणं विनैव निर्णयति। छलेन अतिहरति सत्यवादिनमपि साक्षिणं छलवाक्येन अपराधयति। कालहरणेन श्रान्तं, कृत्वेति शेषः, अपवाहयति परावर्तयति। मार्गापन्नं वाक्यम् अपरित्यक्तक्रमं साक्षिवाक्यम्, उत्क्रमयति त्यक्तक्रममित्याचष्टे। मतिसाहाय्यं साक्षिभ्यो ददाति। तारितानुशिष्टं विचारितानिर्णीतं, कार्यं, पुनरपि गृह्णाति विचारणार्थम्। अस्मै एवं चेष्टमानाय धर्मस्थाय, उत्तमं साहसदण्डं कुर्यात्। पुनरपराधे कृते, द्विगुणम् अर्थाद् दण्डनम्। स्थानाद् व्यवरोपणं च निरसनं च।

लेखकशोधनमाह — **लेखकश्चेदित्यादि**। दुरुक्तमुपलिखति उक्तमसाधु साधूकृत्य लिखति। सूक्तम् उल्लिखति सुष्ठूक्तमसाधूकृत्य लिखति। अर्थोत्पत्तिं वा विकल्पयति साध्यसिद्धिं वान्यथयति। शेषं सुगमम्।

धर्मस्थः प्रदेष्टा वा हैरण्यमदण्ड्यं क्षिपति, क्षेपद्विगुणमस्मै दण्डं कुर्यात् । हीनातिरिक्ताष्टगुणं वा। शारीरदण्डं क्षिपति, शारीरमेव दण्डं भजेत । निष्क्रयद्विगुणं वा । यं वा भूतमर्थं नाशयत्यभूतमर्थं करोति तदष्टगुणं दण्डं दद्यात् ।

धर्मस्थीयाच्चारकान्निस्सारयतो बन्धनागाराच्छय्यासनभोजनोच्चारसञ्चारं रोधबन्धनेषु त्रिपणोत्तरा दण्डाः कर्तुः कारयितुश्च ।

चारकादभियुक्तं मुञ्चतो निष्पातयतो वा मध्यमः साहसदण्डः अभियोगदानं च । बन्धनागारात् सर्वस्वं वधश्च ।

बन्धनागाराध्यक्षस्य संरुद्धकमनाख्याय चारयतश्चतुर्विंशतिपणो दण्डः । कर्म कारयतो द्विगुणः । स्थानान्यत्वं गमयतोऽन्नपानं वा रुन्धतः षण्णवतिर्दण्डः । परिक्लेशयत उत्कोचयतो वा मध्यमः साहसदण्डः । घ्नतः साहस्रः ।

धर्मस्थ इति । धर्मस्थः, प्रदेष्टा वा, अदण्ड्यं, हैरण्यं क्षिपति हिरण्यं दण्डयति चेत्, अस्मै दण्डयित्रे, क्षेपद्विगुणं क्षिप्तदण्डाद्विगुणं, दण्डं कुर्यात् । **हीनातिरिक्ताष्टगुणं** वेति । न्याय्यदण्डाद्धीनदण्डकरणे न्याय्यदण्डादतिरिक्तदण्डकरणे च हीनदण्डादधिकदण्डाच्च अष्टगुणं दण्डं कुर्यात् । शारीरदण्डं क्षिपति हस्तच्छेदादिरूपं दण्डम् अदण्ड्ये यदि प्रयुङ्क्ते, शारीरमेव दण्डं हस्तच्छेदादिरूपं तमेव, भजेत । निष्क्रयद्विगुणं वा तत्तच्छारीरदण्डस्थानीयधनदण्डद्विगुणं वा दण्डं, भजेत । न्याय्यार्थनाशने अन्याय्यार्थसाधने च नाशितसाधितार्थाष्टगुणं दण्डं दद्यादित्याह --- **यं वा भूतमर्थमित्यादि** ।

बन्धनाध्यक्षशोधनमाह **धर्मस्थीयादिति** । धर्मस्थपरिकल्पितात्, चारकात् संरोधागारात्, निस्सारयतः लञ्चग्रहणेन तद्गतान् बहिः सञ्चारयतः, बन्धनागारात् कारागृहात् निस्सारयतः, रोधबन्धनेषु रोधागारेषु बन्धनागारेषु च शय्यासनभोजनोच्चारसञ्चारं शयनीयासनभोजनानि मूत्रपुरीषोत्सर्गस्थानं च, कर्तुः, कारयितुश्च, त्रिपणोत्तराः उत्तरोत्तरत्रिपणाधिकाः, दण्डाः ।

चारकादिति । धर्मस्थीयसंरोधगृहात्, अभियुक्तं मुञ्चतः, निष्पातयतो वा निष्पतनप्रतिकूलानाचरणान्निष्पतनं प्रयोजयतश्च, मध्यमः साहसदण्डः, अभियोगदानं च अभियुक्तदेयद्रव्यदानं च । बन्धनागारात् प्रदेष्टृकारीगृहात्, अभियुक्तं मुञ्चत इति वर्तते, सर्वस्वं सर्वस्वहरणं, वधश्च दण्डः ।

संरुद्धं जनं बन्धनागाराध्यक्षाननुज्ञया चारयतश्चतुर्विंशतिपणो दण्डः, तद्द्विगुणः कर्म कारयत इत्याह— **बन्धनागाराध्यक्षस्येत्यादि** । **स्थानान्य-**

परिगृहीतां दासीमाहितिकां वा संरुद्धिकामधिचरतः पूर्वः साहसदण्डः। चोरडामरिकभार्यां मध्यमः। संरुद्धिकामार्यामुत्तमः। संरुद्धस्य वा तत्रैव घातः। तदेवाध्यक्षेण गृहीतायामार्यायां विद्यात्। दास्यां पूर्वः साहसदण्डः।

चारकमभित्त्वा निष्पातयतो मध्यमः। भित्त्वा वधः। बन्धनागारात् सर्वस्वं वधश्च॥

एवमर्थचरान् पूर्वं राजा दण्डेन शोधयेत्।
शोधयेयुश्च शुद्धास्ते पौरजानपदान् दमैः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
नवमोऽध्यायः सर्वाधिकरणरक्षणम्,
आदितः षडशीतितमः॥

एवमित्यादि। स्थानान्तरे स्थाने दमः; परिक्लेशयतः ताडनादिना दुन्वतः। उत्कोचयतः उत्कोचधनं दापयतः। शेषं स्पष्टम्।

परिगृहीतामिति। कयापि गता, दासीम्, आहितिकां वा, संरुद्धिकां बन्धनागाररुद्धाम्, अधिचरतो गच्छतः, पूर्वः साहसदण्डः। चोरडामरिकभार्यां चोरभार्यां डमरगतकभार्यां च, अधिचरतः, मध्यमः। संरुद्धिकाम्, आर्यां कुलस्त्रियम्, अधिचरतः, उत्तमः। तत्रैव संरुद्धस्य वा बन्धनागार एव संरुद्धस्य च अर्थात् पूर्वोक्ताः स्त्रीरधिचरतः, घातः वधः। **तदेवे**ति। वधरूपं विधानमेव, अध्यक्षेण, गृहीतायाम् अविचरितायाम्, आर्यायां, विद्यात्। दास्याम्, अध्यक्षेण गृहीतायामिति वर्तते, पूर्वः साहसदण्डः, अध्यक्षस्य।

चारकमिति। धर्मस्थीयसंरोधागारम्, अभित्त्वा निष्पातयतः अर्थात् संरुद्धं, मध्यमः साहसदण्डः। भित्त्वा निष्पातयतः, वधः। बन्धनागारात् निष्पातयतः, सर्वस्वं सर्वस्वहरणं, वधश्च दण्डः॥

अध्यायप्रान्ते श्लोकमाह—**एवमि**ति। अनेन प्रकारेण, अर्थचरान् राजार्थव्यवहाराधिकृतान्, राजा, दण्डेन शोधयेत्। ते च अर्थचराश्च, शुद्धाः, भूत्वेति शेषः, पौरजानपदान्, दमैः दण्डैः, शोधयेयुः॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
नवमोऽध्यायः सर्वाधिकरणरक्षणम्,
आदितः षडशीतितमः॥

८५. प्रक. एकाङ्गवधनिष्क्रयः ।

तीर्थघातग्रन्थिभेदोर्ध्वकराणां प्रथमेऽपराधे सन्दंशच्छेदनं चतुष्पञ्चाशत्पणो वा दण्डः । द्वितीये छेदनं पणस्य शत्यो वा दण्डः । तृतीये दक्षिणहस्तवधश्चतुश्शतो वा दण्डः । चतुर्थे यथाकामी वधः ।

पञ्चविंशतिपणावरेषु कुक्कुटनकुलमार्जारश्वसूकरस्तेयेषु हिंसायां वा चतुष्पञ्चाशत्पणो दण्डः, नासाग्रच्छेदनं वा । चण्डालारण्यचराणामर्धदण्डाः ।

पाशजालकूटावपातेषु बद्धानां मृगपशुपक्षिव्यालमत्स्यानामादाने तच्च तावच्च दण्डः ।

एकाङ्गवधनिष्क्रय इति सूत्रम् । एकाङ्गं हस्तः पादः अङ्गुलिः कर्ण इत्येवमादि तस्य वधश्छेदनम् एकाङ्गवधः तद्युक्तो निष्क्रयः तत्प्रतिनिधिर्धनदण्डः एकाङ्गवधनिष्क्रयः सोऽभिधीयत इति सूत्रार्थः । पूर्वाध्याये 'शारीरमेव दण्डं भजेत, निष्क्रयद्विगुणं वा' इत्युक्तम । कस्मिन्नपराधे शारीरदण्डः, स कस्याङ्गस्य, कियान् वा तस्य निष्क्रय इत्येतत्तु नोक्तम् । तदिह प्रतिपाद्यत इति सङ्गतिः ।

तीर्थघातग्रन्थिभेदोर्ध्वकराणामिति । तीर्थघातः तीर्थे वस्त्राद्यपहर्ता ग्रन्थिभेदः बन्धच्छेत्ता सन्धिच्छेदको वा ऊर्ध्वकरः पुटच्छेदकः गृहोर्ध्वपटलादौ प्रवेशद्वारकृद् वा एषां त्रयाणां, प्रथमे, अपराधे, सन्दंशच्छेदनं कनिष्ठिकाङ्गुष्ठयोश्छेदनं, दण्डः । वा अथवा सन्दंशच्छेदाभावपक्षे, चतुष्पञ्चाशत्पणो दण्डः । द्वितीये अपराधे, पणस्य छेदनं पणशब्देन व्यवहारसाधनाङ्गुलिलक्षणात् सर्वाङ्गुलिच्छेदनं, शत्यो वा दण्डः शतपणो वा निष्क्रयः । तृतीये अपराधे, दक्षिणहस्तवधः, चतुश्शतो वा दण्डः निष्क्रयरूपः । चतुर्थेऽपराधे, यथाकामी वधः शुद्धश्चित्रो वा यथेच्छम् ।

पञ्चविंशतीत्यादि । पञ्चविंशतिपणावरेषु पञ्चविंशतिपणाधस्तनमूल्येषु । हिंसायां वा अर्थात् कुक्कुटादीनाम् ; अर्धदण्डाः सप्तविंशतिपणात्मकाः ।

पाशजालकूटावपातेष्वित्यादि । पाशः कर्णिका जालमानायः कूटावपातः तृणादिच्छन्नो मृगपातनार्थो गर्तः इत्येतेषु । **तच्च तावच्च दण्डः** अपहृतं च अपहृतसममन्यच्चेति द्वितयं दण्डः ।

मृगद्रव्यवनान्मृगद्रव्यापहारे शत्यो दण्डः। बिम्बविहारमृगपक्षिस्तेये हिंसायां वा द्विगुणो दण्डः।

कारुशिल्पिकुशीलवतपस्विनां क्षुद्रकद्रव्यापहारे शत्यो दण्डः। स्थूलकद्रव्यापहारे द्विशतः। कृषिद्रव्यापहारे च।

दुर्गमकृतप्रवेशस्य प्रविशतः प्राकाराच्छिद्राद् वा निक्षेपं गृहीत्वापसरतः कन्धरावधो, द्विशतो वा दण्डः।

चक्रयुक्तां नावं क्षुद्रपशुं वापहरत एकपादवधः त्रिशतो वा दण्डः।

कूटकाकण्यक्षारलाशलाकाहस्तविषमकारिण एकहस्तवधः, चतुश्शतो वा दण्डः।

स्तेनपारदारिकयोः साचिव्यकर्मणि स्त्रियाः संगृहीतायाश्च कर्णनासाच्छेदनं, पञ्चशतो वा दण्डः। पुंसो द्विगुणः।

महापशुमेकं दासं दासीं वापहरतः प्रेतभाण्डं वा विक्रीणानस्य द्विपादवधः, षट्छतो वा दण्डः।

मृगद्रव्यवनादित्यादि। मृगवनात् चन्दनादिपण्यद्रव्यवनाच्च। बिम्बविहारमृगपक्षिस्तेये बिम्बो नानावर्णः कृकलासः विहारमृगः क्रीडामृगः कृष्णसारादिः विहारपक्षी शुकादिः तेषां स्तेये।

कारुशिल्पिकुशीलवतपस्विनामित्यादि। कारुः स्थूलशिल्पकारी शिल्पी सूक्ष्मशिल्पकर्ता कुशीलवः चारणः तपस्वी तापसः एतेषाम्। **कृषिद्रव्यापहारे** हलादिचौर्ये।

अननुज्ञातप्रवेशस्य दुर्गं प्रविशतः, प्राकारच्छिद्रान्निक्षेपमपहृत्यापसरत इत्यनयोः, कन्धरावधः अर्थात् पादपश्चाद्भागगतसिराद्वयच्छेदनं दण्डः द्विशतपणो वा निष्क्रय इत्याह — **दुर्गमित्यादि।**

चक्रयुक्तामित्यादि। धनयुक्तां शस्त्रयुक्तां वा।

कूटकाकण्यक्षारलाशलाकाहस्तविषमकारिण इत्यादि। काकण्यक्षादयो द्यूतसमाह्वये उक्ताः। कूटकाकण्यक्षादिकारिणः हस्तविषमं हस्तकौशलात् काकण्यक्षादिचारवैषम्यकरणं तत्कारिणश्च।

स्तेनपारदारिकयोरिति। साचिव्यकर्मणि साहाय्यकरणे। स्त्रियाः संगृहीतायाश्चेति चकारात् साचिव्यकर्तुर्जनस्य च। द्विगुणः सहस्रपणः।

महापशुमित्यादि। महापशुर्गवाश्वमहिषादिः। प्रेतभाण्डं शवमुखपटादिकम्। द्विपादवधः चरणद्वयच्छेदनम्।

वर्णोत्तमानां गुरूणां च हस्तपादलङ्घने राजयानवाहनाद्यारोहणे चैकहस्तपादवधः सप्तशतो वा दण्डः।

शूद्रस्य ब्राह्मणवादिनो देवद्रव्यमवस्तृणतो राजद्विष्टमादिशतो द्विनेत्रभेदिनश्च योगाञ्जनेनान्धत्वमष्टशतो वा दण्डः।

चोरं पारदारिकं वा मोक्षयतो राजशासनमूनमतिरिक्तं वा लिखतः कन्यां दासीं वा सहिरण्यमपहरतः कूटव्यवहारिणो विमांसविक्रयिणश्च वामहस्तद्विपादवधो नवशतो वा दण्डः। मानुषमांसविक्रये वधः।

देवपशुप्रतिमामनुष्यक्षेत्रगृहहिरण्यसुवर्णरत्नसस्यापहारिण उत्तमो दण्डः शुद्धवधो वा॥

पुरुषं चापराधं च कारणं गुरुलाघवम्।
अनुबन्धं तदात्वं च देशकालौ समीक्ष्य च॥
उत्तमावरमध्यत्वं प्रदेष्टा दण्डकर्मणि।
राज्ञश्च प्रकृतीनां च कल्पयेदन्तरास्थितः॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
दशमोऽध्यायः एकाङ्गवधनिष्क्रयः,
आदितः सप्ताशीतितमः॥

वर्णोत्तमानामित्यादि। हस्तपादलङ्घने हस्तेन पादेन वा ताडने। एकहस्तपादवधः एकस्य हस्तस्य पादस्य च छेदनम्।

शूद्रस्य ब्राह्मणवादिन इति। ब्राह्मणोऽहमिति वादिनः शूद्रस्य, देवद्रव्यम् अवस्तृणतः अवच्छाद्यापहरतः, राजद्विष्टम् आदिशतः राज्ञोऽनिष्टं मरणपरचक्राक्रमणादिकं भविष्यत् कथयतो दैवज्ञादेः, द्विनेत्रभेदिनश्च, योगाञ्जनेनान्धत्वम् अन्धङ्करणौषधयुक्ताञ्जनलेपेनान्ध्यजननम्, अष्टशतो वा दण्डः निष्क्रयार्थः।

चोरमित्यादि। मोक्षयतः बन्धनान्मोचयतः। सहिरण्यम् अपहरतः अलङ्कारेण सहितं यथा भवति तथा हरतः। कूटव्यवहारिणः धूपितरञ्जितादिकपटस्वर्णव्यवहर्तुः। विमांसविक्रयिणश्च अभक्ष्यं सृगालादिमांसं विक्रेतुश्च। वामहस्तद्विपादवधः सव्यहस्तच्छेदनं पादद्वयच्छेदनं च।

देवेत्यादि। देवसम्बन्धिपश्वादिनवकहर्तुः, उत्तमो दण्डः। शुद्धवधो वा अक्लेशमारणं वा।

प्रान्ते श्लोकावाह— पुरुषमित्यादि । प्रदेष्टा, राज्ञश्च, प्रकृतीनाम् अमात्यादीनां च, अन्तरास्थितः मध्यस्थः सन्, पुरुषं च, अपराधं च, कारणं च, गुरुलाघवं पुरुषादिगौरवलाघवम्, अनुबन्धम् आयतिं, तदात्वं च तत्कालफलं च, देशकालौ च, समीक्ष्य पर्यालोच्य, दण्डकर्मणि उत्तमावर-मध्यत्वम् उत्तमत्वं प्रथमत्वं मध्यमत्वं च कल्पयेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
दशमोऽध्याय एकाङ्गवधनिष्क्रयः,
आदितः सप्ताशीतितमः ॥

८६. प्रक. शुद्धश्चित्रश्च दण्डकल्पः ।

कलहे घ्नतः पुरुषं चित्रो घातः । सप्तरात्रस्यान्तः मृते शुद्धवधः पक्षस्यान्तरुत्तमः । मासस्यान्तः पञ्चशतः समुत्थानव्ययश्च ।

शस्त्रेण प्रहरत उत्तमो दण्डः । मदेन हस्तवधः । मोहेन द्विशतः । वधे वधः ।

प्रहारेण गर्भं पातयत उत्तमो दण्डः । भैषज्येन मध्यमः । परिक्लेशेन पूर्वः साहसदण्डः ।

प्रसभस्त्रीपुरुषघातकाभिसारकनिग्राहकावघोषकावस्कन्दकोपवेधकान् पथिवेश्मप्रतिरोधकान् राजहस्त्यश्वरथानां हिंसकान् स्तेनान् वा शूलानारोहयेयुः ।

शुद्धश्चित्रश्च दण्डकल्प इति सूत्रम् । शुद्धः अक्लेशमारणं चित्रः क्लेशमारणम् इति द्विप्रकारो दण्डविधिरुच्यत इति सूत्रार्थः । पूर्वाध्याये वधः प्रस्तुतः । स कस्मिंन्नपराधे कीदृशः कर्तव्य इत्येतदिहाभिधीयते ।

कलहे घ्नत इत्यादि । मृते अर्थाच्छस्त्रादिप्रहृते । समुत्थानव्ययश्च चिकित्सनादिव्ययश्च ।

शस्त्रेणेति । तेन प्रहरतः, उत्तमो दण्डः । मदेन बलदर्पेण, प्रहरतः, हस्तवधः । मोहेन क्रोधेन, प्रहरतः, द्विशतः पणशतद्वयदण्डः । वधे कृते सति, वधः हन्तुः ।

प्रहारेणेत्यादि । भैषज्येन औषधेन, गर्भं पातयत इति सम्बध्यते । परिक्लेशेन कृच्छ्रकर्मानुष्ठापनेन ।

प्रसभेत्यादि । प्रसभस्त्रीपुरुषघातकः बलात्कारेण स्त्रियाः पुरुषस्य वा घातकः प्रसभाभिसारकः स्त्रीहठाभिसरणकर्ता प्रसभनिग्राहकः बलाज्जानपदकर्णनासादिच्छेदकर्ता अवघोषकः 'हरिष्यामि हनिष्यामी'त्येवमवघोषणकर्ता अवस्कन्दकः बलान्नगरग्रामादेर्द्रव्यापहारकः उपवेधकः भित्तिसन्धिच्छेदनेन चौर्यकर्ता इत्येतान्, पथिवेश्मप्रतिरोधकान् पान्थविश्रमशालापानीयशालयोश्चौर्यकारकान्, राजहस्त्यश्वरथानां राजसम्बन्धिनां गजाश्वसहितानां रथानां हिंसकान्, स्तेनान् वा तेषामेव चोरान् वा, शूलान् वध्यारोपणशस्त्रविशेषान् आरोहयेयुः, आरोपयेयुरिति क्वचित् पाठः ।

यश्चैनान् दहेदपनयेद् वा स तमेव दण्डं लभेत, साहसमुत्तमं वा।

हिंस्रस्तेनानां भक्तवासोपकरणाग्निमन्त्रदानवैयापृत्यकर्मसूत्तमो दण्डः। परिभाषणमविज्ञाने। हिंस्रस्तेनानां पुत्रदारमसमन्त्रं विसृजेत्, समन्त्रमाददीत।

राज्यकामुकमन्तःपुरप्रधर्षकमटव्यमित्रोत्साहकं दुर्गराष्ट्रदण्डकोपकं वा शिरोहस्तप्रादीपिकं घातयेत्।

ब्राह्मणं तमः प्रवेशयेत्।

मातृपितृपुत्रभ्रात्राचार्यतपस्विघातकं त्वक्छिरःप्रादीपिकं घातयेत्। तेषामाक्रोशे जिह्वाच्छेदः। अङ्गाभिरदने तदङ्गान्मोच्यः।

यदृच्छाघाते पुंसः, पशुयूथस्तेये च शुद्धवधः। दशावरं च यूथं विद्यात्।

यश्चैनानित्यादि। एनान् शूलारोपणमारितान्।

हिंस्रस्तेनानामिति। हिंस्राणां स्तेनानां च, भक्तवासोपकरणाग्निमन्त्रदानवैयापृत्यकर्मसु भक्तदाने वासस्थानदाने उपकरणदाने अग्निदाने मन्त्रदाने वैयापृत्यकर्मणि कैङ्कर्यकरणे च, उत्तमो दण्डः। परिभाषणमविज्ञाने हिंस्रस्तेना इत्यपरिज्ञानाद् भक्तदानादौ उपालम्भः दण्डः। हिंस्रस्तेनानाम् असमन्त्रं पुत्रदारं सहमन्त्रणरहितान् पुत्रान् दारांश्च, विसृजेद् निरपराधत्वात्। समन्त्रं पुत्रदारम्, आददीत अपराधित्वेन गृहीत्वा दण्डयेत्।

राज्यकामुकमित्यादि। अटव्यमित्रोत्साहकम् अटवीचराणां पुलिन्दादीनाम् अमित्राणाम् उत्साहजनकम्। दुर्गराष्ट्रदण्डकोपकं दुर्गराष्ट्रवासिनां सेनायाश्च कोपोत्पादकम्। शिरोहस्तप्रादीपिकं घातयेत शिरसि हस्ते च दीपितप्रदीपं कृत्वा मारयेत्।

ब्राह्मणं तमः प्रवेशयेदिति। राज्यकामुकादिश्चेद् ब्राह्मणः तं तमोगृहं प्रवेशयेदपुनर्निर्गमाय।

मातृपित्रित्यादि। त्वक्छिरःप्रादीपिकं घातयेत् त्वग्वियोजिते शिरस्यग्निं दीपयित्वा मारयेत्। तेषामाक्रोशे मात्रादीनां निन्दने। अङ्गाभिरदने नखादिना मात्राद्यङ्गविलेखने, तदङ्गाद् मोच्यः करादिकमङ्गं यत् तेषां विलेखितं तेनाङ्गेन विलेखनकर्ता वियोज्यः।

यदृच्छया पुरुषवधे पशुयूथचौर्ये चाक्लेशमारणं दण्ड इत्याह —**यदृच्छाघात** इत्यादि। यूथमानमाह — **दशावरमित्यादि**।

उदकधारणं सेतुं भिन्दतस्तत्रैवाप्सु निमज्जनम् । अनुदकमुत्तमः साहसदण्डः । भग्नोत्सृष्टकं मध्यमः ।

विषदायकं पुरुषं स्त्रियं च पुरुषघ्नीमपः प्रवेशयेदगर्भिणीम् । गर्भिणीं मासावरप्रजाताम् ।

पतिगुरुप्रजाघातिकाम् अग्निविषदां सन्धिच्छेदिकां वा गोभिः पादयेत् ।

विवीतक्षेत्रखलवेश्मद्रव्यहस्तिवनादीपिकमग्निना दाहयेत् ।

राजाक्रोशकमन्त्रभेदकयोरनिष्टप्रवृत्तिकस्य ब्राह्मणमहानसावलेहिनश्च जिह्वामुत्पाटयेत् ।

प्रहरणावरणस्तेनमनायुधीयमिषुभिर्घातयेत् । आयुधीयस्योत्तमः ।

उदकधारणमिति । जलं धारयन्तं, सेतुं, भिन्दतः, तत्रैव सेतौ, अप्सु निमज्जनं दण्डः । अनुदकं सेतुं, भिन्दतः, उत्तमः साहसदण्डः । **भग्नोत्सृष्टकं** स्वयं भग्नमसंस्कृतविसृष्टं, सेतुं भिन्दतः, मध्यमः साहसदण्डः ।

विषदायकमिति । तादृशं, पुरुषं, स्त्रियं च, पुरुघ्नीं पुरुषघातिनीम्, अपः प्रवेशयेद्, अगर्भिणीं सा चेद् गर्भिणी न भवति । **गर्भिणीं मासावरप्रजाता**मिति । सा चेद् गर्भिणी, प्रसवानन्तरमेकमासेऽतीते तामप्सु प्रवेशयेत् ।

पतिगुरुप्रजाघातिकामित्यादि । सन्धिच्छेदिकां सन्धिं छित्त्वा चौर्यकारिणीम् । गोभिः, पादयेत् पादाघातेन मारयेत् । 'प्रातिपदिकाद्धात्वर्थे' इत्यादिना पादशब्दात् पादाघातवृत्तेर्णिच् ।

विवीतक्षेत्रेत्यादि । विवीतक्षेत्राद्यादीपनकर्तारम् ।

राजाक्रोशकमन्त्रभेदकयोरिति । तयोः, अनिष्टप्रवृत्तिकस्य राजमरणाद्यनिष्टवार्ताप्रसारकस्य, ब्राह्मणमहानसावलेहिनश्च ब्राह्मणमहानसादन्नमपहृत्य भुञ्जानस्य च, जिह्वाम्, उत्पाटयेत् छिन्द्यात् ।

प्रहरणावरणस्तेनमिति । आयुधस्यावरणस्य च चोरम्, अनायुधीयम् अनस्त्रजीविनम्, इषुभिः घातयेत् । आयुधीयस्योत्तमः स चेदायुधादिचोर आयुधजीवी तस्योत्तमसाहसः ।

मेढ्रफलोपघातिनस्तदेव छेदयेत् ।
जिह्वानासोपघाते सन्दंशवधः ॥
एते शास्त्रेष्वनुगताः क्लेशदण्डा महात्मनाम् ।
अक्लिष्टानां तु पापानां धर्म्यः शुद्धवधः स्मृतः ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
एकादशोऽध्यायः शुद्धश्चित्रश्च दण्डकल्पः,
आदितोऽष्टाशीतितमः ॥

मेढ्रफलोपघातिन इति । लिङ्गाण्डयोः रतिसामर्थ्यभञ्जकस्य, तदेव मेढ्रफलमेव, छेदयेत् ।

जिह्वानासोपघात इति । जिह्वाया रसास्वादनशक्त्युपघाते नासाया गन्धग्रहणशक्त्युपघाते च, सन्दंशवधः कनिष्ठिकाङ्गुष्ठयोश्छेदनं दण्डः ॥

प्रान्ते श्लोकमाह — **एत** इति । एत उक्ताः क्लेशदण्डाः, महात्मनां मन्वादीनां, शास्त्रेषु, अनुगता अनुज्ञाता विहिताः । अक्लिष्टानाम् अदुष्कराणामल्पानामित्यर्थः, पापानां, शुद्धवधः अक्लेशदण्डः, धर्म्यः न्याय्यः, स्मृतः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
एकादशोऽध्यायः शुद्धश्चित्रश्च दण्डकल्पः,
आदितोऽष्टाशीतितमः ॥

८७. प्रक. कन्याप्रकर्म।

सवर्णामप्राप्तफलां कन्यां प्रकुर्वतो हस्तवधश्चतुश्शतो वा दण्डः। मृतायां वधः।

प्राप्तफलां प्रकुर्वतो मध्यमाप्रदेशिनीवधो द्विशतो वा दण्डः। पितुश्चावहीनं दद्यात्।

नच प्राकाम्यमकामायां लभेत। सकामायां चतुष्पञ्चाशत्पणो दण्डः, स्त्रियास्त्वर्धदण्डः।

परशुल्कावरुद्धायां हस्तवधश्चतुश्शतो वा दण्डः, शुल्कदानं च।

सप्तार्तवप्रजातां वरणादूर्ध्वमलभमानां प्रकृत्य प्राकामी स्यात्, नच पितुरवहीनं दद्यात्। ऋतुप्रतिरोधिभिः स्वाम्यादपक्रामति।

कन्याप्रकर्मेति सूत्रम्। कन्यायाः योनिक्षतेन दूषणमित्यर्थः। दण्डप्रस्तावात् तन्निमित्तो दण्डविधिरिहोच्यते।

सवर्णामित्यादि। अप्राप्तफलाम् अनुद्भिन्नपुष्पाम्। मृतायां योनिक्षतवशेन प्रमीतायां सत्याम्।

प्राप्तफलामित्यादि। मध्यमाप्रदेशिनीवधः ज्येष्ठातर्जन्योश्छेदः। पितुश्च, अवहीनं नष्टं तत्प्रार्थितं, दद्यात्।

नचेत्यादि। अकामायां कन्यायां, प्राकाम्यम् इच्छापूर्त्तिं, नच लभेत। अतो दण्डमात्रलाभफलं तद्रमणमित्युपदेशः। **सकामायामिति**। इच्छन्त्यां तस्यां, चतुष्पञ्चाशत्पणो दण्डः। स्त्रियास्तु, अर्धदण्डः सप्तविंशतिपणः।

परशुल्कावरुद्धायामिति। परशुल्कग्रहणप्रतिबद्धायां कन्यायां, हस्तवधः, चतुश्शतो वा दण्डः, अर्थात् प्रकुर्वतः। शुल्कदानं च पूर्वदत्तशुल्काय परस्मै कर्तव्यं, पक्षद्वयेऽपि।

सप्तार्तवप्रजातामिति। सप्त आर्तवानि प्रजातानि यस्यास्तां तथाभूतां, वरणादूर्ध्वम् अलभमानां कृतवरणं पुरुषं तावन्तं कालमनासादयन्तीं, प्रकृत्य, प्राकामी प्राकाम्यवान् यथेच्छभोक्ता, स्यात्। नच पितुः, अवहीनं शुल्कं, दद्यात्। कुतः, ऋतुप्रतिरोधिभिः आर्तवरूपैस्तस्करैर्निमित्तभूतैः, स्वाम्याद् अपक्रामति स्वामित्वादपैति, पिता।

त्रिवर्षप्रजातार्तवायास्तुल्यो गन्तुमदोषः। ततः परमतुल्योऽप्य-नलङ्कृतायाः। पितृद्रव्यादाने स्तेयं भजेत।

परमुद्दिश्यान्यस्य विन्दतो द्विशतो दण्डः। नच प्राकाम्यमकामायां लभेत।

कन्यामन्यां दर्शयित्वान्यां प्रयच्छतः शत्यो दण्डस्तुल्यायां, हीनायां द्विगुणः।

प्रकर्मण्यकुमार्याश्चतुष्पञ्चाशत्पणो दण्डः शुल्कव्ययकर्मणी च प्रतिदद्याद् अवस्थाय। तज्जातं पश्चात् कृता द्विगुणं दद्यात्।

अन्यशोणितोपधाने द्विशतो दण्डः, मिथ्याभिशंसिनश्च पुंसः। शुल्कव्ययकर्मणी च जीयेत। नच प्राकाम्यमकामायां लभेत।

त्रिवर्षप्रजातार्तवाया इति। वर्षत्रयोपजातरजस्काया विषये, तुल्यो गन्तुम् अदोषः सजातीयस्तां गच्छन् निर्दोषः। ततः परं वर्षत्रयादूर्ध्वम्, अतुल्योऽपि गन्तुम् अदोषः, अनलङ्कृतायाः पितृद्रव्यरहितायाः विषये। **पितृद्रव्यादाने स्तेयं भजेतेति**। पितृद्रव्यसहितायाः ग्रहणे चौर्यदण्डं प्राप्नुयात्।

परमुद्दिश्येत्यादि। योऽभिप्रेतः स एवाहमित्यात्मानं व्यपदिश्य तदन्यस्य कन्यां विवहतो द्विशतो दण्डः। नच कामचारमकामायां तस्यां विन्देत।

कन्यामन्यामित्यादि। तुल्यायां सजातीयायां सत्याम्। हीनायां हीनजातीयायां सत्याम्।

प्रकर्मण्यकुमार्या इति। अकुमार्याः दत्ताया अक्षतयोनेः क्षतयोनीकरणे, चतुष्पञ्चाशत्पणो दण्डः। शुल्कव्ययकर्मणी च पूर्वप्रतिग्रहीतृदत्तं शुल्कं तदर्थकृतं कर्मव्ययं च, प्रतिदद्याद्, अवस्थाय विवाहप्रतिभुवे। पश्चात् कृता द्वितीयानन्तरं तृतीयेन स्वीकृता, तज्जातं दण्डं, द्विगुणम् अष्टोत्तरशतपणं, दद्यात्।

अन्यशोणितोपधान इति। क्षतयोनित्वप्रदर्शनार्थम् अन्यरुधिरस्य स्ववस्त्रलेपने, द्विशतो दण्डः, स्त्रियाः। मिथ्याभिशंसिनश्च पुंसः अक्षतयोनिमेव क्षतयोनिरिति मिथ्यावदतः पुरुषस्य च, द्विशतो दण्डः। **शुल्कव्ययकर्मणी** च जीयेत शुल्कं कर्मव्ययं च दाप्येत। **नच प्राकाम्यमित्यादि** प्रतीतम्।

स्त्री प्रकृता सकामा समाना द्वादशपणं दण्डं दद्यात्, प्रकर्त्री द्विगुणम् । अकामायाः शत्यो दण्डः आत्मरागार्थं, शुल्कदानं च । स्वयं प्रकृता राजदास्यं गच्छेत् ।

बहिर्ग्रामस्य प्रकृतायां मिथ्याभिशंसने च द्विगुणो दण्डः ।

प्रसह्य कन्यामपहरतो द्विशतः, ससुवर्णमुत्तमः । बहूनां कन्यापहारिणां पृथग् यथोक्ता दण्डाः ।

गणिकादुहितरं प्रकुर्वतश्चतुष्पञ्चाशत्पणो दण्डः, शुल्कं मातुर्भोगः षोडशगुणः ।

दासस्य दास्या वा दुहितरमदासीं प्रकुर्वतश्चतुर्विंशतिपणो दण्डः शुल्काबन्ध्यदानं च । निष्क्रयानुरूपां दासीं प्रकुर्वतो द्वादशपणो दण्डः वस्त्राबन्ध्यदानं च ।

साचिव्यावकाशदाने कर्तृसमो दण्डः ।

स्त्रीति । सकामा, समाना तुल्यजातीया स्त्री, प्रकृता क्षतयोनितां नीता, द्वादशपणं दण्डं दद्यात् । प्रकर्त्री तद्योनिक्षतिकर्त्री, द्विगुणं चतुर्विंशतिपणं दद्यात् । अकामायाः शत्यो दण्ड इत्यादि । अनिच्छन्त्या एव पुंसा स्वरागार्थं प्रकर्मणि कार्यमाणे, कारयितुः शत्यो दण्डः । शुल्कदानं च । स्वयं प्रकृता स्वयं कृतयोनिक्षतिः, राजदास्यं राजदासीभावं, गच्छेत् ।

बहिरिति । ग्रामस्य, बहिर्देशे विजने, प्रकृतायां सत्यां, द्विगुणः चतुर्विंशतिपणः दण्डः, स्त्रियाः । मिथ्याभिशंसने च प्रकृत्य न प्रकृतेति मिथ्यावादे च द्विगुणो दण्डः, पुंसः ।

प्रसह्य कन्यामित्यादि । उत्तमः साहसदण्डः । पृथक् प्रत्येकम् ।

गणिकादुहितरमिति । तां, प्रकुर्वतः, चतुष्पञ्चाशत्पणो दण्डः । शुल्कं मातुर्भोगः षोडशगुणः शुल्कं मात्रे देयम् उक्तदण्डषोडशगुणं चतुष्षष्ट्यधिकाष्टशतपणात्मकं भवति ।

दासस्य दास्या वेत्यादि । शुल्काबन्ध्यदानं च शुल्काभरणयोर्दानं च । निष्क्रयानुरूपां दास्यमोक्षणानुरूपां रूपादिमत्तया ।

साचिव्यावकाशदान इति । कन्यादूषणं प्रति साहाय्यदाने प्रदेशदाने च, कर्तृसमः दूषकदण्डतुल्यः, दण्डः ।

प्रोषितपतिकामपचरन्तीं पतिबन्धुस्तत्पुरुषो वा सङ्गृह्णीयात्। सङ्गृहीता पतिमाकाङ्क्षेत। पतिश्चेत् क्षमेत, विसृज्येतोभयम्। अक्षमायां स्त्रियाः कर्णनासाच्छेदनम्। वधं जारश्च प्राप्नुयात्।

जारं चोर इत्यभिहरतः पञ्चशतो दण्डः। हिरण्येन मुञ्चतस्तदष्टगुणः।

केशाकेशिकं सङ्ग्रहणम्। उपलिङ्गनाद् वा शरीरोपभोगानां, तज्जातेभ्यः, स्त्रीवचनाद् वा।

परचक्राटवीहृतामोघप्रव्यूढामरण्येषु दुर्भिक्षे वा त्यक्तां प्रेतभावोत्सृष्टां वा परस्त्रियं निस्तारयित्वा यथासम्भाषितं समुपभुञ्जीत। जातिविशिष्टामकामामपत्यवतीं निष्क्रयेण दद्यात्॥

प्रोषितपतिकामित्यादि। अपचरन्तीं व्यभिचरन्तीम्। तत्पुरुषः पतिभृत्यः। संगृह्णीयात् नियम्य रक्षेत्। आकाङ्क्षेत प्रतीक्षेत। उभयं विसृज्येत जारो जारिणी च न दण्ड्येत।

जारमित्यादि। अभिहरतः व्यभिचारगोपनार्थमभिवदतः। **हिरण्येन मुञ्चतस्तदष्टगुण** इति। हिरण्यमुत्कोचं गृहीत्वा जारं मुञ्चतो रक्षिपुरुषस्य गृहीतहिरण्याष्टगुणो दण्डः।

संग्रहणज्ञानोपायमाह—**केशाकेशिकं संग्रहणमिति।** परस्परकेशग्रहणपुरस्सरारब्धा कामकेलिः केशाकेशि तदेव केशाकेशिकं, तत् प्रत्यक्षदृष्टं कर्तृभूतं, संग्रहणं, बोधयतीति शेषः। उपलिङ्गनाद् वा शरीरोपभोगानां कस्तूर्याद्युपभोगलिङ्गदर्शनाद् वा, संग्रहणं जानीयात्। तज्जातेभ्यः तद्विषयेङ्गितज्ञेभ्यो जानीयात्। स्त्रीवचनाद् वा परामृष्टस्त्रीवाक्याद् वा जानीयात्।

दण्डानर्हं परस्त्रीग्रहणप्रकारमाह— **परचक्राटवीहृतामिति।** परचक्रापहृताम् आटविकहृतां च, ओघप्रव्यूढां नदीप्रवाहनीताम्, अरण्येषु दुर्भिक्षे वा त्यक्तां, प्रेतभावोत्सृष्टां वा रोगोन्मूर्च्छनात् मृतत्वबुद्ध्या परित्यक्तां वा, परस्त्रियं, निस्तारयित्वा विपदुत्तीर्णां कृत्वा, यथासंभाषितं समुपभुञ्जीत परस्परसंविदनुरोधेन भार्याकृत्य दासीकृत्य वा सम्यग् उपभुञ्जीत। इह निस्तारयित्वेति समासाकरणमार्षम्। जातिविशिष्टां जात्युत्कर्षवतीम्, अकामां सजातित्वेऽप्यकामाम्, अपत्यवतीं, निष्क्रयेण दद्यात् निस्तरणश्रमवेतनग्रहणेन तत्स्वामिनेऽर्पयेत्॥

चोरहस्तान्नदीवेगाद् दुर्भिक्षाद् देशविभ्रमात् ।
निस्तारयित्वा कान्ताराान्नष्टां त्यक्तां मृतेति वा ॥

भुञ्जीत स्त्रियमन्येषां यथासम्भाषितं नरः ।
न तु राजप्रतापेन प्रमुक्तां स्वजनेन वा ॥
न चोत्तमां न चाकामां पूर्वापत्यवतीं न च ।
ईदृशीं त्वनुरूपेण निष्क्रयेणापवाहयेत् ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे
द्वादशोऽध्यायः कन्याप्रकर्म.
आदित एकोननवतितमः ॥

अध्यायान्ते श्लोकानाह --- **चोरहस्तादि**त्यादि । राजप्रतापेन स्वजनेन वा प्रमुक्तां राजकोपत्यक्तां स्वजनपरित्यक्तां वा । न तु भुञ्जीतेत्यत्र संबन्धनीयम् । एवं तृतीयश्लोकपूर्वार्धेऽपि न च भुञ्जीतेति योजनीयम् । ईदृशीम् उत्तमजातिम् अनिच्छन्तीं पूर्वापत्यवतीं च । अपवाहयेत् अपनाययेत् । प्रदापयेदिति क्वापि पाठः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां कण्टकशोधने चतुर्थाधिकरणे
द्वादशोऽध्यायः कन्याप्रकर्म,
आदित एकोननवतितमः ॥

८८. प्रक. अतिचारदण्डः ।

ब्राह्मणमपेयमभक्ष्यं वा सङ्ग्रासयत उत्तमो दण्डः, क्षत्रियं मध्यमः, वैश्यं पूर्वः साहसदण्डः, शूद्रं चतुष्पञ्चाशत्पणो दण्डः ।

स्वयंग्रसितारो निर्विषयाः कार्याः ।

परगृहाभिगमने दिवा पूर्वः साहसदण्डः, रात्रौ मध्यमः । दिवा रात्रौ वा सशस्त्रस्य प्रविशत उत्तमो दण्डः ।

भिक्षुकवैदेहकौ मत्तोन्मत्तौ बलादापदि चातिसन्निकृष्टाः प्रवृत्तप्रवेशाश्चादण्ड्याः, अन्यत्र प्रतिषेधात् ।

स्ववेश्मनो विरात्रादूर्ध्वं परिवार्यमारोहतः पूर्वः साहसदण्डः । परवेश्मनो मध्यमः । ग्रामारामवाटभेदिनश्च ।

अतिचारदण्ड इति सूत्रम् । अतिचारस्य अभक्ष्यभक्षणागम्यागमनादेर्दण्डोऽभिधीयत इति सूत्रार्थः । चोरादिकण्टकशोधनकथनानन्तरमवशिष्टं स्वधर्मव्यतिक्रमिणां कण्टकानां शोधनमिह प्रतिपाद्यते ।

ब्राह्मणमपेयमित्यादि । संग्रासयतः संग्रसमानं प्रयोजयतः । शेषं स्फुटम् ।

स्वयंग्रसितार इत्यादि । विनैव परप्रेरणाम् अपेयाभक्ष्यग्रासिनः, निर्विषयाः कार्याः देशान्निष्कासयितव्याः ।

परगृहाभिगमन इत्यादि । सशस्त्रस्य प्रविशतः शस्त्रसहितस्य परगृहं प्रविशतः ।

भिक्षुकवैदेहकाविति । तौ, मत्तोन्मत्तौ बलात् मधुपानविकृतचित्तः विभ्रान्तचित्तश्चेत्येतौ बलात्कारेण, आपदि च आपत्समये आपन्नाश्च, अतिसन्निकृष्टाः बान्धवाः, प्रवृत्तप्रवेशाश्च सौहार्दारब्धप्रवेशाश्च, अदण्ड्याः अर्थात् परगृहं प्रविशन्तः । कदा, अन्यत्र प्रतिषेधाद् गृहजनप्रतिषेधाभावे ।

स्ववेश्मन इति । स्वगृहस्य, विरात्रादूर्ध्वं रात्रियामापगमात् परतः, परिवार्यं प्राकारकुड्यादिकम्, आरोहतः, पूर्वः साहसदण्डः । परवेश्मनः, परिवार्यमारोहतो, मध्यमः । ग्रामारामवाटभेदिनश्च ग्रामवृतिमुपवनवृतिं च भित्त्वा ग्राममुपवनं च प्रविशतश्च, मध्यमः इति संबध्यते ।

ग्रामेष्वन्तः सार्थिका ज्ञातसारा वसेयुः । मुषितं प्रवासितं चैषामनिर्गतं रात्रौ ग्रामस्वामी दद्यात् । ग्रामान्तेषु वा मुषितं प्रवासितं विवीताध्यक्षो दद्यात् । अविवीतानां चोररज्जुकः । तथाप्यगुप्तानां सीमावरोधविचयं दद्युः । असीमावरोधे पञ्चग्रामी दशग्रामी वा ।

दुर्बलं वेश्म शकटमनुत्तब्धमूर्धस्तम्भं शस्त्रमनपाश्रयमप्रतिच्छन्नं श्वभ्रं कूपं कूटावपातं वा कृत्वा हिंसायां दण्डपारुष्यं विद्यात् ।

वृक्षच्छेदने दम्यरश्मिहरणे चतुष्पदानामदान्तसेवने वाहने काष्ठलोष्टपाषाणदण्डबाणबाहुविक्षेपणेषु याने हस्तिना च सङ्घट्टने 'अपेहि' इति प्रक्रोशन्नदण्ड्यः ।

ग्रामेष्वन्तरित्यादि । सार्थिका वणिजो यदि ग्रामान्तर्वसेयुः, तर्हि स्ववशस्थितं सारद्रव्यं तद्ग्राममुख्यायावेद्यैव वसेयुः । मुषितं, प्रवासितं च अन्यत्र नीतं च, एषां सार्थिकानाम्, अनिर्गतं रात्रौ नक्तं ग्रामादबहिर्गतं, ग्रामस्वामी दद्यात् । ग्रामान्तेषु ग्रामसीमासु, मुषितं, प्रवासितं, द्रव्यं, विवीताध्यक्षो दद्यात् । अविवीतानां प्रदेशानां, चोररज्जुकः चोरग्रहणनियुक्तः, दद्यात् । तथाप्यगुप्तानां तेन प्रकारेणाप्यरक्षितानां, सीमावरोधविचयं दद्युः यस्य सीमायां मोषणं जातं तत्सीमास्वामी यथा विचयं कुर्यात् तथावसरं दद्युः । असीमावरोधे सीमावरोधस्याप्यभावे, पञ्चग्रामी दशग्रामी वा अर्थात् मोषणदेशनिकटवर्तिनी, दद्यात् मुष्टं प्रत्यानीय प्रतिपादयेत् ।

दुर्बलमिति । दुर्बलं जीर्णदीर्णकुड्यं, वेश्म गृहं, कृत्वा, शकटम् अनुत्तब्धमूर्धस्तम्भम् अनुद्धृतशिरःस्थूणं, कृत्वा, शस्त्रम् , अनपाश्रयम् असम्यग्बद्धोर्ध्वाधारं, कृत्वा, अप्रतिच्छन्नम् अमृत्पूरितं, श्वभ्रं गर्तं, कूपं, कूटावपातं वा कूटगर्तं वा, कृत्वा, हिंसायां, दण्डपारुष्यं तद्विहितं दण्डं, विद्यात् हिंसितुः ।

वृक्षच्छेदन इति । वृक्षस्य छेदनावसरे, दम्यरश्मिहरणे दम्यनस्यबन्धनावसरे, चतुष्पदानाम्, अदान्तसेवने वाहने अदान्तशिक्षणार्थे वाहने, काष्ठलोष्टपाषाणदण्डबाणबाहुविक्षेपणेषु कलहायमानयोरन्योन्यं प्रति काष्ठलोष्टादिप्रेरणावसरेषु, याने हस्तिना च गजमारुह्य गमनावसरे च, सङ्घट्टने छिन्नवृक्षसङ्घट्टनादितोऽङ्गभङ्गादिप्रसङ्गे, 'अपेही'ति प्रक्रोशन्, सङ्घट्टनप्राप्तेः पूर्वमेव 'अपसरापसरे'ति प्रकर्षेण क्रोशन्, अदण्ड्यः ।

हस्तिना रोषितेन हतो द्रोणान्नं कुम्भं माल्यानुलेपनं दन्तप्रमार्जनं च पटं दद्यात्। अश्वमेधावभृथस्नानेन तुल्यो हस्तिना वध इति पादप्रक्षालनम्। उदासीनवधे यातुरुत्तमो दण्डः।

शृङ्गिणा दंष्ट्रिणा वा हिंस्यमानममोक्षयतः स्वामिनः पूर्वः साहसदण्डः। प्रतिक्रुष्टस्य द्विगुणः।

शृङ्गिदंष्ट्रिभ्यामन्योन्यं घातयतस्तच्च तावच्च दण्डः।

देवपशुमृषभमुक्षाणं गोकुमारीं वा वाहयतः पञ्चशतो दण्डः। प्रवासयत उत्तमः।

लोमदोहवाहनप्रजननोपकारिणां क्षुद्रपशूनामादाने तच्च तावच्च दण्डः। प्रवासने च, अन्यत्र देवपितृकार्येभ्यः।

हस्तिना रोषितेन हत इति। गजेन तद्गमनमार्गाभिमुखशयनकोपितेन हतः, द्रोणान्नं द्रोणपरिमाणमोदनं, कुम्भं मद्यकुम्भं, माल्यानुलेपनं, दन्तप्रमार्जनं पटं च दन्तसक्तासृक्प्रघृष्टिसाधनं वस्त्रं च, दद्यात् हस्तिने। तेन हस्तिसकाशादात्मघातमिच्छता पूर्वसज्जितं द्रोणान्नादिकं तन्मरणानन्तरं तदीयो बन्धुर्दद्यादित्यर्थः। कस्मादेवं हन्ता पूज्यत इत्यत्राह — **अश्वमेधावभृथस्नानेने**ति। अश्वमेधयज्ञान्तस्नानेन, तुल्यः तुल्यपुण्यः, हस्तिना वधः इति हेतोः, पादप्रक्षालनं हस्तिनः पूजाविशेषोऽयमित्यर्थः। अरोषयितृवधे हस्त्यारोहस्योत्तमसाहसो दण्ड इत्याह — **उदासीने**त्यादि।

शृङ्गिणेति। शृङ्गिणा गवादिना, दंष्ट्रिणा वा श्वादिना वा, हिंस्यमानम्, अमोक्षयतः, स्वामिनः हिंसकस्वामिनः, पूर्वः साहसदण्डः। 'हिंसन्तं वारये'त्यप्रतिक्रुष्टस्यायं दण्डः, प्रतिक्रुष्टस्य त्वाह — **प्रतिक्रुष्टस्य द्विगुण** इति।

शृङ्गिदंष्ट्रिभ्यामिति। ताभ्याम्, अन्योन्यं शृङ्गिणा दंष्ट्रिणं दंष्ट्रिणा शृङ्गिणं च, घातयतः, तच्च तावच्च तन्मूल्यं तत्परिमाणमन्यच्च द्रव्यं, दण्डः।

देवपशुमिति। देवसम्बन्धिनं पशुम्, ऋषभम्, उक्षाणं देवगोबृन्दसेक्तारं पुङ्गवं, गोकुमारीं वा, वाहयतः हरतः, पञ्चशतो दण्डः। प्रवासयतः मारयतः, उत्तमः।

लोमदोहवाहनप्रजननोपकारिणामिति। ऊर्णादिदानोपकारिणां, क्षुद्रपशूनां मेषादीनाम्, आदाने अपहरणे, तच्च तावच्च दण्डः। प्रवासने च, तच्च तावच्च दण्डः। अन्यत्र देवपितृकार्येभ्यः, देवपितृकार्यार्थे प्रवासने तु न दोषः।

छिन्ननस्यं भग्नयुगं तिर्यक्प्रतिमुखागतं च प्रत्यासरद्वा चक्रयुक्तं यानपशुमनुष्यसम्बाधे वा हिंसायामदण्ड्यः। अन्यथा यथोक्तं मानुषप्राणिहिंसायां दण्डमभ्यावहेत्। अमानुषप्राणिवधे प्राणिदानं च।

बाले यातरि, यानस्थः स्वामी दण्ड्यः। अस्वामिनि यानस्थः प्राप्तव्यवहारो वा याता। बालाधिष्ठितमपुरुषं वा यानं राजा हरेत्।

कृत्याभिचाराभ्यां यत् परमापादयेत्, तदापादयितव्यः।

कामं भार्यायामनिच्छन्त्यां कन्यायां वा दारार्थिनो भर्तरि भार्याया वा संवननकरणम्। अन्यथा हिंसायां मध्यमः साहसदण्डः।

मातापित्रोर्भगिनीं मातुलानीमाचार्यानीं स्नुषां दुहितरं भगिनीं

छिन्ननस्यमिति। छिन्नबलीवर्दनासारज्जुकं, भग्नयुगं भग्नेषान्तदारुकं, तिर्यक्प्रतिमुखागतं च, तिर्यगागतमभिमुखागतं च, प्रत्यासरद् वा पश्चादपसरद् वा, चक्रयुक्तं शकटं, यदा भवति तदेति शेषः, यानपशुमनुष्यसम्बाधे वा ततइतो गच्छता यानपश्वादीनां भ्रमणसंकटे वा, हिंसायां पशुमनुष्यवधसम्भवे, अदण्ड्यः शाकटिकः। अन्यथा छिन्ननस्यत्वाद्यभावे, मानुषप्राणिहिंसायां, यथोक्तं दण्डम् अभ्यावहेत्। अमानुषप्राणिवधे अजकुक्कुटादिवधे, प्राणिदानं च, कार्यम्।

बाले यातरीति। यन्तरि अप्राप्तव्यवहारे सति, यानस्थः स्वामी दण्ड्यः, शकटनिमित्तप्राणिहिंसासम्भवे। अस्वामिनि याने, यानस्थो दण्ड्यः, प्राप्तव्यवहारो याता वा यन्ता वा दण्ड्यः। **बालाधिष्ठितमपुरुषं वेति।** बालयन्तृकं प्रधानपुरुषरहितं वा, यानं, राजा हरेत्।

कृत्याभिचाराभ्यामिति। ताभ्यां, यद् मारणस्तम्भनादि, परम् अन्यजनम्, आपादयेत प्रापयेत्, तद्, आपादयितव्यः अर्थात् कृत्याभिचारकारकः।

भार्यायामनिच्छन्त्यां विषये भर्तुः संवननकरणं, कन्यायामनिच्छन्त्यां दारार्थिनो संवननकरणं, भर्तरि अनिच्छति भार्यायाः संवननकरणं चाभ्यनुजानाति—**कामं भार्यायामित्यादि।** अन्यथा उक्तातिरिक्तविषये, हिंसायां संवननादिना हिंसने, मध्यमः साहसदण्डः।

मातापित्रोर्भगिनीमित्यादि। मातुलानीं मातुलभार्याम्। आचार्या-

वाधिचरतस्त्रिलिङ्गच्छेदनं वधश्च । सकामा तदेव लभेत । दासपरिचारकाहितकभुक्ता च ।

ब्राह्मण्यामगुप्तायां, क्षत्रियस्योत्तमः, सर्वस्वं वैश्यस्य । शूद्रः कटाग्निना दह्येत । सर्वत्र राजभार्यागमने कुम्भीपाकः ।

श्वपाकीगमने कृतकबन्धाङ्कः परविषयं गच्छेत्, श्वपाकत्वं वा शूद्रः । श्वपाकस्यार्यागमने वधः, स्त्रियाः कर्णनासाच्छेदनम् ।

प्रव्रजितागमने चतुर्विंशतिपणो दण्डः । सकामा तदेव लभेत ।

रूपाजीवायाः प्रसह्योपभोगे द्वादशपणो दण्डः ।

बहूनामेकामधिचरतां पृथक् चतुर्विंशतिपणो दण्डः ।

स्त्रियमयोनौ गच्छतः पूर्वः साहसदण्डः । पुरुषमधिमेहतश्च ॥

मैथुने द्वादशपणः तिर्यग्योनिष्वनात्मनः ।
दैवतप्रतिमानां च गमने द्विगुणः स्मृतः ॥
अदण्ड्यदण्डने राज्ञो दण्डस्त्रिंशद्गुणोऽम्भसि ।
वरुणाय प्रदातव्यो ब्राह्मणेभ्यस्ततः परम् ॥

नीम् आचार्यपत्नीम् । त्रिलिङ्गच्छेदनं मेढ्रमुष्कच्छेदनम् । **सकामा तदेव लभेतेति** । मातापितृभगिन्यादिः सकामा चेत् त्रिलिङ्गच्छेदनं सस्तनभगच्छेदनं, वधं च, लभेत । दासपरिचारकाहितकभुक्ता च तदेव लभेत तुल्यन्यायाद् दासादिरपि तदेव लभेत ।

ब्राह्मण्यामगुप्तायामिति । तस्यां स्वतन्त्रायां, क्षत्रियस्य गन्तुः, उत्तमः साहसदण्डः । सर्वस्वं सर्वस्वहरणं, वैश्यस्य दण्डः । शूद्रः ब्राह्मणीगन्ता, कटाग्निना दह्येत अग्निप्रदीपनेन नगरं परिगमय्य दग्धव्यः । सर्वत्र क्षत्रियादिषु सर्वेषु विषये, राजभार्यागमने, कुम्भीपाकः तप्तभ्राष्ट्रभर्जनं दण्डः ।

श्वपाकीगमन इत्यादि **पुरुषमधिमेहतश्चे**त्येतदन्तं वाक्याष्टकं सुबोधम् ॥

मैथुन इत्यादि । तिर्यग्योनिषु गवादियोनिषु । अनात्मनः दुरात्मनः । द्विगुणः चतुर्विंशतिपणः ॥

अदण्ड्यदण्डन इति । दण्डानर्हस्य दण्डने, राज्ञो दण्डः त्रिंशद्गुणः, गृहीताद् दण्डात्, स कस्मै दातव्यः, अम्भसि वरुणाय प्रदातव्यः जले वरुणमुद्दिश्य प्रक्षेप्तव्यः । ततः परं ब्राह्मणेभ्यः, प्रदातव्यः ॥

तेन तत् पूयते पापं राज्ञो दण्डापचारजम् ।
शास्ता हि वरुणो राज्ञां मिथ्या व्याचरतां नृषु ॥

इति कौटलीयार्थशास्त्रे कण्टकशोधने चतुर्थाधिकरणे त्रयोदशोऽध्यायः
अतिचारदण्डः, आदितः नवतितमः ॥

एतावता कौटलीयस्यार्थशास्त्रस्य कण्टकशोधनं
चतुर्थमधिकरणं समाप्तम् ॥

तेनेति । तेन तथा प्रदानेन, राज्ञो दण्डापचारजं दण्डान्यथाप्रणयनजनितं, तत् पापं, पूयते शोध्यते । लूयत इति पाठे छिद्यत इत्यर्थः । कस्माद् वरुणाय दानेन राजपापं पूयते, हि यस्मात् कारणाद्, वरुणः, नृषु, मिथ्या अनृतं, व्याचरतां विविधमाचरतां, राज्ञां, शास्ता शासकः । 'मिथ्या च चरताम्' इत्यपि पाठः ॥

व्याख्यायामर्थशास्त्रस्य **श्रीमूलाख्यानभाजने ।**
इत्थं तुर्याधिकरणं पूर्णं **कण्टकशोधनम् ॥**

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य श्री**सीताम्बा**श्री**रामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु कौटलीयार्थशास्त्रव्याख्यायां **श्रीमूलाख्यायां** कण्टकशोधने चतुर्थाधिकरणे त्रयोदशोऽध्याय. अतिचारदण्डः आदितो नवतितमः ॥
इति कण्टकशोधनं नाम चतुर्थमधिकरणं समाप्तम् ॥

योगवृत्तं — पञ्चममधिकरणम् ।

८९. प्रक. दाण्डकर्मिकम् ।

दुर्गराष्ट्रयोः कण्टकशोधनमुक्तम् । राजराज्ययोर्वक्ष्यामः ।

राजानमवगृह्योपजीविनः शत्रुसाधारणा वा ये मुख्यास्तेषु गूढपुरुषप्रणिधिः कृत्यपक्षोपग्रहो वा सिद्धिः यथोक्तं पुरस्तादुपजापोऽपसर्पो वा यथा च पारग्रामिके वक्ष्यामः ।

अथ योगवृत्ताख्यं पञ्चममधिकरणमारभ्यते । योगानां सत्रितीक्ष्णरसदादीनां वृत्तमनुष्ठानं योगवृत्तं तत्प्रतिपादकत्वादस्याधिकरणस्य **योगवृत्त**मिति संज्ञा । यद्यपीदं दाण्डकर्मिकप्रकरणात्मना पर्यवस्यति, तथाप्या समाप्तेर्योगवृत्तस्य प्रतिपादनात् तत्प्राधान्यादस्याधिकरणस्य हस्तिवनवद् योगवृत्तव्यपदेशः । दण्डकर्मप्रतिपादकत्वसामान्येऽपि च नेदं पूर्वाधिकरणे प्रवेशितं, किन्तु तस्मात् पृथक्कृतं कर्तृभेदात् कण्टकभेदादुपायभेदाच्छोधनीयभेदाच्च । कण्टकशोधने हि प्रदेष्टृप्रभृतयः कर्तारः, कारुकवैदेहकादयः कण्टकाः, शङ्कारूपकर्माभिग्रहशुद्धचित्रवधादय उपायाः, दुर्गराष्ट्रे च शोधनीये । अत्र तु गूढपुरुषसहितो राजा कर्ता, राजावग्रहोपजीवनाः राष्ट्रमुख्यादयः कण्टकाः, उपांशुदण्ड उपायः, नृपतिरमात्याश्च शोधनीया इति ।

अत्र प्रथमं सूत्रं — **दाण्डकर्मिकमिति** । दण्ड उपांशुवधः तस्य कर्म प्रयोगो दण्डकर्म तदधिकृत्य प्रवृत्तमिति सूत्रार्थः । पूर्वस्मिन् प्रकरणे शुद्धचित्रवधादयः प्रकाशदण्डा विभज्य दर्शिताः, तत्प्रयोगाविषये अवश्यशोधने च प्रयोक्तव्यस्तूष्णीन्दण्ड इहाभिधीयत इति प्रकरणसङ्गतिः ।

अधिकरणसङ्गतिं सूचयन् प्रकरणार्थं वक्तुमारभते — **दुर्गराष्ट्रयोरि**त्यादि । दुर्गं स्थानीयादि राष्ट्रं जनपदादि तयोः, कण्टकशोधनम् उक्तं, गतेऽधिकरणे । राजराज्ययोः राजा स्वामी राज्यममात्यादि तयोः, कण्टकशोधनं, वक्ष्यामः, अस्मिन्नधिकरणे ।

तत्रादौ राजकण्टकान् प्रस्तौति — **राजानमिति** । तम्, **अवगृह्य** अधःकृत्य, उपजीविनः, शत्रुसाधारणा वा उभयवेतनाश्च, ये मुख्याः मन्त्रिपुरोहितसेनापतियुवराजादयः प्रधानपुरुषाः, तेषु गूढपुरुषप्रणिधिः गूढपुरुष-

राज्योपघातिनस्तु वल्लभाः संहता वा ये मुख्याः प्रकाशमशक्याः प्रतिषेद्धुं दूष्याः, तेषु धर्मरुचिरुपांशुदण्डं प्रयुञ्जीत ।

दूष्यमहामात्रभ्रातरं सत्कृतं सत्री प्रोत्साह्य राजानं दर्शयेत् । तं राजा दूष्यद्रव्योपभोगातिसर्गेण दूष्ये विक्रमयेत् । शस्त्रेण रसेन वा विक्रान्तं तत्रैव घातयेत्, भ्रातृघातकोऽयम् इति ।

तेन पारशवः परिचारिकापुत्रश्च व्याख्यातौ ।

प्रणिधानं, सिद्धिः छेदः—शत्रूच्छेदहेतुत्वात् सिद्धिरित्याख्यायते, कृत्यपक्षोपग्रहो वा कृत्याः शत्रोः क्रुद्धलुब्धभीतादयस्तेषां स्वीकारश्च, सिद्धिः शत्रूच्छेदहेतुत्वात् । तत्स्वीकारः कथं कर्तव्यः, यथोक्तं पुरस्तात् पूर्वं गूढपुरुषप्रणिध्युक्तेन प्रकारेण कर्तव्यः । कोऽसौ, उपजापोऽपसर्पो वा । **यथा च पारग्रामिके वक्ष्याम** इति । दुर्गलम्भाधिकरणीयपारग्रामिकप्रस्तावे उपजापापसर्पप्रणिधिप्रकरणयोर्यं प्रकारं वक्ष्यामस्तेन च प्रकारेणोपजापोऽपसर्पो वा कर्तव्यः ।

राज्योपघातिन आह — **राज्योपघातिनस्त्विति** । राज्योपहन्तारः, **वल्लभाः** अध्यक्षाः, **संहता वा मुख्याः** संहत्यकृतैकमत्यसंकेता अमात्यादयः प्रधानपुरुषाश्च, **ये, प्रकाशमशक्याः प्रतिषेद्धुं** राज्योपघातकप्रवृत्तेः साक्षाद् वारयितुमशक्याः, अत एव **दूष्याः** कथमप्युपहन्तव्याः भवन्ति, **तेषु धर्मरुचिः** उपघातकपरिहारेण राज्यक्षेमचिकीर्षुः, **उपांशुदण्डं** तूष्णींदण्डं, **प्रयुञ्जीत** ।

उपांशुदण्डप्रयोगप्रकारमाह — **दूष्यमहामात्रभ्रातरमित्यादि** । दूषणीयस्य हस्त्यारोहाध्यक्षस्य भ्रातरमलब्धदायांशं सत्कारपूर्वं सत्री स्वभ्रातृसकाशाद् भेदयित्वा, 'कण्टकशोधनाधिकारं ते राजा दास्यती'ति प्रोत्साह्य राजानं दर्शयेत् । **तमिति** । तथा दर्शितं, दूष्यद्रव्योपभोगातिसर्गेण दूष्यनिग्रहार्थशस्त्रभटाद्युपकरणद्रव्यदानेन, दूष्ये, विक्रमयेद् विक्रमाय प्रेरयेत् । **शस्त्रेण, रसेन वा, विक्रान्तं** भ्रातरि प्रयुक्तविक्रमं तं, **तत्रैव** तस्मिन्नेवापराधे निमित्ते, भ्रातृघातकोऽयमिति प्रख्याप्येति शेषः, **घातयेत्** ।

तेन पारशव इत्यादि । उक्तेन प्रकारेण महामात्रस्यावरवर्णापुत्रं परिचारिकापुत्रं च प्रोत्साहितानीतं दूष्यद्रव्योपभोगातिसर्गेण पितरि विक्रान्तं कात्वा पितृघातकोऽयमिति प्रख्याप्य घातयेदित्यर्थः ।

दूष्यं महामात्रं वा सत्रिप्रोत्साहितो भ्राता दायं याचेत। तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात्— हतोऽयं दायकामुकः इति । ततो हतपक्षं परिगृह्येतरं निगृह्णीयात् ।

दूष्यसमीपस्थां वा सत्रिणो भ्रातरं दायं याचमानं घातेन परिभर्त्सयेयुः । तं रात्राविति समानम् ।

दूष्यमहामात्रयोर्वा यः पुत्रः पितुः, पिता वा पुत्रस्य दारानधिचरति भ्राता वा भ्रातुस्तयोः कापटिकमुखः कलहः पूर्वेण व्याख्यातः ।

दूष्यमहामात्रपुत्रमात्मसम्भावितं वा सत्री—'राजपुत्रस्त्वं शत्रुभयादिह न्यस्तोऽसि' इत्युपचरेत् । प्रतिपन्नं राजा रहसि पूजयेत्— प्राप्तयौवराज्यकालं त्वां महामात्रभयान्नाभिषिञ्चामि इति । तं सत्री

प्रकारान्तरमाह —दूष्यं महामात्रं वेत्यादि । अन्यत्र वा दूष्यगृहप्रतिद्वारातिरिक्तप्रदेशे वा । तीक्ष्णः हिंसाचारश्चारभेदो गूढपुरुषप्रणिध्युक्तः । हतपक्षं परिगृह्य हतस्य बन्धून् पुत्रमातुलादीन् आनाय्य । इतरं निगृह्णीयात् महामात्रं घातयेद् भ्रातृघातक इति ख्यापयन् ।

प्रकारान्तरमाह — दूष्येत्यादि । दूष्यसमीपस्थाः दूष्यसेवकलिङ्गाः । घातेन परिभर्त्सयेयुः 'दायमुपेक्षस्व अन्यथा त्वां हनिष्याम' इति वादेनोद्वेजयेयुः । तं रात्राविति समानमिति । 'तं रात्रौ दूष्यगृहप्रतिद्वारि उपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात् — हतोऽयं दायकामुक इति, ततो हतपक्षं परिगृह्य महामात्रं निगृह्णीयादि'त्येतत् पूर्वोक्तमिहापि तुल्यं द्रष्टव्यमित्यर्थः ।

दूष्यमहामात्रयोर्वेति । दूष्यस्य महामात्रस्य वा, यः पुत्रः पितुर्दारान् अधिचरति अधिगच्छति, पिता वा पुत्रस्य दारान् अधिगच्छति, भ्राता वा भ्रातुर्दारान् अधिगच्छति, तयोः पितापुत्रयोर्भ्रात्रोर्वा, कापटिकमुखः कलहः कापटिकाख्यचारप्रणिधानद्वारकः कलहः, पूर्वेण पूर्वोक्तेन प्रकारेण, व्याख्यातः । तत्रान्यतरेणान्यतरस्य वधे कृते शेषवधः प्राग्वद् द्रष्टव्य इत्यर्थः ।

प्रकारान्तरमाह — दूष्यमहामात्रपुत्रमित्यादि । दूष्यस्य महामात्रस्य च पुत्रम्, आत्मसम्भावितं शौर्यौदार्यादिगुणसम्पन्नम्मन्यं, सत्री उपचरेत्, कथमिति, 'राजपुत्रस्त्वं शत्रुभयाद् इह महामात्रे न्यस्तोऽसी'ति । प्रतिपन्नं सत्रिवचनमङ्गीकृत्यागतं, राजा रहसि पूजयेत्, किमित्युक्त्वा, 'प्राप्त-

महामात्रवधे योजयेत् । विक्रान्तं तत्रैव घातयेत् — पितृघातकोऽयम् इति ।

भिक्षुकी वा दूष्यभार्यां सांवननिकीभिरोषधीभिः संवास्य रसेनातिसन्दध्यात् । इत्याप्यप्रयोगः ।

दूष्यमहामात्रमटवीं परग्रामं वा हन्तुं, कान्तारव्यवहिते वा देशे राष्ट्रपालमन्तपालं वा स्थापयितुं, नागरस्थानं वा कुपितमवग्रहीतुं, सार्थातिवाह्यं प्रत्यन्ते वा सप्रत्यादेयमादातुं फल्गु बलं तीक्ष्णयुक्तं प्रेषयेत् । रात्रौ दिवा वा युद्धे प्रवृत्ते तीक्ष्णाः प्रतिरोधकव्यञ्जना वा हन्युः — अभियोगे हतः इति ।

यौवराज्यकालं त्वां, महामात्रभयात् महामात्रो राज्यकामुकस्त्वामभिषिक्तं सद्यो हन्यादिति शङ्कया, नाभिषिञ्चामी'त्युक्त्वा । तं राजकृतोपजापप्रवणं, सत्री, महामात्रवधे, योजयेत् । विक्रान्तं हतपितृकं, तत्रैव तस्मिन्नेव निमित्ते, घातयेद् राजा पितृघातकोऽयमिति ख्यापयन्निति शेषः । हतेऽपि दूष्ये हन्तुर्वधोऽयमुपदिश्यते स कालान्तरे भूतार्थवेदी भूत्वा शत्रुर्मा भूदित्येतदर्थम् ।

भिक्षुकी वेति । सा वा, चारभूता, दूष्यभार्यां दूष्यस्य महामात्रादेर्भार्यां मन्दसौन्दर्यां, सांवननिकीभिः संवननफलाभिः, ओषधीभिः, निमित्तभूताभिः, स्वगततथाविधौषधिप्रयोगनिपुणताख्यानेनेत्यर्थः । संवास्य आत्मपरिचयं कारयित्वा, रसेन विषेण, अतिसन्दध्यात् वञ्चयेत्, संवननौषधव्याजेन विषं भार्याद्वारा ग्रासयित्वा दूष्यं हन्यादित्यर्थः । **इत्याप्यप्रयोग** इति । एवं क्रियमाणमतिसन्धानम् आप्यप्रयोग इत्याख्यायते ।

दूष्यमहामात्रमिति । दूष्यं महामात्रम्, अटवीम् अटवीपालं, परग्रामं वा पारग्रामिकान् वा, हन्तुं, कान्तारव्यवहिते वा देशे दुर्गमारण्यान्तरिते देशे वा, राष्ट्रपालं स्थापयितुम्, अन्तपालं वा स्थापयितुं, नागरस्थानं वा, कुपितम्, अवग्रहीतुं नियन्तुं, प्रत्यन्ते वा परराष्ट्रसन्धौ वा, सार्थातिवाह्यं सार्थातिवाहनयोग्यं स्थलं, सप्रत्यादेयं प्रत्यादेयं परेण पूर्वं गृहीतं पुनः प्रतिग्रहीतव्यं स्थलं तत्सहितम्, आदातुं, फल्गु बलम् अल्पं सैन्यं, तीक्ष्णयुक्तं तीक्ष्णैरुपेतं, प्रेषयेत् । रात्रौ दिवा वा युद्धे प्रवृत्ते, तीक्ष्णाः प्रतिरोधकव्यञ्जनाः चोरवेषास्तीक्ष्णाः, हन्युः, अभियोगे युद्धे हत इति ख्यापयन्तः । अर्थात् पूर्वोक्तं हन्तव्यं जनम् । वाशब्दः प्रकारविकल्पे ।

यात्राविहारगतो वा दूष्यमहामात्रान् दर्शनायाह्वयेत् । ते गूढशस्त्रैस्तीक्ष्णैः सह प्रविष्टा मध्यमकक्ष्यायामात्मविचमन्तयःप्रवेशनार्थं दद्युः । ततो दौवारिकाभिगृहीतास्तीक्ष्णा 'दूष्यप्रयुक्ताः स्मः' इति ब्रूयुः । ते तदभिविख्याप्य दूष्यान् हन्युः। तीक्ष्णस्थाने चान्ये वध्याः।

बहिर्विहारगतो वा दूष्यान् आसन्नावासान् पूजयेत् । तेषां देवीव्यञ्जना वा दुःस्त्री रात्रावावासेषु गृह्येतेति समानं पूर्वेण ।

दूष्यमहामात्रं वा 'सूदो भक्षकारो वा ते शोभनः' इति स्तवेन भक्षभोज्यं याचेत, बहिर्वा क्वचिदध्वगतः पानीयम् । तदुभयं रसेन योजयित्वा प्रतिस्वादने तावेवोपयोजयेत् । तदभिविख्याप्य 'रसदावि'ति घातयेत् ।

उपायान्तरमाह—यात्राविहारगतो वेत्यादि । अयमर्थः—राजकुलमशस्त्रेण प्रवेष्टव्यमित्याघोषणे स्थिते जातु प्रस्तुतयात्राविहारो दूष्यमहामात्रान् राजा दर्शनायाह्वयेत । तैः सह राजकुलं निगूढशस्त्रास्तीक्ष्णाः राजदत्तपूर्वसंकेताः प्रविश्य प्रथमद्वारमतीत्य द्वितीयकक्ष्याद्वारं गताः द्वाराधिकृतैः सशस्त्राशस्त्रपरीक्षणं कुर्वद्भिः 'कुतो यूयं सशस्त्राः' इति पृष्टाः 'नृपतिवधाय महामात्रेण प्रेरिता वयम्' इति वदेयुः । ततस्तं दोषं प्रख्याप्य महामात्रान् राजा घातयेत्, तीक्ष्णानां स्थाने चान्यांस्तीक्ष्णापदेशेन घातयेदिति ।

बहिरित्यादि । बहिर्विहारगतः दुर्गबाह्यग्रामनगरादिदर्शनार्थं गतः, दूष्यान्, आसन्नावासान् राजवासस्थानाभ्यर्णस्थानवासिनः, पूजयेत् पौनःपुनिकसन्दर्शनसम्भाषणसम्भोजनादिना सत्कुर्यात् स्नेहख्यापनार्थम् । स्नेहख्यापनं तु वक्ष्यमाणो वधप्रयोगः पारमार्थिकमहापराधनिमित्तो न द्वेषनिमित्त इति लोकप्रत्ययार्थम् । तेषां देवीव्यञ्जना वा दुःस्त्री रात्रावावासेषु गृह्येतेति । पुंश्चलीं काञ्चिद् राजभार्याव्यञ्जनां कृत्वा रात्रौ दूष्याणामावासेषु सम्प्रेष्य स्वगृहादर्शनसंरम्भाभिनयेन स्वनिवासासन्नगृहेषु सपदि स्वभटैः कारितान्वेषणां कृत्वा दूष्यगृहाद् राजा ग्राहयेत् । इति समानं पूर्वेणेति । एवमादि पूर्वोक्तेन तुल्यं, तच्च — तमिमं देवीकामुकत्वदोषं ख्यापयन् दूष्यान् घातयेदित्येवंरूपम् ।

प्रकारमन्यमाह—दूष्यमहामात्रमित्यादि । शोभनः सुष्ठुकारी । याचेत, राजा । बहिर्वा मृगयाप्रदेशे वा । तदुभयं रसेन योजयित्वा महामात्रदत्तं

अभिचारशीलं वा सिद्धव्यञ्जनो गोधाकूर्मकर्कटकूटानां लक्षण्यानामन्यतमप्राशनेन मनोरथानवाप्स्यसीति ग्राहयेत् । प्रतिपन्नं कर्मणि रसेन लोहमुसलैर्वा घातयेत् कर्मव्यापदा हत इति ।

चिकित्सकव्यञ्जनो वा दौरात्मिकमसाध्यं वा व्याधिं दूष्यस्य स्थापयित्वा भैषज्याहारयोगेषु रसेनातिसन्दध्यात् ।

सूदारालिकव्यञ्जना वा प्रणिहिता दूष्यं रसेनातिसन्दध्युः । इत्युपनिषत्प्रतिषेधः ।

उभयदूष्यप्रतिषेधस्तु । यत्र दूष्यः प्रतिषेद्धव्यस्तत्र दूष्यमेव फल्गुबलतीक्ष्णयुक्तं प्रेषयेत्—गच्छामुष्मिन् दुर्गे राष्ट्रे वा सैन्यमुत्था-

---

भक्ष्यभोज्यं विषेण योजयित्वा पानीयं च विषेण योजयित्वा प्रतिस्वादने अग्रग्रसने । तावेव भक्षभोज्यदायिनं पानीयदायिनं च । रसदौ अर्थात् भक्ष्यभोज्यदापकः पानीयदापकश्चेत्येतौ ।

अभिचारशीलदूष्यनिग्रहोपायमाह—**अभिचारशीलं** वेत्यादि । तथाविधं दूष्यं, सिद्धव्यञ्जनः, गोधाकूर्मकर्कटककूटानां गोधा निहाका कूर्मकर्कटकौ प्रसिद्धौ कूटो भग्नशृङ्गमृगः इत्येतेषां, लक्षण्यानां लक्षणयुक्तानाम्, अन्यतमप्राशनेन अन्यतमस्य श्मशानाग्निहुतावशिष्टस्य भक्षणेन, मनोरथान्, अवाप्स्यसि, इति ग्राहयेत् बोधयेत् । प्रतिपन्नं तथेति कृताभ्युपगमं, कर्मणि तथाविधहोमे वर्तमाने, रसेन विषप्राशनेन, लोहमुसलैर्वा, घातयेत् । कर्मव्यापदा हत इति कर्मवैगुण्येन पिशाचादिना हत इति ख्यापयन् ।

चिकित्सकव्यञ्जनो वेति । दौरात्मिकं दुर्वृत्तकृतम्, असाध्यम् अप्रतिकार्यं वा, व्याधिं दूष्यस्य स्थापयित्वा, भैषज्याहारयोगेषु औषधाभ्यवहारप्रयोगेषु, रसेन विषेण, अतिसन्दध्यात् मारयेत् ।

सूदारालिकव्यञ्जना वेति । सूदो मांसपाचकः आरालिकस्तण्डुलादिपाचकः तद्व्यञ्जनाः, प्रणिहिताः, दूष्यं रसेन अतिसन्दध्युः । **इत्युपनिषत्प्रतिषेध** इति । एवम्प्रकार उपनिषदुक्तो दूष्यनिग्रहः ।

उभयदूष्यप्रतिषेधस्त्विति । उभयोर्दूष्यपक्षयोर्निग्रह एकेन यत्नेन यथा सिध्येत्, तथा कश्चित् प्रकार उच्यत इत्यर्थः । **यत्रे**ति । यस्मिन् प्रदेशे, दूष्यः, प्रतिषेद्धव्यो निग्राह्यः, वसतीति शेषः, तत्र दूष्यमेवान्यं फल्गुबलतीक्ष्णयुक्तम् अल्पसैन्येन तीक्ष्णेन च युक्तं, प्रेषयेत् । किं कृत्वेत्याह—**गच्छामु-**

पय हिरण्यं वा, वल्लभाद् वा हिरण्यमाहारय, वल्लभकन्यां वा प्रसह्या-नय । दुर्गसेतुवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मणामन्यतमं वा कारय, राष्ट्रपाल्यमन्तपाल्यं वा । यश्च त्वा प्रतिषेधयेन्न वा ते साहाय्यं दद्यात् स बन्धव्यः स्यात् इति । तथैव इतरेषां प्रेषयेत् 'अमुष्या-विनयः प्रतिषेद्धव्यः' इति । तमेतेषु कलहस्थानेषु कर्मप्रतिघातेषु वा विवदमानं तीक्ष्णाः शस्त्रं पातयित्वा प्रच्छन्नं हन्युः । तेन दोषेणेतरे नियन्तव्याः ।

पुराणां ग्रामाणां कुलानां वा दूष्याणां सीमाक्षेत्रखलवेश्ममर्यादासु द्रव्योपकरणसस्यवाहनहिंसासु प्रेक्षाकृत्योत्सवेषु वा समुत्पन्ने कलहे तीक्ष्णैरुत्पादिते वा तीक्ष्णाः शस्त्रं पातयित्वा ब्रूयुः—एवं क्रियन्ते येऽमुना कलहायन्ते इति । तेन दोषेणेतरे नियन्तव्याः ।

ष्यमित्यादि । इतीत्यनन्तरम् उक्त्वेति शेषः । सैन्यमुत्थापय सेनासमवाययोग्यं जनं संगृह्णीष्व । वल्लभाद् अध्यक्षात् । दुर्गसेतुवणिक्पथशून्यनिवेशखनिद्रव्यहास्तिवनकर्मणां दुर्गसेतुवणिक्पथकर्माणि प्रतीतानि शून्यनिवेशकर्म जाङ्गले नवगृहादिसन्निवेशनकर्म खनिकर्म आकरकर्म द्रव्यवनकर्म दार्वादिवनकर्म हस्तिवनकर्म हस्तिवनाध्यक्षकर्म तेषाम् । राष्ट्रपाल्यं राष्ट्रपालकर्म । अन्तपाल्यम् अन्तपालकर्म । आन्तपाल्यमिति पठितुं युक्तम् । बन्धव्यः बद्ध्वा नेतव्यः । तथैवेतरेषां प्रेषयेदित्यादि । पूर्वोक्तो यत्र प्रेष्यते तत्रत्यानामपि 'अमुष्य प्रेष्यमाणस्योन्मर्यादाः प्रवृत्तयो वार्यन्ताम्' इति वाचिकं धैर्यप्रदं प्रेषयेत् । तमेतेष्वित्यादि । एतेषु सैन्यहिरण्योत्थापनादिषु कलहकारणेषु सन्दिष्टदूष्यपुरुषारब्धेषु कर्मविघ्नेषु वा विसंवादिनं पूर्वदूष्यं तीक्ष्णाः शस्त्रप्रयोगेण रहसि हन्युः । तं च नियुक्तराजपुरुषघातापराधं सन्दिष्टदूष्येष्वारोप्य तेऽपि हन्तव्याः ।

पुराणामित्यादि । पुरग्रामकुलानां दूष्याणां च पुरादिसन्निक्षेत्रखलवेश्मसीमाविषये हिरण्यवस्त्रसस्ययानोपघातविषये नृत्तदर्शनविवाहाद्युत्सवसम्बद्धे च कलहे सञ्जाते तीक्ष्णनिष्पादिते वा तथाविधे कलहे तीक्ष्णाः प्रच्छन्नं कांश्चिद् दूष्यान् शस्त्रेण हत्वा तदन्येषु दूष्येषु तं घातदोषं नामनिर्देशपूर्वमारोपयेयुः — 'अमुनामुना सह कलहायमानानां गतिरीदृशी'ति प्रवदन्तः । तद्दोषापदेशेन च तान् दूष्यान् राजा दण्डयेत् ।

येषां वा दूष्याणां जातमूलाः कलहाः तेषां क्षेत्रखलवेश्मान्यादीपयित्वा बन्धुसम्बन्धिषु वाहनेषु वा तीक्ष्णाः शस्त्रं पातयित्वा तथैव ब्रूयुः — अमुना प्रयुक्ताः स्मः इति । तेन दोषेणेतरे नियन्तव्याः ।

दुर्गराष्ट्रदूष्यान् वा सत्रिणः परस्परस्यावेशनिकान् कारयेयुः । तत्र रसदा रसं दद्युः, तेन दोषेणेतरे नियन्तव्याः ।

भिक्षुकी वा दूष्यराष्ट्रमुख्यं दूष्यराष्ट्रमुख्यस्य भार्या स्नुषा दुहिता वा कामयत इत्युपजपेत् । प्रतिपन्नस्याभरणमादाय स्वामिने दर्शयेत् — असौ ते मुख्यो यौवनोत्सिक्तो भार्यां स्नुषां दुहितरं वाभिमन्यते इति । तयोः कलहो रात्रौ । इति समानम् ।

दूष्यदण्डोपनतेषु तु युवराजः सेनापतिर्वा किञ्चिदपकृत्यापक्रान्तो विक्रमत । ततो राजा दूष्यदण्डोपनतानेव प्रेषयेत् फल्गुबल-

---

येषां वा दूष्याणां जातमूलाः कलहा इत्यादि । कलहमूलभूतानां दूष्याणां क्षेत्रखलवेश्मानि तीक्ष्णा वह्निना सन्दीप्य बन्धून् सम्बन्धिनो वाहनानि वा शस्त्रेण हत्वा प्रागुक्तरीत्या तं दोषमन्येषु दूष्येषु नामनिर्देशपूर्वमारोपयेयुः — 'अमुनामुना सह कलहायमानानां गतिरीदृशी, वयं ह्यमुनामुना प्रयुक्ता एवमकार्ष्मे'ति । तद्दोषापदेशेन च तान् दूष्यान् राजा दण्डयेत् । तीक्ष्णदण्डस्तु 'तीक्ष्णस्थाने चान्ये वध्या' इत्युक्तदिशार्थात् सिद्ध इत्यत्र नोक्तः ।

दुर्गराष्ट्रदूष्यान् वेत्यादि । दुर्गराष्ट्रवास्तव्यान् परस्परवैरिणो दूष्यान् सन्धिकरणेन परस्परं सङ्गमय्य सत्रिपुरुषाः परस्परगृहातिथीन् कारयेयुः । भोजनप्रसङ्गे च विषं दापयित्वा दूष्यान् घातयेयुः । घातितानां प्रतिपक्षांस्तु दूष्यांस्तेनैव रसदानदोषेण राजा नियमयेत् ।

भिक्षुकी वेत्यादि । भिक्षुकी, दूष्यराष्ट्रमुख्यं दूष्यराष्ट्रमुख्यस्यान्यस्य, भार्या स्नुषा दुहिता वा कामयत इति, उपजपेत् मिथ्याबोधनं कुर्यात् । प्रतिपन्नस्य अङ्गीकृततदुपजापस्य दूष्यस्य आभरणम् अभिगन्तव्यस्त्रीसत्कारार्थत्वापदेशेन गृहीत्वा स्त्रीसम्बन्धिने दूष्यराष्ट्रमुख्याय दर्शयेत् —अमुकनामा मुख्यो यौवनदृप्तस्त्वदीयां कामयत इति वदन्ती । ततो रात्रौ तया स्त्रीगृहमानीते कामुके तस्य स्त्रीबन्धोश्च कलहः प्रवर्त्येत । कामुके च हते तेनापराधेन कामुकघातकं दूष्यं हन्यात् ।

दूष्यदण्डोपनतेषु त्विति । दण्डोपनता बलतोऽधःकृताः दण्डोपनतवृत्तप्रकरणवक्ष्यमाणचरितास्तेषु दूष्यभूतेषु विषये, युवराजः, सेनापतिर्वा,

तीक्ष्णयुक्तानिति समानाः सर्व एव योगाः । तेषां च पुत्रेष्वनुक्षिपत्सु यो निर्विकारः स पितृदायं लभेत। एवमस्य पुत्रपौत्राननुवर्तते राज्यमपास्तपुरुषदोषमिति ॥

स्वपक्षे परपक्षे वा तूष्णीन्दण्डं प्रयोजयेत् ।
आयत्यां च तदात्वे च क्षमावानविशङ्कितः ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
प्रथमोऽध्यायः दाण्डकर्मिकम्,
आदित एकनवतितमः ॥

किञ्चिदपकृत्य तज्जनपदोपघातमल्पं कृत्वा, अपक्रान्तो विक्रमेत अनत्याक्रामन् विक्रमं दर्शयेत् । ततः तदनु, राजा, दूष्यदण्डोपनतानेव अन्यान्, फल्गुबलतीक्ष्णयुक्तान् प्रेषयेत् । अर्थाद् दूष्यैः सह संवित्करणार्थम् । इति सर्व एव योगाः एवम्प्रायाः सर्वेऽभ्युपायाः, समानाः पूर्वोक्ततुल्याः । संविन्निमित्तकलहप्रवर्तना, तीक्ष्णैर्दूष्याणां राजप्रेषितानां प्रच्छन्नवधः, तस्य सन्धेयदूष्यकृतत्वख्यापनं, तेन निमित्तेन तेषां निग्रहणमित्येवञ्जातीयमूहनीयमित्यभिप्रायः । **तेषां चेति** । तथा मारितानां दूष्याणां, पुत्रेषु, अनुक्षिपत्सु निन्दत्सु मध्ये, यो निर्विकारः द्रोहचिन्तनरहितः, सः पितृदायं लभेत अर्थाद् दूष्योद्धर्तुस्तद्राज्यप्रभविष्णुतां प्राप्तस्य राज्ञ इच्छया । न केवलं पुत्रः तत्पुत्रपौत्रपरम्परापि निर्विकारतायामेव राज्यं लभेतेत्याह— **एवमस्येत्यादि** । अपास्तपुरुषदोषमिति क्रियाविशेषणम् । पुरुषदोषः पुरुषस्य सविकारत्वम् । तद्योगे तु राज्यं स्ववशे स्थापयेत् प्रभविष्णुरित्यर्थः । इतिशब्दः प्रकरणसमाप्तौ ॥

अध्यायान्ते श्लोकमाह — **स्वपक्षे परपक्षे वेत्यादि** । सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
प्रथमोऽध्यायः दाण्डकर्मिकम्,
आदित एकनवतितमः ॥

९०. प्रक. कोशाभिसंहरणम् ।

कोशमकोशः प्रत्युत्पन्नार्थकृच्छ्रः सङ्गृह्णीयात् ।

जनपदं महान्तमल्पप्रमाणं वा देवमातृकं प्रभूतधान्यं धान्यस्यांशं तृतीयं चतुर्थं वा याचेत, यथासारं मध्यमवरं वा ।

दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्मोपकारिणं प्रत्यन्तमल्पप्रमाणं वा न याचेत ।

धान्यपशुहिरण्यादि निविशमानाय दद्यात् । चतुर्थमंशं धान्यानां बीजभक्तशुद्धं च हिरण्येन क्रीणीयात् ।

कोशाभिसंहरणमिति सूत्रम् । कोशस्य सुवर्णादेर्धान्यादेश्च अभिसंहरणं कॢप्तादभ्यधिकतया संग्रहणम् अर्थनिस्तरणीयकृच्छ्रप्राप्त्यवसरेषु राज्ञा क्रियमाणं कोशाभिसंहरणं, तदिह प्रतिपाद्यत इति सूत्रार्थः । कण्टकशोधने दुर्गराष्ट्रगतकण्टकानां शोधनप्रकार उक्तः । अत्र तु राजा स्वगतस्य कण्टकत्वस्य शोधनं कथमनुतिष्ठेदित्येतदुपदिश्यते ।

कोशमिति । तम्, अकोशः अल्पकोशः, प्रत्युत्पन्नार्थकृच्छ्रः प्रत्युत्पन्नमतर्कितोपनतम् अर्थकृच्छ्रम् अर्थचिकित्सनीयः क्लेशो यस्य स तथाभूतः, संगृह्णीयात् अर्थसंग्रहणेन वर्धयेत् ।

जनपदमित्यादि । जनपदं लक्षणया जानपदान् । देवमातृकं वृष्ट्यम्बुसंवर्धितसस्यजीवनम् । अदेवमातृकमिति पदच्छेदे तद्भिन्नं सदाजलसमृद्धनदीसरस्संवर्धितसस्यजीवनम् । प्रभूतधान्यं समृद्धनिष्पन्नधान्यम् । याचेत याचित्वा गृह्णीयात्, न तु प्रसह्य गृह्णीयात् । यथासारं तत्तद्धान्यपरिमाणानुसारेण । मध्यम् अवरं वा जनपदम् ।

अयाच्यांशानाह — **दुर्गसेत्वित्यादि** । दुर्गकर्मसेतुकर्मादिभिः सप्तभिरुपकारिणं सप्तप्रकारं, न याचेत अर्थात् कर्मविघ्नभयात् । प्रत्यन्तं विषयसीमावासिनं, न याचेत विषयानन्तरवासिशत्रुपक्षप्रवेशभयात् । अल्पप्रमाणम् अल्पधनप्रमाणं, न याचेत ।

अर्थकृच्छ्रावस्थायामपि राज्ञा नवकुलनिवेशकाविषये कर्तव्यमाह — **धान्यपशुहिरण्यादीति** । धान्यं पशुं हिरण्यमित्येवमादिकं कृषिसाधनं, निविशमानाय नवं कुलं स्थापयते कृषकाय, दद्यात् । धान्यानां तत्कृषिनिष्पन्नानां, चतुर्थमंशं हिरण्येन क्रीणीयात् निविशमानसकाशात् क्रयेणाधिगच्छेत् न तु

अरण्यजातं श्रोत्रियस्वं च परिहरेत् । तदप्यनुग्रहेण क्रीणीयात् ।

तस्याकरणे वा समाहर्तृपुरुषा ग्रीष्मे कर्षकाणामुद्वापं कारयेयुः । प्रमादावस्कन्नस्यात्ययं द्विगुणमुदाहरन्तो बीजकाले बीजलेख्यं कुर्युः । निष्पन्ने हरितपक्कादानं वारयेयुः अन्यत्र शाककटभङ्गमुष्टिभ्यां देवपितृपूजादानार्थं गवार्थं वा । भिक्षुकग्रामभृतकार्थं च राशिमूलं परिहरेयुः ।

स्वसस्यापहारिणः प्रतिपातोऽष्टगुणः । परसस्यापहारिणः पञ्चाशद्गुणः सीतात्ययः स्ववर्गस्य, बाह्यस्य तु वधः ।

सामान्यजानपदादिव बलित्वेन गृह्णीयात् । बीजभक्तशुद्धं च बीजभोजनार्थोपयोक्तव्यावशिष्टं च धान्यं, हिरण्येन क्रीणीयात् ।

अरण्यजातमिति । वनोत्पन्नं धान्यं वरकादि, श्रोत्रियस्वं च छान्दसग्रीह्यादिकं च, परिहरेत् न तु विभजेत् । तदपि धान्यम् , अनुग्रहेण बीजभक्तार्थापेक्षितपरिहारेण, क्रीणीयात् ।

तस्याकरणे वेति । श्रोत्रियेण कृष्यकरणे, आकारणे इति पाठे श्रोत्रियेणाह्वानेऽभ्यनुज्ञाने कृते इत्यर्थः, समाहर्तृपुरुषाः, ग्रीष्मे, कर्षकाणाम्, उद्वापम् उद्वपनकर्म, कारयेयुः । प्रमादावस्कन्नस्य कर्षकानवधानविनष्टस्य, द्विगुणम् , अत्ययं दण्डम् , उदाहरन्तः संविल्लेख्ये कथयन्तः, बीजकाले बीजावापकाले, बीजलेख्यं बीजसम्बद्धं लेख्यं, कुर्युः । निष्पन्ने फलिते बीजे, हरितपक्कादानम् आमस्य पक्कस्य च फलस्य ग्रहणं, वारयेयुः, अर्थात् कर्षकाणाम् । तत्रापवादः—**अन्यत्र शाककटभङ्गमुष्टिभ्यामि**त्यादि । शाकमुष्टिर्हरितमुष्टिः कटभङ्गमुष्टिः हस्तच्छिन्नधान्यमुष्टिः, देवपितृपूजादाननिमित्ते गोनिमित्ते च यच्छाकमुष्टिग्रहणं यच्च कटभङ्गमुष्टिग्रहणं तदुभयमपहाय । **भिक्षुकग्रामभृतकार्थं चेति** । भिक्षुकार्थं ग्रामभृतकार्थं च, राशिमूलं राश्यधस्तलगतं धूलिधान्यं, परिहरेयुः प्रकल्पयेयुः ।

स्वसस्यापहारिण इति । स्वकृष्यमाणक्षेत्रसस्यहर्तुः, प्रतिपातो दण्डः, अष्टगुणः अपहृतसस्यमूल्यादष्टावृत्तिः, कार्य इति शेषः । परसस्यापहारिणः अनन्तरक्षेत्रगतसस्यहर्तुः, पञ्चाशद्गुणः, सीतात्ययः क्षेत्रसस्यापहारनिमित्तो दण्डः, स्ववर्गस्य स्वग्रामस्थस्य सतः । बाह्यस्य तु ग्रामान्तरवासिनः पुनः परसस्यापहारिणः, वधः ।

चतुर्थमंशं धान्यानां षष्ठं वन्यानां तूललाक्षाक्षौमवल्ककार्पासरौमकौशेयकौषधगन्धपुष्पफलशाकपण्यानां काष्ठवेणुमांसवल्लूराणां च गृह्णीयुः। दन्ताजिनस्यार्धम्। अनिसृष्टं विक्रीणानस्य पूर्वः साहसदण्डः।

इति कर्षकेषु प्रणयः।

सुवर्णरजतवज्रमणिमुक्ताप्रवाळाश्वहस्तिपण्याः पञ्चाशत्कराः। सूत्रवस्त्रताम्रवृत्तकंसगन्धभैषज्यशीधुपण्याश्चत्वारिंशत्कराः। धान्यरसलोहपण्याः शकटव्यवहारिणश्च त्रिंशत्कराः। काचव्यवहारिणो महाकारवश्च विंशतिकराः। क्षुद्रकारवो बन्धकीपोषकाश्च दशकराः। काष्ठवेणुपाषाणमृद्भाण्डपक्वान्नहरितपण्याः पञ्चकराः। कुशीलवा रूपाजीवाश्च वेतनार्धं दद्युः। हिरण्यकरमकर्मण्यानाहारयेयुः। न चैषां कञ्चिदपराधं परिहरेयुः। ते ह्यपरगृहीतमभिनीय विक्रीणीरन्।

चतुर्थमिति। धान्यानाम् अनूनतिष्पन्नानां, चतुर्थमंशं गृह्णीयुः। षष्ठम् अंशं, वन्यानां वनभवधान्यानां, तूलादीनां द्वादशानां, काष्ठादीनां चतुर्णां च, गृह्णीयुः। तत्र शाकं दशविधमुक्तचरं, वल्लूरं शुष्कमांसं, शेषं प्रसिद्धम्। दन्ताजिनस्य गजदन्तस्य गवादित्वचश्च, अर्धं गृह्णीयुः। अनिसृष्टं स्वच्छन्दविनियोगानर्हं राजभोगमित्यर्थः, विक्रीणानस्य पूर्वः साहसदण्डः।

इति कर्षकेषु प्रणय इति। अनेन प्रकारेण कर्षकविषया प्रार्थना व्याख्याता।

सुवर्णेत्यादि। सुवर्णरजताद्यष्टपण्याः, पञ्चाशत्कराः पञ्चाशद्भागकराः। सूत्रवस्त्रताम्राद्यष्टकपण्याः, चत्वारिंशत्कराः चत्वारिंशद्भागकराः। **धान्यरसलोहपण्या** इत्यादि। व्रीहिशाल्यादि धान्यं तैलघृतादि रसम् अयस्ताम्रादिकं लोहं च शकटवाह्यं कृत्वा क्रयविक्रयानुष्ठानं कुर्वन्तस्त्रिंशद्भागकराः। काचव्यवहारिणः विजातिमणिव्यवहरणवृत्तयः, महाकारवश्च सुवर्णकारुमहानौकारुप्रभृतयश्च, विंशतिकराः विंशतिभागकराः। क्षुद्रकारवः तक्षायस्काररजकादयः, बन्धकीपोषकाश्च वेश्यातुल्याः कुलस्त्रियो बन्धक्यः तत्पोषकाश्च, दशकराः स्वार्जितदशभागकराः। **काष्ठेत्यादि**। काष्ठादिषट्कपण्याः, पञ्चकराः। कुशीलवाः नटनर्तकादयः, रूपाजीवाश्च वेश्याश्च, वेतनार्धं स्वार्जितस्यार्धं, दद्युः। **हिरण्येत्यादि**। अकर्मण्यान् वाणिज्यादिकर्मसु अव्यापृतान्

इति व्यवहारिषु प्रणयः ।

कुक्कुटसूकरमर्धं दद्यात् । क्षुद्रपशवः षड्भागम् । गोमहिषाश्वतरखरोष्ट्राश्च दशभागम् । बन्धकीपोषका राजप्रेष्याभिः परमरूपयौवनाभिः कोशं संहरेयुः ।

इति योनिपोषकेषु प्रणयः ।

सकृदेव न द्विः प्रयोज्यः । तस्याकरणे वा समाहर्ता कार्यमपदिश्य पौरजानपदान् भिक्षेत । योगपुरुषाश्चात्र पूर्वमतिमात्रं दद्युः ।

वणिगादीन्, हिरण्यकरम् एकवराटकलक्षणं करं प्रातिशीर्षिकम्, आहारयेयुः दापयेयुः । न चैषां कश्चिदपराधं परिहरेयुरिति । वणिक्तक्षादीनाम् अव्यापारलक्षणमपराधं नैवोपेक्षेरन् । स्वकर्मसु अव्यापारो नाम नोपेक्षणीयोऽर्थः, किन्तु तमपराधपक्षे निक्षिप्य तद्दण्डत्वबुद्ध्या वा हिरण्यकरस्तेभ्यो ग्राह्य एवेत्यभिप्रायः । न च तेषामव्यापारः प्रत्ययायोग्य इत्याह— ते ह्यपरगृहीतमभिनीय विक्रीणीरन्निति । ते हि स्वीयमेव पण्यम् अस्वीयमित्यपदिश्य विक्रीणीरन् ।

इति व्यवहारिषु प्रणय इति । एवम्प्रकारा क्रयविक्रयानुष्ठायिविषया करप्रार्थना ।

अथ तिर्यग्योनिपोषकेषु प्रणयमाह —कुक्कुटसूकरमिति । कुक्कुटसूकरशब्दौ तत्पोषकोपलक्षकौ कुक्कुटपोषकाः सूकरपोषकाश्च, अर्धं स्ववर्धितानां कुक्कुटसूकराणाम् अर्धभागं, दद्यात् । क्षुद्रपशवः अजाविप्रभृतिपोषकाः, षड्भागम् अजाव्यादीनां षष्ठं भागं, दद्युः । गोमहिषाश्वतरखरोष्ट्राश्च गोमहिषवेसरगर्दभक्रमेलकपोषकाश्च, दशभागं दद्युः । बन्धकीपोषकाः, राजप्रेष्याभिः परमरूपयौवनाभिः स्वपोषिताभिर्द्वारभूताभिः, कोशं, संहरेयुः सञ्चिनुयुः ।

इति योनिपोषकेषु प्रणय इति । व्याख्यात इति शेषः ।

स चायं करप्रणयः सकृदेव प्रयोक्तव्यः न तु द्विः प्रजाकोपभयादित्याह —सकृदेव न द्विः प्रयोज्य इति । तस्याकरणे वेति । तथा प्रणयस्य करणायोगपक्षे, समाहर्ता विषयबलाधिकृतः, कार्यमपदिश्य अमुककार्यं साधनीयमस्तीति व्यपदिश्य, पौरजानपदान्, भिक्षेत याचेत । योगपुरुषाश्च कृतव्याजसंकेताः समाहर्तृपुरुषाश्च, अत्र समाहर्तृव्यपदिष्टे कार्ये विषये, पूर्वम्, अतिमात्रम् अमितं धनं, दद्युः । एतेन, प्रदेशेन प्रकारेण, राजा पौरजानपदान्

एतेन प्रदेशेन राजा पौरजानपदान् भिक्षेत । कापटिकाश्चैनानल्पं प्रयच्छतः कुत्सयेयुः । सारतो वा हिरण्यमाढ्यान् याचेत । यथोपकारं वा स्ववशा वा यदुपहरेयुः । स्थानच्छत्रवेष्टनविभूषाश्चैषां हिरण्येन प्रयच्छेत् । पाषण्डसङ्घद्रव्यमश्रोत्रियभोग्यं देवद्रव्यं वा कृत्यकराः प्रेतस्य दग्धगृहस्य वा हस्ते न्यस्तमित्युपहरेयुः ।

देवताध्यक्षो दुर्गराष्ट्रदेवतानां यथास्वमेकस्थं कोशं कुर्यात् । तथैव चाहरेत् । दैवतचैत्यं सिद्धपुण्यस्थानमौपपादिकं वा रात्रावुत्थाप्य यात्रासमाजाभ्यामाजीवेत् । चैत्योपवनवृक्षेण वा देवताभिगमनमनार्तवपुष्पफलयुक्तेन ख्यापयेत् । मनुष्यकरं वा वृक्षे रक्षोभयं

भिक्षेत । कापटिकाश्च गूढपुरुषभेदाः, एनान् पौरजानपदान्, अल्पं धनं, प्रयच्छतः, कुत्सयेयुः निन्दयेयुः । सारतो वा तत्तद्धनबलानुसारेण वा, हिरण्यं धनम्, आढ्यान् धनिनो, याचेत । यथोपकारं वा उपकारानुगुण्येन वा, स्ववशा वा यद् उपहरेयुः, तद् गृह्णीयादिति वाक्यशेषः ।

स्थानच्छत्रवेष्टनविभूषाश्चेति । स्थानमध्यक्षपदं छत्रं श्वेतातपत्रं वेष्टनमुष्णीषं विभूषा कनकवलयादिरित्येताश्च बहुमानचिह्नभूताः, एषाम् आढ्यानां, हिरण्येन धनग्रहणेन, प्रयच्छेत् । पाषण्डसङ्घद्रव्यमिति । पाषण्डद्रव्यं सङ्घद्रव्यं च, अश्रोत्रियभोग्यं श्रोत्रियभोग्यव्यतिरिक्तं, देवद्रव्यं वा रक्षणीयं, कृत्यकराः, प्रेतस्य दग्धगृहस्य वा हस्ते न्यस्तमिति यस्य हस्ते रक्षणाय निक्षिप्तं स प्रमीतः अथवा तस्य गृहं दग्धमिति, वदन्त इति शेषः, उपहरेयुः यत्नादुपलभ्य राजान्तिकेऽर्पयेयुः ।

देवताध्यक्ष इति । स वा, दुर्गराष्ट्रदेवतानां दुर्गगतदेवतानां राष्ट्रगतदेवतानां च, कोशं धनं, यथास्वं यथायथम्, एकस्थं परचक्रभयाद्यपदेशेनैकस्थानगतं, कुर्यात् । तथैव चाहरेत् राजान्तिकेऽर्पयेत् । दैवतचैत्यं दैवतवेदिं, सिद्धपुण्यस्थानमौपपादिकं वा सिद्धे प्रतीते पुण्यस्थाने औपपादिकं भूमिमुद्भिद्याविर्भूतं स्वयम्भूलिङ्गमिति वादेन युक्तं, रात्रौ विजने, उत्थाप्य रचयित्वा, यात्रासमाजाभ्यामाजीवेत् तत्रोत्सवकरणेन जनमेलकप्रवर्तनेन च धनं दैवार्थमुपहारयन्नपहरेत् । चैत्यादिषु देवसान्निध्यविश्वासार्थमद्भुतकल्पनमाह — चैत्योपवनवृक्षेण वेत्यादि । चैत्यारामगते वृक्षविशेषे कस्मिंश्चित्

प्ररूपयित्वा सिद्धव्यञ्जनाः पौरजानपदानां हिरण्येन प्रतिकुर्युः। सुरुङ्गायुक्ते वा कूपे नागमनियतशिरस्कं हिरण्योपहारेण दर्शयेद् नागप्रतिमायामन्तश्छिद्रायाम्। चैत्यच्छिद्रे वल्मीकच्छिद्रे वा सर्पदर्शन आहारेण प्रतिबद्धसंज्ञं कृत्वा श्रद्दधानानादर्शयेत्। अश्रद्दधानानामाचमनप्रोक्षणेषु रसमवपाय्य देवताभिशापं ब्रूयात्। अभित्यक्तं वा दंशयित्वा। योगदर्शनप्रतीकारेण वा कोशाभिसंहरणं कुर्यात्।

वैदेहकव्यञ्जनो वा प्रभूतपण्यान्तेवासी व्यवहरेत। स यदा पण्यमूल्ये निक्षेपप्रयोगैरुपचितः स्यात् तदैनं रात्रौ मोषयेत्।

पुष्पं फलं च प्रयत्नादनृतावुत्पादितं दर्शयित्वा देवतासान्निध्यमहिमकृतमिदमिति प्रख्यापयेत्। **मनुष्यकरं वा वृक्षे रक्षोभयमित्यादि**। सिद्धव्यञ्जनाः रात्रौ पितृवनादिगते वृक्षे रक्षोवेषेण स्थित्वा 'मह्यं मनुष्य एकैको दिने दिने करत्वेन दातव्यः अन्यथा सर्वान् युगपत् खादेयम्' इत्येवं स्वयं श्रावयित्वा रक्षसा श्रावितमिति प्रख्याप्य निर्दिष्टमनुष्यबलिकस्य तथाविधस्य रक्षोभयस्य प्रतीकारार्थं पौरजानपदेभ्यः प्रभूतं हिरण्यमुत्थाप्य राज्ञ उपहरेयुः। **सुरुङ्गायुक्ते** वेति। भूविवरयुक्ते, कूपे, नागम्, अनियतशिरस्कं त्रिशीर्ष-पञ्चशीर्षादिं सर्पं कृत्रिमं, हिरण्योपहारेण अद्भुतनागदर्शनार्थं द्रष्टृदेयतया स्वकल्पितस्य हिरण्यकस्य ग्रहणेन, दर्शयेद् दिदृक्षुभ्यः, कुत्र दर्शयेत्, नागप्रतिमायाम् अन्तश्छिद्रायां सत्यसर्पावस्थानयोग्यान्तस्सुषिरवत्याम्। चैत्यच्छिद्रे वल्मीकच्छिद्रे वा देवचैत्यभित्त्यादिगते रन्ध्रे तद्गतवल्मीकविवरे वा, सर्पदर्शने यदृच्छोपजाते सति, तं सर्पम्, आहारेण आहार आहरणम् आयत्तीकरणं तत्साधनभूतेन मन्त्रेणौषधेन वा, प्रतिबद्धसंज्ञं निरुद्धगतिं, कृत्वा, श्रद्दधानान् आदर्शयेद् अर्थाद् देवतासान्निध्यप्रभावकृतमिदमगमनं सर्पस्येति ब्रुवन्। अश्रद्दधानानाम् आचमनप्रोक्षणेषु प्राशनस्नानेषु, रसम् अवपाय्य तन्मोहोत्पादनपर्याप्तमात्रं विषम् उपयोज्य, देवताभिशापं ब्रूयात् नागदेवताकोपकृतं तन्मोहनं ख्यापयेत्। **अभित्यक्तं** वेति। वधयोग्यं देवनिन्दकं वा, दंशयित्वा रात्रौ सर्पेण दष्टं कारयित्वा, देवताभिशापं ब्रूयादिति सम्बध्यते। योगदर्शनप्रतीकारेण वा औपनिषदिकोक्तविषचिकित्सारम्भेण वा, कोशाभिसंहरणं कुर्याद्, दष्टपक्षाद् धनं गृहीत्वेत्यर्थम्।

वैदेहकव्यञ्जनो वेति। स वा, प्रभूतपण्यान्तेवासी प्रचुरपण्यः प्रचुरान्तेवासी च, व्यवहरेत क्रयविक्रयानुष्ठानं कुर्यात्। स यदा, पण्यमूल्ये वाणि-

एतेन रूपदर्शकः सुवर्णकारश्च व्याख्यातौ ।

वैदेहकव्यञ्जनो वा प्रख्यातव्यवहारः प्रवहणनिमित्तं याचितकमवक्रीतकं वा रूप्यसुवर्णभाण्डमनेकं गृह्णीयात् । समाजे वा सर्वपण्यसन्दोहेन प्रभूतं हिरण्यसुवर्णमृणं गृह्णीयात्, प्रतिभाण्डमूल्यं च । तदुभयं रात्रौ मोषयेत् ।

साध्वीव्यञ्जनाभिः स्त्रीभिर्दूष्यानुन्मादयित्वा तासामेव वेश्मस्वभिगृह्य सर्वस्वान्याहरेयुः ।

दूष्यकुल्यानां वा विवादे प्रत्युत्पन्ने रसदाः प्रणिहिता रसं दद्युः । तेन दोषेणेतरे पर्यादातव्याः ।

ज्यधने, निक्षेपप्रयोगैः आढ्यविस्रम्भादन्यकृतैर्धननिक्षेपैर्वृद्ध्यर्थऋणार्पणैश्च, उपचितः प्रवृद्धः, स्यात्, तदा, एनं वैदेहकव्यञ्जनं, रात्रौ, मोषयेत् चोरमुषितं कुर्यात् मोषणच्छलेन राजा तदीयं धनमपहरेदित्यर्थः ।

एवं रूपदर्शने रूपदर्शकेन सुवर्णपरीक्षणादौ सुवर्णकारेण च छलं कारयित्वा धनाभिसंहरणं कुर्यादित्याह — **एतेन रूपदर्शक** इत्यादि ।

वैदेहकव्यञ्जनो वा प्रख्यातव्यवहार इति । स वा प्रतीतक्रयविक्रयानुष्ठान, प्रवहणनिमित्तं तुष्टिभोजननिमित्तं, याचितकम्, अवक्रीतकं वा, रूप्यसुवर्णभाण्डं रूप्यभाण्डं सुवर्णभाण्डं च, अनेकं गृह्णीयात् । समाजे वा जनसमुदायसन्निधाने वा, सर्वपण्यसन्दोहेन सकलपण्यभाण्डसमूहप्रदर्शनेन, प्रभूतं हिरण्यसुवर्णम् ऋणं गृह्णीयात, अर्थात् पण्यसन्दोहमिमं विक्रीय प्रत्यर्पयिष्यामीत्युक्त्वा । प्रतिभाण्डमूल्यं च गृह्णीयात् प्रतिपण्यस्य श्वोऽर्पयिष्यमाणस्य मूल्यं च प्रतिपण्यक्रेतृभ्यो गृह्णीयात् । तदुभयं गृहीतं द्वयं, रात्रौ, मोषयेत् मोषणच्छलेनापहरेत् ।

साध्वीत्यादि । साध्वीव्यञ्जनाभिः, स्त्रीभिः दूष्यान् राजद्वेषित्वेन हेतुना दूषणार्हान् जनान्, उन्मादयित्वा रञ्जयित्वा, तासामेव, वेश्मसु गृहेषु, अभिगृह्य सर्वस्वानि आहरेयुः ।

दूष्यकुल्यानां वेति । तेषां, विवादे दायप्रभृतिविषये, प्रत्युत्पन्ने, रसदाः प्रणिहिताः सूदादिवेषेण प्रयुक्ताः, रसं दद्युः विवदमानेष्वन्यतमस्य । तेन दोषेण रसदानदोषारोपेण, इतरे रसमारितादन्ये दूष्याः, पर्यादातव्याः सर्वस्वं हारयितव्याः ।

दूष्यमभित्यक्तो वा श्रद्धेयापदेशं पण्यं हिरण्यनिक्षेपमृणप्रयोगं दायं वा याचेत। दासशब्देन वा दूष्यमालम्बेत। भार्यामस्य स्नुषां दुहितरं वा दासीशब्देन भार्याशब्देन वा। तं दूष्यगृहप्रतिद्वारि रात्रावुपशयानमन्यत्र वा वसन्तं तीक्ष्णो हत्वा ब्रूयात्—हतोऽयमित्थं कामुक इति। तेन दोषेणेतरे पर्यादातव्याः।

सिद्धव्यञ्जनो वा दूष्यं जम्भकविद्याभिः प्रलोभयित्वा ब्रूयात्—अक्षयं हिरण्यं राजद्वारिकं स्त्रीहृदयमरिव्याधिकरमायुष्यं पुत्रीयं वा कर्म जानामि इति। प्रतिपन्नं चैत्यस्थाने रात्रौ प्रभूतसुरामांसगन्धमुपहारं कारयेत्, एकरूपं चात्र हिरण्यं पूर्वनिखातम्। प्रेताङ्गं प्रेतशिशुर्वा यत्र निहितः स्यात् ततो हिरण्यमस्य दर्शयेदत्यल्पमिति च ब्रूयात्। 'प्रभूतहिरण्यहेतोः पुनरुपहारः कर्तव्य इति, स्वयमेवैतेन हिर-

---

दूष्यमिति। अभित्यक्तो वा वध्यो वा, दूष्यं, श्रद्धेयापदेशं लोकप्रत्यययोग्यसम्बन्धव्यपदेशं, पण्यं हिरण्यनिक्षेपम् ऋणप्रयोगं दायं वा, याचेत। दासशब्देन वा दूष्यम् आलम्बेत मम दास इति वा दूष्यं व्यपदिशेत्। भार्याम्, अस्य दूष्यस्य, स्नुषां दुहितरं वा दासीशब्देन भार्याशब्देन वा, आलम्बेत। तं यथोक्तमभित्यक्तं, दूष्यगृहप्रतिद्वारि रात्रौ उपशयानम् अन्यत्र वा वसन्तं तीक्ष्णः हत्वा, ब्रूयात् प्रख्याप्यापसरेत्, किमिति — हतोऽयम् इत्थं कामुक इति। तेन दोषेण तीक्ष्णकृतेनाभित्यक्तवधदोषेणारोपितेनेत्यर्थः, इतरे दूष्याः, पर्यादातव्याः सर्वस्वं हारयितव्याः।

सिद्धव्यञ्जनो वेति। स वा, दूष्यं, जम्भकविद्याभिः मायाविद्याभिः, प्रलोभयित्वा, ब्रूयात्, किमिति, अक्षयं हिरण्यं निधिदर्शनं, राजद्वारिकं राजवशीकरणं, स्त्रीहृदयं स्त्रीहृदयाकर्षणम्, अरिव्याधिकरम्, आयुष्यम् आयुष्करं, पुत्रीयं वा पुत्रोत्पत्तिनिमित्तं वा, कर्म जानामि इति। प्रतिपन्नं तद्वाक्यविश्वस्तं दूष्यं, चैत्यस्थाने श्मशानादौ, रात्रौ, प्रभूतसुरामांसगन्धम्, उपहारं बलावलिप्रदानं, कारयेत्। एकरूपं च, अत्र चैत्यस्थाने, हिरण्यं, पूर्वनिखातं वै निखाय निवेशितं, कारयेत्। प्रेताङ्गं, प्रेतशिशुर्वा यत्र, निहितः स्थापितः स्यात्, ततः तस्मिन् प्रदेशे, हिरण्यम्, अस्य दूष्यस्य, दर्शयेत्, अत्यल्पमिति ब्रूयात् अत्यल्पोपहारेणात्यल्पं हिरण्यमेकरूपात्मकं लब्धमिति च कथयेत्। प्रभूतहिरण्यहेतोः, पुनरुपहारः भूयः प्रभूतबलिः कर्तव्यः, इति अतः

ण्येन 'श्वोभूते प्रभूतमौपहारिकं क्रीणीही'ति । तेन हिरण्येनौपहारिकक्रये गृह्येत ।

मातृव्यञ्जनया वा 'पुत्रो मे त्वया हत' इत्यवरूपितः स्यात् । संसिद्धमेवास्य रात्रियागे वनयागे वनक्रीडायां वा प्रवृत्तायां तीक्ष्णा विशस्याभित्यक्तमतिनयेयुः ।

दूष्यस्य वा भृतकव्यञ्जनो वेतनहिरण्ये कूटरूपं प्रक्षिप्य प्ररूपयेत् ।

कर्मकारव्यञ्जनो वा गृहे कर्म कुर्वाणः स्तेनकूटरूपकारकोपकरणमपनिदध्यात् । चिकित्सकव्यञ्जनो वा गरमगरापदेशेन ।

कारणात्, स्वयम् एतेन हिरण्येन, श्वोभूते प्रभूतम् औपहारिकम् उपहारार्थं द्रव्यं क्रीणीहि इति ब्रूयात् । तेन हिरण्येन औपहारिकक्रये, क्रियमाण इति शेषः, गृह्येत अर्थाद् दूष्यो राजपुरुषैः । तेन दोषेण सर्वस्वहरणादिकं तु समानं पूर्वेण ।

मातृव्यञ्जनया वेति । मातृवेषया वा, पुत्रो मे त्वया हत इति, अवरूपितः मिथ्यादर्शितः, स्यात् अर्थाद् दूष्यः । अपराधलिङ्गार्थमाह— संसिद्धमेवेति । अस्य दूष्यस्य, रात्रियागे, वनयागे, वनक्रीडायां वा, प्रवृत्तायां, तीक्ष्णाः, संसिद्धमेव अभित्यक्तं मरणसज्जितमेव वध्यं, विशस्य मारयित्वा, अतिनयेयुः दूष्यप्रवर्तितरात्रियागादिप्रदेशे निदध्युः । तेन दोषेण दूष्यमारणादिकमार्थम् । एवमुत्तरत्रापि ।

दूष्यस्य वेति । तस्य वा, भृतकव्यञ्जनः, वेतनहिरण्ये, कूटरूपं कपटपणादिकं, प्रक्षिप्य स्वयं क्षिप्त्वा, प्ररूपयेत् स्वामिनं कूटरूपप्रक्षेप्तारं निरूपयेत् ।

कर्मकारेत्यादि । कर्मकारवेषो वा, गृहे कर्म कुर्वाणः, स्तेनकूटरूपकारकोपकरणं चोरकपटनाणकनिर्मापकोपकरणं, अपनिदध्यात् प्रच्छन्नं निदध्यात्, अर्थाद् दूष्यस्य गृहे । उपनिदध्यादित्यपि पाठः । चिकित्सकव्यञ्जनो वेति । भिषग्वेषो वा, गरं विषम्, अगरापदेशेन विषहरौषधव्याजेन, उपनिदध्यात्, अर्थाद् दूष्यस्य हस्ते । गदमगदापदेशेनेति पाठे रोगहेतुमौषधापदेशेनेत्यर्थः ।

प्रत्यासन्नो वा दूष्यस्य सत्री प्रणिहितमभिषेकभाण्डममित्रशासनं च कापटिकमुखेन आचक्षीत, कारणं च ब्रूयात् ।

एवं दूष्येष्वधार्मिकेषु च वर्तेत । नेतरेषु ॥

पक्वं पक्वमिवारामात् फलं राज्यादवाप्नुयात् ।
आत्मच्छेदभयादामं वर्जयेत् कोपकारकम् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
द्वितीयोऽध्यायः कोशाभिसंहरणम्,
आदितो द्विनवतितमः ॥

प्रत्यासन्नो वा दूष्यस्येति । दूष्यस्य बन्धुर्वा, सत्री गूढपुरुषविशेषः, प्रणिहितं दूष्यस्य गृहे अपनिहितम्, अभिषेकभाण्डम्, अमित्रशासनं च शत्रुलेख्यं च, कापटिकमुखेन कापटिकाख्यगूढपुरुषविशेषमुखेन, आचक्षीत कथयेत् । कारणं च ब्रूयात् 'हत्वा राजानं तच्छत्रुं राज्येऽभिषेक्तुमयं यतत' इत्येवंरूपम् ।

त एते कोशाभिसंहरणोपायाः दूष्येषु अधार्मिकेषु च प्रयोक्तव्याः, न तु धार्मिकेष्वित्याह — **एवं दूष्येष्वित्यादि** ॥

अध्यायान्ते श्लोकमाह — **पक्वमिति** । आरामात्, पक्वं परिणतं फलमिव, राज्यात् पक्वं फलं दोषपरिपाकयुक्तमर्थाद् दुष्टजनस्वामिकं धनम्, अवाप्नुयात् । आत्मच्छेदभयाद्, आमम् अपक्वमदोषयुक्तं धनं, वर्जयेत् । कुतः, कोपकारकं यस्मात् तादृशं धनं प्रकृतिकोपहेतुः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
द्वितीयोऽध्यायः कोशाभिसंहरणम्,
आदितः द्विनवतितमः ॥

९१. प्रक. भृत्यभरणीयम् ।

दुर्गजनपदशक्त्या भृत्यकर्म समुदयपादेन स्थापयेत्, कार्यसाधनसहेन वा भृत्यलाभेन । शरीरमवेक्षेत, न धर्मार्थौ पीडयेत् ।

ऋत्विगाचार्यमन्त्रिपुरोहितसेनापतियुवराजराजमातृराजमहिष्योऽष्टचत्वारिंशत्साहस्राः । एतावता भरणे नानास्वाद्यत्वमकोपकं चैषां भवति ।

दौवारिकान्तर्वंशिकप्रशास्तृसमाहर्तृसन्निधातारश्चतुर्विंशतिसाहस्राः । एतावता कर्मण्या भवन्ति ।

कुमारकुमारमातृनायकपौरव्यावहारिककार्मान्तिकमन्त्रिपरिष-

भृत्यभरणीयम्इति सूत्रम् । भृत्या नाम धीसचिवाः शास्त्रसचिवाः कर्मसचिवा इति त्रिप्रकाराः तेषां भरणं पोषणमधिकृत्य प्रवृत्तमिदं प्रकरणमित्यर्थः । असद्भृत्यानां शोधनकथनानन्तरं सद्भृत्यभरणस्य प्राप्तावसरत्वात् कथनम् ।

दुर्गजनपदशक्त्येति । दुर्गजनपदशक्त्यनुसारेण, भृत्यकर्म भृत्यभरणीयं, समुदयपादेन समुदयस्य सर्वदुर्गजनपदोत्थस्य धनपिण्डस्य चतुर्भागेन, स्थापयेत् । कार्यसाधनसहेन वा भृत्यलाभेन कार्यसाधनसमर्थस्य भृत्यस्य लाभो यावता धनेन भवति तावता वा अर्थात् समुदयपादाधिकेनापि वा, भृत्यकर्म स्थापयेत् । शरीरम् आयशरीरम्, अवेक्षेत । धर्मार्थौ न पीडयेत् धर्मं देवपितृकार्यनित्यदानादिकम् अर्थं दुर्गसेतुवणिक्पथादिकर्मलक्षणं च नोपरुन्ध्यात् ।

समुदयपादस्य भृत्यविशेषापेक्षया विनियोगविशेषानाह — **ऋत्विगाचार्ये**त्यादि । ऋत्विगादयोऽष्टौ, अष्टचत्वारिंशत्साहस्राः अष्टाचत्वारिंशत्सहस्रपणाः । एतावता द्रव्येण, भरणे, एषाम् ऋत्विगादीनां, नानास्वाद्यत्वं बहुविधभोज्यभोग्ययुक्तत्वम्, अकोपकम् अकोपजनकं तृप्तिकरमित्यर्थः, भवति ।

दौवारिकेत्यादि । दौवारिको द्वाराधिकृतः अन्तर्वंशिकः अन्तःपुराधिकृतः प्रशास्ता आयुधाध्यक्षः समाहर्ता धान्यकराध्यक्षनेता सन्निधाता भाण्डागाराध्यक्षः इत्येते, चतुर्विंशतिसाहस्राः । एतावता धनेन, कर्मण्याः कर्मयोग्याः, भवन्ति ।

कुमारेत्यादि । कुमारादयोऽष्टौ द्वादशसाहस्राः । तत्र कुमारोऽश्वानुचरः, कुमारमाता अशीतिजननेतेति भाषा, नायकः पदातिनेता, पौरव्यावहा-

द्राष्ट्रपालान्तपालाश्च द्वादशसाहस्राः। स्वामिपरिबन्धबलसहाया ह्येतावता भवन्ति।

श्रेणीमुख्या हस्त्यश्वरथमुख्याः प्रदेष्टारश्च अष्टसाहस्राः। स्ववर्गानुकर्षिणो ह्येतावता भवन्ति।

पत्त्यश्वरथहस्त्यध्यक्षाः द्रव्यहस्तिवनपालाश्च चतुस्साहस्राः।

रथिकानीकस्थचिकित्सकाश्वदमकवर्धकयो योनिपोषकाश्च द्विसाहस्राः।

कार्तान्तिकनैमित्तिकमौहूर्तिकपौराणिकसूतमागधाः पुरोहितपुरुषाः सर्वाध्यक्षाश्च साहस्राः।

शिल्पवन्तः पादाताः सङ्ख्यायकलेखकादिवर्गः पञ्चशताः।

रिकः पुरगतव्यवहारचिन्तकः, कार्मान्तिकः कृषिद्रव्यवनादिकर्मान्तनियुक्तः, मन्त्रिपरिषद् द्वादशामात्याः, राष्ट्रपालोऽन्तपालश्च। एतावता, स्वामिपरिबन्धबलसहायाः स्वामिनः परिकरबलभूताः सहायाश्च, भवन्ति।

श्रेणीमुख्या इति। श्रेण्याः सजातीयशिल्पिगणस्य मुख्याः, हस्त्यश्वरथमुख्याः हस्त्याद्येकैकमुख्याः, प्रदेष्टारश्च कण्टकशोधनाधिकृताश्च, अष्टसाहस्राः। एतावता, स्ववर्गानुकर्षिणः स्ववर्गानुकूलनशीलाः, भवन्ति हि।

पत्त्यश्वेत्यादि। पत्त्यध्यक्षादयश्चत्वारो द्रव्यवनपाला हस्तिवनपालाश्च चतुस्साहस्राः।

रथिकेत्यादि। रथिकादयः पञ्च तत्र रथिको रथचर्याशिक्षकः अनीकस्थो गजाशिक्षकः अनीकपाठे अनीकस्थो लक्ष्यः चिकित्सको भिषक् अश्वदमकः अश्वशिक्षकः वर्धकिर्महातक्षा। योनिपोषकाश्च कुक्कुटसूकरादिसंवर्धकाध्यक्षाश्च, द्विसाहस्राः।

कार्तान्तिकेत्यादि। कार्तान्तिकः स्त्रीपुरुषादिलक्षणदर्शनेनातीतानागतादेष्टा नैमित्तिकः शाकुनविचक्षणः मौहूर्तिको ज्यौतिषिकः पौराणिकः पुराणवक्ता सूतः सारथिः मागधः स्तुतिपाठकः इत्येते षट्, पुरोहितपुरुषाः पुरोहितपरिकर्मिणः, सर्वाध्यक्षाश्च सर्वे सुरासूनासूत्राद्यध्यक्षाश्च, साहस्राः।

शिल्पवन्त इति। चित्रकारादयः, पादाताः पदातिकर्मकुशलाः, संख्यायकलेखकादिवर्गः संख्यायको गणकः लेखको लिपिकरः आदिपदाद् उन्मातृपरिमातृप्रभृतयः गृह्यन्ते तेषां वर्गः, पञ्चशताः।

कुशीलवास्त्वर्धतृतीयशताः। द्विगुणवेतनाश्चैषां तूर्यकराः।

कारुशिल्पिनो विंशतिशतिकाः।

चतुष्पदद्विपदपरिचारकपारिकर्मिकौपस्थायिकपालकविष्टिबन्धकाः षष्टिवेतनाः।

आर्ययुक्तारोहकमाणवकशैलखनकाः सर्वोपस्थायिन आचार्या विद्यावन्तश्च पूजावेतनानि यथार्हं लभेरन् पञ्चशतावरं सहस्रपरम्।

दशपणिको योजने दूतः मध्यमः। दशोत्तरे द्विगुणवेतन आ योजनशतादिति।

समानविद्येभ्यस्त्रिगुणवेतनो राजा राजसूयादिषु क्रतुषु, राज्ञः सारथिः साहस्रः।

कापटिकोदास्थितगृहपतिकवैदेहकतापसव्यञ्जनाः साहस्राः।

कुशीलवास्त्विति। ते, अर्धतृतीयशताः पञ्चाशदधिकद्विशतपणाः। एषां कुशीलवानां मध्ये, तूर्यकराः प्रधानवाद्यकराः, द्विगुणवेतनाः इतरापेक्षया।

कारुशिल्पिन इति। ते, विंशतिशतिकाः विंशत्यधिकशतपणाः।

चतुष्पदेत्यादि। चतुष्पदसम्बन्धी परिचारकः अनुचरः पारिकर्मिकः प्रधानः तथा द्विपदपरिचारकः द्विपदपारिकर्मिकः औपस्थायिकः शरीरपरिचारकः पालको गवादिरक्षकः विष्टिर्बन्धकश्चेत्येते, षष्टिवेतनाः।

आर्येत्यादि। आर्यः शीलाभिजनसम्पन्नः सत्पुरुषः युक्तारोहकः अविधेयहस्त्यश्वारोहणसमर्थः, माणवकः कुपुरुषो वृद्धचोरादिः शैलखनकः शिलाशिल्पकरः इत्येते, सर्वोपस्थायिन आचार्या गान्धर्वाचार्याः, विद्यावन्तश्च धर्मार्थादिशास्त्रकुशलाश्च, पूजावेतनानि पूजायुक्तानि वेतनानि, यथार्हं लभेरन्। कियत्, पञ्चशतावरं सहस्रपरम्।

दशपणिक इति। मध्यमः अमन्दाद्रुतगतिः, दूतः, योजने दशपणिकः योजनगमने दशपणवेतनः आ दशयोजनात्। दशोत्तरे दशयोजनादुपरि, आ योजनशतात्, द्विगुणवेतनः प्रतियोजनं विंशतिपणवेतनः।

समानविद्येभ्य इति। समानविद्या मन्त्रिपुरोहिताः तेभ्यः, त्रिगुणवेतनः, राजा राजसूयादिषु क्रतुषु, आनीत इति शेषः। राज्ञः सारथिः, साहस्रः सहस्रपणः, क्रतुषु।

कापटिकेत्यादि। प्रतीतम्।

ग्रामभृतकसत्रितीक्ष्णरसदभिक्षुक्यः पञ्चशताः।

चारसञ्चारिणोऽर्धतृतीयशताः। प्रयासवृद्धवेतना वा।

शतवर्गसहस्रवर्गाणामध्यक्षा भक्तवेतनलाभमादेशं विक्षेपं च कुर्युः। अविक्षेपे राजपरिग्रहदुर्गराष्ट्ररक्षावेक्षणेषु च। नित्यमुख्याः स्युरनेकमुख्याश्च।

कर्मसु मृतानां पुत्रदारा भक्तवेतनं लभेरन्। बालवृद्धव्याधिताश्चैषामनुग्राह्याः। प्रेतव्याधितसूतिकाकृत्येषु चैषामर्थमानकर्म कुर्यात्।

अल्पकोशः कुप्यपशुक्षेत्राणि दद्यात्, अल्पं च हिरण्यम्। शून्यं वा निवेशयितुमभ्युत्थितो हिरण्यमेव दद्यात्, न ग्रामं ग्रामसंजातव्यवहारस्थापनार्थम्।

ग्रामभृतकेत्यादि। ग्रामभृतका रजकादयः। शेषं प्रतीतम्।

चारसञ्चारिण इति। ते, अर्धतृतीयशताः पञ्चाशदधिकद्विशतपणवेतनाः। **प्रयासवृद्धवेतना** वेति। येषां वेतनमभिहितं ते सर्वे प्रयासानुरूप्येण यथोक्ताभ्यधिकवेतना वा कर्तव्याः।

यथोक्तवेतनानां भृतकानामेकैकस्य शतवर्गस्य सहस्रवर्गस्य चैकैकमध्यक्षं कृत्वा तन्मुखेन भक्तवेतनदानं राजादेशानुष्ठानं समुचितकर्मनियोजनं च तत्तद्वर्गं कारयेदित्यभिप्रायेणाह— **शतवर्गे**त्यादि। **अविक्षेप** इति। व्यापाराभावे, प्रथमान्तपाठोऽशुद्धः। राजपरिग्रहदुर्गराष्ट्ररक्षावेक्षणेषु च, कुर्युः अर्थादध्यक्षाः स्वं स्वं वर्गम्। नित्यमुख्याः स्युः तत्तद्वर्ग्याः स्वस्वमुख्याधीनप्रवृत्तिका भवेयुर्न तु जातु स्वतन्त्राः। अनेकमुख्याश्च बहुप्रधानाश्च, स्युः।

कर्मस्विति। राजकर्मकरणावस्थायां, मृतानां, पुत्रदाराः पुत्रा दाराश्च, भक्तवेतनं लभेरन्। बालवृद्धव्याधिताश्च, एषां मृतभृत्यानां पोष्यभूता इत्यार्थम्। अनुग्राह्याः, राज्ञा। **प्रेते**त्यादि। अर्थमानकर्म अर्थदानबहुमानकर्म।

अल्पकोश इति। तथाभूतो राजा, कुप्यपशुक्षेत्राणि, दद्यात्, दानीयेभ्यः। अल्पं च हिरण्यं सुवर्णादिकं तु स्वल्पं दद्यात्। शून्यं वा **निवेशयितुम्** अभ्युत्थितः शून्यं देशं ग्रामीकर्तुमुद्युक्तो राजा, हिरण्यमेव दद्यात्, निविशमानानामनुग्रहार्थं, न ग्रामं दद्यात्। किमर्थं, ग्रामसंजातव्यवहारस्थापनार्थम् अमुकग्राम एतावद्धिरण्यमूल्यः अमुकग्रामोत्पन्नाद्धिरण्यादेतावद् देयमित्येवंरूपस्य व्यवहारस्य प्रवर्तनार्थम्।

एतेन भृतानामभृतानां च विद्याकर्मभ्यां भक्तवेतनविशेषं च कुर्यात् । षष्टिवेतनस्याढकं कृत्वा हिरण्यानुरूपं भक्तं कुर्यात् ।

पत्त्यश्वरथद्विपाः सूर्योदये बहिः सन्धिदिवसवर्जं शिल्पयोग्याः कुर्युः । तेषु राजा नित्ययुक्तः स्यात् । अभीक्ष्णं चैषां शिल्पदर्शनं कुर्यात् । कृतनरेन्द्राङ्कं शस्त्रावरणमायुधागारं प्रवेशयेत् । अशस्त्राश्चरेयुरन्यत्र मुद्रानुज्ञातात् । नष्टं विनष्टं वा द्विगुणं दद्यात् । विध्वस्तगणनां च कुर्यात् ।

सार्थिकानां शस्त्रावरणमन्तपाला गृह्णीयुः, समुद्रमवचारयेयुर्वा । यात्रामभ्युत्थितो वा सेनामुद्योजयेत् । ततो वैदेहकव्यञ्जनाः सर्वपण्यान्यायुधीयेभ्यो यात्राकाले द्विगुणप्रत्यादेयानि दद्युः । एवं राजपण्यविक्रयो वेतनप्रत्यादानं च भवति ।

एतेनेति । उक्तेन प्रकारेण, भृतानामभृतानां च स्थिरभृतिकानाम् अस्थिरभृतिकानां च कर्मकराणां, विद्याकर्मभ्यां विद्याकर्मप्रकर्षानुसारेण, भक्तवेतनविशेषं च भोजनभृतितारतम्यं च, कुर्यात् । कियद्वेतनस्य कियद् भक्तमिति व्यवस्थामाह — **षष्टिवेतनस्याढकं कृत्वे**ति । षष्टिपणवेतनस्य तण्डुलाढकमिति क्रममाश्रित्य, हिरण्यानुरूपं भक्तं कुर्यात् हिरण्यवृद्ध्यानुरूप्येण भक्तवृद्धिं कुर्यात् ।

पत्त्यश्वरथद्विपा इत्यादि । सन्धिदिवसवर्जम् अमावास्याद्यनध्यायदिवसान् वर्जयित्वा । शिल्पयोग्याः विचित्राः शस्त्रचर्याशिक्षाः । तेषु पत्त्यादिषु । नित्ययुक्तः नित्यासक्तः । कृतनरेन्द्राङ्कं दत्तराजमुद्राचिह्नम् । शस्त्रावरणं शस्त्रं चावरणं च । **अशस्त्राश्चरेयुरित्यादि** । मुद्रानुज्ञातादन्यत्र मुद्रादानानुज्ञातसशस्त्रसञ्चारं राजपुरुषमपहाय । मुद्रानुज्ञानादित्यपि पाठः । **नष्टं विनष्टं वे**ति । विस्मृतम् उपहतं च, शस्त्रावरणं, द्विगुणं दद्यात् । **विध्वस्तगणनां च कुर्यादि**ति । आयुधशालादौ एतावन्ति शस्त्राणि ध्वस्तानीति गणयित्वा जानीयात् ।

सार्थिकानामिति । सार्थेन चरतां परदेशागतानां, शस्त्रावरणम् अर्थान्मुद्रानुज्ञानरहितम्, अन्तपालाः गृह्णीयुः । समुद्रं मुद्रानुज्ञानयुक्तम्, अवचारयेयुः अवारितं विसृजेयुः । **यात्रामभी**ति । युद्धयात्रामुद्दिश्य, उत्थितः उद्यतः, सेनाम्, उद्योजयेत् समूहयेत् । ततः, वैदेहकव्यञ्जनाः राजप्रयुक्ताः,

एवमवेक्षितायव्ययः कोशदण्डव्यसनं नावाप्नोति ।
इति भक्तवेतनविकल्पः ॥

सत्रिणश्चायुधीयानां वेश्याः कारुकुशीलवाः ।
दण्डवृद्धाश्च जानीयुः शौचाशौचमतन्द्रिताः ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
तृतीयोऽध्यायः, भृत्यभरणीयम् ,
आदितस्त्रिनवतितमः ॥

सर्वपण्यानि सर्वाणि पण्यानि युद्धोपकरणभूतानि, आयुधीयेभ्यः अर्थान्निरुपकरणेभ्यः, यात्राकाले, द्विगुणप्रत्यादेयानि दद्युः युद्धावसाने द्विगुणमेतानि प्रत्यर्पणीयानीत्युक्त्वा ऋणत्वेन दद्युः । ईदृशदानस्य फलमाह — **एवमिति** । अनेन प्रकारेण दाने, राजपण्यविक्रयः, वेतनप्रत्यादानं च दत्तवेतनप्रत्यापत्तिश्च, भवति सिध्यति ।

एवमिति । यथोक्तेन प्रकारेण, अवेक्षितायव्ययः राजा, कोशदण्डव्यसनं धनदरिद्रतां सैन्यदरिद्रतां च, नावाप्नोति ।

इति भक्तवेतनविकल्प इति । व्याख्यात इति शेषः ॥

आयुधयोधिनां शुचित्वमशुचित्वं च सत्रिणः वेश्याः कारवः कुशीलवाः पुराणभटाश्चाप्रमत्ता विद्युरितीममर्थं श्लोकेनाह — **सत्रिणश्चे**त्यादि ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
तृतीयोऽध्यायः भृत्यभरणीयम्,
आदितस्त्रिनवतितमः ॥

९.२ प्रक. अनुजीविवृत्तम् ।

लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नं प्रियहितद्वारेणाश्रयेत । यं वा मन्येत— यथाहमाश्रयेप्सुरेवमसौ विनयेप्सुराभिगामिकगुणयुक्त इति, द्रव्यप्रकृतिहीनमप्येनमाश्रयेत । न त्वेवानात्मसम्पन्नम् । अनात्मवान् हि नीतिशास्त्रद्वेषादनर्थ्यसंयोगाद् वा प्राप्यापि महदैश्वर्यं न भवति ।

आत्मवति लब्धावकाशः शास्त्रानुयोगं दद्यात् । अविसंवादाद्धि स्थानस्थैर्यमवाप्नोति । मतिकर्मसु पृष्टः तदात्वे च आयत्यां च धर्मार्थ-

---

अनुजीविवृत्तमिति सूत्रम् । अनुजीविनो मन्त्र्यादयः तेषां वृत्तं स्वामिनं प्रत्यनुष्ठानमुच्यत इति सूत्रार्थः । पूर्वस्मिन् प्रकरणे भृत्यानां प्रस्तुतत्वादिह तद्वृत्ताख्यानस्य साङ्गत्यं स्पष्टमेव ।

कीदृग्गुणोऽनुजीवनाधिकारी कीदृग्गुणमनुजीव्यमाश्रयेतेत्याकाङ्क्षायामाह — **लोकयात्राविदिति** । अर्थशास्त्राभिज्ञः, राजानम्, आत्मद्रव्यप्रकृतिसम्पन्नम् आत्मसम्पन्नं द्रव्यप्रकृतिसम्पन्नं च, तत्रात्मसम्पन्नं 'महाकुलीनो दैवबुद्धिरि'त्यादिना प्रकृतिसम्पत्प्रकरणे वक्ष्यमाणयात्मसम्पदा युक्तं, द्रव्यप्रकृतिसंपन्नं द्रव्यप्रकृतिभिरमात्यादिभिः पञ्चभिर्जानपदत्वादिगुणयोगिभिर्युक्तं, प्रियहितद्वारेण राज्ञः प्रियाश्च हिताश्च ये पुरुषास्तद्द्वारेण, आश्रयेत । राज्ञस्तथाविधस्यालाभे त्वाह—**यं वेति** । यथा अहम् आश्रयेप्सुः आश्रयार्थी, एवम् असौ, विनयेप्सुः विद्यावृद्धसंयोगार्थी, आभिगामिकगुणयुक्तः महाकुलीनत्वादिभिराभिगामिकगुणैर्युक्तः, इति यं वा मन्येत, एनं राजानं, द्रव्यप्रकृतिहीनमपि सन्तम्, आश्रयेत । अनात्मसम्पन्नं तु आत्मसम्पद्रहितं तु, नैवाश्रयेत । तत्र हेतुमाह— **अनात्मवान् हीति** । सः, नीतिशास्त्रद्वेषाद् अर्थाद् मौर्ख्यप्राज्ञपुरुषासंयोगकृतात्, अनर्थ्यसंयोगाद् वा अनर्थावहानां मृगयाद्यूतस्त्रीपानानां वाग्दण्डपारुष्यार्थदूषणानां नटनर्तकादीनां च संयोगाद् वा, प्राप्यापि महदैश्वर्यं महदिति राज्यमुच्यते तदीश्वरत्वं पितृपैतामहं लब्ध्वापि, न भवति नश्यति ।

आत्मवतीत्यादि । आत्मसम्पन्ने आश्रये, लब्धावकाशः प्राप्तावसरः, शास्त्रानुयोगम् अर्थशास्त्रादिविषयप्रश्नोत्तरं, दद्यात् । किमर्थमिदमित्याह — **अविसंवादाद्धीत्यादि** । स्वोक्तेऽर्थे शास्त्राविसंवादिनि हि सति निश्चितशास्त्रज्ञभावः स्थिरामधिकारपदे स्थितिमनुजीवी प्राप्नोति । लक्षणपरीक्षानन्तरं लक्ष्यपरीक्षामाह — **मतिकर्मसु पृष्ट** इति । बुद्धिसाध्यकर्मविषयेऽनुयुक्तः, तदात्वे

संयुक्तं समर्थं प्रवीणवदपरिषद्भीरुः कथयेत्। ईप्सितः पणेत — धर्मार्थानुयोगम् अविशिष्टेषु बलवत्संयुक्तेषु दण्डधारणं मत्संयोगे तदात्वे च दण्डधारणमिति न कुर्याः। पक्षं वृत्तिं गुह्यं च मे नोपहन्याः। संज्ञया च त्वां कामक्रोधदण्डनेषु वारयेयम् इति।

आयुक्तप्रदिष्टायां भूमावनुज्ञातः प्रविशेत्। उपविशेच्च पार्श्वतः सन्निकृष्टविप्रकृष्टः। वरासनं विगृह्यकथनमसभ्यमप्रत्यक्षमश्रद्धेयमनृतं च वाक्यमुच्चैरनर्मणि हासं वातष्ठीवने च शब्दवती न कुर्यात्। मिथः कथनमन्येन, जनवादे द्वन्द्वकथनं, राज्ञो वेषमुद्धतकुहकानां च, रत्नातिशयप्रकाशाभ्यर्थनम्, एकाक्ष्योष्ठनिर्भोगं, भ्रुकुटीकर्म, वाक्यावक्षेपणं

चायत्यां च समर्थं तत्काले चोत्तरकाले च क्षमं, धर्मार्थसंयुक्तं, प्रवीणवत् मतिकर्मनिपुणैस्तुल्यम्, अपरिषद्भीरुः सभाकम्परहितः, कथयेत्। **ईप्सित** इति। लक्ष्यलक्षणकोविदत्वमवधार्य राज्ञा स्वामात्यकर्मणे प्रार्थितोऽनुजीवी, **पणेत** संविदं कुर्यात्, राज्ञा सह। केन प्रकारेण, धर्मार्थानुयोगमविशिष्टेषु गुणोत्कर्षरहितेषु धर्मार्थप्रश्नं, **बलवत्संयुक्तेषु** दण्डधारणं, मत्संयोगे तदात्वे च दण्डधारणं मत्सम्बद्धे विषये सद्यश्च दण्डप्रयोगम्, इति एवञ्जातीयं, न कुर्याः। **पक्षं** स्ववर्गं, **वृत्तिं** व्यापारं, **गुह्यं** च रहस्यं च, मे नोपहन्याः। संज्ञया च अक्षिनिकोचभ्रूविकारादिचेष्टया च, त्वां, कामक्रोधदण्डनेषु कामक्रोधनिमित्तकेषु मिथ्यादण्डनेषु, प्रवर्तमानमिति शेषः, वारयेयम्, इति अनेन प्रकारेण।

आयुक्तप्रदिष्टायामिति। आयुक्ताः अधिकारपदनियुक्ताः तत्प्रवेशार्हायाम्, 'आदिष्टः प्रदिष्टायामि'त्यपपाठः। भूमौ अनुज्ञातः प्रविशेत्। **उपविशेच्च पार्श्वतः** राज्ञः पार्श्वे न त्वग्रे श्वासादिस्पर्शभयात्। कथम्भूतः, **सन्निकृष्टविप्रकृष्टः** अनतिसन्निकृष्ट इत्यर्थः। खग्रन्थे 'विप्रकृष्टे'ति न पठ्यते। **वरासनमिति**। श्रेष्ठमासनम्। परासनमिति पाठेऽपि स एवार्थः। **विगृह्यकथनम्** आक्षिप्य कथनम्, **असभ्यम्** अश्लीलम्, **अप्रत्यक्षं** परोक्षार्थविषयम्, **अश्रद्धेयम्** अविश्वास्यम्, **अनृतं च** असत्यं च, वाक्यम्, **उच्चैरनर्मणि हासं** नर्मानवसरे उच्चैर्हसितं, **शब्दवती वातष्ठीवने च** सशब्दे उपर्यधोवातवृत्तिष्ठीवने च, न कुर्यात्। **मिथः कथनमन्येनेति**। राजसन्निधावन्येन रहसि मन्त्रणं, **जनवादे द्वन्द्वकथनं** समूहवादे 'इदमेवं भवति न त्वद' इति विधिनिषेधात्मकथनं, **राज्ञो वेषम्, उद्धतकुहकानां च वेषम्** उद्धतानां पाषण्डादीनां

च ब्रुवति। बलवत्संयुक्तविरोधं स्त्रीभिः स्त्रीदर्शिभिः सामन्तदूतैर्द्वेष्यापक्षावक्षिप्तानर्थ्यैश्च प्रतिसंसर्गमेकार्थचर्यां सङ्घातं च वर्जयेत् ॥

अहीनकालं राजार्थं स्वार्थं प्रियहितैः सह।
परार्थं देशकाले च ब्रूयाद् धर्मार्थसंहितम् ॥
पृष्टः प्रियहितं ब्रूयान्न ब्रूयादहितं प्रियम्।
अप्रियं वा हितं ब्रूयाच्छृण्वतोऽनुमतो मिथः ॥
तूष्णीं वा प्रतिवाक्ये स्याद् द्वेष्यादींश्च न वर्णयेत्।
अप्रिया अपि दक्षाः स्युस्तद्भावाद् ये बहिष्कृताः ॥

च वेषं, रत्नातिशयप्रकाशाभ्यर्थनं राजधार्यमाणरत्नगतस्यातिशयस्य स्वस्मै प्रकाशनप्रार्थनम्, एकाक्ष्योष्ठनिर्भोगम् एकस्याक्ष्णः ओष्ठस्य च वक्रत्वं, भ्रुकुटीकर्म भ्रूभङ्गं, वाक्यावक्षेपणं च ब्रुवति राज्ञि कथयति सति मध्ये वाक्यकथनं च, न कुर्यादिति वर्तते। बलवत्संयुक्तविरोधमिति। बलवत्सम्बन्धिभिः सह विरोधं, स्त्रीभिः, स्त्रीदर्शिभिः स्त्रीदर्शनशीलैरन्तर्वंशिकैः, सामन्तदूतैः विषयानन्तरनृपतिदूतैः, द्वेष्यापक्षावक्षिप्तानर्थ्यैश्च राज्ञो द्वेष्यैरक्षिगतैः अपक्षैरसहायैरुदासीनैः अवक्षिप्तैरपहृतार्थमानैः अनर्थ्यैर्नटनर्तकादिभिश्च, प्रतिसंसर्गं सख्यम्, एकार्थचर्यां बहूनामर्थिनां मध्ये एकार्थानुष्ठानं, सङ्घातं च सङ्घसमवायं च, वर्जयेत्, अर्थात् प्रधानामात्यादिः ॥

विधिशेषं श्लोकैराह— अहीनकालमित्यादि। राजार्थं राजप्रयोजनम्, अहीनकालं ब्रूयात् विना कालविलम्बं सद्य एव कथयेत्। स्वार्थम् आत्मप्रयोजनं, प्रियहितैः सह राज्ञः प्रियैर्हितैश्च जनैः सह, ब्रूयात्, परार्थं परस्य प्रयोजनं, देशकाले समुचितेऽवसरे, ब्रूयात्। धर्मार्थसंहितमिति सर्वशेषः यद्यद् ब्रूयात् तत् सर्वं धर्मेणार्थेन च संयुक्तं स्यादित्यर्थः ॥

पृष्ट इति। राज्ञानुयुक्तः, प्रियहितं ब्रूयात्। अहितं प्रियं न ब्रूयात्। अप्रियं वा हितं ब्रूयात्। कथम्भूतस्य कथम्भूतो ब्रूयात, शृण्वतोऽनुमतो मिथः ब्रूहीत्यभ्यनुज्ञातो रहसि श्रद्धयाकर्णयतः ॥

अप्रियं हितमुच्यमानं न शृणुयादिति मन्यमानः किं कुर्यादिति सार्धश्लोकेनाह— तूष्णीं वा प्रतिवाक्ये स्यादिति। प्रतिवाक्यदानप्रसङ्गे अप्रियकथनभये सति मौनमवलम्बेत। द्वेष्यादींश्च न वर्णयेत् राज्ञो द्वेष्यादिवर्णनं न कुर्यात्। कुत इत्याह— ये, तद्भावाद् बहिष्कृताः राजच्छन्दाननुवर्तिनः

अनर्थ्याश्च प्रिया दृष्टाश्चित्तज्ञानानुवर्तिनः ।
अभिहास्येष्वभिहसेद् घोरहासांश्च वर्जयेत् ॥
परात् सङ्क्रामयेद् घोरं न च घोरं स्वयं वदेत् ।
तितिक्षेतात्मनश्चैव क्षमावान् पृथिवीसमः ॥
आत्मरक्षा हि सततं पूर्वं कार्या विजानता ।
अग्नाविव हि संप्रोक्ता वृत्ती राजोपजीविनाम् ॥
एकदेशं दहेदग्निः शरीरं वा परं गतः ।
सपुत्रदारं राजा तु घातयेद् वर्धयेत वा ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
चतुर्थोऽध्यायः अनुजीविवृत्तम्,
आदितश्चतुर्नवतितमः ॥

ते दक्षा अपि अप्रियाः स्युः । चित्तज्ञानानुवर्तिनः राजच्छन्दानुवर्तिनः, अनर्थ्याश्च अनर्थावहाः नटनर्तकादयोऽपि, प्रियाः दृष्टाः ॥

अभिहास्येष्विति । हसति राज्ञि तदभिमुखहसनीयेष्वर्थेषु, अभिहसेत् अभिमुखं हसेत् न तु काष्ठवन्निर्विकारस्तिष्ठेत् । घोरहासान् वर्जयेच्च ॥

परादिति । परद्वारेण, घोरम् अश्राव्यमर्थं, संक्रामयेत् राजानं ग्राहयेत्, न च घोरं स्वयं वदेत् । 'परे वदेदि'ति मूलमातृकापाठे तु परविषय इत्यर्थः । क्षमावान् पृथिवीसमः, आत्मनश्चैव, घोरम् उपनतं, तितिक्षेत सहेत ॥

अग्निसेवनवद् राजसेवनं सुलभापायमिति कृत्वा तत् कुर्वता स्वात्मरक्षायां प्रतिजागरितव्यमित्याह — **आत्मरक्षा हीत्यादि** ॥

अग्न्यपेक्षया राज्ञो व्यतिरेकमप्याह — **एकदेशं दहेदग्निरित्यादि** । सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
चतुर्थोऽध्यायः अनुजीविवृत्तम्,
आदितश्चतुर्नवतितमः ॥

९३. प्रक. समयाचारिकम् ।

नियुक्तः कर्मसु व्ययविशुद्धमुदयं दर्शयेत् ।

आभ्यन्तरं बाह्यं गुह्यं प्रकाश्यमात्ययिकमुपेक्षितव्यं वा कार्यम् 'इदमेवम्' इति विशेषयेच्च ।

मृगयाद्यूतमद्यस्त्रीषु प्रसक्तं चानुवर्तेत प्रशंसाभिः। आसन्नश्चास्य व्यसनोपघाते प्रयतेत । परोपजापातिसन्धानोपधिभ्यश्च रक्षेत् ।

इङ्गिताकारौ चास्य लक्षयेत्। कामद्वेषहर्षदैन्यव्यवसायभयद्वन्द्वविपर्यासमिङ्गिताकाराभ्यां हि मन्त्रसंवरणार्थमाचरन्ति प्राज्ञाः।

समयाचारिकमिति सूत्रम् । समयस्य व्यवस्थायाः आचारोऽनुष्ठानं समयाचारः तमधिकृत्य प्रवृत्तमित्यर्थः। पूर्वाध्याये मन्त्रिणां वृत्तमुक्तम् । तन्मूलत्वात् कोशस्य राज्यफलत्वाच्च अर्थाधिकारिणां वृत्तमिहोच्यत इति सङ्गतिः ।

नियुक्तः कर्मस्विति। कर्मसु नियुक्तः समाहर्तृसन्निधातृप्रभृतिपुरुषः, व्ययविशुद्धम् , उदयम् आयं, दर्शयेत् ।

आभ्यन्तरमिति । अभ्यन्तरभवं दुर्गसम्बन्धि, बाह्यं बहिर्भवं जनपदसम्बन्धि इदमुभयविधं कार्यं, गुह्यं प्रकाश्यम् आत्ययिकम् उपेक्षितव्यं वेति चतुर्विधम्, इदमेवमिति विशेषयेत् इदमीदृशमिति राज्ञे निवेदयेत् लेख्ये निवेशयेच्च । तत्र गुह्यं राजरहस्यादि, प्रकाश्यं राजसर्वज्ञत्वख्यापनादिकं कोशाभिसंहरणोक्तम् , आत्ययिकं सद्योऽननुष्ठाने हीयमानम् , उपेक्षितव्यं सद्योऽननुष्ठानेऽप्यहीयमानम् ।

मृगयाद्यूतमद्यस्त्रीषु प्रसक्तं चेति । तथाविधं राजानम्, अनुवर्तेत प्रशंसाभिः श्लाघावचनैरनुसरेत् । अनुवर्तनफलमाह—आसन्नश्च, अस्य राज्ञः, व्यसनोपघाते, प्रयतेत प्रकर्षेणोत्सहेत । परोपजापातिसन्धानोपधिभ्यश्च परप्रयुक्तात् उपजापाद् भेदात् अतिसन्धानाद् वञ्चनात् उपधेस्तीक्ष्णरसदादेश्च, रक्षेत् ।

इङ्गिताकारौ चेति। इङ्गितमयथापूर्वमाचरणम् आकारो मुखरागादिः तौ च, अस्य, लक्षयेत् सूक्ष्मेक्षिकया जानीयात् । कामद्वेषहर्षदैन्यव्यवसायभयद्वन्द्वविपर्यासं कामादीनां व्यत्ययेन प्रदर्शनम्, इङ्गिताकाराभ्यां प्राज्ञाः आचरन्ति हि । किमर्थमाचरन्ति, मन्त्रसंवरणार्थं मन्त्रगोपनार्थम्। अतो दुर्लक्ष्यौ मतिमतापीङ्गिताकाराविति तद्दर्शनेऽवधानविशेषो देय इति भावः ।

दर्शने प्रसीदति । वाक्यं प्रतिगृह्णाति । आसनं ददाति । विविक्ते दर्शयते । शङ्कास्थाने नातिशङ्कते । कथायां रमते । परज्ञाप्येष्वपेक्षते । पथ्यमुक्तं सहते । स्मयमानो नियुङ्क्ते । हस्तेन स्पृशति । श्लाघ्येनोपहसति । परोक्षे गुणं ब्रवीति । भक्ष्येषु स्मरति । सह विहारं याति । व्यसनेऽभ्यवपद्यते । तद्भक्तीन् पूजयति । गुह्यमाचष्टे । मानं वर्धयति । अर्थं करोति । अनर्थं प्रतिहन्ति इति तुष्टज्ञानम् ।

एतदेव विपरीतमतुष्टस्य । भूयश्च वक्ष्यामः—सन्दर्शने कोपः, वाक्यस्याश्रवणप्रतिषेधौ, आसनचक्षुषोरदानं, वर्णस्वरभेदः, एकाक्षिभ्रुकुट्योष्ठनिर्भोगः, स्वेदश्च, श्वासस्मितानामस्थानोत्पत्तिः, परिमन्त्रणम्,

---

प्रीतिलिङ्गान्याह— **दर्शन** इति । दर्शने, प्रसीदति तुष्यति । वाक्यं प्रतिगृह्णाति सादरं शृणोति । आसनं ददाति । विविक्ते दर्शयते जनान्तराप्रवेश्येऽन्तःपुरादावपि दर्शनावसरं ददाति । शङ्कास्थाने नातिशङ्कते, विश्वासात् । कथायां सम्भाषणप्रबन्धे, रमते । परज्ञाप्येषु अपेक्षते अन्यैर्विज्ञाप्येषु कार्येष्वपि प्रियपुरुषसाचिव्यमिच्छति । परिज्ञाप्येष्विति पाठेऽप्येष एवार्थः । पथ्यम् उक्तं सहते अर्थात् परुषमपि । स्मयमानो नियुङ्क्ते 'त्वमेवेदं कर्तुमर्हसी'ति सस्मितं कार्ये प्रेरयति । हस्तेन स्पृशति स्पृशन् वक्ति । श्लाघ्येन उपहसति श्लाघनीयेन कर्मणा कृतेन सम्मुखे परिहसति । परोक्षे गुणं ब्रवीति अप्रत्यक्षे श्लाघते । भक्ष्येषु स्मरति, संविभागार्थम् । सह विहारं सञ्चारं याति । व्यसने अभ्यवपद्यते तत्परिहारसाहाय्यमाचरति । तद्भक्तीन् पूजयति तदनुरक्तान् बहुमन्यते । गुह्यं रहस्यम् आचष्टे । मानं वर्धयति उत्कृष्टपदारोपणादिना बहुमानमुपचिनोति । अर्थं करोति धर्मार्थकामलक्षणमीप्सितं साधयति । अनर्थं प्रतिहन्ति निवारयति । इति तुष्टज्ञानम् उक्तप्रकारः प्रीतज्ञानोपायः ।

एतदेव विपरीतमतुष्टस्येति । उक्तमेव दर्शनप्रसादादिकं विपरीतम् अर्थादप्रसादादिकमतुष्टस्य ज्ञानोपायः । भूयश्च अधिकं च लिङ्गं, वक्ष्यामः । तन्निर्दिशति—**सन्दर्शने कोप** इत्यादि । सः, वाक्यस्याश्रवणप्रतिषेधौ, आसनचक्षुषोरदानम् आसनस्याप्रतिपादनं दृष्ट्याप्यसम्भावनं च, वर्णस्वरभेदः वर्णभेदः स्वरभेदश्च, एकाक्षिभ्रुकुट्योष्ठनिर्भोगः काकाक्ष्यवलोकनं भ्रूभङ्गः ओष्ठवक्रीकरणं च, स्वेदश्च, श्वासस्मितानामस्थानोत्पत्तिः दीर्घनिःश्वासानां

अकस्माद् व्रजनं, वर्धनम् अन्यस्य, भूमिगात्रविलेखनम्, अन्यस्योपतोदनं, विद्यावर्णदेशकुत्सा, समनिन्दा, प्रतिदोषनिन्दा, प्रतिलोमस्तवः, सुकृतानवेक्षणं, दुष्कृतानुकीर्तनं, पृष्ठावधानम्, अतित्यागः, मिथ्याभिभाषणं, राजदर्शिनां च तद्वृत्तान्यत्वम् ।

वृत्तिविकारं चावेक्षेताप्यमानुषाणाम् ।

अयमुच्चैः सिञ्चतीति कात्यायनः प्रवव्राज ।

हासानां चाकारणोत्पत्तिः, परिमन्त्रणम् अन्येन सहमन्त्रणम्, अकस्माद् व्रजनं प्रयोजनं विना गमनं, वर्धनमन्यस्य विहायेममितरस्यादरणं, भूमिगात्रविलेखनं भूमौ गात्रे वा नखेन विलेखनम्, अन्यस्योपतोदनं परस्य ताडनं, विद्यावर्णदेशकुत्सा विद्यावर्णदेशानां तदीयानां निन्दनं, समनिन्दा तत्तुल्यकर्मणो निन्दा, समदोषनिन्देत्यपि पाठः । प्रतिदोषनिन्दा तद्गतदोषसमानस्य दोषस्य निन्दा, प्रतिलोमस्तवः तद्विरुद्धवृत्तीनां श्लाघनं, सुकृतानवेक्षणं तेन सम्यक् कृतस्यागणनं, दुष्कृतानुकीर्तनम् असुष्ठुकृतस्यासकृत् संशब्दनं, पृष्ठावधानं प्रतिगच्छतस्तस्य पृष्ठतो विलोकनम्, अतित्यागः विसृष्टप्रत्यागलस्य कार्यापदेशेन पुनःपुनर्विसर्जनं, मिथ्याभिभाषणं भावशून्यं सम्भाषणं, राजदर्शिनां तद्वृत्तान्यत्वं च राजसेवकानां तस्मिन् वृत्तिभेदश्च ।

वृत्तीत्यादि । अमानुषाणामपि पक्ष्यादीनामपि अपिशब्दान्मनुष्याणामपि, वृत्तिविकारं च वृत्तिभेदं च, अवेक्षेत लक्षयेत् ।

तत्र मानुषाणां तदवेक्षणमुदाहरति — **अयमित्यादि** । अयम् उदकसेचकः, उच्चैः ऊर्ध्वं, सिञ्चति इति हेतोः, कात्यायनः तदाख्यो राजमन्त्री, प्रवव्राज राजानं परित्यज्य गतः । अत्रैष इतिहासः — पौण्ड्रदेशे किल सोमदत्तो नाम राजा क्वचिदपराधे निमित्ते स्वपुत्रं बन्धनागारे निवेशयितुं मन्त्रिणा कात्यायनेन सह संमन्त्रितवान् । इममर्थमिङ्गिताकाराभ्यां तत्पक्ष्या विज्ञाय पुत्रमन्यत्र निन्युः । राजा तु मन्त्रिणमेव मन्त्रभेत्तारं मन्यमानस्तद्वधाय स्वसेवकानादिदेश । श्रुततदादेशरहस्यः कश्चिदुदकसेचकः आगच्छति कात्यायने जलमूर्ध्वतो विकिरन्नसिञ्चत् । मन्त्री च मद्देहजलबिन्दुपातपरिहारायाधः शनैः सेचनं ह्यो यावत् कृतवतोऽद्येदमुच्चैरुदकसेचनं किमपि मयि राजप्रकोपसूचकं वृत्तिवैकृतमिति जानन् राजानं परितत्याजेति ।

क्रौञ्चोऽपसव्यम् इति कणिङ्को भारद्वाजः ।
तृणमिति दीर्घश्चारायणः ।
शीता शाटीति घोटमुखः ।
हस्ती प्रत्यौक्षीदिति किञ्जल्कः ।

अथामानुषाणामाह — **क्रौञ्च** इति । क्रुङ्नामा पक्षिविशेषः, अपसव्यं, गत इति शेषः । इति हेतोः, कणिङ्कः तदाख्यः, भारद्वाजः भारद्वाजगोत्रः, प्रवव्राजेत्यनुवर्तते । अयमिहेतिहासः — कोसलेषु किल परन्तपस्य राज्ञोऽनुजीवी कणिङ्को नामार्थशास्त्रविचक्षण आसीत् । तस्य राजकुलगमने क्रौञ्चः प्रदक्षिणं नित्यं गच्छेत् । कणिङ्कः क्वचिद् दिवसे स्वस्मिन् अन्तःपुरस्थे सति समागत इति कृत्वा तं राजा क्रुध्यन् निनिन्द । श्रुततन्निन्दः क्रौञ्चस्तस्यापसव्यं गतः ! तदपसव्यगमनानुमितराजकोपश्च कणिङ्को राजानं परित्यक्तवानिति ।

तृणमिति दीर्घश्चारायण इति । तृणमिति ज्ञात्वा चारायणगोत्रो दीर्घः प्रवव्राज । इदमिहैतिह्यं — मगधेषु पुरा बालः कश्चिद् राजा बभूव । तस्याचार्यो दीर्घो नाम कश्चित् तत्पितुः प्रिय आसीत् । आगते तस्मिन् राज्ञो माता स्वभर्तृभक्त्या तं प्रत्युत्थानादिना नित्यमुपचचार । अथ पुत्रः प्राप्तवयस्को मात्रा क्रियमाणं दीर्घस्योपचारमसहमानो मातरं क्वचिद् दिने पप्रच्छ— 'किमर्थं ब्राह्मणोऽयमुपचर्यते' इति । तं च राजमाता जगाद— 'विद्वानयमस्माकमाचार्यः पितुस्ते परमः स्निग्धो बहुमाननीयश्च ते । तमेनं भक्तचेलदानादिना पूजये'ति । तच्छ्रुत्वा सद्य एव तृणपर्यवच्छन्नमन्नं कृत्वा तस्मै प्रायच्छत् । तेन परिज्ञाततदनादरो दीर्घस्तं परित्यक्तवानिति ।

शीता शाटीति घोटमुख इति । वस्त्रं शीतमित्यनेनेङ्गितेन घोटमुखो नामाचार्यः प्रवव्राज । इहेदं पुरावृत्तम् — अवन्तिष्वंशुमतो नाम राज्ञः पुत्रं घोटमुखो नीतिविद्यामध्यापयन्नुवास । तस्मै च राजा कस्मिंश्चिन्निमित्ते जातु चुक्रोध । तमर्थं विदित्वा गुरुभक्तो राजपुत्र इङ्गितं स्वगुरवे दर्शयाम्बभूव । स हि स्नात्वा गच्छन् नियमेन वस्त्रं निष्पीडितं कण्ठे धरति । तस्मिंस्तु दिने स्नात्वा वस्त्रं शीतमिति वदन् वस्त्ररिक्तकण्ठो जगाम । अनेनेङ्गितेन राज्ञ आत्मनि भावविकारं ज्ञात्वा घोटमुखस्तं तत्याजेति ।

हस्ती प्रत्यौक्षीदिति किञ्जल्क इति । गजः प्रतिसिक्तवानित्यतः किंजल्कः प्रवव्राज । तथाचेतिहासः — वङ्गेषु शतानन्दस्य राज्ञोऽनुजीवी

रथाश्वं प्राशंसीदिति पिशुनः ।

प्रतिरवणे शुनः पिशुनपुत्रः । इति ।

अर्थमानावक्षेपे च परित्यागः । स्वामिशीलमात्मनश्च किल्बिषमुपलभ्य वा प्रतिकुर्वीत । मित्रमुपकृष्टं वास्य गच्छेत् ॥

किञ्जल्को नामाचार्य आसीत् । सोऽनुदिनं राजौपवाह्यं हस्तिनं प्रतिलालयन्तमग्रे क्षणमुपलाल्य पश्चाद् राजकुलं गच्छेत् । कदाचिद् राजा त हस्तिनमधिरूढ आचार्यद्रोहममन्त्रयत । श्रुतार्थो हस्ती पुष्करजलैराचार्यमसिञ्चत् । अपूर्वेण तेन जलसेकेङ्गितेन भावविकारमात्मनि राज्ञो विज्ञाय किञ्जल्कस्ततः प्रव्रजित इति ।

रथाश्वं प्राशंसीदिति पिशुन इति । इयमिह कथा — पिशुनो नामाचार्य उज्जयिन्यां प्रद्योतस्य पुत्रं पालकं नीतिविद्यामध्यापयाम्बभूव । अथ समाप्तेऽध्यापने राजा पिशुनस्य धनमपहर्तुममन्त्रयत स्वपुत्रसन्निधौ । तच्छ्रुत्वा पुत्र आचार्यद्रोहं परिजिहीर्षुः स्यन्दनमश्वयुक्तमारुह्याचार्यस्याग्रे स्थित्वा रथाश्वं श्लाघितवान् — अश्वोऽयमेकेनाह्ना त्रिंशतं योजनानि गच्छेदिति । तेनात्मगमनं चोदितं ज्ञात्वा पिशुनस्ततो गत इति ।

प्रतिरवणे शुनः पिशुनपुत्र इति । श्वभषणं श्रुत्वा पिशुनपुत्रः प्रव्रजितः । अत्र चेदमैतिह्यं — पिशुनस्याचार्यस्य पुत्रो बाल्य एवाधीतनीतिशास्त्रतत्त्वः राजानं सेवमानः स्थितः । राजा चैनं विद्वत्तम इत्यनुसरन्नवर्तत । कदाचिद् राजामन्त्रयत — पिशुनपुत्रोऽयं बालत्वाद् मन्त्रिपदायोग्यः । अत आ योग्यवयःप्राप्तेर्बद्ध्वायं रक्षणीयः, अन्यथा देशान्तरं गच्छेदिति । मन्त्रणमिदं श्रुत्वा कुक्कुरः पिशुनपुत्रस्याग्रे बुक्कति स्म । तेनेङ्गितेन राजचित्तवैकृतमनुमाय पिशुनपुत्रः सद्य एव ततो गत इति । इतीति । एवं वृत्तिविकारं ज्ञात्वा राजानं त्यजेदित्यर्थः ।

अर्थमानावक्षेपे च परित्याग इति । अर्थमानहानिकरं च राजानं परित्यजेत् । **स्वामीत्यादि** । स्वामिशीलं राज्ञः स्वभावम्, आत्मनः किल्बिषं च अपराधं च, उपलभ्य पर्यालोच्य, प्रतिकुर्वीत वा राजकोपस्य प्रतिक्रियां कुर्वीत वा राजानमपरित्यजन् । अस्य स्वामिनः, उपकृष्टं सन्निकृष्टं, मित्रं गच्छेद् वा आश्रयेत वा स्वामिचित्तप्रसादनार्थम् ॥

तत्रस्थो दोषनिर्घातं मित्रैर्भर्तरि चाचरेत्।
ततो भर्तरि जीवेद् वा मृते वा पुनराव्रजेत् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे
पञ्चमोऽध्यायः समयाचारिकम्,
आदितः पञ्चनवतितमः ॥

तत्रस्थ इति । राजदुर्गस्थः, मित्रैर्मित्रद्वारेण, भर्तरि, दोषनिर्घातं स्वापराधमार्जनम्, आचरेच्च । ततो दोषमार्जनानन्तरं भर्तरि जीवेद् वा, मृते भर्तरि पुनराव्रजेद् वा ॥

इति कौटलीयार्थशास्त्रव्याख्यायां योगवृत्ते पञ्चमाधिकरणे
पञ्चमोऽध्यायः समयाचारिकम्,
आदितः पञ्चनवतितमः ॥

९४, ९५. प्रक॰ राज्यप्रतिसन्धानमेकैश्वर्यं च ।

राजव्यसनमेवममात्यः प्रतिकुर्वीत । प्रागेव मरणाबाधभयाद् राज्ञः प्रियहितोपग्रहेण मासद्विमासान्तरं दर्शनं स्थापयेद् 'देशपीडापहममित्रापहमायुष्यं पुत्रीयं वा कर्म राजा साधयति' इत्यपदेशेन राजव्यञ्जनमनुरूपवेलायां प्रकृतीनां दर्शयेत्, मित्रामित्रदूतानां च । तैश्च यथोचितां सम्भाषाम् अमात्यमुखो गच्छेत् । दौवारिकान्तर्वंशिकमुखश्च यथोक्तं राजप्रणिधिमनुवर्तयेत् । अपकारिषु च हेडं प्रसादं वा प्रकृतिकान्तं दर्शयेत् । प्रसादमेवोपकारिषु ।

आप्तपुरुषाधिष्ठितौ दुर्गप्रत्यन्तस्थौ वा कोशदण्डावेकस्थौ कारयेत्, कुल्यकुमारमुख्यांश्चान्यापदेशेन ।

राज्यप्रतिसन्धानम्िति सूत्रम् । राज्यस्य प्रतिसन्धानं राजव्यसने सति तत्पुत्रादीनभिषिच्य परिचिन्तनम् । तदिहोच्यत इति सूत्रार्थः । पूर्वप्रक्रान्तमनुजीविवृत्तं मन्त्रिवृत्तात्मनार्थाधिकार्यात्मना च द्वाभ्यामध्यायाभ्यां प्रतिपादितं राजस्वास्थ्यदशायाम् । तदस्वस्थतायां मन्त्रिव्यापारोऽधुनाभिधीयते ।

राजव्यसनम्िति । राज्ञो व्यसनमस्वास्थ्यम्, एवम् अनेन वक्ष्यमाणेन प्रकारेण, प्रतिकुर्वीत । मरणाबाधभयात् प्रागेव, राज्ञः, प्रियहितोपग्रहेण प्रियहितजनोपसंग्रहेण प्रियहितवचनेन च, मासद्विमासान्तरं मासव्यवहितं द्विमासव्यवहितं च, दर्शनं दिदृक्षुदर्शनावसरदानं, स्थापयेत् नियमयेत् । केनापदेशेन स्थापयेत्, देशपीडापहम्, अमित्रापहम्, आयुष्यमायुष्करं, पुत्रीयं पुत्रोत्पत्त्यर्थं वा, कर्म राजा साधयति इत्यपदेशेन । राजव्यञ्जनं राजचिह्नयुक्तं कमप्याप्तजनं कृत्वा, अनुरूपवेलायां प्रकृतिदर्शनयोग्ये समये, प्रकृतीनां मित्रामित्रदूतानां च दर्शयेत् । तैः महावश्यकार्यतया प्रसक्तां सम्भाषां मन्त्रिमुखेन राजा कुर्यान्मौनव्रतमपदिश्येत्याह — **तैश्च यथोचिताम्**इत्यादि । दिवसाष्टभागकरणीयतया पूर्वमुक्तं राज्ञो व्यापारं द्वाराधिकृतान्तःपुराधिकृतमुखेनानुष्ठापयेदित्याह — **दौवारिके**त्यादि । **अपकारिष्वि**ति । तेषु, हेडम् अनादरं कोपं, प्रसादं वा, प्रकृतिकान्तं प्रकृतिसम्मतं, दर्शयेत् । प्रसादमेव न तु हेडम्, उपकारिषु दर्शयेत् ।

दुर्गगतौ प्रत्यन्तभूमिगतौ च कोशदण्डावाप्तपुरुषरक्षितौ कृत्वा केनचिद् व्याजेनैकस्थानगतौ कारयेत् । तथा कुलीनान् राजकुमारान् राज्यमुख्यांश्चैकस्थान् कारयेदित्याह — **आप्तपुरुषाधिष्ठिताव्**इत्यादि ।

यश्च मुख्यः पक्षवान् दुर्गाटवीस्थो वा वैगुण्यं भजेत तमुपग्राहयेत्, बहाबाधां वा यात्रां प्रेषयेत् मित्रकुलं वा ।

यस्माच्च सामन्तादाबाधं पश्येत्, तमुत्सवविवाहहस्तिबन्धनाश्वपण्यभूमिप्रदानापदेशेन अवग्राहयेत्, स्वमित्रेण वा । ततः सन्धिमदूष्यं कारयेत् ।

आटविकामित्रैर्वा वैरं ग्राहयेत् । तत्कुलीनमवरुद्धं वा भूम्येकदेशेनोपग्राहयेत् ।

कुल्यकुमारमुख्योपग्रहं कृत्वा वा कुमारमभिषिक्तमेव दर्शयेत् । दाण्डकर्मिकवद् वा राज्यकण्टकानुद्धृत्य राज्यं कारयेत् ।

यदि वा कश्चिन्मुख्यः सामन्तादीनामन्यतमः कोपं भजेत, तम् 'एहि राजानं त्वा करिष्यामि' इत्यावाहयित्वा घातयेत् । आपत्प्रतीकारेण वा साधयेत् ।

यश्चेति । यश्च मुख्यः, पक्षवान् सहायवान्, दुर्गाटवीस्थो वा दुर्गस्थोऽटवीस्थो वा, वैगुण्यं विक्रियां, भजेत, तम्, उपग्राहयेत् अनुकूलयेत् । **बहाबाधां वा यात्रां** बह्वपायदेशसाधनार्थां यात्रां वा, प्रेषयेत् कारयेत् । **मित्रकुलं वा प्रेषयेत्** मित्रकुलं प्रति वा तत्साहाय्यार्थं प्रहिणुयात् ।

इत्थं स्वविषये कर्तव्यमुक्त्वा परविषये कर्तव्यमाह — **यस्माच्चेति** । **यस्माच्च**, सामन्ताद् भूम्यनन्तरात्, आबाधं, पश्येत् सम्भावयेत्, तम्, **उत्सवविवाहहस्तिबन्धनाश्वपण्यभूमिप्रदानापदेशेन** उत्सवादिषट्कान्यतमव्याजेन, **अवग्राहयेत्** आनाय्यानुकूलयेत् । स्वमित्रेण वा स्वमित्रद्वारेण वा, तम् अवग्राहयेत् । ततः तन्मुखेन, सन्धिम् अदूष्यं कारयेत् ।

आटविकामित्रैर्वेति । आटविकैरमित्रैश्च वा, वैरं ग्राहयेत्, पूर्वोक्तस्य **सामन्तस्य** । तत्कुलीनं सामन्तकुलोत्पन्नम्, अवरुद्धं वा, भूम्येकदेशेन भूम्येकदेशदानेन, उपग्राहयेत् अर्थात् तद्द्वारेण तं सामन्तं दमयेत् ।

त एते राज्ञि भ्रियमाणे व्यापाराः । मृते तु कर्तव्यमाह — **कुल्यकुमारमुख्योपग्रहमिति** । राजकुल्यानां राजकुमाराणां राष्ट्रमुख्यानां चोपग्रहं, कृत्वा वा, कुमारम्, अभिषिक्तमेव दर्शयेत् । दाण्डकर्मिकवद् वा **दाण्डकर्मिकोक्तरीत्या वा**, राज्यकण्टकान् उद्धृत्य राज्यं कारयेत् ।

इत्थं स्वविषये कर्तव्यमुक्तम् । परविषये कर्तव्यमाह—**यदि वेत्यादि** । **सामन्तादीनामन्यतमः** कश्चिन्मुख्यो यदि कुप्येत्, तदा 'बालोऽयं राज्यानर्हः

युवराजे वा क्रमेण राज्यभारमारोप्य राजव्यसनं ख्यापयेत् ।

परभूमौ राजव्यसने मित्रेणामित्रव्यञ्जनेन शत्रोः सन्धिमव-स्थाप्यापगच्छेत् । सामन्तादीनामन्यतमं वास्य दुर्गे स्थापयित्वाप-गच्छेत् । कुमारमभिषिच्य वा प्रतिव्यूहेत । परेणाभियुक्तो वा यथो-क्तमापत्प्रतीकारं कुर्यात् ।

एवमेकैश्वर्यममात्यः कारयेदिति कौटल्यः ।

नैवमिति भारद्वाजः । प्रम्रियमाणे वा राजन्यमात्यः कुल्य-कुमारमुख्यान् परस्परं मुख्येषु वा विक्रामयेत् । विक्रान्तं प्रकृतिकोपेन

प्रकृतिक्षोभपरिहारार्थं केवलमभिषिक्तः । तद् आगच्छ त्वामेवाभिषेक्ष्यामः' इत्युक्त्वा तमानाय्य घातयेत् । यदि स नागच्छेत्, तदा आपत्प्रतीकारोक्त-कल्पेन तं साधयेत् ।

उक्तमविद्यमाने युवराजे । यदि स विद्येत, तर्हि तस्मै राज्यभारं जीव-त्येव राज्ञि अर्पयित्वा पश्चाद् राजमरणं ख्यापयेदित्याह— **युवराजे** वेत्यादि ।

इत्थं स्वभूमौ राजमरणे राज्यप्रतिसन्धानमुक्त्वा परभूमावाह —**परे**-त्यादि । परभूमौ, राजव्यसने, अमित्रव्यञ्जनेन मित्रेण सह शत्रोः सान्धिम्, अ-वस्थाप्य स्थापयित्वा, इत्थं परविषयगतकोशदण्डरक्षार्थं संविधानं कृत्वेत्यर्थः, अपगच्छेत् । सामन्तादीनाम् अन्यतमं वा, दुर्गे परकीये, स्थापयित्वा कोश-दण्डरक्षार्थं नियुज्य, अपगच्छेत्, पश्चात्कोपाद्यपदेशेनेत्यार्थम् । कुमारं युव-राजम्, अभिषिच्य वा, प्रतिव्यूहेत शत्रुं प्रतियुध्येत । परेण शत्रुणा, अभियु-क्तो वा, यथोक्तं 'बाह्याभ्यन्तराश्चापदः' 'दूष्यशत्रुसंयुक्ताः' 'अर्थानर्थसंयुक्ताः' इत्यभियास्यत्कर्माधिकरणगतसूत्रत्रयोक्तम् आबलीयसोक्तं च, आपत्प्रतीकारं कुर्यात् । इति राज्यप्रतिसन्धानं व्याख्यातम् । अथैकैश्वर्यमुच्यते ।

एकैश्वर्यमिति सूत्रम् । एकस्यैव राजपुत्रस्य एकातपत्रमैश्वर्यं कर्तव्य-मित्येतदुच्यत इति सूत्रार्थः । राज्यप्रतिसन्धानमधस्तादुक्तम् । अमात्यस्यैश्व-र्यप्रसङ्गे राजपुत्रस्यैव तत् कर्तव्यमित्यधुनाभिधीयते ।

एवमिति । अनेन प्रकारेण, अमात्यः, एकैश्वर्यं, कारयेत् अर्थाद् राजपुत्रस्य । इति कौटल्यः ।

नैवमिति भारद्वाज इति । अमात्यो राजपुत्रमेकेश्वरं न कुर्यादिति भारद्वाजो मन्यते । तर्हि स किं कुर्यात् तत्राह — **प्रम्रियमाणे** वेत्यादि । अयमर्थः — आसन्नमरणे राज्ञि कुल्यान् कुमारं राष्ट्रमुख्यांश्च परस्परं वा

घातयेत् । कुल्यकुमारमुख्यानुपांशुदण्डेन वा साधयित्वा स्वयं राज्यं गृह्णीयात् । राज्यकारणाद्धि पिता पुत्रान् पुत्राश्च पितरमभिद्रुह्यन्ति; किमङ्ग पुनरमात्यप्रकृतिर्ह्येकप्रग्रहो राज्यस्य । तत् स्वयमुपस्थितं नावमन्येत । स्वयमारूढा हि स्त्री त्यज्यमानाभिशपतीति लोकप्रवादः ।

कालश्च सकृदभ्येति यं नरं कालकाङ्क्षिणम् ।
दुर्लभः स पुनस्तस्य कालः कर्म चिकीर्षतः ॥

प्रकृतिकोपकमधर्मिष्ठमनैकान्तिकं चैतदिति कौटल्यः । राजपुत्रमात्मसम्पन्नं राज्ये स्थापयेत् । संपन्नाभावे व्यसनिनं कुमारं राजकन्यां गर्भिणीं देवीं वा पुरस्कृत्य महामात्रान् सन्निपात्य ब्रूयात् — अयं वो निक्षेपः, पितरमस्यावेक्षध्वं सत्त्वाभिजनमात्मनश्च, ध्वजमात्रोऽयं, भवन्त एव स्वामिनः, कथं वा क्रियताम् इति ।

तथा ब्रुवाणं योगपुरुषा ब्रूयुः — कोऽन्यो भवत्पुरोगादस्माद् राज्ञश्चातुर्वर्ण्यमर्हति पालयितुम् इति । तथेत्यमात्यः कुमारं राजकन्यां

मुख्येषु वा विक्रमयेत् योधयेत् । विक्रान्तं प्रकृतिकोपेन घातयित्वा कुल्यकुमारमुख्यांस्तूष्णीन्दण्डेन वा घातयित्वा स्वयं राज्यं निष्कण्टकं हरेदमात्यः । कुतः, राज्यहेतोर्हि पिता पुत्रान् पुत्राश्च पितरमभिद्रुह्यन्ति, किमुतामात्यो राज्यैकनियामकः । तस्मात् स्वयमुपनतं राज्यममात्यो न प्रत्याचक्षीत । रन्तुं स्वयमुपगता हि स्त्री प्रत्याख्यायमाना पुरुषमभिशपतीति लोकवाददृष्टान्तेन श्रीरपि स्वयमुपस्थिता नोपेक्षणीयेति ।

अस्मिन्नर्थे श्लोकमप्युदाहरति — कालश्चेत्यादि । कर्मकरणाय चिरात् प्रतीक्ष्यमाणं कालं पुरुषः सकृदेव लभते, लब्धमुपेक्षितं तु पुनर्न लभत इत्यतः स सर्वथा नोपेक्षणीय इत्यर्थः ।

तदिदं भारद्वाजमतं प्रतिक्षिपति — प्रकृतिकोपकमिति । प्रकृतिकोपकरम्, अधर्मिष्ठं धर्मापेतम्, अनैकान्तिकं नियमेन कार्यासाधकं च, एतत् कुल्यकुमारमुख्यविक्रमणादिकम्, इति कौटल्यः । किं तर्ह्यमात्यः कुर्यादित्याह — राजपुत्रमात्मसम्पन्नमित्यादि । व्यसनिनं पानादिप्रसक्तमपि । महामात्रान् राष्ट्रमहत्तरान् युक्तमहत्तरांश्च । सन्निपात्य एकत्र मेलयित्वा । निक्षेपो रक्षणीयपदार्थः । सत्त्वाभिजनं पराक्रमं कुलं च । ध्वजमात्रः पताकास्थानीयः ।

तथा ब्रुवाणमित्यादि । योगपुरुषाः संमेलिताः आविताः पुरुषाः ।

गर्भिणीं देवीं वाधिकुर्वीत, बन्धुसम्बन्धिनां मित्रामित्रदूतानां च दर्शयेत् ।

भक्तवेतनविशेषममात्यानामायुधीयानां च कारयेत् । भूयश्चायं वृद्धः करिष्यतीति ब्रूयात् । एवं दुर्गराष्ट्रमुख्यानाभाषेत, यथार्हं च मित्रामित्रपक्षम् । विनयकर्मणि च कुमारस्य प्रयतेत । कन्यायां समानजातीयादपत्यमुत्पाद्य वाभिषिञ्चेत् । मातुश्चित्तक्षोभभयात् कुल्यमल्पसत्त्वं छात्रं च लक्षण्यमुपनिदध्यात् । ऋतौ चैनां रक्षेत् । न चात्मार्थं कञ्चिदुत्कृष्टमुपभोगं कारयेत् । राजार्थं तु यानवाहनाभरणवस्त्रस्त्रीवेश्मपरिवापान् कारयेत् ॥

यौवनस्थं च याचेत विश्रमं चित्तकारणात् ।
परित्यजेदतुष्यन्तं तुष्यन्तं चानुपालयेत् ॥

भवत्पुरोगात् त्वदधिष्ठातृकात् । तथेति योगपुरुषानुमतिं स्वीकृत्य । अधिकुर्वीत अभिषिञ्चेत् । बन्धुसम्बन्धिनां बन्धूनां सम्बन्धिनां च ।

भक्तवेतनविशेषमिति । भक्तस्य वेतनस्य च विशेषं पूर्वापेक्षयाधिक्यम्, अमात्यानाम् आयुधीयानां च, कारयेत् । भूयश्च बहुतरं च, अयं कुमारः, वृद्धः प्राप्तव्यवहारः, करिष्यतीति ब्रूयात् तदुत्साहार्थम् । एवं दुर्गराष्ट्रमुख्यान् दुर्गमुख्यान् राष्ट्रमुख्यांश्च, आभाषेत । यथार्हं च यथोचितं च, मित्रामित्रपक्षम्, आभाषेत । विनयकर्मणि च विद्याशिक्षणव्यापारे च, कुमारस्य, प्रयतेत । कन्यायां राज्याभिषिक्तायां, समानजातीयात् पुरुषात्, अपत्यं पुमपत्यम्, उत्पाद्य वा, अभिषिञ्चेत् । मातुरिति । कुमारमातुः, चित्तक्षोभभयात्, कुल्यं कुलीनम्, अल्पसत्त्वम् अल्पौजसं, छात्रं च, लक्षण्यं सौम्यलक्षणम्, उपनिदध्यात् मातुः समीपे निदध्यात्, अर्थाद् देवतार्चनपरिकर्मपुराणश्रावणाद्यर्थे । ऋतौ च, एनां रक्षेत् । न च, आत्मार्थं, कञ्चिद् उत्कृष्टम् अमात्यपदकलत्राभ्याधिकम्, उपभोगं, कारयेत् । राजार्थं तु, यानवाहनाभरणवस्त्रस्त्रीवेश्मपरिवापान् यानादिषट्कं परिवापं शयनासनादिकं च, कारयेत् ॥

यौवनस्थं चेति । प्राप्तयौवनं सन्तं कुमारं, चित्तकारणात् तदभिप्रायज्ञानार्थं, विश्रमम् आत्मनोऽमात्यकर्मविश्रान्तिं, याचेत । अतुष्यन्तं परित्यजेत् याचितं तं 'याही'ति वदन्तं त्यक्त्वा गच्छेत् । तुष्यन्तं चानुपालयेत् 'मा याही'ति वदन्तं, भूयोऽप्युपासीत ॥

निवेद्य पुत्ररक्षार्थं गूढसारपरिग्रहान्।
अरण्यं दीर्घसत्रं वा सेवेतारुच्यतां गतः ॥
मुख्यैरवगृहीतं वा राजानं तत्प्रियाश्रितः।
इतिहासपुराणाभ्यां बोधयेदर्थशास्त्रवित् ॥
सिद्धव्यञ्जनरूपो वा योगमास्थाय पार्थिवम्।
लभेत लब्ध्वा दूष्येषु दाण्डकर्मिकमाचरेत् ॥

इति कौटलीयार्थशास्त्रे योगवृत्ते पञ्चमाधिकरणे षष्ठोऽध्यायः
राज्यप्रतिसन्धानम् एकैश्वर्यम्, आदितः षण्णवतितमः ॥
एतावता कौटलीयस्यार्थशास्त्रस्य योगवृत्तं
पञ्चममधिकरणं समाप्तम् ॥

निवेद्येति। पुत्ररक्षार्थं, गूढसारपरिग्रहान् गूढपुरुषान् मूलबलम् आपदर्थे पितृपितामहादिस्थापितं निधिपरिग्रहं च, निवेद्य राजपुत्राय ज्ञापयित्वा, **अरण्यं सेवेत**, तपसे। दीर्घसत्रं वा दीर्घकालनिर्वर्त्यं यज्ञं वा, सेवेत, अनरण्ये। कथम्भूतः, अरुच्यतां गतः अमात्यवृत्तौ अरुचिमत्त्वं प्राप्तः, अथवा राजानं प्रति द्वेष्यतां गतः ॥

मुख्यैरिति। राजमातुलादिभिः, अवगृहीतं वा स्वायत्तीकृतं च राजानं, तत्प्रियाश्रितः तत्प्रियानेवाश्रितः, इतिहासपुराणाभ्यां, बोधयेद् धर्मार्थतत्त्वमित्यार्थम्। कीदृशो बोधयेत्, अर्थशास्त्रवित् पुरुषार्थप्रतिपादकशास्त्राभिज्ञः ॥

तथा बोधयितुमशक्ये राज्ञि का गतिस्तत्राह — **सिद्धव्यञ्जनरूपो वेति**। सिद्धवेषधारी वा, योगम् आस्थाय वर्णकेशान्यथाकरणलक्षणं कपटमाश्रित्य, पार्थिवं राजानं, लभेत वशे कुर्यात्। लब्ध्वा वशे कृत्वा, दूष्येषु मातुलादिषु, दाण्डकर्मिकं तत्प्रकरणोपदिष्टं दण्डकर्म, आचरेत् ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने।
योगवृत्ताधिकरणं पञ्चमं समपूर्यत ॥

इति श्रीवञ्चिमण्डलमहाराजाश्रितस्य ताम्रपर्णीतीरवर्तितरुवाग्रहाराभिजनस्य श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्यसूनोर्महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु कौटलीयार्थशास्त्रव्याख्यायां
श्रीमूलाख्यायां योगवृत्ते पञ्चमाधिकरणे षष्ठोऽध्यायः
राज्यप्रतिसन्धानम् एकैश्वर्यम्, आदितः षण्णवतितमः ॥
योगवृत्तं पञ्चमाधिकरणं समाप्तम् ॥

मण्डलयोनिः— षष्ठमधिकरणम् ।

९६. प्रक. प्रकृतिसम्पदः ।

स्वाम्यमात्यजनपददुर्गकोशदण्डमित्राणि प्रकृतयः ।

इत्थं वैनयिकादिभिर्योगवृत्तपर्यन्तैः पञ्चभिरधिकरणैस्तन्त्रभागोऽभिहितः । आवाप इदानीमारभ्यते । तन्त्रमिति स्वराष्ट्रानुष्ठानस्य संज्ञा, आवाप इति परराष्ट्रानुष्ठानस्य । तन्यन्ते विस्तार्यन्ते दुर्गसेतुकर्मवणिक्पथशून्यनिवेशाः खनिद्रव्यहस्तिवनकर्माणि शक्तिसिद्धयो धर्मार्थकामाश्च विजिगीषुणास्मिन्निति तन्त्रव्युत्पत्तिः । आ समन्तात् परराष्ट्रेषु उप्यन्ते प्रयुज्यन्ते इत्यावापाः सन्ध्यादयः तदनुष्ठानमपि तद्विषयत्वादावाप इत्यावापव्युत्पत्तिः । अथवा आ समन्तात् परराष्ट्रप्रयोज्याः सन्ध्यादय उप्यन्ते प्रतिपाद्यन्तेऽत्रेत्यावापो मण्डलयोन्यादिसप्ताधिकरणसमुदाय उच्यते ।

तत्रादिममधिकरणं **मण्डलयोनि**र्नाम । विजिगीष्वरिमध्यमोदासीनाख्यचतुरवयवं मण्डलं, योनिरुत्तराधिकरणार्थस्य षाड्गुण्यस्य विषयः । मण्डलं च तद् योनिश्च मण्डलयोनिः । मण्डलात्मा षाड्गुण्यप्रकृतिरित्यर्थः । मण्डलं हि विजिगीष्वादिलक्षणं परस्परानुष्ठेयस्य सन्धिविग्रहादेः षाड्गुण्यस्य प्रकृतिर्भवतीति ।

तत्र प्रथमं सूत्रं — **प्रकृतिसम्पद** इति । प्रकृतयः स्वाम्यमात्यराष्ट्रदुर्गकोशदण्डमित्राणि, प्रकृष्टं परस्परमुपकुर्वन्तीति व्युत्पत्तेः, तासां सम्पदः अपेक्षितगुणपुष्कलता इहोच्यन्त इत्यर्थः । 'लोकयात्राविद् राजानमात्मद्रव्यप्रकृतिसम्पन्नमाश्रयेत' इत्युक्तमधस्तात् । तत्रेयमात्मसम्पद् एषा प्रकृतिसम्पदिति विभागस्त्वधुना प्रदर्श्यते ।

प्रकृतीराह — **स्वाम्यमात्ये**त्यादि । स्वाम्यादयः सप्त । तत्र स्वामी अमात्यादीनां पञ्चानां द्रव्यप्रकृतीनामधिपतिः । स द्विधा राजा युवराजश्चेति । अमात्याः बुद्धिसहायाः, ते च त्रयश्चत्वारो द्वादश षोडश विंशतिरित्युक्ता मन्त्राधिकारे । जनपदो ग्रामादिभेदेनाष्टविधः । दुर्गम् 'अन्तर्द्वीपमि'त्यादिना विभक्तम् । कोशो रत्नसारफल्गुकुप्यभेदाच्चतुर्विधः । दण्डश्चतुर्विधो रथगजतुरगपदातिभेदात् । मित्रं सहजकृत्रिमप्राकृतभेदेन त्रिप्रकारम् । सप्तैतानि अन्योन्यसहकारीणि त्रिविष्टब्धकवदन्योन्याश्रयाणि परस्परं प्रकृष्टमुपकुर्वन्तीत्यतः प्रकृतय इत्याख्यायन्ते ।

तत्र स्वामिसम्पत् । महाकुलीनो दैवबुद्धिसत्त्वसम्पन्नो वृद्धदर्शी धार्मिकः सत्यवागविसंवादकः कृतज्ञः स्थूललक्षो महोत्साहोऽदीर्घसूत्रः शक्यसामन्तो दृढबुद्धिरक्षुद्रपरिषत्को विनयकाम इत्याभिगामिका गुणाः ।

शुश्रूषाश्रवणग्रहणधारणविज्ञानोहापोहतत्त्वाभिनिवेशाः प्रज्ञागुणाः ।

शौर्यममर्षः शीघ्रता दाक्ष्यं चोत्साहगुणाः ।

वाग्मी प्रगल्भः स्मृतिमतिबलवानुदग्रः स्ववग्रहः कृतशिल्पो

तेषु स्वामिनः प्राधान्यात् प्रथमं स्वामिसम्पदमाह — **स्वामिसम्पदिति** । उच्यत इति शेषः । सा च द्विविधा आभिगामिकगुणा इत्यात्मसम्पदिति च । तत्राभिगामिकान् गुणान् प्रथममाह — **महाकुलीन** इत्यादि । महाकुलीनः सूर्यसोमादिवंशोत्पन्नः श्रुतशीलैश्वर्ययुक्तश्च, दैवबुद्धिसत्त्वसम्पन्नः दैवसम्पन्नः दैवं पौर्वदेहिकं शुभकर्म अल्पप्रयत्नमात्रकार्यसिद्ध्यानुमेयं तत्सम्पन्नः बुद्धिसम्पन्नः शुश्रूषाश्रवणादिबुद्धिगुणयुक्तः सत्त्वसम्पन्नश्च सत्त्वं धैर्यं व्यसनाभ्युदययोर्निर्विकारता तद्युक्तश्च, वृद्धदर्शी ज्ञानोत्कृष्टदर्शनशीलः, धार्मिको धर्मानुष्ठानपरः, सत्यवाक् तथ्यभाषी, अविसंवादकः वचनकर्मणोस्तुल्यार्थः, कृतज्ञः उपकारस्मर्ता, स्थूललक्षो महेच्छो महादाता च, महोत्साहः प्रशस्तव्यवसायः, अदीर्घसूत्रः क्षिप्रकारी, शक्यसामन्तः पीडयितुं कर्शयितुमुच्छेत्तुं च शक्याः विषयान्तरभूपा यस्य स तथाभूतः, दृढबुद्धिः अभेद्यनिश्चयः, दृढभक्तिरिति पाठे त्वभेद्यस्नेहः, अक्षुद्रपरिषत्को गुणवत्परिवारः, विनयकामः शास्त्रसंस्कारार्थी, इति षोडश, आभिगामिका गुणाः ।

शुश्रूषेत्यादि । शुश्रूषा श्रोतुमिच्छा, श्रवणं शब्दावगमः, ग्रहणमर्थावगमः, धारणम् अवगताविस्मरणं, विज्ञानं विशेषज्ञानम्, ऊहः ज्ञातस्यार्थस्योपपत्तिपरिचिन्तनम्, अपोहो दुष्टपक्षपरित्यागः, तत्त्वाभिनिवेशः गुणवत्पक्षानुष्ठानम्, इति अष्टौ प्रज्ञागुणाः ।

शौर्यमिति । निर्भीकत्वम्, अमर्षः अक्षमा, शीघ्रता क्षिप्रक्रियत्वं, दाक्ष्यं लङ्घनप्लवनादिनैपुण्यं च, उत्साहगुणाः चत्वारः ।

वाग्मीति । अभिसंहितार्थसमर्पणक्षमवाक्यवक्ता, प्रगल्भः असभाकम्पवक्ता, स्मृतिमतिबलवान् स्मृतिरतीतविषया धीः मतिरागामिगोचरा बलं

व्यसने दण्डनाय्युपकारापकारयोर्दृष्टप्रतिकारी ह्रीमानापत्प्रकृत्योर्विनियोक्ता दीर्घदूरदर्शी देशकालपुरुषकारकार्यप्रधानः सन्धिविक्रमत्यागसंयमपणपरच्छिद्रविभागी संवृतोऽदीनाभिहास्यजिह्मभ्रुकुटीक्षणः कामक्रोधलोभस्तम्भचापलोपतापपैशुन्यहीनः शक्लः स्मितोदग्राभिभाषी वृद्धोपदेशाचार इत्यात्मसम्पत् ।

अमात्यसम्पदुक्ता पुरस्तात् ।

शरीरेन्द्रियदार्ढ्यं तद्वान्, उदग्रः चित्तोन्नतिमान्, स्ववग्रहः अकार्यात् सुखनिवार्यः, कृतशिल्पः हस्त्यश्वप्रहरणविद्यानिपुणः, व्यसने दण्डनायी शत्रोर्दैवमानुषव्यसनावसरे स्वसैन्यं तद्विजयाय प्रेषयिता आत्मनो व्यसनावसरे स्वसैन्यं रक्षिता च, उपकारापकारयोर्दृष्टप्रतिकारी शास्त्रदृष्टप्रतिकारविधायी, ह्रीमान् लज्जावान् अकार्यानुष्ठानविमुख इत्यर्थः । आपत्प्रकृत्योर्विनियोक्ता आपद् दुर्भिक्षं प्रकृतिः स्वास्थ्यं सुभिक्षं तयोर्धान्यादिकं विनियोक्ता सुभिक्षे सञ्चित्य दुर्भिक्षे विनियोक्तेत्यर्थः; अथवा आपदि प्रजायां च धान्यादिविनियोक्ता, दीर्घदूरदर्शी दीर्घकालसम्बद्धमर्थं प्रज्ञया द्रष्टुं दूरदेशसंबद्धमर्थं चारचक्षुषा द्रष्टुं च शीलमस्येति तथाभूतः, देशकालपुरुषकारकार्यप्रधानः स्वसैन्यस्य युद्धोचितो देशः कालः पुरुषकार उत्साहादिशक्तिलक्षणः कार्यं च प्रधानं यस्य स तथाभूतः, सन्धिविक्रमत्यागसंयमपणपरच्छिद्रविभागी विभागो विविच्य ज्ञानं तद्वान् विभागी स सन्ध्यादिषु प्रत्येकं सम्बध्यते । सन्धिविभागी सन्धिप्रयोगाभिज्ञः विक्रमविभागी प्रकाशयुद्धादिप्रयोगज्ञः त्यागविभागी यथादेशकालपुरुषदानसमर्थः संयमपणविभागी प्रजानुपपीडया गूढकोशाभिसंहरणप्रवीणः परच्छिद्रविभागी शत्रोश्छिद्रं पानमृगयादिव्यसनमुपलभ्य तीक्ष्णरसादिप्रयोगसमर्थः, संवृतः संरक्षिताभयस्थानो गूढमन्त्रश्च, अदीनाभिहासी दीनानभिहसितुं शीलमस्य नास्तीति तथाभूतः गभीरहासी वा, अजिह्मभ्रुकुटीक्षणः अवक्रसौम्यवीक्षणः, कामादिसप्तकहीनः तत्र स्तम्भ उत्सेकः चापलम् अविवेकानुष्ठानम् उपतापः प्रजाद्रोहः, शेषं प्रतीतं, शक्लः प्रियंवदः, स्मितोदग्राभिभाषी स्मितपूर्वोदाराभिभाषणशीलः, वृद्धोपदेशाचारः विद्यावृद्धोपदेशानुसार्यनुष्ठानः, इत्यात्मसम्पत् ।

अमात्यसम्पदिति । सा, उक्ता पुरस्ताद् वैनयिकाधिकरणे ।

मध्ये चान्ते च स्थानवानात्मधारणः परधारणश्चापदि स्वारक्षः स्वाजीवः शत्रुद्वेषी शक्यसामन्तः पङ्कपाषाणोषरविषमकण्टकश्रेणीव्यालमृगाटवीहीनः कान्तः सीताखनिद्रव्यहस्तिवनवान् गव्यः पौरुषेयो गुप्तगोचरः पशुमान् अदेवमातृको वारिस्थलपथाभ्यामुपेतः सारचित्रबहुपण्यो दण्डकरसहः कर्मशीलकर्षकोऽबालिशस्वाम्यवरवर्णप्रायो भक्तशुचिमनुष्य इति जनपदसम्पत् ।

दुर्गसम्पदुक्ता पुरस्तात् ।

धर्माधिगतः पूर्वैः स्वयं वा हेमरूप्यप्रायश्चित्रस्थूलरत्नहिरण्यो दीर्घामप्यापदमनायतिं सहेतेति कोशसम्पत् ।

जनपदसम्पदमाह — **मध्ये चान्ते च स्थानवानिति** । मध्ये सीमायां च दुर्गवान्, आत्मधारणः परधारणश्च स्ववास्तव्यजनस्वदेशागन्तुकजनोभयभरणक्षमधान्यादिप्रसोता, आपदि स्वारक्षः विपत्समये शैलवननदीदुर्गवत्तया सुकररक्षः, स्वाजीवः अल्पायासनिष्पाद्यधान्यादिमान्, शत्रुद्वेषी राजशत्रुद्वेषणशीलजनयुक्तः, शक्यसामन्तः दुर्बलसामन्तः, पङ्कपाषाणोषरविषमकण्टकश्रेणीव्यालमृगाटवीहीनः पङ्काद्यष्टकरहितः तत्र कण्टकाश्चोरपारदारिकादयः क्षुद्रशत्रवः श्रेणी राजप्रत्यनीकवृत्तिर्जनसङ्घः शेषं प्रतीतं, कान्तः वृक्षौषधिनदीसरस्तटाकारामादिरमणीयः, सीताखनिद्रव्यहस्तिवनवान् सीता कृष्यभूमिः खनिर्वज्रादिमणिसुवर्णाद्याकरः द्रव्यवनं शाकतिनिशजातीयसारदारूत्पत्तिस्थानं हस्तिवनं गजारण्यं तद्युक्तः, गव्यः गोहितः, पौरुषेयः पुरुषहितः, गुप्तगोचरो लुब्धकादिरक्षितभूमिः, पशुमान् गोच्छागादिबहुलः, अदेवमातृकः नद्यम्बुसम्पद्यमानव्रीहिपालितः, वारिस्थलपथाभ्याम् उपेतः जलमार्गस्थलमार्गयुक्तः, सारचित्रबहुपण्यः महार्घनानाजातीयबहुलक्रय्यवस्तुकः, दण्डकरसहः दण्डोऽपराधप्रायश्चित्तधनं करो राजभागः तावुद्रिक्तावपि सहत इति तथाभूतः, कर्मशीलकर्षकः अनलसकृषीवलः, अबालिशस्वामी अबालिशा बुद्धिमन्तः स्वामिनः स्वाम्यनिर्वाहका यस्मिन् स तथाभूतः, अवरवर्णप्रायः अधमवर्णबहुलः, भक्तशुचिमनुष्यः अनुरक्ताः शुद्धाश्च मनुष्या यस्मिन् स तथाभूतः, इति एवं, जनपदसम्पत् ।

दुर्गसम्पदिति । सा, उक्ता पुरस्ताद् दुर्गविधानप्रकरणे ।

कोशसम्पदमाह — **धर्माधिगत** इति । न्यायार्जितः धान्यषड्भागपण्यदशभागादिभिः शास्त्रविहितैरुपचित इति यावत्, कैः, पूर्वैः स्वयं व

पितृपैतामहो नित्यो वश्यस्तुष्टभृतपुत्रदारः प्रवासेष्वपि सम्पादितः सर्वत्राप्रतिहतो दुःखसहो बहुयुद्धः सर्वयुद्धप्रहरणविद्याविशारदः सहवृद्धिक्षयिकत्वादद्वैध्यः क्षत्रप्राय इति दण्डसम्पत् ।

पितृपैतामहं नित्यं वश्यमद्वैध्यं महल्लघुसमुत्थमिति मित्रसम्पत् ।

अराजबीजी लुब्धः क्षुद्रपरिषत्को विरक्तप्रकृतिरन्यायवृत्तिरयुक्तो व्यसनी निरुत्साहो दैवप्रमाणो यत्किञ्चनकार्यगतिरननुबन्धः क्लीबो नित्यापकारी चेत्यमित्रसम्पत् । एवंभूतो हि शत्रुः सुखः समुच्छेत्तुं भवति ॥

पूर्वभूपतिभिरात्मना वा, हेमरूप्यप्रायः सुवर्णरजतप्रचुरः, चित्रस्थूलरत्नहिरण्यः बहुविधानि बृहन्ति च रत्नानि हिरण्यानि च नाणकाश्च यस्मिन् सः, दीर्घामप्यापदम् अनायतिं चिरकालानुवृत्तमपि दुर्भिक्षं धनानागमं च, सहेत, अर्थात् कोशः । इति कोशसम्पत् ।

दण्डसम्पदमाह— **पितृपैतामह** इति । पितृपितामहक्रमायातः, अत एव नित्यः स्थिरसेवी, वश्यो वशवर्ती, तुष्टभृतपुत्रदारः सन्तृप्ता यथा स्युस्तथा राज्ञा पुष्टाः पुत्रा दाराश्च यस्य सः, प्रवासेष्वपि सम्पादितः प्रयाणकेष्वपि यथार्हभोगसम्पन्नः कृतः, सर्वत्राप्रतिहतः क्वचिदप्यप्राप्तभङ्गः, दुःखसहः प्रवासादिक्लेशसहः, बहुयुद्धः बहुसमरपरिचितः, सर्वयुद्धप्रहरणविद्याविशारदः सर्वविधेषु युद्धेषु आयुधविद्यासु च प्रवीणः, सहवृद्धिक्षयिकत्वाद् अद्वैध्यः स्वामिवृद्धौ वृद्धिः स्वामिक्षये क्षय इति स्वामिसमानवृद्धिक्षयत्वाद्धेतोर्द्वैध्यरहितः भेदरहितः अभेद्य इत्यर्थः, क्षत्रप्रायः क्षत्रियप्रचुरः, इति दण्डसम्पत् ।

मित्रसम्पदमाह — **पितृपैतामहमिति** । तथाभूतं, नित्यम् अकृतकं, वश्यम् , अद्वैध्यं, महत् प्रभुमन्त्रोत्साहशक्तियुक्तं, लघुसमुत्थं काले सद्यस्साहाय्योद्यतम् , इति मित्रसम्पत् ।

मित्रसम्पत्प्रसङ्गादमित्रसम्पदमाह — **अराजबीजीत्यादि** । अराजबीजी अराजवंश्यः, लुब्धः, क्षुद्रपरिषत्कः दुष्टपरिवारः, विरक्तप्रकृतिः, अन्यायवृत्तिरयथाशास्त्रानुष्ठानः, अयुक्तः अनुत्थानः, व्यसनी, निरुत्साहः, दैवप्रमाणः पुरुषकारशून्यः, यत्किञ्चनकारी अविवेकानुष्ठानः, अगतिः उच्छिन्नतायामशरणः, अननुबन्धः असहायः, क्लीबो धैर्यहीनः, नित्यापकारी च स्वजनपर-

अरिवर्जाः प्रकृतयः सप्तैताः स्वगुणोदयाः ।
उक्ताः प्रत्यङ्गभूतास्ताः प्रकृता राजसम्पदः ॥
सम्पादयत्यसम्पन्नाः प्रकृतीरात्मवान् नृपः ।
विवृद्धाश्चानुरक्ताश्च प्रकृतीर्हन्त्यनात्मवान् ॥
ततः स दुष्टप्रकृतिश्चातुरन्तोऽप्यनात्मवान् ।
हन्यते वा प्रकृतिभिर्याति वा द्विषतां वशम् ॥
आत्मवांस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा ।
नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते ॥

इति कौटलीयार्थशास्त्रे मण्डलयोनौ षष्ठाधिकरणे
प्रथमोऽध्यायः प्रकृतिसम्पदः,
आदितः सप्तनवतितमः ॥

जनयोः, इत्यरिसम्पत् । एवंभूतो हीति । यथोक्तचतुर्दशगुणयुक्तो हि, शत्रुः, समुच्छेत्तुं, सुखः अनायासेन शक्यः, भवति ॥

अरिवर्जा इति । चरमोक्तारिं राजत्वात् स्वामिप्रकृतावन्तर्भूतं वर्जयित्वा, एताः स्वाम्यादयः, सप्त, प्रकृतयः, स्वगुणोदयाः स्वस्वगुणयुक्ताः, उक्ताः । प्रत्यङ्गभूताः परस्परोपकारकतया परस्पराङ्गभूताः, ताः, प्रकृताः स्वस्वकर्मसु व्यापृताः सत्यो, राजसम्पदः, उच्यन्त इति शेषः ॥

सम्पादयतीति । आत्मवान् आत्मसम्पद्युक्तः, नृपः, असम्पन्नाः स्वस्वगुणसम्पद्रहिताः, प्रकृतीः, सम्पादयति तत्सम्पन्नाः करोति । अनात्मवान् नृपः, विवृद्धाश्च गुणसमृद्धाश्च, अनुरक्ताश्च, प्रकृतीः, हन्ति ॥

तत इति । तद्दोषेण, दुष्टप्रकृतिः दुष्टाः प्रकृतयो यस्य स तथाभूतः, अनात्मवान्, सः राजा, चातुरन्तोऽपि चतुस्समुद्रपर्यन्तभूमीश्वरोऽपि सन्, प्रकृतिभिर्हन्यते वा, द्विषतां, वशम् आयत्ततां, याति वा ॥

आत्मवांस्त्विति । प्रकृतिसम्पदा युक्तः, नयज्ञः, आत्मवांस्तु, अल्पदेशोऽपि स्वल्पभूम्यधिपोऽपि सन् , कृत्स्नां पृथिवीं जयत्येव, न हीयते ॥

इति कौटलीयार्थशास्त्रव्याख्यायां मण्डलयोनौ षष्ठाधिकरणे
प्रथमोऽध्यायः प्रकृतिसम्पदः,
आदितः सप्तनवतितमः ॥

९७. प्रक. शमव्यायामिकम् ।

शमव्यायामौ योगक्षेमयोर्योनिः ।

कर्मारम्भाणां योगाराधनो व्यायामः । कर्मफलोपभोगानां क्षेमाराधनः शमः ।

शमव्यायामयोर्योनिः षाड्गुण्यम् ।

क्षयः स्थानं वृद्धिरित्युदयास्तस्य ।

मानुषं नयापनयौ । दैवमयानयौ ।

शमव्यायामिकमिति सूत्रम् । कर्मफलोपभोगानां क्षेमसाधनं शमः व्यायामस्तु कर्मारम्भोपकरणानां कर्मयोगघटकः, तदुभयमस्मिन् प्रकरणे प्रतिपाद्यत इत्यर्थः । शक्तिसिद्धियुक्तेन सम्पन्नप्रकृतिना विजिगीषुणा मण्डलेषु षाड्गुण्यं प्रयोक्ष्यमाणेन योगः क्षेम इति द्वयमवश्यं विज्ञातव्यम् । योगक्षेमयोश्च कारणं शमव्यायामाविति तयोरिहाभिधानसङ्गतिः ।

शमव्यायामौ योगक्षेमयोर्योनिरिति । अपूर्वलाभो योगः तस्य व्यायामः कारणम् , आर्जितानां निर्विघ्नोपभोगः क्षेमः तस्य शमः कारणम् । यथासंख्यमिह न विवक्षितम् ।

कर्मारम्भाणामिति । आरभ्यमाणानां कर्मणां स्वविषये दुर्गादीनां परविषये सन्ध्यादीनां च, योगाराधनः योगः कर्मकरपुरुषसम्बन्धस्तदपेक्षितोपकरणसम्बन्धश्च तत्साधकः, व्यायामः व्यायामपदार्थः । कर्मफलोपभोगानां कर्मणां पूर्वोक्तानां फलं स्वविषये रत्नसारफल्गुकुप्यधान्यहिरण्यादि परविषये मित्रभूमिहिरण्यादि तस्य उपभोगाः दृष्टादृष्टार्था विनियोगाः तेषां, क्षेमाराधनः क्षेमः सर्वविघ्नविघातः तत्साधकः, शमः शमपदार्थः ।

शमव्यायामयोरिति । षाड्गुण्यं षड् गुणाः सन्धिविग्रहादयः, शमव्यायामयोः, योनिः कारणम् ।

क्षय इति । क्षयोऽपचयः, स्थानं तादवस्थ्यं, वृद्धिरुपचयः, इत्येते, तस्य षाड्गुण्यस्य, उदयाः फलानि ।

उदयानां प्रापकं च द्विरूपं कर्म प्रतीतं — मानुषं दैवमिति । तद्विभजते — **मानुषमिति** । मानुषं कर्म , नयापनयौ नयश्चापनयश्चेति द्विप्रकारम् । दैवम् , अयानयौ अयश्चानयश्चेति द्विप्रकारम् ।

दैवमानुषं हि कर्म लोकं यापयति। अदृष्टकारितं दैवम्। तस्मिन्निष्टेन फलेन योगोऽयः। अनिष्टेनानयः।

दृष्टकारितं मानुषम्। तस्मिन् योगक्षेमनिष्पत्तिर्नयः। विपत्तिरपनयः। तच्चिन्त्यम्। अचिन्त्यं दैवमिति।

राजा आत्मद्रव्यप्रकृतिसम्पन्नो नयस्याधिष्ठानं विजिगीषुः। तस्य समन्ततो मण्डलीभूता भूम्यनन्तरा अरिप्रकृतिः। तथैव भूम्येकान्तरा मित्रप्रकृतिः।

दैवमानुषं हीति। दैवमानुषात्मकं हि, कर्म, लोकं यापयति लोकयात्रां वर्तयति। **अदृष्टकारितं दैवमि**ति। अदृष्टेन धर्मात्मकेन वा अधर्मात्मकेन वा कारितं, दैवं भवति। तस्मिन् अर्थाद् धर्मादृष्टकारिते दैवे सति, **इष्टेन फलेन** अर्थलाभप्रियसङ्गमादिलक्षणेन, योगः, अयः इत्युच्यते। अनिष्टेन फलेनार्थहानिप्रियविरहादिलक्षणेन, योगः अनयशब्दवाच्यः, अर्थादधर्मादृष्टकारिते दैवे सति।

दृष्टकारितं मानुषमिति। प्रभुमन्त्रोत्साहशक्तिहेतुकषाड्गुण्यप्रयोगप्रभवं मानुषं कर्म। तस्मिन् सति, योगक्षेमनिष्पत्तिः अपूर्वलाभकर्मफलोपभोगयोः सिद्धिः, नयः नयपदार्थः अर्थात् सन्ध्यादिसम्यक्प्रयोगः। विपत्तिः अपनयः योगक्षेमानिष्पत्तिरपनयपदार्थः, अर्थात् सन्ध्याद्यसम्यक्प्रयोगः। **तच्चिन्त्यमि**ति। मानुषं कर्म प्रत्यक्षत्वाद् विमृश्यानुष्ठेयं योगक्षेमनिष्पत्तये विपत्तिपरिहाराय च। दैवम्, अचिन्त्यं विमष्टुमशक्यमप्रत्यक्षत्वात्। इतिशब्दः शमव्यायामकथनपरिसमाप्त्यर्थः।

अथ मण्डलं वक्तुं तदवधिभूतं विजिगीषुमाह—**राजे**ति। सः, **आत्मद्रव्यप्रकृतिसम्पन्नः** आत्मसम्पद्युक्तः अमात्यादिद्रव्यप्रकृतिपञ्चकसम्पद्युक्तश्च, तत्र महाकुलीनत्वादयो वृद्धोपदेशाचारत्वान्ता गुणाः पूर्वोक्ता आत्मसम्पत्। नयस्य सन्ध्यादिसम्यक्प्रयोगलक्षणस्य, अधिष्ठानम् आश्रयः, विजिगीषुः सामदानाद्युपायैः शत्रून् विजेतुमिच्छुः। तस्य विजिगीषोः, समन्ततः, मण्डलीभूता, भूम्यनन्तरा स्वभूम्यव्यवहिता भूमिः अव्यवहिता भूमी वा अर्थादव्यवहितभूम्यधिपतिः, अरिप्रकृतिः। तथैव, भूम्येकान्तरा देशेनैकेन व्यवहिता एकभूव्यवहिता भूमी वा, मित्रप्रकृतिः।

अरिसम्पद्युक्तः सामन्तः शत्रुः । व्यसनी यातव्यः । अनपाश्रयो दुर्बलाश्रयो वोच्छेदनीयः । विपर्यये पीडनीयः कर्शनीयो वा । इत्यरिविशेषाः ।

तस्मान्मित्रमरिमित्रं मित्रमित्रम् अरिमित्रमित्रं चानन्तर्येण भूमीनां प्रसज्यते पुरस्तात् । पश्चात् पार्ष्णिग्राह आक्रन्दः पार्ष्णिग्राहासार आक्रन्दासार इति ।

भूम्यनन्तरः प्रकृत्यमित्रः तुल्याभिजनः सहजः । विरुद्धो विरोधयिता वा कृत्रिमः ।

अथ शत्रुभेदाश्चत्वार उच्यन्ते — **अरिसम्पद्युक्त** इति । अरिसम्पदा 'अराजबीजी'त्यादिना पूर्वमुक्तया युक्तः, सामन्तः शत्रुः । **व्यसनी यातव्य** इति । शत्रुः मृगयादुर्भिक्षादिव्यसनवान् अभिषेणयितव्यः । **अनपाश्रयः** दुर्गमित्रहीनः, दुर्बलाश्रयो वा दुर्बलदुर्गमित्रो वा शत्रुः, उच्छेदनीयः । **विपर्यये पीडनीयः कर्शनीयो** वेति । अनपाश्रयत्वविपर्यये मध्यबलदुर्गमित्राश्रयत्वे पीडनीयोऽपकुर्वन्, दुर्बलाश्रयत्ववैपरीत्ये बलवदाश्रयत्वे कर्शनीयः धनदण्डकृशतां नेतव्यः । इति चत्वारः, **अरिविशेषाः** ।

तस्मादित्यादि । शत्रोरनन्तरं, मित्रम् । तदनन्तरम् अरिमित्रं, तदनन्तरं मित्रमित्रं, तदनन्तरम् अरिमित्रमित्रं च, आनन्तर्येण अव्यवधानेन, भूमीनां, प्रसज्यते, पुरस्ताद् विजिगीषोररिमभियोक्तुं प्रवृत्तस्याग्रतः । त एते एवंसंज्ञकाः पुरस्तात् पञ्च राजानः । पश्चात् किंसंज्ञका इत्याह — **पश्चादि**त्यादि । विजिगीषोः पृष्ठतः, पार्ष्णिग्राहः अनन्तरः पार्ष्णिग्राहसंज्ञः शत्रुमित्रं विजिगीषोः पार्ष्णिं शत्रुहिताय गृह्णातीति व्युत्पत्तेः, आक्रन्दः पार्ष्णिग्राहानन्तर आक्रन्दसंज्ञो विजिगीषुमित्रम् 'आगत्य पार्ष्णिग्राहं मे वारये'त्याक्रन्द्यत इति व्युत्पत्तेः, पार्ष्णिग्राहासार आक्रन्दानन्तरस्तत्संज्ञः अरिमित्रमित्रम् अनुबलदानेन पार्ष्णिग्राहमासरतीति व्युत्पत्तेः, आक्रन्दासारः पार्ष्णिग्राहासारानन्तरस्तत्संज्ञः विजिगीषुमित्रमित्रम् । इति एवं चत्वारः प्रसज्यन्ते । मध्ये च विजिगीषुरेक इत्याहत्य दशराजमण्डलम् ।

अथ शत्र्ववान्तरभेदमाह — **भूम्यनन्तर** इत्यादि । प्रकृत्यमित्रस्तुल्याभिजन इति द्वौ सहजशत्रू । प्रकृत्यमित्रः स्वभूम्यनन्तरः, तुल्याभिजनः समानकुलोत्पन्नो दायादः । अपराद्धोऽपराधयिता च कृत्रिमः शत्रुः ।

भूम्येकान्तरं प्रकृतिमित्रं मातापितृसम्बन्धं सहजं, धनजीवितहेतोराश्रितं कृत्रिममिति ।

अरिविजिगीष्वोर्भूम्यनन्तरः संहतासंहतयोरनुग्रहसमर्थो निग्रहे चासंहतयोर्मध्यमः ।

अरिविजिगीषुमध्यानां बहिः प्रकृतिभ्यो बलवत्तरः संहतासंहतानामरिविजिगीषुमध्यमानामनुग्रहे समर्थो निग्रहे चासंहतानामुदासीनः । इति प्रकृतयः ।

विजिगीषुर्मित्रं मित्रमित्रं वास्य प्रकृतयस्तिस्रः । ताः पञ्चभिरमात्यजनपददुर्गकोशदण्डप्रकृतिभिरेकैकशः संयुक्ता मण्डलमष्टादशकं भवति । अनेन मण्डलपृथक्त्वं व्याख्यातम् अरिमध्यमोदासीनानाम् ।

मित्रावान्तरभेदमाह — **भूम्येकान्तरमित्यादि** । स्वभूम्येकव्यवहितं प्रकृतिमित्रमेकं सहजमित्रं, मातापितृसम्बन्धं मातुलपैतृष्वसेयादिरूपमपरं सहजमित्रम् । धनार्थमुपजीवनार्थं चाश्रितं कृत्रिमं मित्रम् ।

मध्यममाह — **अरिविजिगीष्वोर्भूम्यनन्तर इत्यादि** । तयोर्भूम्यव्यवहितः विदिग्भागाश्रितः, तयोः कृतसन्धिकयोर्विगृहीतयोश्चानुग्रहसमर्थः, विगृहीतयोर्निग्रहे च समर्थो मध्यमः । तस्य भूम्यनन्तरत्वेन शत्रुत्वेऽपि भिन्नलक्षणत्वान्मध्यमसंज्ञा बोद्धव्या ।

उदासीनमाह — **अरिविजिगीषुमध्यानामित्यादि** । अर्यादीनां प्रकृतिभ्यो बाह्यः, बलवतो मध्यमादपि दण्डकोशादितो बलवत्तरः, तेषां संहतानां विगृहीतानां चानुग्रहशक्तः, विगृहीतानां निग्रहे च शक्त उदासीनाख्यः । इति प्रकृतयः एवं द्वादश राजप्रकृतय उक्ताः ।

अथ चतुर्मण्डलसंक्षेपमाह — **विजिगीषुरित्यादि** । अयमर्थः — विजिगीषुस्तस्य मित्रं मित्रमित्रमिति तिस्रः प्रकृतयः । तासां प्रत्येकममात्यादिप्रकृतिपञ्चकसंयोगेन षट्कत्रयसम्पत्तौ अष्टादशावयवकं मण्डलमेकं विजिगीषुसम्बद्धं जायते । तथा अरिस्तस्य मित्रं मित्रमित्रमिति तिसृणां प्रकृतीनां प्रत्येकममात्यादिपञ्चकयोगेन षट्कत्रयसम्पत्तावष्टादशकमरिसम्बद्धं मण्डलं द्वितीयं जायते । एवं मध्यमसम्बद्धं तृतीयम् उदासीनसम्बद्धं चतुर्थं च मण्डलमूह्यमिति ।

एवं चतुर्मण्डलसङ्क्षेपः । द्वादश राजप्रकृतयः, षष्टिर्द्रव्यप्रकृतयः, सङ्क्षेपेण द्विसप्ततिः ।

तासां यथास्वं सम्पदः ।

शक्तिः सिद्धिश्च । बलं शक्तिः, सुखं सिद्धिः ।

शक्तिस्त्रिविधा — ज्ञानबलं मन्त्रशक्तिः, कोशदण्डबलं प्रभुशक्तिः, विक्रमबलमुत्साहशक्तिः ।

एवं सिद्धिस्त्रिविधैव मन्त्रशक्तिसाध्या मन्त्रसिद्धिः, प्रभुशक्तिसाध्या प्रभुसिद्धिः, उत्साहशक्तिसाध्या उत्साहसिद्धिरिति ।

ताभिरभ्युच्चितो ज्यायान् भवति । अपचितो हीनः । तुल्यशक्तिः समः । तस्माच्छक्तिं सिद्धिं च घटेतात्मन्यावेशयितुम् । साधारणो वा द्रव्यप्रकृतिष्वानन्तर्येण शौचवशेन वा । दूष्यामित्राभ्यां वापक्रष्टुं यतेत ।

एतावतोक्तं पिण्डीकृत्याह — **एवं चतुर्मण्डलसंक्षेप** इत्यादि । **द्विसप्ततिरिति** राजप्रकृतयः शुद्धा द्वादश अमात्यादिद्रव्यप्रकृतियुक्ताः षष्टिरित्याहृत्य ।

तासां यथास्वं सम्पद इति । प्रकृतीनां यथायथं सम्पदः, पूर्वमुक्ता इति शेषः ।

शक्तिसिद्धी आह — **शक्तिः सिद्धिश्चे**त्यादि ।

शक्तिस्त्रिविधेत्यादि । ज्ञानबलं ज्ञानयोगक्षेमसाधनसामर्थ्यं, मन्त्रशक्तिरित्येकः प्रकारः । कोशदण्डबलं कोशदण्डयोगक्षेमसाधनसामर्थ्यं, प्रभुशक्तिरिति द्वितीयः । विक्रमबलं विक्रमयोगक्षेमसाधनसामर्थ्यम्, उत्साहशक्तिरिति तृतीयः ।

मन्त्रशक्तिप्रभुशक्त्युत्साहशक्तिसाध्याः क्रमान्मन्त्रसिद्धिः प्रभुसिद्धिरुत्साहसिद्धिरिति त्रिविधाः सिद्धय इत्याह — **एवं सिद्धिस्त्रिविधैवे**त्यादि ।

ताभिरिति । शक्तिभिः, अभ्युच्चितः उपचितः, ज्यायान् श्रेष्ठः । अपचितः, हीनः अधमः । तुल्यशक्तिः अन्यूनानधिकशक्तिः, समः मध्यमः । तस्मात् शक्तिसिद्ध्योः प्राधान्यात्, शक्तिं सिद्धिं च आत्मनि, आवेशयितुं वर्धयितुं, घटेत व्याप्रियेत । **साधारणो वेति** । आत्मनि तथा घटमानस्तद्वशहितश्चेत्, द्रव्यप्रकृतिषु अमात्यादिषु, आनन्तर्येण पूर्वममात्ये ततो जनपदे ततो

यदि वा पश्येत् — 'अमित्रो मे शक्तियुक्तो वाग्दण्डपारुष्यार्थदूषणैः प्रकृतीरुपहनिष्यति, सिद्धियुक्तो वा मृगयाद्यूतमद्यस्त्रीभिः प्रमादं गमिष्यति, स विरक्तप्रकृतिरुपक्षीणः प्रमत्तो वा साध्यो मे भविष्यति, विग्रहाभियुक्तो वा सर्वसन्दोहेनैकस्थो दुर्गस्थो वा स्थास्यति, स संहतसैन्यो मित्रदुर्गवियुक्तः साध्यो मे भविष्यति, बलवान् वा राजा परतः शत्रुमुच्छेत्तुकामस्तमुच्छिद्य न मामुच्छिन्द्यादि'ति 'बलवता प्रार्थितस्य मे विपन्नकर्मारम्भस्य वा साहाय्यं दास्यति मध्यमलिप्सायां चे'ति, एवमादिषु कारणेष्वमित्रस्यापि शक्तिं सिद्धिं चेच्छेत् ॥

नेमिमेकान्तरान् राज्ञः कृत्वा चानन्तरानरान् ।
नाभिमात्मानमायच्छेन्नेता प्रकृतिमण्डले ॥

दुर्ग इति क्रमेण, शौचवशेन वा क्रमासम्भवे शुचित्ववशेन वा, आवेशयितुं घटेत । द्रव्यप्रकृतिष्वप्यावेशनासामर्थ्ये आह — **दूष्यामित्राभ्यां वापकर्षं यतेतेति** । दूष्यमुखेन शत्रुमुखेन वा, अपकर्षं शत्रोः शक्तिं सिद्धिं च न्यूनयितुं व्यवस्येत् ।

अपकर्षणापवादमाह — **यदिवा पश्येदित्यादि** । अयमर्थः — मम शत्रुः शक्तियुक्तश्चेत् तदा दर्पाद् वाक्पारुष्यदण्डपारुष्यार्थदूषणैरमात्यादीन् उपहनिष्यति, सुखयुक्तश्चेत् मृगयाद्यूतादिव्यसनैः प्रमत्तो भविष्यति, स विरक्तप्रकृतिरसहायः प्रमत्तश्च जय्यो मे भविष्यति, सर्वसैन्यसमुदायेन सह मया विग्रहार्थमभियुक्तः शक्तिगर्वादेकाकी दुर्गस्थो वा स्थास्यति, स संहतसैन्यो मित्रदुर्गरहितः साध्यो मे भविष्यति, बलवान् वा स राजा परदेशे शत्रुमुच्छेत्तुकामस्तमुच्छिद्य मां नोच्छिन्द्यात्, इति यदि मन्येत, बलवता प्रतियुध्यमानस्य कर्मारम्भेषु विपन्नेषु मध्यमे चापेक्ष्यमाणे साहाय्यं करिष्यति इति च यदि मन्येत, एवञ्जातीयेषु निमित्तेषु शत्रोरपि शक्तिं सिद्धिं च इच्छेदेव, न तु तां विहन्यादिति ॥

अध्यायप्रान्ते श्लोकमाह — **नेमिमित्यादि** । नेता द्वादशराजमण्डलनायको विजिगीषुः, एकान्तरान् स्वभूम्येकव्यवहितान् मित्रभूतान्, राज्ञः, नेमिं कृत्वा, अनन्तरान् राज्ञः, अरान् कृत्वा अरस्थाने कल्पयित्वा, आत्मानं, नाभिम्, आयच्छेत् कल्पयेत् । कुत्र, प्रकृतिमण्डले राजमण्डलात्मके चक्रे ॥

मध्ये ह्युपहितः शत्रुर्नेतुर्मित्रस्य चोभयोः ।
उच्छेद्यः पीडनीयो वा बलवानपि जायते ॥

इति कौटलीयार्थशास्त्रे मण्डलयोनौ षष्ठाधिकरणे द्वितीयोऽध्यायः शमव्यायामिकम्, आदितोऽष्टनवतितमः ।

एतावता कौटलीयस्यार्थशास्त्रस्य मण्डलयोनिः षष्ठमधिकरणं समाप्तम् ॥

मध्ये ह्रीत्यादि । बलवानपि शत्रुः, विजिगीषोर्मित्रस्येत्युभयोर्मध्ये, उपहितः निवेशितश्चेत्, उच्छेद्यः पीडनीयो वा जायते ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
इत्थं मण्डलयोन्याख्यं षष्ठाधिकरणं गतम् ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य **श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय-**गणपतिशास्त्रिणः** कृतिषु **कौटलीयार्थशास्त्र**व्याख्यायां **श्रीमूला**ख्यायां **मण्डलयोनौ** षष्ठाधिकरणे द्वितीयोऽध्यायः शमव्यायामिकम्, आदितोऽष्टनवतितमः ।
मण्डलयोनिः षष्ठमधिकरणं **समाप्तम्** ॥

षाड्गुण्यं—सप्तममधिकरणम् ।

९८, ९९. प्रक. षाड्गुण्यसमुद्देशः, क्षयस्थानवृद्धिनिश्चयश्च ।

षाड्गुण्यस्य प्रकृतिमण्डलं योनिः ।

सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम् इत्याचार्याः ।

द्वैगुण्यम् इति वातव्याधिः, सन्धिविग्रहाभ्यां हि षाड्गुण्यं सम्पद्यत इति ।

षाड्गुण्यमेवैतदवस्थाभेदाद् इति कौटल्यः ।

तत्र पणबन्धः सन्धिः, अपकारो विग्रहः, उपेक्षणमासनम्,

पूर्वस्मिन्नधिकरणे 'शमव्यायामयोर्योनिः षाड्गुण्यम्' इत्युक्तम् । तदिदानीं प्रपञ्चयितुमिदमधिकरणमारभ्यते षाड्गुण्यं नाम । तत्र

षाड्गुण्यसमुद्देश इति प्रथमं सूत्रम् । षाड्गुण्यस्य समुद्देशः संक्षेपः इति सूत्रार्थः । अथवा, षाड्गुण्यस्य समुद्देशः पूर्वपक्षनिराकरणपूर्वं स्वपक्षस्थापनमित्यर्थः । 'द्वैगुण्यमिति वातव्याधिः' इति हि पूर्वपक्षं निराकृत्य 'षाड्गुण्यमेवैतदवस्थाभेदादिति कौटल्यः' इत्येवं स्वपक्षः स्थाप्यते । तदभिधीयत इति सूत्रार्थः । पूर्वस्मिन् प्रकरणे दैवमानुषयोर्मानुषं चिन्त्यमुक्तम् । चिन्तनप्रकारस्त्वत्र प्रदर्श्यत इति सम्बन्धः ।

षाड्गुण्यस्य प्रकृतिमण्डलं योनिरिति । सन्ध्यादीनां षण्णां गुणानां स्वाम्यादिप्रकृतिसप्तकं द्वादशराजमण्डलं च योनिः ।

सन्धीत्यादि । सन्धिर्विग्रह आसनं यानम् आश्रयो द्वैधीभाव इत्येवं षड् गुणाः इत्याचार्याः, वदन्ति ।

द्वैगुण्यमिति । द्वावेव गुणौ सन्धिविग्रहलक्षणौ इति वातव्याधिः । तत्र हेतुः—**सन्धिविग्रहाभ्यां हि षाड्गुण्यं सम्पद्यत इतीति** । सन्धिविग्रहौ हि षड्गुणरूपतां प्रतिपद्येते—आसनादयश्चत्वारः सन्धिविग्रहयोरन्तर्भवन्ति । तत्रासनसंश्रयौ सन्धौ, यानं विग्रहे, द्वैधीभाव उभयोरित्यतः सन्धिविग्रहौ द्वावेव प्राधान्याद् गुणाविति ।

स्वमतमाह — **षाड्गुण्यमेवैतदवस्थाभेदादिति कौटल्य इति** । एतयोः सन्धिविग्रहयोरवस्थाभेदेन स्वरूपभेदात् षडेव गुणा गणनीया इति कौटल्यमतम् ।

तान् निरूपयति — **तत्रेति** । तेषु मध्ये, पणबन्धः सन्धिः 'एवमस्य

अभ्युच्चयो यानं, परार्पणं संश्रयः, सन्धिविग्रहोपादानं द्वैधीभाव इति षड् गुणाः ।

परस्माद्धीयमानः संदधीत । अभ्युच्चीयमानो विगृह्णीयात् । न मां परो नाहं परमुपहन्तुं शक्तः इत्यासीत । गुणातिशययुक्तो यायात् । शक्तिहीनः संश्रयेत । सहायसाध्ये कार्ये द्वैधीभावं गच्छेत् ।

कार्यस्य करणे भूमिकोशदण्डान्यतमं दास्यामी'त्युक्त्वा तस्य सत्यशपथादिना दृढीकरणं सन्धिपदार्थः । **अपकारो विग्रह** इति । शत्रुं प्रति द्रोहाचरणं विग्रहपदार्थः । **उपेक्षणमासनमि**ति । सन्ध्याद्यप्रयोग आसनम् । **अभ्युच्चयो यानमि**ति । शक्तिदेशकालाद्यतिशययोगोऽभ्युच्चयः स यानहेतुत्वाद् यानमित्युच्यते कारणे कार्योपचारात् । **परार्पणं संश्रय** इति । बलवतेऽन्यस्मै राज्ञे स्वात्मस्वपुत्रस्वद्रव्याणामर्पणं संश्रयपदार्थः । **सन्धिविग्रहोपादानं द्वैधीभाव** इति । सन्धिविग्रहयोरुभयोरुपादानं द्वैधीभावः । इदं तु बोद्धव्यम् — उभाभ्यां शत्रुभ्यां सह वाङ्मात्रेणात्मसमर्पणं कृत्वा गूढचित्तवृत्तित्वेन वर्तनमेको द्वैधीभावः । यथा कामन्दकेन व्याख्यातः —

"बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्पयन् ।
द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः ॥" (११, २३)

इति । शत्रुणैकेन सह प्रकटं सन्धानं प्रच्छन्नं द्रोहाचरणं चेत्येवं सन्धिविग्रहसमुदायानुष्ठानमपरो द्वैधीभावः । अयमिह कण्ठोक्तः । प्रथमस्तु 'सहायसाध्ये कार्ये द्वैधीभावं गच्छेद्' इति वक्ष्यमाणग्रन्थेन सूचित इति । इति षड् गुणाः, निरूपिता इति शेषः ।

अथ गुणानां प्रयोगविषयमाह — **परस्मादि**ति । शत्रोः, हीयमानः, सन्दधीत सन्धिं कुर्यात्, परेण । अभ्युच्चीयमानः उपचीयमानः, **विगृह्णीयात्** शत्रुविषये द्रोहमाचरेत् । **न मां पर** इत्यादि । शत्रुः माम् उपहन्तुं **न शक्तः,** अहं परमुपहन्तुं न शक्तः, इति, मन्यमान इति शेषः । आसीत परमुपेक्षेत । **गुणातिशययुक्तो यायादि**ति । अभियास्यत्कर्माधिकरणोक्तः शक्तिदेशकालादिर्गुणातिशयः तद्युक्तः अभिषेणनं कुर्यात् । **शक्तिहीन** इति । सः, संश्रयेत प्रबलमाश्रयेत । **सहायसाध्य** इत्यादि । कार्ये सहायसापेक्षे सति, द्वैधीभावं, गच्छेद् अनुतिष्ठेत् ।

इति गुणावस्थापनम् ।

तेषां यस्मिन् वा गुणे स्थितः पश्येत् 'इहस्थः शक्ष्यामि दुर्गसेतुकर्मवणिक्पथशून्यनिवेशखनिद्रव्यहस्तिवनकर्माण्यात्मनः प्रवर्तयितुं परस्य चैतानि कर्माण्युपहन्तुम्' इति तमातिष्ठेत्, सा वृद्धिः ।

'आशुतरा मे वृद्धिर्भूयस्तरा वृद्ध्युदयतरा वा भविष्यति विपरीता परस्य' इति ज्ञात्वा परवृद्धिमुपेक्षेत । तुल्यकालफलोदयायां वृद्धौ सन्धिमुपेयात् ।

यस्मिन् वा गुणे स्थितः स्वकर्मणामुपघातं पश्येन्नेतरस्य तस्मिन्न तिष्ठेद्, एष क्षयः ।

इति गुणावस्थापनमिति । एवं विषयभेदेन षड् गुणाः स्थापिताः । इत्थं षाड्गुण्यसमुद्देशो निरूपितः ।

क्षयस्थानवृद्धिनिश्चय इति सूत्रम् । क्षयः कोशदण्डयोरल्पत्वं स्थानं साम्यावस्था वृद्धिर्बाहुल्यम् एषां निश्चयः स्वरूपावधारणम् उच्यत इति सूत्रार्थः । गुणा ह्युक्ताः, तेषां फलभूताः क्षयस्थानवृद्धय इह निरूप्यन्ते ।

तत्र चरमनिर्दिष्टापि वृद्धिः प्राधान्यात् प्रथमं निरूप्यते— तेषां यस्मिन् वेत्यादि । अयमर्थः — गुणानां मध्ये यं गुणमाश्रितो मन्येत — 'अहमस्मिन् गुणे स्थितो दुर्गकर्मसेतुकर्मादीन्यात्मनः प्रवर्तयितुं परस्य तान्युपहन्तुं च शक्तो भविष्यामि' इति, तं गुणमनुतिष्ठेत् । तच्च गुणानुष्ठानं वृद्धिनिमित्तत्वादुपचाराद् वृद्धिशब्दितमिति ।

परवृद्ध्युपेक्षाया विषयमाह — आशुतरा मे वृद्धिरित्यादि । वृद्धिर्मे शीघ्रं भविष्यति परस्य चिराद् भविष्यतीति यदि मन्येत स एको विषयः । यौगपद्येऽपि वृद्धिर्मेऽधिकतरा परस्याल्पा भविष्यतीति यदि मन्येत सोऽपरो विषयः । समापि मे वृद्धिर्वृद्ध्यनुबन्धिनी भविष्यति परस्य तु वृद्ध्यननुबन्धिनीति यदि मन्येत सोऽन्यो विषयः । एषु विषयेषु परस्य वृद्धिं नोपहन्तुं यतेत । तुल्यकालफलोदयायामित्यादि । परस्यात्मनश्च वृद्धिस्तुल्यकाला तुल्यफलोदया च भविष्यतीति चेन्मन्येत, तदा सन्धिमनुतिष्ठेत् ।

यद्गुणानुष्ठाने स्वकर्मोपघातं परकर्मानुपघातं च पश्येत्, तं गुणं नानुतिष्ठेत् । तदनुष्ठानं च क्षयनिमित्तत्वादुपचारात् क्षय इत्याह — यस्मिन् वा गुणे स्थितः स्वकर्मणामुपघातमित्यादि ।

चिरतरेणाल्पतरं वृद्ध्युदयतरं वा क्षेष्ये, विपरीतं परः इति ज्ञात्वा क्षयमुपेक्षेत ।

तुल्यकालफलोदये वा क्षये सन्धिमुपेयात् ।

यस्मिन् वा गुणे स्थितः स्वकर्मवृद्धिं क्षयं वा नाभिपश्येदेतत् स्थानम् ।

ह्रस्वतरं वृद्ध्युदयतरं वा स्थास्यामि विपरीतं पर इति ज्ञात्वा स्थानमुपेक्षेत ।

तुल्यकालफलोदये वा स्थाने सन्धिमुपेयाद् इत्याचार्याः ।

नैतद् विभाषितम् इति कौटल्यः ।

यदि वा पश्येत् — 'सन्धौ स्थितो महाफलैः स्वकर्मभिः पर-

'सुदीर्घतरकालातिक्रमानन्तरं मे क्षयो भविष्यति शत्रोः शीघ्रमि'ति वा, 'अल्पो मे क्षयो भविष्यति शत्रोर्बहुतर' इति वा, 'मम क्षयो वृद्ध्युदयानुबन्धी शत्रोस्तु क्षयानुबन्धी'ति वा यदि मन्येत, एषु त्रिषु विषयेष्वात्मनो जायमानं क्षयमुपेक्षेत न तु तदुपघाताय यत्नं कुर्यादित्याह — **चिरतरेणाल्पतरमि**त्यादि ।

तुल्यकालफलोदये वेत्यादि । शत्रोरात्मनश्च क्षयस्तुल्ये काले भविष्यति तुल्यफलोदयश्चेति यदि पश्येत्, तदा सन्धिमनुतिष्ठेत् ।

यद्गुणानुष्ठाने स्वस्य वृद्धिं क्षयं वा न पश्येत्, तदिदं तादवस्थ्यहेतुत्वात् स्थानमित्युच्यत इत्याह — **यस्मिन् वा गुणे स्थितः स्वकर्मवृद्धि**मित्यादि ।

ह्रस्वतरमित्यादि । 'अदीर्घकालं मे स्थानं भविष्यति परस्य दीर्घकालमि'ति वा, 'मम स्थानं वृद्ध्यनुबन्धि भविष्यति परस्य तु क्षयानुबन्धि' इति वा, यदि मन्येत, तदा स्थानमुपेक्षेत ।

तुल्यकालफलोदये वेति । परेण तुल्यकाले तुल्यफले च सति, स्थाने, सन्धिम्, उपेयात् कुर्यात् । **इत्याचार्या** इति । उक्तमिदमर्थजातम् आचार्या ऊचुरित्यर्थः ।

नैतद् विभाषितमिति कौटल्य इति । इदमाचार्यैर्विशेषेण न भाषितम् इति कौटल्यः, मन्यते ।

स्वयं तु विशेषमाह— **यदि वा पश्येदि**त्यादि । एषोऽर्थः— सन्धौ क्रियमाणे महाफलैः स्वकर्मभिर्दुर्गसेतुखनिवणिक्पथादिभिः परकर्मणामुपघातं

कर्माण्युपहनिष्यामि, महाफलानि वा स्वकर्माण्युपभोक्ष्ये, परकर्माणि वा, सन्धिविश्वासेन वा योगोपनिषत्प्रणिधिभिः परकर्माण्युपहनिष्यामि, सुखं वा सानुग्रहपरिहारसौकर्यं फललाभभूयस्त्वेन स्वकर्मणां परकर्मयोगावहं जनमास्रावयिष्यामि, बलिनातिमात्रेण वा संहितः परः स्वकर्मोपघातं प्राप्स्यति, येन वा विगृहीतो मया सन्धत्ते तेन अस्य विग्रहं दीर्घं करिष्यामि, मया वा संहितस्य मद्द्वेषिणो जनपदं पीडयिष्यति, परोपहतो वास्य जनपदो मामागमिष्यति ततः कर्मसु वृद्धिं प्राप्स्यामि, विपन्नकर्मारम्भो वा विषमस्थः परः कर्मसु न मे विक्रमेत परतः प्रवृत्तकर्मारम्भो वा ताभ्यां संहितः कर्मसु वृद्धिं प्राप्स्यामि, शत्रुप्रतिबद्धं वा शत्रुणा सन्धिं कृत्वा मण्डलं भेत्स्यामि, भिन्नमवा-

---

करिष्यामि — अर्थात् स्वकर्मोत्पादितानां प्रभूतानां साराणां च वस्तूनां परविषये नयनेन परकर्मजनितवस्तूनां मूल्यहानिमुत्पादयिष्यामि — इति चेन्मन्येतेत्येको विषयः, अथवा सन्धिवशाद् महाफलानि कर्माण्यनुभविष्यामीति चेन्मन्येतेति द्वितीयः । यद्वा सन्धिवशाद् महाफलानि परस्य कर्माण्यनुभविष्यामीति चेन्मन्येतेति तृतीयो विषयः, अथवा सन्धिना परस्य विश्वासं जनयित्वा गूढपुरुषतीक्ष्णादिप्रयोगलक्षणैर्योगप्रणिधानैर्विषधूमाम्बुदूषणादिलक्षणैरुपनिषत्प्रयोगैश्च महाफलानां परकीयकर्मणामुपघातं करिष्यामीति चेन्मन्येतेति चतुर्थो विषयः, अथवा सन्धिविश्वासेन शत्रुकर्मानुष्ठानकारिणं जनं बीजदानाद्युपकारलक्षणानुग्रहेण करमोक्षलक्षणपरिहारेण च कृष्यादिसौकर्यातिशययुक्तं कृत्वा फललाभेन च भूयसा योजयित्वा स्वकर्मनियोगार्थेऽनायासादाकक्ष्यामीति चेन्मन्येतेति पञ्चमो विषयः, अथवा बलवता प्रवृद्धकोशेन स्वशत्रुणा कृतसन्धिः शत्रुः तस्मै अतिमात्रधनार्पणेन क्षीणकोशो भूत्वा स्वकर्मोपघातं प्राप्स्यतीति चेन्मन्येतेति षष्ठो विषयः, अथवा येन विग्रहमनुष्ठातुं मया सह सन्धिं करोति तेन सहास्य विग्रहं चिरकालाविच्छिन्नमापादयिष्यामीति चेन्मन्येतेति सप्तमो विषयः, अथवा मया कृतसन्धेर्मच्छत्रोर्जनपदमयं पीडयिष्यतीति चेन्मन्येतेति अष्टमो विषयः, अथवा परोपहतोऽस्य जनपदोऽनेन सहेदानीं सन्धिकरणे मम वशं गमिष्यति तेन मे कर्मवृद्धिर्भविष्यतीति चेन्मन्येतेति नवमो विषयः, अथवा उपहतदुर्गादिकार्यारम्भोऽयं शत्रुः सङ्कटस्थः, अन्यसाधनेन च प्रवृत्तकार्यारम्भोऽसौ सङ्कटस्थः, आभ्यां सन्धिकरणे कर्मसु विघातो मे न भविष्यति प्रत्युत वृद्धिर्भविष्यतीति चेन्मन्येतेति दशमैकादशौ

स्यामि, दण्डानुग्रहेण वा शत्रुमुपगृह्य मण्डललिप्सायां विद्वेषं ग्राहयिष्यामि, विद्विष्टं तेनैव घातयिष्यामि' इति सन्धिना वृद्धिमातिष्ठेत् ।

यदि वा पश्येत्—'आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः शैलवनननदीदुर्गैकद्वारारक्षो वा शक्ष्यति पराभियोगं प्रतिहन्तुमिति, विषयान्ते दुर्गमविषह्यमपाश्रितो वा शक्ष्यामि परकर्माण्युपहन्तुमिति, व्यसनपीडोपहतोत्साहो वा परः संप्राप्तकर्मोपघातकाल इति, विगृहीतस्यान्यतो वा शक्ष्यामि जानपदमपवाहयितुम्' इति विग्रहे स्थितो वृद्धिमातिष्ठेत् ।

यदि वा मन्येत—'न मे शक्तः परः कर्माण्युपहन्तुं, नाहं तस्य कर्मोपघाती वा, व्यसनमस्य, श्ववराहयोरिव कलहे वा स्वकर्मानुष्ठानपरो वा वर्धिष्ये' इत्यासनेन वृद्धिमातिष्ठेत् ।

विषयौ, अथवा शत्रुणा भेदमप्राप्तं मण्डलं शत्रुणा सह सन्धिं कृत्वा भेत्स्यामीति चेन्मन्येतेति द्वादशो विषयः, भिन्नं च शत्रुं साधयिष्यामीति चेन्मन्येतेति त्रयोदशो विषयः, अथवा सैन्यसाह्यदानेन शत्रुं वशयित्वा मण्डललाभार्थं यतमाने तस्मिन् मण्डलस्य तेन सह द्वेषं जनयिष्यामीति चेन्मन्येतेति चतुर्दशो विषयः, द्विष्टं च तेनैव घातयिष्यामीति चेन्मन्येतेति पञ्चदशो विषयः । एषु पञ्चदशसु विषयेष्वन्येषु चैवञ्जातीयेषु सन्ध्यनुष्ठानेनात्मनो वृद्धिं सम्पादयेदिति ।

इत्थं सन्धिकरणेन वृद्धिरुक्ता । विग्रहेण वृद्धिमाह—यदि वा पश्येदित्यादि । आयुधजीविक्षत्रियादिप्रचुरः कृषिकर्तृकारयितृश्रेणीबहुलः शैलदुर्गवनदुर्गनदीदुर्गयुक्तः एकद्वारप्रवेशनिर्गमतयानायासरक्ष्यो वा मे जनपदः पराभियोगं प्रतिहन्तुं शक्तो भविष्यतीति चेन्मन्येत, अथवा विषयसीमायाम् अविनाश्यं दुर्गम् आश्रितः परकर्माण्युपहन्तुं शक्ष्यामीति चेन्मन्येत, अथवा शत्रोर्व्यसनपीडाभग्नोत्साहत्वात् तत्कर्मोपघातं मे कर्तुमवसरः प्राप्त इति चेन्मन्येत, अथवा विगृहीतस्य शत्रोर्जनपदमन्येन पथावस्कन्दितुं शक्ष्यामीति चेन्मन्येत, एषु चतुर्षु विषयेष्वेवञ्जातीयेष्वन्येषु च विग्रहमास्थाय वृद्धिमभिवाञ्छेत् ।

आसनेन वृद्धिमाह—यदि वा मन्येतेत्यादि । शत्रुर्मम कर्माण्युपहन्तुं न शक्तस्तस्य चाहं कर्माण्युपहन्तुं न शक्तः, व्यसनं चास्य वर्तते श्ववराहयोरिव समयोराधयोर्विग्रहे वा सति स्वकर्मानुष्ठानपरो वृद्धिं प्राप्स्यामीति चेन्मन्येत, तादृशे निमित्ते आसनेन वृद्धिमन्विच्छेत् ।

यदि वा मन्येत — 'यानसाध्यः कर्मोपघातः शत्रोः, प्रतिविहितस्वकर्मारक्षश्चास्मि' इति यानेन वृद्धिमातिष्ठेत् ।

यदि वा मन्येत — 'नास्मि शक्तः परकर्माण्युपहन्तुं, स्वकर्मोपघातं वा त्रातुम्' इति बलवन्तमाश्रितः स्वकर्मानुष्ठानेन क्षयात् स्थानं स्थानाद् वृद्धिं चाकाङ्क्षेत ।

यदि वा मन्येत — 'सन्धिनैकतः स्वकर्माणि प्रवर्तयिष्यामि विग्रहेणैकतः परकर्माण्युपहनिष्यामि' इति द्वैधीभावेन वृद्धिमातिष्ठेत् ॥

एवं षड्भिर्गुणैरेतैः स्थितः प्रकृतिमण्डले ।
पर्येषेत क्षयात् स्थानं स्थानाद् वृद्धिं च कर्मसु ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे प्रथमोऽध्यायः
षाड्गुण्यसमुद्देशः क्षयस्थानवृद्धिनिश्चयश्च,
आदितो नवनवतितमः ॥

यानेन वृद्धिमाह — यदि वा मन्येत यानसाध्य इत्यादि । परस्य कर्मोपघातो यानेनैव साध्यः, स्वकर्मरक्षा च मया सुसंविहितेति चेत् पश्येत्, तदा यानेन वृद्धिमन्विच्छेत् ।

संश्रयेण वृद्धिमाह — यदि वा मन्येत नास्मि शक्त इत्यादि । परकर्माण्युपहन्तुं स्वकर्मोपघातं प्रतिविधातुं चाहं न शक्त इति चेन्मन्येत, बलवन्तं समाश्रयेत् । ततः स्वकर्मानुष्ठानेन क्षयं परिहृत्य स्थानावस्थां चासाद्य ततो वृद्धिं लिप्सेत ।

द्वैधीभावेन वृद्धिमाह — यदि वा मन्येत सन्धिनेत्यादि । शत्रुणैकेन सन्धिं कृत्वा स्वकर्माणि प्रवर्तयितुम् अन्येन विगृह्य तत्कर्माण्युपहन्तुं च शक्ष्यामीति चेन्मन्येत, तदा द्वैधीभावेन वृद्धिं प्राप्नुयात् ॥

प्रान्ते श्लोकमाह — एवमित्यादि । प्रकृतिमण्डलस्थो राजानेन प्रकारेण सन्ध्यादिषड्गुणप्रयोगैः कर्मसु क्षयावस्थामुत्तीर्याधिगतस्थानावस्थो वृद्धिमन्विच्छेदिति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे प्रथमोऽध्यायः
षाड्गुण्यसमुद्देशः क्षयस्थानवृद्धिनिश्चयश्च,
आदितो नवनवतितमः ॥

१००. प्रक. संश्रयवृत्तिः ।

सन्धिविग्रहयोस्तुल्यायां वृद्धौ सन्धिमुपेयात् । विग्रहे हि क्षयव्ययप्रवासप्रत्यवाया भवन्ति ।

तेनासनयानयोरासनं व्याख्यातम् ।

द्वैधीभावसंश्रययोर्द्वैधीभावं गच्छेत् । द्वैधीभूतो हि स्वकर्मप्रधान आत्मन एवोपकरोति । संश्रितस्तु परस्योपकरोति, नात्मनः ।

यद्बलः सामन्तः तद्विशिष्टबलमाश्रयेत । तद्विशिष्टबलाभावे तमेवाश्रितः कोशदण्डभूमीनामन्यतमेनास्योपकर्तुमदृष्टः प्रयतेत । महादोषो हि विशिष्टसमागमो राज्ञामन्यत्रारिविगृहीतात् ।

अथ द्वितीयोऽध्याय आरभ्यते । तत्रादौ क्षयस्थानवृद्धिनिश्चयप्रकरणशेषं वक्ष्यमाणस्य संश्रयवृत्तिप्रकरणस्य प्रसङ्गकमुच्यते । तत्र पूर्वमेकेन गुणेन वृद्ध्यन्विच्छाप्रकार उक्तः, इदानीं द्वयोर्गुणयोर्वृद्धिसाम्ये कतरोऽनुष्ठेय इत्येतदभिधीयते । **सन्धिविग्रहयोरित्यादि** । तयोर्वृद्धिलाभे समाने सन्धिमनुतिष्ठेत् । कुतः, **विग्रहे हि क्षयव्ययप्रवासप्रत्यवाया भवन्तीति** । विग्रहोपादाने हि प्राणिक्षयो धनधान्यादिव्ययः विदेशगमनं परपुरुषकृतविषाम्बुदूषणादिनिमित्तः प्रत्यवायश्चेत्येतेऽनर्था जायन्ते, सन्ध्युपादाने तु नायं दोष इति ।

अनेन न्यायेन यानासनयोस्तुल्यायां वृद्धौ आसनमनुष्ठेयमित्येतदुक्तप्रायमित्याह — **तेनासनेत्यादि** ।

द्वैधीभावसंश्रययोरिति । तयोः समवृद्धिकयोः सतोः, द्वैधीभावं गच्छेद् उपाददीत । तत्र हेतुमाह — **द्वैधीभूतो हि, स्वकर्मप्रधानः** प्राधान्येन स्वकर्मैवानुतिष्ठन्, आत्मन एव उपकरोति । संश्रितस्तु परस्योपकरोति तद्विधेयत्वात्, आत्मनः नोपकरोति । इत्येतावता क्षयस्थानवृद्धिनिश्चयः परिसमापितः ।

संश्रयवृत्तिरिति सूत्रम् । प्रबलाश्रयणेन स्वशक्तिपरिपूरणं संश्रयवृत्तिः साभिधीयत इति सूत्रार्थः ।

यद्बलः सामन्त इत्यादि । यावद्बलयुक्तः सामन्तोऽभियोक्ता ततोऽप्युत्कृष्टबलयुक्तं सेवेत । विशिष्टबलस्यालाभेऽभियोक्तारमेवाश्रितः कोशदण्डभूमीनामन्यतमदानेन तं प्रसादयितुमदृष्टो दूरस्थोऽसमागत एव सन् यत्नं कुर्यात् । अदृष्टसेवायां कारणमाह — **महादोषो हीत्यादि** । राज्ञां हि विशिष्टबलेन सह समागमो वधबन्धादिमनर्थमुत्पादयेत् । तत्रापवादः — **अन्य-**

अशक्ये दण्डोपनतवद् वर्तेत ।

यदा चास्य प्राणहरं व्याधिमन्तःकोपं शत्रुवृद्धिं मित्रव्यसनमुपस्थितं वा तन्निमित्तामात्मनश्च वृद्धिं पश्येत्, तदा सम्भाव्यव्याधिधर्मकार्यापदेशेनापयायात् । स्वविषयस्थो वा नोपगच्छेत् । आसन्नो वास्य छिद्रेषु प्रहरेत् ।

बलीयसोर्वा मध्यगतस्त्राणसमर्थमाश्रयेत् । यस्य वानन्तर्धिः स्यात् । उभौ वा । कपालसंश्रयस्तिष्ठेत् । मूलहरमितरस्येतरमपदिशन् भेदमुभयोर्वा परस्परापदेशं प्रयुञ्जीत । भिन्नयोरुपांशुदण्डम् ।

त्रारिविगृहीतादिति। शत्रुविगृहीतमपहाय। स विशिष्टबलः शत्रुणा विगृहीतश्चेत् तेन समागमो न दोषावह इत्यर्थः ।

अशक्य इति । असमागम्य सेवितुमशक्ये विशिष्टबले, दण्डोपनतवद् वर्तेत दण्डार्पणकृतसन्धिर्यथा वर्तेत तथा तदन्तिके प्रणतस्तिष्ठेत् ।

यदा चास्येति । यदा, अस्य सेव्यमानस्य, प्राणहरं व्याधिम्, अन्तःकोपं मन्त्रिपुरोहितादिकोपं, शत्रुवृद्धिं, मित्रव्यसनं वा, उपस्थितं पश्येत्, तन्निमित्ताम् आत्मनो वृद्धिं च उपस्थितां पश्येत्, तदा, सम्भाव्यव्याधिधर्मकार्यापदेशेन प्रत्येयं कमपि व्याधिं धर्मकार्यं वा किञ्चिदपदिश्य, अपयायात् ततोऽपसरेत् । स्वविषयस्थो वा नोपगच्छेत् स्वविषये स्थितश्चेद् आहूतोऽपि व्याधिधर्मकार्यशेषापदेशेन तदन्तिकं न गच्छेत् । आसन्नो वा सन्निकृष्ट एव वा भूत्वा, अस्य छिद्रेषु प्रहारस्थानेषु प्रहरेत् । तदिदं बलवतैकेनाभियुक्तं प्रति अभिहितम् ।

द्वाभ्यां बलवद्भ्यामभियुक्तस्य विधिमाह— **बलीयसोर्वेति** । तयोर्वा, मध्यगतः, त्राणसमर्थम् अन्यतरम्, आश्रयेत् । उभयोः समबलतायामाह — **यस्य वानन्तर्धिः स्यादिति** । यो वा न व्यवहितः तमाश्रयेदित्यर्थः । उभयोरासन्नतायामाह — **उभौ वेति** । उभावप्याश्रयेत् । उभयाश्रयणावस्थानप्रकारश्च कपालसन्धिकरणेनावस्थानमित्याह — **कपालसंश्रयस्तिष्ठेदिति** । त्वमेव मे रक्षकः त्वदरक्षितं मां पर उच्छेत्तुमिच्छतीत्येकैकश उक्त्वा द्वावप्याश्रित्यावस्थानं कपालसन्धिः । **मूलेत्यादि** । इतरस्य इतरं मूलहरं द्रव्यनाशकमपकर्तारम्, अपदिशन् वदन् गूढपुरुषद्वारकं स्वगतमेवापकर्तृत्वमितरस्मिन्नारोप्य कीर्तयन्नित्यर्थः, उभयोर्वा, भेदं प्रयुञ्जीत, कथम्भूतं, परस्परा-

पार्श्वस्थो वा बलस्थयोरासन्नभयात् प्रतिकुर्वीत । दुर्गापाश्रयो वा द्वैधीभूतस्तिष्ठेत् । सन्धिविग्रहक्रमहेतुभिर्वा चेष्टेत । दूष्यामित्राटविकानुभयोरुपगृह्णीयात् । एतयोरन्यतरं गच्छंस्तैरेवान्यतरस्य व्यसने प्रहरेत् । द्वाभ्यामुपहितो वा मण्डलापाश्रयस्तिष्ठेत् । मध्यममुदासीनं वा संश्रयेत । तेन सहैकमुपगृह्येतरमुच्छिन्द्यादुभौ वा ।

द्वाभ्यामुच्छिन्नो वा मध्यमोदासीनयोस्तत्पक्षीयाणां वा राज्ञां न्यायवृत्तिमाश्रयेत । तुल्यानां वा यस्य प्रकृतयः सुख्येयुरेनं, यत्रस्थो वा शक्नुयादात्मानमुद्धर्तुं, यत्र पूर्वपुरुषोचितागतिरासन्नः सम्बन्धो वा मित्राणि भूयांसीति शक्तिमन्ति वा भवेयुः ॥

पदेशं परस्परस्यापकर्तृत्वारोपो निमित्तं यस्मिंस्तम् । भिन्नयोः उक्तरीत्या भेदितयोः, उपांशुदण्डं रहोवधं, प्रयुञ्जीत ।

पार्श्वस्थो वेत्यादि । बलिनोरुभयोर्यस्माद् भयमासन्नं पश्यति तस्मादात्मानं प्रतिक्रियया रक्षेत् तत्पार्श्वस्थः । **दुर्गापाश्रयो वेति** । दुर्गमाश्रितः द्वैधीभूतः प्रच्छन्नसन्धिविग्रहोभयाभिमुख्यः, तिष्ठेत् । **सन्धिविग्रहक्रमहेतुभिर्वेति** । 'महाफलैः स्वकर्मभिः परकर्माण्युपहनिष्यामि' इत्यादिनोक्तैः सन्धिनिमित्तैर्विक्रमनिमित्तैश्च 'आयुधीयप्रायः श्रेणीप्रायो वा मे जनपदः' इत्यादिनोक्तैः, चेष्टेत प्रवर्तेत । **दूष्यामित्रेत्यादि** । उभयोरभियोक्त्रोर्दूष्यान् अमित्रान् आटविकांश्च, उपगृह्णीयात् दानमानादिना स्ववशे कुर्यात् । एतयोः अभियोक्त्रोर्मध्ये, अन्यतरं गच्छन् प्रत्यभियुञ्जानः, तैरेव उपगृहीतैर्दूष्यादिभिरेव साधनभूतैः, अन्यतरस्य, व्यसने रन्ध्रे, प्रहरेत् । **द्वाभ्यामुपहितो वेति** । उभाभ्यां पीडितश्चेत्, मण्डलापाश्रयस्तिष्ठेत् उभयोर्मण्डलमपाश्रित्य वर्तेत 'सर्वात्मना प्रणतं मामेतौ पीडयत' इति वदन् । **मध्यममिति** । तम्, उदासीनं वा पूर्वोक्तलक्षणं, संश्रयेत । तेन सह मध्यमेनोदासीनेन वा सहितः, एकम् उपगृह्य दानादिना वशयित्वा, इतरम् उच्छिन्द्यात्, उभौ वा उच्छिन्द्यात् । इत्येवमुभयभेतुर्व्यापार उक्तः ।

उभाभ्यामुच्छिन्नस्य व्यापारमाह—**द्वाभ्यामुच्छिन्न इति** । तयोरुभयोः; मध्यमोदासीनयोः, तत्पक्षीयाणां वा मध्यमोदासीनसंबन्धिनां मित्रादीनां वा, राज्ञां मध्ये, न्यायवृत्तिं राजानम्, आश्रयेत । सर्वेषां न्यायवृत्तित्वतुल्यत्वाभावमाह — **तुल्यानां वा यस्य प्रकृतय इत्यादि** । तुल्यवृत्तीनां मध्ये यस्य

प्रियो यस्य भवेद् यो वाप्रियोऽस्य कतरस्तयोः ।
प्रियो यस्य स तं गच्छेदित्याश्रयगतिः परा ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
द्वितीयोऽध्यायः संश्रयवृत्तिः,
आदितः शततमः ॥

प्रकृतयः स्वस्मिन् प्रीतिमावहेयुः एनम् आश्रयेत । प्रकृतिप्रीतितुल्यतायां वा यमाश्रित्यात्मोद्धरणं सुकरं मन्यते, एनमाश्रयेत । आत्मोद्धरणसौकर्यतुल्यतायां यस्मिन् पूर्वपुरुषानुवृत्तः प्रवेशः विवाहादिलक्षणो वान्तरङ्गः संबन्धोऽस्ति, मित्राणि वा भूयस्त्वाच्छक्तिमन्ति भवेयुः, एनमाश्रयेत ॥

अथ सर्वोत्कृष्टामाश्रयवृत्तिमाह —**प्रियो यस्येति** । यस्य यः प्रियः, तयोर्मध्ये, कतरः अस्य अप्रियः कतरः कतरस्य प्रियो न भवति द्वावपि परस्परस्य प्रियावेवेत्यर्थः । ततश्च यो यस्य प्रियः, सः तं गच्छेत् आश्रयेत् । इत्याश्रयगतिः परा इत्येषाश्रयवृत्तिः प्रशस्ता ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
द्वितीयोऽध्यायः संश्रयवृत्तिः,
आदितः शततमः ॥

१०१, १०२. प्रक. **समहीनज्यायसां गुणाभिनिवेशः हीनसन्धयश्च ।**

विजिगीषुः शक्त्यपेक्षः षाड्गुण्यमुपयुञ्जीत । समज्यायोभ्यां सन्धीयेत । हीनेन विगृह्णीयात् । विगृहीतो हि ज्यायसा हस्तिना पादयुद्धमिवाभ्युपैति । समेन चामं पात्रमामेनाहतमिवोभयतः क्षयं करोति । कुम्भेनेवाश्मा हीनेनैकान्तसिद्धिमवाप्नोति ।

ज्यायांश्चेन्न सन्धिमिच्छेत्, दण्डोपनतवृत्तमाबलीयसं वा योगमातिष्ठेत् ।

समश्चेन्न सन्धिमिच्छेत्, यावन्मात्रमपकुर्यात् तावन्मात्रमस्य प्रत्यपकुर्यात् । तेजो हि सन्धानकारणं, नातप्तं लोहं लोहेन सन्धत्त इति ।

हीनश्चेत् सर्वत्रानुप्रणतस्तिष्ठेत्, सन्धिमुपेयात् । आरण्योऽग्निरिव हि दुःखामर्षजं तेजो विक्रमयति । मण्डलस्य चानुग्राह्यो भवति ।

समहीनज्यायसां गुणाभिनिवेश इति सूत्रम् । समः शत्रुणा तुल्यशक्तिसिद्धिः हीनः शत्रुतो न्यूनशक्तिसिद्धिः ज्यायान् ततोऽधिकशक्तिसिद्धिः आसु समाद्यवस्थासु गुणस्थापनोच्यत इति सूत्रार्थः । पूर्वं निमित्तापेक्षः षाड्गुण्यप्रयोग उक्तः, शक्त्यपेक्ष इदानीमभिधीयते ।

विजिगीषुरिति । सः, शक्त्यपेक्षः स्वशक्तिमपेक्ष्य, षाड्गुण्यम्, उपयुञ्जीत प्रयुञ्जीत । समज्यायोभ्यां सन्धीयेत समेन ज्यायसा च सह सन्दधीत । हीनेन विगृह्णीयात् । ज्यायसा सह हीनस्य विग्रहः पदातेरिव हस्तिना युद्धं नाशहेतुः, समेन समस्य विग्रह आमपात्रस्येवामपात्रेणाहननमुभयनाशहेतुः, हीनेन ज्यायसो विग्रहः कुम्भेनेव शिलायाः संघट्ट एकान्तसिद्धिहेतुर्भवतीत्याह —**विगृहीतो हि ज्यायसेत्यादि ।**

ज्यायांश्चेदिति । स चेत्, सन्धिं नेच्छेत्, दण्डोपनतवृत्तं तत्प्रकरणोक्तम्, आबलीयसं योगं वा आबलीयसाधिकरणीययोगातिसन्धानप्रकरणोक्तम्, आतिष्ठेत् अनुतिष्ठेत् ।

समश्चेन्न सन्धिमिच्छेदित्यादि । यावन्मात्रमपकुर्यात् यत्परिमाणमपकारं कुर्यात् सन्धिमिच्छुः समः तावन्मात्रमस्य प्रत्यपकुर्यात् प्रत्यपकारं कुर्यादितरः । तथाकरणं सन्धित्सोत्पादनेन सन्धिकारणं भवतीति तप्तलोहदृष्टान्तपूर्वमाह —**तेजो हीत्यादि ।**

हीनेनासन्धिः पूर्वं प्रतिपादितः । विषयविशेषे तेनापि सन्धिं कुर्यादित्याह —**हीन इति** । स चेत्, सर्वत्र अनुप्रणतः तिष्ठेत्, तर्हि सन्धिम्

संहितश्चेत् 'परप्रकृतयो लुब्धक्षीणापचकिताः प्रत्यादानभयाद् वा नोपगच्छन्ति' इति पश्येद्धीनोऽपि विगृह्णीयात् ।

विगृहीतश्चेत् 'प्रकृतयो लुब्धक्षीणापचरिताः विग्रहोद्विग्ना वा मां नोपगच्छन्ति' इति पश्येत्, ज्यायानपि सन्धीयेत, विग्रहोद्वेगं वा शमयेत् । 'व्यसनयौगपद्ये गुरुव्यसनोऽस्मि, लघुव्यसनः परः सुखेन प्रतिकृत्य व्यसनमात्मनोऽभियुञ्ज्यात्' इति पश्येत्, ज्यायानपि सन्धीयेत ।

सन्धिविग्रहयोश्चेत् परकर्शनमात्मोपचयं वा नाभिपश्येत्, ज्यायानप्यासीत ।

उपेयात्, अर्थात् तेन सह । प्रणतेन सन्ध्यकरणे दोषमाह—**आरण्योऽग्निरिव हीति** । वन्यो वह्निरिव दुर्विषह्यं, दुःखामर्षजं दुःखप्रभवममर्षप्रभवं च, तेजः, विक्रमयति विजिगीषौ विक्रान्तं करोति, अर्थात् तं हीनम् । मण्डलस्य च, अनुग्राह्यः अनुकम्पाविषयो, भवति ।

विजिगीषोर्हीनावस्थायां सन्धिसंश्रययोरनुष्ठानप्रकार उक्तः । तत्रापवादमाह — **संहितश्चेदित्यादि** । अयमर्थः — हीनो विजिगीषुः परेण सह कृतसन्धिर्यदि मन्येत — 'परप्रकृतयो लुब्धाश्च क्षीणाश्चातृप्ताश्च नोपगच्छन्ति उच्छेदशङ्कया वा मां नोपगच्छन्ती'ति, तर्हि हीनोऽपि ज्यायसापि परेण सह **विगृह्णीयात्** । अपचकितशब्दोऽपतृप्तार्थकः 'चक तृप्तावि'ति धातोरपपूर्वात् क्तप्रत्ययेन निष्पन्नः । अपचरितपाठे दानमानाद्यकरणेनानादृता इत्यर्थः ।

ज्यायसो हीनेन सह यद् विग्रहणं तस्यापवादमाह — **विगृहीतश्चेदित्यादि** । **अयमर्थः**—ज्यायान् विजिगीषुः परेण विगृह्णन् यदि मन्येत— **'प्रकृतयो लुब्धक्षीणापचरिताः** विग्रहभीता वा मां नोपगच्छन्ती'ति, तर्हि ज्यायानपि **परेण** हीनेनापि सन्धिं कुर्याद्, विग्रहनिमित्तमुद्वेगं वा प्रकृतीनां **शमयेदिति** । ज्यायसो हीनेन सह सन्धिकर्तव्यतायामन्यन्निमित्तमाह — **व्यसनयौगपद्य इत्यादि** । 'द्वयोर्व्यसनस्य युगपद्भावे मम व्यसनं गुरु परस्य व्यसनं लघु, तद् आत्मव्यसनस्य प्रतीकारं परः सुखेन कृत्वा मामभियुञ्जीत' इति चेद्, विजिगीषुर्मन्येत, तदा ज्यायानपि सन् परेण सन्धिं कुर्यात् ।

सन्धौ विग्रहे वा क्रियमाणे परापचयमात्मोपचयं वा यदि न सम्भावयेत् तदा ज्यायानप्यासनमेवानुतिष्ठेदित्याह—**सन्धिविग्रहयोश्चेदित्यादि** ।

परव्यसनमप्रतिकार्यं चेत् पश्येत्, हीनोऽप्यभियायात् । अप्रतिकार्यासन्नव्यसनो वा ज्यायानपि संश्रयेत ।

सन्धिनैकतो विग्रहेणैकतश्चेत् कार्यसिद्धिं पश्येत्, ज्यायानपि द्वैधीभूतस्तिष्ठेदिति ।

एवं समस्य षाड्गुण्योपयोगः । तत्र तु प्रतिविशेषः —

प्रवृत्तचक्रेणाक्रान्तो राज्ञा बलवताबलः ।
सन्धिनोपनमेत् तूर्णं कोशदण्डात्मभूमिभिः ॥
स्वयं सङ्ख्यातदण्डेन दण्डस्य विभवेन वा ।
उपस्थातव्यमित्येष सन्धिरात्मामिषो मतः ॥

परव्यसनस्यान्तःकोपादिलक्षणस्याप्रतिविधेयत्वसम्भावनायां हीनोऽपि यानमनुतिष्ठेदित्याह — **परव्यसनमित्यादि** ।

आत्मनो व्यसनमप्रतिविधेयमासन्नं यदि पश्येत् स ज्यायानपि सन् हीनं संश्रयेतेत्याह — **अप्रतिकार्यासन्नव्यसन** इत्यादि ।

एकेन सन्धिकरणे कार्यसिद्धिः अन्येन विग्रहकरणे कार्यसिद्धिरिति चेत् पश्येत्, तादृशे निमित्ते ज्यायानपि द्वैधीभावमनुतिष्ठेदित्याह— **सन्धिनैकत** इत्यादि । इतिशब्दः प्रक्रान्तप्रकरणसमाप्त्यर्थः ।

हीनसन्धय इति सूत्रम् । हीनः शक्तिसिद्धिभ्यां शत्रोरपकृष्टः तेन कर्तव्याः सन्धय इति सूत्रार्थः । पूर्वस्मिन् प्रकरणे समहीनज्यायसां षाड्गुण्यप्रयोग उक्तः अत्र तु हीनं प्रति विशेष उच्यते ।

एवमिति । पूर्वोक्तेन प्रकारेण, समस्य सर्वस्य समहीनज्यायसां सर्वेषामित्यर्थः । षाड्गुण्योपयोगः, दर्शित इति शेषः । **तत्र तु प्रतिविशेष** इति । तेषु मध्ये हीनं प्रति विशेषस्तूच्यते ॥

प्रवृत्तेत्यादि । प्रवृत्तचक्रेण प्रवृत्तसैन्येन, बलवता, राज्ञा, आक्रान्तो विजितः, अबलो राजा, कोशदण्डात्मभूमिभिः सन्धिना कोशादिदानपूर्वकेण सन्धिना, तूर्णं त्वरितम्, उपनमेत् प्रणमेद् बलवन्तम् ॥

स्वयमित्यादि । तत्र दण्डेऽपेक्ष्यमाणे तन्निर्दिष्टसङ्ख्याकेन दण्डेन विभवेन च स्वशक्त्यनुरूपेण स्वयं शत्रुसमीपं गत्वा उपस्थातव्यं तदाराधनं कर्तव्यम् । इत्येष सन्धिरात्मामिषो नाम आत्मानमामिषीकृत्य क्रियमाणत्वात् ॥

सेनापतिकुमाराभ्यामुपस्थातव्यमित्ययम् ।
पुरुषान्तरसन्धिः स्यान्नात्मनेत्यात्मरक्षणः ॥
एकेनान्यत्र यातव्यं स्वयं दण्डेन वेत्ययम् ।
अदृष्टपुरुषः सन्धिर्दण्डमुख्यात्मरक्षणः ॥
मुख्यस्त्रीबन्धनं कुर्यात् पूर्वयोः पश्चिमे त्वरिम् ।
साधयेद् गूढमित्येते दण्डोपनतसन्धयः ॥
कोशदानेन शेषाणां प्रकृतीनां विमोक्षणम् ।
परिक्रयो भवेत् सन्धिः स एव च यथासुखम् ॥
स्कन्धोपनेयो बहुधा ज्ञेयः सन्धिरुपग्रहः ।
निरुद्धो देशकालाभ्यामत्ययः स्यादुपग्रहः ॥
विषह्यदानादायत्यां क्षमः स्त्रीबन्धनादपि ।
सुवर्णसन्धिर्विश्वासादेकीभावगतो भवेत् ॥

सेनेत्यादि । सेनापतिकुमाराभ्यां समुचितपरिवाराभ्यामुपस्थातव्यमित्येष पुरुषान्तरो नाम सन्धिः सेनापतिकुमारलक्षणपुरुषविशेषार्पणेन शत्रुसाधनात् । अयमेव सन्धिरात्मरक्षण इत्यप्युच्यते आत्मार्पणेन न क्रियत इति कृत्वा ॥

एकेनेत्यादि । स्वयम् एकेन शत्रुसैन्यसाहाय्यरहितेन स्वसैन्येन वा शत्रुकार्यसाधनायान्यत्र यातव्यमिति पणनेन क्रियमाणः सन्धिरदृष्टपुरुषाख्यः, न दृष्टः पुरुषः शत्रुणा तत्कार्यं साधयन्नस्मिन् सन्धाविति कृत्वा । दण्डमुख्यात्मरक्षण इत्यप्ययमुच्यते अनेन सन्धिना दण्डमुख्यानामात्मनश्च रक्षणसम्पत्तेः ॥

मुख्यस्त्रीबन्धनमित्यादि । उक्तेषु त्रिषु सन्धिषु पूर्वयोरात्मामिषात्मरक्षणसन्ध्योर्ज्यायसो ये मुख्यास्तत्कन्यानां विवाहसम्बन्धं विश्वासार्थं कुर्यात् । अन्तिमे तु सन्धौ शत्रुं प्रच्छन्नविषादिप्रयोगैः साधयेत् । इत्येते त्रयो दण्डोपनतकरणीयाः सन्धयः ॥

कोशोपनतसन्धीनाह— **कोशदानेने**त्यादि । श्लोकत्रयमनुवृत्तपदम् । लवच्छत्रुहतावशिष्टानां प्रकृतीनां धनदानेन यद् विमोचनं, स परिक्रयो नाम सन्धिः । स एव चात्मानुपपीडया कोशस्य सङ्घातस्य बहुवधिषु स्कन्धस्कन्धेन देयत्वव्यवस्थायामुपग्रहसंज्ञः परिक्रयभेदः । उपग्रहश्चासौ अमुकदेशेऽमुककालेष्वेतावद् धनं देयमित्येवं देयदानदेशकालनियमकल्पनायामत्यय-

विपरीतः कपालः स्यादत्यादानादभाषितः ।
पूर्वयोः प्रणयेत् कुप्यं हस्त्यश्वं वा गरान्वितम् ॥
तृतीये प्रणयेदर्थं कथयन् कर्मणां क्षयम् ।
तिष्ठेच्चतुर्थ इत्येते कोशोपनतसन्धयः ॥
भूम्येकदेशत्यागेन देशप्रकृतिरक्षणम् ।
आदिष्टसन्धिस्तत्रेष्टो गूढस्तेनोपघातिनः ॥
भूमीनामात्तसाराणां मूलवर्जं प्रणामनम् ।
उच्छिन्नसन्धिस्तत्रैष परव्यसनकाङ्क्षिणः ॥

संज्ञः । यथासुखधनदानव्यवस्थाकृतः सन्धिरयं सहनीयदानाद्धेतोरुत्तरकालशुभावहः कन्यादानसन्धितोऽपि प्रशस्तः शत्रुविजिगीष्वोर्विश्वासवशादन्योन्यस्यैकात्मतामपि प्रयोजयेत् सुवर्णयोरिव तप्तयोः । अत एव चायं सुवर्णसन्धिरित्युच्यते ॥

विपरीत इत्यादि । उक्तविपरीतः सद्यस्सर्वकोशदानव्यवस्थाकृतः सन्धिः कपालाख्यः । स तत्क्षणातिमात्रधनग्रहणदुष्टत्वादुपादेयतया नोक्तः शास्त्रे । परिक्रयादिषु पूर्वोक्तेषु चतुर्षु मध्ये पूर्वयोः परिक्रयोपग्रहसन्ध्योर्वस्त्रावरणादिकमसारं कुप्यद्रव्यं दद्यात् । गजाश्वं वा शत्रुणापेक्ष्यमाणं द्वित्रमासान्तरमरणानुकूलविषप्रयोगयुक्तं कृत्वाल्पसङ्ख्यं दद्यात् ॥

तृतीय इत्यादि । सुवर्णसन्धौ देयस्य कमप्यंशं दद्यात् 'कर्माणि मे विपन्नानी'त्येवं वदन् । चतुर्थे कपालसन्धौ मध्यममुदासीनं वाश्रित्य "ददामि ददामी'ति वदन् तिष्ठेत् कालं यापयेत् । इत्येवमेते चत्वारः कोशदानेनोपनतैः कर्तव्याः सन्धयः ॥

देशोपनतसन्धीनाह — **भूम्येकदेशत्यागेनेत्यादि** । जनपदस्य प्रकृतीनां च रक्षणार्थं जनपदैकदेशदानेन यत् सन्धानं, स आदिष्टसन्धिर्नाम । सोऽयं भूम्येकदेशे दत्ते गूढपुरुषैः स्तेनैश्चोपघातं तस्य पुनस्स्वायत्तीकरणार्थं कर्तुं शक्तस्येष्टो भवति ॥

भूमीनामित्यादि । स्वभूमिभ्यः कृत्स्नं फलं गृहीत्वा राजधानीदुर्गवर्जितानां सर्वासां तासां शत्रवेऽर्पणेन क्रियमाणः सन्धिरुच्छिन्नसन्धिर्नाम । स एष 'परव्यसने भूमिं प्रत्याच्छेत्स्यामी'ति बुद्ध्या तत् प्रतीक्षमाणस्येष्टो भवति ॥

फलदानेन भूमीनां मोक्षणं स्यादवक्रयः ।
फलातिभुक्तो भूमिभ्यः सन्धिः स परदूषणः ॥
कुर्यादवेक्षणं पूर्वौ पश्चिमौ त्वाबलीयसम् ।
आदाय फलमित्येते देशोपनतसन्धयः ॥
स्वकार्याणां वशेनैते देशे काले च भाषिताः ।
आबलीयसिकाः कार्यास्त्रिविधा हीनसन्धयः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे तृतीयोऽध्यायः
समहीनज्यायसां गुणाभिनिवेशो हीनसन्धयः,
आदित एकशततमः ॥

फलदानेनेत्यादि । भूम्युत्पन्नफलदानेन भूमीनां मोक्षणम् अवक्रयसन्धिर्नाम । भूमीनामेव दाने तु तत्स्वामित्वमात्मनोऽपेयादित्ययं क्रियते । सर्वभूमिभ्य उत्पद्यमानं यत् फलं तदेव केवलं शत्रवे नार्प्यते किन्तु ततोऽधिकमपि समर्प्यते यस्मिन् सन्धौ, स परदूषणो नाम, आयाभ्यधिकदानसंविदा परं दूषयत्युपहन्तीति व्युत्पत्त्यान्वर्थाख्यः ॥

कुर्यादित्यादि । एषु चतुर्षु पूर्वौ आदिष्टसन्ध्युच्छिन्नसन्धी उद्दिश्य तन्निमित्तानर्थपरिहारविषये परव्यसनकालप्रतीक्षां कुर्यात् । पश्चिमयोरवक्रयसन्धिपरदूषणसन्ध्योर्विषये च भूमिफलमुपहृत्याबलीयसप्रकरणवक्ष्यमाणविधिना शत्रोर्द्रोहानुष्ठानं कुर्यात् । इत्येवमेते चत्वारो भूम्युपनतसन्धयः ॥

स्वकार्याणामित्यादि । त एते हीनसन्धयः दुर्बलैः स्वकार्यानुसारेण देशानुसारेण कालानुसारेण च परिभाष्यानुष्ठेयाः सन्तः पुनस्त्रिविधा वेदितव्याः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे तृतीयोऽध्यायः
समहीनज्यायसां गुणाभिनिवेशः हीनसन्धयश्च,
आदितः एकशततमः ॥

१०३—१०७. प्रक. विगृह्यासनं, सन्धायासनं, विगृह्ययानं, सन्धाययानं, सम्भूयप्रयाणं च।

सन्धिविग्रहयोरासनं यानं च व्याख्यातम्। स्थानमासनमुपेक्षणं चेत्यासनपर्यायाः।

विशेषस्तु गुणैकदेशे स्थानम्। स्ववृद्धिप्राप्त्यर्थमासनम्। उपायानामप्रयोग उपेक्षणमिति।

सन्धानकामयोरिविजिगीष्वोरुपहन्तुमशक्तयोर्विगृह्यासनं सन्धाय वा।

विगृह्यासनमिति सूत्रम्। शत्रुणा सह धान्यप्राप्त्यादिप्रतिघातलक्षणं विग्रहं कृत्वा यदासनं तदुच्यत इति सूत्रार्थः। केवलमासनं यानं च पूर्वमुक्तं, गुणान्तरविशिष्टं त्वधुनाभिधीयते।

सन्धिविग्रहयोरित्यादि। सन्धौ विग्रहे चासनं यानं च व्याख्यातं पूर्वाचार्यैः। स्थानम् आसनम् उपेक्षणमित्येते शब्दा आसनस्य पर्यायवाचिनः।

विशेषस्त्वति। तत्र विशेषस्तूच्यते। **गुणैकदेशे स्थान**मित्यादि। गुण इहासनं तच्च शक्तिसाम्यलक्षणं तस्यैकदेशोऽवयवः स च शक्तेरल्पोंऽशः शत्रुकृतापकारप्रत्यपकारकरणासामर्थ्यरूपा शक्त्यल्पतेति यावत्, तस्यामासनलक्षणादपकृष्टायां स्थानशब्दः प्रयुज्यते। तच्च स्थानं विजिगीषोः सन्धायासनस्य कारणं द्रष्टव्यम्। **स्ववृद्धिप्राप्त्यर्थमासन**मिति। आत्मनो वृद्धिप्राप्तिनिमित्ते आसने आसनशब्दः प्रयुज्यते। इयं परकृतापकारं केवलं प्रतिकुर्वतः स्वयमनपकुर्वतश्चावस्था स्थानविपरीता। वृद्ध्यर्थं चेदमासनं शक्तिसाम्यलक्षणासनापेक्षया शक्त्याधिक्ययोगाद् विगृह्यासनस्य कारणम्। **उपायानामप्रयोग उपेक्षणमि**ति। उपायानां प्रयोगाभाव ईषत्प्रयोगे वा उपेक्षणशब्दः प्रयुज्यते। एवं पर्यायवचनानामपि स्थानासनोपेक्षणानां कमपि कमपि विशेषमाश्रित्य संज्ञाभेदा उक्ताः। केचित् तु स्थानादीनां स्वरूपमन्यथा वर्णयन्ति — कपालसन्ध्यादिषु प्रदेयद्रव्याप्रदानं स्थानं, कृतोच्छिन्नसन्धेः परव्यसनप्रतीक्षणावस्थानमासनं, सामाद्युपायाप्रयोग उपेक्षणमिति।

प्रसङ्गागतमासनभेदमभिधाय प्रस्तुतमनुसन्धत्ते — **सन्धानकामयोरि**त्यादि। सन्धिमिच्छतोः शत्रुविजिगीष्वोः परस्परापकारकरणाशक्तत्वे विगृह्यासनं सन्धायासनं वा कर्तव्यम्। तत्र च शक्त्याधिक्ये आद्यं शक्त्यल्पत्वे-

यदा वा पश्येत्—'स्वदण्डैर्मित्राटवीदण्डैर्वा समं ज्यायांसं वा कर्शयितुमुत्सहे' इति, तदा कृतबाह्याभ्यन्तरकृत्यो विगृह्यासीत ।

यदा वा पश्येत्—'उत्साहयुक्ता मे प्रकृतयः संहता विवृद्धाः स्वकर्माण्यव्याहताश्चरिष्यन्ति, परस्य वा कर्माण्युपहनिष्यन्ति' इति तदा विगृह्यासीत ।

यदा वा पश्येत्—'परस्यापचरिताः क्षीणा लुब्धाः स्वचक्रस्तेनाटवीव्यथिता वा प्रकृतयः स्वयमुपजापेन वा मामेष्यन्तीति, सम्पन्ना मे वार्ता विपन्ना परस्य तस्य प्रकृतयो दुर्भिक्षोपहता मामेष्यन्ति, विपन्ना मे वार्ता सम्पन्ना परस्य तं मे प्रकृतयो न गमिष्यन्ति विगृह्य चास्य धान्यपशुहिरण्यान्याहरिष्यामि, स्वपण्योपघातीति वा परपण्यानि निवर्तयिष्यामि, परवणिक्पथाद् वा सारवन्ति मामेष्यन्ति

द्वितीयम् । फलं चाद्यस्य परकर्मोपघातः स्वकर्मानुष्ठानं च, द्वितीयस्य स्वकर्मरक्षणमात्रमिति विवेक्तव्यम् ।

अथ विगृह्यासने निमित्तविशेषानाह — **यदा वा पश्येत् स्वदण्डै**रित्यादि । 'स्वसैन्यैर्मित्रसैन्यैराटविकसैन्यैर्वाहमात्मनः समशक्तिमधिकशक्तिं वा शत्रुं कर्शयितुं शक्नोमी'ति चेन्मन्येत, तदा कृतबाह्याभ्यन्तरकृत्यः सन्—जनपदगता दुर्गादिगताश्च कृत्याः क्रुद्धलुब्धभीतादयः कृताः परविषये वर्धिताः स्वविषये शमिताश्च येन तथाभूतः सन्—विगृह्यासनमनुतिष्ठेत् ।

यदा वा पश्येद् उत्साहयुक्ता इत्यादि । 'मम प्रकृतय उत्साहवत्य एकमनस्काः वृद्धिमत्यः स्वकर्माण्यप्रतिहता अनुष्ठास्यन्ति; परकर्माणि चोपहनिष्यन्ति' इति चेन्मन्येत, तदा विगृह्यासनमनुतिष्ठेत् ।

यदा वा पश्येत् परस्येत्यादि । 'परस्य प्रकृतयः परेणानादृताः दुर्भिक्षोपहताः लुब्धाः स्वसैन्यचोराटविकपीडिताः स्वयं मदीयभेदोपायानुष्ठानेन वा मामुपगमिष्यन्ती'ति चेन्मन्येत, तदा विगृह्यासीत । 'कृषिपाशुपाल्यवणिज्या मे सम्पन्नाः परस्य तु विपन्नाः, तस्य प्रकृतयो दुर्भिक्षपरिक्षीणाः मामाश्रयिष्यन्ती'ति चेन्मन्येत, विगृह्यासीत । 'मम कृषिपाशुपाल्यवणिज्या विपन्नाः, परस्य सम्पन्नाः, प्रकृतयश्च मेऽनुरक्ताः परं न गमिष्यन्ति, अतः परस्य धान्यपशुहिरण्यानि विगृह्यापहरिष्यामी'ति चेन्मन्येत, तदा विगृह्यासीत । 'विक्रयार्हाणां मम पण्यानां विक्रयं परदेशागतानि पण्यान्युपघ्नन्ति । तदेतानि

विगृहीते नेतरं, दूष्यामित्राटवीनिग्रहं वा विगृहीतो न करिष्यति, तैरेव वा विग्रहं प्राप्स्यति, मित्रं मे मित्रभाव्यभिप्रयातो बह्वल्पकालं तनुक्षयव्ययमर्थं प्राप्स्यति, गुणवतीमादेयां वा भूमिं सर्वसंदोहेन वा मामनादृत्य प्रयातुकामः कथं न यायात्' इति परवृद्धिप्रतिघातार्थं प्रतापार्थं च विगृह्यासीत ।

तमेव हि प्रत्यावृत्तो ग्रसत इत्याचार्याः ।

नेति कौटल्यः । कर्शनमात्रमस्य कुर्यादव्यसनिनः । परवृद्ध्या तु वृद्धः समुच्छेदनम् ।

स्वदेशान्निवर्तयिष्यामी'ति चेन्मन्येत, तदा विगृह्यासीत । 'विगृहीते सति शत्रौ तदीयवणिक्पथात् सारवन्ति — हस्त्यश्वगजदन्तादीनि — मामागमिष्यन्ति, न तु शत्रुमि'ति चेन्मन्येत, तदा विगृह्यासीत । अथवा 'मया विग्रहे क्रियमाणे परो दूष्यामित्राटविकानां निग्रहं स्वमण्डलशुद्ध्यर्थं न करिष्यती'ति चेन्मन्येत, विगृह्यासीत । 'तैरेव वा दूष्यामित्राटविकैः सह विग्रहं प्राप्स्यती'ति चेन्मन्येत, विगृह्यासीत । इत्थं समस्य विगृह्यासनमुक्त्वा ज्यायस आह— **मित्रं मे मित्रभावीत्यादि** । 'मम मित्रं मित्रभावि — एकार्थानर्थसम्बद्धमुपकार्यविकारि च । मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि ।[1] इति मित्रसन्धिवक्ष्यमाणलक्षणम् — अभिप्रयातः परोऽल्पकालेनाल्पसैन्यधनव्ययेन महान्तमर्थं प्राप्स्यति, तदहमस्याभिप्रयाणं विहानिष्यामि' इति चेन्मन्येत, तदा विगृह्यासीत । अथवा 'गुणवतीं परसुखसाध्यां भूमिमपहर्तुं सर्वसैन्यसमुदयेन मामवज्ञाय प्रयातुकामोऽयं परो यथा न यायात् तथा करिष्यामी'ति चेन्मन्येत, तर्हि विगृह्यासीत, किमर्थं, परवृद्धिविघातार्थं स्वप्रतापाविष्करणार्थं च ।

तमेव हि प्रत्यावृत्तो ग्रसत इत्याचार्या इति । योऽयं विजिगीषुः सर्वसन्दोहेन यातव्याभिप्रयाणोद्यतं परं प्रति तद्वृद्धिप्रतिषेधार्थं विगृह्यासनमनुतिष्ठति, तमेव स्वप्रयाणविघातकुपितः परो यातव्यात् प्रत्यावृत्योच्छिनत्ति इत्येवमनर्थप्रसङ्गात् तं प्रति विगृह्यासनं नानुष्ठेयमित्याचार्या मन्यन्ते ।

आचार्यमतं दूषयति— **नेति कौटल्य** इति । तत्र हेतुमाह — **कर्शनमात्रमस्य कुर्यादव्यसनिन** इति । अस्य विगृह्यासीनस्य अव्यसनिनः व्यसनहीनस्य सतो विजिगीषोः कर्शनमात्रं कुर्यात् कर्शनमेव केवलं कुर्यात् प्रत्यावृत्तः, न तूच्छेदनमित्यर्थः । प्रत्युत विगृह्यासनस्यानमुष्ठान एव स निष्प-

एवं परस्य यातव्योऽस्मै साहाय्यमविनष्टः प्रयच्छेत् । तस्मात् सर्वसन्दोहप्रकृतं विगृह्यासीत ।

विगृह्यासनहेतुप्रातिलोम्ये सन्धायासीत ।

विगृह्यासनहेतुभिरभ्युच्चितः सर्वसन्दोहवर्जं विगृह्य यायात् ।

यदा वा पश्येत्—'व्यसनी परः, प्रकृतिव्यसनं वास्य शेषप्रकृतिभिरप्रतिकार्यं, स्वचक्रपीडिता विरक्ता वास्य प्रकृतयः कर्शिता निरुत्साहाः परस्पराद् भिन्नाः शक्या लोभयितुम्, अग्न्युदकव्याधि-

---

तिबन्धविजितयातव्यसकाशाधिगतैश्वर्याप्यायितनिजशक्तिर्भवन् विजिगीषोरुच्छेदनमेव कुर्यादित्याह—**परवृद्ध्या तु वृद्धः समुच्छेदनमिति** ।

विगृह्यासनस्यानुष्ठानेऽनुपेक्षणीयं प्रयोजनान्तरमाह—**एवं परस्ये**त्यादि । एवं विगृह्यासनस्यानुष्ठानेन, अविनष्टः अप्राप्तनाशः प्राप्तपरिरक्षः, परस्य यातव्यः, अस्मै आत्मोपकारिणे विजिगीषवे, साहाय्यं प्रयच्छेत् । **तस्मादि**ति । यथोक्ताद्धेतोः, सर्वसन्दोहप्रकृतं विगृह्यासीत सर्वसैन्यसमुदयेनारब्धयानं प्रति विगृह्यासनमनुतिष्ठेत् । इति विगृह्यासनं व्याख्यातम् । अथ सन्धायासनम् ।

सन्धायासनमिति सूत्रम् । शत्रुणा सह सन्धिं कृत्वा आसनं सन्धायासनम् । तदभिधीयत इति सूत्रार्थः ।

विगृह्यासनहेतुप्रातिलोम्य इत्यादि । य एते विगृह्यासनहेतव उक्ताः तेषामात्मनि वैपरीत्यदर्शने अर्थात् तेषां शत्रावुत्पत्तिदर्शने सन्धायासनमनुतिष्ठेत् । इति सन्धायासनं व्याख्यातम् ।

विगृह्ययानमिति सूत्रमुत्तानार्थम् । **विगृह्यासनहेतुभिरि**ति । तैः, **अभ्युच्चितः** शक्त्युपचयं प्राप्तः, विगृह्य यायात्, शत्रुम् । सर्वसन्दोहवर्जं सर्वसन्दोहसहितो यो यातव्यं प्रति अभिप्रयातस्तथाविधं शत्रुं वर्जयित्वा । तं प्रत्याचरितव्यं तु विगृह्यासनमुक्तमेव ।

यदा वा पश्येद् व्यसनीत्यादि । शत्रुर्व्यसनवान् इति चेत् पश्येत्, **अस्य प्रकृतीनां** वामात्यादीनां व्यसनं शेषप्रकृतिभिः प्रतिकर्तुमशक्यमुत्पन्नमिति **यदि पश्येत्**, अस्य प्रकृतयः स्वसैन्यपीडिताः राज्ञि निरनुरागाः कर्शिताः अत एव निरुत्साहाः परस्पराभिन्नाः लोभयितुं शक्याः इति चेत्

मरकदुर्भिक्षनिमित्तक्षीणयुग्यपुरुषनिचयरक्षाविधानः परः' इति, तदा विगृह्य यायात् ।

यदा वा पश्येत् — 'मित्रमाक्रन्दश्च मे शूरवृद्धानुरक्तप्रकृतिर्विपरीतप्रकृतिः परः पार्ष्णिग्राहश्चासारश्च, शक्ष्यामि मित्रेणासारमाक्रन्देन पार्ष्णिग्राहं वा विगृह्य यातुम्' इति, तदा विगृह्य यायात् ।

यदा वा फलमेकहार्यमल्पकालं पश्येत् , तदा पार्ष्णिग्राहासाराभ्यां विगृह्य यायात् ।

विपर्यये सन्धाय यायात् ।

पश्येत् , परोऽन्युदकव्याधिमरकदुर्भिक्षैर्निमित्तैर्युग्यकर्मकरकोशानां रक्षाविधानस्य च क्षयं प्राप्त इति च यदि पश्येत्, एषु चतुर्षु निमित्तेषु विगृह्य यायात् ।

यदा वा पश्येन्मित्रमित्यादि । 'मम पुरस्तान्मित्रभूतो राजा पृष्ठतो मित्रभूतो राजा वा शूरैर्वृद्धैरनुरागिभिश्चामात्यादिभिः प्रकृतिभिरुपेतो भवति, परो विपरीतप्रकृतिस्तथैव पार्ष्णिग्राहश्च आसारश्च, मित्रेण पार्ष्णिग्राहासारम्, आक्रन्देन पार्ष्णिग्राहं च विग्राह्य यातव्यं प्रति प्रयातुं शक्ष्यामि' इति चेन्मन्येत, तदा विगृह्य यायात् ।

यदा वा फलमित्यादि । यदा वा किमपि फलम् आत्मनैकेनैवाल्पेन कालेन साध्यं पश्येत् , तदा पार्ष्णिग्राहेण तदासारेण च सह विगृह्य यातव्यमभियायात् । फलस्य त्वन्यहार्यत्वे चिरसाध्यत्वे च ताभ्यां सन्धायैव यातव्यं यायात् । एतच्च पार्ष्णिग्राहासाराभ्यां विग्रहणं पृष्ठकोपारम्भात् प्रागेव फलस्य सुसाधत्वाद् यातव्यसाधनानन्तरमपि तौ साधयितुं शक्याविति कृत्वोपदिष्टं द्रष्टव्यम् । इति विगृह्ययानं व्याख्यातम् ।

सन्धाययानमिति सूत्रम् । सन्धानपुरस्सरं यानमुच्यत इति सूत्रार्थः ।

विपर्यये सन्धाय यायादिति । यथोक्तानि विगृह्ययाननिमित्तान्यात्मनो यदा न पश्यति शत्रोस्तु पश्यति, तदा विजिगीषुः सन्धाययानमनुतिष्ठेत् । इति सन्धाययानं व्याख्यातम् ।

सम्भूयप्रयाणमिति सूत्रम् । समहीनज्यायसां शत्रुं प्रति समुदेत्य प्रयाणमुच्यत इति सूत्रार्थः ।

यदा वा पश्येत्—'न शक्यमेकेन यातुमवश्यं च यातव्यम्' इति, तदा समहीनज्यायोभिः सामवायिकैः सम्भूय यायात्। एकत्र निर्दिष्टेनांशेनानेकत्रानिर्दिष्टेनांशेन। तेषामसमवाये दण्डमन्यतमस्मिन् निविष्टांशेन याचेत। संभूयाभिगमनेन वा निर्विश्येत। ध्रुवे लाभे निर्दिष्टेनांशेनाध्रुवे लाभांशेन॥

अंशो दण्डसमः पूर्वः प्रयाससम उत्तमः।
विलोपो वा यथालाभं प्रक्षेपसम एव वा॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
चतुर्थोऽध्यायः विगृह्यासनं सन्धायासनं विगृह्य-
यानं सन्धाययानं सम्भूयप्रयाणम्.
आदितो द्विशततमः॥

यदा वा पश्येन्न शक्यमित्यादि। असहायेन मया यातुं न शक्यते, यातव्यं चावश्यमिति यदा मन्येत, तदा समहीनज्यायोभिः समवेतैः सम्भूय यायाद् यातव्यम्। **एकत्रेत्यादि।** एकस्मिन् देशेंऽश इयानिति भाषित्वा यायाद् अनेकत्राभाषित्वा यायात् तत्तद्देशानुरोधेन। **तेषामसमवाय इति।** समादीनां मध्ये, अन्यतमस्मिन् अन्यतमे राज्ञि, असमवाये असमवेते सति, दण्डं निविष्टांशेन याचेत तद्देयत्वेन व्यवस्थितो योंऽशः परिमाणं तद्युक्तं सैन्यं देहीति याचेत। इह अन्यतमस्मिन् इति सर्वनामकार्यकरणमार्षम्। अन्यतरस्मिन् इति पाठे तु बहुविषयनिर्धारणाप्रतीतिः। **सम्भूयाभिगमनेन वा निर्विश्येतेति।** सम्भूयाभिगमनं वा सहायकर्मणो निर्वेशः कल्पेत, 'यदि मम कार्ये सम्भूयाभिगमनेन त्वमिदानीं साहाय्यं कुर्याः अहमपि तव कार्ये तथा साहाय्यं दास्यामि' इति वा साहाय्यदानप्रयोजनं निर्दिशेदित्यर्थः। **ध्रुवे लाभ इति।** लाभश्चेद् ध्रुवो भूम्यादिस्तर्हि, निर्दिष्टेनांशेन निर्विश्येत सहायकर्मनिर्वेशतया ध्रुवस्य कश्चिदंशो निर्देष्टव्यः पूर्वमेव। अध्रुवे लाभे, लाभांशेन निर्विश्येत अध्रुवस्य लब्धपदार्थस्य कश्चिदंशो निर्वेशतया निर्देष्टव्यः॥

यातव्यं सम्भूययानेन जितवद्भिर्लब्धस्य धनस्य कथं विभागस्तत्राह—**अंशो दण्डसम इति।** दत्तसैन्यबहुत्वाल्पत्वानुरूपो दातृणामंशः कल्प्य इति प्रथमः पक्षः। **प्रयाससम उत्तम इति।** परिस्पन्दाधिक्याल्पत्वानुरूपोंऽश

इत्युत्तमः पक्षः । **विलोपो वा यथालाभमिति** । यथालाभं तेन तेन परिलुण्टितोऽर्थस्तस्य तस्य परिलुण्टितुरंश इत्यपरः पक्षः । **प्रक्षेपसम एव वेति** । अथवा धनसाध्ये कार्ये सम्भूययातृभिः साधिते व्ययार्थधनप्रक्षेपबहुत्वाल्पत्वानुरूपो धनप्रक्षेप्तृणामंशः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
चतुर्थोऽध्यायः विगृह्यासनं सन्धायासनं विगृह्य-
यानं सन्धाययानं सम्भूयप्रयाणम् ,
आदितो द्विशततमः ॥

१०८—११०. प्रक. यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविराग-हेतवः प्रकृतीनां, सामवायिकविपरिमर्शश्च।

तुल्यसामन्तव्यसने यातव्यममित्रं वेत्यमित्रमभियायात्, तत्सिद्धौ यातव्यम्। अमित्रसिद्धौ हि यातव्यः साहाय्यं दद्यान्नामित्रो यातव्यसिद्धौ।

गुरुव्यसनं यातव्यं, लघुव्यसनममित्रं वेति गुरुव्यसनं सौकर्यतो यायादित्याचार्याः। नेति कौटल्यः—लघुव्यसनममित्रं यायात्। लघ्वपि हि व्यसनमभियुक्तस्य कृच्छ्रं भवति। सत्यं गुर्वपि गुरुतरं भवति। अनभियुक्तस्तु लघुव्यसनः सुखेन व्यसनं प्रतिकृत्यामित्रो यातव्यमभिसरेत्। पार्ष्णिं गृह्णीयात्।

यातव्यामित्रयोरभिग्रहचिन्तेति सूत्रम्। अरिसम्पद्युक्तो व्यसनी यातव्यः, अमित्रो नित्यापकारी सामन्तः, अभिग्रहः पीडनकर्शनादिः तद्धेतुत्वाद् यानमिहोच्यते, चिन्ता सम्प्रधारणम्। यातव्यामित्रयोर्मध्ये कतरं प्रति यानमनुष्ठेयमिति सम्प्रधारणमभिधीयत इति सूत्रार्थः। यानभेदाः कथिताः, यातव्यभेदास्तु कथ्यन्ते।

तुल्यसामन्तव्यसने यातव्यममित्रं वेतीत्यादि। तुल्ये सामन्तयोर्यातव्यामित्रयोर्व्यसने यातव्यं वा पूर्वमभियायादमित्रं वेति चिन्तायाम्, अमित्रमेव पूर्वमभियायात्, तत्साधनानन्तरं तु यातव्यमभियायात्। कुतः, **हि** यस्मात् कारणात् अमित्रसाधने विषये यातव्यो हेतुं ग्राहितो भृत्यभावी मित्रभावी वा सन् साहाय्यं विजिगीषवे दद्यात्, अमित्रस्तु यातव्यसाधने पूर्वमारभ्यमाणे साहाय्यं न दद्यादरिभावित्वेन विजिगीषुं प्रति नित्यापकारशीलत्वात्।

इत्थं व्यसनसाम्ये यानप्रकारमुक्त्वा व्यसनवैषम्ये आह—**गुरुव्यसनमित्यादि**। गुरुव्यसनं यातव्यं वा यायाल्लघुव्यसनममित्रं वेति चिन्तायां, गुरुव्यसनमेव पूर्वं यायात् सुखसाध्यत्वादित्याचार्या वदन्ति। तत् प्रतिषेधति—**नेति कौटल्य इत्यादि**। गुरुव्यसनलघुव्यसनसन्निपाते लघुव्यसनममित्रमेव यायात्, कुतः, लघ्वपि स्वव्यसनमभियोगेन युक्तं शत्रुणा कृच्छ्रप्रतिकार्यं भवतीति सुखजय्यः शत्रुः। यद्यपि यातव्यस्य गुरु व्यसनमभियोगेन युक्तं गुरुतरं भवतीति शत्रुरभियुक्तः सुजय्यतरो भवति, तथापि, लघुव्यसनोऽमित्र एवाभियोक्तव्यः, अन्यथा सोऽभियोगपीडाविरहादात्मनो व्यसनस्य

यातव्ययौगपद्ये गुरुव्यसनं न्यायवृत्तिं लघुव्यसनमन्यायवृत्तिं विरक्तप्रकृतिं वेति विरक्तप्रकृतिं यायात्। गुरुव्यसनं न्यायवृत्तिमभियुक्तं प्रकृतयोऽनुगृह्णन्ति। लघुव्यसनमन्यायवृत्तिमुपेक्षन्ते। विरक्ता बलवन्तमप्युच्छिन्दन्ति। तस्माद् विरक्तप्रकृतिमेव यायात्।

क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वेति — क्षीणलुब्धप्रकृतिं यायात्। क्षीणलुब्धा हि प्रकृतयः सुखेनोपजापं पीडां वोपगच्छन्ति, नापचरिताः प्रधानावग्रहसाध्या इत्याचार्याः। नेति कौटल्यः—क्षीणलुब्धा हि प्रकृतयो भर्तरि स्निग्धा भर्तृहिते तिष्ठन्ति। उपजापं वा विसंवादयन्ति, अनुरागे सार्वगुण्यमिति। तस्मादपचरितप्रकृतिमेव यायात्।

बलवन्तमन्यायवृत्तिं दुर्बलं वा न्यायवृत्तिमिति, बलवन्तमन्याय-

---

लघुनः सुखेन प्रतीकारं कृत्वा यातव्याय साहाय्यं दद्यात्, तस्य पार्ष्णिं वा गृह्णीयात्।

इत्थं द्विविषयं यानानुष्ठानमुक्त्वा त्रिविषयमाह — **यातव्ययौगपद्य** इत्यादि। न्याय्यवृत्तिर्गुरुव्यसन एकः, अन्याय्यवृत्तिर्लघुव्यसनोऽपरः, विरक्तप्रकृतिरन्य इति त्रिषु यातव्येषु कतमं यायादिति विचारणायां विरक्तप्रकृतिं यायात्। कुतः, न्याय्यवृत्तिर्गुरुव्यसनो हि प्रकृतिभिरनुगृह्येतेत्यसाध्यः, अन्याय्यवृत्तिर्लघुव्यसनः प्रकृतिभिरुपेक्ष्येत न पुनर्द्विष्येतेति केवलस्वबलसाध्यः, विरक्तप्रकृतिस्तु बलवानपि विरक्ताभिः स्वप्रकृतिभिरुच्छिद्येतेति विजिगीषोः सुखतरोच्छेद्य इत्येतस्मात् कारणात्।

क्षीणलुब्धप्रकृतिमपचरितप्रकृतिं वेतीत्यादि। क्षीणाः दुर्भिक्षव्यसनादिपीडिता लुब्धाश्च यस्य प्रकृतयस्तथाभूतस्यानादृतप्रकृतेश्चेत्युभयोर्यातव्ययोः प्रसङ्गे क्षीणलुब्धप्रकृतिं यायात्। कस्मात्, क्षीणलुब्धा हि प्रकृतयोऽनायासेन भेदयितुं पीडयितुं च शक्याः, न त्वपचरिताः प्रकृतयः। ता हि प्रधानपुरुषस्वीकारैकसाध्या इत्याचार्याणां मतम्। तत् प्रत्याचष्टे —**नेति कौटल्य** इत्यादि। कुतः, क्षीणलुब्धा हि प्रकृतयः भर्तरि स्नेहवत्यश्चेत् तस्य हितमेव कुर्युः, भेद्यमाना वा भेदं नाङ्गीकुर्युः स्वाम्यनुरागे सर्वगुणयोग इति मन्यमानाः। तस्मादनादृतप्रकृतिमेव यातव्यं यायात्।

बलवन्तमन्यायवृत्तिमित्यादि। अन्याय्यचरितो बलवानेकः न्याय्य-

वृत्तिं यायात्। बलवन्तमन्यायवृत्तिम् अभियुक्तं प्रकृतयो नानुगृह्णन्ति निष्पातयन्त्यमित्रं वास्य भजन्ते। दुर्बलं तु न्यायवृत्तिमभियुक्तं प्रकृतयः परिगृह्णन्ति, अनुनिष्पतन्ति वा।

अवक्षेपेण हि सतामसतां प्रग्रहेण च।
अभूतानां च हिंसानामधर्म्याणां प्रवर्तनैः॥
उचितानां चरित्राणां धर्मिष्ठानां निवर्तनैः।
अधर्मस्य प्रसङ्गेन धर्मस्यावग्रहेण च॥
अकार्याणां च करणैः कार्याणां च प्रणाशनैः।
अप्रदानैश्च देयानामदेयानां च साधनैः॥
अदण्डनैश्च दण्ड्यानां दण्ड्यानां चण्डदण्डनैः।
अग्राह्याणामुपग्राहैर्ग्राह्याणां चानभिग्रहैः॥

चरितो दुर्बल एक इत्यनयोः कतरमभियायादिति विमर्शे, बलवन्तमन्याय्यवृत्तिमेव यायात्। कुतः, तं हि शत्रुणाभियुक्तं प्रकृतयो नानुगृह्णन्ति, प्रत्युत दुर्गादिस्थानेभ्यो निष्कासयन्ति, अस्य शत्रुं वाश्रयन्ते। दुर्बलं तु न्याय्यचरितं परेणाभियुक्तं प्रकृतयोऽनुगृह्णन्ति, दुर्गादितो निष्क्रामन्तमनुनिष्क्रामन्ति च। इति यातव्यामित्रयोरभिग्रहचिन्ता व्याख्याता।

क्षयलोभविरागहेतवः प्रकृतीनामिति सूत्रम्। क्षयो गजतुरगमुख्यपुरुषाल्पीभावो धनाल्पीभावश्च लोभोऽतितृष्णा विरागः प्रद्वेषः त एते प्रकृतीनां कैर्हेतुभिरुत्पद्यन्त इत्येतदिहोच्यत इति सूत्रार्थः। प्रकृतिक्षयलोभविरागा नाम विजिगीषोर्यातव्यत्वप्रयोजकाः। अतस्तद्धेतवो विजिगीषुणा हानार्थं विज्ञातव्या इति कृत्वेहोपदिश्यन्ते।

तानेकान्वयेन श्लोकाष्टकेनाह— **अवक्षेपेण** हीत्यादि। सताम् **अवक्षेपेण**— विद्यावृत्ताभिजनशौर्यादिसम्पन्नानामवज्ञानेन—, असतां प्रग्रहेण— नटनर्तकादीनामर्चनेन —, अभूतानाम् अनुचितानां धर्मापेतानां च हिंसानां प्रवर्तनैः, उचितानां धर्मानपेतानां समुदाचाराणां निवर्तनैः, परस्त्रीग्रहणस्तेयाद्यधर्मासक्त्या, कूपतटाकनिर्माणादिधर्मप्रत्याख्यानेन, अनर्थफलकार्यानुष्ठानैः दुर्गसेतुकर्मादिकार्योपघातैः, भृत्यवेतनादीनां देयानामप्रदानैः, अपूर्वक्लृप्तानामुपदानां प्रजाभ्यः प्रसभहरणैः, दण्डार्होदण्डनैः, दण्ड्यानामत्युग्रदण्डनैः, अग्राह्याणां स्तेनादीनां स्वीकरणैः, जानपदत्वादिगुणोपेतानां पितृपितामह-

अनर्थ्यानां च करणैरर्थ्यानां च विघातनैः ।
अरक्षणैश्च चोरेभ्यः स्वयं च परिमोषणैः ॥
पातैः पुरुषकाराणां कर्मणां गुणदूषणैः ।
उपघातैः प्रधानानां मान्यानां चावमाननैः ॥
विरोधनैश्च वृद्धानां वैषम्येणानृतेन च ।
कृतस्याप्रतिकारेण स्थितस्याकरणेन च ॥
राज्ञः प्रमादालस्याभ्यां योगक्षेमवधेन च ।
प्रकृतीनां क्षयो लोभो वैराग्यं चोपजायते ॥
क्षीणाः प्रकृतयो लोभं लुब्धा यान्ति विरागताम् ।
विरक्ता यान्त्यमित्रं वा भर्तारं घ्नन्ति वा स्वयम् ॥

तस्मात् प्रकृतीनां क्षयलोभविरागकारणानि नोत्पादयेत् । उत्पन्नानि वा सद्यः प्रतिकुर्वीत ।

क्षीणा लुब्धा विरक्ता वा प्रकृतय इति । क्षीणाः पीडनोच्छेदन-

क्रमागतानां ब्राह्मणामसङ्ग्रहणैः, अनर्थावहानां सन्ध्यादीनां करणैः, अर्थावहानां तेषां विघातनैः, चोरेभ्यः प्रजानामरक्षणैः, स्वयं चौर्यकरणैः, पुरुषकाराणां त्यागैः, कर्मणां सम्यगनुष्ठितत्वगुणस्य निन्दनैः, प्रधानानां सेतुदुर्गादिकर्माध्यक्षाणां दोषारोपेण निकृष्टकर्मनियोजनैः, मान्यानाम् ऋत्विगाचार्यपुरोहितादीनामवमाननैः, विद्यादिवृद्धानां विरोधाचरणैः 'विरोधनैश्च भृत्यानाम्' इति पाठे भृत्यानामन्योन्यवैरोत्पादनैः, भृत्येषु समानसामर्थ्येषु विषमवृत्त्या, असत्यवचनेन, उपकारानिष्क्रयेण, स्थितस्य नित्यस्य शक्रोत्सवादेरकरणेन, राज्ञो द्यूतमृगयाद्यासक्तिलक्षणेन प्रमादेन, अलसतया, योगक्षेमवधेन इत्येतैर्हेतुभिः प्रकृतीनां क्षयो लोभो राज्ञि अपरागश्च जायते ॥

क्षीणा इत्यादि । प्रकृतयः क्षये जाते तत एव हेतोर्लोभं प्राप्नुवन्ति, लोभाच्च राज्ञि अपरागमलब्धकामाः प्राप्नुवन्ति, अपरक्ताश्च स्वामिनं परित्यज्य तच्छत्रुं भजन्ते अथवा स्वयमेव स्वामिनं मारयन्ति ॥

तस्मात् प्रकृतीनां क्षयलोभविरागहेतवो यथा नोत्पद्येरन् तथा प्रयतेत राजा, उत्पन्नांश्च सद्यः प्रतिक्रियया शमयेदित्याह — **तस्मादित्यादि** ।

क्षीणासु लुब्धासु विरक्तासु चेति त्रिविधासु प्रकृतिषु यथोत्तरं गौरवमित्याह — **क्षीणा लुब्धा इत्यादि** । इतिशब्दानन्तरं **गौरवक्रम** इति.

भयात् सद्यः सन्धिं युद्धं निष्पतनं वा रोचयन्ते । लुब्धा लोभेनासन्तुष्टाः परोपजापं लिप्सन्ते । विरक्ताः पराभियोगमभ्युत्तिष्ठन्ते ।

तासां हिरण्यधान्यक्षयः सर्वोपघाती कृच्छ्रप्रतीकारश्च । युग्यपुरुषक्षयो हिरण्यधान्यसाध्यः ।

लोभ ऐकदेशिको मुख्यायत्तः परार्थेषु शक्यः प्रतिहन्तुमादातुं वा ।

विरागः प्रधानावग्रहसाध्यः । निष्प्रधाना हि प्रकृतयो भोग्या भवन्त्यनुपजाप्याश्चान्येषामनापत्सहास्तु । प्रकृतिमुख्यप्रग्रहैस्तु बहुधा भिन्ना गुप्ता भवन्त्यापत्सहाश्च ।

शेषः । गौरवतारतम्यनिमित्तभूतांस्ताभ्यः सम्भावितानन्थनाह — **क्षीणाः पीडनोच्छेदनभयादि**त्यादि । क्षीणा हि प्रकृतयः पीडनमुच्छेदनं वा शङ्कमानाः शत्रुणा सह सन्धिं सद्यः कुर्युरनिच्छत्यपि विजिगीषौ शत्रोः प्रतिहतोत्साहतामापाद्य पश्चात् तं कर्तव्यं मन्यमाने । युद्धं वा ताः सद्य आरभेरन् विजिगीषौ परस्यच्छिद्रमुपलभ्य पश्चात् तद् आरम्भणीयं मन्यमानेऽपि । निष्क्रमणं वा दुर्गात् ताः सद्यः कुर्युर्विजिगीषौ 'सर्वोपायप्रयोगनैष्फल्यदर्शने पश्चाद् दुर्गम् आदीप्य निष्पतिष्यामी'ति मन्यमानेऽपि । अथ लुब्धाः प्रकृतयो लोभेनातृप्ताः परेण क्रियमाणं भेदमुपगच्छन्ति । विरक्तास्तु विजिगीषुं प्रति परेणारब्धस्याभियोगस्याभिमुख्येन चेष्टन्ते — शत्रुपक्षमनुप्रविश्य विजिगीषुमभियुञ्जत इत्यर्थः ।

तासामिति । प्रकृतीनां, हिरण्यधान्यक्षयः, सर्वोपघाती गजतुरगपदात्यादीनां सर्वेषामुपघातकः, अत एव कृच्छ्रप्रतीकारः अशक्यप्रतिविधानः । अश्वपुरुषक्षयस्तु हिरण्यधान्यसाध्यः सुकरप्रतिविधानः ।

लोभ इति । सः, ऐकदेशिकः प्रकृत्येकदेशाश्रितः, मुख्यायत्तः प्रवर्तननिवर्तनयोर्मुख्याधीनः, परार्थेषु शक्यः प्रतिहन्तुमादातुं वा परेषां यातव्यादिप्रभृतीनामर्थैरेव विषयभूतैः शमयितुं शक्यः मुख्यपुरुषैः स्वयं ग्रहीतुं शक्यः ।

विरागः प्रधानावग्रहसाध्य इति । विरागस्तु प्रधानपुरुषनिग्रहसाध्यः । **निष्प्रधाना हीति** । मुख्यरहिताः, प्रकृतयः, भोग्याः विजिगीषोः भवन्ति, अन्येषाम् अनुपजाप्याश्च पराभेद्याश्च भवन्ति । यद्यपीदृशो निष्प्रधानत्वे, तथापि कश्चिद् दोषो गणनीयोऽस्तीत्याह — अनापत्स-

सामवायिकानामपि सन्धिविग्रहकारणान्यवेक्ष्य शक्तिशौचयुक्तेन सम्भूय यायात्। शक्तिमान् हि पार्ष्णिग्रहणे यात्रासाहाय्यदाने वा शक्तः, शुचिः सिद्धौ चासिद्धौ च यथास्थितकारीति।

तेषां ज्यायसैकेन द्वाभ्यां समाभ्यां वा सम्भूय यातव्यमिति। द्वाभ्यां समाभ्यां श्रेयः, ज्यायसा ह्यवगृहीतश्चरति समाभ्यामतिसन्धानाधिक्ये वा तौ हि सुखौ भेदयितुम्। दुष्टश्चैको द्वाभ्यां नियन्तुं भेदोपग्रहं चोपगन्तुमिति।

हास्तु आपत्सहास्तु न भवन्ति आपद्युपस्थितायां विजिगीषुं परित्यज्य गच्छन्तीत्यर्थः। सप्रधानत्वे तु बहुविधैः प्रकृतिमुख्यकृतैरुपलालनैः पराभेद्या रक्षिताश्च सत्यः पराभियोगविपत्सहाश्च भवन्तीत्याह — **प्रकृतिमुख्यप्रग्रहैस्त्वित्यादि**। इत्थं क्षयलोभविरागहेतवः प्रकृतीनामित्येतद् व्याख्यातम्।

सामवायिकविपरिमर्श इति सूत्रम्। समवायेन चरन्तीति सामवायिका विजिगीष्वनुयायिनः तेषां विपरिमर्शो गुरुलघुभावचिन्तनमभिधीयत इति सूत्रार्थः। सम्भूयप्रयाणे सामवायिकानामंशकल्पनमुक्तं, गुरुलघुभावस्तु नोक्तः, स इह निरूप्यते।

सामवायिकानामपीति। तेषां च मध्ये, सन्धिविग्रहकारणानि, अवेक्ष्य गुरुलघुभावतः पर्यालोच्य, शक्तिशौचयुक्तेन सम्भूय यायात्। शक्तिशौचयुक्ताविति पाठे शक्तिशौचयोगे सतीत्यर्थः। शक्तिशौचयोगस्य फलमाह— **शक्तिमान् ही**त्यादि। उत्साहादिशक्तित्रययुक्तो हि पार्ष्णिग्राहवारणे, युद्धयात्रासहायसेनादाने वा समर्थो भवति। शुचिश्च ईप्सितस्यार्थस्य सिद्धावसिद्धौ वा न्याय्यमनुतिष्ठति।

सामवायिकापेक्षायामेको ज्यायान् लभ्यते समौ च द्वौ, तत्र का प्रतिपत्तिरिति चिन्तायां, द्वाभ्यां समाभ्यां सम्भूययानं प्रशस्तं, कस्मात्, यस्मात् ज्यायसा सह याने विजिगीषुणा तदधश्चरितव्यं, समाभ्यां सह याने न तथा चरितव्यमित्येको गुणः। पक्षे चातिसन्धानवशादाधिक्ये लब्धे तौ परस्परस्माद् भेदयितुमनायासशक्यौ। यदि च तयोरन्यतरो दुष्टो भवेत्, स विजिगीषुणा तदन्यसहायेन दमयितुं शक्यः, दूष्यादिद्वारकेण भेदप्रयोगेण निग्रहं च गमयितुं शक्य इत्याह— **तेषां ज्यायसैकेने**त्यादि।

समेनैकेन द्वाभ्यां हीनाभ्यां वेति । द्वाभ्यां हीनाभ्यां श्रेयः । तौ हि द्विकार्यसाधकौ वश्यौ च भवतः । कार्यसिद्धौ तु —

कृतार्थाज्ज्यायसो गूढः सापदेशमपस्रवेत् ।
अशुचेः शुचिवृत्तात् तु प्रतीक्षेताविसर्जनात् ॥
सत्रादपसरेद् यत्तः कलत्रमपनीय वा ।
समादपि हि लब्धार्थाद् विश्वस्तस्य भयं भवेत् ॥
ज्यायस्त्वे चापि लब्धार्थः समो विपरिकल्पते ।
अभ्युच्चितश्चाविश्वास्यो वृद्धिश्चित्तविकारिणी ॥
विशिष्टादल्पमप्यंशं लब्ध्वा तुष्टमुखो व्रजेत् ।
अनंशो वा ततोऽस्याङ्के प्रहृत्य द्विगुणं हरेत् ॥

समेनैकेन वा सम्भूययानमनुष्ठेयं द्वाभ्यां हीनाभ्यां वेति चिन्तायां द्वितीयः पक्ष एव श्रेयान्, कस्मात्, यस्मात् हीनौ पुरः पश्चाच्च रक्षकौ भूत्वा कार्यद्वयं साधयन्तौ विजिगीषोर्वशवर्तिनौ च भवत इत्याह — **समेनैकेन द्वाभ्यां हीनाभ्यां** वेत्यादि ।

एवं राजान्तरेषु सम्भूययानाय विजिगीषुणा मुख्येन सतापेक्ष्यमाणेषु विधिरुक्तः, विजिगीषौ तु राजान्तरैरपेक्ष्यमाणे विधिमाह — **कार्यसिद्धौ तु कृतार्थादि**त्यादि । साह्यार्थमात्मनेतरि ज्यायसि कार्यसिद्ध्यनन्तरमशुचौ दृष्टे अन्याविदितः किमपि निमित्तमपदिशंस्तत्सकाशाद् विजिगीषुरपस्रवेत् अपेयात् । तं शुचिवृत्तमवगत्य तु आ विसर्जनाद् विसर्जनं प्रतीक्षमाणस्तदन्तिक एव तिष्ठेत् ॥

अपसरणस्य कर्तव्यतायामाह — **सत्रादि**ति । दुर्गादिः सङ्कटप्रदेशः सत्रं तस्मात्, अपसरेत्, यत्तः यत्नवान्, किं कृत्वा, कलत्रमपनीय वा कलत्रमित्यन्तरङ्गपरिग्रहाणामुपलक्षणं तान् अन्यत्र नीत्वा । समादपसरणे कारणमाह — **समादपि** हीति । समानादपि लब्धार्थात् विश्वस्तस्य भयं भवेत् अनर्थो जायेत, तस्याशुचित्वात् ॥

ज्यायान् वा भवतु समो वा । लब्धार्थः सर्वो विपरीतवृत्तिर्भवति । अभ्युच्चितो वृद्धिप्राप्तः न विश्वसनीयः । वृद्धिर्हि नाम चित्तं विकारयतीत्याह — **ज्यायस्त्वे चापी**त्यादि ॥

विशिष्टादिति । ज्यायसः सकाशात्, अल्पमप्यंशं लब्ध्वा **तुष्टमुखः**

कृतार्थस्तु स्वयं नेता विसृजेत् सामवायिकान् ।
अपि जीयेत न जयेन्मण्डलेष्टस्तथा भवेत् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे पञ्चमोऽध्यायः
यातव्यामित्रयोरभिग्रहचिन्ता क्षयलोभविरागहेतवः
प्रकृतीनां सामवायिकविपरिमर्शः,
आदितस्त्रिशततमः ॥

प्रसन्नवदनो गच्छेत् । अनंशो वा अलब्धांशो वा तुष्टमुखो गच्छेत् । ततः पश्चात्, अत्याङ्के प्रहृत्य विशिष्टस्य रन्ध्रे प्रहरणं दत्त्वा, प्रकृत्येति पाठे प्रयत्नं कृत्वेत्यर्थः, द्विगुणम् आदेयांशद्विगुणं, हरेत् ॥

विजिगीषोः परतन्त्रयानेऽनुष्ठानमभिधाय स्वतन्त्रयानेऽनुष्ठानमाह — **कृतार्थस्त्विति** । स्वयं नेता तु स्वतन्त्रयानकर्ता तु, विजिगीषुः, कृतार्थः सिद्धसमीहितः, सामवायिकान्, विसृजेत् सत्कृत्य प्रेषयेत् । जीयेतापि स्वयं न्यूनांशत्वं प्राप्येतापि, न तु जयेत् न पुनः सामवायिकान् न्यूनांशत्वं प्रापयेत् । तथा तेन प्रकारेणानुष्ठाने, मण्डलेष्टः राजमण्डलस्य प्रियः, भवेत् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे पञ्चमोऽध्यायः
यातव्यामित्रयोरभिग्रहचिन्ता, क्षयलोभविरागहेतवः
प्रकृतीनां, सामवायिकविपरिमर्शः,
आदितस्त्रिशततमः ॥

१११,११२. प्रक. संहितप्रयाणिकं, परिपणितापरिपणितापसृतसन्धयश्च ।

विजिगीषुर्द्वितीयां प्रकृतिमेवमतिसन्दध्यात् । सामन्तं संहितप्रयाणे योजयेत्—'त्वमितो याहि, अहमितो यास्यामि, समानो लाभ' इति ।

लाभसाम्ये सन्धिः । वैषम्ये विक्रमः ।

सन्धिः परिपणितश्चापरिपणितश्च ।

संहितप्रयाणिकमिति सूत्रम् । संहितयोः अन्योन्यकृतसन्धिकयोर्विजिगीष्वोः स्वं स्वं यातव्यं प्रति यद् भिन्नदिक्कं प्रयाणं तदुच्यत इति सूत्रार्थः ।

यानं हि प्रकृतं द्विविधं—शुद्धं गुणान्तरमिश्रमिति । तत्र शुद्धं 'यानेन वृद्धिमातिष्ठेद्' इति प्रथमाध्यायेऽभिहितम् । गुणान्तरमिश्रमपि चतुर्विधं—विगृह्ययानं सन्धाययानं सम्भूयप्रयाणं संहितप्रयाणं चेति । तत्रापि विगृह्ययानादित्रिकं निरूपितम् । सम्भूयप्रयाणं त्वधुना निरूप्यते ।

विजिगीषुरिति । सः, द्वितीयां प्रकृतिम् अरिप्रकृतिम्, एवमतिसन्दध्यात् वक्ष्यमाणप्रकारेण वञ्चयेत् । तं प्रकारमाह—सामन्तं संहितप्रयाणे योजयेत् प्रवर्तयेत् । किमित्युक्त्वा, त्वम् इतो याहि यत्र ते यातव्यस्तत्र देशे याहि, अहमितो यास्यामि यत्र मे यातव्यस्तत्राहं यास्यामि । समानो लाभः उभयत्रोत्पत्स्यमानो लाभ उभयोरावयोः समानः । इत्युक्त्वा ।

लाभसाम्ये सन्धिरिति । उभयोर्लाभे समाने सन्धिः समशक्तित्वात् करणीयः । वैषम्ये विक्रमः विजिगीषोर्लाभाधिक्ये स ज्यायस्त्वाद् विक्रमेत । इति संहितप्रयाणिकं व्याख्यातम् ।

परिपणितापरिपणितापसृताश्च सन्धय इति सूत्रम् । परिपणितसन्धिः अपरिपणितसन्धिः अपसृतसन्धिश्चाभिधीयत इति सूत्रार्थः । परिपणितसन्धिर्नाम देशं कालं कार्यं चानुरुध्य क्रियमाणः । तद्विपरीतोऽपरिपणितसन्धिः । आत्मानं कुतश्चिन्निमित्ताद् विहायापगतैर्मित्रैर्भृत्यैर्वा सह सन्धिरपसृतसन्धिः ।

तृतीयाध्याये 'त्रिविधा हीनसन्धय' इति हीनसन्धय उक्ताः । किमेतावन्त एव सन्धय इति सन्देहे परिपणितादयोऽन्येऽपि सन्धयः सन्तीति निरूपयितुमिदं प्रकरणमारभ्यते ।

सन्धिः परिपणितश्चापरिपणितश्चेति । निरूप्यत इति शेषः ।

'त्वमेतं देशं याह्यहमिमं देशं यास्यामीति' परिपणितदेशः ।

'त्वमेतावन्तं कालं चेष्टस्व, अहमेतावन्तं कालं चेष्टिष्य इति' परिपणितकालः ।

'त्वमेतावत् कार्यं साधय, अहमेतावत् कार्यं साधयिष्यामीति' परिपणितार्थः ।

यदि वा मन्येत—'शैलवननदीदुर्गमटवीव्यवहितं छिन्नधान्यपुरुषवीवधासारमयवसेन्धनोदकमविज्ञातं प्रकृष्टमन्यभावदेशीयं वा सैन्यव्यायामानामलब्धभौमं वा देशं परो यास्यति विपरीतमहम्' इति, एतस्मिन् विशेषे परिपणितदेशं सन्धिमुपेयात् ।

यदि वा मन्येत—'प्रवर्षोष्णशीतमतिव्याधिप्रायमुपक्षीणाहारोपभोगं सैन्यव्यायामानां चौपरोधिकं कार्यसाधनानामूनमतिरिक्तं

तत्र परिपणितसन्धिं सप्तविधं क्रमेणाह—**त्वमेतमित्यादि** । 'त्वमेतं देशं याहि, अहमिमं देशं यास्यामी'त्येवं देशं परिपण्य कृतः सन्धिः परिपणितदेशो नाम प्रथमः परिपणितसन्धिः ।

त्वमेतावन्तमित्यादि । 'त्वमियन्तं कालं यथेष्टं चेष्टस्व, अहमियन्तं कालं यथेष्टं चेष्टिष्य' इति कालं परिपण्य कृतः परिपणितकाल इति द्वितीयः ।

त्वमेतावत् कार्यमित्यादि । 'त्वं दुर्गादिष्वेतावत् कार्यं निर्वर्तय, अहमेतावन्निर्वर्तयिष्यामी'ति कार्यं परिपण्य कृतः सन्धिः परिपणितार्थ इति तृतीयः ।

त्रयाणामेषां क्रमेण प्रयोगनिमित्तान्याह—**यदि वा मन्येत शैलवनेत्यादि** । 'गिरिदुर्गयुक्तं वनदुर्गयुक्तं नदीदुर्गयुक्तं कान्तारव्यवहितं देशान्तरादनानेतव्यधान्यम् अनानेतव्यपुरुषम् अनानेतव्यतैलघृतादिभारम् अनानेतव्यसुहृद्बलं तृणकाष्ठजलरहितम् अपरिचितं विप्रकृष्टम् अन्यभावदेशीयम्—अस्वामिभक्तदेशीयजनं—वा सैन्यपरिस्पन्दयोग्यभूमिरहितं वा अत एव दुस्साधं देशं परो यास्यति, विपरीतं सुसाधं देशम् अहं यास्यामि' इति यदि मन्येत विजिगीषुः, एतस्मिन् कारणविशेषे परिपणितदेशं सन्धिं कुर्यात् ।

यदि वा मन्येत प्रवर्षेत्यादि । 'प्रकृष्टवर्षं प्रकृष्टोष्णं प्रकृष्टशीतम् अत्यन्तव्याधिबहुलम् आहारोपभोगार्थद्रव्योपक्षययुक्तं सैन्यव्यायामोपरोधहेतुं

वा कालं परश्चेष्टिष्यते, विपरीतमहम्' इति, तस्मिन् विशेषे परिपणितकालं सन्धिमुपेयात् ।

यदि वा मन्येत — 'प्रत्यादेयं प्रकृतिकोपकं दीर्घकालं महाक्षयव्ययमल्पमनर्थानुबन्धमकल्यमधर्म्यं मध्यमोदासीनविरुद्धं मित्रोपघातकं वा कार्यं परः साधयिष्यति, विपरीतमहम्' इति, तस्मिन् विशेषे परिपणितार्थं सन्धिमुपेयात् ।

एवं देशकालयोः कालकार्ययोर्देशकार्ययोर्देशकालकार्याणां चावस्थापनात् सप्तविधः परिपणितः । तस्मिन् प्रागेवारभ्य प्रतिष्ठाप्य च स्वकर्माणि, परकर्मसु विक्रमेत ।

व्यसनत्वरावमानालस्ययुक्तमज्ञं वा शत्रुमतिसन्धातुकामो देशकालकार्याणामनवस्थापनात् 'संहितौ स्वः' इति सन्धिविश्वासेन परच्छिद्रमासाद्य प्रहरेत् । इत्यपरिपणितः ।

कार्यसाधनानामपर्याप्तम् अधिकं वा कालं परो व्यापरिष्यते, अहं तु यथोक्तप्रत्यनीकं कालं चेष्टिष्ये ' इति चेद् विजिगीषुर्मन्येत, एतस्मिन् कालविशेषे निमित्ते परिपणितकालं सन्धिं कुर्यात् ।

यदिवा मन्येत प्रत्यादेयमित्यादि । 'रक्षणासुकरत्वात् परप्रत्याच्छेद्यं प्रकृतिकोपजनकं दीर्घकालनिर्वर्त्यं प्रभूतपुरुषनाशं प्रभूतधनव्ययम् अल्पम् अनर्थोत्तरम् अनुष्ठानकालेऽपि दुःखकरं धर्मापेतं मध्यमोदासीनयोर्विरुद्धं मित्रस्यापि पीडावहं कार्यं परः साधयिष्यति, अहं तु यथोक्तविपरीतं कार्यं साधयिष्यामि' इति चेन्मन्येत विजिगीषुः, एवंविधे विशेषे परिपणितार्थं सन्धिं कुर्यात् ।

इत्थं त्रयः प्रकाराः परिपणितसन्धेरुक्ताः । एष्वेव देशकालयोः कालकार्ययोः देशकार्ययोः देशकालकार्याणां चेत्येवमन्योन्यमिश्रणे चत्वारोऽन्ये प्रकारा भवन्तीति सप्तविधः परिपणितसन्धिरित्याह — **एवं देशकालयोरित्यादि । तस्मिन्निति ।** यथोक्ते परिपणितसन्धावुपेते, प्रागेव पूर्वमेव, स्वकर्माणि आरभ्य प्रतिष्ठाप्य च फलपर्यन्तानुष्ठानेन परिसमाप्य च, परकर्मसु विक्रमेत उपघाताय यतेत ।

अपरिपणितसन्धिमाह—**व्यसनत्वरावमानालस्ययुक्तमज्ञं वेत्यादि ।** पापभूताद्यासक्त्या त्वरया अवज्ञया आलस्येन च युक्तम् अविद्वांसं शत्रुम्

तत्रैतद् भवति—

सामन्तेनैव सामन्तं विद्वानायोज्य विग्रहे ।
ततोऽन्यस्य हरेद् भूमिं छित्त्वा पक्षं समन्ततः ॥

सन्धेरकृतचिकीर्षा कृतश्लेषणं कृतविदूषणमवशीर्णक्रिया च । विक्रमस्य प्रकाशयुद्धं, कूटयुद्धं, तूष्णींयुद्धम् । इति सन्धिविक्रमौ ।

अपूर्वस्य सन्धेः सानुबन्धैः सामादिभिः पर्येषणं समहीनज्यायसां च यथाबलमवस्थापनमकृतचिकीर्षा ।

कृतस्य प्रियहिताभ्यामुभयतः परिपालनं यथासम्भाषितस्य च निबन्धनस्यानुवर्तनं रक्षणं च 'कथं परस्मान्न भिद्येत इति' कृतश्लेषणम् ।

अतिसन्धित्सुर्विजिगीषुर्देशकालकार्याणां व्यवस्थापनमकृत्वैव 'संहितावावां भवावः' इति वाङ्मात्रकृतेन सन्धिना विश्वासमुत्पाद्य परस्यच्छिद्रमुपलभ्य प्रहरेत् । इत्यपरिपणितसन्धिर्व्याख्यातः ।

तत्रैतद् भवतीति । उक्ते सन्धौ कृते तदुत्तरकरणीयमिदं भवति ।

तच्छ्लोकेनाह — **सामन्तेनैवेति** । विद्वान् विजिगीषुः, सामन्तेनैव पार्ष्णिग्राहेणैव सह, सामन्तं पार्ष्णिग्राहानन्तरं राजानमर्थादात्मन आक्रन्दं विग्रहे आयोज्य, ततः अन्यस्य यातव्यस्य, भूमिं हरेत् । किं कृत्वा, समन्ततः पक्षं यातव्यमित्रं, छित्त्वा उच्छिद्य ॥

अकृतचिकीर्षादयश्चत्वारः सन्धेर्धर्माः, प्रकाशयुद्धादयस्त्रयो विग्रहस्य धर्मा इत्याह— **सन्धेरकृतचिकीर्षेत्यादि** । **इति सन्धिविक्रमाविति** । विभक्ताविति शेषः ।

सन्धिधर्मेष्वकृतचिकीर्षां निरूपयति — **अपूर्वस्य सन्धेरिति** । केनचिद् राज्ञा सह पूर्वमकृतस्य सन्धेः, सानुबन्धैः सामादिभिः पर्येषणं दानानुबन्धयुक्तैः सामभिः सामानुबन्धयुक्तैर्दानैश्चानुष्ठानाध्यवसायः, समहीनज्यायसां यथाबलमवस्थापनं च समशक्तिकेन कोशदण्डादिदानोपादानाविव्यवहाराकरणं हीनात् कोशदण्डादिग्रहणं ज्यायसे कोशदण्डादिदानमित्येवंरूपं समादीनां स्वबलानतिक्रमेणावस्थानाकलनं च, अकृतचिकीर्षा नाम ।

कृतश्लेषणमाह — **कृतस्य प्रियहिताभ्यामुभयतः परिपालनमित्यादि** । कृतस्य सन्धेः प्रियाचरणेन हिताचरणेन च उभाभ्यां पक्षाभ्यां रक्षणं

परस्य अपसन्धेयतां दूष्यातिसन्धानेन स्थापयित्वा व्यतिक्रमः कृतविदूषणम् ।

भृत्येन मित्रेण वा दोषापसृतेन प्रतिसन्धानमवशीर्णक्रिया ।

तस्यां गतागतश्चतुर्विधः — कारणाद्गतागतः, विपरीतः, कारणाद्गतोऽकारणादागतः, विपरीतश्चेति ।

स्वामिनो दोषेण गतो गुणेनागतः परस्य गुणेन गतो दोषेणागत इति कारणाद्गतागतः सन्धेयः ।

स्वदोषेण गतागतो गुणमुभयोः परित्यज्य अकारणाद्गतागतश्चलबुद्धिरसन्धेयः ।

यथासम्भाषितस्य च समयबन्धस्यानुवर्तनं शत्रूपजापात् स यथा न विहतो भवेत् तथा रक्षणं च, कृतश्लेषणं नाम ।

कृतविदूषणमाह — **परस्यापसन्धेयतामित्यादि** । दूष्यद्वारकेणातिसन्धानेन निमित्तेन परस्य सन्धानानर्हत्वं स्थापयित्वा, व्यतिक्रमः — विजिगीषोः पूर्वकृतसन्धिलङ्घनं — कृतविदूषणमुच्यते ।

अवशीर्णक्रियामाह— **भृत्येनेत्यादि** । तेन वा, मित्रेण वा, दोषापसृतेन कुतश्चिद् दोषाद् विजिगीषुं परित्यज्य गतेन, प्रतिसन्धानं पुनःसन्धिकरणम्, अवशीर्णक्रिया नाम । इयमपसृतसन्धावन्तर्भवति ।

तस्यामिति । अवशीर्णक्रियायां, गतागतः गत्वा प्रत्यागतः, चतुर्विधः चतुष्प्रकारः । प्रकारानाह — **कारणाद्गतागत** इत्यादि । कारणादेव गतः कारणादेव च प्रत्यागत इत्येकः, अकारणाद् गतः अकारणादेव चागत इति पूर्वविपरीतो द्वितीयः, कारणाद्गतोऽकारणान् प्रत्यागत इति तृतीयः, अकारणाद् गतः कारणात् प्रत्यागत इति तृतीयविपरीतश्चतुर्थः ।

तत्र कारणाद्गतागतं प्रत्याह — **स्वामिन** इति । तस्य, दोषेण अप्रसादलक्षणेन, गतः, गुणेन स्वामिप्रसादलक्षणेन, आगतः । परस्य, गुणेन गतः गत्वा परमुपाश्रितः, दोषेण परस्मिन् दोषदर्शनेन निमित्तेन, आगतः परं विहाय स्वामिनं प्रत्यागतः । इति सनिमित्तगमनागमनकारित्वाद्धेतोः, कारणाद्गतागतः, सन्धेयः सन्धातुं योग्यः ।

: विनैव स्वामिदोषं स्वदोषेण स्वामिनं विहाय परमुपाश्रितः तेनैव हेतुना परमपि विहाय स्वामिनं प्रत्यागतः स्वामिपरयोरुभयोर्गुणप्रत्याकलन-

स्वामिनो दोषेण गतः परस्मात् स्वदोषेणागत इति कारणाद् गतोऽकारणादागतस्तर्कयितव्यः—'परप्रयुक्तः स्वेन वा दोषेणापकर्तुकामः, परस्योच्छेत्तारममित्रं मे ज्ञात्वा प्रतिघातभयादागतः, परं वा मामुच्छेत्तुकामं परित्यज्यानृशंस्यादागतः' इति । ज्ञात्वा कल्याणबुद्धिं पूजयेदन्यथाबुद्धिमपकृष्टं वासयेत् ।

स्वदोषेण गतः परदोषेणागतः इत्यकारणाद्गतः कारणादागतस्तर्कयितव्यः—'छिद्रं मे पूरयिष्यति, उचितोऽयमस्य वासः, परत्रास्य जनो न रमते, मित्रैर्मे संहितः, शत्रुभिर्विगृहीतः, लुब्धक्रूरादाविग्नः, शत्रुसंहिताद् वा परस्माद्' इति । ज्ञात्वा यथाबुद्ध्यवस्थापयितव्यः ।

विकलश्चञ्चलबुद्धिश्चेति अकारणाद्गतागतो न सन्धानयोग्य इत्याह— **स्वदोषेणेत्यादि** ।

स्वामिनो दोषेण तं विहाय शत्रुमाश्रितः शत्रोः सकाशात् स्वदोषेण प्रत्यागत इति हेतोः कारणाद्गतोऽकारणादागतस्तर्कयितव्य इत्याह — **स्वामिनो दोषेण गत** इत्यादि । तर्कणप्रकारमाह — **परप्रयुक्त** इत्यादि । 'किमयं परचोदनया मामपकर्तुकाम आगतः, अथवा मया पूर्वकृतमपकारं स्मरन् स्वेनैव बुद्धिदोषेण मामपकर्तुकाम आगतः, उत ममामित्रं शत्रुसकाशागतपुरुषवधप्रवृत्तं दृष्ट्वा स्वात्मनोऽपि शत्रुसकाशागतत्वाद् वधमाशङ्कमान आगतः, उताहो मदुच्छेदकृतसमीहं मे शत्रुं परित्यज्य मयि पूर्वपरिचयस्नेहादागतः, इत्येवं तर्कयितव्यः । ज्ञात्वेत्यादि । पुनरागमनकारणेषु चतुर्षु अन्यतमं निर्धार्य तं चेत् कल्याणबुद्धिमवगच्छेत्, तमासन्ने कृत्वा सत्कुर्यात् । अन्यथाबुद्धिं दूरे वासयेत् ।

अकारणाद्गतः कारणादागतो यः सोऽपि स्वामिदोषमन्तरेण स्वेनैव दोषेण गतः परदोषेण प्रत्यागत इत्यतस्तर्कयितव्य इत्याह — **स्वदोषेण गत** इत्यादि । तर्कणप्रकारमाह — **छिद्रमित्यादि** । किमयं मम छिद्रं परस्य सुखप्रवेश्यं यथा स्यात् तथा विस्तारयिष्यति, अथवास्यैतज्जनपदवासः उपशयोचितः, यद्वास्य कलत्रादिः परिजनः परदेशवासं न रोचयते, आहो अयं मम मित्रैः कृतसन्धानः, उत शत्रुभिर्विप्रकृतः, उताहो परस्माल्लुब्धक्रूराद् भीतः, शत्रुणा कृतसन्धेर्वा परस्माद् इत्येवं तर्कयितव्यः । ज्ञात्वेत्यादि । तर्कणेनागमनहेतुं निर्धार्य तदीयबुद्धिकल्याणत्वाकल्याणत्वानुरोधेन स वर्तयितव्यः ।

कृतप्रणाशः शक्तिहानिर्विद्यापण्यत्वमाशानिर्वेदो देशलौल्यमविश्वासो बलवद्विग्रहो वा परित्यागस्थानमित्याचार्याः । भयमवृत्तिरमर्ष इति कौटल्यः ।

इहापकारी त्याज्यः । परापकारी सन्धेयः । उभयापकारी तर्कयितव्य इति समानम् ।

असन्धेयेन त्ववश्यं सन्धातव्ये यतः प्रभावः ततः प्रतिविदध्यात् ।

सोपकारं व्यवहितं गुप्तमायुःक्षयादिति ।
वासयेदरिपक्षीयमवशीर्णक्रियाविधौ ॥

अथ स्वामिनः परित्याज्यत्वे हेतुभूतान् दोषानाह — **कृतप्रणाश** इत्यादि । कृतप्रणाशः कृतोपकारास्वीकरणं, शक्तिहानिः शक्तीनां क्षयः, विद्यापण्यत्वं विद्या पण्यमिव पण्यं विक्रेयवस्तुतुल्या मूल्यप्रतिग्राह्यप्राकृतपण्यवस्तुसाधारणप्रतिपत्तिविषय इति यावत् यस्य स विद्यापण्यः विद्यावहेली तस्य भावस्तत्त्वम्, आशानिर्वेदः ददामीति वचनेनाशामुत्पाद्य अदानेन ततो निर्वेदजननं, देशलौल्यं देशे दंशमशकव्याध्युपद्रवः, अविश्वासः भृत्येष्वविश्वस्तत्वं, बलवद्विग्रहो वा बलवता शत्रुणा विगृह्यासनं वा, परित्यागस्थानं स्वामिपरित्यागहेतुः, इत्याचार्याः । भयम् अनारम्भः क्रोधः इति त्रयमेव परित्यागस्थानमिति स्वमतमित्याह — **भयमि**त्यादि ।

गतागतं प्रति भूयो विशेषमाह—**इहापकारी त्याज्य** इति । आत्मनोऽपकृत्य गतः परस्यापकारमकृत्वा प्रत्यागतः त्यक्तव्यः न तु सन्धेयः । परापकारी सन्धेयः इहापकारमकृत्वैव गतः परस्यापकारं कृत्वा प्रत्यागतः सन्धातुं योग्यः । **उभयापकारी तर्कयितव्य** इत्यादि । इह परस्मिंश्च कृतापकारः परीक्षणीयः केन निमित्तेनागत इति । यथाबुद्धि चावस्थापनीय इति प्राग्वत् ।

असन्धेयेन त्ववश्यं सन्धातव्ये इति । सन्धानायोग्येन सह सन्धानेऽवश्यकरणीयत्वेनापतिते, यतः प्रभावस्ततः प्रतिविदध्यात् यत् परस्य प्रभावे निमित्तं तद् वारयेत् ।

अथ परपक्षीय आत्माश्रितः केनचिद् दोषेण परं गत्वा पुनरायातः । तथाविधेन गतागतेनावशीर्णविशेषभूतेन कथं सन्धातव्यमित्यपेक्षायामाह — **सोपकारमिति** । अवशीर्णक्रियाविधौ, अरिपक्षीयं गतागतं जनं, सोपकारं

विक्रामयेद् भर्तरि वा सिद्धं वा दण्डचारिणम् ।
कुर्यादमित्राटवीषु प्रत्यन्ते वान्यतः क्षिपेत् ॥
पण्यं कुर्यादसिद्धं वा सिद्धं वा तेन संवृतम् ।
तस्यैव दोषेणादूष्य परसन्धेयकारणात् ॥
अथवा शमयेदेनमायत्यर्थमुपांशुना ।
आयत्यां च वधप्रेप्सुं दृष्ट्वा हन्याद् गतागतम् ॥
अरितोऽभ्यागतो दोषः शत्रुसंवासकारितः ।
सर्पसंवासधर्मित्वान्नित्योद्वेगेन दूषितः ॥

स्वाम्युपकारावहं, व्यवहितं भृत्यान्तराधश्चरं स्वाम्यनासन्नम् , आ आयुःक्षयाद् गुप्तं यावज्जीवं भृत्यैरन्याविज्ञातरक्षितं, कृत्वेति शेषः, इति अनेन प्रकारेण, वासयेत् ॥

विक्रामयेद् भर्तरि वेति । भर्तुरन्तिके वा तं परिचारयेत्, अर्थाद् व्यवधानवृत्तौ शुचित्वेन ज्ञातम् । सिद्धं वा दण्डचारिणं कुर्यात् तत्र दृष्टकौशलं सैन्यकर्मणि व्यापारयेत् । अमित्राटवीषु अमित्रेषु अटवीषु च, क्षिपेद् व्यापारयेत् । अन्यतः प्रत्यन्ते वा अन्यत्र दूरदेशे वा, क्षिपेत् ॥

पण्यं कुर्यादसिद्धं वेति । असिद्धं वा पण्यं कुर्यात् यत्र क्षिप्तस्तत्रासमर्थं पण्यवन्तं कुर्यात् 'एतावतः पण्यस्यैतावद् धनमि'ति परिभाषया शत्रुविषये पण्यविक्रयाय प्रेषयेदित्यर्थः । तेन संवृतम् अनाम्ना शत्रुणा सह गूढकृतसंकेतं 'शत्रुर्मया साधित' इत्यादिमिथ्यावादव्यक्तीकृतवाग्यं, परसन्धेयकारणाद् आदूष्य सन्धेयशत्रुप्रतिबोधनाय आ समन्तादवघोषणयोपालभ्य, तस्यैव दोषेण मिथ्यावादलक्षणेन, सिद्धं वा कुर्यात् मारयेत् ॥

अथवेति । आदूष्यमारणपक्षाभावे, एनम्, आयत्यर्थम् उत्तरकालयोगक्षेमार्थम्, उपांशुना शमयेद् उपांशुदण्डेन हन्यात् । गतागतसामान्यविषयमाह — गतागतम्, आयत्यां वधप्रेप्सुम् उत्तरकालवधेच्छुं, दृष्ट्वा ज्ञात्वा, हन्यात् ॥

अरित इति । शत्रोः सकाशात्, अभ्यागतः पुरुषः, **शत्रुसंवासका**रितो दोषः शत्रुसहवासशिक्षितत्वादेकान्तदोषहेतुः, सर्पसंवासधर्मित्वात् सर्पसहवासतुल्यत्वात्, नित्योद्वेगेन नित्यभयहेतुतया निन्दितः ।

जायते प्लक्षबीजाशात् कपोतादिव शाल्मलेः।
उद्वेगजननो नित्यं पश्चादपि भयावहः॥
प्रकाशयुद्धं निर्दिष्टो देशे काले च विक्रमः।
विभीषणमवस्कन्दः प्रमादव्यसनार्दनम्॥
एकत्र त्यागघातौ च कूटयुद्धस्य मातृका।
योगगूढोपजापार्थं तूष्णींयुद्धस्य लक्षणम्॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे षष्ठोऽध्यायः
संहितप्रयाणिकं परिपणितापरिपणितापसृताश्च सन्धयः,
आदितश्चतुश्शततमः॥

जायत इति। स गतागतः, प्लक्षबीजाशात् प्लक्षफलभोजिनः, कपोतात् शाल्मलेरिव तूलैकसारफलत्वेनानुपजीव्यस्य शाल्मलितरोरिव अर्थात् तस्य कपोत इव, नित्यम् उद्वेगजननः स्वस्मान्निर्वेदजनकः अर्थादनभिलष्यमाणफलस्य विजिगीषोः, पश्चादपि भयावहः, जायते। ईदृशश्चार्थः 'प्लक्षबीजाशः कपोतः इव' इति पाठे सति सुबोधो भवति॥

अथ युद्धधर्मगतं द्वाभ्यां श्लोकाभ्यामाह — **प्रकाशयुद्धमित्यादि**। 'अमुकदेशे अमुककाले युद्धमावयोर्वर्तिष्यत' इति सम्भाष्य विक्रमणं प्रकाशयुद्धं नाम। अल्पस्यापि सैन्यस्य बहुत्वभ्रान्त्युत्पादनेन भयजननं दुर्गादिदाहपरिलुण्टनादिकरणं प्रमादव्यसनावसरेषु पीडनम् एकत्र युद्धे वर्तमाने तत्परित्यागः अन्यघातारम्भश्च इत्येषा कूटयुद्धस्य मातृका लक्षणम्। योगगूढोपजापार्थं योगेन गूढभित्तिशिलापातनादिना योगातिसन्धानोक्तेनोपायेन गूढोपजापेन गूढपुरुषद्वारकोपजापप्रयोगेण च अर्थः शत्रुद्रोहरूपं प्रयोजनं यस्मिंस्तत् तथाभूतं चेष्टितं, तूष्णींयुद्धस्य लक्षणम्॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे षष्ठोऽध्यायः
संहितप्रयाणिकं परिपणितापरिपणितापसृताश्च सन्धयः,
आदितश्चतुश्शततमः॥

११३. प्रक. द्वैधीभाविकाः सन्धिविक्रमाः।

विजिगीषुर्द्वितीयां प्रकृतिमेवमुपगृह्णीयात् । सामन्तं सामन्तेन सम्भूय यायात् । यदि वा मन्येत—'पार्ष्णिं मे न ग्रहीष्यति, पार्ष्णिग्राहं वारयिष्यति, यातव्यं नाभिसरिष्यति, बलद्वैगुण्यं मे भविष्यति, वीवधासारौ मे प्रवर्तयिष्यति, परस्य वारयिष्यति, बह्वाबाधे मे पथि कण्टकान् मर्दयिष्यति, दुर्गाटव्यपसारेषु दण्डेन चरिष्यति, यातव्यमविषह्ये दोषे सन्धौ वा स्थापयिष्यति, लब्धलाभांशो वा शत्रूनन्यान् मे विश्वासयिष्यती'ति ।

द्वैधीभाविकाः सन्धिविक्रमा इति सूत्रम् । सन्धिविग्रहोपादानं द्वैधीभावः तत्र कर्तव्याः सन्धयो विक्रमाश्चाभिधीयन्ते इति सूत्रार्थः । परिपणितादिसन्धयो ह्युक्ताः पूर्वाध्याये । तेषां द्वैधीभाविकानामनुष्ठानकारणान्यत्र निरूप्यन्ते ।

विजिगीषुरिति । सः, द्वितीयां प्रकृतिं स्वविषयानन्तरं शत्रुम्, उपगृह्णीयात् साहाय्यार्थं स्वीकुर्यात् । कस्मिन् कार्ये साह्यार्थं, तत्राह— **सामन्तं सामन्तेन सम्भूय यायादिति** । यातव्यं भूम्यनन्तरं पृष्ठपार्श्वभूम्यनन्तरेण सहैकार्थ्यमासाद्य यायात् । सम्भूययानस्य प्रयोजनान्याह— **यदि वा मन्येत पार्ष्णिं मे न ग्रहीष्यतीत्यादि** । उपगृहीतो हि सामन्तो विजिगीषोः पार्ष्णिग्रहणापकारं न करिष्यतीत्येकं प्रयोजनं, पार्ष्णिं गृह्णन्तमन्यं शत्रुं वारयिष्यतीति द्वितीयं, यातव्यस्य शत्रोः पक्षं नानुप्रवेक्ष्यतीति तृतीयम्, उपगृहीतसामन्तबलेन सहितं विजिगीषोर्बलं द्विगुणं भविष्यतीति चतुर्थम्, उपगृहीतो विजिगीषोः स्वदेशधान्याद्यायतिलक्षणं वीवधं सुहृद्बलागमनं च न वारयिष्यतीति पञ्चमं, परस्य च वारयिष्यतीति षष्ठं, विजिगीषोः प्रस्थितस्य पथि गतिप्रतिबन्धकान् प्रतिरोधकान् स मर्दयिष्यतीति सप्तमं, दुर्गेषु काननेषु च विजिगीषुबलमपसरणप्रसङ्गेषु सामन्तः स्वसैन्यसहितः समन्ताच्चरन् पराबाधाद् रक्षिष्यतीत्यष्टमम्, असहनीयानर्थापाते यातव्येन सह सन्धिं वा घटयिष्यतीति नवमं, विजिगीषुसकाशाल्लाभांशं यथासम्भाषितं लब्ध्वा सामन्तो विजिगीषावविसंवादित्वख्यापनेन शत्रूनन्यान् विश्वस्तान् करिष्यतीति दशमम् । इत्येवं पार्ष्णिशुद्ध्यादीनि दश प्रयोजनानि सम्भूययाने भवन्ति ।

द्वैधीभूतो वा कोशेन दण्डं दण्डेन कोशं सामन्तानामन्यतमाल्लिप्सेत।

तेषां ज्यायसोऽधिकेनांशेन समात् समेन हीनाद्धीनेनेति समसन्धिः। विपर्यये विषमसन्धिः। तयोर्विशेषलाभादतिसन्धिः।

व्यसनिनमपायस्थाने सक्तमनर्थिनं वा ज्यायांसं हीनो बलसमेन लाभेन पणेत। पणितस्तस्यापकारसमर्थो विक्रमेत। अन्यथा सन्दध्यात्।

सम्भूतौ चेद् विजिगीषुरविश्वस्तस्तदा किं कुर्यात्, तत्राह — **द्वैधीभूतो** वेत्यादि। द्वैधीभावमास्थितः, सामन्तानां पृष्ठपार्श्वगतानां राज्ञाम्, अन्यतमात्, कोशेन दण्डं लिप्सेत दण्डाल्पत्वे, दण्डेन कोशं लिप्सेत कोशाल्पत्वे।

सम्भूययाने तदपेक्षितांशादिलाभे च सन्धेरपेक्षणात् तद्भेदानाह — **तेषामित्यादि**। सामन्तानां मध्ये बलाधिकाद् दण्डकोशलिप्सायामधिकांशदानसम्भाषणेन सन्धिरेकः, समानबलात् समानांशदानसम्भाषणेन सन्धिरपरः, हीनबलाद् हीनांशदानसम्भाषणेन सन्धिरन्य इत्येवं त्रिप्रकारः समसन्धिः। **विपर्यये विषमसन्धिरिति**। बलाधिकात् समेनांशेन हीनेनांशेन वेति प्रथमप्रकारविपर्यये द्वौ, समाद् अधिकेन हीनेन वेति द्वितीयप्रकारविपर्यये द्वौ, हीनात् समेनाधिकेन वेति तृतीयप्रकारविपर्यये द्वौ इति षट्प्रकारो विषमसन्धिरित्यर्थः। **तयोर्विशेषलाभादतिसन्धिरिति**। समसन्धिभेदानां विषमसन्धिभेदानां चेत्याहृत्य नवानां प्रत्येकं विशेषलाभात् सम्भाषिताभ्यधिकलाभादतिसन्धिर्नाम नवविधो निर्वर्तते। तदेवमष्टादश सन्धयो द्वैधीभाविकाः।

इह हि लाभास्त्रयः — बलसमः बलसमादधिको बलसमाद्धीन इति। तन्निमित्तान् हीनस्य ज्यायसा सन्धौ सम्भवतो भेदानाह — **व्यसनिनमिति**। गुणप्रातिलोम्यवन्तम्, अपायस्थाने सक्तं शरीरनाशादिहेतौ रतम्, अनर्थिनं वा एकतोनर्थोभयतोनर्थयुक्तं वा, ज्यायांसं, हीनः बलसमेन लाभेन दण्डानुरूपेणांशेन, पणेत सन्दध्यात्। ज्यायसोऽधिकांशेन समसन्धौ कर्तव्येऽप्ययं विषमसन्धिः क्रियते, विजिगीषुणा व्यसनाद्यभिभूते तस्मिन्नवज्ञानादिति बोद्धव्यम्। अवज्ञातस्य कृत्यमाह — **पणितस्तस्येत्यादि**। तथा पणितो ज्यायान् स्वावज्ञातुर्विजिगीषोरपकारे शक्तश्चेत् स्वव्यसनादिप्रशमनपूर्वं विगृह्णीयात्, अपकाराशक्तौ तु सन्दध्यात्। स एष बलसमलाभसन्धिः।

एवम्भूतो हीनशक्तिप्रतापपूरणार्थं सम्भाव्यार्थाभिसारी मूलपार्ष्णित्राणार्थं वा ज्यायांसं हीनो बलसमाद् विशिष्टेन लाभेन पणेत। पणितः कल्याणबुद्धिमनुगृह्णीयात्। अन्यथा विक्रमेत।

जातव्यसनप्रकृतिरन्ध्रमुपस्थितानर्थं वा ज्यायांसं हीनो दुर्गमित्रप्रतिस्तब्धो वा ह्रस्वमध्वानं यातुकामः शत्रुमयुद्धमेकान्तसिद्धिं लाभमादातुकामो बलसमाद्धीनेन लाभेन पणेत। पणितस्तस्य अपकारसमर्थो विक्रमेत। अन्यथा सन्दध्यात्।

अरन्ध्रव्यसनो वा ज्यायान् दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामो दूष्यदण्डं प्रवासयितुकामो दूष्यदण्डमावाहयितु-

हीनस्य ज्यायसा सह विषमसन्धिमुक्त्वा समसन्धिमाह— **एवम्भूत** इति। व्यसनाद्यभिभूतो हीनः, हीनशक्तिप्रतापपूरणार्थं हीनयोरात्मशक्तिप्रतापयोः पूरणार्थं, सम्भाव्यार्थाभिसारी मूलपार्ष्णित्राणार्थं वा लभ्यत्वेन निश्चितप्रायमर्थं साधयितुमभियातुरात्मनो दुर्गस्य पार्ष्णेश्च रक्षणार्थं वा, ज्यायांसं, हीनो, बलसमाद् विशिष्टेन अधिकेन लाभेन पणेत, अर्थात् समसन्धिं 'ज्यायसोऽधिकेनांशेन समसन्धिरि'त्युक्तपूर्वं कुर्यात्। पणितस्य ज्यायसः कर्तव्यमाह—**पणित** इत्यादि। पणितो ज्यायान् पणमानं हीनं यद्यपचिकीर्षारहितं पश्येत् तदानुगृह्णीयाद्, इतरथा विगृह्णीयात्। स एष बलसमाधिकलाभसान्धिः।

ज्यायसा सह हीनस्य बलसमाद्धीनेन लाभेन सन्धिमाह—**जातव्यसनप्रकृतिरन्ध्रमिति**। उपजातमृगयादिव्यसनम् उपजातक्रुद्धलुब्धभीतादिप्रकोपं च, उपस्थितानर्थं वा एकतोनर्थोभयतोनर्थयुक्तं वा, ज्यायांसं, दुर्गमित्रप्रतिस्तब्धो वा विशिष्टदुर्गमित्रयोगगर्वितो वा, ह्रस्वम् अध्वानं शत्रुं यातुकामो वा, अयुद्धमेकान्तसिद्धिं लाभमादातुकामः युद्धं विनैव निश्चितसिद्धिं लाभं जिघृक्षुर्वा, बलसमाद्धीनेन लाभेन पणेत। पणितो ज्यायान्, तस्य अपकारसमर्थो विक्रमेत हीनलाभपणनकृतात्मावज्ञानस्य हीनस्यापकारे शक्तश्चेद् विगृह्णीयात्। अन्यथा सन्दध्यात् अपकारासामर्थ्ये सन्धिं कुर्यात्।

हीनमपि लाभं हीनात् कार्यविशेषवशेन ज्यायान् पणितः स्वीकुर्यादित्याह—**अरन्ध्रव्यसनो** वेति। प्रकृतिरन्ध्रमृगयादिव्यसनरहितः, ज्यायान्, दुरारब्धकर्माणम् अदेशकालोपक्रान्तकर्माणं शत्रुं, भूयः दुरारम्भोपनतक्षयव्ययातिरेकेण, क्षयव्ययाभ्यां युग्यपुरुषनाशधनव्ययाभ्यां योक्तुकामो वा, दूष्यदण्डं

कामो वा पीडनीयमुच्छेदनीयं वा हीनेन व्यथयितुकामः सन्धिप्रधानो वा कल्याणबुद्धिः हीनं लाभं प्रतिगृह्णीयात्। कल्याणबुद्धिना सम्भूयार्थं लिप्सेत। अन्यथा विक्रमेत।

एवं समः सममतिसंदध्याद्, अनुगृह्णीयाद् वा।

परानीकस्य प्रत्यनीकं मित्राटवीनां वा शत्रोर्विभूमीनां देशिकं मूलपार्ष्णित्राणार्थं वा समः समबलेन लाभेन पणेत। पणितः कल्याणबुद्धिमनुगृह्णीयाद्, अन्यथा विक्रमेत।

जातव्यसनप्रकृतिरन्ध्रमनेकविरुद्धमन्यतो लभमानो वा समः

प्रवासयितुकामो वा स्वदूष्यबलं विध्वंसयितुमिच्छुर्वा, दूष्यदण्डम् आवाहयितुकामो वा परदूष्यबलमानेतुमिच्छुर्वा, पीडनीयमुच्छेदनीयं वा हीनेन व्यथयितुकामो वा उभयतः पीडनयोग्यम् उन्मूलनीयं वा शत्रुं हीनेन सहायभूतेन पीडयितुमुच्छेत्तुं च वाञ्छन् वा, सन्धिप्रधानः बह्वपायाद् विग्रहात् सन्धिरेव श्रेयानिति मन्यमानः, कल्याणबुद्धिः, हीनं लाभं हीनेन पणमानेन दीयमानं, प्रतिगृह्णीयात्। कल्याणबुद्धिना सम्भूय अदुष्टधिया हीनेन सहैकार्थीभूय, अर्थं लिप्सेत साहाय्यमाचरेत्। अन्यथा हीनस्य दुष्टबुद्धित्वे, विक्रमेत। स एष बलसमहीनलाभसन्धिः।

एवं हीनस्य ज्यायसा सह सन्धावुक्तान् प्रकारान् समस्य समेन सह न्धावतिदिशति—**एवं समः सममतिसन्दध्यादनुगृह्णीयाद्वे**ति। हीनज्या।सोः सन्धिषु दुष्टबुद्धित्वकल्याणबुद्धित्वापेक्षावतिसन्धानानुग्रहौ यथा भवततथा समयोरपि सन्धौ तौ द्रष्टव्यावित्यर्थः।

अथ समयोः सन्धौ बलसमेन लाभेन पणनमाह — **परानीकस्ये**ति। त्रुबलस्य, मित्राटवीनां वा शत्रुसम्बन्धिनां मित्राटविकानां च, प्रत्यनीकं तियोधनशक्तं, शत्रोः, विभूमीनां शैलगुहादीनां, देशिकं प्रचारोपदेष्टारम् र्थात् समं राजानं, मूलपार्ष्णित्राणार्थं वा स्थानीयस्य पृष्ठस्य च रक्षार्थं वा, ः, समबलेन लाभेन बलसमलाभेन, पणेत। पणितस्य कर्तव्यमाह — **णेतः कल्याणबुद्धिमि**त्यादि।

बलसमाद्धीनेन लाभेन पणनमाह — **जातव्यसनप्रकृतिरन्ध्रमि**ति। ।भूतम्; **अनेकविरुद्धं** बहुविरोधिनम् अर्थात् समं, समः, समबलाद्धीनेन नेन बलसमहीनलाभेन, पणेत। अन्यतो लभमानो वा समसाह्येन विनापी-

समबलाद्धीनेन लाभेन पणेत। पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात्।

एवम्भूतो वा समः सामन्तायत्तकार्यः कर्तव्यबलो वा बलसमाद् विशिष्टेन लाभेन पणेत। पणितः कल्याणबुद्धिमनुगृह्णीयाद्, अन्यथा विक्रमेत।

जातव्यसनप्रकृतिरन्ध्रमभिहन्तुकामः स्वारब्धमेकान्तसिद्धिं वा-स्य कर्मोपहन्तुकामो मूले यात्रायां वा प्रहर्तुकामो यातव्याद् भूयो लभमानो वा ज्यायांसं हीनं समं वा भूयो याचेत। भूयो वा याचितः स्वबलरक्षार्थं दुर्धर्षमन्यदुर्गमासारमटवीं वा परदण्डेन मर्दितुकामः

प्सितकार्यसिद्धिं प्राप्नुयन् वा समः, समबलाद्धीनेन लाभेन पणेत। अपरा व्याख्या—हीनलाभपणनीयसामन्तान्तरसंलभ्ये सति समबलाद्धीनेन लाभेन पणेतेति। **पणितस्तस्यापकारसमर्थ** इत्यादि गतार्थम्।

बलसमादधिकेन लाभेन पणनमाह — **एवम्भूतो वेति**। जातव्यसनप्रकृतिरन्ध्रत्वानेकविरुद्धत्वयुक्तः, समः, सामन्तायत्तकार्यः सामन्तसाह्यसाध्यकार्यः, कर्तव्यबलो वा उत्पाद्यदण्डो वा सन्, बलसमाद्, विशिष्टेन अधिकेन, लाभेन, पणेत। **पणितः** कल्याणेत्यादि प्रतीतार्थम्।

विजिगीषुणा पण्यमानस्य सामन्तस्य हीनत्वज्यायस्त्वाद्यवधीरणेन बहुतरं लाभं याचमानस्य विशेषलाभं निमित्तं प्रवर्तमानमतिसन्धिमाह — **जातव्यसनप्रकृतिरन्ध्रमिति**। तथाभूतं, ज्यायांसं हीनं समं वेत्यग्रिमेण सम्बन्धः। अभिहन्तुकामः, स्वारब्धं समुचितदेशकालप्रयुक्तम्, अत एव एकान्तसिद्धिं निश्चितसिद्धिकम्, अस्य विजिगीषोः, कर्म, उपहन्तुकामो वा, यात्रायां मूले प्रहर्तुकामो वा विजिगीषोर्याने सति तदीयं दुर्गादिकमवस्कन्दितुमिच्छुर्वा, यातव्याद् भूयो लभमानो वा विजिगीषुदित्सितादभ्यधिकमर्थं तदीययातव्यसकाशाल्लप्स्यमानो वा अर्थाद् हीनो ज्यायान् समो वा, क्रमेण ज्यायांसं हीनं समं वा, भूयो याचेत हीनत्वाद्यनादरेणाधिकमर्थं यथेष्टं याचेत। एष पणितस्य विधिः। पणितुर्याचितस्य विधिमाह — **भूयो वा याचित इति**। बहुतरं द्रव्यं याचितः पणमानः, स्वबलरक्षणार्थं, भूयो दद्यात् याचितमखिलं याचमानाय प्रयच्छेत्। प्रयोजनान्तराण्याह — **दुर्धर्षं** कृच्छ्रधर्षणीयम्, अन्यदुर्गं शत्रोर्दुर्गम्, आसारं तदीयं मित्रबलम्, अटवीं

प्रकृष्टेऽध्वनि काले वा परदण्डं क्षयव्ययाभ्यां योक्तुकामः परदण्डेन वा विवृद्धस्तमेवोच्छेत्तुकामः परदण्डमादातुकामो वा भूयो दद्यात्।

ज्यायान वा हीनं यातव्यापदेशेन हस्ते कर्तुकामः परमुच्छिद्य वा तमेवोच्छेत्तुकामः त्यागं वा कृत्वा प्रत्यादातुकामो बलसमाद् विशिष्टेन लाभेन पणेत। पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा मन्दध्यात्। यातव्यसंहितो वा तिष्ठेत्। दूष्यामित्राटवीदण्डं वास्मै दद्यात्।

जातव्यसनप्रकृतिरन्ध्रो वा ज्यायान हीनं बलसमेन लाभेन पणेत। पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा मन्दध्यात्।

तदीयमाटविकं, परदण्डेन पण्यमानमामन्तबलेन, मर्दयितुकामो वा, प्रकृष्टेऽध्वनि दूरविप्रकृष्टे पथि, तथाभूते काले, परदण्डं पण्यमानस्य बलं, क्षयव्ययाभ्यां दूराध्वगतागत-चिरकालव्यापारणनिमित्तकाभ्यामित्यर्थः, योक्तुकामो वा, परदण्डेन वा विवृद्धस्तमेवोच्छेत्तुकामः यातव्यस्य गजतुरगादिबलेन यातव्यजयोत्तरकाललब्धधव्येन संवृद्धबलो भूत्वा लाभातिशयमात्मदत्तपूर्वं पण्यमानस्य प्रत्याहरिष्यामीति मन्यमानो वेत्यर्थः, परदण्डमादातुकामो वा यातव्यर्थं पण्यमानसाद्येन ग्रहीतुकामो वा, भूयो दद्यात्।

इत्थं भूयोयाचनतत्प्रदाननिबन्धनमतिसन्धिमुक्त्वा ज्यायसा हीनेन सह सन्धित्रयमाह — **ज्यायान् वा हीनमिति**। ज्यायान्, हीनं बलसमाद् विशिष्टेन अधिकेन लाभेन पणेत, कथम्भूतः, यातव्यापदेशेन हस्ते कर्तुकामः यातव्योच्छेदार्थसर्वबलसन्दोहसन्नाहव्याजेन हीनं ग्रहीष्यामीत्यभिसन्धियुक्तः, **परमुच्छिद्य वा तमेवोच्छेत्तुकामः** यातव्योन्मूलनानन्तरं हीनमप्युन्मूलयितुकामो वा, त्यागं वा कृत्वा प्रत्यादातुकामः विशिष्टलाभदानं कृत्वा पश्चात् तदपजिहीर्षुर्वा। अत्र 'ज्यायान् वा हीनम्' इत्यस्य स्थाने 'ज्यायांसं वा हीनं' इत्यपपाठः। पणमानविधिमुक्त्वा पणितविधिमाह — **पणितस्तस्येत्यादि**। **यातव्यसंहितो वा तिष्ठेत्** पणितो यातव्येन सह सन्धिं कृत्वा वा स्थानमनुतिष्ठेत्। **दूष्यामित्राटवीदण्डं वास्मै दद्यात्** दूष्यामित्राटविकबलं वा स्ववध्यं तस्मै पणमानाय दद्यात् सन्ध्यर्थम्।

बलसमाधिकलाभेन सन्धिमुक्त्वा बलसमलाभेन सन्धिमाह — **जातव्यसनप्रकृतिरन्ध्रो वा ज्यायानित्यादि**। सुबोधम्।

एवम्भूतं वा हीनं ज्यायान् बलसमाद्धीनेन लाभेन पणेत। पणितस्तस्यापकारसमर्थो विक्रमेत, अन्यथा सन्दध्यात् ॥

आतो बुध्येत पणितः पणमानश्च कारणम्।
ततो वितर्क्योभयतो यतः श्रेयस्ततो व्रजेत् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
सप्तमोऽध्यायः द्वैधीभाविकाः सन्धिविक्रमाः,
आदितः पञ्चशततमः ॥

बलसमाद्धीनेन लाभेन सन्धिमाह **एवम्भूतं वा हीनमित्यादि**। एवम्भूतं जातव्यसनप्रकृतिरन्ध्रम्। शेषं सुगमम् ॥

अध्यायान्ते श्लोकमाह— **आत इति**। आतः, अव्ययमिदमतश्शब्दस्यार्थे। लाभपणनतदङ्गीकरणनिमित्तवैचित्र्याद्धेतोः, पणितः, पणमानश्च, कारणं बुध्येत जानीयात्। ततः कारणबोधानन्तरम्, उभयतो वितर्क्य सन्धिर्वा श्रेयान् विग्रहो वेति सम्प्रधार्य, यतः श्रेयस्ततो व्रजेत् यस्मिन्नुपादीयमाने श्रेयः पश्यति तमनुतिष्ठेत्। अत्र 'आत' इत्यस्य स्थाने 'आदौ' इति क्वचित् पाठः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
सप्तमोऽध्यायः द्वैधीभाविकाः सन्धिविक्रमाः,
आदितः पञ्चशततमः ॥

११४,११५ प्रक. यातव्यवृत्तिः, अनुग्राह्यमित्रविशेषाश्च ।

यातव्योऽभियास्यमानः सन्धिकारणमादातुकामो विहन्तुकामो वा सामवायिकानामन्यतमं लाभद्वैगुण्येन पणेत । प्रपणिता क्षयव्ययप्रवासप्रत्यवायपरोपकारशरीराबाधांश्चास्य वर्णयेत् । प्रतिपन्नमर्थेन योजयेत् । वैरं वापरैर्ग्राहयित्वा विसंवादयेत् ।

दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकामः स्वारब्धायां

यातव्यवृत्तिरिति सूत्रम् । यातव्यो नाम कश्चिद् विजिगीषुं यातारमपेक्ष्य यातव्यावस्थापन्नस्तस्यैव प्रत्यभियाता विजिगीषुविशेषः । तस्य सामवायिकेषु वृत्तिः तस्मिंश्च सामवायिकानां वृत्तिरुच्यत इति सूत्रार्थः । यातव्याभियानसमवायिनामन्योन्यसन्धिविक्रमादिकमुक्तं, यातव्यस्य तेषु तेषां वा यातव्ये वृत्तिस्तु नोक्ता । सेदानीमभिधीयते ।

यातव्य इति । यातव्यावस्थापन्नो विजिगीषुः, अभियास्यमानः यातारं विजिगीषुं प्रति अभियानात् प्राक्, सन्धिकारणम् आदातुकामः सन्धिनिमित्तं ग्रहीतुकामः स्वयं सन्धित्सुरित्यर्थः, सन्धिकारणं विहन्तुकामो वा परचिकीर्षितसन्धिप्रतिजिघांसुर्वेत्यर्थः, सामवायिकानाम् अन्यतमं, लाभद्वैगुण्येन पणेत व्यवस्थिततल्लाभांशद्विगुणेन लाभेन सम्भाषेत अर्थात् परसामवायिकीभावानभ्युपगमार्थम् । तदभ्युपगमे च दोषान् प्रद्वेषाय पणमानो वर्णयेदित्याह — **प्रपणितेति** । पणमानः, नयचन्द्रिकायां पणमान इत्येव पाठः । प्रपणित इति पाठस्तु चिन्त्यः । क्षयव्ययप्रवासप्रत्यवायपरोपकारशरीराबाधांश्च युग्यपुरुषापचयं धनव्ययं दीर्घाध्वगतागतं सम्भूयप्रवृत्तिसम्भावितं संविद्व्यतिक्रमदोषं परस्य शत्रोः पक्षं प्रविश्योपकारकरणं शरीरपीडां चेत्येतान् सामवायिकभावसम्भाव्यान् षड् दोषान्, अस्य पण्यमानस्य, वर्णयेत् बोधयेत् । प्रतिपन्नम् अभ्युपगतपणनम्, अर्थेन योजयेत् पणितमर्थं दत्वा स्वसामवायिकं कुर्यादित्यर्थः । विहन्तुकामत्व आह — **वैरं वा अपरैर्ग्राहयित्वा विसंवादयेदिति** । अन्यैः सामवायिकैः सह विरोधमुत्पाद्य सन्धिं विघटयेत् । एवं तावद् यातव्यस्य सामवायिकान्यतमपणनमुक्तम् ।

अथ सामवायिकानामन्येन पणनं प्रस्तूयते । तत्र यातव्यं प्रति सन्धिच्छलेनापकारं चिकीर्षोः प्रभूतार्थग्रहणे तत्करणायुक्तत्वं मन्यमानस्यायत्यां प्रभूतलाभैषिण एव सतस्तदात्वेऽल्पलाभाभ्युपगमपक्षमाह — **दुरारब्धकर्माणं भूयः क्षयव्ययाभ्यां योक्तुकाम** इति । अनुचितदेशकालाद्युपक्रान्तयुद्धयात्रम्

वा यात्रायां सिद्धिं विघातयितुकामो मूले यात्रायां वा प्रतिहर्तुकामो यातव्यसंहितः पुनर्याचितुकामः प्रत्युत्पन्नार्थकृच्छ्रस्तस्मिन् अविश्वस्तो वा तदात्वे लाभमल्पमिच्छेद्, आयत्यां प्रभूतम्।

मित्रोपकारममित्रोपघातम् अर्थानुबन्धमवेक्षमाणः पूर्वोपकारकं कारयितुकामो भूयस्तदात्वे महान्तं लाभमुत्सृज्यायत्यामल्पमिच्छेत्।

दूष्यामित्राभ्यां मूलहरेण वा ज्यायसा विगृहीतं त्रातुकामस्तथाविधमुपकारं कारयितुकामः सम्बन्धापेक्षी वा तदात्वे च आयत्यां च लाभं न प्रतिगृह्णीयात्।

अत एव मुख्यपुरुषापचयेन सहायाराधनार्थधनव्ययेन च स्वत एव युक्तं दुरारब्धानुवृत्त्या बहुलगम्यां लाभ्यां भोजयितुकामः, स्वारब्धायां वा यात्रायां सिद्धिं विघातयितुकामः समुचितदेशकालाद्यारब्धत्वाद् यात्रायाः फलसिद्धिं सम्भाव्यां विघटयितुमिच्छुर्वा, मूले यात्रायां वा प्रतिहर्तुकामः स्थानीये अभियाने प्रहर्तुमिच्छुर्वा, यातव्यसंहितः पुनर्याचितुकामः सम्प्रत्यल्पेन लाभेन सन्धिं कृत्वा भूयः प्रभूतं याचिष्य इति मन्यमानो वा, प्रत्युत्पन्नार्थकृच्छ्र इति अतर्कितोपनतधनव्ययो वा, तस्मिन् अविश्वस्तो वा पणमाने विषये प्रभूतं प्रतिश्रुत्याप्यसौ पश्चान्न दास्यतीत्युपजातशङ्को वा, तदात्वे तत्काले, लाभम् अल्पम् इच्छेत्, आयत्यां प्रभूतं प्रचुरम् इच्छेत्। एवं पञ्चसु निमित्तेषु तदात्वाल्पलाभपणनमित्येकः पक्ष उक्तः।

आयत्यामल्पलाभपणनरूपमन्यं पक्षमाह — **मित्रोपकारममित्रोपघातमि**त्यादि। स्वमित्रस्योपकारं स्वामित्रस्यापकारं च फलान्तरानुबद्धं पश्यन्, तदात्वोपस्थितं महान्तमपि लाभं परित्यज्य आयत्याम् अल्पं लाभम् इच्छेत्। तथा पूर्वोपकारकं भूयः कारयितुकामो वा — अर्थात् पणमानेन पूर्वं कृतमुपकारं तेनैव भूयः कारयितुमिच्छुर्वा — तदात्वोपस्थितं महान्तं लाभं परित्यज्यायत्यामल्पमिच्छेत्।

आयत्यां तदात्वे वा लाभः सामवायिकेन न प्रतिगृह्यत इत्यपरः पक्षः। तमाह — **दूष्यामित्राभ्यामि**ति। दूष्यो राजार्थविग्रहचारी पुरमुख्यादिः अमित्रः शत्रुः ताभ्यां, मूलहरेण उच्छेदकारिणा ज्यायसा वा, विगृहीतम् अर्थाद् बन्ध्वादिं, त्रातुकामः स्वयं रक्षितुमिच्छन्, तथाविधमुपकारं कारयितुकामः अन्येन वा स्वीयेन रक्षयितुकामः, सम्बन्धापेक्षी वा यातव्येन सह,

कृतसन्धिरतिक्रमितुकामः परस्य प्रकृतिकर्शनं मित्रामित्रसन्धिविश्लेषणं वा कर्तुकामः पराभियोगाच्छङ्कमानो लाभमप्राप्तमधिकं वा याचेत । तमितरस्तदात्वे च आयत्यां च क्रममवेक्षेत । तेन पूर्वे व्याख्याताः ।

अरिविजिगीष्वोस्तु स्वं स्वं मित्रमनुगृह्णतोः शक्यकल्यभव्या-

विवाहसम्बन्धमपेक्षमाणो वा, तदात्वे चायत्यां च, लाभं न प्रतिगृह्णीयात् स्वल्पमपि ।

अथ अप्राप्तस्यार्थस्य वाधिकस्यार्थस्य वा सद्योदानप्रार्थनमित्येवमात्मकं चतुर्थं पक्षमाह— **कृतसन्धिरतिक्रमितुकाम** इति । पूर्वकृतमेव सन्धिं पश्चाल्लङ्घयितुकामः, अप्राप्तं लाभं पणितमप्रविष्टं लाभम्, अधिकं लाभं वा पणितादधिकं लाभं वा, याचेत 'तदात्वे देही'ति प्रार्थयेत । तथा याचितस्य हि पणमानस्य दानासामर्थ्यात् सन्धिः शैथिल्यं प्राप्स्यतीति । परस्य पणमानस्य, **प्रकृतिकर्शनं** प्रकृतीनां वृत्तिकृच्छ्रं, कर्तुकामो वा, तथा याचेत । **मित्रामित्रसन्धिविश्लेषणं** कर्तुकामो वा मित्रामित्रयोरल्पलाभपणनेन पूर्वं कृतात् सन्धेर्विश्लेषणमपसरणम् उत्पादयितुमिच्छुर्वा, तथा याचेत । 'मय्येव हि ताभ्यामपि याचितस्य दानासामर्थ्यात् सन्धिः शिथिलो भविष्यती'ति । **पराभियोगात शङ्कमानो लाभमप्राप्तमधिकं वा याचेत** 'पर आत्मानमभियुङ्क्ते'ति शङ्कया वा तथा याचेत । याचिते हि परेण दत्ते स आत्मानं नाभियोक्तुं शक्नुयादिति । याचितस्य कर्तव्यमाह— **तमितर** इति । इतरो याचितः, तदात्वे च आयत्यां च, तं क्रमं याचमानोक्तं प्रकारम्, अवेक्षेत अनुष्ठेयो न वेति पर्यालोच्य निर्णयेत् । **तेन पूर्वे व्याख्याता** इति । एतत्पक्षे क्रमावेक्षणकथनेन पूर्वोक्तेष्वपि त्रिषु पक्षेषु क्रमावेक्षणमुक्तप्रायमित्यर्थः । इत्थं यातव्यवृत्तिर्निरूपिता ।

अनुग्राह्यमित्रविशेषा इति सूत्रम् । अनुग्राह्याणां साहाय्यदानोपकार्याणां मित्राणां भूम्येकान्तराणां विशेषा अभिधीयन्त इति सूत्रार्थः । भूम्यनन्तरास्तावत् सामन्ताः शत्रव इति तेषु सन्ध्यादय उक्ताः, भूम्येकान्तरेषु तु मित्रभूतत्वादनुग्राह्यत्वमेव प्राप्तमिति तदिदानीं निरूप्यते ।

के ते अनुग्राह्या मित्रविशेषाः, किं च तेभ्यः प्रार्थनीयं फलमित्याकाङ्क्षायामाह — **अरिविजिगीष्वोरि**ति । तयोः, स्वं स्वं मित्रं स्वस्वभूम्येकान्तरं

रम्भिस्थिरकर्मानुरक्तप्रकृतिभ्यो विशेषः । शक्यारम्भी विषह्यं कर्मारभेत । कल्यारम्भी निर्दोषम् । भव्यारम्भी कल्याणोदयम् । स्थिरकर्मा नासमाप्य कर्मोपरमते । अनुरक्तप्रकृतिः सुसहायत्वादल्पेनाप्यनुग्रहेण कार्यं साधयति । त एते कृतार्थाः सुखेन प्रभूतं चोपकुर्वन्ति । अतः प्रतिलोमे नानुग्राह्याः ।

तयोरेकपुरुषानुग्रहे यो मित्रं मित्रतरं वानुगृह्णाति सोऽतिसन्धत्ते । मित्रादात्मवृद्धिं हि प्राप्नोति । क्षयव्ययप्रवासपरोपकारानितरः । कृतार्थश्च शत्रुर्वैगुण्यमेति ।

राजानम्, अनुगृह्णतोः साहाय्यदानेनोपकुर्वतोः, शक्यकल्यभव्यारम्भिस्थिरकर्मानुरक्तप्रकृतिभ्यो विशेषः बहूनां मित्राणां मध्ये शक्यारम्भी कल्यारम्भी भव्यारम्भी स्थिरकर्मा अनुरक्तप्रकृतिरित्येतेभ्य एव मित्रेभ्य उपकृतेभ्यो विशेषलाभो भवति, अतश्च शक्यारम्भिप्रभृतय एवानुग्राह्या इति भावः। तान् व्याचष्टे— **शक्यारम्भीति** । सः, विषह्यं शक्यनिर्वहणं, कर्म आरभेत । कल्यारम्भी, निर्दोषं कर्मारभेत । भव्यारम्भी, कल्याणोदयं कल्याणफलं, कर्मारभेत। स्थिरकर्मा, कर्म प्रारब्धम्, असमाप्य, नोपरमते न विरमति । अनुरक्तप्रकृतिः, सुसहायत्वात् अयत्नसुलभसहायत्वाद्, अल्पेनापि अनुग्रहेण सैन्यदानेन, कार्यं साधयति । **त एते** इति । एते शक्यारम्भिप्रभृतयः, कृतार्थाः अनुग्रहसाधितकार्याः सन्तः, सुखेन अनायासेन, प्रभूतं च बहुगुणं च, उपकुर्वन्ति । **अतः प्रतिलोम** इति । एभ्यः शक्यारम्भ्यादिभ्यः प्रातिलोम्ये सति, नानुग्राह्याः उपकार्या न भवन्ति, अर्थादशक्यारम्भिप्रभृतयः ।

तयोरिति । शत्रोर्वा विजिगीषोर्वा, एकपुरुषानुग्रहे मित्रामित्रयोरेकस्य पुरुषस्य मित्रयोर्वैकस्य पुरुषस्यानुग्रहे कर्तव्यतया प्रसक्ते, यः, मित्रं मित्रतरं वा अनुगृह्णाति अमित्रं परिहृत्य मित्रसम्पद्युक्तमुपकरोति मित्रमुपेक्ष्य अतिशयितमित्रसम्पद्युक्तं वोपकरोति, सः मित्रानुग्राही मित्रतरानुग्राही च, अतिसन्धत्ते विशेषलाभं भजते । विशेषलाभश्च मित्रादात्मवृद्धिप्राप्तिलक्षण इत्याह—**मित्रादात्मवृद्धिं हि प्राप्नोतीति**। मित्रभूतो हि पुरुषः स्वभावादेव स्वसुहृदो वृद्ध्यर्थं यतेत, किमुत तेनानुगृहीत इत्यभिप्रायः। अमित्रानुग्राही मित्रसामान्यानुग्राही च नैवमित्याह --**क्षयव्ययप्रवासपरोपकारानितर इति**।

मध्यमं त्वनुगृह्णतोर्यो मध्यमं मित्रं मित्रतरं वानुगृह्णाति सोऽतिसन्धत्ते । मित्रादात्मवृद्धिं हि प्राप्नोति । क्षयव्ययप्रवासपरोपकाराणितरः । मध्यमश्चेदनुगृहीतो विगुणः स्यादमित्रोऽतिसन्धत्ते । कृतप्रयासं हि मध्यमामित्रमपसृतमेकार्थोपगतं प्राप्नोति ।

तेनोदासीनानुग्रहो व्याख्यातः ।

मध्यमोदासीनयोर्बलांशदाने यः शूरं कृतास्त्रं दुःखसहमनुरक्तं वा दण्डं ददाति, सोऽतिसन्धीयते । विपरीतोऽतिसन्धत्ते ।

यत्र तु दण्डः प्रतिहतस्तं वा चार्थमन्यांश्च साधयति, तत्र मौल-

---

क्षयव्ययप्रवासाः युग्यपुरुषापचयधनहानिदीर्घाध्वगमनानि शत्रूपकारार्थानि परोपकारः स्वस्मिन् प्रत्युपकर्तव्ये शत्रुणा परस्योपकारकरणम् इत्येतान्, इतरः प्राप्नोति । कथं पुनः शत्रुरुपकृतः स्वस्मिन् प्रत्युपकर्तव्ये परस्योपकारं कुर्यात्, तत्राह—**कृतार्थश्च शत्रुर्वैगुण्यमेतीति**। शत्रुः स्वकार्ये साधनीये गुणवत्तामात्मनो दर्शयति, सिद्धे तु तस्मिन् शत्रुस्वाभाव्याद् विकुरुत इत्यर्थः ।

मध्यमविषयमनुग्रहमाह — **मध्यमं त्वित्यादि** । गतार्थम् । मध्यमोऽरिविजिगीषुभ्यामुपकृतो यदि विरुद्धवृत्तिर्भवेत्, तर्हि तस्यामित्रो विशेषलाभं प्राप्नोतीत्याह—**मध्यमश्चेदनुगृहीत** इत्यादि । लाभस्वरूपमाह— **कृतप्रयासं हीत्यादि** । मध्यमेन सह प्रयासं कृत्वा पूर्वं तन्मित्रभावे स्थितं सम्प्रति तद्वैगुण्यात् तदमित्रत्वं प्रतिपद्य तस्माच्चापसृत्यात्मना सहैकार्थतां गतं मित्रविशेषं हि मध्यमामित्रः प्राप्नोतीत्येष तस्य विशेषलाभ इत्यभिप्रायः ।

मध्यमानुग्रहोक्तरीत्या उदासीनानुग्रहेऽपि मित्राद्यनुग्रहीतुर्मित्रसकाशाद् वृद्धिविशेषलाभः उदासीनवैगुण्ये तदमित्रस्य मित्रविशेषलाभश्च भवतीत्यर्थकमतिदेशमाह — **तेनेत्यादि** ।

मध्यमोदासीनयोर्बलांशदानेनानुग्रहे कर्तव्यतया प्रसक्ते शूरत्वाशिक्षितास्त्रत्वजितश्रमत्वानुरक्तत्वविशिष्टम् आत्मनो मूलबलं यो ददाति सोऽयुक्तकारित्वाद् वञ्च्यते, तद्विपरीतस्तु दूष्यादिबलदायी युक्तकारी भवतीत्याह— **मध्यमोदासीनयोर्बलांशदान** इत्यादि ।

क्वचिन्मूलबलस्यापि प्रेषणमाह — **यत्र त्विति** । यस्मिंस्त्वर्थे, **दण्डः प्रतिहतः**, अन्यद् बलं कुण्ठितं जातं, तं वा चार्थं यातव्यरूपम्, **अन्यांश्च** जनपदावस्कन्दकमार्गप्रतिरोधकादींश्च, साधयति साधयितुं प्रवृत्तश्चेदित्यर्थः,

भृतश्रेणीमित्राटवीबलानामन्यतममुपलब्धदेशकालं दण्डं दद्यात् । अमित्राटवीबलं वा व्यवहितदेशकालम् ।

यं तु मन्येत — 'कृतार्थो मे दण्डं गृह्णीयात् अमित्राटव्यभूम्यनृतुषु वा वासयेदफलं वा कुर्यादि'ति, दण्डव्यासङ्गापदेशेन नैनमनुगृह्णीयात् । एवमवश्यं त्वनुग्रहीतव्ये तत्कालसहमस्मै दण्डं दद्यात् । आ समाप्तेश्चैनं वासयेद् योधयेच्च, बलव्यसनेभ्यश्च रक्षेत् । कृतार्थाच्च सापदेशमवस्रावयेत् । दूष्यामित्राटवीदण्डं वास्मै दद्यात् । यातव्येन वा सन्धायैनमतिसन्दध्यात् ॥

तत्र, मौलभृतश्रेणीमित्राटवीबलानां मौलादीनां पञ्चानां बलानाम्, अन्यतमं, दण्डं सैन्यम्, उपलब्धदेशकालं दद्यात् समुचितं देशं कालं चोपलभ्य प्रेषयेत् । अमित्राटवीबलं वा व्यवहितदेशकालमिति । विप्रकृष्टे देशे काले च यदि बलं दद्यात्, तर्हि अमित्राटाविकबलमेव दद्यात् न त्वन्यन्मौलादिकमित्यर्थः ।

यं तु मन्येतेत्यादि । यं तु मध्यममुदासीनं वा शङ्केत— 'एष मदीयस्य दण्डस्य साहाय्येन स्वार्थं साधयित्वा तमात्मसात्करिष्यति, अथवा अमित्रान्तिके आटविकान्तिके अभूमिषु वासायोग्येषु प्रदेशेषु अनृतुषु युद्धानर्हेषु वर्षादिकालेषु च दण्डं वासयिष्यति, अथवा दण्डं शत्रुजयलभ्यफलाभाजनं करिष्यति' इति, एनं, दण्डव्यासङ्गापदेशेन नानुगृह्णीयात् 'दण्डो मे कार्यान्तरे व्यासक्त' इति व्याजमुल्लिखन् दण्डं तस्मै न दद्यादित्यर्थः । एवमवश्यं त्वनुग्रहीतव्ये इति । दण्डदानेनावश्यमनुग्रहे कर्तव्ये तु, तत्कालसहं तत्कालक्षमं, दण्डम्, अस्मै अनुग्राह्याय, दद्यात् । आ समाप्तेश्च आ कार्यसमाप्तेः, एनं दण्डं, वासयेद् योधयेच्च योग्यभूमौ वासयन् युद्धं कारयेत्, बलव्यसनेभ्यश्च शस्त्रक्षयादिभ्यश्च, रक्षेत् । कृतार्थाच्च दण्डकृतप्रयोजनाच्च मध्यमादुदासीनाद् वा, सापदेशं कमपि व्याजमुल्लिख्य, अवस्रावयेत् अपवाहयेत् तदपहारादिदोषपरिहारार्थम् । दण्डपालनक्लेशभीरुत्वे त्वाह — दूष्यामित्राटवीदण्डं वास्मै दद्यादिति । तद्धि स्वविनाश्यमन्येन नाशितं भवस्त्वित्यभिसन्धिनेत्यार्थम् । अनुग्राह्यस्य दुर्बुद्धित्वशङ्कायां प्रकारान्तरानुष्ठानमाह — यातव्येन वेति । तेन अनुग्राह्यसम्बन्धिना सह, सन्धाय, एनं यातव्यम्, अतिसन्दध्यात् एतत्सकाशाद् अनुग्राह्यसकाशलभ्याभ्यधिकं लाभं प्राप्नुयादित्यर्थः ॥

**समे हि लाभे सन्धिः स्याद् विषमे विक्रमो मतः।
समहीनविशिष्टानामित्युक्ताः सन्धिविक्रमाः ॥**

**इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे अष्टमोऽध्यायः
यातव्यवृत्तिरनुग्राह्यमित्रविशेषाः,
आदितः षट्छततमः ॥**

इत्थं सन्धिविग्रहगतान् लाभपणनादिविशेषानभिधाय सामान्यतः सन्धिविग्रहयोर्निमित्तं श्लोकेन कीर्तयन्नध्यायमुपसंहरति — **समे हि लाभे सन्धिः स्यादित्यादि** । सुगमम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
अष्टमोऽध्यायः यातव्यवृत्तिरनुग्राह्यमित्रविशेषाश्च,
आदितः षट्छततमः ॥

११६. प्रक. मित्रहिरण्यभूमिकर्मसन्धयः ।

संहितप्रयाणे मित्रहिरण्यभूमिलाभानामुत्तरोत्तरो लाभः श्रेयान् । मित्रहिरण्ये हि भूमिलाभाद् भवतः, मित्रं हिरण्यलाभात् । यो वा लाभः सिद्धः शेषयोरन्यतरं साधयति ।

'त्वं चाहं च मित्रं लभावहे' इत्येवमादिः समसन्धिः । 'त्वं मित्रम्' इत्येवमादिर्विषमसन्धिः । तयोर्विशेषलाभादतिसन्धिः ।

समसन्धौ तु यः सम्पन्नं मित्रं मित्रकृच्छ्रे वा मित्रमवाप्नोति सोऽतिसन्धत्ते । आपद्धि सौहृदस्थैर्यमुत्पादयति ।

मित्रहिरण्यभूमिकर्मसन्धय इति सूत्रम् । मित्रं नित्यवश्यादिषट्प्रकारं हिरण्यं स्वर्णरजतादि भूमिर्नित्यामित्रादिर्भूमिसन्ध्यध्याये वक्ष्यमाणा कर्म दुर्गादि एषां लाभैः क्रियमाणाः सन्धयः कथ्यन्त इति सूत्रार्थः । श्रेष्ठाश्रेष्ठलाभैः पणनमुक्तम् । श्रैष्ठ्याश्रैष्ठ्ये तु अनिरूपिते इह निरूप्येते ।

इदं च प्रकरणं नवमादिभिश्चतुर्भिरध्यायैर्वितन्यते । तत्र नवमेऽस्मिन्नध्याये मित्रसन्धिर्हिरण्यसन्धिश्च निरूप्यते ।

संहितप्रयाण इति । तस्मिन् विषये, मित्रहिरण्यभूमिलाभानाम् उत्तरोत्तरो लाभः श्रेयान् मित्रलाभापेक्षया हिरण्यलाभः प्रशस्ततरः, हिरण्यलाभापेक्षया भूमिलाभः प्रशस्ततरः । कुत इत्याह — **मित्रहिरण्ये हीत्यादि** । भूमिलाभे हि सिद्धे तदुत्पन्नकृष्यादिफलसम्पदा साधनेन मित्रं हिरण्यं च साधयितुं शक्यते हिरण्यलाभेन च मित्रलाभः साधयितुं शक्यते इति भूमिलाभो हिरण्यलाभश्च स्वेतरसाधको यस्मात् तस्मादित्यर्थः । लाभश्रेष्ठत्वं च शेषान्यतरसाधकत्वरूपमित्याह — **यो वेत्यादि** । स श्रेष्ठ इति वाक्यशेषः ।

मित्रादिलाभनिबन्धनान् समविषमान् सन्धीनाह — **त्वं चाहं चेत्यादि** । 'त्वं चाहं च मित्रं लभावहे' 'त्वं चाहं च हिरण्यं लभावहे' 'त्वं चाहं च भूमिं लभावहे' इत्येवं पणनेन क्रियमाणः सन्धिः समसन्धिः । **त्वं मित्रमित्येवमादिरि**ति । त्वं मित्रं लभसे अहं भूमिं, त्वं हिरण्यमहं भूमिं, त्वं हिरण्यमहं मित्रम् इत्येवम्प्रकारो, विषमसन्धिः । **तयोरि**ति । समसन्धिविषमसन्ध्योः, विशेषलाभात्, अतिसन्धिः भवति ।

समसन्धौ विशेषलाभमाह — **समसन्धौ त्विति** । तस्मिन्, यः, सम्पन्नं वक्ष्यमाणनित्यत्ववश्यत्वादिगुणयुक्तं, मित्रम् अवाप्नोति, अथवा मित्र-

मित्रकृच्छ्रेऽपि नित्यमवश्यमनित्यं वश्यं वेति । 'नित्यमवश्यं श्रेयः, तद्ध्यनुपकुर्वदपि नापकरोति' इत्याचार्याः ।

नेति कौटल्यः । वश्यमनित्यं श्रेयः, यावदुपकरोति तावन्मित्रं भवति । उपकारलक्षणं मित्रमिति ।

वश्ययोरपि महाभोगमनित्यमल्पभोगं वा नित्यमिति । 'महाभोगमनित्यं श्रेयः, महाभोगमनित्यमल्पकालेन महदुपकुर्वन्महान्ति व्ययस्थानानि प्रतिकरोति' इत्याचार्याः ।

नेति कौटल्यः । नित्यमल्पभोगं श्रेयः, महाभोगमनित्यमुपकार-

कृच्छ्रे मित्रस्य मित्रसम्प्रयुक्तस्य कृच्छ्रे आपद्दशायां, मित्रं तदेव, अवाप्नोति, सः, अतिसन्धत्ते अतिसन्धिनिमित्तं विशेषलाभं भजते । आपदपेक्षणस्य प्रयोजनमाह—**आपद्धीत्यादि** । सौहृदस्थैर्यं मैत्रीदार्ढ्यम् ।

मित्रकृच्छ्रेऽपि विशेषनिर्धारणार्थं विप्रतिपत्तिमुपक्षिपति — **मित्रकृच्छ्रेऽपि नित्यमवश्यमित्यादि** । वक्ष्यमाणलक्षणावश्यत्वयुक्तं नित्यं मित्रं वा श्रेयः, आहोस्विद् अनित्यं वश्यं वा श्रेयः इति विचार्यत इत्यर्थः । तत्राचार्याणां निर्धारणमाह — **नित्यमवश्यं श्रेय** इत्यादि ।

आचार्यमतं प्रतिषेधन् स्वमतमाह—**नेति कौटल्य** इत्यादि । वश्यमनित्यं मित्रं श्रेयः । तत्र हेतुमाह—**यावदुपकरोति तावन्मित्रमित्यादि** । मित्रस्योपकारलक्षणत्वादुपकुर्वद्दशायामेव मित्रव्यपदेशो भवति नानुपकुर्वद्दशायां, वश्यं च सर्वचित्रमहाभोगत्वलक्षणत्वादुपकुर्वदेव भवतीत्यर्थः । तथाच नित्यवश्ययोर्मध्ये महाभोगत्वलक्षणं वश्यमनित्यं श्रेय इति कौटल्यमतमुक्तं भवति ।

वश्ययोरेव नित्यत्वानित्यत्वयोगे श्रेयस्त्वं विचारयति — **वश्ययोरपीत्यादि** । महाभोगवश्याल्पभोगवश्ययोर्मध्ये किं महाभोगवश्यमनित्यं श्रेयः उताल्पभोगवश्यं नित्यं श्रेय इति चिन्तायाम् आचार्या वदन्ति— महाभोगवश्यमनित्यं श्रेयः, कुतः, तद्धि अल्पेन कालेन महान्तमुपकारं करोति, तेन च व्ययहेतवः प्रभूताः प्रतिकृता भवन्तीत्येतस्मात् कारणात् ।

आचार्यमतं निराकुर्वन् स्वमतमाह—**नेति कौटल्य** इत्यादि । अयमर्थः—अल्पभोगवश्यं नित्यं श्रेयः, कुतः, अनित्यमहाभोगसकाशसम्भावितदोषानास्पदत्वात् तत्सकाशसम्भावितगुणास्पदत्वाच्च । अनित्यं हि महाभोग-

भयादपक्रामति, उपकृत्य वा प्रत्यादातुमीहते। नित्यमल्पभोगं सातत्यादल्पमुपकुर्वन्महता कालेन महदुपकरोति।

गुरुसमुत्थं महन्मित्रं लघुसमुत्थमल्पं वेति। 'गुरुसमुत्थं महन्मित्रं प्रतापकरं भवति, यदा चोत्तिष्ठते, तदा कार्यं साधयति' इत्याचार्याः।

नेति कौटल्यः—लघुसमुत्थमल्पं श्रेयः, लघुसमुत्थमल्पं मित्रं कार्यकालं नातिपातयति दौर्बल्याच्च यथेष्टभोग्यं भवति, नेतरत् प्रकृष्टभौमम्।

विक्षिप्तसैन्यमवश्यसैन्यं वेति। 'विक्षिप्तं सैन्यं शक्यं प्रतिसंहर्तुं वश्यत्वात्' इत्याचार्याः।

वश्यम् उपकारभीत्या हार्दाभावनिमित्तया मित्रत्वात् प्रच्यवेत, उपकारं कृत्वा वापहर्तुं पश्चाद् यतेत। नित्यं त्वल्पभोगमव्यभिचारित्वेन मित्रभावान्न जातु प्रच्यवेत, अविच्छेदेन चाल्प उपकारस्तेन क्रियमाणो महता कालेन महान् भविष्यतीति।

गुरुसमुत्थमहामित्र-लघुसमुत्थाल्पमित्रयोः किं श्रेय इति विचारयति—**गुर्वि**त्यादि। गुरुसमुत्थं देशविप्रकर्षादिना प्रयत्नोत्थाप्यसैन्यं, महत् प्रबलं, मित्रं वा, श्रेय इति वर्तते, लघुसमुत्थम् अयत्नोत्थाप्यसैन्यम्, अल्पं दुर्बलं मित्रं वा श्रेय इति विचार्यत इति शेषः। तत्राचार्याणां मतमाह— **गुर्वि**त्यादि। गुरुसमुत्थं महत् मित्रं श्रेयः, कुतः, तद्धि शत्रावतिशयेन पराक्रमते, चिरयत्नेनापि यदोत्थितं भवति तदा कार्यमव्यभिचारेण साधयति चेत्यर्थः।

स्वमतमाह—**नेति कौटल्य** इत्यादि। कार्यकालं नातिपातयति कार्यानुष्ठानार्हमवसरं नातिक्रामयति। इतरत् गुरुसमुत्थम्। प्रकृष्टभौमं विप्रकृष्टभूमिस्थितम्।

विक्षिप्तेत्यादि। विक्षिप्तसैन्यं कार्यान्तरसाधनायानेकत्र प्रेषितं सैन्यं येन तत् तथाभूतं, मित्रं वा श्रेयः अवश्यसैन्यं वा, श्रेय इति विचार्यत इति शेषः। आचार्यमतमाह—**विक्षिप्तं सैन्यमि**त्यादि। प्रतिसंहर्तुं समूहयितुम्।

नेति कौटल्यः । अवश्यसैन्यं श्रेयः । अवश्यं हि शक्यं सामादिभिर्वश्यं कर्तुं, नेतरत् कार्यव्यासक्तं प्रतिसंहर्तुम् ।

पुरुषभोगं हिरण्यभोगं वा मित्रमिति । 'पुरुषभोगं मित्रं श्रेयः, पुरुषभोगं मित्रं प्रतापकरं भवति । यदा चोत्तिष्ठते तदा कार्यं साधयति' इत्याचार्याः ।

नेति कौटल्यः । हिरण्यभोगं मित्रं श्रेयः, नित्यो हिरण्येन योगः कदाचिद् दण्डेन दण्डश्च हिरण्येनान्ये च कामाः प्राप्यन्त इति ।

हिरण्यभोगं भूमिभोगं वा मित्रमिति । 'हिरण्यभोगं गतिमत्त्वात् सर्वव्ययप्रतीकारकरम्' इत्याचार्याः ।

नेति कौटल्यः—'मित्रहिरण्ये हि भूमिलाभाद् भवतः' इत्युक्तं पुरस्तात् । तस्माद् भूमिभोगं मित्रं श्रेय इति ।

स्वमतमाह— **नेति कौटल्य** इत्यादि । सामादिभिः सामदानभेदैः । इतरत् विक्षिप्तम् ।

पुरुषैरुपकारकमेकं मित्रं हिरण्येनोपकारकमन्यदित्यनयोर्मध्ये किं श्रेय इति चिन्तयति— **पुरुषभोगमित्यादि** । तत्र पुरुषभोगमित्रं प्रशस्ततरं, यस्मात् शत्रुषु तत् स्वयं पराक्रमितुमर्हम्, उत्थितं च कार्यं साधयतीत्याचार्या मन्यन्त इत्याह— **पुरुषभोगं मित्रं श्रेय** इत्यादि ।

स्वमतमाह— **नेति कौटल्यो हिरण्यभोगमित्यादि** । अयमर्थः— हिरण्यभोगं मित्रं प्रशस्ततरं, कुतः, यस्मात् हिरण्यं सर्वत्र नयनानयनयोग्यं हस्ते नित्यं सन्निहितं सर्वदोपयोगक्षमं, दण्डस्तु कादाचित्कोत्थानत्वात् कदाचिदेवोपयोगक्षमो भवति । किञ्च हिरण्येन दण्डश्च अन्ये चेप्सितार्थाः सुसाधा भवन्ति, न पुनर्दण्डेन हिरण्यमन्ये वा कामा इति ।

हिरण्योपकारकभूम्युपकारकमित्रयोर्मध्ये कतरत् प्रशस्ततरमिति विचारयति— **हिरण्यभोगमित्यादि** । हिरण्यभोगं हिरण्योपकारकं, गतिमत्त्वात् नयनानयनयोग्यत्वात्, सर्वव्ययप्रतीकारकरं सर्वविधव्ययोपयोगक्षमम्, अर्थाद् भूमिभोगम् अगतिमत्त्वादतादृशम् । ततश्च तदेव श्रेय इत्यर्थः । इत्याचार्या आहुः ।

मित्रहिरण्योभयसाधकत्वलक्षणं गुणातिशयं पूर्वोक्तं स्मारयन् तेन हेतुना भूम्युपकारकं मित्रमेव प्रशस्ततरमित्येवं स्वमतमाह— **नेति कौटल्यो**

तुल्ये पुरुषभोगे विक्रमः क्लेशसहत्वमनुरागः सर्वबललाभो वा मित्रकुलाद् विशेषः ।

तुल्ये हिरण्यभोगे प्रार्थितार्थता प्राभूत्यमल्पप्रयासता सातत्यं च विशेषः ।

तत्रैतद् भवति —

नित्यं वश्यं लघूत्थानं पितृपैतामहं महत् ।
अद्वैध्यं चेति सम्पन्नं मित्रं षड्गुणमुच्यते ॥
ऋते यदर्थं प्रणयाद् रक्ष्यते यच्च रक्षति ।
पूर्वोपचितसम्बन्धं तन्मित्रं नित्यमुच्यते ॥

मित्रहिरण्ये हीत्यादि । तदेवं पुरुषभोगाहिरण्यभोगभूमिभोगानां गुरुलघुभावो विचारितः ।

अथ पुरुषभोगेष्वेव कश्चिद् भेदः पुरुषभोगभेदान्तरापेक्षया विशिष्ट इत्याह — **तुल्ये पुरुषभोग** इत्यादि । शौर्यम् आयासक्षमत्वं स्नेहो मौलभृतादिसर्वविधबलदायकत्वमित्येभिर्गुणैर्युक्तं पुरुषभोगमित्रमतादृशात् पुरुष भोगमित्रवर्गात् प्रशस्ततरमित्यर्थः ।

हिरण्यभोगभेदस्य कस्यचित् तद्भोगभेदान्तरापेक्षया वैशिष्ट्यमाह — **तुल्ये हिरण्यभोग** इत्यादि । प्रार्थितार्थता प्रार्थितोऽर्थो यस्माल्लभ्यते स प्रार्थितार्थस्तत्त्वं, प्राभूत्यं समृद्धधनत्वम्, अल्पप्रयासता अल्पेन प्रयासेन कार्यसाधकता, सातत्यं च नित्योपकारिता च, विशेषः वैशिष्ट्यनिमित्तम्, एतैर्गुणैर्युक्तं हिरण्यभोगमित्रमतद्विधाद्धिरण्यभोगमित्रवर्गात् प्रशस्ततरमित्यर्थः । एवं पुरुषभोगहिरण्यभोगयोरवान्तरविशेषोऽभिहितः । भूमिभोगस्य तूपरिष्टाद् अभिधास्यते ।

अथ मित्रस्य गुणभेदकृतान् भेदान् वक्तुमाह — **तत्रेति** । तत्र मित्रलाभसन्धौ, एतद् वक्ष्यमाणं मित्रनिरूपणं भवति ।

मित्रस्य गुणानाह— **नित्यमित्यादि** । मित्रसम्पदुपेतं मित्रं नित्यत्ववश्यत्वादिभिः षड्भिर्गुणैर्युक्तमुच्यत इति श्लोकस्यार्थः ॥

गुणान् क्रमेण लक्षयति— **ऋते** इत्यादि । पूर्वप्ररूढयौनादिसम्बन्ध निमित्तस्नेहत्वमात्राद् विनैवार्थसम्बन्धं यद् रक्ष्यते, यच्च कर्तृ रक्षति, तदुभयमन्योन्यं प्रति नित्यं मित्रमित्यर्थः । यदर्थंप्रणयादिति समस्तपाठोऽप्यस्ति ॥

सर्वचित्रमहाभोगं त्रिविधं वश्यमुच्यते।
एकतोभोग्युभयतः सर्वतोभोगि चापरम् ॥
आदातृ वा दातृ अपि वा जीवत्यरिषु हिंसया।
मित्रं नित्यमवश्यं तद् दुर्गाटव्यपसारि च ॥
अन्यतो विगृहीतं यल्लघुव्यसनमेव वा।
सन्धत्ते चोपकाराय तन्मित्रं वश्यमध्रुवम् ॥
एकार्थानर्थसम्बन्धमुपकार्यविकारि च।
मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि ॥

वश्यमाह—**सर्वचित्रमहाभोगमित्यादि**। वश्यं मित्रं, सर्वचित्रमहाभोगं त्रिविधं सर्वभोगं चित्रभोगं महाभोगमिति त्रिविधम्। तत्र दण्डकोशभूमिभिरुपकारकं सर्वभोगं, दण्डकोशाभ्यां प्रभूतमुपकुर्वत् महाभोगं, रत्नसारफल्गुकुप्यद्रव्यवनादिनोपकारकं चित्रभोगम्। इदमर्थप्राप्तिलक्षणोपकारप्रयुक्तं त्रैविध्यम्। अनर्थपरिहारलक्षणोपकारनिमित्तं त्रैविध्यमुत्तरार्धेनोच्यते—एकतोभोगि उभयतोभोगि सर्वतोभोगीति च। एकतो यद् अमित्रप्रतिकारकं तदाद्यं, यद् अमित्रतदासारोभयप्रतिकारकं तद् द्वितीयं, यद् अमित्रासारप्रतिरोधकाटविकप्रतिकारकं तत् तृतीयमिति बोद्धव्यम् ॥

अथ नित्यं वश्यत्वहीनं भवति, वश्यं च नित्यत्वहीनम्। तत्राद्यमाह—**आदातृ वेत्यादि**। यद् विजिगीष्वनुपकारकमपि शत्रुषु लुण्टनाद्यपकारैरादानं दानं वा कुर्वदुपजीवति, दुर्गाटव्यपसरणशीलतया चात्मानं रक्षच्छत्रोरग्राह्यं भवति, तद् वश्यत्वरहितं नित्यं मित्रमित्यर्थः ॥

द्वितीयमाह—**अन्यत इति**। यत्, अन्यतः शत्रुणा विगृहीतं, लघुव्यसनमेव वा अल्पव्यसनयुक्तं वा सत्, उपकाराय, सन्धत्ते विजिगीषुणा सह सन्धिं करोति, तत् मित्रं, वश्यम् उपकारकत्वात्, अध्रुवम् अनित्यम् आत्मोपकारकालमात्रावस्थायिमैत्रत्वात् ॥

अयत्नकरणीयसैन्यसन्नाहत्वलक्षणं लघूत्थानत्वं, पितृपितामहक्रमानुवृत्तमैत्रबन्धत्वलक्षणं पितृपैतामहत्वं, प्रमाणप्रतापगरिष्ठसैन्ययुक्तत्वलक्षणं महत्त्वं च सुबोधत्वान्न लक्षणीयमिति मन्वानस्तान्यतिक्रम्याद्वैध्यं लक्षयति—**एकार्थानर्थसम्बन्धमिति**। समानसुखदुःखसम्बन्धम्, उपकारि, अविकारि च अव्यभिचारि च, मित्रम्, आपदि अद्वैध्यं द्वैध्यं भेदः तद्रहितत्वात्

मित्रभावाद् ध्रुवं मित्रं शत्रुसाधारणाच्चलम् ।
न कस्यचिदुदासीनं द्वयोरुभयभावि तत् ॥
विजिगीषोरमित्रं यन्मित्रमन्तर्धितां गतम् ।
उपकारे निविष्टं वाशक्तं वानुपकारि तत् ॥
प्रियं परस्य वा रक्ष्यं पूज्यसम्बन्धमेव वा ।
अनुगृह्णाति यन्मित्रं शत्रुसाधारणं हि तत् ॥
प्रकृष्टभौमं सन्तुष्टं बलवच्चालसं च यत् ।
उदासीनं भवत्येतद् व्यसनादवमानितम् ॥

तदाख्यम् । अत एव एतत् मित्रं, मित्रभावि मित्रभावनित्ययोगित्वान्मित्रभावीत्यप्याख्यायत इत्यर्थः ॥

मित्रभाविविपरीतम् उभयभाव्यप्यस्ति । तच्चोभयभावित्वं शत्रुविजिगीषूभयानुपकारकत्वात् तदुभयोपकारकत्वात् दुर्बलतया तदुभयसेवित्वाद् वा त्रिप्रकारं भवति । तत्र यदाद्यमुभयभावि तद् मित्रभावस्य शत्रुविजिगीषूभयातिरिक्तविषयत्वाभावेनासाधारणतया नित्यत्वात् शत्रुविजिगीषूभयसाधारणत्वेनानित्यत्वाच्च नित्यानित्योभयरूपम् । तदेतदाह— **मित्रभावाद् ध्रुवं मित्रमित्यादि** । मित्रभावात् शत्रुमित्रातिरिक्तागोचरत्वेनासाधारणादित्यार्थम् । न कस्यचिद्, उपकारकमिति शेषः । तदिदं शक्तत्वेऽप्यनभिनिवेशादुभयानुपकारकम् ॥

उपकाराभिनिविष्टमपि शक्तिविरहादुभयानुपकारकम् उभयभाव्याह— **विजिगीषोरमित्रमिति** । विजिगीषोर्भूम्यनन्तरत्वात् शत्रुभूतम्, अन्तर्धितां गतं मित्रं शत्रुविजिगीष्वोर्मध्यस्थो दुर्बलोऽन्तर्धिः तत्तां गतम् अत एव विधेयत्वान्मित्रशब्दितम्, उपकारे निविष्टं वा अशक्तं वा उभयोरुपकारकरणे साभिनिवेशं च शक्तिहीनं च, यद् अनुपकारि, तद् उभयभावीत्यनुवर्तते । अमित्रमिति क्लीबनिर्देश आर्षः ॥

उभयानुग्राहकमुभयतोभाव्याह — **प्रियमिति** । यत् मित्रं, परस्य शत्रोः, प्रियं, रक्ष्यं वा, पूज्यसम्बन्धमेव वा स्वपूजनीयगुर्वादिसम्बद्धं वा, अनुगृह्णाति, तत् शत्रुसाधारणं शत्रुमित्रोभयसमानम्, उभयतोभावीति यावत् ॥

अथ कीदृशं मित्रमुपकारकर्तव्यतादशायामुदासीनं स्यादित्याह — **प्रकृष्टभौममिति** । विप्रकृष्टभूमिस्थितं, सन्तुष्टम् अपूर्वलाभनिःस्पृहं स्थितार्थ-

अरेर्नेतुश्च यद् वृद्धिं दौर्बल्यादनुवर्तते ।
उभयस्याप्यविद्विष्टं विद्यादुभयभावि तत् ॥
कारणाकरणध्वस्तं कारणाकरणागतम् ।
यो मित्रं समपेक्षेत स मृत्युमुपगूहति ॥

क्षिप्रमल्पो लाभश्चिरान्महानिति वा । 'क्षिप्रमल्पो लाभः कार्यदेशकालसंवादकः श्रेयान्' इत्याचार्याः ।

नेति कौटल्यः । चिरादविनिपाती बीजसधर्मा महान् लाभः श्रेयान्, विपर्यये पूर्वः ॥

एवं दृष्ट्वा ध्रुवे लाभे लाभांशे च गुणोदयम् ।
स्वार्थसिद्धिपरो यायात् संहितः सामवायिकैः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे नवमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ मित्रसन्धिः हिरण्यसन्धिः,
आदितः सप्तशततमः ॥

परितृप्तं, बलवत् शौर्यगर्वादनुपजातद्वेषम्, अलसं, व्यसनादवमानितं च द्यूतादिव्यसनदोषादवज्ञातं च, एतत् ईदृशं मित्रम्, उदासीनं भवति ॥

दुर्बलत्वादुभयसेवकमुभयभाव्याह — **अरेर्नेतुश्चेति** । शत्रोर्विजिगीषोश्च, वृद्धिं, यत् मित्रं, दौर्बल्यात्, अनुवर्तते तामभिनन्दत् तावाश्रयतीत्यर्थः, कथम्भूतम्, उभयस्यापि शत्रुमित्रयोरपि, अविद्विष्टम् । तत्, उभयभावि उभयानुवर्त्युभयभावि, विद्यात् । तदेवं मित्रविशेषा निरूपिताः ॥

मित्रसामान्यविषयं विधिमाह — **कारणाकरणध्वस्तमिति** । कारणानुत्पादेऽपगतं, कारणाकरणागतं कारणानुत्पादे पुनरायातं, मित्रं, यः, समपेक्षेत स्वीकुर्यात्, सः, मृत्युम्, उपगूहति आलिङ्गति ॥

अथ मित्रलाभप्रसङ्गागतमित्रविशेषकथनानन्तरं लाभसामान्यगतं कालस्वरूपप्रयुक्तं विशेषं चिन्तयति—**क्षिप्रमल्पो लाभ इत्यादि**। सद्योभावी खल्पो लाभो वा श्रेयान्, चिरभावी प्रभूतो लाभो वा श्रेयानिति संशय इत्यर्थः । आचार्यमतमाह — क्षिप्रमल्पो लाभः श्रेयान्, कथम्भूतः, कार्यदेशकालसंवादकः अनेन कार्येणास्मिन् देशे अस्मिन् काले अयं लाभो भविष्यतीति समीक्षासंवादी । इत्याचार्याः ।

स्वमतमाह—**नेति कौटल्य** इत्यादि । चिरादपि भवन् निष्प्रतिबन्धभाविसिद्धितयावधारितो धान्यबीजसमानधर्मा महान् लाभः श्रेयान् । विपर्यये महतो लाभस्य विनिपातित्वसम्भावनायां, पूर्व आचार्योक्तः कल्प इत्यर्थः ॥

प्रान्ते श्लोकमाह—**एवमित्यादि** । लाभे मित्रहिरण्यभूमिरूपे । गुणोदयं गुणविशेषोत्पत्तिम् । शेषं सुबोधम् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमेऽधिकरणे नवमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ मित्रसन्धिर्हिरण्यसन्धिश्च,
आदितः सप्तोत्तरशततमः ॥

११६ प्रक — भूमिसन्धिः।

'त्वं चाहं च भूमिं लभावहे' इति भूमिसन्धिः।

तयोर्यः प्रत्युपस्थितार्थः सम्पन्नां भूमिमवाप्नोति सोऽतिसन्धत्ते।

तुल्ये सम्पन्नालाभे यो बलवन्तमाक्रम्य भूमिमवाप्नोति सोऽतिसन्धत्ते। भूमिलाभं शत्रुकर्शनं प्रतापं च हि प्राप्नोति। दुर्बलाद् भूमिलाभे सत्यं सौकर्यं भवति। दुर्बल एव च भूमिलाभः, तत्सामन्तश्च मित्रममित्रभावं गच्छति।

तुल्ये बलीयस्त्वे यः स्थिरं शत्रुमुत्पाट्य भूमिमवाप्नोति सोऽतिसन्धत्ते। दुर्गावाप्तिर्हि स्वभूमिरक्षणममित्राटवीप्रतिषेधं च करोति।

गताध्याये मित्रहिरण्यसन्ध्योर्निरूपितयोः क्रमप्राप्तः भूमिसन्धिरिह निरूप्यते—त्वं चाहं चेत्यादि। भूमिसन्धिरिति। स च समसन्धिः, भूमेरेव द्वाभ्यां लाभात्।

अतिसन्धिमाह—तयोरिति। शत्रुविजिगीष्वोर्मध्ये, यः, प्रत्युपस्थितार्थः प्रत्युपस्थितः अचिरकरणीयतया सन्निहितः अर्थः सेतुबन्धादिकर्मव्ययरूपो गुणवद्भृत्यपूजादिरूपो वा यस्य स तथाभूतः, सम्पन्नां वक्ष्यमाणानित्यामित्रत्वादिभूमिसम्पद्युक्तां, भूमिम् अवाप्नोति, सः, अतिसन्धत्ते विशेषलाभं भजते।

सम्पन्नभूमिलाभेऽपि विशेषमाह—तुल्ये सम्पन्नालाभ इति। सम्पन्नाया भूमेर्लाभे द्वयोः समाने, यः बलवन्तम्, आक्रम्य परिभूय, भूमिम् अवाप्नोति, सः अतिसन्धत्ते। अतिसन्धानस्वरूपमाह — भूमीत्यादि। बलवत्सकाशाद्धि भूमिं गृह्णन् न केवलभूमिभाग् भवति, किन्तु शत्रुकर्शनप्रतापलाभावपि नान्तरीयकतया प्राप्नोतीत्यर्थः। दुर्बलाद् भूमिलाभे यथोक्तव्यतिरेकमाह — दुर्बलादित्यादि। अयमर्थः — दुर्बलाद् भूमिलाभः सत्यं सुखेन साध्यः। किन्त्वसौ दुर्बल एव निकृष्ट एव दुर्बलर्हिंसाधिगतत्वात्। किञ्चास्य दुर्बलस्य सामन्तः शत्रुः स्वस्य भूम्येकान्तरमित्रभूतः स्वस्मिन् दुर्बलसाधुर्हिंसिन्यविश्वस्तो दुर्बलोच्छेदद्वारेणात्मोच्छेदं शङ्कमानः शत्रूभूय दुर्बलस्य साहाय्यं दद्यादित्येवमनर्थानुबन्धश्च दुर्बलाद् भूमिलाभ इति।

बलवत्सकाशाद् भूमिलाभे विशेषमाह — तुल्ये बलीयस्त्व इति। द्वयोः शत्र्वोर्बलवत्तायां समानायां, यः, स्थिरं दुर्गादिमत्त्वेन सुप्रतिष्ठितं,

चलामित्राद् भूमिलाभे शक्यसामन्ततो विशेषः। दुर्बलसामन्ता हि क्षिप्राप्यायनयोगक्षेमा भवति। विपरीता बलवत्सामन्ता कोशदण्डावच्छेदनी च भूमिर्भवति।

सम्पन्ना नित्यामित्रा मन्दगुणा वा भूमिरनित्यामित्रेति। 'सम्पन्ना नित्यामित्रा श्रेयसी भूमिः। सम्पन्ना हि कोशदण्डौ सम्पादयति। तौ चामित्रप्रतिघातकौ' इत्याचार्याः।

नेति कौटल्यः — नित्यामित्रालाभे भूयाञ्छत्रुलाभो भवति। नित्यश्च शत्रुरुपकृते चापकृते च शत्रुरेव भवति। अनित्यस्तु शत्रुरुप-

---

स्थितमिति पाठेऽप्ययमेवार्थः, शत्रुम्, उत्पाट्य उच्छिद्य, भूमिम् अवाप्नोति, सः अतिसन्धत्ते। तत्र हेतुमाह— **दुर्गावाप्तिर्हीत्यादि**। अयमर्थः — शत्रुसम्बन्धि दुर्गं तावदवाप्यते, तेन स्वभूमिरक्षणं शत्रुप्रतिघात आटविकप्रतिघातश्च निर्वर्तत इति।

चलामित्राद् भूमिलाभे विशेषमाह — **चलामित्रादिति**। अस्थिराद् दुर्गादिरहितादमित्राद्, भूमिलाभे, तुल्य इत्यनुवर्तते, शक्यसामन्ततो विशेषः दुर्बलसामन्तत्वतो विशेषः भूमेर्दुर्बलसामन्तत्वकृतो विशेषलाभः प्रबलसामन्ताया भूमेर्ग्राहकमपेक्ष्य दुर्बलसामन्ताया भूमेर्ग्राहको विशिष्यत इत्यर्थः। कुत इत्याह — **दुर्बलसामन्ता हीति**। तथाभूता हि, भूमिः, क्षिप्राप्यायनयोगक्षेमा अलब्धलाभो योगः लब्धपालनं क्षेमः तौ क्षिप्राप्यायनौ शीघ्रवर्धनौ यस्याः सा तथाभूता भवति। बलवत्सामन्ता प्रबलशत्रुका भूमिः, विपरीता चिराप्यायनयोगक्षेमा, कोशदण्डावच्छेदनी च कोशं दण्डं च अवच्छिनत्ति सामन्तबाधपरिहारार्थविनियोगवशात् क्षपयतीति तथाभूता च, भवति।

सम्पन्नभूम्यरियुक्तभूम्योः कतरस्याः श्रेष्ठत्वमिति विचारयति—**सम्पन्नेत्यादि**। भूमिसम्पद्युक्ता यद्यपि, तथापि नित्यामित्रा काचिद् भूमिः। सा वा श्रेयसी अल्पगुणयुक्ता कादाचित्कामित्रा भूमिर्वा श्रेयसीति विचारे, आचार्यमतमाह — **सम्पन्ना नित्यामित्रा श्रेयसीत्यादि**। तौ सम्पन्नभूमिसम्पादितौ कोशदण्डौ। नित्यामित्रत्वमनुपदं वक्ष्यते।

स्वमतमाह—**नेति कौटल्य इति। नित्यामित्रालाभ इति**। नित्यामित्राया लाभे, भूयान् बहुतरः, शत्रुलाभो भवति। नित्यश्च शत्रुः, उपकृते

कारादनपकाराद् वा शाम्यति। यस्या हि भूमेर्बहुदुर्गाश्चोरगणैर्म्ले-च्छाटवीभिर्वा नित्याविरहिताः प्रत्यन्ताः, सा नित्यामित्रा। विपर्यये त्वनित्यामित्रेति।

अल्पा प्रत्यासन्ना महती व्यवहिता वा भूमिरिति। अल्पा प्र-त्यासन्ना श्रेयसी। सुखा हि प्राप्तुं पालयितुमभिसारयितुं च भवति। विपरीता व्यवहिता।

व्यवहिताव्यवहितयोरपि दण्डधारणात्मधारणा वा भूमिरिति। आत्मधारणा श्रेयसी। सा हि स्वसमुत्थाभ्यां कोशदण्डाभ्यां धार्यते। विपरीता दण्डधारणा दण्डस्थानमिति।

च अपकृते च उपकारे अपकारे च कृते; शत्रुरेव भवति न तु शत्रुत्वं सहजं जातुचिद् जहाति। अतश्चामित्रवती भूमिर्नोपादेयेत्यर्थः। अनित्यशत्रुकाया भूमेरुपादेयत्वे कारणमाह — **अनित्यस्त्वित्यादि**। शाम्यति शान्तो भवति, न त्वपकरोतीत्यर्थः। नित्यामित्रानित्यामित्रत्वे लक्षयति— **यस्या हीत्यादि**। यस्याः भूमेः, प्रत्यन्ताः विषयान्ताः, बहुदुर्गाः वध्यापसरणस्थानबहुलाः, चोर-गणैः म्लेच्छाटवीभिर्वा नित्याविरहिताः नित्यसंयुक्ताः, सा भूमिः, नित्या-मित्रा। विपर्यये तु अनित्यामित्रा।

लभ्यभूमेः स्वभूम्यासन्नत्वमहत्त्वयोः किं श्रेय इति विचारयति— **अल्पेत्यादि**। अल्पा प्रत्यासन्ना श्रेयसीत्यत्र हेतुमाह— **सुखा हीत्यादि**। गन्तुं रक्षितुं विपदवसरेष्वपसरणस्थानीकर्तुं चानायासशक्येत्यर्थः। व्यवहिता विप्रकृष्टा, विपरीता प्राप्त्यादौ न सुखा।

विप्रकृष्टप्रत्यासन्नयोरपि विषये दण्डधारणा वा भूमिः श्रेयसी आत्म-धारणा वेति विचारो भवतीत्याह — **व्यवहिताव्यवहितयोरपीत्यादि**। नि-र्णयमाह — **आत्मधारणा श्रेयसीति**। कुत इत्याह — **सा हीत्यादि**। आत्मोत्थिताभ्यां कोशदण्डाभ्यामात्मनो धारणं भरणं यस्याः सात्मधारणेत्य-न्वितार्था सेत्यर्थः। **विपरीतेत्यादि**। दण्डधारणा, विपरीता स्वसमुत्थाभ्यां कोशदण्डाभ्यां न धार्यते, किन्तु परसमुत्थाभ्यामेव कोशदण्डाभ्यां धार्यते, अत एव दण्डस्य परसमुत्थस्य स्वरक्षणार्थं वसतः केवलस्थानभूतेत्येतावता दण्डधारणेत्युच्यत इत्यर्थः।

बालिशात् प्राज्ञाद् वा भूमिलाभ इति । बालिशाद् भूमिलाभः श्रेयान् । सुप्राप्यानुपाल्या हि भवत्यप्रत्यादेया च । विपरीता प्राज्ञादनुरक्तेति ।

पीडनीयोच्छेदनीययोरुच्छेदनीयाद् भूमिलाभः श्रेयान् । उच्छेदनीयो ह्यनपाश्रयो दुर्बलापाश्रयो वाभियुक्तः कोशदण्डावादायापसर्तुकामः प्रकृतिभिस्त्यज्यते । न पीडनीयो दुर्गमित्रप्रतिस्तब्ध इति ।

दुर्गप्रतिस्तब्धयोरपि स्थलनदीदुर्गीयाभ्यां स्थलदुर्गीयाद् भूमिलाभः श्रेयान् । स्थलीयं हि सुरोधावमर्दावस्कन्दमनिःस्राविशत्रु च । नदीदुर्गं तु द्विगुणक्लेशकरमुदकं च पातव्यं वृत्तिकरं चामित्रस्य ।

अरेर्मूर्खाद् वा भवन् भूमिलाभः श्रेयान् पण्डिताद् वा भवन्निति विमर्शे स मूर्खादेव भवन् श्रेयान्, यतो भूमिर्मूर्खात् सुखेन प्राप्तुं चानुपालयितुं च शक्या अनाशङ्कनीयप्रत्यादाना च, पण्डितात् तु भूमिरनुरक्तप्रकृतितया न सुखप्राप्या प्राप्तापि न सुखरक्ष्या रक्ष्यमाणापि नित्यशङ्क्यमानप्रत्यादानेति विपरीतेत्याह — **बालिशात् प्राज्ञाद्वेत्यादि** ।

अरिर्हि कश्चित् शत्र्वादिद्वारेण पीडनीयः कश्चिच्च स्थानीयादुच्छेत्तव्यः । तयोर्मध्ये कतरस्माद् भूमिलाभः श्रेयानिति विचारे उच्छेत्तव्याद् भूमिलाभः श्रेयान्, कुतः, यस्मात् स दुर्गमित्रापाश्रयरहितः दुर्बलदुर्गमित्राश्रयो वा सन् कोशदण्डावादाय स्थानीयादपसर्तुमेव यतत इति तं प्रकृतयः परित्यजन्ति, पीडनीयस्तु अपसर्तुमिच्छन्नपि दुर्गमित्राभ्यां वारयित्वा स्थापितो भवतीत्यतस्तं प्रकृतयो न परित्यजन्तीत्याह — **पीडनीयोच्छेदनीययोरित्यादि** ।

दुर्गकृतरक्षयोर्द्वयोर्मध्ये स्थलदुर्गीय एकः नदीदुर्गीयोऽपरः । तयोः सकाशाद् भूमिलाभश्रेयस्त्वविचारे स्थलदुर्गीयाद् भूमिलाभः श्रेयान्, कस्मात्, स्थलभवं हि दुर्गं सुखेन रोद्धुमवमर्दयितुम् अवस्कन्दितुं च शक्यं शत्रुनिस्सरणसौकर्यप्रदायकं च सुखोच्छेद्यमिति ततो भूमिः सुखलभ्या । नदीदुर्गं तु द्विगुणक्लेशसाधनीयं पानार्हजलवत्तया जलाधीनधान्यफलवृक्षलतादिसम्पद्योगेन च शत्रोः सुखोपजीव्यं च दुरुच्छेदमिति ततो भूमिर्न सुखलभ्येत्याह — **दुर्गप्रतिस्तब्धयोरपीत्यादि** ।

नदीपर्वतदुर्गीयाभ्यां नदीदुर्गीयाद् भूमिलाभः श्रेयान् । नदीदुर्गं हि हस्तिस्तम्भसङ्क्रमसेतुबन्धनौभिः साध्यमनित्यगाम्भीर्यमवस्राव्युदकं च, पार्वतं तु स्वारक्षं दुरुपरोधि कृच्छ्रारोहणं भग्ने चैकस्मिन् न सर्ववधः, शिलावृक्षप्रमोक्षश्च महापकारिणाम् ।

निम्नस्थलयोधिभ्यो निम्नयोधिभ्यो भूलाभः श्रेयान् । निम्नयोधिनो ह्युपरुद्धदेशकालाः, स्थलयोधिनस्तु सर्वदेशकालयोधिनः ।

खनकाकाशयोधिभ्यः खनकेभ्यो भूमिलाभः श्रेयान् । खनका हि खातेन शस्त्रेण चोभयथा युध्यन्ते, शस्त्रेणैवाकाशयोधिनः ।

नदीदुर्गीयपर्वतदुर्गीयाभ्यां शत्रुभ्यां भूमिलाभश्रेयस्त्वविचारणायां नदीदुर्गीयाद् भूमिलाभः श्रेयान्, कुतः, नदीदुर्गं हि गजैर्दारुस्तम्भारब्धैः सङ्क्रमैः सेतुबन्धैर्नौभिश्च तार्यम् अस्थिरगाम्भीर्यं तटभेदापसृतजलं च सुखसाध्यं भवति' पार्वतं तु दुर्गं दृष्टशिलाबन्धादिकृतपरिरक्षं दुष्करोपरोधम् अशक्यारोहणं भवति । किञ्चास्मिन्नेकेनास्त्रेणैक एव हन्तुं शक्यो न बहवः, महापकारिणामुपरि च शिलावृक्षादेराधित्यकातः पातनेन प्रतीकारः सुकर इति तत् कृच्छ्रसाधनीयं भवतीत्याह — **नदीपर्वतदुर्गीयाभ्यामित्यादि** ।

निम्ने स्थित्वा नावाद्यारूढयोद्धारः केचित्, स्थलयोधिनः केचित् । तेभ्य उभयेभ्यो भूमिलाभश्रेयस्त्वचिन्तायां निम्नयोधिभ्यो भूमिलाभ एव श्रेयान्, कुतः, यस्मात् निम्नयोधिनो हि अवच्छिन्नदेशकालयोधित्वात् सुसाधाः, इतरे तु अनवच्छिन्नदेशकालयोधित्वाद् दुस्साधा इत्याह — **निम्नस्थलयोधिभ्य इत्यादि** ।

भूमिं खात्वा तत्र स्थिता ये युध्यन्ते ते खनकयोधिनः, अनावृतेऽवकाशे स्थित्वा युध्यमाना आकाशयोधिनः । तेभ्य उभयेभ्यो भूमिलाभश्रेयस्त्वसम्प्रधारणायां खनकयोधिभ्यो भूलाभः श्रेयान्, कस्मात्, ते हि खातशस्त्रोभयसापेक्षतयोपरुद्धदेशकालयोधिनः खातालाभावसरे सुखेन साध्या भवन्ति । आकाशयोधिनस्तु देशकालोपरोधाभावात् सदा सर्वत्र युध्यन्त इति दुस्साधा इत्याह — **खनकाकाशयोधिभ्य इत्यादि** ।

एवंविधेभ्यः पृथिवीं लभमानोऽर्थशास्त्रवित् ।
संहितेभ्यः परेभ्यश्च विशेषमधिगच्छति ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे दशमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ भूमिसन्धिः,
आदितोऽष्टशततमः ॥

अध्यायं श्लोकेनोपसंहरति — **एवंविधेभ्य** इति । 'यो बलवन्तमाक्रम्य भूमिमवाप्नोति सोऽतिसन्धत्ते' इत्यादिनोक्तप्रकारेभ्यो बलवदादिभ्यः खनकान्तेभ्यः, पृथिवीं लभमानः, अर्थशास्त्रवित्, संहितेभ्यः पणितेभ्यः सामवायिकेभ्यः, परेभ्यश्च शत्रुभ्यश्च, विशेषम् उत्कर्षम्, अधिगच्छति, अर्थाद् विजिगीषुः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे दशमोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ भूमिसन्धिः,
आदितोऽष्टोत्तरशततमः ॥

११६. प्रक.—अनवसितसन्धिः।

'त्वं चाहं च शून्यं निवेशयावह' इत्यनवसितसन्धिः।

तयोर्यः प्रत्युपस्थितार्थो यथोक्तगुणां भूमिं निवेशयति सोऽतिसन्धत्ते।

तत्रापि स्थलमौदकं वेति। महतः स्थलादल्पमौदकं श्रेयः सातत्यादवस्थितत्वाच्च फलानाम्।

स्थलयोरपि प्रभूतपूर्वापरसस्यमल्पवर्षपाकमसक्तारम्भं श्रेयः।

औदकयोरपि धान्यवापमधान्यवापाच्छ्रेयः। तयोरल्पबहुत्वे

भूमेः पणितव्याया विशेषानभिधाय शून्यानिवेशनरूपे तदीयकर्मणि अनवसितसन्धय इह निरूप्यन्ते। शून्यनिवेशनं जनपदखनिद्रव्यवनहस्तिवनादिनिवेशनविशेषरूपतया वस्तुतः पर्यवस्यदपि सामान्यरूपेणैवेहोल्लिख्यमानमनध्यवसितविशेषरूपत्वादनवसितं कर्मेति तद्विषयाः सन्धयोऽनवसितसन्धय उच्यन्ते। अत एवास्माद् अवासितविषयस्य कर्मसन्धेर्वक्ष्यमाणस्य भेदो द्रष्टव्यः।

त्वं चाहं चेत्यादि। शून्यं निवेशयावहे जनपदादिनिवेशनेनाशून्यं कुर्वहे। **अनवसितसन्धि**रिति। समसन्धिश्चायमुभयोः समानत्वात्।

तत्रातिसन्धिमाह — **तयो**रित्यादि। संहितयोर्मध्ये, यः सन्निहितसामग्रीको जनपदनिवेशोक्तगुणसम्पन्नां भूमिं निवेशयति, सः अतिसन्धत्ते विशेषलाभं भजते, अतथाविधभूमिनिवेशकापेक्षयेत्यर्थः।

यथोक्तगुणायामपि विशेषं चिन्तयति—**तत्रापि स्थलमौदकं वेति।** स्थलं वृष्टिमात्रलभ्यजलम्, औदकं सदाजलसरोयुतं नदीयुक्तं च। विपुलात् स्थलाद् अल्पमौदकं प्रशस्ततरं, कस्मात्, सर्वकालोत्पाद्यफलोदयत्वात् सुनिश्चितफलोत्पत्तिकत्वाच्चेत्याह — **महतः स्थलादि**त्यादि।

स्थलयोरपि मध्ये प्राज्यशारदिकग्रैष्मिकलक्षणपूर्वापरसस्यप्रसवम् अल्पवृष्टिनिष्पाद्यफलं दन्तुरत्वशर्करिलत्वादिरहिततया निरुपरोधकर्षणारम्भं स्थलं श्रेय इत्याह — **स्थलयोरपी**त्यादि।

औदकत्वेऽपि विशेषमवधारयति — **औदकयोरपीति।** तयोरपि मध्ये, धान्यवापं धान्यानि व्रीहिशाल्यादीन्युप्यन्तेऽत्रेति तथाभूतम्, अधान्यवापात् श्रेयः। **तयो**रिति। धान्यवापाधान्यवापयोरौदकयोः, अल्पबहुत्वे

धान्यकान्तादल्पान्महदधान्यकान्तं श्रेयः। महत्यवकाशे हि स्थाल्याश्चानूप्याश्चौषधयो भवन्ति। दुर्गादीनि च कर्माणि प्राभूत्येन क्रियन्ते। कृत्रिमा हि भूमिगुणाः।

खनिधान्यभोगयोः खनिभोगः कोशकरः, धान्यभोगः कोशकोष्ठागारकरः। धान्यमूला हि दुर्गादीनां कर्मणामारम्भाः। महाविषयविक्रयो वा खनिभोगः श्रेयान्।

'द्रव्यहस्तिवनभोगयोर्द्रव्यवनभोगः सर्वकर्मणां योनिः प्रभूतनिधानक्षमश्च। विपरीतो हस्तिवनभोगः' इत्याचार्याः।

नेति कौटल्यः। शक्यं द्रव्यवनमनेकमनेकस्यां भूमौ वापयितुं न हस्तिवनं, हस्तिप्रधानो हि परानीकवध इति।

अल्पत्वे बहुत्वे च, विमृश्यमाने इति शेषः। धान्यकान्तात् धान्येन कमनीयाद् धान्यवापादित्यर्थः, अल्पाद्, महद् अधान्यकान्तं, श्रेयः। कस्मात्, हि यतः, महति अवकाशे, स्थाल्याः स्थलजाः, आनूप्याः जलप्रायदेशजाः षष्टिकादयश्च, ओषधयः, भवन्ति। महत्त्वे गुणान्तरमप्याह — **दुर्गादीनि चे**त्यादि। प्राभूत्येन प्राचुर्येण। धान्यकान्तत्वमपि तत्र सम्पादयितुं शक्यं भूमिगुणानां क्रियासाध्यत्वादित्यभिप्रायेणाह — **कृत्रिमा हि भूमिगुणा** इति।

खनिधान्यभोगयोरिति। विशेषो विमृश्यत इति शेषः। खनिभोगः कोशकरः कोशमात्रहेतुः, धान्यभोगः कोशकोष्ठागारकरः कोशस्य कोष्ठागारस्य च धान्यनिधानस्थानभूतस्य कारकः। अतश्च धान्यभोगः श्रेयानित्यर्थः। दुर्गसेतुवणिक्पथादिकर्मान्तरोपयोगी च धान्यभोग इत्यभिप्रायेणाह — **धान्यमूला ही**त्यादि। धान्यभोगं खनिभोगविशेषेण विकल्पयति — **महाविषयविक्रय** इति। महान्तः क्रेतृबहुत्वेन बहवः विषयविक्रयाः खन्युत्पन्नानां भोगविषयभूतानां लवणजातीयानां विक्रयाः यस्मिन् स तथाभूतः, खनिभोगो वा श्रेयान्।

द्रव्यहस्तिवनभोगयोरिति। तयोर्विशेषचिन्तायां, द्रव्यवनभोगः, सर्वकर्मणां योनिः साधकः, प्रभूतनिधानक्षमः प्रचुरसञ्चयार्हश्च। हस्तिवनभोगः, विपरीतः अतथाभूतः। ततश्च स एव हस्तिवनभोगात् श्रेयानित्यर्थः। इत्याचार्याः।

स्वमतमाह—**नेति कौटल्य** इत्यादि। द्रव्यवनमनेकासु भूमिष्वनेकप्रकारमुत्पादयितुं शक्यं, न तु हस्तिवनं हस्तिनां कञ्चित् कचिदेवोत्पत्तेः।

वारिस्थलपथभोगयोरनित्यो वारिपथभोगः, नित्यः स्थलपथभोग इति ।

भिन्नमनुष्या श्रेणीमनुष्या वा भूमिरिति । भिन्नमनुष्या श्रेयसी । भिन्नमनुष्या भोग्या भवत्यनुपजाप्या चान्येषाम् । अनापत्सहा तु । विपरीता श्रेणीमनुष्या कोपे महादोषा ।

तस्यां चातुर्वर्ण्याभिनिवेशे सर्वभोगसहत्वादवरवर्णप्राया श्रेयसी । बाहुल्याद् ध्रुवत्वाच्च कृष्याः कर्षणवती । कृष्याश्चान्येषां चारम्भाणां प्रयोजकत्वाद् गोरक्षकवती । पण्यनिचयर्णानुग्रहादाढ्यवणिग्वती ।

मुख्ये च शत्रुसैन्यवधलक्षण उपकारे हस्ती प्रधानं साधनमित्यतो हस्तिवनभोग एव श्रेयान् द्रव्यवनभोगादित्यर्थः ।

वारिस्थलपथभोगयोरिति । वारिपथभोगस्थलपथभोगयोः, अनित्ययोरित्यार्थम्, अनित्यः कादाचित्कः, वारिपथभोगः, श्रेयानिति शेषः । तयोरेव नित्ययोर्मध्ये श्रेयांसमाह — **नित्यः स्थलपथभोग** इति ।

असंहतमनुष्यायाः संहतमनुष्यायाश्चेत्यनयोर्भूम्योर्मध्ये का श्रेयसीति विचारे पूर्वा श्रेयसीत्याह— **भिन्नमनुष्या श्रेणीमनुष्या वे**त्यादि । श्रेयस्त्वे कारणमाह — **भिन्नमनुष्ये**ति । सा, भोग्या स्वविधेया, अन्येषाम् अनुपजाप्या च अभेद्या च, भवति । सर्वेष्वसंहतेषु कः कमुपजापिष्यतीति भावः । अनापत्सहा तु किन्तु सा आपदं न सहते आपत्समये पर्यवस्थापकाभावेन क्लिश्यत इत्यर्थः । श्रेणीमनुष्या श्रेणी संहतत्वं प्राप्ता मनुष्या यस्यां सा तथाभूता भूमिः, विपरीता अविधेया अन्योपजाप्या आपत्सहा च । **कोपे महादोषे**ति । सा चेत् कुपिता राजानमप्युच्छिन्द्यादित्यर्थः ।

तस्यामिति । भूमौ, चातुर्वर्ण्याभिनिवेशे तद्विषयश्रेयस्त्वविचारे, सर्वभोगसहत्वात् कर्षणभारवहनादिसर्वकर्मविनियोगक्षमत्वात्, अवरवर्णप्राया अवरवर्णग्रहणस्योपलक्षणत्वात् शूद्रगोपालकादिबहुला, भूमिः श्रेयसी । तस्याश्च कर्षणवत्त्वे गोरक्षकवत्त्वे वणिग्वत्त्वे च प्राशस्त्यं सहेतुकं क्रमेणाह — **बाहुल्यादि**ति । कृष्याः, बाहुल्यात् सार्वत्रिकत्वेन प्रचुरत्वाद्, ध्रुवत्वाच्च निश्चितफलोदयत्वाच्च, कर्षणवती भूमिः, श्रेयसी । कृष्याः कृषिव्यापारस्य अन्येषां भारवहनादिकर्मणां च गावो गोपालाश्च प्रयोजका इत्यतो गोरक्षकवती भूमि

भूमिगुणानामपाश्रयः श्रेयान् ।

दुर्गापाश्रया पुरुषापाश्रया वा भूमिरिति । पुरुषापाश्रया श्रेयसी । पुरुषवद्धि राज्यम् । अपुरुषा गौर्वन्ध्येव किं दुहीत ।

महाक्षयव्ययनिवेशां तु भूमिमवाप्तुकामः पूर्वमेव क्रेतारं पणेत । दुर्बलमराजबीजिनं निरुत्साहमपक्षमन्यायवृत्तिं व्यसनिनं दैवप्रमाणं यत्किञ्चनकारिणं वा ।

महाक्षयव्ययनिवेशायां हि भूमौ दुर्बलो राजबीजी निविष्टः सगन्धाभिः प्रकृतिभिः सह क्षयव्ययेनावसीदति ।

बलवानराजबीजी क्षयव्ययभयादसगन्धाभिः प्रकृतिभिस्त्यज्यते ।

श्रेयसीत्याह — **कृष्या** इत्यादि । **पण्यनिचयर्णानुग्रहादि**ति । पण्यनिचयेन पणनीयधान्यादिसञ्चयेन ऋणेन वृद्ध्यर्थद्रव्यदानेन च अनुग्रहाद् वणिग्भ्यो धनिकेभ्यश्चोपकारलाभात्, आढ्यवणिग्वती धनिकवाणिजवती भूमिः, श्रेयसी ।

अनित्यामित्रत्वसम्पन्नत्वादिषु भूमेर्गुणेषु मध्ये कः श्रेयानित्याह — **भूमिगुणाना**मिति । तेषां मध्ये, अपाश्रयः श्रेयान् रक्षा श्रेयसी ।

अपाश्रयेषु विशेषं चिन्तयति — **दुर्गापाश्रये**त्यादि । पुरुषारक्षायाः श्रेयस्त्वे कारणमाह — **पुरुषवद्धी**त्यादि । पुरुषवत् बहुलपुरुषयोगि । किं दुहीत आरम्भकपुरुषाभावान्न किमपि फलं प्रसुवीत ।

भूमेर्निवेशने शत्रुविजिगीष्वोरतिसन्धिभेदमाह — **महाक्षयव्ययनिवेशां त्वि**ति । महता युग्यपुरुषाद्यपचयेन धनव्ययेन च साधनीयजनपदादिनिवेशनां, भूमिम्, अवाप्तुकामः, पूर्वमेव अवाप्तेः प्रागेव, क्रेतारं पणेत । **कथम्भूतं, दुर्बला**दीनामष्टानामन्यतमम् । ते हि महता यत्नेन क्षयव्ययादिना भूमिं निवेश्य पश्चादात्महस्तमेवातिक्षयव्ययावसन्नाः प्रापयेयुरिति तत्पणनोपदेशः । स चायं विजिगीषोर्दुर्बलादिप्रयत्नसम्पादितनिवेशाया भूमेर्भोगो महाक्षयव्ययस्वप्रयत्ननिवेशितभूमेः शत्रोर्भूमिभोगाद् विशेषलाभो भवतीत्यतिसन्धिर्वेदितव्यः ।

दुर्बलादयः पणिताः कथमवसीदन्ति, तत्राह — **महाक्षयव्ययनिवेशायां ही**त्यादि । राजबीजी राजवंश्यः । निविष्टः कृतनिवेशनः । सगन्धाभिः समानजातीयाभिः साह्यदायिनीभिः ।

बलवन्तमप्यराजबीजिनं सगन्धत्वाभावात् प्रकृतयः साहाय्यदानेन नानुगृह्णन्ति किन्तु क्षयव्ययभयात् परित्यजन्तीत्याह — **बलवानि**त्यादि ।

निरुत्साहस्तु दण्डवानपि दण्डस्याप्रणेता सदण्डः क्षयव्ययेनावभज्यते ।

कोशवानप्यपक्षः क्षयव्ययानुग्रहहीनत्वान्न कुतश्चित् प्राप्नोति ।

अन्यायवृत्तिर्निविष्टमप्युत्थापयेत्, स कथमनिविष्टं निवेशयेत् ।

तेन व्यसनी व्याख्यातः ।

दैवप्रमाणो मानुषहीनो निरारम्भो विपन्नकर्मारम्भो वावसीदति ।

यत्किञ्चनकारी न किञ्चिदासादयति । स चैषां पापिष्ठतमो भवति ।

'यत्किञ्चिदारभमाणो हि विजिगीषोः कदाचिच्छिद्रमासादयेद्' इत्याचार्याः ।

निरुत्साहं प्रत्याह — निरुत्साहस्त्विति । सः, दण्डवानपि बलवानपि, दण्डस्याप्रणेता दण्डं यथास्थानमविनियोक्ता, सदण्डः दण्डेन सहेत्यर्थः, क्षयव्ययेन अवभज्यते भग्नकार्यो भवति ।

मित्ररहितः कोशवानपि क्षयव्ययोपकारालाभान्न कुतोऽपि सिद्धिमेतीत्याह — कोशवानपीत्यादि ।

अन्यायवृत्तिः प्राक्कृतनिवेशमप्युद्वासयेदन्यायशीलत्वेनैव हेतुना । कथं तस्मादनिविष्टनवनिवेशप्रत्याशेत्याह — अन्यायवृत्तिरित्यादि ।

तेन व्यसनी व्याख्यात इति । व्यसनिनि व्यसनित्वादेवानिविष्टनिवेशनमसम्भावनीयमित्यर्थः ।

दैवप्रमाण इत्यादि । दैवप्रमाणो यद्भविष्यः । मानुषहीनः पुरुषकाररहितः ।

यत्किञ्चनकारीत्यादि । 'इदमेवं कर्तव्यम् एवं कृते इदं सेत्स्यती'त्याद्विमर्शविकलं यत्किञ्चित् कुर्वाणो यत्किञ्चनकारी । एषां दुर्बलादीनां मध्ये ।

यत्किञ्चनकारिण्यपि कमपि गुणमाचार्यमतेनाह — यत्किञ्चिदित्यादि । अयमभिप्रायः — यत्किञ्चिदारभमाणो हि शत्रुर्विजिगीषुणा 'मूर्खोऽयमि'त्यवज्ञायमानस्तस्यात्मानं प्रत्यप्रतिजागरचेष्टितस्य कदाचित् प्रहारस्थानमुपलभेतेति ।

'यथा छिद्रं तथा विनाशमप्यासादयेद्' इति कौटल्यः।

तेषामलाभे यथा पार्ष्णिग्राहोपग्रहे वक्ष्यामस्तथा भूमिमवस्थापयेत्। इत्यभिहितसन्धिः।

गुणवतीमादेयां वा भूमिं बलवता क्रयेण याचितः सन्धिमवस्थाप्य दद्यात्। इत्यनिभृतसन्धिः।

समेन वा याचितः कारणमवेक्ष्य दद्यात्—'प्रत्यादेया मे भूमिर्वश्या वा, अनया प्रतिबद्धः परो मे वश्यो भविष्यति, भूमिविक्रयाद् वा मित्रहिरण्यलाभः कार्यसामर्थ्यकरो मे भविष्यति' इति।

तेन हीनः क्रेता व्याख्यातः।

स्वमतमाह— **यथा छिद्रमिति**। **विनाशमप्यासादयेदिति**। आत्मच्छिद्रस्य विजिगीषुणा बहुशो लाभादिति भावः।

उक्तदुर्बलाद्यलाभे पार्ष्णिग्राहचिन्तावक्ष्यमाणरीत्यातिसन्धिरेषितव्य इत्याह — **तेषामलाभ** इत्यादि। पार्ष्णिग्राहयोर्हि मिथोऽतिसन्धिः शङ्कितानर्थपरिहारादिलक्षणस्तत्रोक्तः। तथाविधं यंकमपि परापेक्षया विशेषलाभं पुरस्कृत्य भूमिं निवेशयेदित्यर्थः। **इत्यभिहितसन्धिरिति**। अभिहितो बद्धः भूमिदानादाननिर्वृत्तत्वादविचाल्यः सन्धिरित्यर्थः।

अतथाभूतं सन्धिमाह — **गुणवतीमिति**। सम्पन्नत्वानित्यामित्रत्वादिगुणयुक्ताम्, अन्याशक्यभोगतायामाह — **आदेयां वा** क्रेतुरुपेक्षया कालान्तरे पुनः प्रत्यादानयोग्यां वा, भूमिं, बलवता प्रबलेन सामन्तेन, **क्रयेण** याचितः 'मह्यं विक्रीणीष्वे'ति प्रार्थितः, सन्धिम् अवस्थाप्य 'समयेषु मामनुगृह्णाणे'त्येवं सामान्यतः सन्धिं स्थापयित्वा, दद्यात् विक्रीणीत। **इत्यनिभृतसन्धिरिति**। इत्ययम् अविश्वस्तसन्धिः, दुर्बलं प्रति प्रबलस्य समयलङ्घनसम्भवादिति भावः।

समेन यथोक्तभूमिप्रार्थने विधिमाह— **समेन वा याचित** इत्यादि। यथोक्तां भूमिं समेन प्रार्थितः, तस्याः शक्यप्रत्यादानतां वा, आत्मोपभोग्यतां वा, तत्सम्बन्धात् परस्यात्मवशे वर्तिष्यमाणतां वा, तद्विक्रयवशान्मित्रलाभहिरण्यलाभयोः कार्यसाधनक्षमयोर्भविष्यत्तां वा कारणं विमृश्य तदवधारणे विक्रीणीयादित्यर्थः।

समविधिं हीनेऽप्यतिदिशति — **तेनेत्यादि**।

एवं मित्रं हिरण्यं च सजनामजनां च गाम् ।
लभमानोऽतिसन्धत्ते शास्त्रवित् सामवायिकान् ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे एकादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ अनवसितसन्धिः,
आदितो **नवशततमः** ॥

एवमिति । उक्तेन प्रकारेण, मित्रं नित्यत्ववश्यत्वादिविशेषयुक्तं, **हिरण्यं च** प्रार्थितार्थत्वादिभेदभिन्नं, सजनाम् अजनाम् , एतच्च सम्पन्नत्वादेरुपलक्षणम् । गां च भूमिं च, लभमानः, शास्त्रवित् अर्थशास्त्रज्ञः, सामवायिकान् अतिसन्धत्ते सामवायिकान्तरापेक्षया विशेषलाभं प्राप्नोति ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे एकादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ अनवसितसन्धिः,
आदितो नवोत्तरशततमः ॥

११६. प्रक. — कर्मसन्धिः ।

'त्वं चाहं च दुर्गं कारयावहे' इति कर्मसन्धिः ।

तयोर्यो दैवकृतमविषह्यमल्पव्ययारम्भं दुर्गं कारयति सोऽतिसन्धत्ते ।

तत्रापि स्थलनदीपर्वतदुर्गाणामुत्तरोत्तरं श्रेयः ।

सेतुबन्धयोरप्याहार्योदकात् सहोदकः श्रेयान् । सहोदकयोरपि प्रभूतवापस्थानः श्रेयान् ।

द्रव्यवनयोरपि यो महत् सारवद्द्रव्याटवीकं विषयान्ते नदीमातृकं द्रव्यवनं छेदयति, सोऽतिसन्धत्ते । नदीमातृकं हि स्वाजीवमपाश्रयश्चापदि भवति ।

अथ कर्मसन्धिं निरूपयिष्यंस्तल्लक्षणमाह — **त्वं चाहं** चेत्यादि । दुर्गग्रहणं सेतुबन्धादेरप्युपलक्षणम् । 'दुर्गाद्यन्यतममावां कारयावहे' इति संविदा क्रियमाणः सन्धिः कर्मसन्धिः ।

तत्र दुर्गसन्धावतिसन्धिमाह — **तयोर्य** इत्यादि । सहितयोर्मध्ये, यः, दैवकृतं स्वभावविषमस्थलम्, अत एव अविषह्यं शत्रुदुर्विषहम्, अल्पव्ययारम्भम् अल्पव्ययसाध्यनिष्पादं, दुर्गं कारयति, सः, अतिसन्धत्ते अर्थादुक्तविपरीतदुर्गकारकमन्यं लाभतोऽतिशेते ।

दैवकृतदुर्गभेदेष्वपि श्रेयस्त्वमवधारयति — **तत्रापी**त्यादि ।

सेतुबन्धतारतम्ये श्रेयस्त्वमाह — **सेतुबन्धयोरपी**त्यादि । तयोरपि, आहार्योदकात् वर्षासु प्रयत्नविधारणीयजलात्, सहोदकः सहजतोयः, श्रेयान् सहोदकयोरपि मध्ये, प्रभूतवापस्थानः प्रचुरसस्यवापयोग्यप्रदेशोपेतः सहोदकः, श्रेयान् ।

द्रव्यवनविषयमतिसन्धिमाह— **द्रव्यवनयोरपी**ति । तयोर्मध्ये, यः, महत् विस्तीर्णं, सारवद्द्रव्याटवीकं प्रभूतफलप्रसवयोग्यता सारः सारवती द्रव्याटवी द्रव्योत्पत्तिभूमिर्यस्मिंस्तत् तथाभूतं, विषयान्ते स्वीयजनपदप्रत्यन्ते नदीमातृकं नदीपायनीयजलं, द्रव्यवनं छेदयति अद्रव्यच्छेदनेन सम्पादयति सः, अतिसन्धत्ते अनदीमातृकद्रव्यवनच्छेदकापेक्षया विशेषलाभं प्राप्नोति कुतः, हि यतः, नदीमातृकं, स्वाजीवं सुखोपजीव्यम्, आपदि दुर्भिक्षे, अपाश्रयश्च रक्षास्थानं च, भवति ।

हस्तिवनयोरपि यो बहुशूरमृगं दुर्बलप्रतिवेशमनन्तावक्लेशि विषयान्ते हस्तिवनं बध्नाति, सोऽतिसन्धत्त ।

तत्रापि 'बहुकुण्ठाल्पशूरयोरल्पशूरं श्रेयः । शूरेषु हि युद्धम् । अल्पाः शूरा बहूनशूरान् भञ्जन्ति, ते भग्नाः स्वसैन्यावघातिनो भवन्ति' इत्याचार्याः ।

नेति कौटल्यः । कुण्ठा बहवः श्रेयांसः, स्कन्धविनियोगादनेकं कर्म कुर्वाणाः स्वेषामपाश्रया युद्धे, परेषां दुर्धर्षा विभीषणाश्च । बहुषु हि कुण्ठेषु विनयकर्मणा शक्यं शौर्यमाधातुं, न त्वेवाल्पेषु शूरेषु बहुत्वमिति ।

खन्योरपि यः प्रभूतसारामदुर्गमार्गामल्पव्ययारम्भां खनिं खानयति, सोऽतिसन्धत्ते ।

हस्तिवनविषयमतिसन्धिमाह—हस्तिवनयोरपीति । तयोरपि मध्ये, यः, बहुशूरमृगं, दुर्बलप्रतिवेशं दुर्बलाः नियतनिवासस्थानापेक्षया निहीनवाससौकर्याः प्रतिवेशा वनैकदेशा यस्मिंस्तत् तथाभूतम्, अनन्तावक्लेशि अनन्तैः अवक्लेशैः प्रवेशनिर्गमादिविषयैरुपेतं, हस्तिवनं, विषयान्ते प्रत्यन्ते, बध्नाति निवेशयति, सः, अतिसन्धत्ते, अर्थादुक्तविपरीतहस्तिवननिवेशिनम् ।

यथोक्तगुणेऽपि हस्तिवने विशेषावधारणमाचार्यमतेनाह — तत्रापीति । बहुकुण्ठाल्पशूरयोः बहुशूराल्पशूरयोर्हस्तिवनयोर्मध्ये, अल्पशूरं श्रेयः। कुतः, हि यतः, शूरेषु युद्धं शूरेष्वेव हस्तिष्वायत्तं युद्धं, कुण्ठास्तु युद्धानुपयोगिन इत्यर्थः । शूराशूरैरुपकारापकारौ दर्शयति—अल्पाः शूरा इत्यादि । ते अशूराः । स्वसैन्यावघातिनः अकुतोमुखपलायनावसरे स्वीयमपि सैन्यमवमृद्नन्तीति भावः ।

स्वमतमाह—नेति कौटल्य इत्यादि । स्कन्धविनियोगात् सैन्यसमुदाये विनियोगात् । कर्म उपकरणनयनानयनादिकम् । स्वेषाम् अपाश्रयाः स्वीयानामुपकारकाः । परेषां दुर्धर्षा विभीषणाश्च स्वबहुत्वमात्रेण दृष्टेन शत्रूणां भीतिजनकाः अत एव धर्षयितुमशक्याश्च । यश्च शौर्यगुणोऽल्पेषु श्रैष्ठ्यहेतुरुक्तः स कुण्ठेष्वपि बहुषु हस्तिशिक्षाकर्मणोत्पादयितुं शक्यः न तु स्वभावशूरेष्वल्पेषु बहुत्वमापादयितुं शक्यमित्याह — बहुषु हीत्यादि । इतिशब्दः बहुकुण्ठश्रेयस्त्वं प्रति 'स्कन्धविनियोगादि'त्यादिनोक्तस्यार्थस्य हेतुतां द्योतयति।

खन्योरपि मध्ये प्रचुरसारवस्तुत्वाकृच्छ्रगम्यमार्गत्वाल्पव्ययसाध्यत्वै-

तत्रापि 'महासारमल्पसारं वा प्रभूतमिति। महासारमल्पं श्रेयः। वज्रमणिमुक्ताप्रवालहेमरूप्यधातुर्हि प्रभूतमल्पसारमत्यर्घेण ग्रसते' इत्याचार्याः।

नेति कौटल्यः। चिरादल्पो महासारस्य क्रेता विद्यते। प्रभूतः सातत्यादल्पसारस्य।

एतेन वणिक्पथो व्याख्यातः।

तत्रापि 'वारिस्थलपथयोर्वारिपथः श्रेयान्, अल्पव्ययव्यायामः प्रभूतपण्योदयश्च' इत्याचार्याः।

नेति कौटल्यः। संरुद्धगतिरसार्वकालिकः प्रकृष्टभययोनिर्निष्प्रतिकारश्च वारिपथः। विपरीतः स्थलपथः।

युक्तां खनिं खानयन् अतथाभूतखनिखानकापेक्षया विशेषलाभं भजत इत्याह — खन्योरपीत्यादि।

खनावपि महार्घं वज्रमण्यादिकं सारवस्तु परिमितं लभ्यमानं वा श्रेयः, अल्पार्घमसारवस्तु वा प्रचुरं लभ्यमानं श्रेय इति विमर्शे, वज्रमण्यादेर्महासारस्याल्पस्यापि मूल्यतः प्रभूतालपसारातिशायित्वादाद्यमेव श्रेय इत्याचार्याणां मतमाह — तत्रापि महासारमित्यादि।

आचार्यमतं न युक्तं, यतो महासारस्य वज्रमण्यादेः क्रेता बहोरपि कालादल्प एव लभ्यते, अल्पसारस्य तु लवणादेर्नित्यावर्जनीयोपकारत्वात् क्रेतारो बहवश्च नित्यं च लभ्यन्त इत्याह— नेति कौटल्यश्चिरादित्यादि। एवञ्च प्रभूतमल्पसारं श्रेय इति स्वमतमुक्तं भवति।

उक्तेन प्रकारेण वणिक्पथोऽपि विशेषलाभमवेक्ष्य निवेशनीय इत्याह— एतेनेत्यादि।

वणिक्पथोऽपि तावद् द्विविधो वारिपथः स्थलपथ इति। तत्र वारिपथः श्रेयान्, कुतः, अल्पेन धनव्ययेन पुरुषपरिश्रमेण च साध्यत्वात्, स्थलपथापेक्षया पण्यनयनानयनसौकर्यातिशयेन बहुतरलाभहेतुत्वाच्चेत्याचार्यमतमाह — तत्रापि वारिस्थलपथयोरित्यादि।

स्वमतमाह— नेति कौटल्यः संरुद्धगतिरित्यादि। विपदि सर्वतोनिरुद्धगमनः, वृष्ट्यादिबाधकालेष्वगम्यः स्थलपथाभ्यधिकव्यपायहेतुरशक्य-

वारिपथे तु कूलसंयानपथयोः कूलपथः पण्यपट्टणबाहुल्याच्छ्रेयान्। नदीपथो वा सातत्याद् विषह्याबाधत्वाच्च।

स्थलपथेऽपि। 'हैमवतो दक्षिणापथाच्छ्रेयान् हस्त्यश्वगन्धदन्ताजिनरूप्यसुवर्णपण्याः सारवत्तराः' इत्याचार्याः।

नेति कौटल्यः। कम्बलाजिनाश्वपण्यवर्जाः शङ्खवज्रमणिमुक्तासुवर्णपण्याश्च प्रभूततरा दक्षिणापथे।

दक्षिणापथेऽपि बहुखनिः सारपण्यः प्रसिद्धगतिरल्पव्यायामो वा वणिक्पथः श्रेयान्। प्रभूतविषयो वा फल्गुपण्यः।

तेन पूर्वः पश्चिमश्च वणिक्पथो व्याख्यातः।

प्रतिक्रियश्च जलपथ इति स न श्रेयान्, उक्तविपरीतगुणत्वात् तु स्थलपथः श्रेयानित्यर्थः।

वारिपथोऽपि द्विप्रकारः अनुतीरगमनमार्गो जलगमनमार्ग इति। तत्राद्यः श्रेयान् पण्यपुटभेदनबहुत्वादित्याह — **वारिपथे त्वित्यादि**। तत्र विकल्पेनापवादमाह — **नदीपथो वेति**। नदीवारिपथो वा, श्रेयान्, कुतः, **सातत्यात्** सन्ततगतित्वात्, **विषह्याबाधत्वाच्च** अनुत्कटाबाधत्वाच्च।

स्थलपथेऽपि विशेषमाचार्यमतेनाह— **स्थलपथेऽपीति**। तत्रापि, **हैमवतः** उत्तरापथः, दक्षिणापथात् श्रेयान्। कुत इत्याह — **हस्त्यश्वेत्यादि**। हस्त्यादिषु गन्धः कस्तूरी। हस्त्यादयः सप्त पण्यपदार्थाः, **सारवत्तराः** अतिशयेनार्घवन्तः, तत्र प्रचुरा इति वाक्यशेषः।

तत् खण्डयति — **नेति कौटल्य इत्यादि**। कम्बलाजिनाश्ववर्जमन्ये हस्त्यादयः, शङ्खवज्रमणिमुक्तासुवर्णरूपाः पण्यपदार्थाश्च उत्तरापथापेक्षया **दक्षिणापथे प्रचुरतराः**। ततश्च पण्यभेदेनान्योन्यापेक्षं श्रेयस्त्वमुभयोरविशिष्टमित्यभिप्रायः।

दक्षिणापथेऽपि विशेषमाह — **दक्षिणापथेऽपीति**। तत्रापि, **बहुखनिः**, **प्रसिद्धगतिः** निरपायसिद्धगतागतः, **अल्पव्यायामः** अल्पपरिश्रमः, एवम्भूतः **सारपण्यो वणिक्पथो वा श्रेयान्**। **प्रभूतविषयो वा फल्गुपण्यः** असारपण्यत्वेऽपि प्रचुरक्रेतृको वणिक्पथो वा श्रेयान्।

पूर्वपश्चिमवणिक्पथयोरपि विषये श्रेयस्त्वमित्थं द्रष्टव्यमित्याह — **तेनेत्यादि**।

तत्रापि चक्रपादपथयोश्चक्रपथो विपुलारम्भत्वाच्छ्रेयान् । देश-कालसम्भावनो वा खरोष्ट्रपथः ।

आभ्यामंसपथो व्याख्यातः ॥

परकर्मोदयो नेतुः क्षयो वृद्धिर्विपर्यये ।
तुल्ये कर्मपथे स्थानं ज्ञेयं स्वं विजिगीषुणा ॥
अल्पागमातिव्ययता क्षयो वृद्धिर्विपर्यये ।
समायव्ययता स्थानं कर्मसु ज्ञेयमात्मनः ॥
तस्मादल्पव्ययारम्भं दुर्गादिषु महोदयम् ।
कर्म लब्ध्वा विशिष्टः स्यादित्युक्ताः कर्मसन्धयः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे द्वादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ कर्मसन्धिः,
आदितो दशशततमः ॥

वणिक्पथे विशेषान्तरमाह — तत्रापीति । वणिक्पथेऽपि, चक्रपाद-पथयोः चक्रपथश्चक्रयुक्तमनुष्यवाह्यक्षुद्रशकटगम्यो मार्गः, पादपथो मनुष्यपा-दचारप्राप्यो मार्गः तयोर्मध्ये, चक्रपथः विपुलारम्भत्वात् पादपथापेक्षया प्रचु-रपण्यव्यवहारत्वाद्धेतोः, श्रेयान् । विकल्पमाह — देशकालसम्भावनो वा खरोष्ट्रपथ इति । विप्रकृष्टदेशं भूरिपण्यापेक्षं च पण्यप्रियकालमनुसृत्य खरपथ उष्ट्रपथश्च वा श्रेयस्त्वेन ग्राह्य इत्यर्थः ।

इममेव विभिमंसपथेऽतिदिशति—आभ्यामित्यादि । अंसपथः युग्य-बलीवर्दविनीयमानपण्यो मार्गः ॥

कर्मफलभूतानां क्षयवृद्धिस्थानानां लक्षणमाह — परकर्मोदय इति । परस्य शत्रोः कर्मोदयः कर्मजो लाभः, नेतुः विजिगीषोः क्षयः, ज्ञेय इत्यप-कृष्य सम्बध्यते । विपर्यये स्वकर्मोदये, वृद्धिः, ज्ञेया । कर्मपथे तुल्ये शत्रु-समफले सति, स्वं स्थानं क्षयवृद्धिव्यतिरेकेण स्वभावावस्थानं, ज्ञेयं, विजि-गीषुणा ॥

लक्षणान्तरमाह—अल्पागमातिव्ययतेति । आत्मनः कर्मसु आया-तिक्रान्तव्ययोगित्वं, क्षयः क्षयपदार्थः । विपर्यये महागमाल्पव्ययत्वे वृद्धिः । समायव्ययता स्थानं ज्ञेयम् ॥

तस्मादिति । इत्थं क्षयवृद्धिस्थानज्ञानात्, दुर्गादिषु दुर्गसेत्वादिषु, **अल्पव्ययारम्भं**, महोदयं महाफलं, कर्म, लब्ध्वा आसाद्य, **विशिष्टः** परस्मा-**दभ्यधिकः**, स्याद्, विजिगीषुः । इति एवं, कर्मसन्धयः उक्ताः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे द्वादशोऽध्यायः
मित्रहिरण्यभूमिकर्मसन्धौ कर्मसन्धिः,
आदितो दशोत्तरशततमः ॥

११७. प्रक. पार्ष्णिग्राहचिन्ता ।

संहत्यारिविजिगीष्वोरमित्रयोः पराभियोगिनोः पार्ष्णिं गृह्णतोर्यः शक्तिसम्पन्नस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । शक्तिसम्पन्नो ह्यमित्रमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्, न हीनशक्तिरलब्धलाभ इति ।

शक्तिसाम्ये यो विपुलारम्भस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । विपुलारम्भो ह्यमित्रमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्, नाल्पारम्भः सक्तचक्र इति ।

आरम्भसाम्ये यः सर्वसन्दोहेन प्रयातस्य पार्ष्णिं गृह्णाति,

पार्ष्णिग्राहचिन्तेति सूत्रम् । पार्ष्णिग्राहः पृष्ठस्थः शत्रुः तदवस्थापन्नस्य राज्ञः चिन्ता अनुष्ठानविचारः क्रियत इति सूत्रार्थः । सामवायिकादीनामतिसन्धिरुक्तः । पार्ष्णिग्राहस्येदानीमभिधीयते ।

संहत्येति । अमित्रयोः स्वशत्रुभूतयोः, पराभियोगिनोः पराभियोगव्यापृतयोः, अरिविजिगीष्वोः, पार्ष्णिं यथोक्तारिसम्बन्धिनं यथोक्तविजिगीषुसम्बन्धिनं च पार्ष्णिं, संहत्य गृह्णतोः यौ द्वौ सम्भूय गृह्णीतस्तयोर्मध्ये इत्यर्थः, यः शक्तिसम्पन्नस्य पार्ष्णिं गृह्णाति, सः अतिसन्धत्ते हीनशक्तिपार्ष्णिग्राह्यपेक्षया लाभविशेषं प्राप्नोति । तत्र हेतुमाह—शक्तिसम्पन्नो हीत्यादि । अयमर्थः—शक्तिमान् हि स्वामित्रोच्छेदे सिद्धे प्राप्तोपचयो भूत्वा पार्ष्णिग्राहस्याप्युच्छेदं कुर्यादिति तदमित्रोच्छेदप्रतिबन्धाचरणं पार्ष्णिग्राहस्य स्वात्मत्राणाय कल्पेत । हीनशक्तिस्तु स्वामित्रोच्छेदासमर्थत्वादप्राप्तलाभोऽशङ्कनीय इति तत्पार्ष्णिग्राहिणो न कश्चिद् विशेषलाभ इति ।

शक्तिसाम्य इत्यादि । समशक्तिकयोरपि ग्राह्यपार्ष्ण्योर्मध्ये, यः विपुलारम्भस्य भक्तोपकरणादिसर्वविधयात्रासाधनसम्पन्नस्य, पार्ष्णिं गृह्णाति, सः अतिसन्धत्ते अल्पारम्भपार्ष्णिग्राह्यपेक्षया लाभविशेषं स्वात्मत्राणलक्षणं प्राप्नोति । तत्र कारणमाह—विपुलारम्भो हीति । हि यतः, विपुलारम्भः, अमित्रमुच्छिद्य शत्रूच्छेदेन प्राप्तवृद्धिर्भूत्वा, पार्ष्णिग्राहम् उच्छिन्द्यात् । नाल्पारम्भः परिमितसैन्योद्योगस्तु पार्ष्णिग्राहं नोच्छिन्द्यात्, कुतः, सक्तचक्र इति विक्षिप्तसैन्य इति कृत्वा सज्जनीयसैन्यत्वाद्धेतोरित्यर्थः ।

तुल्यारम्भविषयं विशेषमाह— आरम्भसाम्य इति । समानारम्भयोर्मध्य इत्यर्थः, यः सर्वसन्दोहेन प्रयातस्य सर्वसैन्यसमूहेन स्वं मूलबल-

सोऽतिसन्धत्ते । शून्यमूलो ह्यस्य सुकरो भवति, नैकदेशबलप्रयातः कृतपार्ष्णिप्रतिविधान इति ।

बलोपादानसाम्ये यश्चलामित्रं प्रयातस्य पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते । चलामित्रं प्रयातो हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहमुच्छिन्द्यात्, न स्थितामित्रं प्रयातः । असौ हि दुर्गप्रतिहतः । पार्ष्णिग्राहे च प्रतिनिवृत्तस्थितेनामित्रेणावगृह्यते ।

तेन पूर्वे व्याख्याताः ।

मप्युपादाय यातऽयमभिगतस्य, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते एकदेशबलप्रयातपार्ष्णिग्राह्यपेक्षया लाभविशेषं प्राप्नोति । हेतुमाह— हि यतः, शून्यमूलः अकृतरक्षमूलस्थानो ग्राह्यपार्ष्णिः, अस्य पार्ष्णिग्राहस्य, सुकरः सुखसाध्यः, भवति । नैकदेशबलप्रयातः, स तु सुकरो न भवति, कुतः, कृतपार्ष्णिप्रतिविधान इति सः बलैकदेशस्थापनेन सम्पादितपार्ष्णिग्राहप्रतिविधिरितिकृत्वा ।

समानं बलमुपात्तवतोर्ग्राह्यपार्ष्ण्योः पार्ष्णिग्रहणेऽतिसन्धिमाह — **बलोपादानसाम्य** इति । तत्र, यः, चलामित्रम् अकृतदुर्गं, शत्रुं प्रयातस्य पार्ष्णिं गृह्णाति सः अतिसन्धत्ते । कुतः, हि यतः, चलामित्रं प्रयातः, सुखेन अक्लेशेन, अवाप्तसिद्धिः लब्धशत्रुजयः, भूत्वेति शेषः, पार्ष्णिग्राहम् उच्छिन्द्यात् । अतश्च तत्पार्ष्णिग्रहणे सत्यात्मपरित्राणं भवतीत्येष विशेषलाभ इति भावः । दुर्गादिषुप्रतिष्ठितं स्थितामित्रं प्रयातस्तु सुखेन सिद्धिं नावाप्नुयात्, न च पार्ष्णिग्राहमुच्छिन्द्यादिति न तत्पार्ष्णिग्राहिणो विशेषलाभः कश्चिदित्यभिप्रायेणाह — **न स्थितामित्रं प्रयात** इति । स्थितामित्रं प्रयातः केन कारणेनावाप्तसिद्धिर्न भवतीत्यत्राह — **असाविति** । हि यतः, असौ, दुर्गप्रतिहतः परदुर्गेण कुण्ठितवीर्यो भवति । न केवलं विशेषलाभाभावः, प्रत्युतानर्थोऽपि स्थितामित्राभियायिपार्ष्णिग्राहिणः सम्भाव्यत इत्याह— **पार्ष्णिग्राहे चेति** । स्थितामित्राभियायिपार्ष्णेर्ग्रहणे च, क्रियमाण इति शेषः, प्रतिनिवृत्तस्थितेन स्थितामित्राद् दुर्गप्रतिहतिवशात् प्रतिनिवृत्य स्थितेन अमित्रेण, अवगृह्यते अर्थात् तत्पार्ष्णिग्राही ।

तेनेति । तेन स्थितामित्राभियायिपार्ष्णिग्राहिण उक्तेन विधिना, पूर्वे हीनशक्तिपार्ष्णिग्राही अल्पारम्भपार्ष्णिग्राही एकदेशबलप्रयातपार्ष्णिग्राही

शत्रुसाम्ये यो धार्मिकाभियोगिनः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते। धार्मिकाभियोगी हि स्वेषां च द्वेष्यो भवति। अधार्मिकाभियोगी सम्प्रियः।

तेन मूलहरतादात्विककदर्याभियोगिनां पार्ष्णिग्रहणं व्याख्यातम्।

मित्राभियोगिनोः पार्ष्णिग्रहणे त एव हेतवः।

मित्रममित्रं चाभियुञ्जानयोर्यो मित्राभियोगिनः पार्ष्णिं

चेत्येते, व्याख्याता उक्तविधानाः, तेऽपि हीनशक्त्यादिभिः शत्रोः प्रतिनिवृत्तस्थितैरवगृह्यन्त इत्यर्थः।

शत्रुसाम्य इति। समानयोः शत्र्वोर्मध्ये, यः धार्मिकाभियोगिनः धार्मिकं शत्रुमभियुञ्जानस्य, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते विशेषलाभं भजते। कुतः, हि यतः, धार्मिकाभियोगी, स्वेषां, चकारात् परेषां च, द्वेष्यो भवति। अतश्च सर्वद्वेष्यत्वाद् दुर्लभसिद्धिः पार्ष्णिग्राहेण सुसाधो भवतीत्येष एव तस्य विशेषलाभ इति भावः। अधार्मिकाभियोगी, संप्रियः स्वेषां परेषां च सम्यक् प्रेमविषयः, ततश्च स निश्चितजयः पार्ष्णिग्राहस्यासाध्यो भवतीति भावः।

तेनेति। उक्तेन विधिना, मूलहरतादात्विककदर्याभियोगिनां मूलहरः पितृपैतामहार्थान्यायभक्षकः तादात्विकस्तदातदोत्पद्यमानार्थभक्षकः कदर्यो भृत्यात्मपीडयार्थोपचायकः मूलहराद्यभियोगिनां त्रयाणां पार्ष्णिग्रहणं, व्याख्यातं व्याख्यातप्रायलाभविशेषं, द्रष्टव्यमिति शेषः। तद् यथा — मूलहरतादात्विकाभियोगिनोर्मध्ये मूलहराभियोगिनो यः पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते, मूलहराभियोगी हि सुखेन मूलहरमर्थकृच्छ्रिणमुच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यात्। तादात्विककदर्याभियोगिनोश्च मध्ये कदर्याभियोगिनो यः पार्ष्णिं गृह्णाति सोऽतिसन्धत्ते, कदर्याभियोगी हि कदर्यमभृत्योपकारकं सुखेनोच्छिद्य पार्ष्णिग्राहमुच्छिन्द्यादिति।

य एतेऽतिसन्धिहेतव उक्ताः, त एव मित्राभियोगिनोः पार्ष्णिग्रहणेऽपि योज्या इत्याह — **मित्राभियोगिनोरित्यादि**।

मित्रममित्रं चाभियुञ्जानयोरित्यादि। अयमर्थः — मित्रामित्राभियोगिनोर्द्वयोर्मध्ये मित्राभियोगिनः पार्ष्णिं गृह्णन् विशेषलाभं मित्राभियोगप्रति-

गृह्णाति, सोऽतिसन्धत्ते। मित्राभियोगी हि सुखेनावाप्तसिद्धिः पार्ष्णिग्राहमुच्छिन्द्यात्। सुकरो हि मित्रेण सन्धिर्नामित्रेणेति।

मित्रममित्रं चोद्धरतोर्योऽमित्रोद्धारिणः पार्ष्णिं गृह्णाति, सोऽतिसन्धत्ते। वृद्धमित्रो ह्यमित्रोद्धारी पार्ष्णिग्राहमुच्छिन्द्यात्, नेतरः स्वपक्षोपघाती।

तयोरलब्धलाभापगमने यस्यामित्रो महतो लाभाद् वियुक्तः क्षयव्ययाधिको वा, स पार्ष्णिग्राहोऽतिसन्धत्ते। लब्धलाभापगमने यस्यामित्रो लाभेन शक्त्या हीनः, स पार्ष्णिग्राहोऽतिसन्धत्ते। यस्य वा यातव्यः शत्रोर्विग्रहापकारसमर्थः स्यात्।

पार्ष्णिग्राहयोरपि यः शक्यारम्भबलोपादानाधिकः स्थितशत्रुः

बन्धाचरणद्वारकात्मपरित्राणलक्षणं प्राप्नोति। कुतः, यतो मित्राभियोगी पार्ष्णिग्राहेणोपेक्षितश्चेत् स सुखात् मित्रेण सह सन्धिक्रियया प्राप्तवृद्धिर्भूत्वा पार्ष्णिग्राहस्योच्छेदं कुर्याद्, अमित्राभियोगी तूपेक्षितोऽपि अमित्रेण सह सन्धेरसुकरतयानवाप्तसिद्धिर्भवन् न पार्ष्णिग्राहमुच्छेत्तुं प्रभवेदिति।

मित्रामित्रोद्धारिणोः पार्ष्णिग्रहणे विशेषमाह— **मित्रममित्रं चोद्धरतोरिति**। तयोर्मध्ये, यः, अमित्रोद्धारिणः, पार्ष्णिं गृह्णाति, सः, अतिसन्धत्ते। कुतः, हि यतः, वृद्धमित्रः अनुपहतस्वपक्षः, अमित्रोद्धारी, पार्ष्णिग्राहम्, उच्छिन्द्यात्। इतरः मित्रोद्धारी, स्वपक्षोपघाती स्वमित्रोपघातप्राप्तपरिक्षयतयेत्यर्थः, पार्ष्णिग्राहं, नोच्छिन्द्यात् नोच्छेत्तुं शक्नुयात्।

विशेषान्तरमाह — **तयोरिति**। मित्रामित्रोद्धारिणोः, अलब्धलाभापगमने कमपि लाभमनवाप्य प्रत्यागमने सति, यस्य पार्ष्णिग्राहस्य, अमित्रः, महतो लाभाद्, वियुक्तः अपेतः, क्षयव्ययाधिको वा युग्यपुरुषापचयेन धनव्ययेन च परस्मादभ्यधिको वा भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते। लब्धलाभापगमने लाभमवाप्य प्रत्यागमने सति, यस्य अमित्रः, लाभेन शक्त्या हीनः परापेक्षया हीनलाभो हीनशक्तिश्च भवति, स पार्ष्णिग्राहः, अतिसन्धत्ते। प्रकारान्तरमाह— **यस्य वे**त्यादि। यातव्यः अरिः, यस्य पार्ष्णिग्राहस्य, शत्रोः अर्थाद् विजिगीषोः, विग्रहापकारसमर्थो भवति, स वा पार्ष्णिग्राहोऽतिसन्धत्ते इति सम्बन्धः।

अतिसन्ध्यन्तरमाह—**पार्ष्णिग्राहयोरपीति**। तयोरपि गुणान्तरस-

पार्श्वस्थायी वा सोऽतिसन्धत्ते । पार्श्वस्थायी हि यातव्याभिसारो मूलबाधकश्च भवति । मूलाबाधक एव पश्चात्स्थायी ।

पार्ष्णिग्राहास्त्रयो ज्ञेयाः शत्रोश्चेष्टानिरोधकाः ।
सामन्ताः पृष्ठतोवर्गः प्रतिवेशौ च पार्श्वयोः ॥
अरेर्नेतुश्च मध्यस्थो दुर्बलोऽन्तर्धिरुच्यते ।
प्रतिघाते बलवतो दुर्गाटव्यपसारवान् ॥

मध्यमं त्वरिविजिगीष्वोर्लिप्समानयोर्मध्यमस्य पार्ष्णिं गृह्णतो

मानयोर्मध्ये, यः, शक्यारम्भबलोपादानाधिकः साध्यकार्यारम्भस्य सैन्यस्योपादाने अधिकः परस्मादुत्कृष्टः परसैन्याभ्यधिकप्रमाणतथाविधसैन्ययुक्तो भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते । यः स्थितशत्रुः गृहीतपार्ष्णौ चलशत्रौ सति स्वयं दुर्गादिप्रतिष्ठितः शत्रुर्भवति, सः पार्ष्णिग्राहः, अतिसन्धत्ते । यो वा पार्श्वस्थायी यातव्यपार्श्वस्थितिशीलः, सः पार्ष्णिग्राहः, अतिसन्धत्ते । तत्राद्ययोः परप्रधर्षकत्वं विशेषलाभः प्रतीत एव । अन्त्यस्य तु विशेषलाभं विशदयितुमाह—**पार्श्वस्थायी** हीति । स हि, यातव्याभिसारः यातव्यसङ्गतः, मूलबाधकश्च मूलं विजिगीषोः स्थानीयं तद्बाधकश्च भवति । एवञ्च यातव्यसख्यबन्धपूर्वकविजिगीषुमूलबाधनसौकर्यमेव पार्श्वस्थायिनो विशेषलाभ इत्युक्तं भवति । पश्चात्स्थायी तु न तथेत्याह — **मूलाबाधक** एवेत्यादि ।

त एते शत्रोर्व्यापारप्रतिबन्धकाः पार्ष्णिग्राहाः अभियोक्तुर्विषयानन्तराः पश्चाद्भागभवाः पार्श्वप्रतिनिविष्टा इति त्रिरूपा इत्याह — **पार्ष्णिग्राहास्त्रयो ज्ञेया** इत्यादि ॥

अन्तर्धिर्नाम कश्चिद् मध्यमविशेषोऽस्ति । स तु अकिञ्चित्करत्वात् पार्ष्णिग्राहावस्थां नार्हतीत्यभिप्रायं तल्लक्षणकथनभङ्ग्याविष्करोति — **अरेर्नेतुश्च मध्यस्थ** इति । शत्रुविजिगीष्वोर्मध्यगतः, दुर्बलः तदुपकारापकाराशक्तः, अन्तर्धिरुच्यते अन्तर्धिरिति संज्ञायते । स कथंस्वभावः, बलवतः प्रतिघाते, प्रसक्ते इति शेषः, दुर्गाटव्यपसारवान् दुर्गाटवीरूपबहुनिलयनस्थानयुक्तः । एवञ्च तिरोधानयोगात् संज्ञान्वर्थत्वं बोद्धव्यम् ॥

मध्यमपार्ष्णिं गृह्णतोऽतिसन्धिमाह — **मध्यमं त्विति** । तं पूर्वोक्तलक्षणम्, अरिविजिगीष्वोर्लिप्समानयोः सतोः, मध्यमस्य पार्ष्णिम् अर्थात्

लब्धलाभापगमने यो मध्यमं मित्राद् वियोजयति, अमित्रं च मित्रमाप्नोति, सोऽतिसन्धत्ते । सन्धेयश्च शत्रुरुपकुर्वाणो, न मित्रं मित्रभावादुत्क्रान्तम् ।

तेनोदासीनलिप्सा व्याख्याता ।

'पार्ष्णिग्रहणाभियानयोस्तु मन्त्रयुद्धादभ्युच्चयः । व्यायामयुद्धे हि क्षयव्ययाभ्याम् उभयोरवृद्धिः । जित्वापि हि क्षीणदण्डकोशः पराजितो भवति' इत्याचार्याः ।

नेति कौटल्यः । सुमहतापि क्षयव्ययेन शत्रुविनाशोऽभ्युपगन्तव्यः ।

स्वलिप्सुसाह्यव्यापृतस्य मध्यमस्य सम्बन्धिनं पार्ष्णिं, गृह्णतः, लब्धलाभापगमने लाभं प्राप्य प्रत्यागमने, यः, मध्यमं मित्राद् वियोजयति वियुक्तं करोति, अमित्रं च मित्रम् आप्नोति शत्रुं च सन्धाय मित्रीकरोति, सः, अतिसन्धत्ते। शत्रुर्नाम कथं सन्धातुं योग्य इत्याशङ्कां परिहर्तुमाह -- ***सन्धेयश्चे**त्यादि । शत्रुरप्युपकुर्वाणः सन्धातुं योग्यो भवति, न तु मित्रमपि मित्रभावादपेतमनुपकुर्वाणमपकुर्वाणं वेत्यर्थः ।

मध्यमलिप्सोक्तं न्यायमुदासीनलिप्सायामतिदिशति — **तेनोदासी-नेत्यादि** ।

अथ पार्ष्णिग्राहेणाभियात्रा चानुष्ठातव्ये युद्धे विशेषमाचार्यमतेनाह — **पार्ष्णिग्रहणाभियानयोस्त्वि**ति । पार्ष्णिग्रहणेऽभियाने चाध्यवसितयोः, **मन्त्रयुद्धादभ्युच्चयः**, युद्धं हि सामान्यतो द्विविधं — युद्धरङ्गं प्रविश्य शस्त्रादिप्रयोगेण शत्रुहिंसनमित्येकं व्यायामयुद्धाख्यं, युद्धरङ्गमप्रविश्यैव सत्रिरसदतीक्ष्णादिगूढपुरुषप्रयोगेण शत्रुहिंसनमिति द्वितीयं मन्त्रयुद्धाख्यं, तत्र मन्त्रयुद्धानुष्ठानाद् वृद्धिर्भवतीत्यर्थः । व्यायामयुद्धानुष्ठाने योद्ध्रभियोद्धव्ययोर्द्वयोरपि युग्यपुरुषापचयधनव्ययाभ्यामवृद्धिः, जयप्राप्तस्यापि क्षीणदण्डकोशतया पराजितप्रायत्वं च भवतीत्याह --- **व्यायामयुद्धे ही**त्यादि ।

स्वमतमाह — **नेति कौटल्य** इत्यादि । एवञ्च शत्रुविनाशरूपमहाफलसिद्धिहेतुत्वाद् व्यायामयुद्धस्याप्युपादेयत्वमविशिष्टमित्यभिप्रायः ।

***सन्धेयश्चे**त्यादिवाक्यस्यार्थोऽनूदितो माघकविना ---

"उपकर्त्रारिणा सन्धिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥" (शिशुपाल० स०२.)

तुल्ये क्षयव्यये यः पुरस्ताद् दूष्यबलं घातयित्वा निश्शल्यः पश्चाद् वश्यबलो युध्येत, सोऽतिसन्धत्ते ।

द्वयोरपि पुरस्ताद्दूष्यबलघातिनोर्यो बहुलतरं शक्तिमत्तरमत्यन्तदूष्यं च घातयेत्, सोऽतिसन्धत्ते ।

तेनामित्राटवीबलघातो व्याख्यातः ॥

पार्ष्णिग्राहोऽभियोक्ता वा यातव्यो वा यदा भवेत् ।
विजिगीषुस्तदा तत्र नैत्रमेतत् समाचरेत् ॥
पार्ष्णिग्राहो भवेन्नेता शत्रोर्मित्राभियोगिनः ।
विग्राह्य पूर्वमाक्रन्दं पार्ष्णिग्राहाभिसारिणा ॥

व्यायामयुद्धेऽपि विशेषमाह— **तुल्ये क्षयव्यये** इति । योद्धृप्रतियोद्ध्रोः क्षयव्यये समानेऽपि, यः पुरस्ताद्, दूष्यबलं राज्योपघातकबलं, घातयित्वा राज्योपघातकबलं स्वव्यूहाग्रनिवेशनेन प्रतिबलकर्तृकवधगोचरतां पूर्वं नीत्वेत्यर्थः, अत एव निश्शल्यः, पश्चाद् वश्यबलः त्रिविधवश्यसैन्ययुक्तः, युध्येत, सः अतिसन्धत्ते विशेषलाभं भजते, अपरिहार्ये स्वबलक्षये दूष्यबलक्षयाधिक्यघटनपूर्वं वश्यबलक्षयाल्पत्वापादनमिह विशेषलाभः ।

पुरस्ताद्दूष्यबलघातयितृत्वे द्वयोः समाने यः परकीयाद् दूष्यबलात् संख्यातिशयेन शक्त्यतिशयेन दूष्यतातिशयेन च युक्तं दूष्यबलं घातयेत्, सोऽतिसन्धत्त इत्याह — **द्वयोरपी**त्यादि ।

दूष्यबलघातनवदमित्रबलघातनमाटविकबलघातनं च पूर्वं कृत्वा पश्चाद् वश्यबलो यो युध्येत, सोऽप्यतिसन्धत्त इतीममर्थमतिदेशभङ्ग्याह — **तेने**त्यादि ॥

विधिशेषं श्लोकैराह— **पार्ष्णिग्राह** इत्यादि । विजिगीषुः पार्ष्णिग्राहाभियोक्तृयातव्यावस्थासु नेतृकर्म वक्ष्यमाणमनुतिष्ठेदिति प्रथमश्लोकार्थः ॥

तत्र पार्ष्णिग्राहावस्थायां नैत्रमाह — **पार्ष्णिग्राहो भवेदि**ति । नेता पार्ष्णिग्राहावस्थापन्नो विजिगीषुः, मित्राभियोगिनः शत्रोः स्वमित्रमभियुञ्जानस्य स्वामित्रस्य, पार्ष्णिग्राहो भवेत् पार्ष्णिग्रहणमनुतिष्ठेत् । किं कृत्वा, आक्रन्दं शत्रोः पश्चान्मित्रं, पार्ष्णिग्राहाभिसारिणा पार्ष्णिग्राहासारेण अर्थात् स्वमित्रेण सह, पूर्वं विग्राह्य विग्रहार्थं योजयित्वा ॥

आक्रन्देनाभियुञ्जानः पार्ष्णिग्राहं निवारयेत्।
तथाक्रन्दाभिसारेण पार्ष्णिग्राहाभिसारिणम् ॥
अरिमित्रेण मित्रं च पुरस्तादवघट्टयेत्।
मित्रमित्रमरेश्चापि मित्रमित्रेण वारयेत् ॥
मित्रेण ग्राहयेत् पार्ष्णिमभियुक्तोऽभियोगिनः।
मित्रमित्रेण चाक्रन्दं पार्ष्णिग्राहान्निवारयेत् ॥
एवं मण्डलमात्मार्थं विजिगीषुर्निवेशयेत्।
पृष्ठतश्च पुरस्ताच्च मित्रप्रकृतिसम्पदा ॥
कृत्स्ने च मण्डले नित्यं दूतान् गूढांश्च वासयेत्।
मित्रभूतः सपत्नानां हत्वा हत्वा च संवृतः ॥

अभियोक्रवस्थायां नैत्रमाह — **आक्रन्देने**ति। अभियुञ्जानः अभियोक्रवस्थापन्नः, पार्ष्णिग्राहं स्वपृष्ठशत्रुम्, आक्रन्देन स्वपृष्ठमित्रेण, निवारयेत्। तथा पार्ष्णिग्राहाभिसारिणं पार्ष्णिग्राहासारम्, आक्रन्दाभिसारेण आक्रन्दासारेण, निवारयेत् ॥

एवं पृष्ठतोऽनुष्ठानमुक्त्वा पुरस्तादनुष्ठानमाह — **अरिमित्रेणे**ति। अभियुञ्जान इति वर्तते। सः, पुरस्तात् मित्रं स्वीयम्, अरिमित्रेण प्रत्यवस्थितेन, अवघट्टयेच्च प्रतिघातयेच्च। अरेः मित्रमित्रं चापि, मित्रमित्रेण स्वकीयेन, वारयेत् ॥

अभियुक्तावस्थायामनुष्ठानमाह — **मित्रेणे**ति। अभियुक्तः, अभियोगिनः अभियुञ्जानस्य, पार्ष्णिं, मित्रेण स्वस्य मित्रेण प्रयोज्यकर्त्रा, ग्राहयेत्। आक्रन्दम् अभियोगिनः पृष्ठमित्रं पार्ष्णिग्राहबाधनप्रवृत्तमित्यर्थः, मित्रमित्रेण अर्थात् पार्ष्णिग्राहासारेण प्रयोज्यकर्त्रा, पार्ष्णिग्राहात्, निवारयेत् ॥

एवमिति। अनेन प्रकारेण, विजिगीषुः, मित्रप्रकृतिसम्पदा मित्रप्रकृतेर्या गुणसमृद्धिः पूर्वोक्ता तया, युक्तमिति शेषः, मण्डलं राजपरम्पराम्, आत्मार्थम् आत्मसाद्भावार्थं, पृष्ठतश्च, पुरस्ताच्च, निवेशयेत् स्थापयेत् ॥

कृत्स्ने च मण्डल इति। सर्वस्मिन् आत्मार्थनिवेशिते मण्डले, दूतान् गूढान् वासयेच्च, मण्डलप्रवृत्तिच्छलविज्ञानार्थं विजिगीषुरित्यार्थम्। किञ्च, सपत्नानां शत्रूणां, मित्रभूतः मित्रतुल्यो मित्रभावं बहिरभिनयन्, हत्वा हत्वा, अर्थात् सपत्नान्, संवृतः गूढाकारेङ्गितः, भवेत् ॥

असंवृतस्य कार्याणि प्राप्तान्यपि विशेषतः ।
निस्संशयं विपद्यन्ते भिन्नप्लव इवोदधौ ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
त्रयोदशोऽध्यायः पार्ष्णिग्राहचिन्ता,
आदितः एकादशशततमः ॥

असंवृतवृत्तेर्दोषमाह — **असंवृतस्येति** । संवरणरहितस्य, कार्याणि क्रियाफलानि, विशेषतः प्राप्तान्यपि अतिशयेनोपस्थितान्यपि, निस्संशयं विपद्यन्ते नश्यन्ति । **भिन्नप्लव इवोदधाविति** । समुद्रे भिन्नतरणसाधनः **पुरुष इव** च असंवृतो विजिगीषुर्भवतीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
त्रयोदशोऽध्यायः पार्ष्णिग्राहचिन्ता,
आदित एकादशोत्तरशततमः ॥

११८. प्रक. हीनशक्तिपूरणम्।

सामवायिकैरेवमभियुक्तो विजिगीषुर्यस्तेषां प्रधानस्तं ब्रूयात्— 'त्वया मे सन्धिः, इदं हिरण्यमहं च मित्रं, द्विगुणा ते वृद्धिः, नार्हस्यात्मक्षयेण मित्रमुखानमित्रान् वर्धयितुम्, एते हि वृद्धास्त्वामेव परिभविष्यन्ति'।

भेदं वा ब्रूयात् — 'अनपकारो यथाहमेतैः सम्भूयाभियुक्तः तथा त्वामप्येते संहितबलाः स्वस्था व्यसने वाभियोक्ष्यन्ते, बलं हि चित्तं विकरोति, तदेषां विघातय' इति।

हीनशक्तिपूरणमिति सूत्रम्। अपचितानां शक्तीनां वर्धनमभिधीयत इति सूत्रार्थः। यातव्यावस्थापन्नस्यैकेनाभियुज्यमानतायामनुष्ठानप्रकारो 'मित्रेण ग्राहयेत् पार्ष्णिम्' इत्यादिना पूर्वमुक्तः। तस्य बहुभिरभियुज्यमानतायामनुष्ठानप्रकारः सम्प्रत्यभिधीयते।

सामवायिकैरित्यादि। अयमर्थः — यथैकेन तथा सम्भूयाभियोगिभिर्बहुभिः अभियुक्तो विजिगीषुरभियोगं प्रतिविधातुमशक्तः स्वशक्तिं वर्धयितुकामः सामवायिकानां प्रधानं ब्रूयात्— 'त्वया मे सन्धिः' इति। एतच्च प्रधानस्य धर्मापेक्षित्वे। तस्य लुब्धत्वे तु 'इदं ते हिरण्यं ददामि अहं च ते मित्रविशेषो भवामि विपत्समये त्वया रक्ष्यमाणः। सैषा तेऽभियोक्तृदीयमानहिरण्यापेक्षया हिरण्यद्वैगुण्याद् आपद्गतमित्रलाभाच्च गुणद्वयवती वृद्धिः' इति ब्रूयात्। इदं वचनमनभ्युपगच्छन्तं पुनर्ब्रूयात् — 'आत्मनो योग्यपुरुषापचयधनव्ययाभ्युपगमेन शत्रून् वाङ्मात्रमित्रताभिनयवतो वृद्ध्या योजयितुं नार्हसि। एते हि सामवायिकास्त्वत्साह्येन मामुच्छिद्य प्राप्तवृद्धयो भूत्वा त्वामेवावज्ञास्यन्ति' इति।

सान्त्वप्रयोगमीदृशमनङ्गीकुर्वाणे तस्मिन् भेदं प्रयुञ्जीतेत्याह — **भेदं वा ब्रूयादि**ति। किमिति ब्रूयात्, अनपकारः अपराधरहितः, यथा अहम्, एतैः, सम्भूय अभियुक्तः तथा त्वामपि एते स्वस्थाः संहितबलाः मदभियोगसंरम्भोत्तरणानन्तरं भज्जितबलाः, भूत्वेति शेषः, व्यसने वा त्वद्व्यसनावसरं प्रतीक्ष्य वा, अभियोक्ष्यन्ते। कुतः, हि यतः, बलम् उपचितमिति शेषः, चित्तं विकरोति दर्पयति। तत् बलम्, एषां, विघातय विघटय। इति।

भिन्नेषु प्रधानमुपगृह्य हीनेषु विक्रमयेत् । हीनाननुग्राह्य वा प्रधाने । यथा वा श्रेयोऽभिमन्येत, तथा । वैरं वा परैर्ग्राहयित्वा विसंवादयेत् ।

फलभूयस्त्वेन वा प्रधानमुपजाप्य सन्धिं कारयेत् । अथोभयवेतनाः फलभूयस्त्वं दर्शयन्तः सामवायिकान् 'अतिसंहिताः स्थ' इत्युद्दूषयेयुः । दुष्टेषु सन्धिं दूषयेत् । अथोभयवेतना भूयो भेदमेषां कुर्युः — 'एवं तद् यदस्माभिर्दर्शितम्' इति । भिन्नेष्वन्यतमोपग्रहेण वा चेष्टेत ।

भिन्नेष्विति । उक्तभेदवचनप्राप्तप्रधानविघटनेषु, हीनेषु, प्रधानम्, उपगृह्य स्वीकृत्य, विक्रमयेत् विक्रमं प्रयुञ्जीत । **हीनान् अनुग्राह्य वा प्रधान** इति । उक्तसामादिप्रयोगेण सामवायिकान् हीनान् स्ववशं नीत्वा वा प्रधाने विक्रमयेत् । हीनप्रधानविक्रमणयोश्चायं विकल्पोऽन्यतरश्रेयस्त्वानिर्धारणपूर्वमनुष्ठेय इत्याह — **यथा वा श्रेयोऽभिमन्येत तथेति** । विक्रमणस्यायुक्तत्वानुसन्धाने त्वाह — **वैरं वेत्यादि** । एकैकस्यान्यैर्विरोधमुत्पाद्य वा सामवायिकान् विघटयेत् ।

फलभूयस्त्वेन वेति । बहुतरधनदानप्रतिश्रवेण वा, प्रधानम्, उपजाप्य भेदयित्वा, सन्धिं कारयेत्, अर्थात् प्रधानमुखेनान्यैः सह । **अथेति** । सन्धिकरणानन्तरम्, उभयवेतनाः विजिगीषुपक्ष्याः सामवायिकाप्तभावाभिनयिनः, फलभूयस्त्वं दर्शयन्तः प्रधानस्यान्यापेक्षया बहुतरधनलाभपणनमुपपादयन्तः, सामवायिकान्, 'अतिसंहिताः स्थ' प्रधानेन यूयं वञ्चिता भवथ', इति, उक्त्वेति शेषः, उद्दूषयेयुः प्रधानकारितात् सन्धेर्विश्लेषयेयुः । **दुष्टेषु** एवं सन्धिविश्लिष्टेषु समवायिषु, सन्धिं दूषयेत् समवायिविसंवाददुष्ट इत्युक्त्वा व्यभिचरेद् विजिगीषुः, प्रधानाय न किमपि धनं दद्यादित्यर्थः । अथ सन्धिदूषणानन्तरम्, उभयवेतनाः, एषां भेदं समवायिनां प्रधानाद् भेदनं, भूयः कुर्युः, पूर्वकृतभेददार्ढ्यार्थम् । कथमित्याह — **एवं तदिति** । यदस्माभिर्दर्शितं प्रधानस्य फलभूयस्त्वं यत् पूर्वमवदाम, तद्, एवम् अनेन प्रकारेण कृतसन्धिदूषणलक्षणेन व्यक्तमिति शेषः । अयं भावः — स्वाभीप्सितभूयःफललाभात् प्रधानेन पुनरपि युष्मत्समवायमासाद्य चेष्टितुकामेनेदं सन्धिदूषणमुत्पादितमिति । **भिन्नेष्विति** । उक्तोपायवशाद् भेदं प्राप्तेषु सामवायिकेषु मध्ये

प्रधानाभावे सामवायिकानामुत्साहयितारं स्थिरकर्माणमनुरक्तप्रकृतिं लोभाद् भयाद् वा सङ्घातमुपगतं विजिगीषोर्भीतं राज्यप्रतिसम्बन्धं मित्रं चलामित्रं वा पूर्वानुत्तराभावे साधयेत् ।

उत्साहयितारमात्मनिसर्गेण, स्थिरकर्माणं सान्त्वप्रणिपातेन, अनुरक्तप्रकृतिं कन्यादानयापनाभ्यां, लुब्धमंशद्वैगुण्येन, भीतमेभ्यः अन्यतमोपग्रहेण वा चेष्टेत अन्यतमं पक्षं स्वानुकूलीकृत्य तत्सहायो वा तदन्यं पक्षमभियुञ्जीत ।

सोऽयं सामवायिकेषु प्रधानसत्त्वेऽनुष्ठानक्रमः । प्रधानाभावे तमाह— **प्रधानाभाव** इति। प्रधानस्य कस्यचिदभावे सति, सामवायिकानां मध्ये, उत्साहयितारं, स्थिरकर्माणं शत्रूच्छेदपर्यन्तानुवर्तिसमुद्यमम्, अनुरक्तप्रकृतिं, लोभात्, सङ्घातं समवायम्, उपगतं, भयाद् वा समवायप्रकोपभयाद् वा, सङ्घातमुपगतं, विजिगीषोः भीत्वा वा सङ्घातमुपगतं, राज्यप्रतिसम्बन्धं राज्यसम्बन्धिनम्, मित्रम् आत्ममित्रमेव सामवायिकसङ्गतं, चलामित्रं वा, साधयेत् स्ववशं नयेत्। तत्र क्रममाह—**पूर्वानुत्तराभावे** इति । एषु नवसु मध्ये उत्तरोत्तराभावे पूर्वपूर्वान् साधयेत् । यथा— उत्साहयितृस्थिरकर्मणोः स्थिरकर्माभावे उत्साहयितारं साधयेत् स्थिरकर्मसत्त्वे तमेव साधयेत् । स्थिरकर्मा ह्यनुच्छेद्य यातव्यं न विरमति, उत्साहयिता तु यातव्यसाधनमात्रेण विरमतीत्युत्साहयितृसाधनाद् अधिकप्रयोजनं स्थिरकर्मसाधनं भवतीति । एवमन्यदप्यूहनीयम् । 'पूर्वान्यतराभावे' इति तु अपपाठो द्रष्टव्यः ।

तेषां साधनप्रकारमाह — **उत्साहयितारमिति** । तम्, आत्मनिसर्गेण 'अयमहं सामात्यः सपुत्रः सधनस्त्वय्यायत्तः, यथेच्छसि तथा मां करणीये नियोजय, मा मामुच्छेत्सीरि'त्युक्त्वात्मसमर्पणेन, साधयेदिति वर्तते । उत्साहयिता हि शौर्यप्रधानत्वादित्थमभिधीयमानः सुसाधो भवतीति । स्थिरकर्माणं, सान्त्वप्रणिपातेन जितोऽस्मि भवता सर्वगुणोत्कृष्टेन रक्षणीय इत्यनुनयपुरस्सरेण प्रणामेन, साधयेत् । स ह्येवमुच्यमानो मानोन्नतत्वात् साध्यो भवतीति । अनुरक्तप्रकृतिं, कन्यादानयापनाभ्यां कन्याया आदानयापनाभ्याम् आदानं स्वीकरणं यापनं प्रस्थापनमर्थाद् दानं ताभ्यामित्यर्थः, साधयेत् । स हि 'त्वत्सम्बन्धाभिलाषिणं त्वदनुरक्तं मां माभियुङ्क्ष्वे'त्येवं न्याय्यमभिधीयमानः प्रकृतिविरागशङ्की साध्यो भवतीति । लुब्धं धनगृध्नुम्,

कोशदण्डानुग्रहेण, स्वतो भीतं विश्वासयेत् प्रतिभूप्रदानेन, राज्यप्रतिसम्बन्धमेकीभावोपगमनेन, मित्रमुभयतः प्रियहिताभ्यामुपकारत्यागेन वा, चलामित्रमवधृतमनपकारोपकाराभ्याम् ।

यो वा यथायोगं भजेत, तं तथा साधयेत् । सामदानभेददण्डैर्वा यथापत्सु व्याख्यास्यामः ।

व्यसनोपघातत्वरितो वा कोशदण्डाभ्यां देशे काले कार्ये वावधृतं सन्धिमुपेयात् । कृतसन्धिर्हीनमात्मानं प्रतिकुर्वीत ।

अंशद्वैगुण्येन परपरिपणितार्थद्विगुणार्थदानेन, साधयेत् । एभ्यो भीतं सामवायिकेभ्यो भीत्वा तत्सङ्गतं, कोशदण्डानुग्रहेण धनसैन्यदानेन, साधयेत् । स हि 'मा परेभ्यो भैषीः, अहं ते कोशदण्डाभ्यां साहाय्यं करोमी'त्युक्त्या साध्यो भवतीति । स्वतो भीतम् आत्मनः सकाशाद् भीतं, प्रतिभूप्रदानेन विश्वासयेत् 'अहं न ते किञ्चिदपकुर्याम् अस्मिन्नर्थेऽयं चासौ च प्रतिभूः' इत्युक्त्वा साधयेत् । राज्यप्रतिसम्बन्धम्, एकीभावोपगमनेन 'त्वं चाहं चैकीभावमुपगतौ, मम परिभवस्तवापि खलु परिभवः, न युक्तं ते परेष्वनुप्रविश्य मामाभियोक्तुमि'ति कथनेन साधयेत् । मित्रम्, उभयतः प्रियहिताभ्यां 'समानसुखदुःखौ खल्वावाम्' इत्याद्युभयप्रियहितवचनेन, उपकारत्यागेन वा 'यस्त्वया मह्यं देयः करो व्यवस्थितः तमद्यप्रभृति न मे दातुमर्हसि' इत्युक्त्वा करमोक्षणेन वा, साधयेत् । चलामित्रम्, अनपकारोपकाराभ्याम् अवधृतम् 'अपकारं ते न करिष्यामि उपकारं च करिष्यामि' इत्यनपकारोपकारप्रतिश्रवाभ्याम् अवधृतिमन्तं विश्वासितं, कृत्वेति शेषः, साधयेत् ।

यो वेति । यः सामवायिकः, यथा येन प्रकारेण, अयोगं समवायिभ्यो विश्लेषं, भजेत, तं, तथा तेन प्रकारेण साधयेत् । **सामेत्यादि** । सामदानभेददण्डैर्वा उपायैः, साधयेत् परं स्वायत्तीकुर्यात् । कथं, यथा आपत्सु व्याख्यास्यामः अभियास्यत्कर्माधिकरणे आपत्प्रकरणे वक्ष्यामस्तथा ।

व्यसनोपघातत्वरितो वेत्यादि । अथवा आत्मनो व्यसनमुपहन्तुं कालविलम्बमक्षममाणः, अमुष्मिन् देशे काले कार्ये वा कोशदण्डाभ्यां साहाय्यमनुष्ठेयमित्येवं शपथादिना निश्चितं सन्धिं सामवायिकैः सह विदध्यात् । कृतसन्धिश्चैवमात्मानं हीनशक्तिं शक्त्याप्याययेत् ।

पक्षे हीनो बन्धुमित्रपक्षं कुर्वीत, दुर्गमविषह्यं वा । दुर्गमित्रप्रतिस्तब्धो हि स्वेषां परेषां च पूज्यो भवति ।

मन्त्रशक्तिहीनः प्राज्ञपुरुषोपचयं विद्यावृद्धसंयोगं वा कुर्वीत । तथाहि सद्यः श्रेयः प्राप्नोति ।

प्रभावहीनः प्रकृतियोगक्षेमसिद्धौ यतेत । जनपदः सर्वकर्मणां योनिः, ततः प्रभावः ।

तस्य स्थानमात्मनश्च आपदि दुर्गम् ।

सेतुबन्धः सस्यानां योनिः । नित्यानुषक्तो हि वर्षगुणलाभः सेतुवापेषु ।

शक्त्युपचयस्य पक्षमूलत्वात् पक्षमाह — **पक्ष** इति । पक्षः सहायस्तद्विषये, हीनः, बन्धुमित्रपक्षं बन्धुमित्रलक्षणं पक्षं, कुर्वीत । अविषह्यं परैरलङ्घ्यं, दुर्गं वा, कुर्वीत । तत्र हेतुमाह — हि यतः, दुर्गमित्रप्रतिस्तब्धः दुर्गमित्राभ्यां प्रतिबद्धः, स्वेषां स्वपक्ष्याणां, परेषां परपक्ष्याणां च, पूज्यो भवति ।

मन्त्रप्रभूत्साहशक्तिषु मध्ये मन्त्रशक्तिपूरणप्रकारमाह— **मन्त्रशक्तिहीन** इति । मन्त्रशक्तिः प्रज्ञाबलं तद्धीनः, प्राज्ञपुरुषोपचयं कुर्वीत प्राज्ञान् पुरुषांस्तत्तदधिकारस्थानेषु बाहुल्येन नियुञ्जीत । विद्यावृद्धसंयोगं वा कुर्वीत राज्यतन्त्रनिष्णातेभ्यो वा नीतिं शृणुयादित्यर्थः । तथाहि तेन प्रकारेण करणे हि, सद्यः श्रेयः प्राप्नोति ।

प्रभुशक्तिपूरणमाह — **प्रभावहीन** इति । प्रभावः कोशदण्डोत्पत्तिः तद्धीनः, प्रकृतियोगक्षेमसिद्धौ यतेत । प्रकृतिषु मध्ये जनपदः प्राधान्येन चिन्तनीययोगक्षेम इत्यभिप्रायेणाह —**जनपद** इति । सः, सर्वकर्मणां दुर्गादीनां सर्वेषां कर्मणां, योनिः कारणम् । अतश्च स प्रधान इत्यर्थः । ततः प्रभावः सर्वकर्मभ्यः कोशदण्डोत्पत्तिः । तथाच प्रभावकामो दुर्गादिकर्मणां योगक्षेमसिद्धौ यतेतेति भावः ।

तेषु दुर्गस्य प्रयोजनमाह — **तस्येति** । दुर्गं, तस्य प्रभावस्य, स्थानं निवासः, आत्मनश्च आपदि स्थानं रक्षादेशः, भवति ।

सेतुबन्धस्य प्रयोजनमाह— **सेतुबन्ध** इति । सः, सस्यानां योनिः । कुलः, हि यतः, सेतुवापेषु सेतुबन्धावरुद्धजलपायनपोष्येषु व्रीहियशालेयादिक्षेत्रेषु, वर्षगुणलाभः वृष्टिसाध्यसस्यफलाधिगमः, नित्यानुषक्तः नित्यानुवृत्तः भवति

वणिक्पथः परातिसन्धानस्य योनिः, वणिक्पथेन हि दण्डगूढपुरुषातिनयनं शस्त्रावरणयानवाहनक्रयश्च क्रियते । प्रवेशो निर्नयनं च ।

खनिः सङ्ग्रामोपकरणानां योनिः ।

द्रव्यवनं दुर्गकर्मणां, यानरथयोश्च ।

हस्तिवनं हस्तिनाम् ।

गजाश्वखरोष्ट्राणां च व्रजः ।

तेषामलाभे बन्धुमित्रकुलेभ्यः समार्जनम् ।

उत्साहहीनः श्रेणीप्रवीरपुरुषाणां चोरगणाटविकम्लेच्छजातीनां परापकारिणां गूढपुरुषाणां च यथालाभमुपचयं कुर्वीत ।

वणिक्पथस्याह — **वणिक्पथ** इति । सः, परातिसन्धानस्य शत्रुवञ्चनस्य, योनिः । तद् उपपादयति — **वणिक्पथेन हीति** । तेन, दण्डगूढपुरुषातिनयनं सैन्यानां गूढपुरुषाणां च सत्रितीक्ष्णादीनां शत्रुविषयप्रापणं, शस्त्रावरणयानवाहनक्रयश्च शस्त्रादिविषयः क्रयविक्रयव्यवहारश्च, क्रियते । प्रवेशो निर्नयनं च परदेशपण्यस्य स्वदेशे प्रवेशनं स्वदेशपण्यस्य परदेशनयनं च, क्रियते ।

खनेराह—**खनिरिति** । सा, सङ्ग्रामोपकरणानां खड्गादीनां, योनिः तन्निर्माणापेक्षितलोहाद्युत्पादनद्वारेण कारणम् ।

द्रव्यवनस्याह— **द्रव्यवनमिति** । सारदार्वादिवनं, दुर्गकर्मणां गोपुराट्टालकादीनां, यानरथयोश्च, योनिरिति वर्तते ।

हस्तिवनं हस्तिनामिति । योनिरित्यनुवर्तते ।

गवाश्वखरोष्ट्राणां चेति । तेषां, व्रजः गोष्ठः, योनिरित्येव ।

तेषामिति । उक्तानाम्, अलाभे स्वीयत्वेनाप्राप्तौ, बन्धुमित्रकुलेभ्यः, समार्जनं सङ्ग्रहणं, कर्तव्यमिति शेषः ।

उत्साहशक्तिपूरणमाह—**उत्साहहीन** इति । सः, श्रेणीप्रवीरपुरुषाणां श्रेण्यन्तर्गतपुरुषाणां शूरपुरुषाणां च, चोरगणाटविकम्लेच्छजातीनां चोरगणानाम् अटवीभवानां म्लेच्छजातीनां च, परापकारिणां शत्र्वपकरणशीलानां, गूढपुरुषाणां च सत्रिप्रभृतीनां च, यथालाभं लाभानुसारेण, उपचयम् उत्साहशक्तिपूरणं, कुर्वीत ।

परमिश्रः प्रतीकारमाबलीयसं वा परेषु प्रयुञ्जीत ॥

एवं पक्षेण मन्त्रेण द्रव्येण च बलेन च ।
सम्पन्नः प्रतिनिर्गच्छेत् परावग्रहमात्मनः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
चतुर्दशोऽध्यायः हीनशक्तिपूरणम्,
आदितो द्वादशशतः ॥

शक्तेरुपचेतुमशक्यतायामाह — **परमिश्र** इति । परेण शत्रुणा सन्धिकरणेन संगतः सन्, परमित्र इति पाठे सन्धिना मित्रीकृतशत्रुः सन्नित्यर्थः, प्रतीकारम् आबलीयसं वा आबलीयसाधिकरणे वक्ष्यमाणं प्रतिविधिं वा, परेषु प्रयुञ्जीत ॥

एवमिति । उक्तेन प्रकारेण, पक्षेण बन्धुमित्रलक्षणेन, मन्त्रेण विद्यावृद्धसंयोगादिना, द्रव्येण च दुर्गसेतुबन्धवणिक्पथाद्युत्पन्नेन, बलेन च श्रेणीप्रवीरपुरुषचोरगणादिरूपेण, सम्पन्नः पूरितशक्तिः विजिगीषुः, आत्मनः, परावग्रहं प्रतिनिर्गच्छेत् शत्र्वभियोगं प्रतिकुर्यात् ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
चतुर्दशोऽध्यायः हीनशक्तिपूरणम्,
आदितो द्वादशोत्तरशततमः ॥

११९,१२०. प्रक. बलवता विगृह्योपरोधहेतवः दण्डोपनतवृत्तं च ।

दुर्बलो राजा बलवताभियुक्तः तद्विशिष्टबलमाश्रयेत, यमितरो मन्त्रशक्त्या नातिसन्दध्यात् ।

तुल्यबलमन्त्रशक्तीनाम् आयत्तसम्पदो वृद्धसंयोगाद् वा विशेषः ।

विशिष्टबलाभावे समबलैस्तुल्यबलसङ्घैर्वा बलवतः सम्भूय तिष्ठेत्, यावन्न मन्त्रप्रभावशक्तिभ्यामतिसन्दध्यात् ।

तुल्यमन्त्रप्रभावशक्तीनां विपुलारम्भतो विशेषः ।

बलवता विगृह्योपरोधहेतव इति सूत्रम् । प्रबलेन शत्रुणा सह विग्रहं कृत्वा उपरोधस्य दुर्गप्रवेशस्य हेतवः कारणानि अभिधीयन्त इति सूत्रार्थः । हीनस्य प्रबलेन शत्रुणा सह सन्धिं कृत्वा शक्तिपूरणं पूर्वमुक्तम् । प्रबलश्चेत् सन्धिं नोपगच्छेत् तदा हीनस्यानुष्ठानप्रकार इदानीमभिधीयते ।

दुर्बलो राजेति । सः, बलवता अभियुक्तः, तद्विशिष्टबलम् अभियोक्त्रपेक्षयोत्कृष्टबलं राजानम्, आश्रयेत । यम्, इतरः अभियोक्ता, मन्त्रशक्त्या, नातिसन्दध्यात् न वञ्चयेत्, तं तद्विशिष्टबलमिति सम्बन्धः ।

तुल्यबलमन्त्रशक्तीनां बहूनां सत्त्वे मन्त्रशक्तियुक्तामात्यादिमन्तमाश्रयेत, मन्त्रशक्तियुक्तामात्यादिमतां बहुत्वे च वृद्धसंयोगवन्तमाश्रयेतेत्यभिप्रायकमाह — **तुल्यबलमन्त्रशक्तीनामि**त्यादि । आयत्तसम्पदो विशेषः आयत्ता अमात्यादयस्तेषां सम्पत् मन्त्रशक्तियोगः तन्निमित्त आश्रयणीयविशेषावसाय इत्यर्थः ।

विशिष्टबलाभाव इति । अभियोक्त्रपेक्षया विशिष्टबलस्यालाभे, बलवतः प्रबलस्याभियोक्तुः, समबलैः तुल्यशक्तिभिः, तुल्यबलसङ्घैर्वा समपरिमाणसैन्यैर्वा बहुभिः सहायैः, सम्भूय तिष्ठेत् शत्रुं प्रतियुध्येत, कियन्तं कालं तिष्ठेत्, यावत्, मन्त्रप्रभावशक्तिभ्यां, नातिसन्दध्यात् न भेदयेत्, अर्थात् स्वसहायान् शत्रुः ।

तुल्यमन्त्रप्रभावशक्तीनामिति । तेषां बहुत्वे, विपुलारम्भतो विशेषः विपुलारम्भत्वलक्षणो व्यतिरेको यस्मिन्नास्ति तमाश्रयेदित्यर्थः । भक्तोपकरणादिसर्वविधयात्रासाधनसम्पन्नो विपुलारम्भ इति प्रागवोचाम ।

समबलाभावे हीनबलैः शुचिभिरुत्साहिभिः प्रत्यनीकभूतैर्बलवतः सम्भूय तिष्ठेत्, यावन्न मन्त्रप्रभावोत्साहशक्तिभिरतिसन्दध्यात् । तुल्योत्साहशक्तीनां स्वयुद्धभूमिलाभाद् विशेषः । तुल्यभूमीनां स्वयुद्धकाललाभाद् विशेषः । तुल्यदेशकालानां युग्यशस्त्रावरणतो विशेषः ।

सहायाभावे दुर्गमाश्रयेत, यत्रामित्रः प्रभूतसैन्योऽपि भक्तयवसेन्धनोदकोपरोधं न कुर्यात्, स्वयं च क्षयव्ययाभ्यां युज्येत ।

तुल्यदुर्गाणां निचयापसारतो विशेषः । निचयापसारसम्पन्नं हि मनुष्यदुर्गमिच्छेदिति कौटल्यः ।

समबलाभावे आह — **समबलाभाव** इति । समबलानामलाभे, बलवतः प्रबलाच्छत्रोः, हीनबलैः, शुचिभिः, उत्साहिभिः, प्रत्यनीकभूतैः परशत्रुभूतैः, बहुभिः सहायैः, सम्भूय तिष्ठेत् शत्रुं प्रार्थयेत । कियन्तं कालं, यावत्, मन्त्रप्रभावोत्साहशक्तिभिः, नातिसन्दध्यात् न भेदयेत्, अर्थात् सहायान् । **तुल्योत्साहशक्तीनामि**ति । तेषां बहूनां मध्ये, स्वयुद्धभूमिलाभाद् विशेषः यस्याश्रयणे स्वस्य युद्धयोग्यदेशलाभो भवति तमाश्रयेदित्यर्थः । **तुल्यभूमीनामि**ति । तुल्यतथाविधदेशानां बहूनां मध्ये, स्वयुद्धकाललाभाद् विशेषः यस्मिन्नाश्रिते स्वस्य युद्धयोग्यकाललाभो भवति तमाश्रयेदित्यर्थः । **तुल्यदेशकालानामि**ति । तथाभूतानां बहूनां सम्भवे, युग्यशस्त्रावरणतो विशेषः गवाश्वोष्ट्रायुधावरणरूपोपकरणसमृद्धिर्यस्यास्ति तमाश्रयेदित्यर्थः ।

सहायाभावे इति । आश्रयणीयस्य कस्याप्यलाभे, दुर्गम्, आश्रयेत । तत् कीदृशं, यत्र यस्मिन्, स्थितस्येति शेषः, प्रभूतसैन्योऽपि, अमित्रः अभियोक्ता, भक्तयवसेन्धनोदकोपरोधं यथापेक्षितभोज्ययवसादिप्रवेशोपघातं, न कुर्यात् । स्वयं च क्षयव्ययाभ्यां युज्येत युग्यपुरुषापचयधनव्ययौ च स्वयं प्राप्नुयादित्यर्थः ।

तुल्यदुर्गाणामिति । यथोक्तगुणानां दुर्गाणां बहूनां सम्भवे, निचयापसारतो विशेषः निचयः स्नेहलवणादेर्नित्योपयोज्यस्य सञ्चयः अपसारो दुर्गान्निर्गमनमार्गः ताभ्यां विशेषः । निचयापसारवन्तं दुर्गमाश्रयेतेत्यर्थः । **निचयेत्यादि** । मनुष्यदुर्गं मनुष्याश्रयणीयं दुर्गम् । इति कौटल्य इत्युक्त्यान्येषामाचार्याणां मतमनीदृशमिति सूचयति ।

तदेभिः कारणैराश्रयेत—

'पार्ष्णिग्राहमासारं मध्यममुदासीनं वा प्रतिपादयिष्यामि । सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमेनास्य राज्यं हारयिष्यामि घातयिष्यामि वा । कृत्यपक्षोपग्रहेण वास्य दुर्गे राष्ट्रे स्कन्धावारे वा कोपं समुत्थापयिष्यामि । शस्त्राग्निरसप्रणिधानैरौपनिषदिकैर्वा यथेष्टमासन्नं हनिष्यामि । स्वयमधिष्ठितेन वा योगप्रणिधानेन क्षयव्ययमेनमुपनेष्यामि । क्षयव्ययप्रवासोपतप्ते वास्य मित्रवर्गे सैन्ये वा क्रमेणोपजापं प्राप्स्यामि । वीवधासारप्रसारवधेन वास्य स्कन्धावारावग्रहं करिष्यामि । दण्डोपनयेन वास्य रन्ध्रमुत्थाप्य सर्वसन्दोहेन प्रहरिष्यामि । प्रतिहतोत्साहेन वा यथेष्टं सन्धिमवाप्स्यामि । मयि प्रतिबन्धस्य वा सर्वतः कोपाः समुत्थास्यन्ति । निरासारं वास्य मूलं

तच्च दुर्गं वक्ष्यमाणेषु फलेष्वन्यतममभिसन्धायाश्रयणीयमित्याह—**तदेभिरित्यादि** । तानि कारणानि 'पार्ष्णिग्राहमि'त्यादिना 'न निर्गमिष्यतीति' इत्यन्तेन महावाक्येन दर्शयति । तदवान्तरवाक्यानि तु षोडश । तेषु च प्रत्येकम् इतिशब्दः सम्बन्धनीयः । तदयमर्थः— पार्ष्णिग्राहं सुहृद्बलं मध्यमम् उदासीनं वा प्रागुक्तलक्षणम् अभियोक्तुः प्रत्यभियोगाय नेष्यामीति चेन्मन्येत तदा दुर्गमाश्रित्य तिष्ठेत् । सामन्तेन आटविकेन अभियोक्तृकुलीनेन वावरुद्धेन राज्यमभियोक्तुर्हारयिष्यामि दाहविलोपाद्युपघातयुक्तं वा कारयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा अभियोक्तुः कृत्यपक्षम् उपायैः स्वायत्तीकृत्य तदीये दुर्गे राष्ट्रे सेनानिवेशे वा बाह्याभ्यन्तरं प्रकृतिकोपमुत्पादयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा शस्त्राग्निरसप्रणिधानेनाबलीयसोक्तेन, औपनिषदिकोक्तैर्वा योगैर्यथेच्छं सन्निकृष्टं हनिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा विस्रब्धघातिपुरुषप्रयोगेण स्वयं कृतेन युग्यपुरुषापचयं धनव्ययं चाभियोक्तारं नेष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा क्षयव्ययप्रवासैरुपतापं प्राप्तेऽभियोक्तुर्मित्रवर्गे सैन्ये वा क्रमेण भेदं प्रयोक्तुं लप्स्ये इति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवाभियोक्तुः स्वदेशागतभक्तोपकरणानां सुहृद्बलस्य यवसेन्धनादेश्च निरोधेन तत्सेनानिवेशपीडामुत्पादयिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा

मित्राटवीदण्डैरुद्घातयिष्यामि । महतो वा देशस्य योगक्षेममिहस्थः पालयिष्यामि । स्वविक्षिप्तं मित्रविक्षिप्तं वा मे सैन्यमिहस्थस्यैकस्थमविषह्यं भविष्यति । निम्नखातरात्रियुद्धविशारदं वा मे सैन्यं पथ्याबाधमुक्तमासन्ने कर्मणि करिष्यति । विरुद्धदेशकालमिहागतो वा स्वयमेव क्षयव्ययाभ्यां न भविष्यति । महाक्षयव्ययाभिगम्योऽयं देशो दुर्गाटव्यपसारबाहुल्यात्, परेषां व्याधिप्रायः सैन्यव्यायामानाम् अलब्धभौमश्च, तमापद्गतः प्रवेक्ष्यति । प्रविष्टो वा न निर्गमिष्यति' इति ।

कारणाभावे बलसमुच्छ्रये वा परस्य दुर्गमुन्मुच्यापगच्छेत् ।

स्वसैन्यान् कांश्चिद् अभियोक्तुः स्कन्धावारं गूढं नीत्वा तत्र प्रहारस्थानमुत्पाद्य पश्चात् सर्वसैन्यसमुदयेन गत्वा प्रहरिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा कथञ्चिदभियोक्तुरुत्साहं प्रतिहत्य यथेष्टं सन्धिमवाप्स्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा मद्विषयाभियोगव्यासक्तमभियोक्तारं प्रति सर्वतः सामन्तप्रकोपा उद्भविष्यन्तीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा निरुद्धसुहृद्बलमभियोक्तुः स्थानीयं मित्रसैन्यैराटविकसैन्यैश्चोपहतं करिष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा महतो देशस्य योगक्षेमम् इहस्थः पालयितुं शक्ष्यामीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा स्वकार्यार्थे मित्रकार्यार्थे चान्यत्र प्रेषितं मम सैन्यमत्रैकीभूय मया सङ्गतं शत्रोरलङ्घनीयं भविष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा निम्नयुद्धे खातयुद्धे रात्रियुद्धे च निपुणं मे सैन्यं पथिगमनश्रममिह दुर्गेऽपनीय कर्म काले प्राप्ते करिष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवाभियोक्ता स्वसैन्याननुकूले देशे काले चेहागतो विनैवास्मद्यत्नं स्वयमेव क्षयव्ययाननुभूय नङ्क्ष्यतीति चेन्मन्येत, तदा दुर्गमाश्रयेत । अथवा दुर्गबहुलत्वादटवीप्रायत्वादपसारस्थानबहुलत्वाच्च महान्तं क्षयं व्ययं चानुभवतैवाभिगन्तव्योऽयं देशः, परेषां विदेशागतानां व्याधिजनकः, सैन्यव्यायामयोग्यभूमिरहितश्च, तं परः प्रविशन्नेव विपदं लप्स्यते, कथञ्चित् प्रविष्टो वा न ततः स्वस्तिमान् निर्गमिष्यतीति चेन्मन्येत, तदा दुर्गमाश्रित्य तिष्ठेदिति । एवं तावत् षोडशकारणान्युक्तानि ।

यथोक्तकारणाभावे यत् कर्तव्यं तदाचार्यमतेनाह — **कारणाभाव इति** । यथोक्तकारणविरहे, परस्य शत्रोः, बलसमुच्छ्रये वा सैन्यप्राबल्ये वा

अग्निपतङ्गवदमित्रे वा प्रविशेत् । अन्यतरसिद्धिर्हि त्यक्तात्मनो भवतीत्याचार्याः ।

नेति कौटल्यः । सन्धेयतामात्मनः परस्य चोपलभ्य सन्दधीत । विपर्यये विक्रमेण सिद्धिमपसारं वा लिप्सेत ।

सन्धेयस्य वा दूतं प्रेषयेत् । तेन वा प्रेषितमर्थमानाभ्यां

सति, दुर्गम्, उन्मुच्य त्यक्त्वा, अपगच्छेत् अपसरेत् । **अग्निपतङ्गवदमित्रे वा प्रविशेदिति** । यथा हि शलभोऽग्नौ प्रविशति, तथात्मजीवितनिराशः शत्रौ प्रविशेत्, शत्रुमध्यं प्रविश्य यावच्छक्ति पराक्रमेतेत्यर्थः । न चायं महाबलशत्रुप्रत्यभियोगः प्रत्यभियोक्तुरेकान्तपराजयफलः, किन्तु पाक्षिकं शत्रुजयमप्युपनयति, यथाग्निप्रवेशः शलभस्यैकान्ततो न नाशहेतुः किन्तु अग्निमपि पक्षे निर्वाणं करोति तद्वदित्यभिप्रायेणाह — **अन्यतरसिद्धिर्हीत्यादि** । अन्यतरस्य शत्रुजयात्मविनाशयोरेकतरस्य सिद्धिः ।

आत्मनः परित्राणोपाये सुलभे पाक्षिकमपि नाशमभ्युपगम्य प्रवृत्तरयुक्तत्वात् तदिदमाचार्यमतं मुख्यतया नोपादेयमित्याह — **नेति कौटल्य इति** । किं तर्हि कारणाभावादावनुष्ठेयमित्याह — **सन्धेयतामात्मनः परस्य चेति** । आत्मनः सन्धेयतां निरपराधत्वलक्षणां परस्य सन्धेयतां धर्मविजयित्वलक्षणां च, यद्वा द्वयोरपि तत्तत्स्वरूपां सन्धानयोग्यतामित्यर्थः । उपलभ्य, सन्दधीत । विपर्यये सन्धेयत्वाभावे, विक्रमेण सिद्धिम् अग्निपतङ्गवच्छत्रौ प्रवेशनेनान्यतरसिद्धिं, लिप्सेत । सन्धिमिति पाठे तत्तत्स्वरूपा सन्धानयोग्यता शत्रोर्यथा जायेत तथा विक्रमप्रयोगेण सन्धिं लिप्सेतेत्यर्थः । अपसारं वा लिप्सेत, सन्धेरशक्यत्वे । इत्थं 'बलवता विगृह्योपरोधहेतवः' इतीदं प्रकरणं व्याख्यातम् ।

अथ दण्डोपनतवृत्तमुच्यते — **दण्डोपनतवृत्तमिति सूत्रम्** । दण्डोपनतस्य दण्डेनाधःकृतस्य वृत्तमनुष्ठानमभिधीयत इति सूत्रार्थः । सन्धेयतामिच्छता सन्धिः कर्तव्यत्वेनोक्तः । तस्य प्रकारान्तराणां ज्यायसा सह अथमप्यसम्भवेऽन्ततस्तस्मिन्नात्मार्पणेन वा सन्धिः कर्तव्य इत्येतदधुनाभिधीयते ।

सन्धेयस्य वेति । वाशब्दः सन्ध्यन्तरासम्भवरूपे पक्षान्तरे । सन्धेयस्य ज्यायसो धर्मविजयिन इति शेषः । दूतं प्रेषयेत् । अथवा, तेन वा

सत्कृत्य ब्रूयात् —इदं राज्ञः पण्यागारम्, इदं देवीकुमाराणां देवीकुमारवचनाद्, इदं राज्यमहं च त्वदर्पणः इति।

लब्धसंश्रयः समयाचारिकवद् भर्तरि वर्तेत। दुर्गादीनि च कर्माण्यावाहविवाहपुत्राभिषेकाश्वपण्यहस्तिग्रहणसत्रयात्राविहारगमनानि चानुज्ञातः कुर्वीत। स्वभूम्यवस्थितप्रकृतिसन्धिमुपघातमपसृतेषु वा सर्वमनुज्ञातः कुर्वीत। दुष्टपौरजानपदो वा न्यायवृत्तिरन्यां भूमिं याचेत। दूष्यवदुपांशुदण्डेन वा प्रतिकुर्वीत। उचितां वा मित्राद् भूमिं दीय-

---

सन्धेयेन वा, प्रेषितं दूतम्, अर्थमानाभ्यां धनदानपूजनाभ्यां, सत्कृत्य उपचर्य, ब्रूयात्। किमिति, इदं राज्ञः पण्यागारं सन्धेयाय राज्ञेऽर्पणीयं प्राभृतम्, इदं देवीकुमाराणां देवीकुमारवचनाद् इदं प्राभृतं सन्धेयस्य देव्यै कुमारेभ्यश्चास्मद्देवीवचनादस्मत्कुमारवचनाच्चार्पणीयम्, इदं राज्यम् अहं च त्वदर्पणः त्वयि अर्पणं यस्य स त्वदर्पण इत्येतत् पदं राज्येऽपि सम्बन्धनीयं, मयेदं राज्यं तुभ्यमर्पितम् आत्मा च तुभ्यमर्पित इत्यर्थः। इति एवं, ब्रूयादित्यनेन सम्बन्धः।

लब्धसंश्रय इति। दूतप्रेषणादिनावाप्ताश्रयः, समयाचारिकवत् समयः सेवकधर्मनियमस्तस्याचारः समयाचारस्तद्युक्तः समयाचारिकः सेवकः तद्वद्, भर्तरि ज्यायसि संहिते, वर्तेत। वर्तनप्रकारमेवाह — **दुर्गादीनि च कर्माणी**ति। तानि, आवाहविवाहपुत्राभिषेकादीनि च आवाहः कन्यास्वीकरणं विवाहः कन्यादानं पुत्राभिषेकः यौवराज्याभिषेचनम् अश्वपण्यम् अश्वक्रयः हस्तिग्रहणं गजबन्धनं सत्रं यागः यात्रा पराभियानं विहारगमनम् उद्यानादिक्रीडागमनम् इत्येतान्यष्टौ च, अनुज्ञातः स्वाम्यनुमतः, कुर्वीत। **स्वभूम्यवस्थितप्रकृतिसन्धिमि**ति। स्वभूमौ अवस्थिताभिः प्रकृतिभिः स्वामात्यादिभिः सन्धिम्, अपसृतेषु स्वस्मादपसृत्य परस्मात् प्रत्यागतेषु, उपघातं वा, सर्वम् अनुज्ञातः कुर्वीत। **दुष्टपौरजानपदो वे**ति। दुष्टा अन्याय्यवृत्तयः पौरा जानपदाश्च यस्य स तथाभूतो वा, न्यायवृत्तिः न्याय्याचारः, न्यायवृत्तिमिति पाठे भूमेस्तद् विशेषणम्। अन्यां भूमिं याचेत अर्थात् स्वभूमिं वंशपरम्परागतामपि परित्यज्य। दूष्यैस्तुल्यम्, अयाचमान एव वान्यां भूमिं दूष्यार्हेणोपांशुदण्डेन स्वभूमिगतान् दुष्टान् प्रवासयेदित्याह — **दूष्यवदि**त्यादि। अदुष्ट-

मानां न प्रतिगृह्णीयात् । मन्त्रिपुरोहितसेनापतियुवराजानामन्यतमम-दृश्यमाने भर्तरि पश्येत् । यथाशक्ति चोपकुर्यात् । दैवतस्वस्तिवाच-नेषु तत्परा आशिषो वाचयेत् । सर्वत्रात्मनिसर्गं गुणं ब्रूयात् ॥

संयुक्तबलवत्सेवी विरुद्धः शङ्कितादिभिः ।
वर्तेत दण्डोपनतो भर्तर्येवमवस्थितः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे पञ्चदशोऽध्यायः
बलवता विगृह्योपरोधहेतवः दण्डोपनतवृत्तम् ,
आदितस्त्रयोदशशततमः ॥

जानपदामपि भूमिं स्वमित्रादाच्छिद्य स्वामिना दीयमानां न गृह्णीयादित्या-ह — **उचितां** वेत्यादि । आत्मनो मन्त्रिणं पुरोहितं सेनापतिं युवराजं वा भर्तुः सन्निधौ न पश्येदित्याह— **मन्त्रिपुरोहिते**त्यादि । एतच्च स्वामिसन्निधावा-त्मनानुष्ठीयमानं भृत्यसमुदाचारमात्मभृत्या मा द्राक्षुरित्येतदर्थमुक्तम् । **यथा-शक्ति चोपकुर्या**दिति । स्वशक्त्यनुसारेण यत्किञ्चित् स्वामिने प्राभृतमुपह-रेद् दर्शनावसरेषु । **दैवतस्वस्तिवाचने**ष्विति । देवताराधनेषु मङ्गलाह्निकेषु च, तत्पराः भर्तृगोचराः, आशिषः वाचयेत् । **सर्वत्रे**ति । सर्वेषु जनेषु, आत्मनिसर्गं भर्तर्यात्मार्पणं ब्रूयात्, गुणं ब्रूयात् स्वामिगुणांश्च कीर्तयेत् ॥

संयुक्तेत्यादि । एवम् उक्तरीत्या, भर्तरि अवस्थितः, दण्डोपनतः, संयुक्तबलवत्सेवी संयुक्ताः स्वामिसम्बद्धा ये बलवन्तोऽमात्यादयस्तत्सेवी तद-नुकूलवृत्तिः, शङ्कितादिभिर्विरुद्धः स्वाम्यसंयुक्तत्वेन ये शङ्किताः आदिग्रहणात स्वामिद्विष्टाश्च ये तैर्विरुद्धश्च, वर्तेत ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे पञ्चदशोऽध्यायः
बलवता विगृह्योपरोधहेतवो दण्डोपनत वृत्तं च,
आदितस्त्रयोदशोत्तरशततमः ॥

१२१. प्रक. दण्डोपनायिवृत्तम् ।

अनुज्ञातस्तद्धिरण्योद्वेगकरं बलवान् विजिगीषमाणो, यतः स्वभूमिः स्वर्तुवृत्तिश्च स्वसैन्यानाम् अदुर्गापसारः शत्रुरपार्ष्णिरनासारश्च, ततो यायात् । विपर्यये कृतप्रतीकारो यायात् ।

सामदानाभ्यां दुर्बलानुपनमयेद्, भेददण्डाभ्यां बलवतः ।

दण्डोपनायिवृत्तमिति सूत्रम् । दण्डेन बलेन शत्रुम् आत्मनः समीपं नयति उपनमयतीति दण्डोपनायी अर्थाद् दण्डोपनामी तदवस्थापन्नस्य विजिगीषोर्वृत्तमुच्यत इति सूत्रार्थः । उपनतवृत्ते निरूपिते उपनमयितृवृत्तस्य निरूपणं प्राप्तावसरमिति सङ्गतिः ।

प्रथममुपनमनस्य हेतुभूतमभियानमाह — **अनुज्ञात** इति । अनुज्ञा अभ्युपगमः ततः पञ्चम्यर्थे तसिः ल्यब्लोपे च पञ्चमी अभ्युपगमं 'सन्धौ त्वया पणितं हिरण्यं ददामी'त्येवमात्मकं विधायेत्यर्थः । प्रथमान्तं वानुज्ञात इति बलवतो विशेषणं 'सन्धौ त्वया पणितं हिरण्यं ददामी'त्यभ्युपगमेन सम्भावित इति तदार्थः । तद्धिरण्योद्वेगकरं तेन हिरण्येन सन्धिपणितेनादत्तेन हेतुनोद्वेगोत्पादकं, यातव्यं, विजिगीषमाणः विजेतुमिच्छन्, बलवान्, ततो यायात् तत्र देशेऽभिगच्छेत्, कुत्र, यतः यत्र गन्तव्ये, स्वसैन्यानां, स्वभूमिः स्वकीया भूमिर्गमनमार्गतया लभ्यते, सा स्वर्तुवृत्तिश्च स्वानुकूलकालयुक्ता स्वयोग्यभक्तोपकरणसम्पन्ना च, शत्रुः, अदुर्गापसारः दुर्गं पार्वतादि अपसारोऽपसरणमार्गः तदुभयरहितः भवति, अपार्ष्णिरनासारश्च आद्यं विजिगीषोर्विशेषणं द्वितीयं शत्रोर्विशेषणं स्वयं पार्ष्णिग्राहरहितः शत्रुस्तु सुहृद्बलरहित इत्यर्थः, यद्वा अपार्ष्णिरित्यपि शत्रोरेव विशेषणं पार्ष्णिशब्देन पार्ष्णिग्राहणरूपप्रतीकारलक्षणात् तद्रहित इत्यर्थः । **विपर्यये कृतप्रतीकारो यायादिति** । उक्तस्वभूम्याद्यभावे शत्रोः सदुर्गापसारत्वादौ च सति तत्तत् प्रतिविधाय गच्छेत् ।

यातव्योपनमनोपायानां विषयनियममाह —**सामदानाभ्यामित्यादि** । एवञ्च दण्डोपनायिवृत्तमिति संज्ञापदे दण्डग्रहणमुपायमात्रोपलक्षणं दण्डस्य प्रायिकत्वज्ञापनार्थं कृतमिति द्रष्टव्यम् ।

नियोगविकल्पसमुच्चयैश्चोपायानामनन्तरैकान्तराः प्रकृतीः साधयेत् ।

ग्रामारण्योपजीविव्रजवणिक्पथानुपालनमुज्झितापसृतापकारिणां चार्पणमिति सान्त्वमाचरेत् । भूमिद्रव्यकन्यादानमभयस्य चेति दानमाचरेत् ।

सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमोपग्रहेण कोशदण्डभूमिदाययाचनमिति भेदमाचरेत् । प्रकाशकूटतूष्णींयुद्धदुर्गलम्भोपायैरमित्रप्रग्रहणमिति दण्डमाचरेत् ।

उपायानुष्ठाननियममाह — **नियोगविकल्पसमुच्चयैश्चेति** । अयमेवोपायोऽस्मिन् पुरुषविशेषेऽनुष्ठेयो नान्य इत्यवधारणं नियोगः अयं वासौ वेति विकल्पः अयं चासौ चेति समुच्चयः । एवमुपायानां नियोगाद्यनुष्ठानैः, अनन्तरैकान्तराः प्रकृतीः अमित्रप्रकृतीः मित्रप्रकृतीश्च, साधयेत् उपनमयेत् ।

दुर्बले सामदानाचरणमाह — **ग्रामारण्येत्यादि** । ग्रामारण्योपजीविनो व्रजस्य गोमहिषादेः वणिक्पथस्य च वारिपथस्थलपथरूपस्य यातव्यसम्बन्धिनः अनुपालनं प्रतिरोधकादितो रक्षणम्, उज्झितापसृतापकारिणामर्पणं च उज्झितानां परचक्रादिभयत्यक्तानाम् अपसृतानां स्वयं प्रनष्टानां दासादीनाम् अपकारिणाम् अपकृत्य गतानां दूष्यादीनां च दुर्बलसम्बन्धिनाम् अन्विष्योपलभ्य प्रदानम्, इति एवंरूपं, सान्त्वं साम, आचरेद् दुर्बलेषु प्रयुञ्जीत । **भूमिद्रव्यकन्यादानमिति** । भूमिदानं द्रव्यदानं कन्यादानं च, अभयस्य च अर्थाद् दानं शत्रुभ्यो भयप्रसङ्गे, इति एवंरूपं, दानम् आचरेत् दानोपायमनुतिष्ठेत् ।

बलवद्विषये भेददण्डयोराचरणमाह — **सामन्तेत्यादि** । सामन्ताटविकौ प्रसिद्धौ तत्कुलीनः यातव्यज्ञातिः, अवरुद्धः यातव्यपुत्रादिर्निर्वासितः, इत्येषाम्, अन्यतमोपग्रहेण एकतमस्य स्वायत्तीकरणेन, कोशादियाचनं हिरण्यस्य सैन्यस्य भूमेः दायस्य च याचनम्, इति एवम्प्रकारं, भेदम् आचरेत् । **प्रकाशेत्यादि** । प्रकाशयुद्धं निर्दिष्टदेशकालं युद्धम्, अनिर्दिष्टदेशकालं कूटयुद्धं, योगगूढोपजापैर्घातनं तूष्णींयुद्धमिति त्रिकं परिपणितापरिपणितापसृतसन्धिप्रकरणलक्षितं दुर्गलम्भोपायो रसदानादिकं वक्ष्यमाणम्, इत्येतैः, अमित्रप्रग्रहणं शत्रुनियन्त्रणम्, इति एवंरूपं, दण्डम् आचरेत् ।

एवमुत्साहवतो दण्डोपकारिणः स्थापयेत्, स्वप्रभाववतः कोशोपकारिणः, प्रज्ञावतो भूम्युपकारिणः ।

तेषां पण्यपत्तनग्रामखनिसञ्जातेन रत्नसारफल्गुकुप्येन द्रव्यहस्तिवनव्रजसमुत्थेन यानवाहनेन वा यद् बहुश उपकरोति तच्चित्रभोगं, यद् दण्डेन कोशेन वा महदुपकरोति तन्महाभोगं, यद् दण्डकोशभूमीरुपकरोति तत् सर्वभोगम् ।

यदमित्रमेकतः प्रतिकरोति तदेकतोभोगि । यदमित्रमासारं चापकरोति तदुभयतोभोगि । यदमित्रासारप्रतिवेशाटविकान् सर्वतः प्रतिकरोति तत् सर्वतोभोगि ।

सामादिभिरुपनमितानां विनियोगमाह — **एवमुत्साहवत** इत्यादि । एभिः प्रकारैर्नमितेषु मध्ये उत्साहशक्तियुक्तान्, दण्डोपकारिणः निजसैन्योपकारकान्, स्थापयेत् नियोजयेत् । स्वप्रभाववतः कोशसम्पन्नान्, कोशोपकारिणः कोशदानेनोपकर्तॄन्, स्थापयेत् । प्रज्ञावतः मन्त्रशक्तियुक्तान्, भूम्युपकारिणः भूमिविषये कार्ये तत्सारासारत्वावधारणादौ उपकर्तॄन्, स्थापयेत् ।

एवं सामाद्युपायैरुपनमय्य मित्रीकृतानामुपयोगविशेषं तन्निमित्तं संज्ञाभेदं चाह—**तेषामिति** । दण्डोपनमितानां मध्ये, पण्यपत्तनग्रामखनिसञ्जातेन पणनीयद्रव्यक्रयविक्रयस्थानाद् ग्रामात् सुवर्णाद्युत्पत्तिस्थानाच्च सञ्जातेन, रत्नसारफल्गुकुप्येन रत्नेन मणिमुक्तादिना सारेण चन्दनादिना फल्गुना शङ्खादिना कुप्येन वस्त्रादिना च, द्रव्यहस्तिवनव्रजसमुत्थेन द्रव्यवनाद् हस्तिवनाद् व्रजाच्च सञ्जातेन, यानवाहनेन वा रथादियानैर्गजादिवाहनैश्च वा, यत् मित्रं, बहुशः बाहुल्येन, उपकरोति, तत् मित्रं, चित्रभोग चित्रा नानाप्रकारा भोगा उपयोगा येनेति व्युत्पत्त्या तदाख्यं भवति । यद् दण्डेन कोशेन वा प्रभूतमुपकारं विधत्ते, तद् महाभोगाख्यमिति, यद् दण्डकोशभूमीर्दत्त्वोपकरोति तत् सर्वभोगमिति च वाक्यद्वयेनाह — **यद् दण्डेनेत्यादिना यद् दण्डकोशेत्यादिना** च ।

अर्थप्राप्त्युपकारिणो मित्रभेदानभिधायानर्थनिवारणोपकारिण आह—**यदिति** । यत् मित्रम्, अमित्रम् एकतः एकमेव शत्रुमित्यर्थः प्रतिकरोति, तद् **एकतोभोगि** तत्संज्ञम् । यत्, अमित्रम्, आसारं च अमित्रस्य मित्रं च, **अपकरोति** वारयति, तद् मित्रम्, उभयतोभोगि । यद्, **अमित्रासारप्रतिवेशाटविकान्** अमित्रं शत्रुम् आसारं शत्रुमित्रं प्रतिवेशं पार्श्वस्थं शत्रुम् आटविकम्

पार्ष्णिग्राहश्चाटविकः शत्रुमुख्यः शत्रुर्वा भूमिदानसाध्यः कश्चिदासाद्येत, निर्गुणया भूम्यैनमुपग्राहयेत्, अप्रतिसम्बद्धया दुर्गस्थं, निरुपजीव्ययाटविकं, प्रत्यादेयया तत्कुलीनं, शत्रोरुपच्छिन्नया शत्रोरुपरुद्धं, नित्यामित्रया श्रेणीबलं, बलवत्सामन्तया संहतबलम्, उभाभ्यां युद्धे प्रतिलोमम्, अलब्धव्यायामयोत्साहिनं, शून्ययारिपक्षीयं, कर्शितयापवाहितं, महाक्षयव्ययनिवेशया गतप्रत्यागतम्, अनुपाश्रयया प्रत्यपसृतं, परेणानधिवास्यया स्वयमेव भर्तारमुपग्राहयेत्।

अटवीपतिं चेत्येतान्, सर्वतः प्रतिकरोति, तत् मित्रं, सर्वतोभोगि तत्संज्ञम्।

अथ दानोपायप्रयोगे कीदृशी भूमिः कस्मै दातव्येत्याह — **पार्ष्णिग्राहश्चे**ति। सः, आटविकः अटवीपतिः, शत्रुमुख्यः शत्रोरमात्यप्रभृतिः, शत्रुर्वा, भूमिदानसाध्यः कश्चिद्, आसाद्येत, चेदिति शेषः, निर्गुणया भूम्या, एनम् उपग्राहयेत् स्वायत्तीकुर्यात्। कथम्भूतं कथम्भूतया, दुर्गस्थम्, अप्रतिसम्बद्धया दुर्गसम्बन्धरहितया दुर्गाद् बहिर्देशान्तरव्यवहितया भूम्या, उपग्राहयेत्। निरुपजीव्यया उपजीवनयोग्यधान्यवापादिरहितया भूम्या, आटविकम्, उपग्राहयेत्। प्रत्यादेयया कार्यान्तेऽपहर्तुमर्हया, तत्कुलीनम् उपग्राहयेत्। शत्रोरुपच्छिन्नया शत्रुसकाशप्रसभाहृतया, शत्रोरुपरुद्धं शत्रुणा नियन्त्रितं तत्पुत्रादिम्, उपग्राहयेत्। नित्यामित्रया चोराटविकादिनित्योपद्रवयुक्तया, श्रेणीबलं जनगणात्मकं नायकरहितं सैन्यविशेषम्, उपग्राहयेत्। बलवत्सामन्तया प्रबलप्रत्यमित्रया, संहतबलं जनसङ्घात्मकं सनायकं सैन्यविशेषम्, उपग्राहयेत्। उभाभ्यां नित्यामित्रया बलवत्सामन्तया चेति द्वाभ्यां भूमिभ्यां, युद्धे प्रतिलोमं कूटकारिणम्, उपग्राहयेत्। अलब्धव्यायामया व्यायामायोग्यया भूम्या, उत्साहिनम् उत्साहशीलम्, उपग्राहयेत्। शून्यया अलभ्यफलया, अरिपक्षीयम्, उपग्राहयेत्। कर्शितया परचक्राटविकाद्युपद्रुतया, अपवाहितं युद्धोपतप्तं, कृतसन्धिभ्रंशितमिति माधवयज्वा, उपग्राहयेत्। महाक्षयव्ययनिवेशया महता पुरुषापचयेन धनव्ययेन च साध्यो निवेशो यस्यां तया, गतप्रत्यागतम्, उपग्राहयेत्। अनुपाश्रयया दुर्गहीनया, प्रत्यपसृतं शत्रुभीत्या स्वदेशादपसृतम्, उपग्राहयेत्। परेणानधिवास्यया स्वभर्तृव्यतिरिक्तेनाधिष्ठातुमशक्यया भूम्या, स्वयमेव भर्तारं यस्तस्या भूतपूर्वो भर्ता तमेवेत्यर्थः, उपग्राहयेत्।

तेषां महोपकारं निर्विकारं चानुवर्तयेत् । प्रतिलोममुपांशुना साधयेत् । उपकारिणमुपकारशक्त्या तोषयेत् । प्रयासतश्चार्थमानौ कुर्यात् । व्यसनेषु चानुग्रहम् । स्वयमागतानां यथेष्टदर्शनं प्रतिविधानं च कुर्यात् । परिभवोपघातकुत्सातिवादांश्चैषु न प्रयुञ्जीत । दत्त्वा चाभयं पितेवानुगृह्णीयात् । यश्चास्यापकुर्यात् तद्दोषमभिविख्याप्य प्रकाशमेनं घातयेत् । परोद्वेगकारणाद् वा दाण्डकर्मिकवच्चेष्टेत । न च हतस्य भूमिद्रव्यपुत्रदारानभिमन्येत । कुल्यानप्यस्य स्वेषु पात्रेषु स्थापयेत् । कर्मणि मृतस्य पुत्रं राज्ये स्थापयेत् ।

अथ दण्डोपनतेषु तद्वृत्तिभेदेन दण्डोपनायिनः समाचरणभेदानाह— **तेषामिति** । दण्डोपनतानां मध्ये, महोपकारं, निर्विकारं च, अनुवर्तयेत् उपकारवृत्तेर्निर्विकारवृत्तेश्च विच्छेदो यथा न भवेत् तथा तं नयेत् । प्रतिलोमं प्रतिकूलाचारम्, उपांशुना उपांशुदण्डेन, साधयेत् प्रकाशवधेऽन्ये दण्डोपनता उद्विग्नाः स्युरिति । उपकारिणमुपकारशक्त्या स्वशक्त्यानुगुण्येनोपकर्तारं, तोषयेत् प्रीणयेत् । प्रयासतश्च प्रयासानुगुण्येन च, अर्थमानौ धनदानं सत्कारं च, तेषां कुर्यात् । अर्थमाने इत्यपपाठः । व्यसनेषु च बन्धुविपत्त्यादिशोकेषु च, अनुग्रहं परिसान्त्वनादिरूपं, कुर्यात् । स्वयमागतानाम् अनाहूतागतानां, यथेष्टदर्शनं यथेच्छं दर्शनं, कुर्यात् अनुरागार्थम् । प्रतिविधानं च कुर्यात् तेभ्यः शङ्क्यमानादपायादात्मनो रक्षार्थं संविधानं च कुर्यात् । **परिभवेत्यादि** । परिभवोऽनादरः उपघातो दोषवचनं कुत्सा निन्दा अतिवादोऽतिस्तुतिः इत्येतांश्च, एषु दण्डोपनतेषु विषये, न प्रयुञ्जीत । दत्त्वा चाभयं भयस्थानप्राप्तौ पितेव अनुगृह्णीयात् । यश्च दण्डोपनतः, अस्य विजिगीषोः, अपकुर्यात्, तद्दोषं तदपराधम्, अभिविख्याप्य, एनम् अपराधिनं, प्रकाशं घातयेत् । परोद्वेगकारणाद् वा तत्प्रकाशवधेनान्येषां दण्डोपनतानामुद्वेगः स्यादिति शङ्कारूपकारणसत्त्वे वा, दाण्डकर्मिकवत् दाण्डकर्मिकप्रकरणोक्तविधानतुल्यं, चेष्टेत उपांशुदण्डं प्रयुञ्जीतेत्यर्थः । **न चेति** । हतस्य, भूमिद्रव्यपुत्रदारान्, न च अभिमन्येत स्वत्वाभिमानविषयान् न कुर्यात्, स्वयं नापहरेदित्यर्थः । किं तर्हि कुर्यात्, अस्य हतस्य कुल्यानपि अपिशब्दात् पुत्रादीनपि, स्वेषु पात्रेषु स्वस्वोचितेषु राजादिस्थानेषु, स्थापयेत् । कर्मणि उपनाय्यर्थे युद्धे, मृतस्य, पुत्रं, राज्ये पितृसम्बन्धिनि, स्थापयेत् ।

एवमस्य दण्डोपनताः पुत्रपौत्राननुवर्तन्ते ।

यस्तूपनतान् हत्वा बद्ध्वा वा भूमिद्रव्यपुत्रदारानभिमन्येत, तस्योद्विग्नं मण्डलम् अभावायोत्तिष्ठते । ये चास्यामात्याः स्वभूमिष्वायत्तास्ते चास्योद्विग्ना मण्डलमाश्रयन्ते । स्वयं वा राज्यं, प्राणान् वास्याभिमन्यन्ते ॥

स्वभूमिषु च राजानस्तस्मात् साम्नानुपालिताः ।
भवन्त्यनुगुणा राज्ञः पुत्रपौत्रानुवर्तिनः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
षोडशोऽध्यायः दण्डोपनायिवृत्तम्,
आदितश्चतुर्दशशततमः ॥

उपदिष्टवर्त्मनानुष्ठाने दण्डोपनताः विजिगीषुं न केवलं तत्पुत्रपौत्रानप्यनुसरन्तीत्याह — **एवमस्येत्यादि** ।

उपदिष्टविपरीतानुष्ठायिनो दण्डोपनायिनो दोषमाह — **यस्त्वित्यादि** । यस्तु, विजिगीषुः, उपनतान्, दण्डप्रणतान्, हत्वा, बद्ध्वा वा बन्धनागारं नीत्वा वा, भूमिद्रव्यपुत्रदारान् उपनतसम्बन्धिनः, अभिमन्येत आत्मसात्कुर्यात्, तस्य उद्विग्नं तं प्रति कुपितं सत्, मण्डलं द्वादशराजकम्, अभावाय तस्य नाशाय, उत्तिष्ठते उद्युङ्क्ते । ये च अस्य विजिगीषोः, अमात्याः, स्वभूमिषु, आयत्ताः व्यापृताः, ते च अस्योद्विग्नाः, मण्डलम् उत्तिष्ठमानं राजमण्डलम्, आश्रयन्ते विजिगीषोरपकारार्थम् । स्वयं वा, अस्य राज्यम्, अभिमन्यन्ते ममकारविषयं कुर्वन्ति, एनं बद्ध्वेत्यार्थम् । अस्य प्राणान् वाभिमन्यन्ते आत्मसात्कुर्वन्ति हरन्तीत्यर्थः ॥

अध्यायप्रान्ते श्लोकमाह — **स्वभूमिषु चेति** । तस्मात् पूर्वोक्तात् कारणात्, स्वभूमिषु च राजानः स्वीयास्वनन्यदत्तासु भूमिषु राज्यं भुञ्जन्तः चकाराद् विजिगीषुदत्तराज्यभुजश्च राजानः, साम्ना अनुपालिताः विजिगीषुणा रक्षिताः, राज्ञः विजिगीषोः, अनुगुणाः, पुत्रपौत्रानुवर्तिनः पुत्रान् पौत्रांश्च सानुरागमनुसरन्तीत्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
षोडशोऽध्यायः दण्डोपनायिवृत्तम्,
आदितश्चतुर्दशोत्तरशततमः ॥

१२२,१२३. प्रक. सन्धिकर्म, सन्धिमोक्षश्च ।

शमः सन्धिः समाधिरित्येकोऽर्थः । राज्ञां विश्वासोपगमः शमः सन्धिः समाधिरिति ।

'सत्यं शपथो वा चलः सन्धिः । प्रतिभूः प्रतिग्रहो वा स्थावरः' इत्याचार्याः ।

नेति कौटल्यः । सत्यं शपथो वा परत्रेह च स्थावरः सन्धिः, इहार्थ एव प्रतिभूः प्रतिग्रहो वा बलापेक्षः ।

सन्धिकर्मेति सूत्रम् । सन्धेः कर्म विश्वासार्थं सत्यशपथादिना दृढीकरणं सन्धिकर्म, तदुच्यत इत्यर्थः । पणबन्धः सन्धिः पूर्वमुक्तः । स कृतोऽपि अदृढीकृतोऽकृत एवेति तस्य दृढीकरणमधुनोच्यते ।

शम इत्यादि । शमः सन्धिः समाधिरित्येतैः शब्दैरेक एवार्थोऽभिधीयत इत्यर्थः । कोऽसावर्थ इत्याह—**राज्ञां विश्वासोपगम** इत्यादि । सन्धिकारिणां, विश्वासोपगमः विश्वासः पणबन्धविषयो निश्चय उपगम्यतेऽनेनेति विश्वासोपगमः सत्यशपथप्रतिभूप्रतिग्रहान्यतमरूपोऽर्थः, शमः सन्धिः समाधिरित्युच्यते ।

सत्यादिचतुष्टये चलस्थावरविभागमाचार्यमतेनाह—**सत्यमिति** । सत्यम् 'इदमेवमेव नान्यथा भविष्यती'ति वचनमात्रं कार्तयुगैर्जनैर्बहुलमादृतं, शपथो वा पितृपादसुवर्णादिस्पर्शपूर्वमर्थवचनं च, चलः अस्थायी अनतिविश्वास्य इत्यर्थः । सन्धिः सन्धिशब्दः संश्लेषे तद्धेतौ च वर्तते । प्रतिभूः अव्यतिक्रमप्रातिभाव्यवाही, प्रतिग्रहो वा वचनविश्वासार्थमर्पितः पुत्रादिश्च, प्रतिभूकृतः प्रतिग्रहकृतश्च सन्धिरित्यर्थः, स्थावरः स्थायी अत्यन्तविश्वसनीय इत्यर्थः । इत्याचार्याः, मन्यन्त इति शेषः ।

आचार्यमतप्रतिलोमं स्वमतमाह—**नेति कौटल्य** इत्यादि । ययोश्चलत्वमुक्तं तौ सत्यशपथौ प्रत्युत स्थावरौ, यतो व्यतिक्रान्तौ परलोके नरकपातमिह लोके शिष्टासंव्यवहार्यतां च प्रयोजयत इत्यभिप्रायः । इहार्थ एवेत्यादि । इहार्थ एव इहलोकप्रयोजनक एव । अयं भावः — ययोः स्थावरत्वमुक्तं तौ प्रतिभूप्रतिग्रहौ प्रत्युत चलौ, यतो व्यतिक्रान्ताविहलोके केवलमसंव्यवहार्यत्वलक्षणमनर्थं जनयतो न तु परलोके कञ्चित् । किञ्च तौ बलापेक्षौ— प्रतिभूर्हि यदि बलवांस्तदा विश्वसनीयो भवति प्रतिग्रहश्च तदाधातृप्रेमपात्रं चेद् विश्वसनीयो नान्यथेति ।

'संहिताः स्मः' इति सत्यसन्धाः पूर्वे राजानः सत्येन सन्दधिरे।

तस्यातिक्रमे शपथेन अग्न्युदकसीताप्राकारलोष्टहस्तिस्कन्धाश्वपृष्ठरथोपस्थशस्त्ररत्नबीजगन्धरससुवर्णहिरण्यान्यालेभिरे — हन्युरेतानि त्यजेयुश्चैनं यः शपथमतिक्रामेद् इति।

शपथातिक्रमे महतां तपस्विनां मुख्यानां वा प्रातिभाव्यबन्धः प्रतिभूः। तस्मिन् यः परावग्रहसमर्थान् प्रतिभुवो गृह्णाति, सोऽतिसन्धत्ते। विपरीतोऽतिसन्धीयते।

बन्धुमुख्यप्रग्रहः प्रतिग्रहः। तस्मिन् यो दूष्यामात्यं दूष्यापत्यं वा ददाति सोऽतिसन्धत्ते। विपरीतोऽतिसन्धीयते। प्रतिग्रहग्रहणविश्वस्तस्य हि परः छिद्रेषु निरपेक्षः प्रहरति।

सत्यादिषु पूर्वपूर्वातिलङ्घनाद् गुणदोषकृतादुत्तरोत्तरस्यापेक्षणीयत्वप्राप्तिं कथयंस्तेषां लक्षणमाह—**संहिताः स्म इतीत्यादि**। सत्यसन्धाः पूर्वे अवितथप्रतिज्ञा नलादयः।

तस्यातिक्रम इति। सत्यस्यावितथार्थवचनलक्षणस्यातिलङ्घने, अग्न्यादीनि आलेभिरे अग्न्यादीनि चतुर्दश पस्पृशुः। तानि च अग्निः, उदकं, सीता लाङ्गलपद्धतिस्तया भूमिर्लक्ष्यते, प्राकारलोष्टः, हस्तिस्कन्धः, अश्वपृष्ठं, रथोपस्थं, शस्त्रं, रत्नं, बीजं शाल्यादिधान्यबीजं, गन्धश्चन्दनादिः, रसः, सुवर्णं हेम, हिरण्यं नाणकः, इत्येवं चतुर्दश। **हन्युरेतानी**त्यादि। अग्न्याद्यालम्भनपूर्वशपथकर्तारं शपथातिक्रमेऽग्न्यादीनि नानुगृह्णीयुरिति विश्वासादित्यर्थः।

शपथातिक्रम इति। शपथस्य अग्न्याद्यालम्भनपूर्वार्थवचनलक्षणस्य कालदोषात् पुरुषदोषाच्च अतिक्रमे जायमाने, महतां तपस्विनां, मुख्यानां वा ग्रामादिप्रधानानां वा, प्रातिभाव्यबन्धः प्रतिभूत्वेन नियमनं प्रतिभूः प्रतिभूसंज्ञं विश्वासस्थानम्। **तस्मिन्नि**ति। प्रातिभाव्यबन्धे, यः, परावग्रहसमर्थान् परेषां प्रतिज्ञातार्थत्यागिनां निग्रहणे शक्तान्, प्रतिभुवः, गृह्णाति, सः, अतिसन्धत्ते वञ्चयति परम्, विपरीतः परावग्रहासमर्थप्रतिभूग्राही, अतिसन्धीयते वञ्च्यते, परेण।

बन्धुमुख्यप्रग्रह इति। बन्धुमुख्यानां परकीयानां प्रग्रहः, **परप्रत्यय**विश्वासार्थमाधित्वेन ग्रहणं, प्रतिग्रहः। **तस्मिन्नि**ति। प्रतिग्रहे, यः, दूष्यामात्यं दूष्यममात्यं, दूष्यापत्यं वा दूष्यमपत्यं वा, ददाति आधीकरोति, सः

अपत्यसमाधौ तु । कन्यापुत्रदाने ददत् तु कन्यामतिसन्धत्ते । कन्या ह्यदायादा परेषामेवार्थाय क्लेशाय च । विपरीतः पुत्रः ।

पुत्रयोरपि जात्यं प्राज्ञं शूरं कृतास्त्रमेकपुत्रं वा ददाति, सोऽतिसन्धीयते । विपरीतोऽतिसन्धत्ते । जात्यादजात्यो हि लुप्तदायादसन्तानत्वादाधातुं श्रेयान् । प्राज्ञादप्राज्ञो मन्त्रशक्तिलोपात् । शूरादशूर उत्साहशक्तिलोपात् । कृतास्त्रादकृतास्त्रः प्रहर्तव्यसम्पल्लोपात् । एकपुत्रादनेकपुत्रो निरपेक्षत्वात् ।

अतिसन्धत्ते अर्थादाधिग्राहिणम् । विपरीतः दीयमानतथाविधाधिग्राही, अतिसन्धीयते । अतिसन्धानप्रकारमाह—**प्रतिग्रहग्रहणविश्वस्तस्य** हीति । 'परस्मात् प्रतिग्रहो मया गृहीत' इति विस्रम्भेण स्थितस्य हि विजिगीषोः, छिद्रेषु, परः शत्रुः, निरपेक्षः स्वदत्तप्रतिग्रहनिरादरः, प्रहरति ।

अपत्यसमाधौ त्विति । अपत्यप्रतिग्रहविषये विशेष उच्यत इति शेषः । **कन्यापुत्रदान** इति । कन्यायाः पुत्रस्य च दानप्रसङ्गे, कन्यां ददत्, अतिसन्धत्ते । कुत इत्याह—**कन्या** हीति । सा हि, अदायादा अदायहरा, परेषामेव, अर्थाय प्रयोजनाय परोपभोग्यत्वात्, क्लेशाय च धनव्ययादिद्वारेण पितुर्दुःखाय च, भवति । पुत्रः, विपरीतः दायादः पितुः स्वार्थाय क्लेशशान्तये च कल्पत इत्यर्थः ।

सन्ध्यर्थं परस्परपुत्राधाने विशेषमाह—**पुत्रयोरपी**ति । पुत्रद्वयमध्ये, जात्यं समानजातीयं, प्राज्ञं, शूरं, कृतास्त्रम् अस्त्रविद्याशिक्षितम्, एकपुत्रं वा ददाति यः सः अतिसन्धीयते । विपरीतः अजात्याप्राज्ञादिपुत्रदायी, अतिसन्धत्ते । अजात्याद्याधानस्य श्रेयस्त्वं समर्थयते — **जात्यादि**ति । समानजातीयात्, अजात्यो हि, लुप्तदायादसन्तानत्वात् राज्यहरसन्तानरहितत्वाद्धेतोः, आधातुं श्रेयान् आधीयमान आधातुः श्रेयस्कर इत्यर्थः । **प्राज्ञादप्राज्ञ इत्यादि** । वाक्यत्रयं स्पष्टार्थम् । तत्र प्रहर्तव्यसम्पल्लोपादित्यस्य प्रहरणसाधनगुणसमृद्धिविरहादित्यर्थः । **एकपुत्रादि**ति । एकेन पुत्रेण युक्तो यः पुत्रमाधत्ते, तदपेक्षया, अनेकपुत्रः अनेकैः पुत्रैर्युक्तो यस्तदन्यतमं पुत्रमाधत्ते सः, श्रेयान् अतिसन्धाता भवतीत्यर्थः । कुतः, निरपेक्षत्वात् पुत्रान्तरसत्त्वेनाधीयमानपुत्रनिरादरत्वादित्यर्थः । अथवा एकपुत्रादित्यादेरयमर्थः — **एकपुत्रादि**ति । एक एव पुत्र एकपुत्रः तस्मात् तदपेक्षया, अनेकपुत्रः एकपुत्रभिन्नः

जात्यप्राज्ञयोर्जात्यमप्राज्ञमैश्वर्यप्रकृतिरनुवर्तते। प्राज्ञमजात्यं मन्त्राधिकारः। मन्त्राधिकारेऽपि वृद्धसंयोगाज्जात्यकः प्राज्ञमतिसन्धत्ते।

प्राज्ञशूरयोः प्राज्ञमशूरं मतिकर्मणां योगोऽनुवर्तते। शूरमप्राज्ञं विक्रमाधिकारः। विक्रमाधिकारेऽपि हस्तिनमिव लुब्धकः प्राज्ञः शूरमतिसन्धत्ते।

शूरकृतास्त्रयोः शूरमकृतास्त्रं विक्रमव्यवसायोऽनुवर्तते। कृतास्त्रमशूरं लक्षलम्भाधिकारः। लक्षलम्भाधिकारेऽपि स्थैर्यप्रतिपत्त्यसंमोषैः शूरः कृतास्त्रमतिसन्धत्ते।

अर्थाद् बहुपुत्रान्यतमः, आधातुं श्रेयान् आधीयमान आधातुः श्रेयस्करः, कुतः निरपेक्षत्वात् स्वपित्रा पुत्रान्तरयुक्तेनोपेक्ष्यमाणत्वादिति।

अथ जात्यादिवृत्तरोत्तरापेक्षया पूर्वपूर्वस्यातिशयं समर्थयते—**जात्यप्राज्ञयोरि**ति। तयोर्मध्ये, जात्यम्, अप्राज्ञम्, ऐश्वर्यप्रकृतिः राज्यस्वामित्वम्, अनुवर्तते। अतश्च राज्यदायहरत्वं तस्य गुणः। प्राज्ञम् अजात्यं, मन्त्राधिकारः मन्त्रशक्तिः, अनुवर्तते। अतश्च मन्त्रशक्तियुक्तत्वं तस्य गुणः। एवमुभयोः पृथग्गुणसत्त्वे विशेषमाह— **मन्त्राधिकारेऽपी**ति। प्राज्ञस्य मन्त्रशक्तियोगे सत्यपि, जात्यकः जन्मसिद्धराज्यस्वामिभावः, वृद्धसंयोगाद् विद्यावृद्धसंयोगं प्राप्य, प्राज्ञम्, अतिसन्धत्ते अतिशेते। जात्यो वृद्धोपासनया प्राज्ञगुणं मन्त्राधिकाररूपमर्जयितुं शक्नोति प्राज्ञस्तु जात्यगुणं राज्यार्हत्वलक्षणं नार्जयितुं शक्नोतीत्यभिप्रायः।

प्राज्ञशूरयोर्गुणकथनपूर्वं विशेषमाह— **प्राज्ञशूरयोरि**त्यादि। मतिकर्मणां योगः बुद्धिमत्कर्मसम्बन्धः। विक्रमाधिकारः पराक्रमोद्योगः। हस्तिनमिव लुब्धक इति बुद्धियोगमाहात्म्यस्य दृष्टान्तप्रदर्शनम्।

शूरकृतास्त्रयोर्गुणमाह— **शूरकृतास्त्रयोरि**ति। तयोर्मध्ये, शूरम् अकृतास्त्रम् अशिक्षितास्त्रं, विक्रमव्यवसायः पराक्रमोद्योगः, अनुवर्तते। कृतास्त्रम्, अशूरं, लक्षलम्भाधिकारः अस्त्रस्य यथालक्ष्यप्रापणशक्तिः, अनुवर्तते। विशेषमाह— **लक्षलम्भाधिकारेऽपी**ति। तत्सत्त्वेऽपि, स्थैर्यप्रतिपत्त्यसंमोषैः स्थैर्यं निष्कम्पत्वं प्रतिपत्तिः सङ्कटे सद्यःक्रियानुष्ठानम् असंमोषः असंमोहः आत्मरक्षणावधानम् इत्येतैर्गुणैः, शूरः, कृतास्त्रम्, अतिसन्धत्ते अतिशेते।

बह्वेकपुत्रयोर्बहुपुत्र एकं दत्त्वा शेषवृत्तिस्तब्धः सन्धिमतिक्रामति नेतरः ।

पुत्रसर्वस्वदाने सन्धिश्चेत् पुत्रफलतो विशेषः । समफलयोः शक्तप्रजननतो विशेषः । शक्तप्रजननयोरप्युपस्थितप्रजननतो विशेषः ।

शक्तिमत्येकपुत्रे तु लुप्तपुत्रोत्पत्तिरात्मानमादध्यात्, न चैकपुत्रमिति ।

बह्वेकपुत्रयोरित्यादि । बहुपुत्रैकपुत्रयोर्मध्ये, बहुपुत्रः, एकम् अन्यतमं पुत्रं, दत्त्वा सन्ध्यर्थम् आधाय, शेषवृत्तिस्तब्धः अवशिष्टपुत्रसद्भावदृप्तः सन्, शेषप्रतिस्तब्ध इत्यपि पाठः । सन्धिम् अतिक्रामति लङ्घयति, इतरः एकपुत्रः, नातिक्रामति । अतो बहुपुत्र एकपुत्रमतिशेत इत्यभिप्रायः । पूर्वम् 'एकपुत्रादनेकपुत्रो निरपेक्षत्वाद्' इत्याधेयस्याधेयान्तरापेक्षया विशेष उक्तः । इह तु आधेयगतविशेषद्वारक एवाधातुराधात्रन्तरापेक्षया विशेष उच्यते मन्दबुद्धिप्रबोधनार्थम् ।

उभयोरेकपुत्रत्वे विशेषमाह — **पुत्रसर्वस्वदान** इति । पुत्रसर्वस्वमेकः पुत्रः तस्य दाने, सन्धिश्चेत्, पुत्रफलतो विशेषः पुत्रस्य फलं पुत्रवत्ता तत्कृतो विशेषः । अयमाशयः— स चेदेकः पुत्रः पुत्रवान् भवेत् तं दद्यात् कदाचित् सन्ध्यतिक्रमेण तदपायेऽपि तत्पुत्रस्य राज्यैश्वर्यभोगयोग्यस्य स्थितत्वेन दातुरत्यन्तहान्यभावात् । अपुत्रैकपुत्रदातुस्तु हानिरेवेति । सपुत्रैकपुत्रत्वे द्वयोः समाने गर्भोत्पादनशक्तियुक्तस्य पुत्रस्य तच्छक्तिहीनपुत्रापेक्षया गुणातिशय इत्याह — **समफलयो**रित्यादि । शक्तप्रजननतः शक्तं स्वशक्तिविषयभूतं प्रजननं गर्भोत्पादनं यस्य स शक्तप्रजननः ततः तस्येत्यर्थः । **शक्तप्रजननयो**रिति । उभयोरपि एकपुत्रयोः गर्भोत्पादनशक्तिमतोः सतोः, उपस्थितप्रजननतो विशेषः आसन्नगर्भोत्पादनस्य गुणातिशयः, अतश्च स न देय इत्यर्थः ।

शक्तिमत्येकपुत्रे त्विति । पुत्रोत्पादनशक्ते राज्यभारवहनशक्ते वा एकस्मिन्नेव पुत्रे विद्यमाने, लुप्तपुत्रोत्पत्तिः स्वयं पुत्रोत्पादनशक्तिहीनः, आत्मानम्, आदध्यात् आधीकुर्यात् । न चैकपुत्रं न त्वेकं पुत्रमादध्यात् । इतिशब्दः सन्धिकर्मप्रकरणसमाप्तिद्योतकः ।

अभ्युच्चीयमानः समाधिमोक्षं कारयेत् ।

कुमारासन्नाः सत्रिणः कारुशिल्पिव्यञ्जनाः कर्माणि कुर्वाणाः सुरुङ्गया रात्रावुपखानयित्वा कुमारमपहरेयुः । नटनर्तकगायनवादकवाग्जीवनकुशीलवप्लवकसौभिका वा पूर्वप्रणिहिताः परमुपतिष्ठेरन् । ते कुमारं परम्परयोपतिष्ठेरन् । तेषामनियतकालप्रवेशस्थाननिर्गमनानि स्थापयेत् । ततस्तद्व्यञ्जनो वा रात्रौ प्रतिष्ठेत ।

सन्धिमोक्ष इति सूत्रम् । सन्ध्यर्थमाहितः पुत्रादिरिह सन्धिरित्युपचर्यते तस्य मोक्षः मोचनोपाय उच्यत इति सूत्रार्थः । सन्धेर्दृढीकरणमुक्तं, मोचनमिदानीमभिधीयत इति सङ्गतिः ।

अभ्युच्चीयमान इति । सन्धिवशादुपचितशक्तिसिद्धिः, समाधिमोक्षं शत्रुविजिगीषुभ्यां सम्भूयोभयसंवादेन विश्वासार्थमाहितः समाधिः तस्य मोक्षं, कारयेद् अनुतिष्ठेत् ।

मोक्षोपायमाह — **कुमारे**त्यादि । कुमारासन्नाः आहितस्य कुमारस्य आसन्नाः, सत्रिणः गूढपुरुषाः, कारुशिल्पिव्यञ्जनाः कारवस्तक्षायस्कारादयः शिल्पिनः स्वर्णकारादयः तद्वेषाः, भूत्वेति शेषः, कर्माणि शकटभूषणादीनि, कुर्वाणाः, सुरुङ्गया भूम्यन्तस्तिर्यक्खातवर्त्मना, रात्रौ उपखानयित्वा सुरुङ्गाप्रवेशद्वारं कुमारगृहसमीपे कारयित्वा, कुमारम्, अपहरेयुः । अन्यमपहरणोपायमाह — **नटनर्तके**त्यादि । नटादयोऽष्टौ वा तत्र नटोऽभिनयविचक्षणः नर्तको गात्रविक्षेपमात्रकर्ता गायनो गीतज्ञः वादको वाद्यनिपुणः वाग्जीवनः कथोपजीवी कुशीलवः श्लोकपाठकः प्लवकः खड्गाग्रनर्तकः सौभिकः आकाशयानिकः, पूर्वप्रणिहिताः प्रागेव विजिगीषुणा प्रणिहिताः, परं शत्रुम्, उपतिष्ठेरन् आश्रयेयुः । ते तथा परमाश्रित्य तिष्ठन्तः, कुमारम् आधिभूतं, परम्परया क्रमेण, उपतिष्ठेरन् स्वविद्यया राजामात्यादिप्रीत्युत्पादनद्वारेण उपसमागच्छेयुः । तेषां नटादीनां तथोपतिष्ठमानानाम्, अनियतकालप्रवेशस्थाननिर्गमनानि यथेप्सिते काले स्ववासगृहे प्रवेशम् अवस्थानं ततो निष्क्रमणं च, स्थापयेद् राजानुज्ञया व्यवस्थापयेत्, अर्थात् कुमारः । ततः, तद्व्यञ्जनो वा नटाद्यन्यतमवेषधारी च भूत्वा, रात्रौ प्रतिष्ठेत नटादिभिः सह 'निर्गत्य स्वदेशं प्रयायात् ।

तेन रूपाजीवाभार्याव्यञ्जनाश्च व्याख्याताः ।

तेषां वा तूर्यभाण्डफेलां गृहीत्वा निर्गच्छेत् ।

सूदारालिकस्नापकसंवाहकास्तरककल्पकप्रसाधकोदकपरिचारकैर्वा द्रव्यवस्त्रभाण्डफेलाशयनासनसम्भोगैर्निर्ह्रियेत ।

परिचारकच्छद्मना वा किञ्चिदरूपवेलायामादाय निर्गच्छेत् । सुरङ्गामुखेन वा निशोपहारेण । तोयाशये वा वारुणं योगमातिष्ठेत् ।

वैदेहकव्यञ्जना वा पक्वान्नफलव्यवहारेणारक्षिषु रसमवचारयेयुः ।

नटाद्यन्यतमव्यञ्जनतया निर्गमकथनेन रूपाजीवाव्यञ्जनतया भार्याव्यञ्जनतया च निर्गमनं व्याख्यातप्रायमित्याह—**तेन रूपाजीवे**त्यादि ।

उपायान्तरमाह — **तेषां वे**ति । नटनर्तकादीनां वा, तूर्यभाण्डफेलां तूर्यफेलां वादित्रपेटीं भाण्डफेलाम् आभरणपेटीं च, गृहीत्वा निर्गच्छेद्, अर्थात् तत्कलाप्रदर्शनसमाप्तौ ।

अन्यमुपायमाह — **सूदारालिके**त्यादि । सूदादयोऽष्टौ तत्र सूदः सूपकारः आरालिको भक्ष्यकारः स्नापको मज्जनादिकारयिता संवाहकोऽङ्गमर्दकः आस्तरकः शयनाचिन्तकः कल्पको नापितः प्रसाधकोऽलङ्कर्ता उदकपरिचारकः उदकदानाधिकृतः एतैर्वा कर्तृभिः, द्रव्यवस्त्रादिसंभोगैः द्रव्यं निहतच्छागादि वस्त्रं प्रसिद्धं भाण्डफेला भूषणपेटी शयनं शयनीयम् आसनम् इत्येतेषां सम्भोगैः सम्भुक्तैर्द्रव्यादिभिर्बहिर्निर्ह्रियमाणैः सहेत्यर्थः, निर्ह्रियेत बहिर्नीयेत, कुमारः ।

उपायान्तरमाह — **परिचारकच्छद्मना वे**ति । परिचारकव्याजेन वा, किञ्चिद् द्रव्यं परिचारकग्रहणोचितम्, अरूपवेलायाम् अग्राह्यरूपायां सान्धकारायां वेलायाम्, आदाय स्वयं गृहीत्वा, निर्गच्छेत् । प्रकारान्तरमाह — **सुरङ्गामुखेन वा निशोपहारेणे**ति । रात्रौ भूतबलिदानापदेशेन द्रष्टृजनसान्निध्यं परिहृत्य सुरङ्गाद्वारेण निर्गच्छेत् । प्रकारान्तरमाह — **तोयाशये वे**त्यादि । नदनदीसरोरूपे महति जलाशये वा, वारुणं योगम् आतिष्ठेद्, 'उदकवस्तिना जरायुणा वा शिरोवगूढनासः' इत्यादिना दुर्गलम्भोपाये वक्ष्यमाणम् उदकान्तस्सञ्चरणलक्षणमुपायमाश्रित्य निर्गच्छेदित्यर्थः ।

वैदेहकव्यञ्जना वेति । वणिग्वेषा वा, आरक्षिषु पक्वान्नफलव्यव-

दैवतोपहारश्राद्धप्रहवणनिमित्तमारक्षिषु मदनयोगयुक्तमन्नपानरसं वा प्रयुज्यापगच्छेत् । आरक्षकप्रोत्साहनेन वा ।

नागरककुशीलवचिकित्सकापूपिकव्यञ्जना वा रात्रौ समृद्धगृहाण्यादीपयेयुः । (आरक्षिणां ?) वैदेहकव्यञ्जना वा पण्यसंस्थामादीपयेयुः ।

अन्यद्वा शरीरं निक्षिप्य स्वगृहमादीपयेदनुपातभयात् । ततः सन्धिच्छेदखातसुरङ्गाभिरपगच्छेत् ।

काचकुम्भभाण्डभारव्यञ्जनो वा रात्रौ प्रतिष्ठेत । मुण्डजटिलानां

हारेण आरक्षिपुरुषेषु पक्वान्नफलविक्रयवृत्त्या युक्ताः, रसं विषं विषयुक्तमन्नादिकम्, अवचारयेयुः आरक्षिपुरुषान् खादयेयुः । तेषु मोहमुपगतेषु कुमारो निर्गच्छेदित्यभिप्रायः ।

दैवतोपहारश्राद्धप्रहवणनिमित्तमिति । दैवतोपहारनिमित्तं श्राद्धनिमित्तं प्रहवणनिमित्तं प्रहवणं तुष्टिभोजनं तन्निमित्तं च अर्थाद् देवतोपहाराद्युपयुक्तशेषम्, अन्नपानरसं वा, मदनयोगयुक्तम् आरक्षिषु प्रयुज्य मदकरद्रव्ययुक्तं कृत्वा रक्षिपुरुषान् खादयित्वा, अपगच्छेत् कुमारः । **आरक्षकप्रोत्साहनेन वेति** । अथवा रक्षिपुरुषान् धनदानेन प्रभूतधनदानप्रतिज्ञया वा सन्तोष्य वापगच्छेदित्यर्थः ।

नागरककुशीलवेत्यादि । नगररक्षिप्रभृतयो ये राज्ञ्यभ्यनुज्ञातपुरसञ्चारास्तद्वेषा वा, रात्रौ धनिकगृहाण्यग्निनादीपयेयुः । **वैदेहकव्यञ्जना वेति** । तद्वेषा वा, पण्यसंस्थाम् आपणशालाम्, आदीपयेयुः । तन्निमित्ते जनव्याकुलीभावे वर्तमाने कुमारो निर्गच्छेदित्यर्थः ।

उपायान्तरमाह — **अन्यद्वेति** । अन्यत् शरीरं शवं वा, निक्षिप्य स्वगृहे निवेश्य, स्वगृहम् आदीपयेत् कुमारः । किमर्थमन्यशवनिक्षेपस्तत्राह — अनुपातभयात् स्वान्वेषणभयं परिहर्तुम् । दृष्टे हि शवे 'कुमारो दग्ध' इति बुद्ध्या तदन्वेषणाय यत्नं रक्षिणो न कुर्युरिति । एवमादीपितात् स्वगृहात् कथं कुमारो निर्गच्छेत् तत्राह — **तत इति** । आदीपनानन्तरं, **सन्धिच्छेदखातसुरङ्गाभिः** सन्धिच्छेदेन भित्तिरन्ध्रकरणेन खातसुरङ्गाभिः पुष्करिणीप्रणालीभिश्च, अपगच्छेत् ।

काचकुम्भभाण्डभारव्यञ्जनो वेति । काचभारस्तृणकाष्ठादिवाही कुम्भभारो जलवाहकः भाण्डभारः अश्वाद्युपकरणवाही तदन्यतमवेषो वा, रात्रौ

प्रवासनान्यनुप्रविष्टो वा रात्रौ तद्व्यञ्जनः प्रतिष्ठेत । विरूपव्याधिकरणारण्यचरच्छद्मनामन्यतमेन वा । प्रेतव्यञ्जनो वा गूढैर्निर्ह्रियेत । प्रेतं वा स्त्रीवेषेणानुगच्छेत् ।

वनचरव्यञ्जनाश्चैनमन्यतो यान्तमन्यतोऽपदिशेयुः, ततोऽन्यतो गच्छेत् । चक्रचराणां वा शकटवाटैरपगच्छेत् ।

आसन्ने चानुपाते सत्रं वा गृह्णीयात् । सत्राभावे हिरण्यं रसविद्धं वा भक्षजातमुभयतः पन्थानमुत्सृजेत् । ततोऽन्यतोऽपगच्छेत् ।

गृहीतो वा सामादिभिरनुपातमतिसन्दध्यात् । रसविद्धेन वा पथ्यदानेन ।

प्रतिष्ठेत । **मुण्डजटिलप्रवासानिति** । मुण्डजटिलानां विजिगीषुप्रणिहितानां प्रवासान् अर्थात् तान् प्रवसतः, 'मुण्डजटिलानां प्रवासनानि' इत्यपि पाठः । अनुप्रविष्टो वा, रात्रौ, तद्व्यञ्जनः मुण्डजटिलवेषः, प्रतिष्ठेत, तैः सह । **विरूपव्याधिकरणे**त्यादि । विरूपकरणम् औपनिषदिकोक्तयोगेन स्वाभाविकरूपविलक्षणरूपकरणं व्याधिकरणं व्याधितव्यञ्जनकरणम् अरण्यचरच्छद्म पुलिन्दादिवेषः इत्येतेषाम्, अन्यतमेन वा, प्रतिष्ठेतेति वर्तते । **प्रेतव्यञ्जनो** वेति । तद्वेषो वा, गूढैः गूढपुरुषैः, निर्ह्रियेत अपनीयेत । **प्रेतं** वेति । शवं वा कश्चिन्नीयमानं, स्त्रीवेषेण, युक्त इति शेषः, अनुगच्छेत् ।

अन्वेषकानुपातभयपरिहारार्थमाह — **वनचरव्यञ्जनाश्चे**ति । वनचरवेषा गूढपुरुषाः, अन्वेषकैः पृष्टा इति शेषः, एनं कुमारं गतम्, अन्यतो यान्तम्, अन्यतोऽपदिशेयुः अन्येन वनमार्गेण गतं कथयेयुः । **ततोऽन्यतो गच्छेदि**ति । कुमारस्तु वनचरव्यञ्जनापदिष्टान्मार्गादन्येन मार्गेण गच्छेत् , एवं हि गच्छन्नन्वेष्टृभिरग्राह्यो भवतीति । **चक्रचराणां** वेति । शकटचारिणां वा, शकटवाटैः शकटसङ्घातैः सह, अपगच्छेत् ।

आसन्ने चानुपात इत्यादि । स्वान्वेष्टृजने निकटागते तु , सत्रं वा गृह्णीयात् वनं वा आश्रयेत् वनसंकटदेशे निलीयेत । सत्राभावे, हिरण्यं, रसविद्धं विषयुक्तं, भक्षजातं वा, उभयतः पन्थानं पथ्युभयपार्श्वयोः, उत्सृजेत् विकिरेत् । तदुत्सर्गफलमाह — **ततोऽन्यतोऽपगच्छेदि**ति । यत्रान्वेष्टृजन उत्सृष्टहिरण्याद्यादानव्यग्रश्चरति ततोऽन्येन पार्श्वेनापसरेदित्यर्थः ।

अन्वेष्टृगृहीतस्य प्रतिपत्तिमाह—**गृहीतो** वेति । ग्रहणं प्राप्तः, सामादिभिः सान्त्ववचनदानादिभिरुपायैः, अनुपातम् अन्वेष्टृजनम् , अतिसन्दध्याद्

वारुणयोगाग्निदाहेषु वा शरीरमन्यदाधाय शत्रुमभियुञ्जीत—पुत्रो मे त्वया हत इति ॥

उपात्तच्छन्नशस्त्रो वा रात्रौ विक्रम्य रक्षिषु ।
शीघ्रपातैरपसरेद् गूढप्रणिहितैः सह ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे
सप्तदशोऽध्यायः सन्धिकर्म सन्धिमोक्षः,
आदितः पञ्चदशशततमः ॥

वञ्चयित्वापगच्छेत् । रसविद्धेन वा पण्यदानेन विषयुक्तेन पाथेयदानेन वा, अतिसन्दध्यात् मूर्छयित्वा मारयित्वा वापगच्छेत् । पण्यदनेनेति पाठे पण्यशनेनेत्यर्थः । पाथेयेनेत्येव माधवपाठः ।

ग्रहणभयनिलीनस्य कुमारस्यापसरणोपायमाह — **वारुणयोगाग्निदाहेषु वेति** । पूर्वोक्तेषु वारुणयोगेषु अग्निदाहेषु च, शरीरमन्यदाधाय, प्रयुक्तेष्विति शेषः, शत्रुम् अभियुञ्जीत, विजिगीषुः । अभियोगनिमित्तमाह — **पुत्रो मे त्वया हत इतीति** । अपदिशन्निति शेषः । अभियोगवशाच्च 'कुमारो मृत' इति मत्वा तदन्वेषणविमुखतां गते शत्रौ कुमारः सुखमपसरेदित्यभिप्रायः ॥

पूर्वोक्तसर्वोपायासम्भवे कुमारः किं कुर्यात् तत्राह — **उपात्तच्छन्नशस्त्रो वेत्यादि** । गूढधृतं शस्त्रं गृहीत्वा रात्रौ रक्षिपुरुषान् हत्वा शीघ्रगामिभिरश्वादियानैः पूर्वसंकेतितगूढपुरुषसहितोऽपगच्छेदित्यर्थः ॥

इति कौटलीयार्थशास्त्रव्याख्यायां षाड्गुण्ये सप्तमाधिकरणे
सप्तदशोऽध्यायः सन्धिकर्म सन्धिमोक्षः,
आदितः पञ्चदशोत्तरशततमः ॥

१२४-१२६. प्रक. मध्यमचरितोदासीनचरितमण्डलचरितानि ।

मध्यमस्यात्मा तृतीया पञ्चमी च प्रकृती प्रकृतयः। द्वितीया चतुर्थी षष्ठी च विकृतयः। तच्चेदुभयं मध्यमोऽनुगृह्णीयात्, विजिगीषुर्मध्यमानुलोमः स्यात्। न चेदनुगृह्णीयात् प्रकृत्यनुलोमः स्यात्।

मध्यमश्चेद् विजिगीषोर्मित्रं मित्रभावि लिप्सेत, मित्रस्यात्मनश्च मित्राण्युत्थाप्य मध्यमाच्च मित्राणि भेदयित्वा मित्रं त्रायेत। मण्डलं वा प्रोत्साहयेत्— अतिप्रवृद्धोऽयं मध्यमः सर्वेषां नो विनाशाय अभ्युत्थितः सम्भूयास्य यात्रां विहनामेति। तच्चेन्मण्डलमनुगृह्णीयात्

मध्यमचरितमिति सूत्रम्। विजिगीषोर्मध्यमं प्रति अनुष्ठानमुच्यत इति सूत्रार्थः। अरिमित्रविषयस्यानुष्ठानस्य कथनानन्तरं मध्यमविषयस्य कथनसङ्गतिः।

मध्यमस्य प्रकृतिविकृतीराह — **मध्यमस्ये**ति। तस्य, आत्मा, तृतीया पञ्चमी च प्रकृती मित्रं मित्रमित्रं चेति द्वे प्रकृती च, प्रकृतयः आत्मादयस्तिस्रः प्रकृतय इत्युच्यन्ते प्रकृष्टकरणात्। अरिररिमित्रमरिमित्रमित्रं चेत्येतास्तिस्रो विकृतय इत्याह— **द्वितीये**त्यादि। विकृतित्वं च विरुद्धकरणाद् बोद्धव्यम्। प्रकृतित्रिकं विकृतित्रिकं चेत्येतस्य त्रिकद्वयस्य यदि मध्यमस्तुल्यहितवृत्तिः स्यात् तदा विजिगीषुर्मध्यमं प्रति अनुकूलवृत्तिः स्यादित्याह — **तच्चेदुभयमि**त्यादि। **न चेदनुगृह्णीयादि**ति। तच्चेत् त्रिकद्वयं मध्यमो नानुगृह्णीयात्, प्रकृत्यनुलोमः प्रकृतेरात्ममित्रमित्रमित्रात्मकस्य स्वप्रकृतिमात्रस्यानुकूलः, स्यात्।

यदि मध्यमो विजिगीषोः "एकार्थानर्थसम्बन्धमुपकार्यविकारि च। मित्रभावि भवत्येतन्मित्रमद्वैध्यमापदि।" इत्युक्तलक्षणं मित्रभावि मित्रं निग्रहीतुमिच्छेत्, तदा विजिगीषुः स्वमित्रस्य स्वस्य च मित्राण्युत्थाप्य मध्यमाच्च तदीयमित्राणि भेदयित्वा स्वीयं मित्रं रक्षेदित्याह—**मध्यमश्चेदि**त्यादि। तथाविधमध्यममपकर्तुमुपायान्तरमाह — **मण्डलं वा प्रोत्साहयेदि**ति। राजमण्डलं वा समुद्योजयेत्, अर्थान्मध्यमापकारे। किमुक्त्वा प्रोत्साहयेदित्याह — **अतिप्रवृद्धोऽयं मध्यम** इत्यादि। इतिशब्दानन्तरम् उक्त्वेति शेषः। **तच्चेदि**ति। तद् मण्डलं तथा प्रोत्साहितम्, अनुगृह्णीयाच्चेत् आत्मसाहाय्यमनुतिष्ठेद् यदि, मध्यमावग्रहेण मध्यमस्य कर्शनेन, आत्मानम्, उप-

मध्यमावग्रहेणात्मानमुपबृंहयेत् । न चेदनुगृह्णीयात्, कोशदण्डाभ्यां मित्रमनुगृह्य ये मध्यमद्वेषिणो राजानः परस्परानुगृहीता वा बहवस्तिष्ठेयुः एकसिद्धा वा बहवः सिध्येयुः परस्पराद् वा शङ्किता नोत्तिष्ठेरन्, तेषां प्रधानमेकमासन्नं वा सामदानाभ्यां लभेत । द्विगुणो द्वितीयं त्रिगुणस्तृतीयम् । एवमभ्युच्चितो मध्यममवगृह्णीयात् ।

देशकालातिपत्तौ वा सन्धाय मध्यमेन मित्रस्य साचिव्यं कुर्यात् । दूष्येषु वा कर्मसन्धिम् ।

कर्शनीयं वास्य मित्रं मध्यमो लिप्सेत, प्रतिस्तम्भयेदेनम् —

बृंहयेत् वर्धयेत् । **न चेदनुगृह्णीयादि**त्यादि । अयमर्थः—मण्डलं चेदात्मानं नानुगृह्णीयात्, तदा विजिगीषुः, धनदानसैन्यदानाभ्यां स्वमित्रं मध्यमलिप्सितम्, अनुगृह्य, ये मध्यमद्वेषिणो राजानः परस्परसहकृता बहवो मध्यममपकर्तुं सज्जाः स्युः, ये वा मध्यमद्वेषिणो बहवस्तेष्वेवान्यतमेऽनुकूलितेऽनुकूलिता भवेयुः, ये वा मध्यमद्वेषिणो बहवः संहत्य समुत्थातुकामा अप्यन्योन्यभेदभयान्नोत्थिताः स्युः, तेषामन्यतमं प्रधानं स्वदेशासन्नं वा साम्ना दानेन च स्वायत्तं कुर्यात् । तथाविधं सहायं लभमानश्च द्वितीयं लभमानो द्विगुणबलो भवेत् तृतीयं लभमानस्त्रिगुणबलः । अनेन च प्रकारेणोपचितशक्तिर्मध्यमं कर्शयेदिति ।

देशकालातिपत्तौ वेति । मध्यमद्वेषिसाहाय्यसम्पादनात् प्रागेव मध्यमः स्वमित्रमुच्छिन्द्यादिति शङ्कायां, सन्धाय मध्यमेन स्वयं मध्यमेन सह सन्धिं कृत्वा, मित्रस्य साचिव्यं मध्यमसन्धिसङ्घटनलक्षणं साहाय्यं, कुर्यात् । असन्धित्सौ मध्यमे त्वाह — **दूष्येषु वा कर्मसन्धि**मिति । मध्यमस्य ये दूष्याः राष्ट्रमुख्यास्तैः सह कर्मसन्धिं कुर्यात् 'यूयं देशदाहविलोपादिकमारभध्वम् अहमग्रे योत्स्ये' इत्येवं कर्मसंविदा सन्धिं कुर्यादित्यर्थः ।

इत्थं मध्यमेन मित्रभाविमित्रे लिप्सिते विजिगीषोर्विधानमुक्त्वा कर्शनीये मित्रे लिप्सिते विधिमाह — **कर्शनीयं** वेत्यादि । अस्य विजिगीषोर्मित्रं भूम्येकान्तरं, कर्शनीयं स्वविरुद्धवृत्तित्वात् कोशदण्डादिक्षपणेन कृशतां नेतव्यं, मध्यमो लिप्सेत, चेदिति शेषः, एनं कर्शनीयं, प्रतिस्तम्भयेत् प्रतिस्तब्धं निर्भयं कुर्यात्, किमित्युक्त्वा, अहं त्वा त्रायेय मध्यमाद् रक्षेयमि-

अहं त्वा त्रायेय, इत्या कर्शनात् । कर्शितमेनं त्रायेत ।

उच्छेदनीयं वास्य मित्रं मध्यमो लिप्सेत, कर्शितमेतं त्रायेत मध्यमवृद्धिभयात् ।

उच्छिन्नं वा भूम्यनुग्रहेण हस्ते कुर्यादन्यत्रापसारभयात् ।

कर्शनीयोच्छेदनीययोश्चेन्मित्राणि मध्यमस्य साचिव्यकराणि स्युः, पुरुषान्तरेण सन्धीयेत । विजिगीषोर्वा तयोर्मित्राण्यवग्रहसमर्थानि स्युः, सन्धिमुपेयात् ।

अमित्रं वास्य मध्यमो लिप्सेत, सन्धिमुपेयात् । एवं स्वार्थश्च कृतो भवति मध्यमस्य प्रियं च ।

त्युक्त्वा । कियन्तं कालमीदृशमभयवचनमित्याह — **आ कर्शनादिति** । मध्यमसकाशाद् यावत् कर्शनं प्राप्तो भवति तावदित्यर्थः । कर्शितमेनं त्रायेत 'साधु कर्शितोऽयमि'ति निश्चितमेनं रक्षेत् ।

विजिगीषोरुच्छेदनीये मित्रे मध्यमेन लिप्सिते विधिमाह— **उच्छेदनीयं वास्य मित्रमित्यादि** । विजिगीषुस्तं कर्शनप्राप्तिपर्यन्तमुपेक्ष्य पश्चाद् मध्यमाद् रक्षेत् अन्यथा उच्छेदपर्यन्तमुपेक्षायां मध्यमस्य वृद्धिः स्यादिति भयादित्यर्थः ।

अथ विजिगीषुणा कृतेऽपि त्राणयत्ने बलवत्तरेण मध्यमेन यद्युच्छिन्नः स्यादुच्छेदनीयः, तदा विजिगीषुः किं कुर्यादित्याह— **उच्छिन्नं वेति** । तं, **भूम्यनुग्रहेण** स्वीयभूमिप्रदानेन, हस्ते कुर्यात् स्ववशे कुर्यात्, किमर्थम्, अन्यत्रापसारभयात् शत्रुपक्षप्रवेशभयं परिहर्तुम् ।

कर्शनीयोच्छेदनीययोरिति । तथाभूतयोः स्वमित्रयोः, मित्राणि, मध्यमस्य साचिव्यकराणि साहाय्यदायीनि, स्युश्चेत्, पुरुषान्तरेण सन्धीयेत सेनापतिकुमारान्यतरोपस्थापनेन सन्धीयेत, अर्थान्मध्यमो विजिगीषुणा । 'सेनापतिकुमाराभ्यामुपस्थातव्यमित्ययम् । पुरुषान्तरसन्धिः स्यान्नात्मनेत्यात्मरक्षणम् ॥' इत्युक्तलक्षणेन सन्धिना मध्यमस्य साह्यं स्वयमपि विजिगीषुः कुर्यादित्यभिप्रायः । **विजिगीषोर्वा तयोरित्यादि** । कर्शनीयोच्छेदनीययोर्मित्राणि चेद् विजिगीषोरवग्रहणे शक्तानि भवेयुः, तदा विजिगीषुर्मध्यमेन सह सन्धिं कुर्यादित्यर्थः । इत्थं विजिगीषोः स्वमित्राभियोक्तरि मध्यमे वृत्तिर्व्याख्याता ।

विजिगीषोस्तदमित्राभियोक्तरि मध्यमे वृत्तिमाह — **अमित्रं वास्येत्यादि** । विजिगीषोरमित्रमभियुञ्जाने मध्यमे तेन सह विजिगीषुः सन्धिं

मध्यमश्चेत् स्वमित्रं मित्रभावि लिप्सेत, पुरुषान्तरेण सन्दध्यात् । सापेक्षं वा 'नार्हसि मित्रमुच्छेत्तुम्' इति वारयेत् । उपेक्षेत वा— मण्डलमस्य कुप्यतु स्वपक्षवधादिति ।

अमित्रमात्मनो वा मध्यमो लिप्सेत, कोशदण्डाभ्यामेनमदृश्यमानोऽनुगृह्णीयात् ।

उदासीनं वा मध्यमो लिप्सेत— 'उदासीनाद् भिद्यताम्' इति मध्यमोदासीनयोर्यो मण्डलस्याभिप्रेतस्तमाश्रयेत ।

कुर्यात् । किमर्थमित्याह —**एवमिति** । इत्थंकरणे, स्वार्थश्च स्वामित्रानिग्रहलक्षणः, कृतो भवति, मध्यमस्य प्रियं च, कृतं भवति ।

अथ मध्यमे तन्मित्रमभियुञ्जाने विजिगीषोर्वृत्तिमाह —**मध्यमश्चेदि**त्यादि । मध्यमः मित्रभावि अधिकरणशेषवक्ष्यमाणं स्वमित्रं लिप्सेत चेत्, पुरुषान्तरेण सन्दध्यात् विजिगीषुः सेनापत्यादिप्रेषणेन मध्यमस्य साहाय्यमनुतिष्ठेदित्यर्थः । **सापेक्षं वेति** । मित्रे किञ्चिदपेक्षायुक्तम् आत्मनि सानुरोधं वा मध्यमं, 'नार्हसि मित्रमुच्छेत्तुम्' इत्युक्त्वा, वारयेत् आत्मासत्त्वाविष्करणार्थम् । निरपेक्षविषय आह —**उपेक्षेत वे**त्यादि । राजमण्डलमेवास्मै मध्यमाय स्वमित्रवधोद्यतायान्यायवृत्तये कोपिष्यतीति बुद्ध्योपेक्षां मध्यमे कुर्यात् ।

मध्यमे तदमित्रमभियुञ्जाने वृत्तिमाह — **अमित्रमित्यादि** । यदि मध्यमस्तच्छत्रुमभियुञ्जीत, तदा विजिगीषुस्तच्छत्रोर्गूढं साहाय्यं कुर्यात् ।

उदासीनं मध्यमे लिप्समाने वृत्तिमाह — **उदासीनं वे**त्यादि । तं चेद् मध्यमोऽभियुञ्जीत, तदा विजिगीषुः 'उदासीनाद् मध्यमोऽत्यन्तं भेदं प्राप्नोतु' इत्येतदर्थं मध्यमोदासीनयोरन्यतरं मण्डलस्य प्रीतिविषयभूतमाश्रित्य तस्मै साहाय्यं दद्यादित्यर्थः । इह लिप्सेतेत्येतदुत्तरम् 'अस्मै साहाय्यं दद्याद्' इत्यधिकपाठो माधवयज्वटीकापर्यालोचनया प्रतीयते । तदा तु मध्यमाय साह्यं कुर्यादित्यर्थो वक्तव्यः, न चायं विधिरैकान्तिक इत्यभिप्रायकं चोत्तरवाक्यं योज्यम् । इत्थं मध्यमचरितं व्याख्यातम् । अथ क्रमप्राप्तमुदासीनचरितमभिधीयते ।

उदासीनचरितमिति सूत्रम् । उदासीनं प्रति **विजिगीषोरनुष्ठानमु**च्यत इति सूत्रार्थः ।

मध्यमचरितेनोदासीनचरितं व्याख्यातम् । उदासीनश्चेद् मध्यमं लिप्सेत, यतः शत्रुमतिसन्दध्यान्मित्रस्योपकारं कुर्यात्, मध्यममुदासीनं वा दण्डोपकारिणं लभेत, ततः परिणमेत ।

एवमुपगृह्यात्मानमरिप्रकृतिं कर्शयेत् । मित्रप्रकृतिं चोपगृह्णीयात् ।

सत्यप्यमित्रभावे तस्यानात्मवान् नित्यापकारी शत्रुः शत्रुसहितः पार्ष्णिग्राहो वा व्यसनी यातव्यो व्यसने वा नेतुरभियोक्तेत्यरिभाविनः ।

मध्यमोक्तमुदासीनेऽतिदिशति — **मध्यमचरितेने**त्यादि । मध्यमस्य याः प्रकृतय उक्ता आत्मा तृतीया पञ्चमी चेति प्रकृतयः, याश्च विकृतयो द्वितीया चतुर्थी षष्ठी च ता उदासीनस्यापि समानाः । या च मध्यमे विजिगीषोर्वृत्तिरुक्ता सोदासीनेऽपि समानेत्यर्थः । तत्र विशेषमाह — **उदासीनश्चेदि**ति । उदासीनो यदि मध्यममभियुञ्जीत, तदा यस्मिन् पक्षे मध्यमस्योदासीनस्य वा प्रविष्टः स्वशत्र्वतिसन्धानं स्वमित्रोपकारं च कुर्यात्, मध्यममुदासीनं वा सैन्यदानोपकारिणं लभेत, तं पक्षं परिणमेत प्रविशेदित्यर्थः । इह 'कुर्यादि'त्येतदुत्तरम् 'उदासीनं वा दण्डोपकारिणम्' इत्येव मूलादर्शेषु पाठः उपलभ्यते । किन्तु भाषास्वरसात् 'मध्यममुदासीनं वा दण्डोपकारिणम्' इति पाठः साधुतरोऽनुमितः । एवमुदासीनचरितमुक्तम् ।

अथ मण्डलचरितमुच्यते — **मण्डलचरित**मिति सूत्रम् । मण्डलमरिमित्रात्मकं, तस्मिन् विजिगीषोर्वृत्तिरभिधीयत इति सूत्रार्थः ।

एवमिति । यथोक्तया मध्यमोदासीनवृत्त्या, आत्मानम्, उपगृह्य उपचितशक्तिं कृत्वा, अरिप्रकृतिं सामन्तं, कर्शयेत् क्षीणशक्तिं कुर्यात् । मित्रप्रकृतिं भूम्येकान्तरम्, उपगृह्णीयात् सामदानादिना स्वायत्तं कुर्यात् ।

तत्र सामन्ता अरिशब्दितास्तावत् त्रिप्रकाराः — अरिभाविनो मित्रभाविनो भृत्यभाविन इति । तान् क्रमेण वक्ष्यन् प्रथमम् अरिभाविन आह — **सत्यप्यमित्रभावे तस्ये**त्यादि । विजिगीषुं प्रति भूम्यनन्तरत्वेनामित्रत्वे तुल्येऽपि अनात्मवत्त्वादिभिरष्टभिर्विशेषैररिभाविनोऽष्टरूपा भवन्तीत्यर्थः । तत्र अनात्मवान् अवश्येन्द्रियः । नित्यापकारी सदापकारशीलः । शत्रुः निष्कारणं द्विषन् द्विष्यमाणश्च । शत्रुसहितः शत्रुसहायः । पार्ष्णिग्राहः पृष्ठकोपोत्पादकः ।

एकार्थाभिप्रयातः पृथगर्थाभिप्रयातः सम्भूययात्रिकः संहितप्रयाणिकः स्वार्थाभिप्रयातः सामुत्थायिकः कोशदण्डयोरन्यतरस्य क्रेता विक्रेता द्वैधीभाविक इति मित्रभाविनः ।

सामन्तो बलवतः प्रतिघातोऽन्तर्धिः प्रतिवेशो वा बलवतः पार्ष्णिग्राहो वा स्वयमुपनतः प्रतापोपनतो वा दण्डोपनत इति भृत्यभाविनः सामन्ताः ।

तैर्भूम्येकान्तरा व्याख्याताः ।

व्यसनी बन्धुमरणादिदुःखी । यातव्यः अभियोक्तव्यः । व्यसने वा नेतुरभियोक्ता विजिगीषोर्व्यसनमुपलभ्याभियोगकर्ता च ।

मित्रभाविन आह —**एकार्थाभिप्रयात** इति । यमर्थमुद्दिश्य विजिगीषुः प्रयातः तमेवार्थं साधयितुं भिन्नदिक्कं प्रयातः, पृथगर्थाभिप्रयातः विजिगीषौ भूम्युद्देशेन प्रयाते हिरण्योद्देशेन प्रयातः, सम्भूययात्रिकः विजिगीषुणा समवेत्य प्रयातः, संहितप्रयाणिकः विजिगीषुणा सह सन्धि कृत्वा 'त्वमितो याहि अहमन्यतो यास्यामी'ति परिभाष्य प्रयातः, स्वार्थाभिप्रयातः विजिगीषुकार्यसाधनाय प्रयातः, सामुत्थायिकः सम्भूय शून्यनिवेशनादिकर्मानुष्ठानसंविदा प्रवृत्तः, कोशदण्डयोरन्यतरस्य क्रेता विक्रेता कोशेन दण्डस्य दण्डेन कोशस्य वा क्रयकर्ता विक्रयकर्ता च, द्वैधीभाविकः द्वैधीभावगुणोपयोगी कृतसन्धिः पार्ष्णिग्राहादिरित्यर्थः, इति, अष्टाविति शेषः, मित्रभाविनः ।

भृत्यभाविन आह —**सामन्त** इति । बलवतो राज्ञः, प्रतिघातः प्रतिहन्ता 'प्रतिघातो बलवतो दुर्गाटव्यपसारवानि'त्युक्तलक्षणः, अन्तर्धिः 'अरेर्नेतुश्च मध्यस्थो दुर्बलो भूम्यनन्तरः' इत्युक्तरूपः, प्रतिवेशो वा पार्श्वयोर्भूम्यनन्तरो वा, इत्येवं त्रिरूप इति शेषः, सामन्तो भूम्यनन्तरो दुर्बलः, बलवतः पार्ष्णिग्राहो वा बलवतः पार्ष्णि यो दुर्बलो गृह्णाति स वा यातव्यसाहाय्यकारी स्थानीयबाधक इत्युभयरूपः, स्वयमुपनतः स्वयमेवोपगम्याश्रयी प्रतापोपनतो वा प्रतापप्रणतो वेति द्विरूपो दण्डोपनतः, इत्येते भृत्यभाविनः सामन्ताः ।

तैरिति । तैः 'सत्यप्यमित्रभावे तस्ये'त्यादिना त्रिरूपतया व्याख्यातैरमित्रैः, भूम्येकान्तराः व्याख्याताः मित्राण्यपि व्याख्यातप्रायाणि । अमित्रेष्विव मित्रेष्वपि अरिभावित्वमित्रभावित्वभृत्यभावित्वरूपा भेदा भवन्तीत्यर्थः ।

तेषां शत्रुविरोधे यन्मित्रमेकार्थतां व्रजेत् ।
शक्त्या तदनुगृह्णीयाद् विषहेत यया परम् ॥
प्रसाध्य शत्रुं यन्मित्रं वृद्धं गच्छेदवश्यताम् ।
सामन्तैकान्तराभ्यां तत् प्रकृतिभ्यां विरोधयेत् ॥
तत्कुलीनावरुद्धाभ्यां भूमिं वा तस्य हारयेत् ।
यथा वानुग्रहापेक्षं वश्यं तिष्ठेत् तथा चरेत् ॥
नोपकुर्यादमित्रं वा गच्छेद् यदतिकर्शितम् ।
तदहीनमवृद्धं च स्थापयेन्मित्रमर्थवित् ॥
अर्थयुक्त्या चलं मित्रं सन्धिं यदुपगच्छति ।
तस्यापगमने हेतुं विहन्यान्न चलेद् यथा ॥

मित्रेष्ववस्थाविशेषे वृत्तिविशेषानाह — तेषामिति । तेषां भूम्येकान्तराणां मित्राणां, शत्रुविरोधे शत्र्वभियोगे प्राप्ते, यत् मित्रम्, एकार्थतां शत्रुणा समानार्थत्वं सन्धिमित्यर्थः, व्रजेत्, तत्, शक्त्या कोशदण्डादिकया, अनुगृह्णीयात् उपचितं कुर्यात् । कीदृश्या शक्त्या, यया स्वीकृतया परं शत्रुं विषहेत अभिभवेत् ॥

प्रसाध्येति । यत् मित्रं, शत्रुं प्रसाध्य जित्वा, वृद्धं सत्, अवश्यताम् अविधेयत्वं, गच्छेत्, तत् मित्रं, सामन्तैकान्तराभ्यां प्रकृतिभ्याम् अरिप्रकृतिमित्रप्रकृतिभ्यां, विरोधयेत् ॥

तत् [illegible]

कुलीनेन ज्ञातिना अवरुद्धेन पुत्रादिना च, तस्य भूमिं हारयेत् । अथवा, अनुग्रहापेक्षं वश्यं यथा तिष्ठेत् स्वसाद्यार्थि स्वविधेयं च यथा मित्रं तिष्ठेत्, तथा चरेद् अनुतिष्ठेत् ॥

यत् मित्रं प्राप्तातिकर्शनं सत् स्वस्योपकारं न कुर्यात् शत्रुणा वा संसर्गं गच्छेत्, तत् मित्रं हानिरहितं वृद्धिरहितं च स्थापयेत् स्वार्थसाधनपण्डितो विजिगीषुरित्याह — नोपकुर्यादित्यादि ॥

चलमित्रविषयेऽनुष्ठेयमाह— अर्थेत्यादि । यच्चलं मित्रं प्रयोजनयोगेन सन्धिमात्मना सह गच्छति, तत् पुनर्यथा न चलेत् तथा तस्यापगमनकारणं भूयोऽर्थलिप्सारूपं स्वयं तद्दानेन विहन्यात् ॥

अरिसाधारणं यद्वा तिष्ठेत् तदरितः शठम् ।
भेदयेद् भिन्नमुच्छिन्द्यात् ततः शत्रुमनन्तरम् ॥

उदासीनं च यत् तिष्ठेत् सामन्तैस्तद् विरोधयेत् ।
ततो विग्रहसन्तप्तमुपकारे निवेशयेत् ॥

अमित्रं विजिगीषुं च यत् सञ्चरति दुर्बलम् ।
तद् बलेनानुगृह्णीयाद् यथा स्यान्न पराङ्मुखम् ॥

अपनीय ततोऽन्यस्यां भूमौ वा सन्निवेशयेत् ।
निवेश्य पूर्वं तत्रान्यं दण्डानुग्रहहेतुना ॥

अपकुर्यात् समर्थं वा नोपकुर्याद् यदापदि ।
उच्छिन्द्यादेव तन्मित्रं विश्वस्याङ्कमुपस्थितम् ॥

अरिविजिगीष्वोः समानं शठं यत् मित्रं, तत् शत्रुसकाशात् भेदयेत् भिन्नं चोच्छिन्द्यात्, तदुच्छेदानन्तरं च शत्रुमुच्छिन्द्यादित्याह— **अरिसाधारणमि**त्यादि ॥

यद् अरिविजिगीष्वोरुदासीनं तिष्ठति, तत् मित्रं, सामन्तैः विरोधयेत्, सामन्तारब्धविग्रहोपजातसन्तापं च कृत्वा स्वकर्तव्योपकारसापेक्षतां नयेदित्याह —**उदासीनं चे**त्यादि ॥

यत् मित्रं दुर्बलं स्वबलाधानार्थं शत्रुविजिगीषू उभावप्याश्रयति, तत् स्वबलदानेन तथानुगृह्णीयात् यथा शत्रुणा न तत् संसृज्येतेत्याह — **अमित्रं विजिगीषुं चे**त्यादि ॥

उक्तस्योभयमुखप्रेक्षिणो दुर्बलस्यानुग्रहणेऽन्यं प्रकारमाह — **अपनीये**ति । पूर्वोक्तं मित्रं, ततोऽपनीय तदीयभूमेरपगमय्य, अन्यस्यां भूमौ वा शत्रुसाधारणनिरपेक्षायां स्वभूमौ वा, सन्निवेशयेत् स्थापयेत् । तदीयभूमौ कर्तव्यमाह—तत्र तदीयभूमौ, दण्डानुग्रहहेतुना सैन्येनानुग्रहकरणार्थम्, अन्यं तत्समर्थं, पूर्वं मित्रापनयनात् प्रागेव, निवेश्य स्थापयित्वा ॥

यत् मित्रं विजिगीषोरपकारं कुर्यात् समर्थं वा सद् उपकारम् आपदि न कुर्यात्, तत् मित्रम् उपायैरात्मनि विश्वासयुक्तं कृत्वा स्वोत्सङ्गगतं विजिगीषुरुच्छिन्द्यात् न तूपेक्षेतेत्याह --- **अपकुर्यादि**त्यादि ॥

मित्रव्यसनतो वारिरुत्तिष्ठेद् योऽनवग्रहः ।
मित्रेणैव भवेत् साध्यश्छादितव्यसनेन सः ॥

अमित्रव्यसनान्मित्रमुत्थितं यद् विरज्यति ।
अरिव्यसनसिद्ध्या तच्छत्रुणैव प्रसिध्यति ॥

वृद्धिं क्षयं च स्थानं च कर्शनोच्छेदनं तथा ।
सर्वोपायान् समादध्यादेतान् यश्चार्थशास्त्रवित् ॥

एवमन्योन्यसञ्चारं षाड्गुण्यं योऽनुपश्यति ।
स बुद्धिनिगलैर्बद्धैरिष्टं क्रीडति पार्थिवैः ॥

इति कौटलीयार्थशास्त्रे षाड्गुण्ये सप्तमाधिकरणे अष्टादशोऽध्यायः
मध्यमचरितमुदासीनचरितं मण्डलचरितम्,
आदितः षोडशशततमः ॥

एतावता कौटलीयस्यार्थशास्त्रस्य षाड्गुण्यं
सप्तममधिकरणं समाप्तम् ॥

योऽरिर्विजिगीषोर्मित्रव्यसनवशात् प्रतिबन्धं विनैव वृद्धिं प्राप्नुयात्, सः मित्रेणैव स्वप्रयत्नप्रशमितव्यसनेन स्वप्रयत्नाप्रकाशितव्यसनेन वा साधनीय इत्याह — मित्रव्यसनतो वारिरित्यादि ॥

यत् मित्रम् अमित्रस्य बलादिव्यसनाद् वृद्धिं प्राप्तं सद् विजिगीषुविरक्तं भवति, तत् मित्रं विजिगीषुररिव्यसननिवर्तनपूर्वमरिणैवोद्योजितेन साधयेदित्याह — अमित्रव्यसनान्मित्रमित्यादि । अरिव्यसनसिद्ध्या अरिव्यसनस्यापोहेनेत्यर्थः ॥

वृद्धिमिति । योऽर्थशास्त्रवित् स तु, वृद्धिं क्षयं स्थानं च, तथा कर्शनोच्छेदनं कर्शनमुच्छेदनं च, एतान् सर्वोपायान् सर्वांश्च सामदानादीनुपायान्, समादध्यात् सम्यक् तत्तद्विषयसम्प्रधारणपूर्वं प्रयुञ्जीत ॥

यथाप्रपञ्चितार्थसम्यक्प्रयोगप्रयोजनाख्यानेनाधिकरणमुपसंहरति — एवमिति । प्रपञ्चितैः प्रकारैः, यः, अन्योन्यसञ्चारं परस्परोपश्लिष्टं, षाड्गुण्यम्, अनुपश्यति अनुसन्धत्ते, सः, बुद्धिनिगलैः बुद्धिभिरेव बन्धन-

शृङ्खलाभिः, बद्धैः स्वायत्ततां नीतैः, पार्थिवैः क्रीडासाधनैः, इष्टं यथाकामं क्रीडति ॥

व्याख्यायामर्थशास्त्रस्य श्रीमूलाख्यानभाजने ।
षाड्गुण्याख्याधिकरणं सप्तमं समपूर्यत ॥

इति श्री**वञ्चिमण्डलमहाराजा**श्रितस्य ताम्रपर्णीतीरवर्ति**तरुवाग्रहारा**भिजनस्य **श्रीसीताम्बाश्रीरामसुब्रह्मण्यार्य**सूनोर्महामहोपाध्याय**गणपतिशास्त्रिणः** कृतिषु **कौटलीयार्थशास्त्र**व्याख्यायां **श्रीमूलाख्यायां** षाड्गुण्ये सप्तमाधिकरणे अष्टादशोऽध्यायः
मध्यमचरितोदासीनचरितमण्डलचरितानि,
आदितः षोडशोत्तरशततमः ॥
षाड्गुण्यं सप्तममधिकरणं
समाप्तम् ॥

द्वितीयसम्पुटः समाप्तः ।
शुभं भूयात् ।

	RS.	AS.	P.
No. 14—नीतिसारः (Niti) by Kâmandaka, with the commentary of Sankarârya.	3	8	0
No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition).	1	8	0
No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa.	1	8	0
No. 17—पञ्चरात्रम् Do. Do.	1	0	0
No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya.	4	0	0
No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita.	1	4	0
No. 20—अविमारकम् (Nâtaka) by Bhâsa.	1	8	0
No. 21—बालचरितम् Do. Do.	1	0	0
No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa.	1	8	0
Nc. 23—नानार्थार्णवसंक्षेपः (Kcsa) by Kesavaswâmin (Part I. 1st & 2nd Kândas).	1	12	0
No. 24—जानकीपरिणयः (Kâvya) by Chakra kavi.	1	0	0
No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri.	0	12	0
No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa.	0	12	0
No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas).	1	12	0
No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas.	0	8	0
No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda).	2	4	0
No. 30—वास्तुविद्या (Silpa).	0	12	0
No. 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas).	1	0	0

	RS.	AS.	P.
No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II, 3rd, 4th & 5th Sargas)	2	8	0
No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana.	0	8	0
No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râja chûdâmanimakhin.	1	4	0
No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha.	1	8	0
No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas).	3	0	0
No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary.	0	4	0
No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda).	2	0	0
No. 39—चारुदत्तम् (Nâtaka) by Bhâsa.	0	12	0
No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Srî Mankhuka and its commentary by Samudrabandha.	2	8	0
No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda.	0	4	0
No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa.	1	8	0
No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas).	2	8	0

	RS.	AS.	P.
No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Sri Vedottama.	0	4	0
No. 45—प्रपञ्चहृदयम् (Prapanchahridaya).	1	0	0
No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita.	0	8	0
No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvatî. (Part I.)	1	12	0
No. 48— Do. Do. (Part II.)	2	0	0
No. 49—गोलदीपिका (Jyotisha) by Parameswara.	0	4	0
No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla.	3	0	0
No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III. 2nd Kânda 7—10 Vargas)	2	0	0
No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part IV. 3rd Kânda)	1	8	0
No. 53—शब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra	0	12	0
No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana)	0	4	0
No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Srî Mahendravikramavarman.	0	8	0
No. 56—मनुष्यालयचन्द्रिका (Silpa).	0	8	0
No. 57—रघुवीरचरितम् (Kâvya).	1	4	0
No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.)	2	0	0
No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma.	3	4	0
No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Râghavânanda	1	8	0

	RS.	AS.	P.
No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvati (Part IV.)	1	8	0
No. 62—सर्वमतसंग्रहः (Sarvamatasangraha).	0	8	0
No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadîpika of Chitrabhanu (1, 2 and 3 Sargas).	2	8	0
No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha.	1	0	0
No. 65—मयमतम् (Silpa) by Mayamuni.	3	8	0
No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda	2	8	0
No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas)	3	4	0
No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the commentary Tâtparyadîpikâ of Srî Kumara.	2	0	0
No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmânyapâda).	1	8	0
No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I).	2	8	0
No. 71—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara (Part II. 7—12 Patalas).	3	8	0
No. 72—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isanasivagurudevamisra (Part II. Mantrapada)	4	0	0
No. 73—ईश्वरप्रतिपत्तिप्रकाशः (Vedanta) by Sri Madhusudanasarasvati	0	4	0

	RS.	AS.	P.
No. 74— श्रीयाज्ञवल्क्यस्मृतिः (Dharmasâstra) with the commentary Bâlakrîdâ of Visvarûpâchârya. (Part I—Âchâra and Vyavahâra Adhyâyas)	4	0	0
No. 75—शिल्परत्नम् (Silpa) by Srîkumâra (Part I).	3	4	0
No. 76—आर्यमञ्जुश्रीमूलकल्पः (Part II).	3	4	0
No. 77—ईशानशिवगुरुदेवपद्धतिः by Isanasivagurudeva-misra (Part III. Kriyapada 1—30 Patalas).	3	4	0
No. 78—आश्वलायनगृह्यसूत्रम् with the commentary Anavila of Haradattacharya.	5	0	0
No. 79—अर्थशास्त्रम् of Kautalya with the commentary by Mahamahodpahyaya T. Ganapati Sastri (Part I—1 & 2 Adhikaranas).	8	0	0
No. 80—अर्थशास्त्रम् of Kautalya with commentary by Mahamahopadhyaya T. Ganapati Sastri (Part II—3 to 7 Adhikaranas).	8	0	0

Apply to:—

The Curator,

for the publication of Sanskrit Manuscripts,

Trivandrum.